This is a reproduction of a library book that was digitized by Google as part of an ongoing effort to preserve the information in books and make it universally accessible.

Google books

https://books.google.com

Ind L 350.2

Bound

NOV 13 1906

Harvard College Library

FROM THE BEQUEST OF

MRS. ANNE E. P. SEVER,

OF BOSTON,

WIDOW OF COL. JAMES WARREN SEVER,

(Class of 1817)

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

काशीविद्यासुधानिधिः

THE PANDIT.

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES

VOL. XXVII.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1905.

Digitized by Google

IX.60

Digitized by Google

INDEX TO VOLUME XXVII. NEW SERIES.

PÁTANJALA SUTRA VRITTI OF NAGESH BHUTTA ... 1, 121, 289, 417, 487, 711.

PADARTHA DHARMA-SANGRAH... 17, 193, 241, 273, 647.

SHRIBHÁSHYA OF RÁMÁNUJA ... 33, 64, 97, 137, 321, 727.

MEMÁNSÁ NYÁYAPRAKÁSHA ... 65, 225, 257, 337, 449.

VIDHIVIVEKA OF MANDANA MISHRA ... 81, 353, 433, 519, 583, 615.

BRAHMÁMRITAVARSHIṆI ... 209, 305, 385, 401, 471, 503, 535, 599.

BHÁVABODHINÍ TÍKÁ OF JAIDEVA'S PRASANNARÁGHAVA... 369, 455, 567, 663, 695.

ÍSHÁVÁSYOPANISHAT ... 551.

PADÁRTHARATNAMÁLÁ ... 631, 743.

PADÁRTHA TATWANIRÚPAṆA OF RAGHUNÁTHA SHIROMAṆI ... 679.

Digitized by Google

Digitized by Google

Ind L 358.2

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 1.] January 1905. [Vol. XXVII.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1905.

Copyright on each article reserved.

Price Rs. 9 per annum.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अक्षररश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
चित्रमीमांसा, अप्पयदीक्षितकृता तै· श्रीरामशास्त्रिणा संशोधिता	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधित	।=)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतडाक्तरबालण्टैनाचार्य्येणाङ्गलदेशीयभाषायामनूदिता ..	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	=)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्य्येणाङ्गलदेशीयभाषायामनूदितम्	४)
मानवधर्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
भागवतधर्मदीपिका, ...	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	२॥=)
श्रौतपदार्थनिर्वचनम्	३)
भाष्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीकामकौलूकशास्त्रि-संशोधिता	४)
काव्यप्रदीपः, पं· रामशास्त्रिभागवताचार्येण परिशोधितः	२॥।)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
खण्डनखण्डखाद्यं सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	५)

Digitized by Google

Sever Fund (129)

मात्रावच्छिन्नकाल इत्यन्ये । तत्र त्रयो ऽपि द्वादशमात्रावच्छिन्ना इत्यधमः पक्षः । षोडशमात्रावच्छिन्नः पूरकः, चतुःषष्टिमात्रावच्छिन्नः कुम्भकः, द्वात्रिंशन्मात्रावच्छिन्नो रेचक, इति वसिष्ठसंहितायाम् । तेषु क्रमेणोकारमकाराकारमूर्तीनां ब्रह्मविष्णुरुद्राणां ध्यानमप्युक्तं तत्रैव । तदुक्तं भाष्ये एताभिः षोडशादिभिर्मात्रारूपैर्निमेषोन्मेषणादिभिः पूरकाख्यश्वासप्रवेशरूपः प्रथम उद्घातः, प्रथमं वायोर्हननं गतिनिरोधः । एवं प्रथमोद्घातनिगृहीतस्य स्तम्भितस्य वायोश्चतुःषष्ट्यादिमात्रावच्छिन्नः कुम्भको द्वितीय उद्घातः । एवं तृतीयो द्वात्रिंशदादिमात्रावच्छिन्नोऽर्थाद्रेचकः । अत्र भाष्ये प्रथमादिशब्दैः पूरकादिविषये क्रमवचनात्सौत्रः पाठक्रमोऽनुष्ठाने नादर्त्तव्य इत्युक्तम् । अत एव पूरककुम्भकरेचक इत्येवानुष्ठानक्रमः शिष्टानां विकल्पो वा । एवं मृदुमध्यतीव्रभेदा अप्यस्य द्रष्टव्याः । त्रिष्वपि द्वादशमात्रो मृदुः, त्रिष्वपि चतुर्विंशतिमात्रो मध्यः, त्रिष्वपि षट्त्रिंशन्मात्रस्तीव्र, इति कौर्मे । षट्त्रिंशन्मात्रो मन्दः तद्द्विगुणो मध्यस्त्रिगुणस्तीव्र इति मिश्राः । एवं संख्यावृद्ध्या तीव्रतरत्वाद्यप्युन्नेयम् । अत्र देशकालसंख्याभिः परिच्छेदे ऐच्छिको विकल्पो न तु समुच्चयः, समुच्चयानुष्ठाने तु फलभूमेति बोध्यम् । सोऽयं पूरकरेचककुम्भकरूपो देशकालाद्यवधारणैरभ्यस्तो दीर्घसूक्ष्मसंज्ञको भवति अभ्यासेन कालवृद्ध्या दीर्घकालव्यापित्वेन दीर्घो भवति वायुसंचारस्यातिसूक्ष्मतया सूक्ष्मश्च भवति । दीर्घसूक्ष्म इति कर्मधारयः अभ्यस्त इति चार्थाक्षिप्तम् ।

एवं रेचकपूरककुम्भकरूपं भेदत्रयमुक्त्वा प्राणायामस्य, चतुर्थं भेदमाह ।

बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः ॥ ५१ ॥

बाह्याभ्यन्तरविषयौ बाह्याभ्यन्तरवृत्ती पूर्वसूत्रोक्तौ रेचकपूरकौ तयोराक्षेपी तावतिक्रम्य स्वयमेव वर्तमानः, एवं भूतो यः प्राणायामः केवलकुम्भकरूपः स चतुर्थ इत्यर्थः। तथा हि, यो बाह्यविषयो रेचको देशकालसंख्याभिरादौ परिदृष्टः पश्चाच्च देशादिभिः सहैवाक्षिप्तो ऽतिक्रमितो भवति, सूत्रे देशवाचकोऽपि विषयशब्दः कालसंख्ययोरप्युपलक्षणः, तथाऽभ्यन्तरविषयः पूरकोऽपि देशादिभिरादौ परिदृष्टः पश्चाद्देशादिभिः सहैवाक्षिप्तो भवति। स द्विविधोऽपि दीर्घसूक्ष्मश्चिरकालदेशादिभिरभ्यस्तस्तत्पूर्वकस्तदुभयाक्षेपपूर्वकः उभयमाक्षिपतीतियावत् पूर्वपूर्वभूमिकाजयात् कालक्रमेण, न तु शीघ्रमुत्पद्यमानः उभयोः श्वासप्रश्वासयोर्गतिविच्छेदश्चतुर्थः प्राणायामः। स्तम्भवृत्त्याख्यो मिश्रकुम्भकरूपकस्तृतीयप्राणायामस्तु विषयेण देशकालसंख्यारूपेणानालोचितोऽनवधारितः सकृदारब्धोऽभ्यासबाहुल्यं विनैवोत्पद्यमानश्च देशकालसंख्याऽद्यवधारितो दीर्घसूक्ष्मश्च भवतीति सामान्यविशेषाभ्यां द्विविधः। चतुर्थस्तु रेचकपूरकयोर्देशाद्यविषयावधारणानन्तरं क्रमिकभूमिजयाद्धेतोः पूरकरेचकाक्षेपपूर्वकगत्यभाव इत्ययं चतुर्थः प्राणायामस्तृतीयाद्विशेषो विशिष्टः। किं च तृतीयो नियमेन रेचकपूरकयोरन्तराले वर्तत इति न तदतिक्रमो वसिष्ठसंहितायाम्।

प्रस्वेदञ्जनयेद्यस्तु प्राणायामो हि सोऽधमः।
मध्यमः कम्पनात्प्रोक्त उत्थाने चोत्तमो भवेत्॥
पूर्वं पूर्वं प्रकुर्वीत यावदुत्तरसम्भवः।
निःश्वासोच्छ्वासकौ देहे स्वाभाविकगुणावुभौ॥
तथाऽपि नश्यतस्तेन प्राणायामोत्तमेन हि।

Digitized by Google

तयोर्नाशसमर्थः स्यात्कर्तुं केवलकुम्भकम् ॥
केवले कुम्भके सिद्धे रेचकपूरकवर्जिते ।
न तस्य दुर्लभं किंचित् त्रिषु लोकेषु विद्यत इति ।

आकाशगमनशक्त्याविर्भावेन कामगत्वादिकमपि स्यादित्यर्थः । तथा जपध्यानयुतो गर्भो त्वगर्भस्तद्विवर्जित इत्यन्यत्र । तत्रेश्वरगीतायां सव्याहृतिका सप्रणवा गायत्री सशिरस्का त्रिर्जप्येत्युक्तम् । त्रिष्वेकैकवारमित्यर्थः । प्रणवो जप्य इत्यन्यत्र ।

अथ प्राणायामस्य व्यापारं तत्सिद्धिसूचकमाह ।

ततः क्षीयते प्रकाशावरणम् ॥ ५२ ॥

ततः प्राणायामाभ्यासादस्य योगिनो विवेकज्ञानावरकं कर्म क्षीयते, ज्ञानावरकत्वं चास्य पूर्वाचार्यैरुक्तं रागरूपमहामोहप्रचुरेणेन्द्रजालतुल्येन शब्दादिविषयेण प्रकाशशीलं बुद्धिसत्त्वमावृत्य कर्मणाकार्ये संसारहेतुव्यापारे नियुङ्क्त इति । तदस्य प्रकाशावरणं कर्म संसारस्य निबन्धनं प्राणायामाभ्यासाद् दुर्बलं प्रकाशावरणक्षमं भवति, प्रतिक्षणमपचीयते च । तदुक्तं तयोर्न परं प्राणायामात् ततो विशुद्धिर्मलानां पापाख्यकारणाभावान्मलरूपतमसां तत्कार्यविपर्ययाणां चापगमो ज्ञानदीप्तिश्चेति । यद्यपि तप एव पापनाशकं तथाऽपि ज्ञानावरकपापक्षये प्राणायामः श्रेष्ठः, अत एव पूर्वपादे उत्तमाधिकारिणः प्राणायाम एव साधनमुक्तम् ।

अन्यच्च भवतीत्याह ।

धारणासु च योग्यता मनसः ॥ ५३ ॥

प्राणायामाभ्यासादेव मनसो धारणासु योग्यता भवति । प्रच्छर्दनविधारणाभ्यां वा प्राणस्येति पूर्वपादीयसूत्रेण प्राणायामस्य धारणायोग्यतारूपस्थितिहेतुत्ववचनात्तत्रापि पूरकादित्रयात्मक एव प्राणायामो ग्राह्य इति बोध्यम् ।

Digitized by Google

अथ प्रत्याहारमाह ।

स्वविषयासंप्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः ॥ ५४ ॥

इन्द्रियाणां स्वस्वविषयासंप्रयोगकाले चित्तस्वरूपानुकारितेव या भवति स प्रत्याहार इत्यर्थः । जितेन्द्रियस्य हि ध्यानकाले चक्षुरादीनि ध्येयवस्त्वाकारेण चित्तेन तुल्याकाराणीव भवन्ति, न स्वातन्त्र्येण मनसैकीभूय विषयान्तरं सङ्कल्पयन्ति, तथा चित्ते निरोधोन्मुखे प्रयत्नान्तरं विनैव तानि निरुद्धानि भवन्ति, अतस्तस्य तानि चित्तानुकारीणि, अजितेन्द्रियस्य तु तानि तदानीमपि रूपादिषु मनसैव धावन्ति अतश्चित्तमेव तेषामिन्द्रियानुकारि ।

इन्द्रियाणां हि सर्वेषां यद्येकं क्षरतीन्द्रियम् ।
तेनास्य द्रवते प्रज्ञा दृतेः पादादिवोदकमितिस्मृतेः ॥

अजितेन्द्रियस्यापि तानि विषयभोगकाले चित्तानुकारीणीत्यतो "विषयासंप्रयोग" इति । ध्यानकाले चाक्षुषादितुल्या वृत्तिश्चित्तस्यैव भवति, न तु चक्षुरादीनां, तेषां तु तदतिरिक्तवृत्त्यभावमात्रमत "इवे" ति । केन लक्षणेन तदनुकारोऽयं इति चेत् । शृणु । चित्तस्य वृत्तिनिरोधकाले तद्वत्स्वयमेवेन्द्रियाणि निरुद्धवृत्तिकानि भवन्ति, न तु इतरे ये इन्द्रियजया उत्तरसूत्रे वक्ष्यमाणास्तेषु सत्स्वपि यथा स्वनिरोधार्थं प्रत्याहाररूपमुपायान्तरमपेक्षन्ते तथा प्रत्याहारे सति स्वनिरोधाय चित्तनिरोधातिरिक्तं न प्रयत्नकृतमुपायान्तरमपेक्षन्ते । एवं चेदमेव तत्कार्यत्वात्तल्लक्षणम् । कालादिव्यावृत्तये प्रयत्नकृतमिति । तत्र दृष्टान्तः यथा मधुकरराजमुत्पतन्तं मक्षिका अनूत्पतन्ति निविशमानमनुनिविशन्ते, तथा चित्तस्य विषयाभिमुख्ये तान्यपि विषयेषूत्पतन्ति तस्य निरोधे च निरुद्धानीति । एवं च प्रत्याहार इन्द्रियधर्मः ।

अथ प्रत्याहारस्य योगे द्वारभूतं तत्सिद्धिसूचकमाह ।

ततः परमावश्यतेन्द्रियाणाम् ॥ ५५ ॥

ततः प्रत्याहारादिन्द्रियाणां परमो जयो भवतीत्यर्थः । तत्र परमजयज्ञानायानेकप्रकारा जया उच्यन्ते । शब्दादिष्वव्यसनमिन्द्रियजयः । व्यसनं सक्तिर्येन शास्त्रविरुद्धेऽपि विषयभोगे इन्द्रियाणि प्रवर्तन्ते । व्यस्यत्येनं श्रेयस इति व्युत्पत्तेः । एवं च शास्त्राविरुद्धा प्रतिपत्तिरिष्टभोगा न्याय्या इति केचित् । इन्द्रियशब्दादिविषययोः संप्रयोगः स्वेच्छया न तु तत्पारतन्त्र्येणेत्येष इन्द्रियजय इत्यन्ये । रागद्वेषनिमित्तकसुखदुःखादिशून्यः शब्दादिज्ञानरूपो विषयभोग इन्द्रियजयः, आभिमानिकसुखदुःखशून्य इति यावदिति परे । चित्तैकाग्र्याद्धेतोरिन्द्रियाणां याऽप्रतिपत्तिर्वृत्तिनिरोधस्तद्योग्यतैवेन्द्रियजय इति जैगीषव्यः । एतदुक्त एव परमो जयः । उक्तेषु त्रिषूत्तरोत्तरमुत्कर्षेऽपि तावन्मात्रैरिन्द्रियवृत्त्यनिरोधान्न तेषु परमत्वम् । एवं चायमेव पूर्वसूत्रोक्तचित्तानुकारस्य फलं लक्षणं च । एतदभावेनैव सौभर्यादीनां योगभ्रंशः श्रूयते । एवं ज्ञानसाधनमुखेन बहिरङ्गाणि यमादिप्रत्याहारान्तानि पञ्च योगाङ्गान्युक्तानीति शिवम् ।

इति पातञ्जलसूत्रवृत्तौ साधननिर्देशो नाम द्वितीयः पादः ।

अथ धारणामाह ।

देशबन्धश्चित्तस्य धारणा ॥ १ ॥

यत्र देशे ध्येयं चिन्तनीयं तत्र ध्यानाधारदेशविशेषे चित्तस्य बन्धस्तदैकाग्र्यं सा धारणेत्यर्थः । तथा हि । नाभिचक्रे हृदयपुण्डरीके मूर्धस्थे ज्योतिषि नासिकाऽग्रे इत्येवमादिदेशेषु, बाह्ये वा विषये चन्द्रसूर्याग्न्यादौ ईश्वरदेवताऽऽदिध्यानदेशे चित्तस्य वृत्तिमात्रेण, न तु ध्येयकल्पनया बन्धो धारणेति । तदुक्तम्,

प्राग्नाभ्यां हृदये चाथ तृतीये च तथोरसि ।
कण्ठे मुखे नासिकाऽग्रे नेत्रभ्रूमध्यमूर्धसु ॥
किं चित्तस्मात्परस्मिंश्च धारणा दश कीर्तिताः ।

मुखे जिह्वाग्रे । परस्मिन्निति मूर्ध्न उपरि द्वादशाङ्गुलमिते देशे । लिङ्गशरीरस्य सप्राणस्य तावत्पर्यन्तं प्रदीपशिखावदवस्थानाद् अवहिते- स्तावत्पर्यन्तं लिङ्गशरीरानुगतोष्मोपलम्भाद् राज्ञः सिंहासनवदेतानि नाभ्यादीनि जीवेश्वरयोर्मुख्यस्थानानि । वृत्तिमात्रेणेत्युक्तेर्ध्यानादि- व्यावृत्तिः । यस्य त्वादावेवेश्वरानुग्रहादपरिच्छिन्नतया जीवेश्वरयोगो भवति तस्य नैतद्द्वारेणोपयोगः । तस्य हि सैव धारणा । धारणासा- मान्ये द्वादशप्राणायामपरिच्छिन्नकालावच्छिन्नत्वं विशेषणम्, अन्यथा क्षणमात्रेणापि धारणाऽऽपत्तेः ।

अथ तत्साध्यं ध्यानं लक्षयति ।

तत्र प्रत्ययैकतानता ध्यानम् ॥ २ ॥

तत्र देशे ध्येयचतुर्भुजमूर्त्याद्यालम्बनस्य प्रत्ययस्यैकतानता प्रत्ययान्तरापरामृष्टः सदृशः प्रवाहः स ध्यानमित्यर्थः । एतद् द्वाद- शधारणापरिच्छिन्नकालावच्छिन्नं, तावत्कालावच्छिन्नं जीवेश्वरविषयं वा पूर्ववत् ।

Digitized by Google

अथ तत्साध्यं समाधिमाह ।

तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ॥ ३ ॥

मात्रपदं स्वरूपशून्यमिवेत्यनेन विवृतम् । ध्यानमेव यदा ध्येयाकारेणैव साक्षिणि निर्भासते चित्तस्य ध्येयस्वरूपावेशेनाहमिदं चिन्तयामीत्येवंप्रत्ययाकारवृत्त्यन्तरानुदयाद् वृत्त्यंशाभानाद्वा प्रत्ययात्मकेन स्वरूपेण शून्यमिव भवति तदा समाधिरित्युच्यते । वस्तुतो ध्यानस्वरूपस्य सत्त्वादिवेति । इदं च लक्षणं पूर्वसूत्रोक्तध्यानविशेषणतया देशघटितत्वेनापरिच्छिन्नसमाध्यव्यापकम्, अतोऽर्थमात्रावभासनं चिन्तनमित्येव समाधिसामान्यलक्षणं समाधिर्ध्यानद्वादशगुणितकालावच्छिन्नो द्रष्टव्यः । अस्य समाधिरूपस्याङ्गस्याङ्गिनः संप्रज्ञातयोगादयं भेदः, यदत्र चिन्तारूपतया निःशेषतो ध्येयस्वरूपं न भासते, संप्रज्ञाते तु साक्षात्कारेण समाध्यविषया अपि विषया भासन्त इति । एवं च साक्षात्कारयुक्तैकाग्र्यकाले संप्रज्ञातयोगोऽन्यदा तु समाधिमात्रमिति विभागः ।

ध्यानादित्रयस्य संज्ञाविशेषमाह ।

त्रयमेकत्र संयमः ॥ ४ ॥

एतद् ध्यानधारणासमाधिरूपं त्रयमेकविषयं चेत्तदा संयम इति तान्त्रिकी संज्ञा । एषामष्टानामङ्गानां फलं संप्रज्ञातयोगस्तद्द्वारा ऽसंप्रज्ञातयोगश्चेति बोध्यम् ।

संयमानुष्ठानविशेषे फलविशेषमाह ।

तज्जयात्प्रज्ञाऽऽलोकः ॥ ५ ॥

तस्य संयमस्य जयात् स्थैर्यात्समाधिप्रज्ञाया आलोको दीप्तिवृद्धिः क्रमेण भवति । यथा यथा च संयमः स्थिरपदो भवति तथा तथा समाधिप्रज्ञा विशारदा भवति । वैशारद्यं च सूक्ष्मव्यवहिताद्यर्थानां प्रत्यक्षीकरणसामर्थ्यम् ।

संयमानुष्ठाने विशेषमाह ।

तस्य भूमिषु विनियोगः ॥ ६ ॥

तस्य संयमस्य जितस्थूलादिपूर्वपूर्वभूमेरनन्तरायां सूक्ष्म-सूक्ष्मतराद्युत्तराभूमयस्तासु विनियोगः कार्यः । न च क्रमेण भूमिका-ऽऽरोहे मानाभावः । प्रान्तभूम्यपेक्षयाऽधरा भूमिरजिता येन तस्य योगिनोऽनन्तरां भूमिं विलङ्घ्य व्यवहितोत्तरभूमिषु संयमलाभाभावाद् धनुर्धरादिष्वस्थूलवेधानन्तरमेव सूक्ष्मवेधादिदर्शनात् सोपानारोहणा-दिक्रमेणैवारोहादिदर्शनाद् अन्यथाऽधःपातात्, संयमालाभे च कुतः प्रज्ञाऽऽलोकस्तनद्भूमिषु स्यात् ।

स्थित्यर्थं मनसः पूर्वं स्थूलरूपं विचिन्तयेत् ।

तत्र तन्निश्चलीभूतं सूक्ष्मेऽपि स्थिरतां लभेदिति स्मृतेः ।

अयं च क्रम औत्सर्गिकः । ईश्वरप्रसादादेव जितप्रकृतिपुरुषा-दिविवेकभूमिकस्य नाधरभूमिषु "प्रत्यये परचित्तज्ञानमि"त्याद्यागामि सूत्रबोध्येषु परचित्तज्ञानादिषु पिण्डादिस्थूलेषु वा संयमस्य फलाभा-वाद्, अधरभूमिसंयमप्रयोजनस्योत्तरभूम्यारोहस्येश्वरानुग्रहादेव प्राप्त-त्वात् । न चोत्सर्गिकक्रममुल्लङ्घ्य कथमुत्तरभूमावादावेव संयमा-रम्भः । युञ्जानेनादौ सर्वोत्कृष्टभूमौ संयममारभ्य तस्यां स्वस्यायोग्य-तामनुभूयैवाधराधरभूमिषु योग्यतामवधार्य चित्तस्य धारणीयत्वात् । न चेयमस्या अनन्तरा भूमिरिति कथं निश्चेयम् । योगबलेनैव निश्चयात् । तदुक्तम्—

योगेन योगो ज्ञातव्यो योगो योगात्प्रवर्तते ।

योऽप्रमत्तस्तु योगेन स योगे रमते चिरमिति ॥

अप्रमत्तः सिद्धावलम्पटः ।

आवश्यकत्वबोधनाय योगाङ्गेषु विशेषमाह ।

त्रयमन्तरङ्गं पूर्वेभ्यः ॥ ७ ॥

Digitized by Google

तदेतद्धारणाध्यानसमाधिरूपं त्रयं संप्रज्ञातयोगस्यान्तरङ्गं यमादिभ्यः पञ्चभ्य इत्यर्थः । एवं ज्ञानस्याप्येतत्त्रयमन्तरङ्गम् । अन्तरङ्गत्वबीजं तु ध्येयातिरिक्तवृत्तिनिरोधरूपे संप्रज्ञाते ध्येयसंयमस्य विषयान्तरसंचाररूपत्वात् साक्षात्कारणत्वम् । एवं ध्येयसाक्षात्कारेऽपि विषयान्तरसञ्चाराख्यप्रतिबन्धनिवृत्तिद्वारा साक्षादेव कारणं, प्रत्याहारान्तपञ्चकस्य तु चित्तस्थैर्यद्वारा परम्परयैवोभयत्र कारणत्वमिति । यस्य तु प्राचीनकर्मवशात् स्वत एव चित्तं संयमशीलं तस्य नास्तीतराङ्गापेक्षा, यथा जडभरतशिशुपालादेः । अत एव तेषां प्रधानसमाधिविघ्नतया बाह्यकर्मत्यागोऽपि । यत्तु

विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।

अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुत इति ॥

इत्यादौ ज्ञानकर्मणोः साहित्यमुक्तं, तदङ्गाङ्गिनोरौत्सर्गिकं सहानुष्ठानमभिप्रेत्य; न तु मोक्षे तुल्यवत्समुच्चयमभिप्रेत्य । अविद्यया मृत्युं तीर्त्वेतिपदेन ज्ञानविप्लवनिवृत्तिरूपमृत्युतरणद्वारैव कर्मणो विद्यया मोक्षे जननीये उपयोगावगमात् ।

न केवलेन योगेन प्राप्यते परमं पदम् ।

ज्ञानं तु केवलं सम्यगपवर्गफलप्रदमि-

त्यादि वाक्यैर्योगशब्दोक्तकर्मनिरपेक्षाज् ज्ञानयोगादपि मोक्षसिद्धेः । अङ्गत्वं तु पूर्वजन्मानुष्ठितकर्मकाण्डेऽपि जडभरतादिषु सिद्धमिति दिक् ।

तदपि बहिरङ्गं निर्बीजस्य ॥ ८ ॥

तदप्यन्तरङ्गं साधनत्रयमपि निर्बीजस्यासंप्रज्ञातस्य योगस्य बहिरङ्गम् । विवेकख्यातिपरवैराग्यद्वारा परम्परया हेतुत्वेनावश्यकत्वाभावात् । पूर्वोक्तविदेहप्रकृतिलयानां देवविशेषाणामौत्पत्तिकज्ञान-

वैराग्याणां संयमाभावेऽपि दैनंदिनप्रलयादावसंप्रज्ञातस्योदयात् । योगनिद्रां यदा विष्णुरित्यादिस्मृतेः ।

अथाङ्गसमाधिकालिकचित्तपरिणामापेक्षया योगद्वयकालिकनिरोधावस्थचित्तक्षणेषु गुणानां वृत्तस्य व्यापारस्याप्यस्थिरत्वात् त्रिगुणात्मकस्य चित्तस्य परिणामावश्यकत्वेन जायमानः परिणामः कीदृशस्तत्राह ।

व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः ॥ ९ ॥

असंप्रज्ञातापेक्षया संप्रज्ञातोऽपि व्युत्थानं, निरोधश्च योगद्वयसाधारणः, अन्यथा संप्रज्ञातनिरोधस्य परिणामाकथनान्न्यूनताऽऽपत्तेः । व्युत्थानसंस्कारा अपि चित्तधर्माः। एवं निरोधसंस्कारा अपि तद्धर्माः । तत्राद्यानामभिभवः क्रमेण ह्रासो दाहः, निरोधसंस्काराणां च प्रादुर्भावः क्रमेण वृद्धिः, एतौ निरोधकालिकश्चित्तस्य परिणामः, स च निरोधक्षणचित्तान्वयः प्रत्येकं निरोधक्षणेष्वेकस्मिन् स्थिरे चित्तेऽन्वयो यस्य । अनेन चित्तस्थैर्यं प्रतिक्षणमीदृशः परिणामश्च लब्धः । यद्यपि निरोधो न संप्रज्ञाते संस्कारजनकस्तथाऽपि तत्कालीनप्रज्ञाजन्यसंस्कार एव तथोक्तः । ननु तन्तुनिरोधेन पटनिरोधवद् वृत्तिनिरोधेनैव तत्कार्यसंस्काराणामपि निरोधोपपत्तौ किं व्युत्थानसंस्काराभिभवस्य पृथगुक्त्येति चेन्न । संस्काराणां वृत्तिरूपप्रत्ययानुपादानकत्वेन तन्निरोधने तेषां निरोधाभावात् । न हि निमित्तकारणनाशेन कार्यनाशः तस्माद् वृत्तिनिरोधेऽपि तत्संस्कारनिवृत्तौ कारणं निरोधसंस्कारप्रचयरूपं पृथगेवापेक्ष्यमिति दिक् ।

अथ निरोधसंस्कारे प्रमाणमाह ।

Digitized by Google

तस्य प्रशान्तवाहिता संस्कारात् ॥ १० ॥

तस्य निरोधाख्यस्य चित्तस्य, प्रशान्तवाहिता निश्चलनिरोधधारया वहनं निरोधसंस्काराभ्यासपाटवादेव भवति । तत्संस्कारमान्द्ये व्युत्थानजसंस्कारेण निरोधसंस्काराभिभवादित्यर्थः ।

इदानीं निरोधरूपयोगद्वयपरिणामापेक्षया विलक्षणं योगाङ्गसमाधिकार्यं परिणाममाह ।

सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः ॥ ११ ॥

सर्वार्थता विक्षिप्तता चित्तधर्मस्तस्याः प्रतिक्षणं क्षयस्तिरोभावः, एकाग्रतायाः एकमात्रविषयतायाः उदय आविर्भावः मुख्यक्षयोदययोरत्यन्तोच्छेदनिष्पत्तिरूपयोरेकदा न भवनं, किं तु क्रमेणैवेत्यतो ह्रासवृद्धिरूपतिरोभावाविर्भावावुक्तौ । चित्तस्य धर्मित्वेनानुगमात्तौ चित्तधर्मावुक्तौ एतौ समाधिकालिकचित्तपरिणामः, धर्मद्वारा धर्मिण एव परिणामादित्यर्थः । तदिदं चित्तं स्वात्मभूतयोः स्वकार्ययोः सर्वार्थतैकाग्रतयोर्धर्मयोरपायकाले उपजनकाले चानुगतं यत्समाधीयते स चित्तस्य समाधिपरिणाम इत्याशयः ।

इदानीं समाहितचित्तस्य परिणाममाह ।

ततः पुनः शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः ॥ १२ ॥

ततः विक्षिप्ततायाः सर्वात्मना क्षयोत्तरं शान्तोदिता अतीतोऽत्पद्यमानो तुल्यप्रत्यया एकाकारो प्रत्ययो चित्तस्यैकाग्रताकालीनः परिणाम इत्यर्थः । सजातीय एकैकः प्रत्ययो नश्यत्यन्योन्य उत्पद्यत इत्येवं परिणाम इत्याशयः । तदुक्तम् ।

भाष्ये, समाध्यारूढचित्तस्य पूर्वप्रत्ययः शान्त उत्तरस्तत्सदृश

उदितः समाहितश्चित्तमुभयोरनुगतं पुनस्तथैव धारावाहिकैकाग्रसंतानमासमाधिभ्रंशात् सोऽयं धर्मिणश्चित्तस्यैकाग्रतापरिणाम इति समाध्याह्वेत्यनेनोक्तसमाधीयमानचित्तपरिणामाद्भेदो दर्शितः ।

इदानीं वैराग्याग्निप्रज्वलनाय "परिणामत्रयसंयमादि" त्यागामिसूत्रोपोद्घातसङ्गत्या चित्तवदेवान्येष्वपि परिणामानतिदिशति ।

एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः ॥ १३ ॥

एतेन पूर्वोक्तेन चित्तपरिणामेन धर्मलक्षणावस्थारूपेण भूतेन्द्रियेषु धर्मपरिणामो लक्षणपरिणामोऽवस्थापरिणामश्चोक्तो ज्ञेयः । भूतेन्द्रियेषु एत एव परिणामा न तु तत्त्वान्तरपरिणाम इत्याशयेन प्रकृत्यादिष्विति नोक्तं, तेन प्रकृत्यादिषु तत्त्वान्तरपरिणामवदेतेऽपि बोध्याः । ननु चित्तपरिणाम एव पूर्वसूत्रेषूक्तो न तु धर्मलक्षणावस्थापरिणाम इति चेत् । शृणु । व्युत्थाननिरोधयोर्धर्मयोरभिभवप्रादुर्भावावेव चित्ते धर्मिणि धर्मपरिणामः प्रथमसूत्रेणैवोक्तः, अवस्थितधर्मिणः पूर्वधर्मतिरोभावे धर्मान्तरप्रादुर्भावस्यैव धर्मपरिणामत्वात् । यद्यपि तत्सूत्रे तत्संस्कारयोरेव तावुक्तौ तथाऽपि कारणं विना कार्यासम्भवात्तयोरपि तावर्थत उक्तावेव । धर्मश्च द्रव्यं गुणो वेत्यन्यत् । एवं तत्रैव सूत्रेऽभिभवप्रादुर्भावशब्दाभ्यां धर्मस्य लक्षणपरिणामोऽप्युक्तः । अतीततावर्तमानतयोरेवाभिभवप्रादुर्भावत्वाद् अनागतत्ववर्तमानत्वातीतत्वानि च क्रमेण सम्बन्धादध्वतुल्यतयाऽध्वेत्युच्यन्ते । तथा धर्मधर्मिणोर्धर्माणां चान्योन्यं व्यावर्तकतया लक्षणशब्देन च तत्र निरोधस्त्रिलक्षणस्त्रिभिरध्वभिर्युक्तः, स खलु निरोधः प्रादुर्भावकालेऽनागतलक्षणरूपं प्रथमाध्वाख्यं हित्वा धर्मत्वमनतिक्रान्तो वर्तमानलक्षणं प्राप्तः सत्कार्योपपत्तये धर्मपरिणामस्योपपत्तये च धर्मत्वमन-

तिक्रान्त इत्युक्तं स्वरूपेण स्थितस्य धर्मस्य रूपान्तरापाये रूपान्त-
रोत्पत्तौ धर्मपरिणामव्यवहाराद् वर्त्तमानत्वप्राप्तौ चास्य स्वरूपेणो-
पलब्धिः। अथापि अतीतानागताभ्यां न विमुक्तः, असदुत्पादसद्विनाशयोः
प्रतिषेधात्। एषोऽस्य द्वितीयोऽध्वाख्यः। अस्मिन्नेव समये व्युत्थान
स्यातीतलक्षणस्तृतीयोऽध्वा ततः पुनर्व्युत्थानं जायमानं वर्त्तमानल-
क्षणाध्वानं प्रपद्यतेऽनागतलक्षणं प्रथमाध्वाख्यं हित्वा, तच्च व्यत्ययन्त-
रमेव, अतीतव्यक्तेः पुनरनुत्पादस्य वक्ष्यमाणत्वात्। यथास्य स्वरू-
पेणाभिव्यक्तावर्थक्रियारूपो व्यापारो भवति अस्यामवस्थायां निरो-
धस्यातीताख्यस्तृतीयोऽध्वा, एवं पुनर्निरोधः पुनर्व्युत्थानमिति अप-
वर्गपर्यन्तं परिणामचक्रमावर्त्तते। एवं तेषामवस्थापरिणामः प्रशान्तवा-
हितासंस्कारादिति सूत्रोक्तो दर्श्यते। तथावस्था घटस्य नवपुराणत्व-
वत् संस्कारस्य बलवत्त्वदुर्बलत्वरूपौ वृद्धिह्रासौ न तूत्पत्तिविनाशौ
लक्षणपरिणामाद्भेदानुपपत्तेः, लक्षणस्यैव नवपुराणत्वादिना ऽवस्थापरि-
णाम इतिवक्ष्यमाणत्वाच्च। तत्र निरोधक्षणेषु निरोधसंस्काराणां बल-
वत्त्वं व्युत्थानसंस्काराणां दुर्बलत्वमित्येष धर्माणामवस्थापरिणामः द्रव्य-
स्य ह्रासवृद्धिवद्गुणानामपि तौ रूपादीनामपि वृद्धिह्रासदर्शनात्। रूपभे-
दकल्पने गौरवात् तदेव रूपमिदानीं प्रवृद्धमिति प्रत्यभिज्ञाऽनुपपत्ते-
श्च। ज्ञानेच्छाऽऽदीनां द्विक्षणस्थायित्वेऽपि द्वितीयक्षणे वर्त्तमानलक्षणा
वस्थापरिणामो भवति। क्षणत्वेनैव परिणामहेतुत्वात्। सर्ववस्तूनां
प्रतिक्षणपरिणामस्य वक्ष्यमाणस्यानुपपत्तेश्च। एतेनोत्तरवृत्तिविशेषगुणा-
स्यैव ज्ञानादिनाशकत्वेनैकाग्रतादशायां ज्ञानस्य बहुक्षणावस्थायित्वाच्च
तस्य नावस्थापरिणामसंभव इत्यपास्तम्। तत्र धर्मिणां धर्मैः परिणा-

Digitized by Google

मा, धर्माणाम् अध्वनां लक्षणैः परिणामो, लक्षणानामप्यवस्थाभिरिति बोध्यम्। यद्यप्यवस्थानामपि बाल्यादीनां लक्षणपरिणामोऽस्ति, तथाऽप्युक्तक्रमे नानुपपत्तिः। अतीतानागतलक्षणयोर्वर्तमानलक्षणस्य नवपुराणत्वादिवत् शीघ्रभविष्यत्ताविलम्बभविष्यत्त्वादिरूपा अवस्था अनुमीयन्ते, सत्त्वादिवद् गुणत्वेन प्रतिक्षणपरिणामित्वसिद्धेः। एवं धर्मलक्षणावस्थापरिणामैः शून्यं क्षणमपि गुणवृत्तं सत्त्वादिव्यापारो नावतिष्ठते, किं तु प्रतिक्षणं परिणामं जनयत्येव, गुणानां चाञ्चल्यस्वभावत्वाद्। यतः प्रतिक्षणमेव व्यापारो दृश्यतेऽतो गुणस्वभावतैव सत्त्वादीनां प्रतिक्षणप्रवृत्तौ प्रमाणमुक्तं पूर्वाचार्यैरिति दिक्। गुणत्वं च परस्य भोगापवर्गहेतुत्वम्। एवं भूतेन्द्रियेषु धर्मधर्मिभेदमाश्रित्य त्रिविधः परिणामो ज्ञेयः। तद्यथा पृथिव्यादीनां धर्मिणां घटादिर्धर्मपरिणामः तेषां च धर्माणां वर्तमानताऽतीतते लक्षणपरिणामः, लक्षणानां च क्षणानामपि बाल्ययौवननवपुराणत्वादिरवस्थापरिणाम इति। एवमिन्द्रियाणामपि धर्मिणां तत्तन्नीलाद्यालोचनं धर्मपरिणामः। धर्मस्य च वर्तमानताऽऽदिलक्षणः, तस्य च रत्नाद्यालोचने स्फुटत्वास्फुटत्वादिरवस्थापरिणाम इति। न च त्रयोऽपि कथं भूतेन्द्रियेषूक्तेषु धर्मिषु धर्ममात्रपरिणामादिति वाच्यम्। परमार्थतः सर्वेषां धर्मिपरिणामत्वात्। धर्माणां धर्मिस्वरूपादत्यन्तमनतिरेकात्। धर्मादिद्वारा च धर्मिविक्रियैवान्तरभेदैः प्रपञ्च्यत इति बोध्यम्। न च प्रतिक्षणपरिणामे क्षणिकत्वप्रसङ्गः, धर्मिणि सत एव धर्मस्यातीतानागतवर्तमानेष्वध्वसु धर्मिणो धर्मान्यथात्वरूपभावान्यथात्वस्यैव जननेन द्रव्यान्यथात्वाभावात्। स्वरूपान्यथात्वे हि प्रतिक्षणं परिणामेन क्षणिकत्वापत्त्या प्रत्यभिज्ञाऽनुपपत्तिः। न तूक्तरीत्या भावान्यथात्वे। यथा स्वर्णे भाजनस्य भित्त्वाऽन्यथाक्रियमाणस्य भाजनताऽऽदिरूपधर्मापायकटकादिधर्माभिव्यक्तिरूपभावान्यथात्वमेव, न तु सुवर्णान्यथात्वं प्रत्यभिज्ञाबलेन स्वर्णसामान्यस्य सर्वविकारानुगतस्य सिद्धेः, तत्स्था-

Digitized by Google

मान्यं चावयविरूपो धर्मीति । न चावयवसंयोगनाशात् पूर्वस्याव्यक्तेर्नाश एव, प्रत्यभिज्ञा तु जातिविषयेति वाच्यम् । प्रतिक्षणमवयवोपचयापचयाभ्यामवयवसंयोगविभागावश्यकत्वेन सर्ववस्तूनां क्षणिकताऽपत्तेः । जात्यैव सर्वत्र प्रत्यभिज्ञोपपत्तौ घटादीनामपि तथास्थैर्यानुपपत्तेश्च, तस्माद्विजातीयोऽवयवविभाग एव द्रव्यनाशहेतुरिति न दोषः ।

तत्र धर्मपरिणामस्वीकारे बौद्धः प्रत्यवतिष्ठते, धर्मी धर्मेभ्यो नातिरिक्तः पूर्वतत्त्वस्य धर्मिणोऽनतिक्रमेण कूटस्थत्वापत्तेः । धर्मिणो धर्मेष्वन्वयित्वे हि पूर्वापरसकलावस्थाभेदेष्वनुगततयाऽतीताद्यवस्थायामपि सत्त्वप्रसङ्गेन धर्मी कौटस्थ्येनैव तिष्ठेत्, चितिशक्तिवत् नित्यत्वकूटस्थत्वयोरेकार्थत्वात्तच्च तथाप्यनिष्टमतोऽत्यन्ताभिन्न इति धर्मपरिणामाप्रसिद्धिरिति तन्न । सर्वथा स्वरूपतो धर्मतश्च नित्यत्वस्यैव कौटस्थ्येन तस्य च चितिशक्तावेव सत्त्वं, न तु धर्मरूपेणानित्ये धर्मिणीत्यदोषात् । विकारव्यावृत्तं प्रकृतेर्नित्यत्वं च स्वतोऽतीतानागतावस्थाशून्यत्वं तदेतत्त्रैलोक्यं कार्यकारणात्मकं चतुर्विंशतितत्त्वरूपं यथायोगं धर्मरूपेण स्वतश्च वर्तमानावस्थारूपव्यक्तेरपैति । नैवेह किञ्चनाग्र आसीद् इत्यादिश्रुत्या यत्सावयवं तदनित्यं घटादिवदित्याद्यनुमानैश्च कपालशर्कराचूर्णाद्यवस्थायां व्यक्तो घट इत्यप्रतीतेश्चार्थक्रियाऽदर्शनाच्चानित्यत्वप्रतिषेधाद् अतीतमपि सूक्ष्मरूपेणास्ति नात्यन्तमुच्छिद्यते, तद्धेदं तर्ह्यव्याकृतमासीद् इति श्रुत्याऽत्यन्तोच्छेदरूपविनाशप्रतिषेधेन विनाशित्वे सत्यनादिभावत्वानुपपत्तेः । असदुत्पादे शशशृङ्गाद्युत्पादे शशशृङ्गाद्युत्पत्तिप्रसङ्गाच्च अत्यन्ततुच्छस्य कदाऽप्यर्थक्रियाकारित्वाभावाच्च । यद्यप्यतीतव्यक्तेर्न पुनरुत्पादस्तथाऽपि तज्जातीयसत्तामात्राविनाशित्वं बोध्यम् । न च सत्त्वे उपलब्ध्याऽऽपत्तिः । विकारजातस्य स्वकारणेषु प्रकृत्यादिषु विभागलक्षणात्संसर्गात् । अव्यक्त-

ताद्रूप्यसौक्ष्म्येणानुपलब्धेः, सूक्ष्मतया लौकिकसाक्षात्कारप्रति बन्धकत्वात्। एवं च सर्वेषां परिणामिनां नित्यानित्योभयरूपत्वव्यवस्थापनात्सदसत्त्वं सिद्धान्तः। अत एव जडानां व्यावहारिकसत्त्वं स्मृतिषु गीयते, उक्तरूपमेव च व्यावहारिकसत्त्वम् एकान्तनित्यत्वरूपपारमार्थिकसत्त्वमेव च प्रतिषिध्यते। इत्थमेव।

नासद्रूपं न सद्रूपं माया नैवोभयात्मिका

सदसद्भ्यामनिर्वाच्या मिथ्याभूता सनातनी।

त्यादि सङ्गच्छते। मायाऽऽख्यजगत्कारणस्यापि विनाशेन पारमार्थिकात्यन्ततुच्छत्वमङ्गीकुर्वतां सनातनत्ववचनविरोधः।

वस्तुतस्तु प्रधानस्यापि जातिरूपेणैवैकत्वाभ्युपगमात् प्रतिपुरुषं भेदेन मुक्तपुरुषीयस्यात्यन्तोच्छेदेऽपि जात्यैव सनातनत्ववचनाविरोध इति दिक्।

अथ लक्षणपरिणाम उच्यते। एकस्य नित्यत्वं विनाऽतीतानागतलक्षणयोगासम्भवाद्विध्वसु वर्तमानत्वरूपलक्षणवान् धर्मोऽतीतलक्षणयुक्तोऽनागतवर्तमानाभ्यां सूक्ष्माभ्यामवियुक्त, एवमनागतलक्षणयुक्तो वर्तमानातीतलक्षणाभ्यामवियुक्तो, वर्तमानलक्षणोऽतीतानागतलक्षणाभ्यामपि युक्त इति धर्मा इव लक्षणान्यपि नित्यानीति नात्यन्तासदुत्पत्तिसदत्यन्तोच्छेदयोः प्रसङ्गः। न चैकलक्षणाभिव्यक्तिकाले लक्षणान्तरयोरनुपलम्भादभाव एवेति वाच्यम्। पुरुषस्य एकस्यां स्त्रियां रागकालेऽन्यासु विरक्त इति व्यवहाराभावेनैकविषयरागाभिव्यक्तिकालेऽपि विषयान्तररागस्यात्यन्तमभावाभावेन विषयान्तररागीयानागतलक्षणस्यानुमानेन सिद्धेः। एवं जातरागायामपि अयमस्यां रागाभाववानित्यप्रतीतेरतीतलक्षणस्याप्यनुमानं बोध्यम्। अत्रापि जात्यैव नित्यत्वं बोध्यम्।

अत्र केचित् सर्वस्यानागतादेः सर्वलक्षणयोगेऽनागतादिकमपि वर्तमानं स्यादित्यध्वसंकरः प्राप्नोति।

because the touch felt in the Air is neither hot nor cold, like the touch of the jar (while the touch of Water and Fire are distinctly cool and warm). Nor lastly, could the Touch be regarded as belonging to the incorporeal Substances,—*Akāça*, Time and Space; because Touch is always found to exist in corporeal substances. Then, if the touch belonged to the Mind, then like the atoms, Mind would have the character of producing products homogenous to itself; as a matter of fact however we find that Mind has not produced any touch products. Consequently, the Touch could not belong the Mind. Thus then, the only substance that could be regarded as the substratum of Touch is Air, and Air only.

Similarly too, Sound also an is indication of the existence of of Air. For instance, we often hear of a rustling sound appearing, all on a sudden, among the leaves of trees; and we conclude that the sound must be primarily due to the conjuuction of a substance that is endowed with touch, because it is an initiative sound related to a substance whose component particles are not separated, like the sound proceeding from the drum struck by a stick. That which has this Touch is the Air; as *Akāça* and the other substances have no Touch. And if the sound were due to the coloured substances,—Earth, Water or Fire—then it would be visible to the Eye. We have added the proviso—'that which is related to a substance of which the constituent particles are not separated'—with a view to set aside the sound produced by disjunction. Similarly, the existence and continuance, of leaves and other things in the sky must be regarded as due to the conjunction of a substance capable of tactile perception,—because it is a *continuance* in the absence of any such impelling agency as that of effort or speed—just as we find in the case of leaves floating on the Water. This substance capable of tactile perception cannot be either Earth or Water or Fire; because the Touch is not visible. Hence this substance must be regarded as something totally distinct from these three. We have added the proviso—'in the absence of effort and speed'—with a view to differentiate the existence or continuance of the arrow and the bird. Then again,

Digitized by Google

the peculiarly qualified Shaking of trees must be due to the conjunction of a substance capable of being perceived by the organ of Touch,—because it is a qualified Shaking,—like the shaking of the *vētusa* tree caused by the swift current of the river. It might be argued that the premiss does not apply to the case of the trembling of the Earth during Earth-quakes. But it is not **Page 47.]** so; as Earth-quakes are due to a different cause altogether; and it is only a *qualified* shaking (*i. e.* shaking of substances found to be qualified by the connection of something else) that can be regarded as a reason for the existenee of a conjunction with a tactile substance.

Objection: "The substance inferred from sound and the other indications, is the same as that inferred from Touch, and there is not a distinct substance inferred from each of the indications enumerated; under the circumstances what are your proofs for asserting that the existence of Air is indicated by Sound, Steadiness and Shaking?"

Reply: The proof for this lies in the fact that, in as much as Sound, Steadiness and Shaking can be reasonably attributed to the substance that has been inferred from Touch, there can be no reason for the assumption of other substances.

The author now points out the property of Air:—*It has the character of moving horizontally.* It is capable of moving the clouds from one place to the other, of keeping them suspended and of counteracting the force of their gravity, and also of making them rain. It is Air again which moves chariots and boats.

In as much as there is always a doubt as to the singleness or multiplicity of such inferred substances as the *Ākāçā* and the like, with a view to remove this doubt in the case of Air, our author adds—*though it is imperceptible &c.* He points out where "collapse" is perceptible; whenever there is a collision of two winds operating in opposite directions, they stop each other's motion; and it is this collision tending to deaden their velocity that is called "collapse." And it is this from which we iufer the

Digitized by Google

fact of the wind being many; as there could be no collision (which is a kind of conjunction) of a single thing by itself. In as much as two winds blowing in the same direction, one after the other, do not collide,—the text adds—*blowing in different directions with contrary action*. And as there would be no actual collision between the two if they were of unequal force—the stronger forcing its way over the weaker and blowing in its original direction—the author has added; *blowing with equal velocity*.

In as much as the conjunction in question would be as imperceptible as their multiplicity, the text proceeds to show that the collision too is inferred from the upward going of two corporeal substances in the shape of the Air rising up, the process of reasoning being that—the rising of the winds must be due to their stiking against each other, because it is an upward motion of substances naturally having a horizontal motion, and no other cause for such upward motion is possible under the circumstances, just like the rising of the waves of water striking against one another. Instead of using the expression '*avayavinoh*' ('substance made up of certain constituent parts), the author has used the expression '*sāvayavinoh*' (the things made up of partite substances'), with a view to include the Air in the gross perceptible form only—the epithet '*sāvayava*' ('partite') being applicable to the subtile constituents of Air (f. i., the diad of Air, which also is made up of constituent atoms and hence as such can be called '*sāvayava*' though it is not perceptible); specially as a substance that is atomic in its dimensions cannot have the power of moving such things as the tuft of grass and the like. As the upward rising of the winds would also be imperceptible, the author adds that the rising is inferred from the rising up of tufts of grass &c.

The author now describes the real form of '*Prāaṇ*' which is known, by ordinary men and also in the works on yoga, as something totally distinct from Air in the shape of ordinary objects. The Breath exists within the body.—that is to say

'Breath' is the name that is given to the Air in the body. The useful purpose served by this Breath is that *it moves about the liquid and solid materials, as also the refuse substances of the body.* By the word 'liquid' here is meant the particular substance that is produced out of the digested food; 'refuse' refers to the excreta; 'solid' refers to the skin, the flesh, the bones **Page 48**] and the blood &c. These substances are moved about and brought together—by the Breath. There may be a doubt as to the multiplicity of this Breath; hence it is added—*while being one &c.* It might be urged that we have many scriptural passages speaking of the Air in the Body being *five* in number with a view to this our author add;—*By reasons of the diverse functions &c.* The Air is called '*apāna*' ('downward'); by reason of its moving down the refuse materials of the body; when it expands the liquids among the arteries it is called '*vyāna*' ('expansive'); by raising up the foods and drinks it comes to be called '*udāna*' ('upward'); and that which is breathed out of the nostrils and the mouth is called '*Prāna*' ('outward'); and which distributes equally the stomachtic heat over all parts of the stomach, for purposes of digestion is called '*Samāna*' ('equalising'). Thus we find that we have got five distinct Airs; but the number 'five' is only assumed (on the basis of its different functions) we conclude this from the fact of the impossibility of many corporeal substances existing in a single substrate (*i. e.* the five Airs could not inhere over the whole of a single Body.

CHAPTER V.

OF THE *Mahābhūtas* OR THE ULTIMATE MATERIAL SUBSTANCES OR STATES OF MATTER.

Text (40): We are now going to describe the process of the creation and destruction of the four ultimate Material Substances.

When a hundred years, by the measure of Brahmā are at an end, there comes the time for the delive-

Digitized by Google

rance of the Brahmā existing at that time; and then, for the sake of the resting at night, of all living beings wearied by their 'wanderings,' there arises in the mind of the Supreme Lord, the Ruler of all worlds, a desire to reabsorb (all creation); and simultaneously with this desire, there comes about a cessation of the operations of the unseen potential tendencies of all souls that are the causes of their bodies, sense-organs and gross-elements. Then out of the supreme Lord's desire and from the conjunction of the souls and the material atoms, there come about certain disruptions of the atoms constituting the Bodies and sense-organs. These disruptions destroy the combinations of those atoms; and this brings about the destruction of all things down to the atoms. (II—i—18, 19; V—ii—1; VII—ii 10).

Then there comes about a successive destruction or reabsorption of the ultimate Material Substances, Earth, Water, Fire and Air, one after the other. (V-ii-1, 12; VII-ii-10.)

After this, the atoms remain by themselves in their isolated condition; and simultaneously with these there remain the souls permeated with the potencies of their past virtues and vices.

Then again, for the sake of the experiences to be gained by living beings, there arising in the mind of the supreme Lord a desire for creation, there are produced, in the atoms of air, certain actions or motions, due to their conjunctions under the influence of the unseen potential tendencies that begin to operate in all souls. These motions bringing about the mutual contact of the air atoms, there appears, through the Diad,

Triad &c. finally the " Great Air," which exists vibrating in the sky. (V-ii-12 ; VII-ii-9 ; X-ii-2.)

Page 49] *After this, in this Great Air, there appears, in the same order, out of the atoms of water, the Great Reservoir of water, which remains there surging.* (X-ii-2 ; VII-ii-9.)

In this Reservoir of Water, there appears, out of the Earth-atoms, the Great Earth which rests there in its solid form. (V-ii-1 ; X-ii-2 ; VII-ii-9.) *Then, in the same Water-reservoir, there appears, in the same order, out of the Fire-atoms, the Great Mass of Fire; and not being suppressed by any thing else, it stands shining radiantly.*

The four gross elements having thus been brought-into existence, there is produced, from the mere thought (mental picturing) of the Supreme Lord, the Great Egg, from out of the Fire-atoms mixed up with the atoms of Earth; and in this egg having produced all the worlds and the Four-faced Brahmā, the Grand-father of all creatures; the Supreme Lord assigns to him the duty of producing the various creatures. Being thus engaged by the Supreme Lord, Brahmā, endowed with extreme degrees of Knowledge, Dispassion and Power, having recognised the ripeness for fruition of the Karmic tendencies of the living beings, creates, out of his mind, his sons, the Prājāpatis, as also the Manus and the several groups of the Gods, Ṛshis and Pitṛs,—and out of his mouth, arms, thighs and feet, the four castes, and the other living beings of all grades high and low,—all these having their knowledge and experience ordained in acordance with their previous deeds; and then he connects them with Virtue, Knowledge, Dispas-

sion and Powers, according to their respective impressional potencies.

Commentary.

Having explained in detail, the fact of the four ultimate elements being *products*, the author now proceeds to consider the question of their having a Creator.

Page 50.] We have got to consider the production and destruction of the four elements, Earth and the rest; if we were to consider these separately under the section dealing with each of them, there would be an unnecessary prolonging of our work; consequently our author takes them collectively in this section; specially as the facts apply to all of them equally.

We now proceed to describe the processes of &c. Though the creation and destruction of all these four is described collectively, yet this should not be regarded as a point of similarity among them; as the production and destruction of each is found to be described as distinct from those of another.

If we had only the word '*Mahābhūtānām*' ('of the gross elements'), then that would apply to the *three* gross elements only, as in accordance with the *Kapinjalanyāya* (vide *Mimānsā-sūtra* Adh xi-i-38 &c.), the plurality (in '*Mahābhūtānām*') would indicate '*three*' only. In order, therefore, to include all the four elements, we have the word '*Caturṇām*'

Then again, if we had one word '*Caturṇām*' only, then that would apply to the four 'Air'-products just mentioned—*viz*: the Airy Body, the Airy Organ, the Airy Object and Breath; hence with a view to preclude these we have the word '*Mahābhūtānām*.'

Objection:—"In that case, as the production and destruction described are of the *four gross-elements*, alone, the process would not apply to the production and destruction of the Diads, as these are atomic in their nature (and not *gross*.)"

Reply :—Not so; as we have the word (‘*vidhi*’ ‘process’); the sense of our author being that he is going to describe the *process* by which the elements are produced and destroyed; and we know that this process begins with the production of the Diads, and ends with the atoms; and so this would necessarily include the production and destruction of the Diads also.

As what the author has in view is the description of the two processes, irrespective of the order in which they are dealt with, he begins with the process of destruction first, though this has been referred to last.

By the measure of Brahmā &c.

5	*Nimēshas* (Twinkling of our eyes)	1 *Kāshṭhā.*
30	*Kāsthās*	1 *Kalā.*
15	*Kalās*	1 *Nāḍikā.*
30	*Kalās*	1 *Muhūrta.*
30	*Muhūrtas*	1 *Ahorātra* (day & night.)
15	*Ahorātras*	1 *Paksha* (Fort-night.)
2	*Pakshas*	1 *Māsa* (Month.)
2	*Māsas*	1 *Ṛtu* (Season.)
6	*Ṛtus* or 12 *Māsas* ...	1 *Samvatsara* (Year.)
3	*Ṛtus* or 1 *Uttarāyaṇa* ...	1 Day of the Gods.
3	*Ṛtus* or 1 *Dakshiṇāyana*	1 Night of the Gods.
360	Days and nights of the Gods or 360 of our years ..	1 Year of the Gods.
1200	Years of the Gods ...	The Four *Yugas.*
1000	Four Yugas ...	1 Day of *Brahmā.*

Page 51.] After the lapse of a hundred years—each year made up of 360 such days of Brahmā—there comes the time for the final deliverance of the *Brahmā* of the time; and then there arises, in the mind of the Supreme Lord of all worlds whose powers are never repressed, a desire for the re-absorption, for purposes of

Digitized by Google

allowing them during the night a little rest from metempsychic troubles, of all living beings, who, during the cycle coming to an end, have been undergoing ceaseless troubles attendant upon birth and death.

Immediately after this, there comes about a cessation of the functionings of the unseen potential tendencies inhering in all the Souls, which tendencies are the productive cause of the body, sense-organ and gross elements (related to each Soul). On this cessation, there remains no chance for the production, of any further body &c. And as for those that have already appeared, for the destruction of these, there appear certain actions or motions, out of the Supreme Lord's destructive wish and from the conjunctions of the Souls and atoms. From these actions there comes about a disruption of the atoms that form the direct or indirect material causes of the Bodies and the Sense-organs. This disruption leads to the destruction of the conjunction of these atoms ; and thus there comes about the destruction of the Body and all other Gross Substances, all these body &c, becoming destroyed down to the diads, the atoms alone being left behind.

"If the created things were destroyed suddenly, then the God would be known as 'merciless' and 'doing things without any motive'."—In order to guard against this our Author adds that all this process of destruction and re-absorption is for the purpose of allowing the beings a rest at night, as it were.

Some people urge the following objection : "There being "endless Karmic tendencies of an endless number of Souls these "tendencies would operate one after the other (and not all at "once) ; consequently while some souls would be desisting from "all experiences on account of their Karmic tendencies having "all become spent up in fruition) others would be still under-going their experiences, and others still would only be turning to-"wards future experiences ; and thus the objects of experience "functioning on all sides, there could not be any simultaneous "cessation of the bodies and sense-organs &c."

This objection is met by the declaration that *there is a cessation of the operations of the Karmic tendencies.*

The *time of the final deliverance of Brahmā* has been figuratively spoken of as '*night,*' because of that time ressembling the night in the point of the cessation of the experiences and perceptions of all living beings (who go to sleep at night, and also into a long sleep of unconsciousness at the time under consideration).

The Gross-Elements also become destroyed in the same manner. That is to say, just as there is a destruction of bodies and sense-organs, down to the very atoms, so in the same manner, we have the destruction of the Gross Elements also. That is to say, by the process of the action and disruption of the atoms, there is a successive destruction of the Gross Elements, one after the other :—*viz* : while Water is still existing, the Earth is destroyed ; and Water is destroyed before Fire ; and this latter is also destroyed before Air.

After this the atoms continue to exist in their isolated state; and also the Souls permeated with the faculties or tendencies left upon them by their previous good and evil deeds, continue to exist during the same period of time, *i. e.* during 100 years of *Brahmā.* Though Time and Space &c, also exist during this time—as these also are eternal—yet the author speaks of the existence of the Souls and atoms alone, as if these did not exist at the time, then the atoms could not be developed into the product though the Karmic tendencies of the Souls ; as such it is these that are by far the most important factors deserving notice.

Page 52.] Having thus described the process of destruction, the Author proceeds to describe the process of creation : *Then again* &c. Though during that time the Souls are not endowed with life, yet they have been spoken of as '*Prāṇis*' ('living beings,') because of their capability for being endowed with it. There arises, in the mind of the Supreme Lord, a desire to

bring about the creation, for the purpose of bringing about the experiences of pleasure and pain by those Souls. Then the Karmic tendencies of the Souls regain their operative powers.

Though the creative desire of the Supreme Lord, in the shape of an active potency, is one only, and eternal, functioning towards the appearance of numberless effects that are simultaneously brought into existence,—yet, at one time it tends to bring about destruction, and at another creation, on account of the differences in the nature of the particular time and other auxilliary circumstances. At the time that it tends towards destruction, the Karmic tendencies of the Souls cease in their operation, and assume a position of indifference (inactivity or latency). And when it tends towards creation, the tendencies regain their activity towards the bringing about of their effects.

The compound '*Vṛttilabdhāh*' is to be explained as, '*Vṛttih labdhā yaih tē*' ('those by whom activity has been regained'.) This compound is found mentioned along with such compounds as '*āhitāgni*' &c., with regard to which the position of the two constituent words is laid down to be optional; (Panini II-ii-37) just as we have the compound '*dantajāta*'; consequently no objection can be taken to the order of the two words in the compound.

Thus then the meaning is that there appear certain actions or motions in the air-atoms, on account of the conjunctions of these atoms with Souls, brought about by the active Karmic tendencies inhering in these latter. Thus in the appearance of the action in the Air-atoms, the air-atoms are the *material* cause; the conjunctions of the atoms with Souls whose Karmic tendencies have begun to be active, constitute the *immaterial* cause; and the Karmic tendency is the *instrumental* cause.

These actions bring about the mutual conjunction of the air-atoms. From these conjunctions, the Air-diads appear; then the Triads, and so on up to the Gross-Air, which exists vibrating in the sky, not having its speed interrupted in any way.

Digitized by Google

Then, in this Air, there appears the Great Reservoir of Water, produced, in the same manner as above, out of the Water-atoms, through the Diad, in the same order of triad &c. and this remains surging, flowing over the whole universe, not being stopped anywhere.

After the production of this great Water-reservoir, in this same Reservoir, there appears the Solid Earth, out of the Earth-atoms.

Then in this Water-reservoir, appears the Great Mass of Fire, produced, in the same manner as described above, out of the Fire-atoms; and not being suppressed by anything else, this mass of fire remains shining radiantly.

Though there is a natural opposition between Fire and Water, yet it is on account of the force of the unseen agency that it becomes possible for one to be the substratum of the other.

Thus the four Great Material Substances having been produced in aforesaid manner, there appears, by reason of mere volition or contemplation on the part of the Supreme Lord, out of the atoms of Fire mixed up with the atoms of Earth, the Great Egg. It is because this Egg contained particles of Earth, that it could not appear as a Mass of pure fire.

Page 53.] In this Egg, the Supreme Lord produces the four faced *Brahmā*, the primeval ancestor of all people (and regions), along with the several worlds; and assigns to him the duty of producing the creatures. Being thus appointed by the Supreme Lord, *Brahmā*, endowed with extreme degrees of Knowledge, Dispassion and Powers, comes to recognise, by means of his knowledge, the Virtues and the Vices of all beings; and on account of his Dispassion he does not act with any partiality; and through his Great Power, he makes them experience the results of their deeds.

Having come to know the fruition of the deeds of living beings. Having come to know that such and such should be

the results of their previous deeds, *Brahmā* produces his mental sons, Daksha and the rest, whose knowledge, experiences and lives are in accordance with their previous deeds—'mind-born sons' because produced out of mere volition,—and also the Manus, the Gods, and the Ṛshis, and the hosts of Pitṛs; and then out of his mouth, arms, thighs and feet, he produces respectively, the Brāhmaṇa, the Kshatriya, the Vaiçya and the Çūdra; and then the other beings, high and low. He connects all these with such duties (*Dharma*), Knowledge, Dispassion and Power, as are in due accord with their previous deeds. [The word '*Açaya*' means '*āçētē*', *that which lies latent* in the self, until the experiencing of the result]. He does not deviate one jot from this universal law.

Some people have asserted that the action of an intelligent agent is always for accomplishing some desirable end (to be served by that action), or for the removable of something that is undesirable; and as none of these motives—either of obtaining something desirable, or of avoiding something undesirable—could apply to the case of the Lord who has all his desires fulfilled, it cannot be possible for Him to act in any way towards the creation of the world.

To this we make the following reply: *It is for bringing about the experiences of all living beings &c.* That is to say, the action of the Lord towards creation is for the sake of others, and not for the fulfilment of any desires of his own.

Objection: "In that case He should have created the world abounding in pleasure alone, and not one mixed with pain; as the Lord would be moved to create by pure mercy."

The reply to this is as follows: *He recognises the fruits of the deeds of living beings.* That is to say, though He is moved to act for the sake of others, yet He does not create a world of pleasures alone; as His creative operation is regulated by the variegated Karmic tendencies of living beings. Nor is this incompatible with His mercifulness; as pain serves the Man's

Digitized by Google

useful purpose of producing in his mind a non-attachment to the things of the world. Nor is the fact of His acting in accordance with the previous good and bad deeds of beings incompatable with his independent and Supreme Godly character; because it is He that joins them to such 'duties, knowledge, dispassion and power' as are in due accord with their own Karmic tendencies. That is to say, how could He cease to be the Supreme Lord, by awarding to each being results in accordance with his respective deeds? For certainly, the master does not cease to be a master by making awards to his servants in accordance with their merits.

Page 54.] To this process of creation the following objection is raised; "At the beginning of creation, the living beings would not know the meaning af any words, as no convention (on which the denotations of words are based) could have been fixed upon till then; and hence at that time there could be no use or words."

The basis for meeting this objection is supplied by the text: "*Mental Sons &c.*" It is the soul with a body born of the womb that, on account of the great pains suffered in the womb, loses all memory of previous experiences; The Ṛshis, the Prajāpatis and the Manus, on the other hand, being produced from the mind, have such bodies as are not born of the womb; and as such there being no reason for their losing their memories, they are found to be directly connected with their Karmic tendencies, and duly endowed with the reminiscenses of previous experiences; and hence these Beings recall all their verbal usage of the previous creation; juut as a man after sleep remembers things seen before he went to sleep; and having recalled these words, these Beings carry on the usage among themselves; and from this usage, the living beings of that cycle come to know the meanings of those words; and these on their turn carry on the usage, and hand it on to future generations.

Question: "What are the proofs for the existence of God?"

This proof is in the form of Scriptural Authority and Inferential Reasoning.

This Inferential Reasoning is—The four Great Elementary Substances are preceded by some one having a knowledge of them, because they are effects,—anything that is an effect is preceded by one having a cognition of it, as for instance, the jar (which is always preceded by the potter),—and the four Great Elementary Substances are effects,—hence they must be preceded by one having a knowledge of them.

Objection: "The premiss of this inference (that the Elementary Substances are effects) is not duly cognised by any means of right motion,—f. i. the fact of the Earth being an effect cannot be regarded as duly established."

Reply: This is not right; as the Earth &c. are made up of parts; and everything that has parts is an effect, as for instance the jar; the Earth &c. have parts,—hence they must be effects.

Objection:—"An Inferential Reasoning is operative only when "the invariable Concomitance (upon which it is based) has been "duly recognised; as for the invariable concomitance of the *charac*-"*ter of an effect* and *that of being preceded by one having know*-"*ledge* of it, this can never be known from the case of the jar and such "other substances; as in the case of the sprouting of the seed we "find that the sprouting appears *at the same time* as the cognition "of the sprout by the person who had sown the seed; and hence in "this case we do not find any *precedence* of the doer with the know-"ledge of the effect over the appearance of the effect. Nor could "the sprout &c. be included in the subject of the inference in ques-"tion; as it is only after the invariable concomitance has been duly "cognised, and the Inference has begun to operate, that we pro-"ceed to distinguish the Subject and Predicate &c. of the Inference, "for the benefit of the opponent; while in the case in question "(of the sprout) it is found to be always included in a cognition "contrary to the concomitance; and as such, there could be no "cognition of the necessary concomitance."

Digitized by Google

Reply: If there be no recognition of the invariable concomitance simply on account of there being no perception of duality or difference (between the time of the appearance of the sprout and the knowledge thereof by the sower),—then, in that case, we could never rightly arrive at the *Sāmānyatodṛshta* inference of the moving of the sun, which has been put forward by the author of the *Bhāshya* on the *Mīmānsā-Sūtras*. As therein also, we find that it is merely the fact of the stars &c. having assumed different positions, and not that of their having *moved*, that is perceived at the same time as the cognition of their other positions preceded by the movement of Dēvadatta (the observer) from one place to another.

Objection: "In the case of the stars, in as much as the "non-perception of *moving* could be possible on account of the "difference in the position (or the great difference in space) be-"tween the observer and the stars, or the difference in their "positions, (the one being on the Earth while the others are in "the sky),—this non-perception could not set aside the effect of "the repeated seeing of the sun, which is unconditionally effective "towards bringing about a cognition of the necessary concomi-"tances; specially as the two do not pertain to the same subject."

Reply: In that case, in the case in question also, the non-perception of the cognition of the sprout (before its actual appearance) may be due to the difference in nature between that and the doer (the Sower), who is bodiless (while the sprout is bodied); and hence the affectiveness of the repeated perceptions operating unconditionally could not be set aside by the said non-perception.

Page 55] *Objection*: "Then again, does the above Inferen-"tial Reasoning establish only the Creator, or a Creator capable of "creating the Earth &c.? If it prove a mere creator, then what "is desired is not accomplished. As what you seek to prove is not "a mere agent, like ourselves; as any such person having a limited "vision could not create the Earth &c. Then as for an agent

स्यैव समनस्कत्वादिति चेत्, न, मनसो नित्यत्वेन देहापगमेऽपि मनस्सद्भावेनानैकान्तिकत्वात् । अतो विचित्रावयवसन्निवेशविशेषतनुभुवनादिकार्य्यनिर्माणे पुण्यपापपरवशः परिमितशक्तिज्ञानः क्षेत्रज्ञो न प्रभवतीति निखिलभुवननिर्माणचतुरोऽचिन्त्यापरिमितज्ञानशक्त्यैश्वर्य्योऽशरीरः सङ्कल्पमात्रसाधनपरिनिष्पन्नानन्तविस्तारविचित्ररचनप्रपञ्चः पुरुषविशेष ईश्वरोऽनुमानेनैव सिद्ध्यति । अतः प्रमाणान्तरावसेयत्वाद् ब्रह्मणो नेतद्वाक्यं ब्रह्म प्रतिपादयति । किञ्च, अत्यन्तभिन्नयोरेव मृद्द्रव्यकुलालयोर्निमित्तोपादानत्वदर्शनेन आकाशादेर्निरवयवद्रव्यस्य कार्यत्वानुपपत्त्या च नैकमेव ब्रह्म कृत्स्नस्य जगतो निमित्तमुपादानं च प्रतिपादयितुं शक्नोतीति ॥

एवं प्राप्ते ब्रूमः, यथोक्तलक्षणं ब्रह्म जन्मादिवाक्यं बोधयत्येव । कुतः । शास्त्रैकप्रमाणकत्वाद् ब्रह्मणः । यदुक्तम्, सावयवत्वादिना कार्य्यं सर्वं जगत्, कार्य्यं च तदुचितकर्तृविशेषपूर्वकं दृष्टमिति निखिलजगन्निर्माणतदुपादानोपकरणवेदनचतुरः कश्चिदनुमेय इति, तदयुक्तम्, महीमहार्णवादीनां कार्य्यत्वेऽपि एकदैवैकेन निर्मिता इत्यत्र प्रमाणाभावात् । न चैकस्य घटस्येव सर्वेषामेकं कार्य्यत्वम्, येनैकदैवैकः कर्त्ता स्यात्, पृथग्भूतेषु कार्येषु कालभेदकर्तृभेददर्शनेन कर्तृकालैक्यनियमाभावा[1]त् । न च क्षेत्रज्ञानां विचित्रजगन्निर्माणाशक्त्या कार्य्यत्वबलेन तदतिरिक्तकल्पनायामनेककल्पनाऽनुपपत्तेश्चैक एव कर्त्ता भवितुमर्हति, क्षेत्रज्ञानामेवोपचितपुण्यविशेषाणां शक्तिवैचित्र्यदर्शनेन तेषामेवातिशयितादृष्टसम्भावनया च तत्तद्विलक्षणकार्य्यहेतुत्वसम्भवात्, तदतिरिक्तात्यन्तादृष्टपुरुषकल्पनाऽनुपपत्तेश्च । न च युगपत् सर्वोच्छित्तिः सर्वोत्पत्तिश्च प्रमाणपदवीमधिरोहतः, अदर्शनात्, क्रमेणैवोत्पत्तिविनाशदर्शनाच्च, कार्य्यत्वेन सर्वोत्पत्तिविनाशयोः कल्प्यमानयोर्दर्शनानुगुण्येन कल्पनायामपि विरोधाभावाच्च । अतो बुद्धिमदेककर्तृकत्वे साध्ये कार्य्यत्वस्यानैकान्त्यं पक्षस्याप-

[1] नियमादर्शनादिति पाठान्तरम् ।

सिद्धविशेषणत्वं साध्यविकलता च दृष्टान्तस्य, सर्वनिर्माणचतुरस्यैकस्या-
प्रसिद्धेः । बुद्धिमत्कर्तृकत्वमात्रे साध्ये सिद्धसाधनता । सार्वज्ञ्यसर्वशक्ति-
युक्तस्य कस्यचिदेकस्य साधकमिदं कार्यत्वं किं युगपदुत्पद्यमानसर्ववस्तु-
गतम्, उत क्रमेणोत्पद्यमानसर्ववस्तुगतम् । युगपदुत्पद्यमानसर्ववस्तुग-
तत्वे कार्य्यत्वस्यासिद्धता, क्रमेणोत्पद्यमानसर्ववस्तुगतत्वेऽनेककर्तृकत्व-
साधनाद्विरुद्धता । अत्राप्येककर्तृकत्वसाधने प्रत्यक्षानुमानविरोधः शास्त्र-
विरोधश्च, 'कुम्भकारो जायते' 'रथकारो जायत' इत्यादिश्रवणात् । अपि
च सर्वेषां कार्य्याणां शरीरादीनां सत्त्वादिगुणकार्य्यरूपसुखाद्यन्वयदर्शनेन
सत्त्वादिमूलत्वमवश्याश्रयणीयम् । कार्य्यवैचित्र्यहेतुभूताः कारणगता वि-
शेषाः सत्त्वादयः, तेषां कार्य्याणां तन्मूलत्वापादनं तद्भुक्तपुरुषान्तःकर-
णविकारद्वारेण, पुरुषस्य च तद्योगः कर्ममूल इति कार्य्यविशेषारम्भायैव
ज्ञानशक्तिवत् कर्तुः कर्मसम्बन्धः कार्य्यहेतुत्वेनैवावश्याश्रयणीयः, ज्ञान-
शक्तिवैचित्र्यस्य च कर्ममूलत्वात् । इच्छायाः कार्य्यारम्भहेतुत्वेऽपि विषय-
विशेषविशेषितायास्तस्यास्सत्त्वादिमूलत्वेन कर्मसम्बन्धोऽवर्जनीयः । अतः
क्षेत्रज्ञा एव कर्तारः, न तद्विलक्षणः कश्चिदनुमानात्सिद्ध्यति । भवन्ति
च प्रयोगाः, तनुभुवनादि क्षेत्रज्ञकर्तृकं कार्य्यत्वात् घटवत्, ईश्वरः कर्ता
न भवति प्रयोजनशून्यत्वात् मुक्तवत्, ईश्वरः कर्ता न भवति, अशरीर-
त्वात् तद्वदेव । न च क्षेत्रज्ञानां स्वशरीराधिष्ठाने व्यभिचारः, तत्राप्य-
नादेः सूक्ष्मशरीरस्य सद्भावात् । विमतिविषयः कालो न लोकशून्यः का-
लत्वात् वर्तमानकालवत् इति । अपि च किमीश्वरः सशरीरोऽशरीरो वा
कार्य्यं करोति । न तावदशरीरः, अशरीरस्य तस्य कर्तृत्वानुपलब्धेः । मा-
नसान्यपि कार्याणि सशरीरस्यैव भवन्ति, मनसो नित्यत्वेऽप्यशरीरेषु
मुक्तेषु तत्कार्य्यादर्शनात् । नापि सशरीरः, विकल्पासहत्वात् । तच्च
शरीरं किं नित्यमुतानित्यं वा । न तावन्नित्यम्, सावयवस्य तस्य नि-
त्यत्वे जगतोऽपि नित्यत्वाविरोधादीश्वरासिद्धेः । नाप्यनित्यम्, तद्व्य-
तिरिक्तस्य तच्छरीरहेतोस्तदानीमभावात् । स्वयमेव हेतुरिति चेत्, न,
अशरीरस्य तदयोगात् । अन्येन शरीरेण सशरीर इति चेत्, न, अनव-

स्यानात् । स किं सव्यापारो वा निर्व्यापारो वा । अशरीरत्वादेव न सव्यापारः । नापि निर्व्यापारः कार्यं करोति, मुक्तात्मवत् । कार्य्यं जगद् इच्छामात्रव्यापारकर्तृकमित्युच्यमाने पक्षस्याप्रसिद्धविशेषणत्वम्, दृष्टान्तस्य च साध्यहीनता । अतो दर्शनानुगुण्येनेश्वरानुमानं दर्शनानुगुण्यपराहतमिति शास्त्रैकप्रमाणकः परब्रह्मभूतः सर्वेश्वरः पुरुषोत्तमः । शास्त्रं तु सकलेतरप्रमाणपरिदृष्टसमस्तवस्तुविसजातीयं सार्वज्ञ्यसत्यसङ्कल्पत्वादिमिश्रानवधिकातिशयापरिमितोदारगुणसागरं निखिलहेयप्रत्यनीकस्वरूपं प्रतिपादयतीति न प्रमाणान्तरावसितवस्तुसाधर्म्यप्रयुक्तदोषगन्धप्रसङ्गः । यत्तु निमित्तोपादानयोरैक्यमाकाशादेर्निरवयवस्य द्रव्यस्य कार्य्यत्वं चानुपलब्धमशक्यप्रतिपादनमित्युक्तम्, तदप्यविरुद्धमिति "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" "न वियदश्रुतेरि"त्यत्र प्रतिपादयिष्यते । अतः प्रमाणान्तरागोचरत्वेन शास्त्रैकविषयत्वात् "यतो वा इमानी"त्यादिवाक्यमुक्तलक्षणं ब्रह्म प्रतिपादयतीति सिद्धम् ॥

यद्यपि प्रमाणान्तरागोचरं ब्रह्म, तथाऽपि प्रवृत्तिनिवृत्तिपरत्वाभावेन सिद्धरूपं ब्रह्म न शास्त्रं प्रतिपादयतीत्याशङ्क्याह

समन्वयाधिकरणम् । **तत्तु समन्वयात् ॥ ४ ॥**

प्रसक्ताशङ्कानिवृत्त्यर्थः तु शब्दः । "तत्" शास्त्रप्रमाणकत्वं ब्रह्मणः सम्भवत्येव । कुतः । "समन्वयात्" परमपुरुषार्थतयाऽन्वयः समन्वयः, परमपुरुषार्थभूतस्यैव ब्रह्मणो ऽभिधेयतयाऽन्वयात् । एवमेव समन्वितो ह्यौपनिषदः पदसमुदायः "यतो वा इमानि भूतानि जायन्ते" "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" "तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत" "ब्रह्म वा इदमेकमेवाग्र आसीत्" "आत्मा वा इदमेक एवाग्र आसीत्" "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" "एको ह वै नारायण आसीत्" । सत्यं ज्ञानमनन्तं ब्रह्म" "आनन्दो ब्रह्मे"त्येवमादिः । न च व्युत्पत्तिसिद्धपरिनिष्पन्नवस्तुप्रतिपादनसमर्थानां पदसमुदायानामखिलजगदुत्पत्तिस्थितिविनाशहेतुभूताशेषदोषप्रत्यनीकापरिमि-

तौदार्यगुणसागरानवधिकातिशयानन्दस्वरूपे ब्रह्मणि समन्वितानां प्रवृत्तिनिवृत्तिरूपप्रयोजनविरहादन्यपरत्वम्, स्वविषयावबोधपर्य्यवसायित्वात् सर्वप्रमाणानाम् । न च प्रयोजनानुगुणा प्रमाणप्रवृत्तिः, प्रयोजनं हि प्रमाणानुगुणम् । न च प्रवृत्तिनिवृत्त्यन्वयविरहिणः प्रयोजनशून्यत्वम्, पुरुषार्थान्वयप्रतीतेः । तथा स्वरूपपरेष्वपि "पुत्रस्ते जातः" "नायं सर्प" इत्यादिषु हर्षभयनिवृत्तिरूपप्रयोजनवत्त्वं दृष्टम् ॥

अत्राह, न वेदान्तवाक्यानि ब्रह्म प्रतिपादयन्ति, प्रवृत्तिनिवृत्त्यन्वयविरहिणः शास्त्रस्यानर्थक्यात् । यद्यपि प्रत्यक्षादीनि वस्तुयाथात्म्यावबोधे पर्य्यवस्यन्ति, तथाऽपि शास्त्रं प्रयोजनपर्यवसाय्येव, न हि लोकवेदयोः प्रयोजनरहितस्य कस्यचिदपि वाक्यस्य प्रयोग उपलब्धचरः । न किञ्चित्प्रयोजनमनुद्दिश्य वाक्यप्रयोगः श्रवणं वा सम्भवति, तच्च प्रयोजनं प्रवृत्तिनिवृत्तिसाध्येष्टानिष्टप्राप्तिपरिहारात्मकमुपलब्धम् "अर्थार्थी राजकुलं गच्छेत्" "मन्दाग्निर्नाम्बु पिबेत्" "स्वर्गकामो यजेत" "न कलञ्जं भक्षयेदि"त्यादिषु । यत्पुनः सिद्धवस्तुपरेष्वपि "पुत्रस्ते जातः" "नायं सर्पो रज्जुरेषे"त्यादिषु हर्षभयादिनिवृत्तिरूपपुरुषार्थान्वयो दृष्ट इत्युक्तम् । तत्र किं पुत्रजन्माद्यर्थात् पुरुषार्थावाप्तिः, उत तज्ज्ञानादिति विवेचनीयम् । सतोऽप्यर्थस्याज्ञातस्यापुरुषार्थत्वेन तज्ज्ञानादिति चेत्, तर्ह्यसत्यप्यर्थे ज्ञानादेव पुरुषार्थः सिद्ध्यतीत्यर्थपरत्वाभावेन प्रयोजनपर्य्यवसायिनोऽपि शास्त्रस्य नार्थसद्भावे प्रामाण्यम् । तस्मात् सर्वत्र प्रवृत्तिनिवृत्तिपरत्वेन ज्ञानपरत्वेन वा प्रयोजनपर्य्यवसानमिति कस्यापि वाक्यस्य परिनिष्पन्ने वस्तुनि तात्पर्य्यासम्भवान्न वेदान्ताः परिनिष्पन्नं ब्रह्म प्रतिपादयन्ति ॥

अत्र कश्चिदाह, वेदान्तवाक्यान्यपि कार्य्यपरतयैव ब्रह्मणि प्रमाणत्वमनुभवन्ति । कथम् । निष्प्रपञ्चमद्वितीयं ज्ञानैकरसं ब्रह्मानाद्यविद्यया सप्रपञ्चतया प्रतीयमानं निष्प्रपञ्चं कुर्य्यादिति ब्रह्मणः प्रपञ्चविलयद्वारेण विधिविषयत्वमिति । कोऽसौ दृष्टृदृश्यरूपप्रपञ्चप्रविलयद्वारेण साध्यज्ञानैकरसब्रह्मविषयो विधिः । "न दृष्टेर्द्रष्टारं पश्येः, न मते-

मन्तारमन्वीया" इत्येवमादिः । दृष्टदृश्यभेदशून्यं दृशिमात्रं ब्रह्म कुर्य्यादित्यर्थः । स्वतःसिद्धस्यापि ब्रह्मणो निष्प्रपञ्चताख्येण का'र्यत्वमविरुद्धमिति ॥

तदयुक्तम्, नियोगवाक्यार्थवादिना हि नियोगो नियोज्यविशेषणं विषयः करणमितिकर्त्तव्यता प्रयोक्ता च वक्तव्याः । तत्र हि नियोज्यविशेषणमनुपादेयम्, तच्च निमित्तं फलमिति द्विधा । अत्र किं नियोज्यविशेषणम्, तच्च किं निमित्तं फलं वेति विवेचनीयम् । ब्रह्मस्वरूपयाथात्म्यानुभवश्चेत् नियोज्यविशेषणम्, तर्हि न तत् निमित्तम्, जीवनादिवत् तस्यासिद्धत्वात्, निमित्तत्वे च तस्य नित्यत्वेनापवर्गोत्तरकालमपि जीवननिमित्ताग्निहोत्रादिवत् नित्यतद्विषयानुष्ठानप्रसङ्गः । नापि फलम्, नैयोगिकफलत्वेन स्वर्गादिवदनित्यत्वप्रसङ्गात् । कश्चात्र नियोगविषयः । ब्रह्मैवेति चेत्, न, तस्य नित्यत्वेनाभव्यरूपत्वात्, अभावार्थत्वाच्च । निष्प्रपञ्चं ब्रह्म साध्यमिति चेत्, साध्यत्वेऽपि फलत्वमेव, अभावार्थत्वाच विधिविषयत्वम् । साध्यत्वं च कस्य, किं ब्रह्मणः, उत प्रपञ्चनिवृत्तेः । न तावत् ब्रह्मणः, सिद्धत्वादनित्यत्वप्रसक्तेश्च । अथ प्रपञ्चनिवृत्तेः, न तर्हि ब्रह्मणः साध्यत्वम् । प्रपञ्चनिवृत्तिरेव विधिविषय इति चेत्, न, तस्याः फलत्वेन विधिविषयत्वायोगात् । प्रपञ्चनिवृत्तिरेव हि मोक्षः, स च फलम् । अस्य च नियोगविषयत्वे नियोगात् प्रपञ्चनिवृत्तिः, प्रपञ्चनिवृत्त्या नियोग इतीतरेतराश्रयत्वम् । अपि च किं निवर्त्तनीयः प्रपञ्चो मिथ्यारूपः सत्यो वा । मिथ्यारूपत्वे ज्ञाननिवर्त्यत्वादेव नियोगेन न किञ्चित्प्रयोजनम् । नियोगस्तु निवर्त्तकज्ञानमुत्पाद्य तद्द्वारेण प्रपञ्चस्य निवर्त्तक इति चेत्, स्ववाक्यादेव ज्ञातमिति न नियोगेन प्रयोजनम् । वाक्यार्थज्ञानादेव ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य मिथ्याभूतस्य प्रपञ्चस्य बाधितत्वात् सपरिकरस्य नियोगस्यासिद्धेश्च । प्रपञ्चस्य निवर्त्यत्वे प्रपञ्चस्य निवर्तको नियोगः किं ब्रह्मस्वरूपमेव, उत तद्व्यतिरिक्तः ।

---

१ साध्यत्वमिति पाठान्तरम् ।

यदि ब्रह्मस्वरूपमेव निवर्तकम्, नित्यतया निवर्त्यप्रपञ्चसद्भाव एव न सम्भवति, नित्यत्वेन च नियोगस्य विषयानुष्ठानसाध्यत्वं च न घटते। अथ ब्रह्मस्वरूपव्यतिरिक्तः, तस्य कृत्स्नप्रपञ्चनिवृत्तिरूपविषयानुष्ठानसाध्यत्वेन प्रयोक्ता च नष्ट इत्याश्रयाभावादसिद्धिः, प्रपञ्चनिवृत्तिरूपविषयानुष्ठानेनैव ब्रह्मस्वरूपव्यतिरिक्तस्य कृत्स्नस्य निवृत्तत्वात् न नियोगनिष्पाद्यं मोक्षाख्यं फलम्। किञ्च, प्रपञ्चनिवृत्तेर्नियोगकरणस्येतिकर्तव्यताऽभावात् अनुपकृतस्य च करणत्वायोगात् न करणत्वम्। कथमितिकर्तव्यताऽभाव इति चेत्। इत्थम्, अस्येतिकर्तव्यता भावरूपा, अभावरूपा वा। भावरूपा च करणशरीरनिष्पत्तितदनुग्राहककार्यभेदभिन्ना। उभयविधा च न सम्भवति, न हि मुद्गराभिघातादिवत् कृत्स्नप्रपञ्चनिवर्तकः कोऽपि दृश्यत इति दृष्टार्थो न सम्भवति। नापि निष्पन्नस्य करणस्य कार्योत्पत्तावनुग्रहः सम्भवति, अनुग्राहकांशसद्भावेन कृत्स्नप्रपञ्चनिवृत्तिरूपकरणस्वरूपासिद्धेः। ब्रह्मणोऽद्वितीयत्वज्ञानं प्रपञ्चनिवृत्तिरूपकरणशरीरं निष्पादयतीति चेत्, तेनैव प्रपञ्चनिवृत्तिरूपो मोक्षः सिद्ध इति न करणादिनिष्पाद्यमवशिष्यत इति पूर्वमेवोक्तम्। अभावरूपत्वे चाभावा[1]देव न करणशरीरं निष्पादयति, नाप्य[2]नुग्रहम्। अतो निष्प्रपञ्चब्रह्मविषयो विधिर्न सम्भवति॥

अन्योऽप्याह, यद्यपि वेदान्तवाक्यानां न परिनिष्पन्नब्रह्मस्वरूपपरतया प्रामाण्यम्, तथापि ब्रह्मस्वरूपं सिद्ध्यत्येव। कुतः। ध्यानविधिसामर्थ्यात्। एवमेव हि समामनन्ति "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" "य आत्माऽपहतपाप्मा" "सोऽन्वेष्टव्यः स विजिज्ञासितव्यः" "आत्मेत्येवोपासीत" "आत्मानमेव लोकमुपासीत"-ति। अत्र ध्यानविषयो हि नियोगः स्वविषयभूतध्यानं ध्येयैकनिरूपणीयमिति ध्येयमाक्षिपति, स च ध्येयः स्ववाक्यनिर्दिष्ट आत्मा। स किंरूप

१ अभावत्वादेवेति पाठान्तरम्।
२ नाप्यनुग्राहकमिति पाठान्तरम्।

इत्यपेक्षायां तत्स्वरूपविशेषसमर्पणद्वारेण "सत्यं ज्ञानमनन्तं ब्रह्म" "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" इत्येवमादीनां वाक्यानां ध्यानविधिशेषतया प्रामाण्यमिति विधिविषयभूतध्यानशरीरानुप्रविष्टब्रह्मस्वरूपेऽपि तात्पर्य्यमस्त्येव । अत "एकमेवाद्वितीयम्" "तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" "नेह नानाऽस्ति किञ्चन" इत्यादिभिर्ब्रह्मस्वरूपमेकमेव सत्यं तद्व्यतिरिक्तं सर्वं मिथ्येत्यवगम्यते । प्रत्यक्षादिभिर्भेदावलम्बिना च कर्मशास्त्रेण भेदः प्रतीयते । भेदाभेदयोः परस्परविरोधे सति, अनाद्यविद्यामूलत्वेनापि भेदप्रतीत्युपपत्तेरभेद एव परमार्थ इति निश्चीयते, तच्च ब्रह्मध्याननियोगेन तत्साक्षात्कारफलेन निरस्तसमस्ताविद्याकृतविविधभेदाद्वितीयज्ञानैकरसब्रह्मभावरूपो मोक्षः प्राप्यते । न च वाक्याद् वाक्यार्थज्ञानमात्रेण ब्रह्मभावसिद्धिः, अनुपलब्धेर्विविधभेददर्शनानुवृत्तेश्च, तथा च सति श्रवणादिविधानमनर्थकं स्यात् ॥

अथोच्येत, "रज्जुरेषा न सर्प्पः" इत्युपदेशेन सर्पभयनिवृत्तिदर्शनात् रज्जुसर्पवत् बन्धस्यापि मिथ्यारूपत्वेन ज्ञानबाध्यतया तस्य वाक्यजन्यज्ञानेनैव निवृत्तिर्युक्ता, न नियोगेन । नियोगसाध्यत्वे मोक्षस्यानित्यत्वं स्यात्, स्वर्गादिवत्, मोक्षस्य नित्यत्वं हि सर्ववादिसम्प्रतिपन्नम् । किंच, धर्माधर्मयोः फलहेतुत्वं स्वफलानुभवानुगुणशरीरोत्पादनद्वारेणेति ब्रह्मादिस्थावरान्तचतुर्विधशरीरसम्बन्धरूपसंसारफलत्वमवर्जनीयम् । तस्मात् न धर्म्मसाध्यो मोक्षः । तथा च श्रुतिः "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति, अशरीरं वावसन्तं न प्रियाप्रिये स्पृशत" इति । अशरीरत्वरूपे मोक्षे धर्माधर्मसाध्यप्रियाप्रियविरहश्रवणात् न धर्मसाध्यमशरीरत्वमिति विज्ञायते । न च नियोगविशेषसाध्यफलविशेषवत् ध्याननियोगसाध्यमशरीरत्वम्, अशरीरत्वस्य स्वरूपत्वेनासाध्यत्वात् । यथाहुः श्रुतयः "अशरीरं शरीरेष्वनवस्थेष्ववस्थितं महान्तं विभुमात्मानं मत्वा धीरो न शोचति" "अप्राणो ह्यमनाः शुभ्रः" "असंयोगो ह्ययं पुरुष" इत्याद्याः । अतोऽशरीरत्वरूपो मोक्षो नित्य इति न धर्मसाध्यः । तथा च श्रुतिः "अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् अन्यत्र भूता-

दुःख्याच्च यत्तत्पश्यसि तद्वदे"ति । अपि च उत्पत्तिप्राप्तिविकृतिसंस्कृति-रूपेण चतुर्विधं हि साध्यत्वं मोक्षस्य न सम्भवति । न तावत् उत्पाद्यः, मोक्षस्य ब्रह्मस्वरूपत्वेन नित्यत्वात् । नापि प्राप्यः, आत्मस्वरूपत्वेन ब्रह्मणो नित्यप्राप्तत्वात् । नापि विकार्य्यः, दध्यादिवदनित्यत्वप्रसङ्गात् । नापि संस्कार्य्यः, संस्कारो हि दोषापनयनेन वा गुणाधानेन वा साधयति । न तावत् दोषापनयनेन, नित्यशुद्धत्वात् ब्रह्मणः । नाप्यतिशयाधानेन, अनाधेयातिशयस्वरूपत्वात् । नित्यनिर्विकारत्वेन स्वाश्रयायाः पराश्रयायाश्च क्रियाया अविषयतया न नि[१]घर्षणेनादर्शादिवदपि संस्कार्य्यत्वम् । न च देहस्थया स्नानादिक्रियया आत्मा संस्क्रियते, किन्त्वविद्यागृहीतस्तत्सङ्घातोऽहंकर्त्ता, तत्फलानुभवोऽपि तस्यैव । न चाहंकर्त्तैवात्मा, तत्साक्षित्वात् । तथा च मन्त्रवर्णः "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति" । "आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा, कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च" "स पर्य्यगाच्छुक्रमकायमव्रणम[२]स्नाविरं शुद्धमपापविद्धम्" इति चाविद्यागृहीतादहंकर्त्तुरात्मस्वरूपमनाधेयातिशयं नित्यशुद्धं निर्विकारं निरूप्यते । तस्मादात्मस्वरूपत्वेन न साध्यो मोक्षः । यद्येवम्, किं वाक्यार्थज्ञानेन क्रियत इति चेत्, मोक्षप्रतिबन्धनिवृत्तिमात्रमिति ब्रूमः । तथा च श्रुतयः "त्वं हि नः पिता योऽस्माकमविद्यायाः परम्पारन्तारयसि" "श्रुतं ह्येवमेव भगवद्दृशेभ्यः तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भगवांच्छोकस्य पारन्तारयतु" "तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमार" इत्याद्याः । तस्मात् नित्यस्यैव मोक्षस्य प्रतिबन्धनिवृत्तिर्वाक्यार्थज्ञानेन क्रियते, निवृत्तिस्तु साध्याऽपि प्रध्वंसाभावरूपा न विनश्यति । "ब्रह्म वेद ब्रह्मैव भवति" "तमेव विदित्वाऽतिमृत्युमेती"-त्यादिवचनं मोक्षस्य ब्रह्मवेदनानन्तरभावितां प्रतिपादयत् नियोगव्यव-

१ निघर्षणेनेति पाठान्तरम् ।
२ अस्नाविरमिति पाठान्तरम् ।

धानं प्रतिरुणद्धि । न च विदिक्रियाकर्मत्वेन ध्यानक्रियाकर्मत्वेन वा का-र्य्यानुप्रवेशः, उभयकर्मत्वप्रतिषेधात्, "अन्यदेव तद्विदितादथो अविदि-तादधि" "येनेदं सर्वं विजानाति तं केन विजानीयादि"ति, "तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत" इति च । न चैतावता शास्त्रस्य निर्विषयत्वम्, अविद्यापरिकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य । न हीद-न्तया ब्रह्म विषयीकरोति शास्त्रम्, अपि त्वविषयं प्रत्यगात्मस्वरूपं प्रति-पादयत् अविद्याकल्पितज्ञातृज्ञानज्ञेयविभागं निवर्त्तयति । तथा च शा-स्त्रम्, "न दृष्टेर्द्रष्टारम्पश्येरि"त्येवमादि । न च ज्ञानादेव बन्धनिवृत्ति-रिति श्रवणादिविध्यानर्थक्यम्, स्वभावप्रवृत्तसकलेतरविकल्पविमुखीकर-णद्वारेण वाक्यार्थावगतिहेतुत्वात्तेषाम् । न च ज्ञानमात्रात् बन्धनिवृत्तिर्न दृष्टेति वाच्यम्, बन्धस्य मिथ्यारूपत्वेन ज्ञानोत्तरकालं स्थित्यनुपपत्तेः । अत एव न शरीरपातादूर्द्ध्वमेव बन्धनिवृत्तिरिति वक्तुं युक्तम् । न हि मि-थ्यारूपसर्पभयनिवृत्तिः रज्जुयाथात्म्यज्ञानातिरेकेण सर्पविनाशमपेक्षते । यदि शरीरसम्बन्धः पारमार्थिकः, तर्हि तद्विनाशापेक्षा, स तु ब्रह्मव्य-तिरिक्ततया न पारमार्थिकः, यस्य तु बन्धो न निवृत्तस्तस्य ज्ञानमेव न जातमित्यवगम्यते, ज्ञानकार्य्यादर्शनात् । तस्माच्छरीरस्थितिर्भवतु वा मा वा, वाक्यार्थज्ञानसमनन्तरम् मुक्त एवासौ । अतो न ध्याननियोगसाध्यो मोक्ष इति न ध्यानविधिशेषतया ब्रह्मणः सिद्धिः, अपि तु "सत्यं ज्ञान-मनन्तम्ब्रह्म" "तत्त्वमसि" "अयमात्मा ब्रह्मे"ति तत्परेणैव पदसमुदा-येन सिध्यतीति ॥

तदयुक्तम्, वाक्यार्थज्ञानमात्रात् बन्धनिवृत्त्यनुपपत्तेः । यद्यपि मिथ्यारूपो बन्धो ज्ञानबाध्यः, तथाऽपि बन्धस्यापरोक्षत्वात् न परोक्ष-रूपेण वाक्यार्थज्ञानेन स बाध्यते, रज्ज्वादावपरोक्षसर्पप्रतीतौ विद्यमा-नायां नायं सर्पो रज्जुरेषेत्याप्तोपदेशजनितपरोक्षसर्पविपरीतज्ञानमात्रेण भयानिवृत्तिदर्शनात् । आप्तोपदेशस्य तु भयनिवृत्तिहेतुत्वं वस्तुयाथा-त्म्यापरोक्षनिमित्तप्रवृत्तिहेतुत्वेन । तथा हि, रज्जुसर्पदर्शनभयात् परा-वृत्तः पुरुषो नायं सर्पो रज्जुरेषेत्याप्तोपदेशात् तद्वस्तुयाथात्म्यदर्शने

प्रवृत्तः तदेव प्रत्यक्षेण दृष्ट्वा भयान्निवर्तते । न च शब्द एव प्रत्यक्षज्ञानं जनयतीति वक्तुं युक्तम्, तस्यानिन्द्रियत्वात्, ज्ञानसामग्रीष्विन्द्रियाण्येवापरोक्षसाधनानि । न चास्यानभिसंहितफलकर्मानुष्ठानमृदितकषायस्य श्रवणमनननिदिध्यासनविमुखीकृतबाह्यविषयस्य पुरुषस्य वाक्यमेवापरोक्षज्ञानं जनयति, निवृत्तप्रतिबन्धे तत्परेऽपि पुरुषे ज्ञानसामग्रीविशेषाणामिन्द्रियादीनां स्वविषयनियमातिक्रमादर्शनेन तदयोगात् । न च ध्यानस्य वाक्यार्थज्ञानोपायता, इतरेतराश्रयत्वात्, वाक्यार्थज्ञाने जाते तद्विषयध्यानम्, ध्याने निर्वृत्ते वाक्यार्थज्ञानमिति । न च ध्यानवाक्यार्थज्ञानयोर्भिन्नविषयत्वम्, तथा सति ध्यानस्य वाक्यार्थज्ञानोपायता न स्यात् । न ह्यन्यध्यानमन्यौन्मुख्यमुत्पादयति, ज्ञातार्थस्मृतिसन्ततिरूपस्य ध्यानस्य वाक्यार्थज्ञानपूर्वकत्वमवर्जनीयम्, ध्येयब्रह्मविषयज्ञानस्य हेत्वन्तरासम्भवात् । न च ध्यानमूलं ज्ञानं वाक्यान्तरजन्यं निवर्तकज्ञानं तत्त्वमस्यादिवाक्यजन्यमिति युक्तम् । ध्यानमूलमिदं वाक्यान्तरजन्यं ज्ञानं तत्त्वमस्यादिवाक्यान्तरजन्यज्ञानैकविषयं भिन्नविषयं वा । एकविषयत्वे तदेवेतरेतराश्रयत्वम्, भिन्नविषयत्वे ध्यानेन तदौन्मुख्यापादनासंभवः । किंच, ध्यानस्य ध्येयध्यातृध्यानरूपप्रपञ्चापेक्षत्वात् निष्प्रपञ्चब्रह्मात्मैकत्वविषयवाक्यार्थज्ञानोत्पत्तौ दृष्टद्वारेण नोपयोग इति वाक्यार्थज्ञानमात्रादविद्यानिवृत्तिं वदतः श्रवणमनननिदिध्यासनविधीनामानर्थक्यमेव । यतो वाक्यादपरोक्षज्ञानासम्भवात् वाक्यार्थज्ञानेनाविद्या न निवर्तते, तत एव जीवन्मुक्तिरपि दूरोत्सारिता । का चेयं जीवन्मुक्तिः । सशरीरस्यैव मोक्ष इति, "माता मे वन्ध्ये"तिवत् व्याहतार्थं वचनम्, यतः सशरीरत्वं बन्धः अशरीरत्वं मोक्ष इति त्वयैव श्रुतिभिरुपपादितम् । अथ सशरीरत्वप्रतिभासे वर्तमाने यस्यायम्प्रतिभासोऽपि मिथ्येति प्रत्ययः तस्य सशरीरत्वनिवृत्तिरिति । न, मिथ्येति प्रत्ययेन सशरीरत्वं निवृत्तं चेत् कथं सशरीरस्य मुक्तिः, अजीवतोऽपि मुक्तिः सशरीरत्वमिथ्याप्रतिभासनिवृत्तिरेवेति कोऽयं जीवन्मुक्त[1] इति विशेषः । अथ सशरीरत्वप्रतिभा-

१ कोऽयं जीवन्मुक्तिरिति पाठान्तरम् ।

सो बाधितोऽपि यस्य द्विचन्द्रज्ञानवत् अनुवर्तते स जीवन्मुक्त इति चेत्, न, ब्रह्मव्यतिरिक्तसकलवस्तुविषयकत्वात् बाधकज्ञानस्य । कारणभूताविद्याकर्मादिदोषः सशरीरत्वप्रतिभासेन सह तेनैव बाधित इति बाधितानुवृत्तिर्न शक्यते वक्तुम्, द्विचन्द्रज्ञानादौ तु तत्प्रतिभासहेतुभूतदोषस्य बाधकज्ञानभूतचन्द्रैकत्वज्ञानाविषयत्वेनाबाधितत्वात् द्विचन्द्रप्रतिभासानुवृत्तिर्युक्ता । किंच, "तस्य तावदेव चिरं यावन्न विमोक्ष्ये, अथ सम्पत्स्य" इति सद्विद्यानिष्ठस्य शरीरपातमात्रमपेक्षते मोक्ष इति वदन्तीयं श्रुतिर्जीवन्मुक्तिं वारयति । सैषा जीवन्मुक्तिरापस्तम्बेनापि निरस्ता "वेदानिमं लोकममुञ्च परित्यज्यात्मानमन्विच्छेत् बुद्धे क्षेमप्रापणं तच्छास्त्रैर्विप्रतिषिद्धम्, बुद्धे चेत् क्षेमप्रापणमिहैव न दुःखमुपलभेत, एतेन परं व्याख्यातमि"ति, अनेन ज्ञानमात्रान्मोक्षश्च निरस्तः । अतस्सकलभेदनिवृत्तिरूपा मुक्तिर्जीवतो न सम्भवति । तस्मात् ध्याननियोगेन ब्रह्मापरोक्षज्ञानफलेनैव बन्धनिवृत्तिः । न च नियोगसाध्यत्वे मोक्षस्यानित्यत्वप्रसक्तिः, प्रतिबन्धनिवृत्तिमात्रस्यैव साध्यत्वात् । किंच, न नियोगेन साक्षात् बन्धनिवृत्तिः क्रियते, किन्तु निष्प्रपञ्चज्ञानैकरसब्रह्मापरोक्षज्ञानेन, नियोगस्तु तदा[1]परोक्ष्यज्ञानं जनयति । कथं नियोगस्य ज्ञानोत्पत्तिहेतुत्वमिति चेत् । कथं वा भवतोऽनभिसंहितफलानां कर्मणां वेदनोत्पत्तिहेतुत्वम् । मनोनैर्मल्यद्वारेणेति चेत् । ममापि तथैव । मम तु निर्मले मनसि शास्त्रेण ज्ञानमुत्पाद्यते, तव तु नियोगेन मनसि निर्मले ज्ञानसामग्री वक्तव्येति चेत् । ध्याननियोगनिर्मलं मन एव साधनमिति ब्रूमः । केनावगम्यत इति चेत् । भवतो वा कर्मभिर्मनो निर्मलं भवति, निर्मले मनसि श्रवणमनननिदिध्यासनैः सकलेतरविषयविमुखस्यैव शास्त्रं निवर्तकज्ञानमुत्पादयतीति केनावगम्यते । "विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" "श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" "ब्रह्म वेद ब्रह्मैव भवती"त्यादिभिः शास्त्रैरिति चेत् । ममापि "श्रोतव्यो मन्तव्यो

---

१ तदाऽपरोक्षं ज्ञानमिति पाठान्तरम् ।

निदिध्यासितव्यः" "ब्रह्मविदाप्नोति परम्" "न चक्षुषा गृह्यते नापि वाचा" "मनसा तु विशुद्धेन" "हृदा मनीषा मनसाऽभिक्लृप्त" इत्यादिभिः शास्त्रैर्ध्याननियोगेन मनो निर्मलं भवति, निर्मलं च मनो ब्रह्मापरोक्षज्ञानं जनयतीत्यवगम्यत इति निरवद्यम् । "नेदं यदिदमुपासते" इत्युपास्यत्वं प्रतिषिद्धमिति चेत् । नैवम्, नात्र ब्रह्मण उपास्यत्वं प्रतिषिध्यते, अपि तु ब्रह्मणो जगद्वैरूप्यं प्रतिपाद्यते, यदिदं जगदुपासते प्राणिनः नेदं ब्रह्म, तदेव ब्रह्म त्वं विद्धि यद्वाचाऽनभ्युदितं येन वागभ्युद्यते इति वाक्यार्थः । अन्यथा "तदेव ब्रह्म त्वं विद्धी"ति विरुध्येत, ध्यानविधिवैयर्थ्यं चात्मनः स्यात् । अतो ब्रह्मसाक्षात्कारफलेन ध्याननियोगेनैवापरमार्थभूतस्य कृत्स्नस्य द्रष्टृदृश्यादिप्रपञ्चरूपबन्धस्य निवृत्तिः ॥

यदपि कैश्चिदुक्तम्, भेदाभेदयोर्विरोधो न विद्यत इति, तदयुक्तम्, न हि शीतोष्णतमःप्रकाशादिवद् भेदाभेदावेकस्मिन्वस्तुनि सङ्गच्छेते । अथोच्येत, सर्वमेव हि वस्तुजातं प्रतीतिव्यवस्थाप्यम्, सर्वं च भिन्नाभिन्नं च प्रतीयते, कारणात्मना जात्यात्मना चाभिन्नम्, कार्य्यात्मना व्यक्त्यात्मना च भिन्नम् । छायातपादिषु विरोधः सहानवस्थानलक्षणो भिन्नाधारत्वरूपश्च । कार्य्यकारणयोर्जातिव्यक्त्योश्च तदुभयमपि नोपलभ्यते, प्रत्युत एकमेव वस्तु द्विरूपं प्रतीयते, यथा मृदयं घटः, खण्डो गौः मुण्डो गौरिति । न चैकरूपं किंचिदपि वस्तु लोकि[1]केदृष्टचरम्, न च तृणादेर्ज्वलनादिवत् अभेदो भेदोपमर्दी दृश्यत इति न वस्तुविरोधः, मृत्सुवर्णगवाश्वाद्यात्मनाऽवस्थितस्यैव घटमुकुटखण्ड[2]मुण्डगवाद्यात्मना चावस्थानात् । न चाभिन्नस्य भिन्नस्य च वस्तुनोऽभेदो भेदश्चैक एवाकार इतीश्वराज्ञा । प्रतीतत्वादैकरूप्यं चेत्, प्रतीतत्वादेव भिन्नाभिन्नत्वमिति द्वैरूप्यमप्यभ्युपगम्यताम् । न हि विस्फारिताक्षः पुरुषो घटशरावखण्डमुण्डादिषु वस्तुषूपलभ्यमानेष्वियं मृद्, अयञ्च घटः, इदञ्च गोत्वम्, इयं व्यक्तिरिति विवेक्तुं शक्नोति, अपि तु

१ लोके दृष्टचरमिति पाठान्तरम् ।
२ खण्डवडवाद्यात्मना इति पाठान्तरम् ।

मृदयं घटः खण्डो गौरित्येव च प्रत्येति[1] । अनुवृत्तिबुद्धिबोध्यं कारणमाकृतिश्च, व्यावृत्तिबुद्धिबोध्यं कार्य्यं व्यक्तिश्चेति विविनक्तीति चेत्, नैवम्, विविक्ताकारानुपलब्धेः । न हि सुसूक्ष्ममपि निरीक्षमाणैरिदमनुवर्त्तमानमिदं च व्यावर्त्तमानमिति पुरोऽवस्थिते वस्तुन्याकारभेद उपलभ्यते । यथा संप्रतिपन्नैक्ये कार्य्ये विशेषे चैकत्वबुद्धिरुपजायते, तथैव सकारणे ससामान्ये चैकत्वबुद्धिरविशिष्टोपजायते । एवमेव देशतः कालतश्चाकारतश्चात्यन्तविलक्षणेष्वपि वस्तुषु तदेवेदमिति प्रत्यभिज्ञा जायते । अतो द्व्यात्मकमेव वस्तु प्रतीयत इति कार्य्यकारणयोर्जातिव्यक्त्योश्चात्यन्तभेदोपपादनं प्रतीतिपराहतम् । यथोच्येत, मृदयं घटः खण्डो गौरितिवत् देवोऽहम्मनुष्योऽहमिति सामानाधिकरण्येनैक्यप्रतीतेरात्मशरीरयोरपि भिन्नाभिन्नत्वं स्यात्, अत इदम्भेदाभेदोपपादनं निजसदननिहितहुतवहज्वालायत इति । तदिदमनाकलितभेदाभेदसाधनसामानाधिकरण्यतदर्थयाथात्म्या[2]वबोधविलसितम् । तथा हि, अबाधित एव प्रत्ययः सर्वत्रार्थं व्यवस्थापयति, देहात्माभिमानस्तु आत्मयाथात्म्यगोचरैः सर्वैः प्रमाणैर्बाध्यमानो रज्जुसर्पादिबुद्धिवत् नात्मशरीरयोरभेदं साधयति, खण्डो गौर्मुण्डो गौरिति सामानाधिकरण्यस्य न केनचित् क्वचित् बाधा दृश्यते, तस्मात् नातिप्रसङ्गः । अत एव जीवोऽपि ब्रह्मणो नात्यन्तभिन्नः, अपि तु ब्रह्मांशत्वेन भिन्नाभिन्नः । तत्राभेद एव स्वाभाविकः, भेदस्त्वौपाधिकः । कथमिदमवगम्यत इति चेत्, "तत्त्वमसि" "नान्योऽतोऽस्ति द्रष्टा" "अयमात्मा ब्रह्म"त्यादिभिः श्रुतिभि"र्ब्रह्मेमे द्यावापृथिवी" इति प्रकृत्य "ब्रह्म दाशा ब्रह्म दासा ब्रह्मेमे कितवा उत स्त्रीपुंसौ ब्रह्मणो जातौ स्त्रियो ब्रह्मोतवा पुमानि"त्याथर्वणिकानां संहितोपनिषदि ब्रह्मसूक्ते अभेदश्रवणाच्च, "नित्यो नित्यानाञ्चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्" "ज्ञाज्ञौ द्वावजावीशानीशौ"

१ प्रतीतिरिति पाठान्तरम् ।

२ याथात्म्यानवबोध इति पाठान्तरम् ।

"क्रियागुणैरात्मगुणैश्च तेषां संयोगहेतुरपरोऽपि दृष्टः" "प्रधानक्षेत्रज्ञ-
पतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः" "स कारणं करणाधिपाधिपः"
"तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो ऽभिचाकशीति" "य आत्मनि ति-
ष्ठन्" "प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किंचन वेद नान्तरम्" "प्रा-
ज्ञेनात्मनाऽन्वारूढ उत्सृजन् याति" "तमेव विदित्वाऽतिमृत्युमेती"त्या-
दिभिर्भेदश्रवणाच्च जीवपरयोर्भेदाभेदावश्याश्रयणीयौ । तत्र "ब्रह्म वेद
ब्रह्मैव भवती"त्यादिभिर्मोक्षदशायां जीवस्य ब्रह्मस्वरूपापत्तिव्यपदेशात्,
"यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कम्पश्येदि"ति तदानीं भेदेनेश्वर-
दर्शननिषेधाच्च, अभेदः स्वाभाविक इत्यवगम्यते । ननु च "सोऽश्नुते
सर्वान् कामान् सह ब्रह्मणा विपश्चिते"ति सहश्रुत्या तदानीमपि
भेदः प्रतीयते, वक्ष्यति च "जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च"
"भोगमात्रसाम्यलिङ्गाच्चे"ति । नैतदेवम्, "नान्योऽतोऽस्ति द्रष्टे"त्येव-
मादिश्रुतिशतैरात्मभेदप्रतिषेधात् । "सोऽश्नुते सर्वान् कामान् सह ब्रह्म-
णा विपश्चिते"ति सर्वैः कामैः सह ब्रह्माश्नुते, सर्वगुणान्वितं ब्रह्माश्नुते
इत्युक्तं भवति, अन्यथा ब्रह्मणा सहेत्यप्राधान्यं ब्रह्मणः प्रसज्येत । "ज-
गद्व्यापारवर्जमि"त्यत्र मुक्तस्य भेदेनावस्थाने सति ऐश्वर्यस्य न्यूनताप्रसङ्गो
वक्ष्यते, अन्यथा "सम्पद्याविर्भावः स्वेनशब्दादि"त्यादिभिर्विरोधात् ।
तस्मादभेद एव स्वाभाविकः । भेदस्तु जीवानाम् परस्माद्ब्रह्मणः परस्प-
रञ्च बुद्धीन्द्रियदेहोपाधिकृतः । यद्यपि ब्रह्म निरवयवं सर्वगतं च, तथा-
प्याकाश इव घटादिना बुद्ध्याद्युपाधिना ब्रह्मण्यपि भेदः सम्भवत्येव ।
न च भिन्ने ब्रह्मणि बुद्ध्याद्युपाधिसंयोगः, बुद्ध्याद्युपाधिसंयोगाद् ब्रह्मणि
भेद इतीतरेतराश्रयत्वम्, उपाधेस्तत्संयोगस्य च कर्मकृतत्वात्, तत्प्रवा-
हस्य चानादित्वात् । एतदुक्तं भवति, पूर्वकर्मसम्बद्धाज्जीवात् स्वसम्बद्ध
एवोपाधिरुत्पद्यते, तद्युक्तात् कर्म, एवं बीजाङ्कुरन्यायेन कर्मोपाधिसम्ब-
न्धस्यानादित्वाददोष इति । अतो जीवानां परस्परं ब्रह्मणा चाभेद एव
स्वाभाविकः, भेदस्त्वौपाधिकः । उपाधीनां पुनः परस्परं ब्रह्मणा चाभे-
दवत् भेदोऽपि स्वाभाविकः, उपाधीनामुपाध्यन्तराभावात्, तदभ्युपगमे

Digitized by Google

ऽनवस्थानाच्च । अतो जीवकर्मानुरूपं ब्रह्मणो भिन्नाभिन्नस्वभावा एवो-पाधय उत्पद्यन्त इति ॥

अत्रोच्यते, अद्वितीयसच्चिदानन्दब्रह्मध्यानविषयविधिपरं वेदा-न्तवाक्यजातमिति वेदान्तवाक्यैरभेदः प्रतीयते, भेदावलम्बिभिः कर्म-शास्त्रैः प्रत्यक्षादिभिश्च भेदः प्रतीयते, भेदाभेदयोः परस्परविरोधात् अनाद्यविद्यामूलतयाऽपि भेदप्रतीत्युपपत्तेरभेद एव परमार्थ इत्युक्तम् । तत्र यदुक्तम्, भेदाभेदयोरुभयोरपि प्रतीतिसिद्धत्वात् न विरोध इति, तद-युक्तम् । कस्माच्चित् कस्यचित् विलक्षणत्वं हि तस्मात् तस्य भेदः, तद्वि-परीतत्वञ्चाभेदः, तयोस्तथाभावातथाभावरूपयोरेकत्र सम्भवमनुन्मत्तः को ब्रवीति । कारणात्मना जात्यात्मना चाभेदः कार्य्यात्मना व्यक्त्या-त्मना च भेद इत्याकारभेदादविरोध इति चेत्, न, विकल्पासहत्वात् । आकारभेदादविरोध इति वदतः किमेकस्मिन्नाकारे भेद आकारान्तरे चाभेद इत्यभिप्रायः, उताकारद्वययोगिवस्तुगतावुभावपीति । पूर्वस्मि-न्कल्पे व्यक्तिगतो भेदो जातिगतश्चाभेद इति नैकस्य द्व्यात्मकता । जा-तिर्व्यक्तिरिति चैकमेव वस्त्विति चेत्, तर्हि आकारभेदादविरोधः परि-त्यक्तः स्यात् । एकस्मिंश्च विलक्षणत्वतद्विपर्ययौ विरुद्धावित्युक्तम् । द्वि-तीये तु कल्पे ऽन्योन्यविलक्षणमाकारद्वयम्, अप्रतिपन्नञ्च तदाश्रयभूतं वस्त्विति । तृतीयाभ्युपगमेऽपि त्रयाणामन्योन्यवैलक्षण्यमेवोपपादितं स्यात्, न पुनरभेदः । आकारद्वयानिरू¹प्यमाणाविरोधं तदाश्रयभूतं वस्तु-नि भिन्नाभिन्नत्वमिति चेत्, स्वस्मात् विलक्षणं स्वाश्रयमाकारद्वयं स्व-स्मिन् विरुद्धधर्मद्वयसमावेशनिर्वाहकं कथं भवेत्, अविलक्षणं तु कथन्त-राम्, आकारद्वयतद्वतोश्च द्व्यात्मकत्वाभ्युपगमे निर्वाहकान्तरापेक्षयाऽन-वस्था²नात् । न च सम्प्रतिपन्नैक्यव्यक्तिप्रतीतिवत् ससामान्येऽपि वस्तु-न्येकरूपा प्रतीतिरुपजायते, यत "इदमित्थमि"ति सर्वत्र प्रकारप्रकारित-

---

१ निरूप्यमाणेति पाठान्तरम् ।

२ अनवस्था स्यादिति पाठान्तरम् ।

येव सर्वा प्रतीतिः, तत्र प्रकारांशो जातिः, प्रकार्य्यंशो व्यक्तिरिति नैका-कारता प्रतीतिः । अत एव जीवस्यापि ब्रह्मणो भिन्नाभिन्नत्वं न सम्भवति । तस्मात् अभेदस्यानन्यथासिद्धशास्त्रमूलत्वात् अनाद्यविद्यामूल एव भेद-प्रत्ययः । नन्वेवं ब्रह्मण एवाज्ञत्वात् तन्मूलाश्च जन्ममरणादयो दोषाः प्रादुःष्युः, ततश्च "यः सर्वज्ञः सर्ववित्" "एष आत्माऽपहतपाप्मे"त्या-दीनि शास्त्राणि बाध्येरन् । नैवम्, अज्ञत्वादिदोषाणामपरमार्थत्वात् । भवतस्तूपाधिब्रह्मव्यतिरिक्तं वस्त्वन्तरमनभ्युपगच्छतो ब्रह्मण्येवोपाधिसं-सर्गः, तत्कृताश्च जीवत्वाज्ञत्वादयो दोषाः परमा[1]र्थत एव भवेयुः । न हि ब्रह्मणि निरवयवेऽच्छेद्ये संबध्यमाना उपाधयस्तच्छित्त्वा भित्त्वा वा सम्बध्यन्ते, अपितु ब्रह्मस्वरूपे संयुज्य तस्मिन्नेव स्वकार्य्याणि कुर्वन्ति । यदि मन्वीत, उपाध्युपहितं ब्रह्म जीवः स चाणुपरिमाणः, अणुत्वस्या-वच्छेदकस्य मनसोऽणुत्वात्, स चाव[2]च्छेदोऽनादिः, एवमुपाध्युपहि-ते[3]ंशे सम्बध्यमाना दोषा अनुहिते परे ब्रह्मणि न सम्बध्यन्त इति, अयं प्रष्टव्यः, किमुपाधिना छिन्नो ब्रह्मखण्डोऽणुरूपो जीवः, उताच्छिन्न एवाणुरूपोपाधिसंयुक्तो ब्रह्मप्रदेशविशेषः, उतोपाधिसंयुक्तं ब्रह्मस्वरूपम्, उतोपाधिसंयुक्तं चेतनान्तरम्, अथोपाधिरेवेति । अच्छेद्यत्वाद् ब्रह्मणः प्रथमः कल्पो न कल्पते, आदिमत्त्वं च जीवस्य स्यात्, एकस्य सतो द्वैधीकरणं हि छेदनम् । द्वितीये तु कल्पे ब्रह्मण एव प्रदेशविशेषे उपा-धिसंबन्धादौपाधिकाः सर्वे दोषास्तस्यैव स्युः, उपाधौ गच्छत्युपाधिना स्वसंयुक्तब्रह्मप्रदेशाकर्षणायोगाद् अनुक्षणमुपाधिसंयुक्तब्रह्मप्रदेशविशेषभे-दात् क्षणे क्षणे बन्धमोक्षौ स्याताम्, आकर्षणे चाच्छिन्नत्वात् कृत्स्नस्य ब्रह्मण आकर्षणं स्यात् । निरंशस्य व्यापिन आकर्षणं न सम्भवीति चेत्, तर्हि उपाधिरेव गच्छतीति पूर्वोक्त एव दोषः स्यात्, अच्छिन्नब्रह्म-प्रदेशेषु सर्वोपाधिसंसर्गे सर्वेषां च जीवानां ब्रह्मण एव प्रदेशत्वेनाभे-

१ परमार्थतयैवेति पाठान्तरम् ।
२ अवच्छेदक इति पाठान्तरम् ।
३ उपहितेंऽशे इति पाठान्तरम् ।

Digitized by Google

द्प्रतिसन्धानं स्यात् । प्रदेशभेदादप्रतिसन्धाने चैकस्यापि स्वोपाधौ गच्छति सति प्रतिसन्धानं न स्यात् । तृतीये तु कल्पे ब्रह्मस्वरूपस्यैवोपाधिसम्बन्धेन जीवत्वापातात् तदतिरिक्तानुपहितब्रह्मासिद्धिः स्यात्, सर्वेषु च देहेष्वेक एव जीवः स्यात् । तुर्य्ये तु कल्पे ब्रह्मणोऽन्य एव जीव इति जीवभेदस्यौपाधिकत्वं परित्यक्तं स्यात् । चरमे पक्षे चार्वाकपक्ष एव गृहीतः स्यात् । तस्मात् अभेदशास्त्रबलेन ब्रह्मणः भेदस्याविद्यामूलत्वमेवाभ्युपगन्तव्यम् । अतः प्रवृत्तिनिवृत्तिरूपप्रयोजनपरतयैव शास्त्रस्य प्रामाण्येऽपि ध्यानविधिशेषतया वेदान्तवाक्यानां ब्रह्मस्वरूपे प्रामाण्यमुपपन्नमिति ॥

तदप्ययुक्तम्, ध्यानविधिशेषत्वे ऽपि वेदान्तवाक्यानामर्थसत्यत्वे प्रामाण्यायोगात् । एतदुक्तं भवति, ब्रह्मस्वरूपगोचराणि वाक्यानि किं ध्यानविधिनैकवाक्यतामापन्नानि ब्रह्मस्वरूपे प्रामाण्यं प्रतिपद्यन्ते, उत स्वतन्त्राण्येव । एकवाक्यत्वे ध्यानपरत्वेन ब्रह्मस्वरूपे तात्पर्य्यं न सम्भवति । भिन्नवाक्यत्वे प्रवृत्तिनिवृत्तिरूपप्रयोजनविरहात् अनवबोधकत्वमेव । न च वाच्यम्, ध्यानं नाम स्मृतिसन्ततिरूपम्, तच्च स्मर्त्तव्यैकनिरूपणीयमिति ध्यानविधेः स्मर्त्तव्यविशेषाकाङ्क्षायाम् "इदं सर्वं यदयमात्मा" "अयमात्मा ब्रह्म सर्वानुभूतिः" "सत्यं ज्ञानमनन्तं ब्रह्म"इत्यादीनि ब्रह्मस्वरूपतद्विशेषादीनि समर्पयन्ति तेनैकवाक्यतामापन्नान्यर्थसद्भावे प्रमाणमिति, ध्यानविधेः स्मर्त्तव्यविशेषापेक्षत्वेऽपि "मनो ब्रह्मेत्युपासीत"इत्यादिदृष्टिविधिवत् असत्येनाप्यर्थविशेषेण ध्याननिर्वृत्त्युपपत्तेः, ध्येयसत्यत्वानपेक्षणात् । अतो वेदान्तवाक्यानां प्रवृत्तिनिवृत्तिप्रयोजनविधुरत्वात्, ध्यानविधिशेषत्वेऽपि ध्येयविशेषस्वरूपसमर्पणमात्रपर्य्यवसानात्, स्वातन्त्र्येऽपि बालातुराद्युपच्छन्दनवाक्यवत् ज्ञानमात्रेणैव पुरुषार्थपर्य्यन्तत्वासिद्धेश्च, परिनिष्पन्नवस्तुसत्यतागोचरत्वाभावात्, ब्रह्मणः शास्त्रप्रमाणकत्वं न सम्भवतीति प्राप्तम् ॥

१ प्रदेशत्वेनैकत्वेन इति पाठान्तरम् ।
२ ब्रह्मेति पुस्तकान्तरे नास्ति ।
३ नाम ब्रह्मेत्यादि तु पाठान्तरम् ।

Digitized by Google

तत्र प्रतिपद्यते "तत्तु समन्वयादि"ति । "समन्वयः" सम्यगन्वयः, पुरुषार्थतयाऽन्वय इत्यर्थः । परमपुरुषार्थभूतस्यानवधिकातिशयानन्दस्वरूपस्य ब्रह्मणोऽभिधेयतयाऽन्वयात् "तत्" शास्त्रप्रमाणकत्वं सिद्ध्यत्येवेत्यर्थः । निरस्तनिखिलदोषनिरतिशयानन्दस्वरूपतया परमप्राप्यं ब्रह्म बोधयन् वेदान्तवाक्यगणः प्रवृत्तिनिवृत्तिपरताविरहात् न प्रयोजनपर्य्यवसायीति ब्रुवाणो राजकुलवासिनः पुरुषस्य कौलेयककुलानुप्रवेशेन प्रयोजनशून्यतां ब्रूते । एतदुक्तं भवति, अनादिकर्मरूपाविद्यावेष्टनतिरोहितपरावरतत्त्वयाथात्म्यस्वस्वरूपावबोधानां देवासुरगन्धर्वसिद्धविद्याधरकिन्नरकिंपुरुषयक्षरक्षःपिशाचमनुजपशुशकुनिसरीसृपवृक्षगुल्मलतादूर्वादीनां स्त्रीपुन्नपुंसकभेदभिन्नानां क्षेत्रज्ञानां व्यवस्थितधारकपोषकभोग्यविशेषाणां मुक्तानां स्वस्य चाविशेषेणानुभवसम्भवे स्वरूपगु[१]णविभवचेष्टितैरनवधिकातिशयानन्दजन[२]कं परब्रह्मास्तीति बोधयदेव वाक्यं प्रयोजनपर्य्यवसायि, प्रवृत्तिनिवृत्तिनिष्ठन्तु यावत्पुरुषार्थान्वयबोधं न प्रयोजनपर्य्यवसायि । एवंभूतं ब्रह्म कथं प्राप्यत इत्यपेक्षायाम् "ब्रह्मविदाप्नोति परम्" "आत्मानमेव लोकमुपासीते"ति वेदनादिशब्दैरुपासनं ब्रह्मप्राप्त्युपायतया विधीयते । यथा "स्ववेश्मनि निधिरस्ती"ति वाक्येन निधिसद्भावं ज्ञात्वा तृप्तः सन् पश्चात् तदुपादाने च प्रयतते । यथा च कश्चिद्राजकुमारो बालक्रीडासक्तो नरेन्द्रभवनान्निष्क्रान्तो "मार्गाद् भ्रष्टो नष्ट"इति राज्ञा विज्ञातः स्वयं चाज्ञातपितृकः केनचित् द्विजवर्य्येण वर्द्धितोऽधिगतवेदशास्त्रार्थः षोडशवर्षः सर्वकल्याणगुणाकरस्तिष्ठन् "पिता ते सर्वलोकाधिपतिर्गाम्भीर्य्यौदार्य्यवात्सल्यसौशील्यशौर्यवीर्य्यपराक्रमादिगुणसम्पन्नस्त्वामेव नष्टं पुत्रं दिदृक्षुः पुरवरे तिष्ठती"ति केनचिदभियुक्ततमेन प्रयुक्तं वाक्यं शृणोति चेत्, तदानीमेव "अहं तावत् जीवतः पुत्रो मत्पिता च सर्वसम्पत्समृद्ध" इति निरतिशयहर्षसमन्वितो भवति, राजा च स्वपुत्रं जीवन्तमरोगमतिमनोहरदर्शनं विदितसकलवेद्यं श्रुत्वा ऽवा-

१ स्वरूपरूपगुणेति तु पाठान्तरम् ।
२ जनर्नामिति पाठान्तरम् ।

प्तसमस्तपुरुषार्थो भवति, पश्चात् तदुपादाने च प्रयतते, पश्चात् तावुभौ सङ्गच्छेते चेति । यत्पुनः परिनिष्पन्नवस्तुगोचरस्य वाक्यस्य तज्ज्ञानमात्रेणापि पुरुषार्थपर्य्यवसानाद् बालातुराद्युपच्छन्दनवाक्यवत् नार्थसद्भावे प्रामाण्यमिति, तदसत्, अर्थसद्भावाभावे निश्चिते ज्ञातोऽप्यर्थः पुरुषार्थाय न भवति । बालातुरादीनामप्यर्थसद्भावभ्रान्त्यैव हर्षाद्युत्पत्तिः, तेषामेव तस्मिन्न[1]पि ज्ञाने विद्यमाने यद्यर्थाभावनिश्चयो जायेत, ततस्तदानीमेव हर्षादयो निवर्त्तेरन् । औपनिषदेष्वपि वाक्येषु ब्रह्मास्तित्वतात्पर्याभावनिश्चये ब्रह्मज्ञाने सत्यपि पुरुषार्थपर्य्यवसानं न स्यात् । अतो "यतो वा इमानी"त्यादिवाक्यं निखिलजगदेककारणं निरस्तनिखिलदोषगन्धं सार्वज्ञ्यसत्यसङ्कल्पत्वाद्यनन्तकल्याणगुणाकरमनवधिकातिशयानन्दं ब्रह्मास्तीति बोधयतीति सिद्धम् ॥

ईक्षत्यधिकरणम् । **ईक्षतेर्नाशब्दम् ॥ ५ ॥**

"यतो वा इमानी"त्यादिजगत्कारणवादिवाक्यप्रतिपाद्यं सर्वज्ञं सर्वशक्ति समस्तहेयप्रत्यनीककल्याणगुणैकतानं ब्रह्म जिज्ञास्यमित्युक्तम् । इदानीं जगत्कारणवादिवाक्यानामानुमानिकप्रधानादिप्रतिपादनानर्हतोच्यते "ईक्षतेर्नाशब्दमि"त्यादिना । इदमाम्नायते छान्दोग्ये "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" "तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजते"त्यादि । तत्र सन्दिह्यते, किं सच्छब्दवाच्यं जगत्कारणम् परोक्तमानुमानिकं प्रधानम्, उतोक्तलक्षणं ब्रह्मेति । किं प्राप्तम् । प्रधानमिति । कुतः । "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमि"तीदंशब्दवाच्यस्य चेतनभोग्यभूतस्य सत्त्वरजस्तमोमयस्य वियदादिनानारूपविकारावस्थस्य वस्तुनः कारणावस्थां वदति । कारणभूतद्रव्यस्यावस्थान्तरापत्तिरेव हि कार्य्यता, अतो यद् द्रव्यं यत्स्वभावं च कार्य्यावस्थं तत्स्वभावकतदेव द्रव्यं कारणावस्थम् । सत्त्वरजस्तमोमयं च कार्य्यमिति गुणसाम्यावस्थं प्रधानमेव कारणम्, तदेवोपसंहृतसकलविशेषं सन्मात्रमिति

१ तस्मिन्नेवेति पाठान्तरम् ।

"सदेव सोम्येदमग्र आसीदेकमेवे"त्यभिधीयते, तत एव च कार्य्यकारणयोरनन्यत्वम्। तथा सत्येवैकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्तिः । अन्यथा "यथा सोम्यैकेन मृत्पिण्डेने"त्यादि मृत्पिण्डतत्कार्य्यदृष्टान्तदार्ष्टान्तिकयोर्वैरूप्यं चेति जगत्कारणवादिवाक्येन महर्षिणा कपिलेनोक्तं प्रधानमेव प्रतिपाद्यते । प्रतिज्ञादृष्टान्तरूपेणानुमानवेषमेव चेदं वाक्यमिति सच्छब्दवाच्यमानुमानिकमेवेति ॥

एवं प्राप्तेऽभिधीयते "ईक्षतेर्नाशब्दमि"ति । यस्मिन् शब्द एव प्रमाणं न भवति तत् "अशब्दम्" आनुमानिकं प्रधानमित्यर्थः । न तत् जगत्कारणवादिवाक्यप्रतिपाद्यम् । कुतः । "ईक्षतेः" सच्छब्दवाच्यसम्बन्धिव्यापारविशेषाभिधायिन ईक्षतेर्धातोः श्रवणात् "तदैक्षत बहु स्यां प्रजायेये"ति । ईक्षणक्रियायोगश्चाचेतने प्रधाने न सम्भवति । अत ईदृशेक्षणक्षमश्चेतनविशेष एव सर्वज्ञः सर्वशक्तिः पुरुषोत्तमः सच्छब्दाभिधेयः । तथा च सर्वेष्वपि सृष्टिप्रकरणेष्वीक्षापूर्विकैव सृष्टिः प्रतीयते "स ऐक्षत लोकान्नु सृजा इति, स इमान् लोकानसृजत" "स ईक्षाञ्चक्रे" "स प्राणमसृजते"त्यादिषु । ननु च कार्यानुगुणेनैव कारणेन भवितव्यम् । सत्यम् । सर्वकार्य्यानुगुण एव सर्वज्ञः सर्वशक्तिः सत्यसङ्कल्पः पुरुषोत्तमः सूक्ष्मचिदचिद्वस्तुशरीरकः, यथाह "पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" "यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयन्तपः" "यस्याव्यक्तं शरीरं यस्याक्षरं शरीरं यस्य मृत्युः शरीरम् एष सर्वभूतान्तरात्मे"त्यादि । तदेतत् "न विलक्षणत्वादि"त्यादिषु प्रतिपादयिष्यते । अत्र सृष्टिवाक्यानि न प्रधानप्रतिपादनयोग्यानीत्युच्यते । वस्तुविरोधस्तत्रैव परिहरिष्यते । यत्तूक्तम्, प्रतिज्ञादृष्टान्तयोगादनुमानरूपमेवेदं वाक्यमिति, तदसत्, हेत्वनुपादानात्, "येनाश्रुतं श्रुतमि"त्येकविज्ञानेन सर्वविज्ञाने प्रतिपिपादयिषिते सर्वात्मना तदसम्भवं मन्वानस्य तत्सम्भवमात्रप्रदर्शनाय हि दृष्टान्तोपादानम् । ईक्षत्यादिश्रवणादेव ह्यनुमानगन्धाभावोऽवगतः ॥

अथ स्यात्, न चेतनगतं मुख्यमीक्षणमिहोच्यते, अपि तु प्रधान-

मतं गौणमीक्षणम्, "तत्तेज ऐक्षत" "ता आप ऐक्षन्ते"ति गौणेक्षणसाहचर्य्यात् । भवति ह्यचेतनेष्वपि चेतनधर्मोपचारः, यथा "वृष्टिप्रतीक्षाः शालयः," "वर्षेण बीजं प्रतिसञ्जहर्षे"ति । अतो गौणमीक्षणमितीमामाशङ्कामनुभाष्य परिहरति

गौणश्चेत् न, आत्मशब्दात् ॥ ६ ॥

यदुक्तम्, गौणेक्षणसाहचर्य्यात् सतोऽपीक्षणव्यपदेशः सर्गनियतपूर्वावस्थाभिप्रायो गौण इति, तच्च, "ऐतदात्म्यमिदं सर्वम्, तत् सत्यं स आत्मे"ति सच्छब्दप्रतिपादितस्यात्मशब्देन व्यपदेशात् । एतदुक्तम्भवति, "ऐतदात्म्यमिदं सर्वम्, स आत्मे"ति चेतनाचेतनात्मकप्रपञ्चोद्देशेन "स[1] त आत्मे"त्यात्मोपदेशोऽयं नाचेतने प्रधाने सङ्गच्छत इति । अतस्तेजोऽबन्नानामपि परमात्मैवात्मेति तेजःप्रभृतयोऽपि शब्दाः परमात्मन एव वाचकाः । तथा हि "हन्ताऽहमिमास्तिस्रो देवता अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी"ति परमात्मानुप्रवेशादेव तेजःप्रभृतीनां वस्तुत्वं तत्तन्नामभाक्त्वं चेति । "तत्तेज ऐक्षत" "ता आप ऐक्षन्ते"त्यपि मुख्य एवेक्षणव्यपदेशः । अतः साहचर्य्यादपि "तदैक्षते"त्यत्र गौणत्वाशङ्का दूरोत्सारितेति सूत्राभिप्रायः ॥

इतश्च न प्रधानं सच्छब्दप्रतिपाद्यम्,

तन्निष्ठस्य मोक्षोपदेशात् ॥ ७ ॥

मुमुक्षोः श्वेतकेतोः "तत्त्वमसी"ति तदात्मकत्वानुसन्धानमुपदिश्य तन्निष्ठस्य "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य" इति शरीरपातमात्रान्तरायो ब्रह्मसम्पत्तिलक्षणो मोक्ष इत्युपदिशति । यदि च प्रधानमचेतनं कारणमुपदिश्येत, तदा तदात्मकत्वानुसन्धानस्य मोक्षसाधनत्वोपदेशो नोपपद्येत, "यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवती"ति तन्निष्ठस्याचेतनसम्पत्तिरेव स्यात् । न च मातापितृसहस्रेभ्यो

१ स आत्मेति पाठान्तरम् ।

Digitized by Google

ऽपि तस्मात्तरं शास्त्रम् एवंविधतापत्रयाभिहतिहेतुभूतामविद्यासम्पत्तिमुपदिशति। प्रधानकारणवादिनोऽपि प्रधाननिष्ठस्य मोक्षं नाभ्युपगच्छन्ति ॥

इतश्च न प्रधानम्,

हेयत्वावचनाच्च ॥ ८ ॥

यदि प्रधानमेव कारणं सच्छब्दाभिहितं भवेत्, तदा मुमुक्षोः श्वेतकेतोस्तदात्मकत्वं मोक्षविरोधित्वात् हेयत्वेनैवोपदेश्यं स्यात्, न च तत् क्रियते, प्रत्युत उपादेयत्वेनैव "तत्त्वमसि" "तस्य तावदेव चिरमि"-त्युपदिश्यते ॥

इतश्च न प्रधानम्,

प्रतिज्ञाविरोधात् ॥ ९ ॥

प्रधानकारणत्वे प्रतिज्ञाविरोधश्च भवति। वाक्योपक्रमे हि एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातम्। तच्च कार्य्यकारणयोरनन्यत्वेन कारणभूतसद्विज्ञानात् तत्कार्य्यभूतचेतनाचेतनप्रपञ्चस्य ज्ञाततयैवोपपादनीयम्। तत्तु प्रधानकारणत्वे चेतनवर्गस्य प्रधानकार्य्यत्वाभावात् प्रधानविज्ञानेन चेतनवर्गविज्ञानासिद्धेर्विरुध्यते ॥

इतश्च न प्रधानम्,

स्वाप्ययात् ॥ १० ॥

तदेव सच्छब्दवाच्यं प्रकृत्याह "स्वप्नान्तम्मे सोम्य विजानीहीति यत्रैतत्पुरुषः स्वपिति नाम, सता सोम्य तदा सम्पन्नो भवति, स्वमपीतो भवति, तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवती"ति। सुषुप्तं जीवं सता सम्पन्नम् "स्वमपीतः" स्वस्मिन् प्रलीन इति व्यपदिशति। प्रलयश्च स्वकारणे लयः। न चाचेतनं प्रधानं चेतनस्य जीवस्य कारणं भवति, "स्वमपीतो भवति" आत्मानमेव जीवोऽपीतो भवतीत्यर्थः। चिदचिच्छरीरकं तदात्मभूतं ब्रह्मैव जीवशब्देनाप्यभिधीयत इति नामरूपव्याकरणश्रुत्योक्तम्, तत् जीवशब्दाभिधेयं ब्रह्म सुषुप्तिकालेऽपि प्रलयकाल इव नामरूपपरिष्वङ्गाभावात् केवलसच्छब्दाभिधेयमिति "सता

सोम्य तदा सम्पन्नो भवति, स्वमपीतो भवती"त्युच्यते । तथा समानप्रकरणे नामरूपविभागपरिष्वङ्गाभावेन प्राज्ञेनैव परिष्वङ्गात् "प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमि"त्युच्यते, आ[१]मोक्षाज्जीवस्य नामरूपपरिष्वङ्गादेव हि स्वव्यतिरिक्तविषयज्ञानोदयः । सुषुप्तिकालेऽपि हि नामरूपे विहाय सता सम्परिष्वक्ताः पुनरपि जाग्रद्दशायां नामरूपे परिष्वज्य तत्तन्नामरूपा भवन्तीति श्रुत्यन्तरे स्पष्टमभिधीयते "यदा सुप्तः स्वप्नं न कथंचन पश्यति अथास्मिन् प्राण एवैकधा भवति, तस्माद्वा एतस्मादात्मनः प्राणा यथाऽऽयतनं विप्रतिष्ठन्ते," तथा "त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा दंशो वा मशको वा यद्यद्भवन्ति तथा भवन्ती"ति । तथा सुषुप्तं जीवम् "प्राज्ञेनात्मना सम्परिष्वक्त" इति च वदति । तस्मात् सच्छब्दवाच्यं परं ब्रह्म सर्वज्ञः परमेश्वरः पुरुषोत्तम एव । तदाह वृत्तिकारः "सता सोम्य तदा सम्पन्नो भवती'ति सम्पत्त्यसम्पत्तिभ्यामेतदध्यवसीयते 'प्राज्ञेनात्मना सम्परिष्वक्त' इति चाहे"ति ॥

इतश्च न प्रधानम्,

गतिसामान्यात् ॥ ११ ॥

"आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किंचन मिषत् स ऐक्षत लोकान्नु सृजा इ इमाँल्लोकानसृजत" इति, "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी" "तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतदृग्वेद" इत्यादिसृष्टिवाक्यानां या "गतिः" प्रवृत्तिः "तत्सामान्यात्" तत्समानार्थत्वादस्य । तेषु सर्वेषु सर्वेश्वरः कारणमवगम्यते, तस्मादत्रापि सर्वेश्वर एव कारणमिति निश्चीयते ॥

इतश्च न प्रधानम्,

श्रुतत्वाच्च ॥ १२ ॥

१ आमोक्षमिति पाठान्तरम् ।

अतमेव ह्यस्यामुपनिषदि अस्य सच्छब्दवाच्यस्यात्मत्वेन नामरूपयोर्व्याकर्तृत्वं सर्वज्ञत्वं सर्वशक्तित्वं सर्वाधारत्वमपहतपाप्मत्वादिकं सत्यकामत्वं सत्यसङ्कल्पत्वं च "अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" "सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः" "ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा" "यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितम्" "तस्मिन्कामाः समाहिताः," "एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको ऽविजिघत्सोऽपिपासस्सत्यकामः सत्यसङ्कल्प" इति। तथा च श्रुत्यन्तराणि "न तस्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम्, स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः" "सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन् यदास्ते," "अन्तः प्रविष्टः शास्ता जनानाम्" "सर्वात्मा विश्वात्मानं परायणं पतिं विश्वस्यात्मेश्वरम्, यच्च किंचिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा, अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" "एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायण" इत्यादीनि। तस्मात् जगत्कारणवादिवा[1]क्यानि न प्रधानप्रतिपादनयो[2]ग्यानि। अतः सर्वज्ञस्सर्वशक्तिस्सर्वेश्वरो निरस्तसमस्तदोषगन्धो ऽनवधिकातिशयासंख्येयकल्याणगुणगणौघमहार्णवः पुरुषोत्तमो नारायण एव निखिलजगदेककारणं जिज्ञास्यं ब्रह्मेति च स्थितम्। अत एव निर्विशेषचिन्मात्रब्रह्मवादोऽपि सूत्रकारेणाभिः श्रुतिभिर्निरस्तो वेदितव्यः, पारमार्थिकमुख्येक्षणादिगुणयोगि जिज्ञास्यं ब्रह्मेति स्थापनात्। निर्विशेषवादे हि साक्षित्वमप्यपारमार्थिकम्। वेदान्तवेद्यं ब्रह्म जिज्ञास्यतया प्रतिज्ञातम्, तच्च चेतनमिति "ईक्षतेर्नाशब्दमि"त्यादिभिः सूत्रैः प्रतिपाद्यते। चेतनत्वं नाम चैतन्यगुणयोगः। अत ईक्षणगुणविरहिणः प्रधानतुल्यत्वमेव। किञ्च, निर्विशेषप्रकाशमात्रब्रह्मवादे तस्य [3]स्वप्रकाशत्वमपि दुरुपपा-

---

१ वाक्यमिति पाठान्तरम्।
२ योग्यमिति पाठान्तरम्।
३ स्वेति पुस्तकान्तरे नास्ति।

Digitized by Google

वम् । प्रकाशो हि नाम स्वस्य परस्य च व्यवहारयोग्यतामापादयन् वस्तुविशेषः । निर्विशेषस्य वस्तुनस्तदुभयरूपत्वाभावात् घटादिवत् अचित्त्वमेव । तदुभयरूपत्वाभावेऽपि तत्क्षमत्वमस्तीति चेत्, तन्न, तत्क्ष-मत्वं हि तत्सामर्थ्यमेव, सामर्थ्यगुणयोगे हि निर्विशेषवादः परित्यक्तः स्यात् । अथ श्रुतिप्रामाण्यादयमेको विशेषोऽभ्युपगम्यत इति चेत्, हन्त तर्हि तत एव सर्वज्ञता, सर्वशक्तित्वम्, सर्वेश्वरत्वम्, सर्वकल्याणगुणा-करत्वम्, सकलहेयप्रत्यनीकतेत्यादयः सर्वेऽभ्युपगन्तव्याः । शक्तिमत्त्वं च कार्य्यविशेषानुगुणत्वम्, तच्च कार्य्यविशेषैकनिरूपणीयम् । कार्य्यविशे-षस्य निष्प्रमाणकत्वे तदेकनिरूपणीयं शक्तिमत्त्वमपि निष्प्रमाणकं स्यात् । किञ्च, निर्विशेषवस्तुवादिनो वस्तुत्वमपि निष्प्रमाणम् । प्रत्यक्षानुमा-नागमस्वानुभवाः सविशेषगोचरा इति पूर्वमेवोक्तम् । तस्मात् विचित्रचे-तनाचेतनात्मकजगद्रूपेण बहु स्यामितीक्षणक्षमः पुरुषोत्तम एव जिज्ञास्यं ब्रह्मेति सिद्धम् ॥

एवं जिज्ञासितव्यस्य ब्रह्मणश्चेतनभोग्यभूतजडरूपसत्त्वरजस्तमो-मयप्रधानाद् व्यावृत्तिरुक्ता । इदानीं कर्मवश्यात् त्रिगुणात्मकप्रकृतिसंस-र्गनिमित्तनानाविधानन्तदुःखसागरनिमज्जनेनाशुद्धात् शुद्धाच्च प्रत्यगात्म-नोऽन्यत् निखिलहेयप्रत्यनीकं निरतिशयानन्दं ब्रह्मेति प्रतिपाद्यते,

आनन्दमयाधिकरणम् । **आनन्दमयोऽभ्यासात् ॥ १३ ॥**

तैत्तिरीया अधीयते "स वा एष पुरुषोऽन्नरसमय" इति प्रकृत्य "तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्माऽऽनन्दमय" इति । तत्र सन्देहः, किमयमानन्दमयो बन्धमोक्षभा[१]गिनः प्रत्यगात्मनो जीवशब्दाभि-लपनीयादन्यः परमात्मा, उत स एवेति । किं युक्तम् । प्रत्यगात्मेति । कुतः । "तस्यैष एव शारीर आत्मा"इत्यानन्दमयस्य शारीरत्वश्रवणात् । शारीरो हि शरीरसम्बन्धी जीवात्मा । ननु च जगत्कारणतया प्रतिपादि-तस्य पर[२]स्य ब्रह्मणः सुखप्रतिपत्त्यर्थमन्नमयादीननुक्रम्य तदेव जगत्कारण-

१ मोक्षयोगिन इति पाठान्तरम् ।
२ परस्येति पुस्तकान्तरे नास्ति ।

Digitized by Google

मानन्दमय इत्युपदिशति, जगत्कारणं च "तदैक्षत" इतीक्षणश्रवणात् सर्वज्ञः सर्वेश्वर इत्युक्तम् । सत्यमुक्तम्, तत्तु जीवान्नातिरिच्यते, "अनेन जीवेनात्मनाऽनुप्रविश्य" "तत्त्वमसि श्वेतकेतो" इति कारणतया निर्दिष्टस्य जीवसामानाधिकरण्यनिर्देशात् । सामानाधिकरण्यं हि एकत्वप्रतिपादनपरम्, यथा सोऽयं देवदत्त इत्यादौ । ईक्षापूर्विका च सृष्टिश्चेतनस्य जीवस्योपपद्यत एव । अतो "ब्रह्मविदाप्नोति परम्" इति जीवस्याचित्संसर्गवियुक्तं स्वरूपं प्राप्यतयोपदिश्यते । अचिद्वियुक्तस्य स्वरूपस्य लक्षणमिदमुच्यते "सत्यं ज्ञानमनन्तं ब्रह्मे"ति । तद्रूपप्राप्तिरेव हि मोक्षः, "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत" इति । अतो जीवस्याविद्यावियुक्तं स्वरूपं प्राप्यतया प्रक्रान्तमानन्दमय इत्युपदिश्यते । तथा हि, शाखाचन्द्रन्यायेनात्मस्वरूपं दर्शयितुम् "अन्नमयः पुरुष" इति प्रथमं शरीरं निर्दिश्य, तदन्तर्भूतं तस्य धारकं पञ्चवृत्तिप्राणं तस्याप्यन्तर्भूतं मनः तदन्तर्भूतां च बुद्धिम् "प्राणमयो मनोमयो विज्ञानमय" इति तत्र तत्र बुद्ध्यवतरणक्रमेण निर्दिश्य, सर्वान्तर्भूतं जीवात्मानम् "अन्योऽन्तर आत्मा आनन्दमय" इत्युपदिश्य, अन्तरात्मपरम्परां समापयति । अतो जीवात्मस्वरूपमेव "ब्रह्मविदाप्नोति" प्रक्रान्तं ब्रह्म, तदेव "आनन्दमय" इत्युपदिष्टमिति निश्चीयते । ननु च "ब्रह्म पुच्छं प्रतिष्ठे"त्यानन्दमयादन्यद् ब्रह्मेति प्रतीयते । नैवम्, ब्रह्मैव स्वस्वभावविशेषेण पुरुषविधत्वरूपितं शिरःपक्षपुच्छरूपेण व्यपदिश्यते । यथाऽन्नमयो देहावयवी स्वस्मादनतिरिक्तैः स्वावयवैरेव तस्येदमेव शिर इत्यादिना शिरःपक्षपुच्छवत्तया निदर्शितः, तथाऽऽनन्दमयं ब्रह्मापि स्वस्मादनतिरिक्तैः प्रियादिभिर्निदर्शितम् । तत्रावयवत्वेन रूपितानां प्रियमोदप्रमोदानन्दानामाश्रयतयाऽखण्डरूपमानन्दमयम् "ब्रह्म पुच्छं प्रतिष्ठे"त्युच्यते । यदि चानन्दमयादन्यत् ब्रह्माभविष्यत् "तस्माद्वा एतस्मादानन्दमयादन्योऽन्तर आत्मा ब्रह्मे"त्यपि निरदेक्ष्यत्, न चैवं निर्दिश्यते । एतदुक्तं भवति, "ब्रह्मविदाप्नोति परमि"ति प्रक्रान्तं ब्रह्म "सत्यं ज्ञानमनन्तं ब्रह्मे"ति लक्षणतः सकलेतरव्यावृत्ताकारं

Digitized by Google

प्रतिपाद्य तत्रैव "तस्माद्वा एतस्मादात्मन" इत्यात्मशब्देन निर्दिश्य तस्य सर्वान्तरात्मत्वेनात्मत्वं व्यञ्जयद्वाक्यमन्नमयादिषु तदन्तरात्मतयाऽऽत्मत्वेन निर्दिष्टान् प्राणमयादीनतिक्रम्य "अन्योऽन्तर आत्माऽऽनन्दमय" इत्यात्मशब्देन निर्देशमानन्दमये समापयति । अत आत्मशब्देन प्रक्रान्तं ब्रह्मानन्दमयमिति निश्चीयत इति । ननु च "ब्रह्म पुच्छम्प्रतिष्ठे"त्युक्त्वा "असन्नेव स भवति असद्ब्रह्मेति वेद चेत्, अस्ति ब्रह्मेति चेद्वेद सन्तमेनन्ततो विदुरि"ति ब्रह्मज्ञानाज्ञानाभ्यामात्मनः सद्भावासद्भावौ दर्शयति, नानन्दमयज्ञानाज्ञानाभ्याम् । न चानन्दमयस्य प्रियमोदादिरूपेण सर्वलोकविदितस्य सद्भावासद्भावज्ञानाशङ्का युक्ता । अतो नानन्दमयमधिकृत्यायं श्लोक उदाहृतः । तस्मादानन्दमयादन्यद् ब्रह्म । नैवम्, "इदं पुच्छं प्रतिष्ठा, पृथिवी पुच्छं प्रतिष्ठा, अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा, महः पुच्छं प्रतिष्ठे"त्येवमुक्त्वा तत्र तत्रोदाहृताः "अन्नाद्वै प्रजाः प्रजायन्त" इत्यादयः श्लोका यथा न पुच्छमात्रप्रतिपादनपराः, अपि त्वन्नमयादिपुरुषमात्रप्रतिपादनपराः, एवमत्राप्यानन्दमयस्यायम् "असन्नेवे"ति श्लोको नानन्दमयव्यतिरिक्तस्य पुच्छस्य । आनन्दमयस्यैव ब्रह्मत्वेऽपि प्रियमोदादिरूपेण रूपितस्यापरिच्छिन्नानन्दस्य सद्भावासद्भावज्ञानाशङ्का युक्तैव । पुच्छब्रह्मणोऽप्यपरिच्छिन्नानन्दतयैव ह्य[1]मिद्धता । शिरःप्रभृत्यवयवित्वाभावाद् ब्रह्मणो नानन्दमयं ब्रह्मेति चेत्, ब्रह्मणः पुच्छत्वप्रतिष्ठात्वाभावात् पुच्छमपि ब्रह्म न भवेत् । यथाविद्यापरिकल्पितस्य वस्तुनस्तस्याश्रयभूतत्वाद् ब्रह्मणः "पुच्छं प्रतिष्ठे"ति रूपणमात्रमित्युच्येत, हन्त तर्ह्यसुखाद्व्यावृत्तस्यानन्दमयस्य ब्रह्मणः प्रियशिरस्त्वादिरूपणं भविष्यति । एवं च "सत्यं ज्ञानमनन्तं ब्रह्मे"ति विकारास्पदजडपरिच्छिन्नवस्त्वन्तराद्व्यावृत्तस्यासुखाद्व्यावृत्तिः "आनन्दमय" इत्युपदिश्यते, अत[2]श्चाखण्डैकरसानन्दरूपे ब्रह्मण्यपि "आनन्दमय" इति मयट् "प्राणमय" इव स्वार्थिको द्रष्टव्यः । तस्मात् अविद्यापरिकल्पितविविधविचित्रदेवादि-

१ अप्रसिद्धतेति पाठान्तरम् ।
२ ततश्चेति पाठान्तरम् ।

भेदभिन्नस्य जीवात्मनः स्वाभाविकं स्वरूपमखण्डैकरसं सुखैकतान"मानन्दमय" इत्युच्यत इत्यानन्दमयः प्रत्यगात्मा इति ॥

एवं प्राप्ते प्रचक्ष्महे "आनन्दमयोऽभ्यासात्" । "आनन्दमयः" परमात्मा । कुतः । "अभ्यासात्," "सैषाऽऽनन्दस्य मीमांसा भवती"-त्यारभ्य "यतो वाचो निवर्त्तन्त" इत्येवमन्तेन वाक्येन शतगुणितोत्तर-क्रमेण निरतिशयदशाशिरस्कोऽभ्यस्यमान आनन्दोऽनन्तदुःखमिश्रपरि-मितसुखलवभागिनि जीवात्मन्यसम्भवन् निखिलहेयप्रत्यनीकं कल्याणै-कतानं सकलेतरविलक्षणं परमात्मानमेव स्वाश्रयमावेदयति, यथाह, "तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मा आनन्दमय" इति । विज्ञानमयो हि जीवः, न बुद्धिमात्रम्, मयट्प्रत्ययेन व्यतिरेकप्रतीतेः । प्राणमये त्वगत्या स्वार्थिक आश्रीयते, इह तु तद्वतो जीवस्य सम्भवात् नानर्थकत्वं न्याय्यम् । बद्धो मुक्तश्च प्रत्यगात्मा ज्ञातैवेत्यभ्यधिष्महि । प्राणमयादौ तु मयडर्थसम्भवोऽनन्तरमेव वक्ष्यते । कथं तर्हि विज्ञानमय-विषयश्लोके "विज्ञानं यज्ञं तनुत" इति केवलविज्ञानशब्दोपादानमुपप-द्यते । ज्ञातुरेवात्मनः स्वरूपमपि स्वप्रकाशतया विज्ञानमित्युच्यत इति न दोषः, ज्ञानैकनिरूपणीयत्वाच्च ज्ञातुः स्वरूपस्य । स्वरूपनिरूपणध-र्मशब्दा हि धर्ममुखेन धर्मिस्वरूपमपि प्रतिपादयन्ति, गवादिशब्दवत्, "कृत्यल्युटो बहुलमि"ति वा कर्त्तरि ल्युडाश्रीयते, नन्द्यादित्वं वाऽऽश्रित्य "नन्दिग्रही"त्यादिना कर्त्तरि ल्युः । अत एव "विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि चे"ति यज्ञादिकर्तृत्वं विज्ञानस्य श्रूयते । बुद्धिमात्रस्य हि न कर्तृत्वं सम्भवति, अचेतनेषु हि चेतनोपकरणभूतेषु विज्ञानमयात् प्राची-नेष्वन्नमयादिषु न चेतनधर्मभूतं कर्तृत्वं श्रूयते । अत एव चेतनमचेतनं च स्वासाधारणैर्निलयनत्वानिलयनत्वादिभिर्धर्मविशेषैर्विभज्य निर्दिश-द्वाक्यम् "विज्ञानं चाविज्ञानं चे"ति विज्ञानशब्देन तद्गुणं चेतनं वदति । तथाऽन्तर्यामिब्राह्मणे "यो विज्ञाने तिष्ठन्नि"त्यस्य काण्वपाठगतस्य पर्य्यायस्य स्थाने "य आत्मनि तिष्ठन्नि"ति पर्य्यायमधीयाना माध्यन्दिनाः काण्वपाठगतं विज्ञानशब्दनिर्दिष्टं जीवात्मेति स्फुटीकुर्वन्ति । विज्ञान-

मिति च नपुंसकलिङ्गं वस्तुत्वाभिप्रायम् । तदेवं विज्ञानमयाज्जीवादन्यस्तदन्तरः परमात्माऽऽनन्दमयः । यद्यपि "विज्ञानं यज्ञं तनुत" इति श्लोकेन ज्ञानमात्रमेवोपादीयते न ज्ञाता, तथाऽपि "अन्योन्तर आत्मा विज्ञानमय" इति तद्वान् ज्ञातैवोपदिश्यते । यथा "अन्नाद्वै प्रजाः प्रजायन्त" इत्यत्र श्लोके केवलान्नोपादानेऽपि "स वा एष पुरुषोऽन्नरसमय" इत्यत्र नान्नमात्रं निर्दिष्टम्, अपि तु तन्मयस्तद्विकारः । एतत्सर्वं हृदि निधाय सूत्रकारः स्वयमेव "भेदव्यपदेशाद्" इत्यनन्तरमेव वदति ॥

यदुक्तम्, जगत्कारणतया निर्दिष्टस्य "अनेन जीवेनात्मना ऽनुप्रविश्य" "तत्त्वमसी"ति च जीवसामानाधिकरण्यनिर्देशात् जगत्कारणमपि जीवस्वरूपान्नातिरिच्यत इति कृत्वा जीवस्यैव स्वरूपम् "ब्रह्मविदाप्नोति परमि"ति प्रक्रान्तम्, असुखासृष्टत्वेन "आनन्दमय" इत्युपदिश्यत इति, तदयुक्तम्, जीवस्य चेतनत्वे सत्यपि "तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजते"ति स्वसङ्कल्पपूर्वकानन्तविचित्रसृष्टियोगानुपपत्तेः, शुद्धावस्थस्यापि हि तस्य सर्गादिजगद्व्यापारासम्भवो "जगद्व्यापारवर्ज्जम्," "भोगमात्रसाम्यलिङ्गाद्" इत्यत्रोपपादयिष्यते । कारणभूतस्य ब्रह्मणो जीवस्वरूपत्वानभ्युपगमे "अनेन जीवेनात्मना" "तत्त्वमसी"ति सामानाधिकरण्यनिर्देशः कथमुपपद्यत इति चेत् । कथं वा निरस्तनिखिलदोषगन्धस्य सत्यसङ्कल्पस्य सर्वज्ञस्य सर्वशक्तेरनवधिकातिशयासंख्येयकल्याणगुणगणस्य सकलकारणभूतस्य ब्रह्मणो नानाविधानन्तदुःखाकरकर्माधीनचिन्तितनिमिषितादिसकलप्रवृत्तिजीवस्वरूपत्वम् । अन्यतरस्य मिथ्यात्वेनोपपद्यत इति चेत् । कस्य भोः, किं वा हेयसंबन्धस्य, किं वा हेयप्रत्यनीककल्याणैकतानस्वभावस्य । हेयप्रत्यनीककल्याणैकतानस्य ब्रह्मणो ऽनाद्यविद्याश्रयत्वेन हेयसम्बन्धप्रतिभासो मिथ्यारूप इति चेत् । विप्रतिषिद्धमिदमभिधीयते—ब्रह्मणो हेयप्रत्यनीककल्याणैकतानत्वम् अनाद्यविद्याश्रयत्वेनानन्तदुःखविषयमिथ्याप्रतिभासाश्रयत्वञ्चेति । अविद्याश्रयत्वं तत्कार्य्यदुःखप्रतिभासाश्रयत्वञ्चैव हि हेयसम्बन्धः, तत्सम्बन्धित्वं तत्प्रत्यनीकत्वञ्च विरुद्धमेव । तथाऽपि तस्य

मिथ्यात्वाच विरोध इति मा वोचः। मिथ्याभूतमपि अपुरुषार्थ एव, यन्निरसनाय सर्वे वेदान्ता आरभ्यन्त इति ब्रूवे। निरसनीयापुरुषार्थयोगश्च हेयप्रत्यनीककल्याणैकताननतया विरुध्यते। किं कुर्मः, "येनाश्रुतं श्रुतम्भवती"त्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय "सदेव सोम्येदमग्र आसीदि"त्यादिना निखिलजगदेककारणताम् "तदैक्षत बहु स्यामि"ति सत्यसङ्कल्पताञ्च ब्रह्मणः प्रतिपाद्य तस्यैव ब्रह्मणः "तत्त्वमसी"ति सामानाधिकरण्येनानन्तदुःखाश्रयजीवैक्यं प्रतिपादितम्। तदन्यथाऽनुपपत्त्या ब्रह्मण एवाविद्याश्रयत्वादि परिकल्पनीयमिति चेत्। श्रुतोपपत्तये ऽप्यनुपपन्नं विरुद्धञ्च न कल्पनीयम्। अथ हेयसम्बन्ध एव पारमार्थिकः, कल्या[1]णैकताननता तु मिथ्याभूता। हन्तैवं तापत्रयाभिहतचेतनोज्जिजीविषया प्रवृत्तं शास्त्रं तापत्रयाभिहतिरेव तस्य पारमार्थिकी, कल्याणैकताननस्वभावस्तु भ्रान्तिकल्पित इति बोधयत् सम्यगुज्जीवयति। अथैतद्दोषपरिजिहीर्षया ब्रह्मणो निर्विशेषचिन्मात्रस्वरूपातिरिक्तजीवत्वदुःखित्वादिकं सत्यसङ्कल्पत्वकल्याणगुणाकरत्वजगत्कारणत्वाद्यपि मिथ्याभूतमिति कल्पनीयमिति चेत्, अहो भवतां वाक्यार्थपर्य्यालोचनकुशलता। एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानं सर्वस्य मिथ्यात्वे सर्वस्य ज्ञातव्यस्याभावाच्च सम्पत्स्यते। यथैकविज्ञानं परमार्थविषयं तथैव सर्वविज्ञानमपि यदि परमार्थविषयं तदन्तर्गतञ्च, तदा तज्ज्ञानेन सर्वविज्ञानमिति शक्यते वक्तुम्। न हि परमार्थशुक्तिज्ञानेन तदाश्रयमपरमार्थरजतं ज्ञातं भवति। अथोच्येत, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया अयमर्थः—निर्विशेषसन्मात्रमेव सत्यम् अन्यदसत्यमिति। न तर्हि "येनाश्रुतं श्रुतं भवत्यमतम्मतमविज्ञातं विज्ञातमि"ति श्रूयेत, येन श्रुतेनाश्रुतमपि श्रुतं भवतीति ह्यस्य वाक्यस्यार्थः। कारणतयोपलक्षितनिर्विशेषवस्तुमात्रस्यैव सद्भावश्चेत् प्रतिज्ञातः, "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातम्" इति दृष्टान्तोऽपि न घटते, मृत्पिण्डविज्ञानेन हि तद्विकारस्य ज्ञातता निदर्शिता। तत्रापि तद्विकारस्यासत्यताऽभिहितेति चेत्, मृद्विकारस्य रज्जु-

१ कल्याणगुणैकस्वभावतेति पाठान्तरम्।

सर्पादिवत् असत्यत्वं शुश्रूषोरसिद्धमिति प्रतिज्ञातार्थसम्भावनाप्रदर्शनाय "तथा सोम्ये"ति प्रसिद्धवदुपन्यासो न युज्यते ॥

न च तत्त्वमस्यादिवाक्यजन्यज्ञानोत्पत्तेः प्राक् विकारजातस्यासत्यतामापादयत् तर्कानुगृहीतम् अननुगृहीतं वा प्रमाणमुपलभामहे इत्ययमर्थः "तदनन्यत्वमारम्भणशब्दादिभ्य" इत्यत्र वक्ष्यते । तथा "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" "तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत" "हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" "सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः" "ऐतदात्म्यमिदं सर्वमि"त्यादिनाऽस्य जगतः सदात्मकता, सृष्टेः पूर्वकाले नामरूपविभागप्रहाणम्, जगदुत्पत्तौ सच्छब्दवाच्यस्य ब्रह्मणः स्वव्यतिरिक्तनिमित्तान्तरानपेक्षत्वम्, सृष्टिकाले अहमेवानन्तस्थिरत्रसरूपेण बहु स्यामित्यनन्यसाधारणः सङ्कल्पविशेषः, यथासङ्कल्पमनन्तविचित्रतत्त्वानां विलक्षणक्रमविशेषविशिष्टा सृष्टिः, समस्तेष्वचेतनेषु वस्तुषु स्वात्मकजीवानुप्रवेशेनानन्तनामरूपव्याकरणम्, स्वव्यतिरिक्तसमस्तस्य स्वमूलत्वं स्वायतनत्वं स्वप्रवर्त्यत्वं स्वेनैव जीवनं स्वप्रतिष्ठितत्वमित्याद्यनन्तविशेषाः शास्त्रैकसमधिगम्याः प्रतिपादिताः । तत्सम्बन्धितया प्रकरणान्तरेष्वप्यपहतपाप्मत्वादिनिरस्तनिखिलदोषता-सर्वज्ञतासर्वेश्वरत्वसत्यकामत्वसत्यसङ्कल्पत्वसर्वानन्दकरणनिरतिशयानन्दयोगादयः सकलेतरप्रमाणाविषयाः सहस्रशः प्रतिपादिताः । एवमनन्यगोचरानन्तविशेषणविशिष्टप्रकृतब्रह्मपरामर्शितच्छब्दस्य निर्विशेषवस्तुमात्रोपदेशपरत्वमसङ्गतत्वेनोन्मत्तप्रलपितायेत । त्वंपदञ्च संसारित्वविशिष्टजीववाचि । तस्यापि निर्विशेषस्वरूपोपस्थापनपरत्वे स्वार्थः परित्यक्तः स्यात् । निर्विशेषप्रकाशस्वरूपस्य च वस्तुनो ह्यविद्यया तिरोधानं स्वरूपनाशप्रसङ्गादिभिर्न सम्भवतीति पूर्वमेवोक्तम् । एवञ्च सति समानाधिकरणप्रवृत्तयोः "तत्त्वमि"ति द्वयोरपि पदयोर्मुख्यार्थपरित्यागेन लक्षणा च समाश्रयणीया ॥

यथोच्येत, समानाधिकरणप्रवृत्तानामेकार्थप्रतिपादनपरतया विशे-

यत्रांशे तात्पर्य्यासम्भवादेव विशेषणानिवृत्तेर्वस्तुमात्रैकत्वप्रतिपादनाच्च लक्षणाप्रसङ्गः । यथा नीलमुत्पलमिति पदद्वयस्य विशेष्यैक्यप्रतिपादनपरत्वेन नीलत्वोत्पलत्वस्वरूपविशेषणद्वयञ्च विवक्ष्यते, तद्विवक्षायां हि नीलत्वविशिष्टाकारेणोत्पलत्वविशिष्टाकारस्यैकत्वप्रतिपादनं प्रसज्यते, तत्तु न सम्भवति, न हि नैल्यविशिष्टाकारेण तद्वस्तूत्पलपदेन विशिष्यते, जातिगुणयोरन्योन्यसमवायप्रसङ्गात् । अतो नीलत्वोत्पलत्वोपलक्षितवस्त्वैक्यमात्रं सामानाधिकरण्येन प्रतिपाद्यते । तथा सोऽयं देवदत्त इत्यतीतकालविप्रकृष्टदेशविशिष्टस्य तेनैव रूपेण सन्निहितदेशवर्त्तमानकालविशिष्टतया प्रतिपादनानुपपत्तेरुभयदेशकालोपलक्षितस्वरूपमात्रैक्यं सामानाधिकरण्येन प्रतिपाद्यते । यद्यपि नीलमित्याद्येकपदश्रवणे प्रतीयमानं विशेषणं सामानाधिकरण्यवेलायां विरोधान्न प्रतिपाद्यते, तथापि वाच्येऽर्थे प्रधानांशस्य प्रतिपादनान्न लक्षणा, अपि तु विशेषणांशस्याविवक्षामात्रम्, सर्वत्र सामानाधिकरण्यस्यैष एव स्वभाव इति न कश्चिद्दोष इति ॥

तदिदमसारम्, सर्वेष्वेव वाक्येषु पदानां व्युत्पत्तिसिद्धार्थसंसर्गविशेषमात्रं प्रत्याय्यम् । तत्र समानाधिकरणवृत्तानामपि नीलादिपदानां नैल्यादिविशिष्ट एवार्थो व्युत्पत्तिसिद्धः पदान्तरार्थसंसृष्टोऽभिधीयते । यथा नीलमुत्पलमानयेत्युक्ते नीलिमादिविशिष्टमेवानीयते, यथा च विन्ध्याटव्यां मदमुदितो मातङ्गगणः तिष्ठतीति पदद्वयावगतविशेषणविशिष्ट एवार्थः प्रतीयते । एवं वेदान्तवाक्येष्वपि सामानाधिकरण्यनिर्देशेषु तत्तद्विशेषणविशिष्टमेव ब्रह्म प्रतिपत्तव्यम् । न च विशेषणविवक्षायामितरविशिष्टाकारं वस्त्वन्येन विशेषि[१]तव्यम्, अपि तु सर्वैरपि विशेषणैः स्वरूपमेव विशेष्यम् । तथाहि, भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम् । अन्वयेन निवृत्त्या वा पदान्तरप्रतिपाद्याकाराद्याकारान्तरयुक्ततया तस्यैव वस्तुनः पदान्तरप्रतिपा-

१ विशेष्टव्यमिति पाठान्तरम् ।

संस्कृतपुस्तकानां सूचीपत्रम् ।	मूल्य
श्रीभाष्यस्य प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं·श्रीराममिश्र-शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः	७।)
श्रीभाष्यस्य प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा	६)
श्रीभाष्यस्य तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा	१=)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः	३।)
वेदपूर्त्तः प्रथमो बिन्दुः सत्सम्प्रदायाचार्यपं·स्वामिश्रीराममिश्रशास्त्रि-प्रणीतो निर्विशेषाद्वैतनिराकरणपरः	१॥=)
वेदपूर्त्तिसहितो वेदार्थसंग्रहः	३।॥)
शास्त्रदीपिका	६।)
सङ्कर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-न्द्रिकोपेतम्, पं·स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् ।	१।)
काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजप·दामोदर-शास्त्रिणा संशोधिता पूर्वार्द्धरूपा	५।॥)
तथा उत्तरार्द्धम्	८।॥)
माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता	७॥)
काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता	६॥)
सीतिकन्तार्णवतरणिः	६·)
दिग्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता	॥=)
जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता	५॥)
लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, शेषशार्ङ्गधराचार्यविरचितया न्याय-मुक्तावल्याख्यया टीकया सहिता	।॥)
सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम्	॥।)
तत्त्वमुक्ताकलापः–सर्वार्थसिद्धियुतः, बोधायनीयार्षसिद्धान्तानुसारी विशिष्टाद्वै-तब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्कि-ककेसरिणा सर्वतन्त्रस्वतन्त्रधिषणेन श्रीवेङ्कटनाथदेशिकेन प्रणीतः	५॥=)
वेदान्तसिद्धान्तमुक्तावली, आर्यर्षीनिवासबकृताङ्गलभाषानुवादयुता	१।॥)
काव्यप्रकाशस्य इङ्गलण्डीयभाषानुवादः	२॥)
अथर्ववेदसंहिताया इङ्गलण्डीयभाषानुवादः	१२)
आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्य-काराणां परमगुरुणा श्रीयामुनाचार्यस्वामिना प्रणीतम्	॥।)
तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्विश्वकर्मविरचितया न्यायप्रदी-पाख्यटीकया सहिता	१।॥)

CONTENTS.

Page.

PÁTANJALA SÛTRA VRITTI OF NÁGESH BHUTT, Ed. by Pandit Taraktirath P. Jewa Nath Misra, Professor Sanskrit College, Benares 1

PADARTH-DHARM-SAÑGRAH, translated by Pandit Ganganath Jha, M. A. Professor of Sanskrit Muir Central College, Allahabad 17

SHRIBHÂSHYA OF RÂMÂNUJA, (Text only,) Edited by Revd. J. J. Johnson, Benares 33-64

Digitized by Google

IX 60

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

Nos 2 & 3.] Febr. & March 1905. [Vol. XXVII.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1905.

Copyright on each article reserved.

Price Rs. 9 per annum.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपत्रद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
चित्रमीमांसा, अप्पयदीक्षितकृता। तै॰ श्रीरामशास्त्रिणा संशोधिता	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधितः	।≈)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतडाक्तरबालण्टेनाचार्य्येणाङ्गलदेशीयभाषायामनूदिता ..	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्य्येणाङ्गलदेशीयभाषायामनूदितम्	४)
मानवधर्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका, ...	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	२॥=)
शीतपदार्थनिर्वचनम्	३)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीकामकोल्लूकशास्त्रि-संशोधिता	४)
काव्यप्रदीपः, पं॰ रामशास्त्रिभागवताचार्येण परिशोधितः	२॥)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
खण्डनखण्डखाद्यं सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	५)

Digitized by Google

प्राकृतैर्धर्मैर्निराकांक्षा इति न प्रकरणं विदेवना-
दीनां राजसूये विनियोजकम्, उभयाकांक्षाया अभा-
वात् । न च '(क)प्रातिस्विकरूपैर्नैराकांक्ष्येपि न राज-
सूयत्वेन रूपेण नैराकांक्ष्यमिति' वाच्यम् । आकांक्षाद्वये
प्रमाणाभावात् । किं च प्रातिस्विकरूपैर्या कथम्भा-
वाकांक्षा सापि फलसम्बन्धोत्तरकालम् । स च राज-
सूयत्वेन न तु प्रातिस्विकरूपैः(ख) । राजसूयत्वेन च
फलसम्बन्धे उत्पन्नायाः कथंभाकांक्षायाः विदेव-
नादिभिः शान्तेरतिदेशकल्पनमेव न स्यात् । यदि
हि सामान्यरूपेण प्रातिस्विकरूपेण च फलसम्ब-
न्धविधायि वाक्यद्वयं भवेत्तदा युज्येतापि आकांक्षा-
द्वयानुसारेण विदेवनादीनामातिदेशिकानां चाङ्गानां
सम्बन्धः । न तु तदस्ति । तस्मात् प्राकृतैर्धर्मै-
र्नैराकाङ्क्ष्यान्न विदेवनादीनां प्रकरणं विनियोजकम्"-
इति चेत्-

(१००) सत्यम् । अत एव साम्प्रदायिकैर्विदेवना-
दीनां सन्दंशो दर्शितः । राजसूयत्वपुरस्कारेण ये धर्मा
विधीयन्ते 'राजसूयाय एत[१] उत्पुनाति' इत्येवमा-
दयस्तन्मध्ये विदेवनादयः पठ्यन्ते । अतस्ते सर्वे राज-
सूयाङ्गं प्रयाजानुवादेन विधीयमानधर्ममध्ये पठित-
प्रयाजाङ्गाभिक्रमणवत् । तस्माद्युक्तमुक्तं विदेवनादी-

(क) प्रत्येकमेकैकरूपेण ।
(ख) इष्टित्वपशुत्वसोमत्वादिरूपैरित्यर्थः ।

१ एताः समिध इत्यर्थः तथा च समिधामुत्पवनेन राजसूयं भावयेदिति बोधः ।

नां प्रकरणाद्राजसूयाङ्गत्वमिति । तत्सिद्धं प्रकरणस्य स्थानाद्बलीयस्त्वम् इति ॥

(१०८)[1] देशसामान्यं स्थानम् ।[2] तच्च द्विविधम् । पाठसादेश्यमनुष्ठानसादेश्यं चेति । यथाहुः

तत्र क्रमो द्विधैवेष्टो देशसामान्यलक्षणः ।
पाठानुष्ठानसादेश्याद्विनियोगस्य कारणमिति ।

(तन्त्रवार्तिक । ८३२)

स्थानं क्रमश्चेत्यनर्थान्तरम् ।

(१०९) पाठसादेश्यमपि द्विविधम् । यथासङ्ख्यपाठः सन्निधिपाठश्चेति । तत्र ऐन्द्राग्नमेकादशकपालं निर्वपेत्, वैश्वानरं द्वादशकपालं निर्वपेदित्येवं क्रमविहितेष्टिषु इन्द्राग्नी रोचनादिव इत्यादीनां[3] याज्यानुवाक्यामन्त्राणां यथासङ्ख्यं प्रथमस्य प्रथमं द्वितीयस्य द्वितीयमित्येवं यो विनियोगः स यथासङ्ख्यपाठात् । प्रथमपठितमन्त्रस्य हि कैमर्थ्याकाङ्क्षायां प्रथमतो विहितं कर्मैव प्रथममुपतिष्ठते समानदेशत्वात् । यानि तु वैकृतान्यङ्गानि[4] प्राकृताङ्गाननुवादेन विहितानि सन्दंशापतितानि तेषां विकृत्यर्थत्वं सन्निधिपाठात् । तेषां हि कैमर्थ्याकाङ्क्षायां फलवद्विकृत्यपूर्वमेव

---

१ प्रधानविपरिवृत्तिविशिष्टदेशवृत्तित्वं स्थानाख्यप्रमाणलक्षणमित्यर्थः । तेन सामान्यशब्देन साधर्म्यादिसादृश्यविवक्षायामभिन्नदेशत्वाऽङ्कुरः । अभेदविवक्षायां एकदेशत्वासंकरश्च इत्यपास्तमिति भाट्टालङ्कारे ।

२ वृत्तित्वं चानुष्ठेयत्वपठितत्वान्यतररूपेणोक्तत्वात्-

३ आदिपदेन वैश्वानरो न ऊतयेत्यस्य संग्रहः ।

४ उपहोमादीनि ।

भाव्यत्वेन सम्बध्यते उपस्थितत्वात् । अत एव न तेषु विश्वजिन्न्यायावतारः । स्वतन्त्रफलार्थत्वे विकृतिसन्निधिपाठानर्थक्यापत्तेश्च । पशुधर्माणामग्नीषोमीयार्थत्वमनुष्ठानसादेश्यात् । [1] औपवसथ्येऽह्नि अग्निषोमीयः पशुरनुष्ठीयते तस्मिन्नेव दिने ते धर्माः पठ्यन्ते । अतस्तेषां कैमर्थ्याकाङ्क्षायामनुष्ठेयत्वेनोपस्थितं पशुपूर्वमेव[2] भाव्यत्वेन सम्बध्यते । अतो युक्तमनुष्ठानसादेश्यात्तदर्थत्वं तेषाम् । न च "पाठसादेश्यादेव तत्किं न स्यादिति" वाच्यम् । अग्नीषोमीयस्य पशोः क्रयसन्निधौ पाठात् । न च "क्रयसन्निधौ तस्य पाठे तदनुष्ठानमपि तत्र स्यादिति" वाच्यम् । स एष द्विदैवत्यः पशुरौपवसथ्ये ऽहनि आलब्धव्य इति वचनात्तदनुपपत्तेः[3] ।

(११०) न च "स्थानात्प्रकरणस्य बलीयस्त्वेन पशुधर्माणां ज्योतिष्टोमार्थत्वमेव किं न स्यादिति"-वाच्यम् । तस्य सोमयागत्वेन पशुधर्मग्रहणे ऽयोग्यत्वात् । [4] अत 'आनर्थक्याप्रतिहतानां विपरीतं बलाबलमिति'[5] न्यायात् स्थानात्पशुयागार्थत्वमेव धर्माणां

---

१ औपवसथ्योऽग्नीषोमीयमह इत्यर्थः सोमयागमहस्मान्निचतुर्थं दिनमिति यावत् तस्मिन् इत्यादिः ।

२ उपाकरणोपानयनियोजनविशसनादयः ।

२ पशुयागपूर्वम् ।

३ क्रयसन्निधावग्नीषोमीयपश्वनुष्ठानानुपपत्तेरित्यर्थः ।

४ स्थानात्प्रकरणप्राबल्यानुरोधे न्यायबाध एवोचित इत्याह—

५ ये चात्यन्तनर्थका भवन्ति ते दुर्बला भवन्तीति प्रस्तुत प्रकरणस्यैव दौर्बल्यमिति भावः ।

युक्तम्। न च तेषां तदर्थत्वं प्रकरणादेव किं न स्यादिति वाच्यम्। अग्नीषोमीयकथंभावाकांक्षायाः क्लृप्तोपकारैः प्राकृतधर्मैरेवोपशान्तत्वात्। स हि सान्नाय्ययागप्रकृतिकः, उभयोः पशुप्रभवद्रव्यत्वसामान्यात्। तदुक्तं "सान्नाय्यं वा तत्प्रभवत्वादिति (जै० सू० ८। २। १३)। सान्नाय्यं दधिपयसी तत्र पशुयागः पयोयागप्रकृतिकः साक्षात्पशुप्रभवत्वात्। अतश्चोदकप्राप्तैस्तद्धर्मैर्निराकांक्षत्वात् न पशुयागे धर्माणां प्रकरणं विनियोजकं किं तु स्थानमेव।

(१११)तदेवं निरूपितः संक्षेपतः स्थानविनियोगः, तच्च समाख्यातः प्रबलम्। स्थानविनियोगे हि पदार्थयोर्देशसामान्यलक्षणः सम्बन्धः प्रत्यक्षः। समाख्याविनियोगे तु सम्बन्धो न प्रत्यक्षः। पदार्थयोर्भिन्नदेशत्वात्। न च सा सम्बन्धवाचिका। यौगिकानां शब्दानां द्रव्यवाचकत्वेन सम्बन्धावाचकत्वात्। तथा हि समाख्या सम्बन्धसामान्यवाचिका स्यात् तद्विशेषवाचिका वा। नाद्यः। तदुक्तौ प्रयोजनाभावात्[1]। सर्वयौगिकशब्दानां पर्यायतापत्तेश्च। द्वितीये ऽवश्यं सम्बन्धिनी वाच्यौ। तदन्तरेण सम्बन्धे विशेषाभावात्[2]। तत्प्रतिपत्तिमन्तरेण तदप्रतिपत्ते-

१ गोमान् गोत्ववान् संबन्धमित्यादीनाम्।

२ सम्बन्ध्यभिधानमन्तरेण विशेषस्याऽप्रतीतेरित्यर्थः। गोमानित्यत्रैव पुरुषाभिधाने स्वामित्वबुद्धिः देशाभिधाने चाधिकरणबुद्धिर्भवति। तदनभिधाने तु न विशेषप्रतीत्याशयः।

श्च[1] । अतश्चावश्यं सम्बन्धिवाचकत्वं समाख्याया वक्तव्यम् । तथा च न सम्बन्धवाचकत्वं सम्बन्धिप्रतिपत्त्यैव वाक्यार्थप्रतिपत्तिन्यायेन तत्प्रतिपत्तिसम्भवे तत्र शक्तिकल्पने गौरवात् । यथाहुः

सर्वत्र यौगिकैः शब्दैर्द्रव्यमेवाभिधीयते ।
न हि सम्बन्धवाचित्वं सम्भवत्यतिगौरवादिति

तथा   (तं. वा. ६८८)

पाकं तु पचिरेवाह कर्त्तारं प्रत्ययोप्यकः ।
पाकयुक्तः पुनः कर्त्ता वाच्यो नैकस्य कस्यचिदिति ॥

तथा च समाख्या न सम्बन्धवाचिका होतृचमस इत्यादिका तु वैदिकीसमाख्या निषादस्थपतिशब्दवन्न[2] षष्ठ्यर्थसम्बन्धवाचिका नापिवाक्यवत्तद्बोधिका, तस्याः पदत्वेनाप्रमाणत्वात् । पौरोडाशिकमित्यादिसमाख्यास्त्वतिदुर्बलाः । लौकिकत्वेन पुरुषप्रत्ययसापेक्षत्वात् । काण्डगोचरत्वेन तत्तत्पदार्थागोचरत्वाच्च । काण्डवाचकत्वमपि न काण्डत्वेन किं तु पौरोडाशिकत्वादिनैव । न ह्येकहायनीशब्दो द्रव्यवाचकोऽपि गोत्वेन तद्वदति, किं तर्हि एकहायनीत्वेनैव । स्थानविनियोगे तु पदार्थयोर्वि-

---

[1] सम्बन्धिप्रतीतिमन्तरा सम्बन्धबुद्धेरभावादित्याशयः ।

[2] षष्ठीसमासाश्रयणे निषादस्थपतिशब्दस्य तत्सम्बन्धिनि लक्षणां स्वीकृत्य सम्बन्धवाचकत्वं वक्तव्यं भवेत्तत्तु न युक्तमतः कर्मधारय एव । अत्र तु अयोग्यत्वान्न कर्मधारयः ।

Digitized by Google

स्थानपुरस्कारेणैव सम्बन्धः प्रत्यक्षप्रमाणप्रतिपन्नः । अतश्च समाख्यामुपलभ्य नूनमनयोः पदार्थयोः सम्बन्धोऽस्तीति यावत्कल्प्यते तावत्प्रत्यक्षप्रतिपन्नेन सम्बन्धेन परस्परमाकांक्षा, तदभावे च सम्बन्धानुपपत्तेः[1] । कल्पितसम्बन्धेन च यावदितरत्राकांक्षादिकल्पना[2] तावदन्यत्राकांक्षया वाक्यादिकल्पनया विनियोगः क्रियते इति सिद्धं स्थानस्य सामाख्यातः प्राबल्यम् । अत एव शुन्धनमन्त्रः[3] सान्नाय्यपात्राङ्गं पाठसादेश्यान्न तु पौरोडाशिकसमाख्यया पुरोडाशपात्राङ्गमिति ॥

(११२) समाख्या[4] यौगिकः शब्दः । सा च द्विविधा वैदिकी लौकिकी च । तत्र होतुः चमसभक्षाङ्गत्वं होतृचमस इति वैदिक्या समाख्यया । अध्वर्योस्तत्तत्पदार्थाङ्गत्वं लौकिक्या आध्वर्यवमिति-समाख्ययेति संक्षेपः ॥

अथाङ्गत्वविध्यनिरूपणम् ।

(११३) तदेवं निरूपतानि संक्षेपतः श्रुत्यादीनि षट् प्रमाणानि । एतत्सहकृतेन विनियोगविधिना समिदादिभिरुपकृत्य दर्शपूर्णमासाभ्यां यजेते-

---

१ स्थानेनेत्यर्थः ।

२ यत्र स्थानेन विनियोगः ।

३ देवाय कर्मणे शुन्धध्वं देवयज्यायै यद्वो ऽशुद्धाः पराजघ्नुरिदं वस्तऽच्छुन्धामिति मन्त्रः ।

४ सम् आख्या समाख्या, नामनिर्देश इत्यर्थः ।

५ अग्निमन्थपुरोडाशादि पदार्थाङ्गत्वम् ।

त्येवंरूपेण यानि विनियुज्यन्ते तान्यङ्गानि[1] । तानि द्विविधानि सिद्धरूपाणि क्रियारूपाणि चेति । तत्र सिद्धानि जातिद्रव्यसङ्ख्यादीनि[2] । तानि च दृष्टार्थान्येव । क्रियारूपाणि च द्विविधानि । गुणकर्माणि प्रधानकर्माणि चेति । एतान्येव सन्निपत्योपकारकाण्यारादुपकारकाणीति चोच्यन्ते ।

(११४) तत्र कर्माङ्गद्रव्याद्युद्देशेन विधीयमानं कर्म सन्निपत्योपकारकम्[3] । यथावघातप्रोक्षणादि । तच्च दृष्टार्थमदृष्टार्थं दृष्टादृष्टार्थं च । दृष्टार्थमवघातादि । अदृष्टार्थं प्रोक्षणादि । दृष्टादृष्टार्थं पशुपुरोडाशयागादि । तद्धि द्रव्यत्यागांशेनादृष्टं देवतोद्देशेन च देवतास्मरणं दृष्टं करोति । इदमेव चाश्रयि कर्म इत्युच्यते ।

(११५) तच्च सन्निपत्योपकारकं द्विविधम् । उपयोक्ष्यमाणार्थमुपयुक्तार्थं चेति । तत्रावघातप्रोक्षणाद्युपयोक्ष्यमाणार्थं, व्रीहीणां यागे उपयोक्ष्यमाणत्वात् । प्रतिपत्तिकर्म इडाभक्षणाद्युपयुक्तपुरोडाशसंस्कारकम् । उपयुक्तस्याकीर्णतानिवर्तकं कर्म प्रतिपत्तिकर्म । उपयुक्तसंस्कारार्थं च उपयोक्ष्यमाणसंस्कारार्थाद्दुर्बलम् । उपयुक्तापेक्षया उपयोक्ष्यमाणे

---

१ वैपरीत्येनान्वयः । यान्यङ्गानि विनियुज्यन्ते तानीत्यन्वयः ।

२ आदिना लिङ्गसाहित्यक्रमादीनां सङ्ग्रहः । यद्यपि साहित्यक्रमयोर्न क्रियां प्रति कारकत्वं साक्षादस्ति तथापि कारकीभूतपदार्थपरिच्छेदकतया तद्वत्त्वेन तादीयिकत्वम् । पांचमिकस्य तु न विनियोजकत्वमिति न तस्येहावसरः ।

३ द्रव्यादिगतं कर्मापूर्वसाधनत्वं यत्तदुद्देश्यतावच्छेदकमित्यर्थः ।

ऽत्यादरात् । अत एव प्रायणीयनिष्कासे[1] उदय-नीयमनुनिर्वपतीत्यत्र निष्कासस्य निर्वापार्थत्वं, न तु तस्य तदर्थत्वं निष्कासस्योपयुक्तत्वात् इत्युक्त-मेकादशे ।

(११६) तत्र सन्निपत्योपकारकम् आरादुप-कारकाद्बलीयः ।

(११७) "नन्ववघातादि भवतु बलीयः, तस्य दृष्टार्थत्वात्, आरादुपकारकस्य चादृष्टार्थत्वात्, दृष्टे सम्भवत्यदृष्टस्यान्याय्यत्वात् । प्रोक्षणादि सन्निपत्योपकारकं तु कथं बलीयः, उभयोरदृष्टार्थ-त्वाविशेषात् । किं च आरादुपकारकं साक्षात्प्रधा-नाङ्गं तस्यान्योद्देशेनाविधानात् । सन्निपत्योपकारकं तु अङ्गाङ्गम् कर्माङ्गव्रीह्याद्युद्देशेन विधानात् । अङ्गा-ङ्गापेक्षया च साक्षादङ्गं बलीयः । 'अङ्ग गुणविरोधे तादर्थ्यादिति (जै॰ सू॰ १२ । २ । २५) न्यायात्[2] । अत एव य इष्ट्या पशुना सोमेन यजेत सोऽमावा-स्यायां पौर्णमास्यां वा यजेतेति अविशेषविधानेऽपि पर्वानुग्रहः सोमयागस्यैव क्रियते न तु दीक्षणीयादेः । अतः कथं सन्निपत्योपकारकस्य बलीयस्त्वम्" ।

(११८) उच्यते । सत्यप्यदृष्टार्थत्वाविशेषे सन्नि-पत्योपकारकमारादुपकारकाद्बलीयः । सन्निपत्योप-

१ प्रायणीयेष्टिहविर्भूतस्थालीपाकद्रव्याधारस्थाल्या अधो भागे लग्नितांशेन यदवशिष्यते तन्निष्कासमित्यर्थः ।

२ अङ्गतदङ्गयोर्विरोधे अङ्गस्य प्रधानार्थत्वाद्बलीयस्त्वमित्यर्थः ।

७२

कारके हि कर्मणि उपकार्य्योपकारकयोर्व्रीहिप्रोक्षणयोः सम्बन्धो वाक्यक्लृप्तः। उपकारमात्रं तु कल्प्यम्। आरादुपकारकस्थले तु दर्शपूर्णमासयोः प्रयाजानुयाजयोः सम्बन्धः कल्प्यः उपकारोपि। किं च आरादुपकारकस्थले हि प्रकरणं विनियोजकम्, इतरत्र[1] तु व्रीहीन् प्रोक्षतीति वाक्यमेव व्रीहिपदेनापूर्वसाधनलक्षणां कृत्वा क्रतौ विनियोजकमिति बलीयस्त्वम्।

(११९) यदुक्तम्—"अङ्गगुणविरोधे तादर्थ्यादिति न्यायेन दुर्बलत्वमिति" तदसत्। न हि व्रीह्याद्युद्देशेन विधीयमानं प्रोक्षणादि तदर्थं भवति[2], तत्स्वरूपे आनर्थक्यात्, किं तु तत्संस्कारद्वारा क्रत्वर्थमेव, सन्निपत्योपकारकाणामुत्पत्त्यपूर्वप्रयुक्तत्वस्य च वक्ष्यमाणत्वात्। अत उभयविधमप्यङ्गजातं क्रत्वर्थमेवेति नाङ्गगुणविरोधन्यायावतारः। दीक्षणीयादेः पर्वानुग्रहस्तु दीक्षणीयाद्यर्थ एव, तस्य तदपूर्वप्रयुक्तत्वात्। अतो युक्तं साक्षात्प्रधानाङ्गेन प्रधानपर्वानुग्रहेण स बाध्यत इति।

(१२०) तत्सिद्धं सन्निपत्योपकारकस्याराादुपकारकाद्बलीयस्त्वम्। अतएव स्थाणौ स्थाणवाहुतिं जुहोतीति विहिता स्थाणवाहुतिर्यूपव्रश्चनस्थाणुद्वारा यूप-

---

१ सन्निपत्योपकारके इत्यर्थः।

२ प्रोक्षणादेर्व्रीहिस्वरूपनिष्पादकत्वे आनर्थक्यम्। तस्य लोकत एव सिद्धत्वादिति भावः।

संस्कारार्थो, देवदत्तधारितायाः स्रजः शुचिदेशनिधानमिव देवदत्तसंस्कारार्थम्। न तु स्याद्धवाहुतिराराहुपकारिकेत्युक्तम् दशमे इति दिक्।

(१२१) द्रव्याद्यनुद्दिश्य केवलं विधीयमानं कर्म आरादुपकारकम्। यथा प्रयाजादि।

(१२२) तदेवं निरूपितं द्विविधमप्यङ्गजातम्। तच्च न यागादिस्वरूपप्रयुक्तं, स्वरूपे आनर्थक्यात्, तदन्तरेणापि तत्सिद्धेः, किं त्वपूर्वप्रयुक्तमेव। न हि तदन्तरेणापूर्वं भवतीत्यत्र किञ्चित्प्रमाणमस्ति, तस्यादृष्टत्वात्। न च "एवं प्राधान्याददृष्टत्वाच्च फलप्रयुक्तमेव किं न स्यादिति" वाच्यम्। फलभावनायां यागस्यैव करणत्वादङ्गानां च करणानुग्राहकत्वात्तदर्थत्वे बुद्धे तत्र चानर्थक्यप्रसक्तौ तेन स्वापूर्वमेवोपस्थाप्यते सन्निकर्षात्, दीक्षणीयादिशब्देनैव तदपूर्वम्। न तु फलमुपस्थाप्यते विप्रकर्षात्। अतो न तत्प्रयुक्तत्वमङ्गानाम्। अत एव अगन्मसुवः सुवरगन्मेति मंत्रो विकृतावूहितव्य इत्युक्तम् नवमे। फलदेवतयोश्चेत्यत्र फलप्रयुक्तत्वे तु सौर्यादिविकृतिषु स्वर्गरूपफलाभावान्मन्त्रो न प्रवर्त्तेत न तरां चोहितव्यः स्यादिति।

(१२३) तत्सिद्धमङ्गानामन्यप्रयुक्तत्वानुपपत्तेरपूर्वप्रयुक्तत्वम्। तत्रापि सन्निपत्योपकारकाणां द्रव्यदेवतादिसंस्कारद्वारा यागस्वरूपोपयोगादुत्पत्त्यपूर्वार्थत्वम्। अत एवौषधधर्मावघातादीनामाज्ये[1] ऽप्र-

१ असद्भावसंविज्ञानो बहुव्रीहिः।

वृत्तिः, तेषामाग्नेयापूर्वप्रयुक्तत्वात्, आज्यस्य च तदर्थत्वाभावादित्युक्तं द्वितीये । आरादुपकारकाणां तु स्वरूपे[1] ऽनुपयोगात् परमापूर्वार्थत्वम् । तत्रोत्पत्त्यपूर्वस्य यागस्वरूपानुष्ठानानन्तरमेवोत्पद्यमानत्वात् । सन्निपत्योपकारकाणां पूर्वाङ्गानां तदुत्पत्तावुपयोगः उत्तराङ्गानां तेषां च[2] तत्स्थितावुपयोगः । परमापूर्वस्य तु साङ्गप्रयोगानुष्ठानानन्तरमेवोत्पद्यमानत्वात् सर्वेषामारादुपकारकाणां तदुत्पत्तौ प्रयोगबहिर्भूतस्य तु तत्स्थितावुपयोगः । यथा बृहस्पतिसवस्य वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति वाजपेयोत्तरकालमङ्गत्वेन विहितस्य वाजपेयापूर्वस्थितावुपयोगः[3] । तस्य प्रागेवोत्पन्नत्वादित्युक्तं चतुर्थे । तत्सिद्धं सर्वथाङ्गानामपूर्वार्थत्वम् । प्रकृतमनुसरामः । तदेवं निरूपितः सङ्क्षेपतो विनियोगविधिः ॥ ० ॥

अथ प्रयोगविधिनिरूपणम्

(१२४) "प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः । स चाङ्गवाक्यैकवाक्यतामापन्नः प्रधानविधिरेव[4] । स हि साङ्गं प्रधानमनुष्ठापयन् विलम्बे प्रमाणाभावादविलम्बापरपर्यायं प्रयोगप्राशुभाव

---

१ स्वरूपेणोपयोगानिरूपणादुद्देशेनाविधानादित्यर्थः । अपूर्वसाधनलक्षणामनपेक्ष्य प्रधानभावनायेतिकर्तव्यतात्वेन स्वीकृतानां तेषां प्रधानापूर्वार्थत्वमेव युक्तमित्याशय इत्यवगन्तव्याः ।

२ परमापूर्वस्थितौ ।

३ वाजपेयजन्यापूर्वस्य । ४ शीघ्रता हि प्राशुभाव उच्यते ।

५ फलविशेषकर्मभावनान्वयित्वेन प्रधानमिवाङ्गानि बोधयन् प्रधानविधिरेव साङ्गप्रधानानुष्ठानसिद्धेः प्रधानोत्पत्तिविधयोऽङ्गविधयो वा न स्वविषयान् प्रयुञ्जत इत्याशयः ।

Digitized by Google

विधत्ते । न च विलम्बवदविलम्बेपि प्रमाणाभाव इति वाच्यम् । विलम्बे हि अङ्गप्रधानविध्येकवाक्यतावगततत्साहित्यानुपपत्तिः प्रसज्यते । न हि विलम्बेन क्रियमाणयोः पदार्थयोः सहकृतमिति साहित्यं व्यवहरन्ति । न च—"एवं साहित्यानुपपत्त्या समानकालत्वमेव स्यान्न त्वविलम्बः, अव्यवधानेन पूर्वोत्तरकाले क्रियमाणपदार्थयोरविलम्बेन कृतमिति व्यवहारादिति" वाच्यम् । अनेकपदार्थानामेकस्मिन्काले ऽनुष्ठानानुपपत्तेः । न च "तावत्कर्तृसंपादनेनानुष्ठानं किं न स्यादिति" वाच्यम् । तस्यैतस्य यज्ञक्रतोश्चत्वार ऋत्विज इत्यादिना कर्तॄणां नियतत्वात् । तस्मादङ्गवाक्यैकवाक्यतामापन्नः प्रधानविधिरेकवाक्यतावगततत्साहित्यं विदधदुक्तविधया एककालानुष्ठानानुपपत्तेरविलम्बं विधत्ते इति सिद्धं प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिरिति ।

(१२५) स चाविलम्बो नियते क्रमे आश्रीयमाणे भवति । अन्यथा हि किमेतदनन्तरमेतत्कर्तव्यमेतदनन्तरं वेति प्रयोगविक्षेपापत्तेः[१] । अतः प्रयोगविधिरेव स्वविधेयप्रयोगप्राशुभावसिद्ध्यर्थं नियतं क्रममपि[२] पदार्थविशेषणतया विधत्ते ।

---

१ विक्षेपः पदार्थलोपः ।

२ क्रमसाहित्यादेरकारकत्वाश्रयेणेदम् । अमुनैव न्यायेन भिन्नप्रयोगविधिपरिगृहीतानां न क्रमनियम इति द्योत्यते । विध्यन्तरप्रयोज्यपदार्थविशेषणत्वेन विध्यन्तरेण क्रमविध्ययोगात् । अत एव काम्यक्रतुषु न पाठक्रमेण क्रमनियम इति ।

Digitized by Google

(१२६) तत्र क्रमो, नाम[1] विततिविशेषः पौर्वा-[2]पर्यरूपो वा । तत्र च षट् प्रमाणानि, श्रुत्यर्थपठनस्थानमुख्यप्रवृत्त्याख्यानि ।

(१२७) तत्र क्रमपरं[3] वचनं श्रुतिः । तच्च द्विविधं, केवलक्रमपरं तद्विशिष्टपदार्थपरं चेति । तत्र वेदं कृत्वा वेदिं करोतीति केवलक्रमपरम्, वेदिकरणादेर्वचनान्तरेण विहितत्वात् । वषट्कर्तुः प्रथमभक्ष इति तु क्रमविशिष्टपदार्थपरम् । [4] एकप्रसरताभङ्गभयेन भक्षानुवादेन क्रममात्रस्य विधातुमशक्यत्वात् । सेयं श्रुतिरितरप्रमाणापेक्षया बलवती । तेषां [5]वचनकल्पनद्वारा क्रमप्रमाणत्वात् ॥ अत एवाश्विनस्य पाठक्रमात्तृतीयस्थाने ग्रहणप्रसक्तावाश्विनो दशमो गृह्यत इति वचनाद्दशमस्थाने ग्रहणमित्युक्तम् ।

(१२८) यत्र तु प्रयोजनवशेन [6]निर्णयः स आर्थः क्रमः । यथाऽग्निहोत्रहोमयवागूपाकयोः । अत्र हि यवाग्वा होमार्थत्वेन तत्पाकः प्रयोजन-

---

१ वितानं विततिः, विस्तार इत्यर्थः । अयुगपद्भाव्यनेकपदार्थानाम् इति तत्त्वम् । अत्र च मते अध्वर्युर्यजति प्रोक्षयित्वा ब्रह्माणमित्यादावाक्रान्तरोहाद्भूतानेकपदार्थानुष्ठानस्यैकवाक्यता भवति ।

२ ननु पूर्वपदार्थानुष्ठानोत्तरमुत्तरपदार्थाऽनुष्ठाने तदभावदृष्टार्थकस्य क्रमस्य स्वाश्रयानेकपदार्थाङ्गमुखेनादृष्टार्थकत्वं न युक्तमित्याह ।

३ बोधकमित्यर्थः ।

४ एकवाक्यताभङ्गेनेत्यर्थः ।

५ उच्यतेऽनेनेति वचनमिति व्युत्पत्त्या, वचनपदेन श्रुतिरुच्यते ।

६ तदर्थे क्रम इति शेषः ।

Digitized by Google

वशेन पूर्वमनुष्ठीयते[1] । स चायं पाठक्रमात् बलवान् । यथापाठं ह्यनुष्ठाने क्रमप्रयोजनबाधो ऽदृष्टार्थत्वं च स्यात् । न हि होमानन्तरं क्रियमाणस्य किञ्चिद् दृष्टं प्रयोजनमस्ति ।

(१२९) पदार्थबोधकवाक्यानां यः क्रमः स पाठक्रमः । तस्माच्च पदार्थानां क्रम आश्रीयते । येन हि क्रमेण वाक्यानि पठितानि[2] तेनैव क्रमेणाधीतान्यर्थप्रत्ययं जनयन्ति । [3]यथार्थप्रत्ययं च पदार्थानामनुष्ठानात् । स च पाठो द्विविधः । मन्त्रपाठो ब्राह्मणपाठश्चेति । तत्राग्नेयाग्नीषोमीययोस्तत्तद्याज्यानुवाक्याक्रमाद्यः क्रमः आश्रीयते स मन्त्रपाठात् । स चायं मन्त्रपाठो ब्राह्मणपाठाद्बलवान्, अनुष्ठाने ब्राह्मणवाक्यापेक्षया मन्त्रवाक्यस्यानतरङ्गत्वात् । ब्राह्मणवाक्यं हि प्रयोगाद्बहिरेवेदमेवं कर्त्तव्यमित्येवमवबोध्य कृतार्थमिति न पुनः प्रयोगकाले व्याप्रियते । मन्त्राः पुनरनन्यप्रयोजनाः प्रयोगसमवेतार्थस्मारका इति वक्ष्यामः । तेनानुष्ठानक्रमस्य स्मरणक्रमाधीनत्वात् तत्क्रमस्य च मन्त्रक्रमाधीनत्वादन्तरङ्गो मन्त्रपाठ इतरस्मादतिबलवान् । अत एवाग्नेयाग्नीषोमीययोर्ब्राह्मणपाठादादावग्नीषोमीयानुष्ठानं पश्चादाग्नेयानुष्ठानमित्येवं क्रमं बा-

---

१ एवं च यवागूम्पचेत् तयाग्निहोत्रं जुहुयादिति बोधः ।

२ अध्ययने प्रयोगकाल इति शेषः ।

३ अर्थप्रत्ययमनतिक्रम्य वर्तत इति यथार्थप्रत्ययम् यथाम्नातमित्यर्थः ।

धित्वा मन्त्रपाठादादावाग्नेयानुष्ठानं पश्चादग्नीषो-मीयस्येत्येव क्रम इत्युक्तम् ॥ प्रयाजानां समिधो यजति तनूनपातं यजतीत्येवं विधायकवाक्यक्रमा-द्यः क्रमः स ब्राह्मणपाठक्रमः । अत्र च यद्यपि ब्राह्मणवाक्यान्यर्थं विधाय कृतार्थानि तथापि प्र-याजानां स्मारकान्तरस्याभावात्तान्येव स्मारकत्वेन स्वीक्रियन्ते । तथा च येन क्रमेण तान्यधीतानि तेनैव क्रमेणार्थस्मरणं जनयन्तीति युक्तं तेनैव क्रमेण तेषामनुष्ठानमिति। तत्सिद्धं प्रयाजानां ब्राह्म-णपाठक्रमात्क्रम इति ।

(१३०) "ननु प्रयाजेषु प्रयोगसमवेतार्थस्मा-रकत्वं विधायकत्वेन कृतार्थानां ब्राह्मणवाक्यानां किमिति स्वीक्रियते प्रयोगसमवेतार्थस्मारकाणां याज्यामन्त्राणामाग्नेयादिष्विवात्रापि सत्त्वात् । न च 'तेषां देवतास्मारकत्वात्कर्मस्मारकत्वेन 'ब्राह्म-णवाक्यं स्वीक्रियत' इति वाच्यम् । आग्नेया-दिष्वपि कर्मस्मारकत्वेन तत्स्वीकारापत्तेः । न चे-ष्टापत्तिः । तथा सति ब्राह्मणपाठान्मन्त्रपाठस्य बलीयस्त्वं न स्यात् । तद्बलीयस्त्वे हि मन्त्राणां प्रयो-गसमवेतार्थस्मारकत्वमितरस्य तदस्मारकत्वं हेतुः । यदि च कर्मस्मारकत्वं ब्राह्मणवाक्यस्य स्वीक्रियते तदा प्रधानस्मारकत्वेन ब्राह्मणवाक्यस्यान्तरङ्गत्वादङ्गभू-तदेवतास्मारकत्वेन च मन्त्राणां बहिरङ्गत्वान्मन्त्र-

१ प्रत्यक्षे त्वर्था ।

पाठाद्ब्राह्मणपाठस्यैव बलीयस्त्वं स्यात्। तथा च मन्त्रतस्तु विरोधे स्यादिति (जै· सू· ५।१।१६) पाञ्चमिकाधिकरणविरोधः। तत्र हि ब्राह्मणपाठान्मन्त्रपाठस्य बलीयस्त्वादादावाग्नेयानुष्ठानं पश्चादग्नीषोमीयस्येत्युक्तम्। अथ-'आग्नेयादिषु याज्यामन्त्रा एव देवताप्रकाशनद्वारा कर्मप्रकाशकास्तय ज्यमानद्रव्योद्देश्यत्वरूपत्वाद्देवतात्वस्येति',—चेत्तुल्यं प्रयाजेषु। तत्रापि हि याज्यामन्त्रा देवताप्रकाशकाः प्रयाजेषु देवताया मान्त्रवर्णिकत्वात्। तथा च प्रयाजेषु याज्यामन्त्राणां देवताप्रकाशनद्वारा कर्मप्रकाशकत्वात्तत्क्रमो मन्त्रपाठादेव स्यान्न तु ब्राह्मणपाठक्रमात्। न च 'मन्त्रपाठस्यान्यादृशत्वात् प्रयाजक्रमो ब्राह्मणपाठक्रमादेवेति' वाच्यम्। अन्यादृशत्वे तस्यैव क्रमस्यानुष्ठानं स्यात्, मन्त्रक्रमस्य बलीयस्त्वात्। अभ्यासाधिकरणे च वार्त्तिककृता क्रमविनियुक्तेवं-लिङ्गकमन्त्रवर्णेत्यादिना प्रयाजेषु याज्यामन्त्राणां क्रमविनियोग उक्तः नवमे॥ तन्त्ररत्ने समिधोऽग्न आज्यस्य व्यंत्वित्यादिभिः क्रमप्रकरणप्राप्तैर्देवतागुणत्वेनसमर्प्यन्त इत्युक्तम्। मन्त्राणामन्यादृशक्रमत्वे तदनुपपत्तिः स्यात्तत्कथं प्रयाजेषु ब्राह्मणपाठक्रमात्क्रम इत्युच्यते"॥

(१३१) सत्यमेतत्। तथापि यत्रार्थस्मारका मन्त्रा न सन्त्येव—यथा तूष्णीं विहितेषु कर्मसु—तेषां क्रमो ब्राह्मणपाठक्रमात्। तत्र तेषामेव प्रयोगसम-

Digitized by Google

नुभवाद्व्यवस्थाप्यते ऽनुमानाद्वा । न तावदनुभवः स्वाकारमात्रपर्यवसायी नीलमपरं गोचरयति । नीलमिति हि प्रतिभासो न पुनर्नीले इति । न च भिन्नं तद्विषयो भवितुमर्हतीत्युक्तम् ।

स्यादेतत् । द्विविधो हि विषयः प्रमाणानां, ग्राह्यो ऽध्यवसेयश्च । तद्यथा प्रत्यक्षस्य ग्राह्यः क्षण एको ऽध्यवसेयश्च प्रवृत्तिविषयः सन्तानः । अन्यथा ऽर्थक्रियार्थिनः प्रमाणमप्रवर्तकं स्यात् । प्रवृत्तिविषयोपदर्शनं हि प्रवर्तकत्वं प्रापकत्वं च प्रमाणानाम् । न च ग्राह्यक्षण एव प्रवृत्तिविषय,स्तस्य तदानीमतीतत्वात् । सन्तानस्तु स्यात् । न चाऽसौ ग्राह्य इत्यध्यवसेयत्वमभ्युपेतव्यम् । तथा ऽनुमानविकल्पस्यापि ग्राह्यं सामान्यमन्यथावृत्ति रूपम् । अध्यवसेयस्तु प्रवृत्तिविषयो ऽर्थक्रियाक्षमः । प्रवृत्तिविषयाऽपेक्षं हि प्रामाण्यं तयोः । यथाह "न ह्याभ्यामर्थं परिच्छिद्याऽध्यवसाय प्रवर्तमानो ऽर्थक्रियायां विसंवाद्यते" इति । तदेवं बाह्यमग्राह्यमध्यवसेयतया विषय इति तत्राऽध्यवसायार्थोऽपरिज्ञानात् विकल्पो ऽध्यवसायः । तत्रानुमानं विकल्परूपत्वात्तद्विषयं प्रत्यक्षं तु विकल्पजननादिति चेत् । ननु विकल्पो ऽपि स्वाऽऽकारविषयत्वात्कथं बाह्यमध्यवसातुमर्हति? यदि मन्येत न विकल्पानां विषयः स्वाकारो, ऽपि तु संवेदनस्य । प्रत्यक्षस्य हि विकल्पविषयो यो विकल्प्यते । न च स्वरूपं विकल्प्यते । तस्य सर्वतो व्यावृत्तस्याऽभिलापसंसर्गयोग्यत्वाऽभावाद्विशदप्रतिभासत्वाच्च । तस्मादात्मन्यविकल्पाः स्वाऽऽभासं बाह्यतया विकल्पयन्तस्तत्र तत्र प्रवर्तयन्ति स्वव्यवहारार्थिनः । पारम्पर्येण च बाह्यादुत्पत्तेस्तत्प्रतिबन्धात्तत्प्राप्तेर्न विसंवादयन्ति लोकमिति । यदाह 'स्वप्रतिभासे ऽनर्थे ऽर्थाध्यवसायेन प्रवृत्ति',रिति । आह अनर्थे स्वाभासमर्थमध्यवस्यतीति निर्वचनीयमेतत् । मन्यसेऽमारोपयन्तीति किं विकल्पस्य स्वरूपाऽनुभवाऽऽरोप उत व्यापारा-

न्तरं स्वरूपाऽनुभवः ? न पूर्वः कल्पः । अनुभवसमारोपयोर्विकल्पाऽविकल्परूपतया द्रवकठिनवत्तादात्म्याऽनुपपत्तेः । व्यापारान्तरत्वे क्रमः समानकालता वा । न तावत् क्रमः । क्षणिकस्य विज्ञानस्य क्रमवद्व्यापाराऽयोगादक्षणिकत्वादिनामपि बुद्धिकर्मणोर्विरम्य व्यापाराऽयोगान्न क्रमवद्व्यापारसम्भवः । अनुभवसमारोपौ समानकालाविति चेत् । भवतु समानकालत्वं केवलमात्मभावाऽवस्थित एव वेद्यः । परभाववेदने स्वरूपवेदनाऽनुपपत्तेः । तथा चात्मज्ञानस्य ग्राह्यग्राहकाऽऽकाराऽनुभूतौ ऽर्थश्च समारोपितः । न त्वात्माऽवेद्यमाने समारोपितो नार्थः समारोप्यमाणः प्रत्यक्षवेद्यः । स च समारोपः सतो ऽर्थस्याऽसतो वा ग्रहणमेव । न च ज्ञानाऽतिरिक्तस्य ग्रहणं सम्भवतीत्युक्तम् । स्वप्रतिभासस्य बाह्याद्भेदाऽग्रहो बाह्यसमारोपस्ततो बाह्ये प्रवृत्तिरिति चेत् । स किं गृह्यमाणे बाह्ये न वा ? न तावद्गृह्यमाणे । उक्तं ह्येतत् न तद्ग्रहः सम्भवतीति । अगृह्यमाणे तु भेदाऽग्रहेण न प्रवृत्तिनियमः स्यात् । अन्येषामपि तदानीमग्रहणात् । अन्यत्रापि प्रवृत्तिप्रसङ्गात् । तस्मान्नाऽनुभवव्यवस्थाप्यो नाप्यनुमानव्यवस्थाप्यः । तदपि हि प्रत्यक्षवदेव ग्रहीतुमध्यवसातुं वा बाह्यं नाऽर्हतीत्युक्तप्रायम् । न च तादृशो बाह्यप्रतिबन्धस्तदात्मा तत्कार्यो वा हेतुरप्यस्ति । नन्वयमस्ति । ये यस्मिन्सति कादाचित्कास्ते सर्वे तदतिरिक्तहेत्वपेक्षा यथा विच्छिन्नाऽऽगमवचनप्रतिभासप्रत्ययाः सन्तानान्तरापेक्षाः । तथा च विवादाध्यासिताः सत्यप्यालयविज्ञानसन्ताने सर्वदापि प्रवृत्ति[1]प्रत्यया इति स्वभावहेतुः । यश्चाऽसावालयविज्ञानसन्तानाऽतिरिक्तः सो ऽर्थो वासनापरिपाकप्रत्ययकादाचित्कत्वात् कदाचिदुत्पाद इति चेत् । नन्वेकसन्ततिपतितानामालयविज्ञानानां ततत्प्रवृत्तिविज्ञानजनन-

१ संताने ऽप्यप्रवृत्ति॰ २ पु॰ पा॰ ।

क्तिर्वासना । तस्याश्च स्वकार्यजननं प्रत्याभिमुख्यं परिपाकस्तस्य च प्रत्ययः स्वसन्तानवर्तिपूर्वक्षणः । सन्तानान्तरापेक्षाऽनभ्युपगमात् । तथा च सर्वेऽप्यालयसन्तानपतिताः परिपाकहेतवो, न वा कश्चिदपि । विशेषाऽभावात् । यो यथाऽभिप्रेतः परिपाकहेतुः स यथा आलयसन्तानपतितस्तथा सर्वेऽपीत्यविशेषः । क्षणभेदाच्छक्तिभेदस्तस्य च कादाचित्कत्वात्कार्यकादाचित्कत्वमिति चेत् । नन्वेवमेकस्यैव नीलविज्ञानजननसामर्थ्यं तत्प्रबोधजननसामर्थ्यं चेति क्षणान्तरस्य तन्न स्यात् । सत्त्वे वा कथं क्षणभेदाच्छक्तिभेद ? इत्यालयसन्तानवर्तिनः सर्वे समर्था इति समर्थहेतुसद्भावे वा कार्यक्षेपाऽनुपपत्तेः । स्वसन्तानमात्राऽधीनत्वे निषेध्यस्य कादाचित्कत्वस्य विरुद्धं सदातनत्वम्, तस्योपलब्ध्या च कादाचित्कत्वं निवर्तमानं हेत्वन्तरापेक्षत्वे व्यवतिष्ठत इति प्रतिबन्धसिद्धिः । न च सन्तानान्तरनिमित्तत्वं सर्वेषां प्रवृत्तिविज्ञानानां विज्ञानवादिभिरङ्गीकृतमपि तु कस्य चिद्देशाऽऽगमवचनप्रतिभासस्य विज्ञानस्य । अपि च सन्तानान्तरनिमित्तत्वे तस्यापि सदा सन्निधानान्न कादाचित्कत्वं स्यात् । न खलु सान्तरस्य सन्तानस्य कादाचित्कत्वस्य देशतो विप्रकर्षसम्भवो, विज्ञानवादे व्यतिरिक्तदेशाऽभावात् । अमूर्तत्वाच्च । विज्ञानानामदेशात्मकत्वात् । नापि कालतः । अपूर्वसत्त्वप्रादुर्भावाऽनभ्युपगमात् । तस्मादनुमानमस्ति बाह्यसाधनमिति । तदिदमनुपपन्नम् । स्वसन्तानमात्रप्रभवत्वेऽपि प्रत्ययकादाचित्कत्वोपपत्तौ सन्दिग्धविपक्षव्यावृत्तिकत्वेन हेतोरनैकान्तिकत्वात् । बाह्यनिमित्तत्वेऽपि कथं कदाचिन्नीलसंवेदनं कदाचित्पीतसंवेदनं बाह्यनीलसन्निधाने स्वकारणनिबन्धनः शक्तिभेदोऽपि भविष्यति । 'सन्तानिनो हि क्षणभेदहेतवस्ते च प्रतिक्षणं भिद्यन्त एव सन्ताने सन्निधानाऽसन्निधानाभ्यामिति चेत् । अथ पीतसन्निधाने किमिति नीलादिज्ञानं

Digitized by Google

न भवति पीतज्ञानं वा भवति? सामर्थ्यादसामर्थ्याच्चेतरस्मिन्निति चेत्। कुतः पुनरयं सामर्थ्यभेदः? स्वहेतुभेदादिति चेत्। एवं तर्हि क्षणानामपि स्वकारणभेदनिबन्धनः शक्तिभेदो भविष्यति। सन्ताना हि क्षणभेदहेतवः प्रतिकार्यं भिद्यन्त एव। न च सन्तानो नाम कश्चिदेक उत्पादकः समस्ति, यदभेदात् क्षणा न भिद्येरन्। ननूक्तं न क्षणभेदाऽभेदाभ्यां शक्तिभेदाऽभेदौ, भिन्नानां क्षणानामेकस्य सामर्थ्यस्योपलब्धेः। अन्यथैक एव पूर्वक्षणो नीलविज्ञानजननः स्यान्न क्षणान्तराणीति न नीलाकाराणि विज्ञानान्तराण्युत्पद्येरन्, यदि भिन्नानां नैकं सामर्थ्यम्। ननु नीलसन्तानिनामपि मिथो भिन्नानां नैकमस्ति नीलाकारादिसामर्थ्यमिति सन्निधाने ऽपि नीलान्तरस्य न नीलविज्ञानमुत्पद्येत। सन्तानिभेदे ऽपि शक्त्यभेद इति चेत्। क्षणभेदेन किमपराद्धं? येन तस्मिन्नपि न भवति। अथ सन्तानिभेदे शक्तिभेद एव, तथा च कार्यभेदः। न हि यदेकस्मिन्नीलाकारं ज्ञानं ज्ञानान्तरमपि नीलाकारं तदेव भवितुमर्हति। तदस्माकं क्षणभेदे ऽपि समानम्। अन्यथाऽभिनिवेशात्। अपि चोत्पत्तिसारूप्याभ्यां विषयत्वे चक्षुरालोकसंस्काराणामपि यथाक्रमं रूपग्रहणं प्रति नियमस्पृष्टताज्ञानजनकत्वसारूप्यैस्तदुत्पत्त्या च नीलवद्ग्रहणप्रसङ्गः। अत्यन्तसारूप्याद्वा विषयत्वे नीलविज्ञानसमनन्तरप्रत्ययस्य नीलार्थादपि सदृशतरस्य नीलज्ञानविषयत्वाऽऽपत्तिः। सतोरप्युत्पत्तिसारूप्ययोरध्यवसायाद्विषयभावः स चार्थ एव नान्यत्रेति चेत्। न। उक्तोत्तरत्वात्। निवेदितमेतदधस्तात्। यथा 'नाऽध्यवसायगोचरो ग्राह्य' इति।

तदनेन प्रबन्धेन वेद्यत्वलक्षणो हेतुः समर्थितो विज्ञानवादिनाम्। स चैवं प्रयोगमारोहति। यद्वेद्यते येन वेदनेन ततस्तन्न भिद्यते यथा ज्ञानस्याऽऽत्मा, वेद्यन्ते च नीलादय इति विरुद्धव्या-

Digitized by Google

निरालम्बनं तु ज्ञानमयुक्तमेव।

प्तोपलब्धिः। निषेध्यभेदविरुद्धः खल्वभेदस्तेन व्याप्तं वेद्यत्वं भिन्नस्य साऽऽकारनिराकारविज्ञानप्रवेदनीयस्याऽनुपपत्तेरिति प्रपञ्चितमधस्तात्। तस्माद्विरुद्धाऽभेदव्याप्तवेद्यत्वोपलब्धिरूपाऽनुपलब्धिरेव भेदाऽभावसाधनीति[1] स्थिता बुद्धीनां बाह्याऽनालम्बनत्वसिद्धिः।

अतश्चैतदेवं सहोपलम्भनियमो ज्ञानस्यार्थेन। तथा हि। यद्येन नियतसहोपलम्भनं तत्ततो व्यतिरिच्यते यथैकस्माच्चन्द्राद् द्वितीयश्चन्द्रः। नियतसहोपलम्भनञ्ज्ञानमर्थेनेति व्यापकविरुद्धोपलब्धिः। अभेदो हि सहोपलम्भनियमेन व्याप्तः। न खलु नीलपीते भिन्ने नियमेन सहोपलभ्येते। तद्विरुद्धश्चाऽयं नियमः स्वविरुद्धमनियमं निवर्तयंस्तद्व्याप्तं भेदमपि निवर्तयति। तद्व्यापकविरुद्धोपलब्ध्या भेदाऽभावसिद्धिः। यथाह 'सहोपलम्भनियमादभेदो नीलतद्धियो'रिति। कथं तर्हि ज्ञानात्मकात्प्रतिपत्तुरर्थस्य भेदबुद्धिर्नीलमेतदिति? बलवद्वेद्यत्वसहोपलम्भनियमाऽनुमानेन बाधिता भ्रान्तिरेव। यदाह 'भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविव द्वयम्' इति।

अपि च यः प्रत्ययः स सर्वो बाह्याऽनालम्बनः। यथा स्वप्नप्रत्ययः, प्रत्ययश्च विवादाध्यासित इति स्वभावहेतुः। निरालम्बनं विज्ञानं तन्मध्यपातिनी च प्रतिभेति साऽपि तथेत्यत आह— निरालम्बनं तु ज्ञानमयुक्तमेव। इदमत्राऽऽकूतम्। नैतन्निरालम्बनत्वे प्रमाणं भवितुमर्हति। तथा हि। किमनुभवसिद्धस्य नीलादेर्वेद्यस्य तत्त्वं हेतुः क्रियेत, आहो स्विदन्यस्य? तत्र यद्यनुभवसिद्धस्य ततोऽनहङ्कारास्पदमसितादिरूपं स्थूलं नीलादिविच्छिन्नं वेद्यमनुभूयते, नास्याऽऽन्तरज्ञानस्वभावता शक्यसाधना। यथाहाऽऽचार्यः 'स बहिर्देशसम्बन्धः प्रत्यक्षमुपलभ्यते' इति। अथाऽन्यस्य। तस्याऽसिद्धं वेद्यत्वम्। ज्ञानाकारत्वे चास्य न का चित्क्षतिः। यद्युच्येत

१ भावं साधयतीति २ पु॰ पा॰।

Digitized by Google

नाऽनुभूतत्वमस्य हेतुत्वमपि त्वनुभूताऽवसितत्वस्य । अवसायस्य स्वभावत एकव्यावृत्तिनिष्ठरूपाऽवगाही न मनागपि व्यावृत्त्यन्तरमवगमयति । मा भूदिह सदभिलापविकल्पपर्यायता सर्वेषां गवादिशब्दविकल्पानाम् । व्यावर्त्यभेदाऽनुविधायिनश्च व्यावृत्तिभेदाः । तदिहाऽवेद्यव्यावृत्तिकृतवेद्यत्वाऽवगाही विकल्पो नाऽबाह्यव्यावृत्तिकृतं बाह्यत्वं विगाहत इति यदेव किं चित्पांसुलपादकेन हालिकेनापि नीलादेर्वेद्यत्वमनुभूतावसितं तद्बाह्यत्वनिरासाय समर्थमिति न विरोधः । तदसत् । न खल्वेकाऽवसायगोचरतया विरोधमापादयामो, ऽपि तु यद्बाह्यत्वं स्थूलत्वं चाऽनुभूतावसितं नीलादेस्ताभ्यां विरोधी । तथा हि । ज्ञानाकारत्वे नीलस्य नानादिग्देशव्यापिता स्थूलत्वं विच्छिन्नदेशता च बाह्यत्वं न स्याताम् । न खल्वेकत्वेन ग्रहणाऽग्रहणे एव परं विरुध्येते येन विज्ञानदेशे नीलादेः स्थूलस्य ग्रहणादेवाऽविरोधः स्यादपि तु तद्देशत्वाऽतद्देशत्वे अपि । तथा हि । भिन्नदेशयोरपि परस्परपरिहारेण स्थितिरस्ति विच्छिन्नाऽवभासज्ञानकारणशक्तिभिर्भिन्नदेशत्वम् । तच्च पूर्वदिग्भागस्थितान्नीलाद्विच्छिन्नमवभासते प्रत्यक्षेण, न तु परस्परात्मकमनुभवाऽनुसारिणा निश्चयेन यथा ऽवसीयते तथा ऽनवसायात्परस्परविच्छेदेन चाऽवसायात् । दृश्यमानं चाऽनुभवाऽनुसारिणा निश्चयेन यथा ऽवसीयते तथैव सदसति बाधके । यदि च पूर्वदिक्कमितरदिक्कं गृह्येत नैव दिग्भिन्नभावदर्शनं भवेदस्ति च तत् । तस्माद्दिगन्तरसन्निविष्टं रूपमितरदिक्कं न गृह्यते । तथा सति यथा नीले पीतमदृष्टमिति नीलपरिच्छेदे तदभावो व्यवच्छिद्यते तद्वच्च पीतादिवत्पूर्वदिक्के रूपे तदितरदिक्कं रूपमदृष्टमिति पूर्वदिक्करूपपरिच्छेदे तदभावो व्यवच्छिद्यते । इतरथा तादूप्यमेव न परिच्छिन्नं स्यात् । तदभाववच्च पूर्वदिक्काऽभाववन्तस्तदितरदिग्भागवर्तिनः स्वभावाद्व्यवच्छेत्तव्याः नीलपरिच्छेदेनेव नीलाऽभाववन्तः पीतादय इति

96

सिद्धस्तद्रूपत्वाऽतद्रूपत्वयोः परस्परपरिहारस्थितिलक्षणो विरोधः । यत्र चैवं विधयोर्विरोधः तत्र मानाऽभेदो यथा नीलपीतयोः । एवंविधस्त्वाऽनुभूयमाने नीले स्थूले विरोध इति व्यापकविरुद्धोपलब्धिः । प्रतिषेद्धव्यः खलु भेदो विरोधाऽभावेन व्याप्तत्वाद्विरुद्धश्च विरोध इति । तेन यावदुक्तं भवति नीलं वा नेति तावदुक्तं भवति नीलं स्थूलमिति । न च नानैकज्ञानात्मेति युक्तम् । एकत्वस्य नानात्वविरोधात् । न च नानाविज्ञानानीति साम्प्रतम् । प्रत्येकं स्वाऽवभासमात्राऽवसायित्वे नानाविज्ञानानां स्थूलाभासाऽनुभवाऽभाव[1]प्रसङ्गात् । न च नानाकाराऽनुभववासनाजन्मा विकल्पस्तदनुभवाकारसङ्कलनात्मकस्थूलाकारभाग्भवितुमर्हति । तस्याप्येकत्वे ऽनुभववत्तदाभासत्वाऽनुपपत्तेः । नानात्वे वा स्थूलाभासाऽभावप्रसङ्गात् । विकल्पविषयत्वेन च विशदाभताऽनुपपत्तेः । यदाह । 'न विकल्पानुबन्धस्य स्पष्टार्थप्रतिभासते'ति । न चाऽनुभूतं स्थूलत्वं येन तदुपाधिर्विकल्पे विस्पष्टाभासः[2] स्यात् । तस्मादर्थे विज्ञाने च स्थूलत्वाऽनुपपत्तेरवदेतदभ्युपगन्तव्यम् । न च तद्विज्ञानं सम्भवति । सदसतोरेकत्वाऽनुपपत्तेः । एतेनेदमिति विच्छिन्नाऽवभासो व्याख्यातः । तस्मादनिच्छताऽपि विज्ञानानां मनोवेद्यत्वमभ्युपगन्तव्यम् । तथा च वेद्यत्वमभेदस्य न व्याप्यमिति विरुद्धव्यापकोपलब्धिरसिद्धा नाऽभेदोपस्थापनेन भेदं निषेद्धुमर्हति । ननु न परप्रतिबन्धमात्रादर्थसिद्धिः, उक्तं च 'साकारमनाकारं च विज्ञानमनात्मभूतवेदनासमर्थ'मिति । तत्किमिदानीं समर्थनीय एव स्थूलाऽनुभवो नास्ति वा ? न तावन्नास्ति, नीलवत्तस्याप्यनुभवात् । तदपह्नवे चाऽनिर्मूलतया नीलाऽनुभवस्याऽपह्नवप्रसङ्गः । तथा चास्य कुतो भेदो वा ? पर्याप्तं न चाऽसमर्थनीयः । न च ज्ञानाऽऽकारः । का

१ स्थूलाऽभाव० २ पु० पा० ।
२ विस्पष्टाकता स्यात्० २ पु० पा० ।

तर्हि तस्य समर्थना ? अत एवाऽनात्मनः प्रकाशनविज्ञानं स्वकारणा-ऽऽसादिताऽदृष्टान्तसिद्धस्वभावभेदं न कथन्तास्पदं भवितुमर्हति । न खल्वनुभवो दृष्टान्तमपेक्षते । मा भूद्भूम्यादावपाधारणगन्धादिगुणा-ऽननुभवनम् । कः पुनरस्याऽनात्मसम्बन्ध ? इति चेत् । अथा-ऽन्यत्रापि सम्बन्धस्य कः सम्बन्धिभ्यां सम्बन्धः ? रूपेणैव स तथेति न सम्बन्ध्यन्तरमपेक्षते । न जातु सम्बन्धिनावन्तरेणाऽसौ निरूप्यते । न च जातु तस्मिन्सति सम्बन्धिनावसम्बन्धिनौ भवत,स्तेन सम्बन्धिसम्बन्धौ न परमार्थः । सम्बन्धसम्बन्धिनो तथो-त्पन्नो सम्बन्ध इति चेत् । ननु स्थूलाऽनुभवो ऽपि न स्थूलमन्त-रेण निरूप्यते । न च तस्मिन्सति स्थूलमननुभूतं भवतीति रूपे-णैव सो ऽपि स्थूलप्रकाशनपरमार्थः सम्बन्ध इव वा तथोत्पन्नो सम्बन्धिनाविव वा सम्बन्धनपरमार्थौ । सेयं समर्थना । यद्येवमियम-नुभवमात्रस्यैवाऽनात्मग्राहितामापादयति, न हि नीलाद्यनुभवे ऽपि नीलादिमन्तरेण निरूप्यते । न च तस्मिन्सति नीलादयो नाऽनुभूता इति स्थूलाऽनुभववदनात्मनो नीलादेरनुभवः स्वभावत एव न सम्बन्धान्तरेणे ति तत्त्वम् । अतदात्मनोऽपि वेद्यत्वोपपत्ते-रनैकान्तिकं वेद्यत्वम् । एवं सहोपलम्भनियमोऽप्यनैकान्तिकः । स्वकारणाऽधीनो हि तादृशः स्वभावभेदो विज्ञानस्य येनात्माऽना-त्मनोरसावेक एवोपलम्भः । न च स्वभावः कथन्तागोचर इत्यु-क्तम् । एतेनैव प्रत्ययत्वमपि प्रत्युक्तम् । स्वप्नादिप्रत्ययानां च समा-रोपितबाह्यविषयत्वात्साध्यविहीनत्वं दृष्टान्तस्य । तथा च विरु-द्धो हेतुः ।

अपि चाऽसिद्धः सहोपलम्भः । न हि य एव नीलस्योपल-म्भः स एव तदुपलम्भस्येति नियमः समस्ति । न खल्वयमनुभव-गोचरः । तथा हि । विस्फारिताक्षः प्रतिपत्ता नीलमिदमिति पश्यन्न

Digitized by Google

तदैव तदनुभवमपि पश्यति । नीलप्रख्यो हि तदनुभविता वा नाऽनुभवप्रख्यो ऽनुभूयमानोपाधितया ऽनुभवमपि परिच्छिनत्ति । न खल्वनुभवाऽवसाने ऽनुभूयतइति भवति । न ह्यस्ति सम्भवो दण्डो न गृह्यते गृह्यते च दण्डीति । तस्माद्विशेषणतया ऽनुभवग्रहणे ऽप्यनुभूयमानप्रख्यो ऽनुभवितेति सिद्धः सहोपलम्भनियम इति चेत् । नैतत् । न ह्यनुभूयते नीलमित्यनुभवो ऽपि तु नीलमिति । असत्यनुभवप्रकाशे विषया न प्रकाशेरन् । तदधीनं हि प्रकाशं तेषाम् । न खलु न तानि नीलानुभवस्तानलमवभासितुम् । न ह्यनुभवादन्यो विषयाऽवभास, यमयमनवभासमानो ऽपीन्द्रियादिवदादधीत,-ऽपि तु परप्रकाशनपरमार्थो ऽनुभव एव तत्प्रकाशः । तथा च यदि निलीयते तन्निलीनस्वभावत्वाद्विषयानपि नाऽऽभासयेदिति नाऽनुभवो न विषया भासन्तइत्यायातमान्ध्यमशेषस्य जगतः । तस्मादनुभवप्रकाशाऽऽयत्तप्रकाशत्वमेषितव्यं विषयाणाम् । अपि चैकस्मिन्नर्थे स्फुटाऽस्फुटाऽवभासो युगपदुपलभ्यते प्रतिपत्तृणाम् । न चाऽसावर्थधर्मः स्फुटत्वादि, रेकस्मिन्युगपद्विरुद्धधर्मसमावेशाऽसम्भवात् । विज्ञानभेदस्तूपपद्यतइति विज्ञानस्य धर्मः । तथा च तज्ज्ञानमनुभवसिद्धम् ।

तदेवमनुभवादेव स्वसंवेदनसिद्धौ यो नाम स्वसिद्धान्ताभ्यासाऽऽहितव्यामोहो विप्रतिपद्यते तं प्रत्यनुमानमुपन्यस्यते । यद्यत्प्रकाशाऽऽयत्तप्रकाशं तत्तस्मिन्प्रकाशमानएव प्रकाशते, यथा दण्डप्रकाशाऽऽयत्तप्रकाशो दण्डी । प्रत्ययप्रकाशायत्तप्रकाशश्च प्रत्येतव्यो रूपादिरिति स्वभावहेतुः । न च प्रत्ययप्रकाशाऽऽयत्तप्रकाशत्वं रूपादीनामसिद्धम् । उक्तं हि 'तदनायत्तत्वे प्राप्तमान्ध्यमेव जगतो ऽशेषस्येति । न च स्वसंवेदने स्वात्मनि वृत्तिविरोधः । न हि संवेदनस्य स्वरूपादन्या वृत्तिरस्ति । यतः स्वात्मनि कर्तृकर्मभावो विरुध्येत । संवेदनमेव त्वपराधीनप्रकाशमाविर्भूतं तत्स्वभावमात्मसंवेदनमाचक्षते ।

न च स्वभावेन भावो विरुध्यते । तस्मादात्मसंवेदनसिद्धेः सिद्धः सहोपलम्भनियम इति ।

तदनुपपन्नम् । हेत्वसिद्धेः । न हि नीलादयोऽनुभवप्रकाशायत्तप्रकाशाः किं त्वनुभवाऽधीनप्रकाशाः । एवं चेन्नेत्रादिभिरनैकान्तः । किं पुनर्नीलादीनामनुभवे चायत्तता ? नन्वनुभवप्रकाशेऽपि किमायतते ? यदि न किञ्चिन्नाऽतिरिक्तं वचः । अनुभवप्रकाशाऽऽयत्तः प्रकाश इति चेत् । ननु स एव तदधीन इत्युक्तं भवति, तच्चाऽयुक्तम् । न ह्यात्मन्यायतते, भेदाऽश्रयत्वात्तद्भावस्य अनुभव एवात्मनः परस्य च संबन्धितया ऽनुभवभेदोऽनुभवप्रकाशो नीलप्रकाशः, तथा चाऽनुभवप्रकाशाधीनता नीलप्रकाशस्येति चेत् । एवं तर्हि स्वप्रकाशाऽधीनस्य नीलसम्बन्धितेत्युक्तं स्यात् । तच्चैतावद्वक्तव्यम् । भवतु स्वप्रकाशः कुतस्तु नीलसम्बन्धितेति । स्वभावादिति चेत् । कृतं तर्हि स्वप्रकाशेन, स्वभावत एव तत्सम्बन्धोपपत्तेः । एतावांस्तु विशेषः, तवासौ कल्पिता तत्सम्बन्धिता, मम तु पारमार्थिकी, यां किल ज्ञेयाऽभिव्यक्तिरिति ज्ञाततेति वा कर्मतेति वा ऽऽचार्याः प्रवदन्ते । ननु कर्मतेति चेयमर्थधर्मः, कथमर्थधर्मोऽयमतीतादिषु सम्भवतीत्युक्तम् । नेयमर्थधर्मः, किं तु ज्ञातुरात्मनो ज्ञेयसम्बन्धभेद एव ज्ञातता । स च ज्ञातृधर्मो ज्ञायमानार्थोऽवच्छिन्नो ज्ञेयं प्रति गुणभाव आत्मनः सुखादिवत्प्रमित्साऽनपेक्ष[1]समनन्तरप्रत्ययोत्पन्नमानसप्रत्यक्षवेदनीय एकसमवेतो ऽप्युभयाऽधीननिरूपणतादाश्रयः शक्तिरिव सम्बन्धः सम्भवति । नन्वयमनुभव एव । तथा हि । सोऽपि विषयविशेषप्रतिबन्धव्यवहाराऽनुगुणः पुंसो धर्मभेद आख्यायते । सत्यमीदृशः । न त्वसौ सम्बन्धः[2] । व्यापारो हि स आत्मनः । तस्य तु फलं सम्बन्ध आत्मनो ज्ञेयप्रवणतालक्षणः । कुतः पुनरनुभवाऽवगतिः ? अस्मादेव तु सम्बन्धलक्षणात्फलात् । यदाह 'ज्ञाते त्वनुमा-

१ धर्मित्सितस्य सापेक्ष· २ पु· पा. ।   २ स नामेदृशः २ पु· पा· ।

नादवगच्छतीति । आत्ममनःसंयोगविशेषादेव काशाचित्कफलस-म्भवान्नाऽनुभवाऽनुमानमिति चेत् । तत्किमिदानीमात्मनः संयोग-विशेषो जात इत्यात्मनाऽर्थं प्रति गुणभूतेन भवितव्यं? क्रिया हि गुणप्रधानभावमापादयति भावानां पाकादिषु तथोपलम्भात् चेचोद-नादीनाम् । ननु क्रियोपधाननिबन्धनश्चेत्सम्बन्धः कथमप्रतीतायां क्रियायां शक्यः प्रतिपत्तुम्? प्रतीता चेत्क्रिया न तर्हि सम्बन्धात्फ-लभूतायास्तत्प्रतीतिः । नैतदस्ति । क्रियामन्तरेण हि न सम्बन्धः, न पुनः क्रियाप्रतीतिं विना तत्प्रतीतिः, अप्रतीतायामपि क्रियायां सम्बन्ध-प्रतीतेः । यथा ऽऽग्नेय इति शब्दाऽवगताद् द्रव्यदेवतासम्बन्धादनु-मीयते यजिस्तथोत्पन्नविज्ञानार्थं प्रति गुणभूतमात्मानं मनसैव सहसा ऽवगम्य तद्धेतुं संवेदनक्रियामनुमिमीते । आत्ममनःसंयोगमात्रात्तद-नुपपत्तेः । यथाह । 'पूर्वं सा गृह्यते पश्चाद् ज्ञानं तज्ज्ञाततावशा'दिति ।

स्फुटत्वमपि ज्ञेयताविशेष एव न संवेदनविशेषः । तथा हि । सामान्यविशेषवत्त्वां संवेद्यता स्फुटता, तद्विपरीतत्वमस्फुटता, यतो दूरे वृक्ष इति प्रतियन्ति न पुनरशोक इति वा सहकार इति वा । प्रत्यासीदन्तस्तु मलयमारुताऽऽकम्पमानतरपल्लवमानन्दनिष्यन्दमधु-पमालानिपीयमानमधुरमधुरसस्तबककदम्बकं रक्ताऽशोकपादम् । तस्माज्ज्ञेयतायामयं विशेषो न ज्ञाने इति सिद्धं पराञ्चः प्रत्यया न प्रत्यञ्च इति ।

प्रयोगस्तु विवादाऽध्यासिताः प्रत्ययान्तरेणैव वेद्याः प्रत्यय-त्वात् ये ये प्रत्ययास्ते सर्वे प्रत्ययान्तरवेद्याः यथा न प्रत्ययान्तरे-णैव वेद्याः । अविद्यमानस्याऽवभासे ऽतिप्रसङ्गात् ज्ञायमानस्यैवा-ऽवभासो ऽभ्युपेयः । तथा च विज्ञानस्य स्वसंवेदने तदेव तस्य कर्म क्रिया चेति विरुद्धमापद्येत । यथोक्तम् ।

तस्य ज्ञेयाऽवभासकार्यलक्षणत्वात् ।

विषयाऽभावाच्च व्युत्पत्त्यसम्भवे तदपेक्षस्य प्रवृत्तिः स्यात् ।

"अङ्गुल्यग्रं यथात्मानं नाऽऽत्मना स्प्रष्टुमर्हति ।
स्वांशेन ज्ञानमप्येवं नात्मानं ज्ञातुमर्हति" । इति ।

यत्प्रत्ययत्वं वस्तुभूतमविरोधेन व्याप्तं, तद्विरुद्धविरोधदर्शनात्स्वसंवेदनान्निवर्तमानं प्रत्ययान्तरवेद्यत्वेन व्याप्यत इति प्रतिबन्धसिद्धिः । एवं प्रमेयत्वगुणत्वसत्त्वादयोऽपि प्रत्ययान्तरवेद्यत्वहेतवः प्रयोक्तव्याः । तथा च न स्वसंवेदनं विज्ञानमिति सिद्धम् ।

असिद्धश्च सहोपलम्भनियमः । फलभेदसमुन्नेयं च विज्ञानमभिन्नं सन्न फलभेदायाऽलमिति विनापि नीलाद्याभासं स्वभावत एव भेदात्प्रतिकर्मव्यवस्थाप्यते । तदेवमसति बाधके ऽनुभव एवात्मग्राही बाह्यसद्भावे प्रमाणं, न प्रमाणान्तरमत्राऽनुसरणीयम् । न हि करिणि दृष्टे चीत्कारेण तमनुमिमते प्रेक्षावन्तः । प्रमेयपरीक्षा तूपेक्षिता विस्तरभयात् । तदनेन प्रबन्धेनोक्तोऽभिसन्धिराचार्यस्य निरालम्बनं ज्ञानमयुक्तमेवेत्यवधारयत ।

निराकरणान्तरमाह—तस्य ज्ञेयाऽवभासकार्यलक्षणत्वात् । ज्ञेयाऽवभासो ज्ञेयता ऽर्थस्य तया ऽत्यन्तपरोक्षं विज्ञानमनुमानग्राह्यं, तच्च प्रमाणान्तराभावादित्युक्तम् । निरालम्बनत्वे तु ज्ञेयाऽवभास एव नास्तीति केन ज्ञानमनुमीयेत ? यस्य निरालम्बनत्वं साध्येत । तदनेन धर्मिणः साध्यधर्मेण विरोधो दर्शितः । तथा चाऽऽश्रयाऽसिद्धत्वं हेतोरिति भावः । अपि च व्युत्पन्नसम्बन्धः शब्दः प्रतिभां भावयेत् । व्युत्पत्तिश्चाऽर्थेन सह शब्दस्य न विज्ञानेन कार्येण तस्याऽऽनन्त्याद्व्यभिचाराच्च । सामान्यस्य च प्रतिभात्वस्याऽकार्यत्वात्कारकस्य स्वकार्ये व्युत्पत्त्यनपेक्षत्वात् । अर्थस्य निरालम्बनत्वाऽभ्युपगमे नास्तीति व्युत्पत्तेरसम्भवात्तदनपेक्षस्य च प्राक् प्रवृत्तिः स्यान्न चा-

92

Digitized by Google

नतु कारकसंसर्गिणी क्रिया आलम्बनमिष्टैव । न । तस्या अप्रवर्त्तकवचनजन्मन्यपि प्रख्यायां साम्याल्लिङादियुक्तेभ्यो वचनेभ्यः प्रतिभाभेदादप्रवृत्तिप्रसङ्गात् ।

ननु नाऽप्रवर्तकमनिवर्तकं वा वचः समस्ति । वैयर्थ्यात् । कर्तव्यतापर्यवसायिनी हि वाक्यप्रवृत्तिः । कथं तर्हि भूताऽन्वाख्यायिनो वेदान्ता लौकिकवचांसि च? कर्तव्यताभेदात् प्रवृत्तिनिवृत्तिप्रतिपत्तिविषयत्वात् । सर्वा हि

सावस्तीत्याह—विषयाऽभावाच्च व्युत्पत्तेरसम्भवे तदनपेक्षस्य प्रवृत्तिः स्यात् ।

कश्चिदाह—ननु कारकसंसर्गिणी क्रिया ऽऽलम्बनमिष्टैव, तथापि न भवदभिमतापायता सिध्यतीति भावः । दूषयति—न, तस्याः काष्ठैः पचतीत्यवाऽप्रवर्तकवचनजन्मन्यपि प्रख्यायां साम्यात्प्रवृत्तिः स्यादप्रवृत्तौ वा काष्ठैः पचेदिति लिङादियुक्तादपि वाक्यात्प्रतिभाया अभेदादप्रवृत्तिप्रसङ्गात् ।

परस्त्वप्रवर्त्तकवचनजन्मनीत्यमृष्यमाण आह—ननु नाऽप्रवर्त्तकमनिवर्त्तकं वा वचः समस्ति । कुतः? वैयर्थ्यात् । परप्रत्यायनाय हि वचनमुच्चारयन्ति प्रेक्षावन्तः । तदेव च परः प्रत्याययितव्यो यत्प्रयोजनवत् । न च भूताख्यानं तथा । तस्मात्प्रवर्त्तकं निवर्त्तकं वा वचो नाऽन्या गतिरस्तीत्यर्थः ।

ननु भूतान्वाख्यानमपि दृश्यते लोके वेदे च निधिमानेष भूभागः, 'सदेव सोम्येदमग्र आसी'दिति, अत आह—कर्त्तव्यतापर्यवसायिनी हि सर्वा वाक्यप्रवृत्तिः । यद्येवं कथं तर्हि भूतान्वाख्यायिनो वेदान्ता लौकिकानि च भूयांसि वचांसि? उत्तरम्—कर्त्तव्यताभेदात् । प्रवृत्तिनिवृत्तिप्रतिपत्तिविषयत्वात् । एतदेव स्फुटयति—सर्वा हि

कर्त्तव्यता भेदवती। वेदान्तेषु तावदात्मतत्त्वप्रतिपत्तिकर्त्तव्यता । लोके वेदमिह निध्यादि प्रतिपत्तव्यमिति वाक्यपर्य्यवसानम् ।

नैतत्सारम् । शब्दात्प्रतिपत्तेरनुत्पत्तेः पुनस्तत्राऽव्यापारात् । कर्म्मफलसम्बन्धबोधवत् । निश्चयो ऽपि यदि शब्दात्, संजात एव, अन्यतश्चेत्तदाप्रामाण्यम् । अर्थपरतापि न दृष्टार्थत्वात्स्वाध्यायाऽध्ययनविधेः कर्म्मवत् । अवि-

कर्त्तव्यता भेदवती[1] । तमेव भेदमाह–वेदान्तेषु तावदात्मप्रतिपत्तिकर्त्तव्यता । आत्मा ज्ञातव्य इति हि प्रतिपत्तिरात्मनि विधीयते, तत्परत्वं च वेदान्तानाम् । लोके ऽपि वेदमिह निध्यादि प्रतिपत्तव्यमिति वाक्यपर्यवसानम् । दूषयति–नैतत्सारम् । इदमत्र विकल्पनीयम् । आत्मप्रतिपत्तिकर्त्तव्यतापरत्वमुपनिषदाम् । तिस्रः खल्विमाः प्रतिपत्तयः सम्भवन्ति । श्रुतमयी, चिन्तामयी, साक्षात्कारवती, चेति । तत्र श्रुतमयीमधिकृत्याह–शब्दात्प्रतिपत्तेरुत्पत्तेः पुनस्तत्राऽव्यापारात् । न श्रुतमयी विधेया । शब्दाद्विधेयमवगम्यते उत्तरकाला प्रवृत्तिर्विधिप्रयोजनं न पुनः शब्दाऽवबोध एव, आत्माश्रयदोषप्रसङ्गादिति भावः । कर्मफलसंबन्धबोधवत् यथा कर्मविधिवाक्यं न कर्मफलसंबन्धबोधे विधीनरमपेक्षते तथोपनिषदो ऽपि नाऽऽत्मबोधे इत्यर्थः । शङ्कते–निश्चय आत्मनि । विधेः फलं विकल्प्य दूषयति–यदि शब्दात् संजात एवाऽन्यतश्चेत् प्रमाणान्तरात् तत्सापेक्षतया ऽप्रामाण्यं शब्दस्य । अथ विधिं विना वेदान्तानां शब्दस्वरूपपरता स्यात् स्वरूपप्राथम्यात् । यदा तु वेदान्तैरात्मा ज्ञातव्य इति विधीयते तदा तेनोऽविवक्षितार्थैः शक्यमात्मज्ञानं कर्तुमिति विवक्षिताऽर्थसिद्ध्यर्थमर्थ्यते विधिरित्याह–अर्थपरता ऽपि न विधेः प्रयोजनम् । कुतः ? दृष्टार्थत्वात् स्वाध्या-

[1] सर्वाणि कर्त्तव्यताभेदवन्ति २ पु. पा. ।

९५

Digitized by Google

शिष्टस्तु वाक्यार्थ इति न्यायात् । अन्यथा सविधिकस्यैव-विवक्षितार्थत्वप्रसङ्गात् । न च पुरुषार्थत्वाय विधिः प्रार्थ्यते । ज्ञानस्य ज्ञेयाऽभिव्यक्तिफलत्वात्फलान्तराऽनभ्युपगमात् क्रियापरत्वाच्च विधेर्वस्तुस्वरूपसत्ताया अविवक्षित-

याऽध्ययनविधेः । उपनिषदां कर्मविधिवत् । 'अविशिष्टस्तु वाक्यार्थ' इति न्यायात् । प्रयोजनवदर्थाऽवबोधनं हि दृष्टं प्रयोजनमध्ययनविधेः । अक्षरग्रहणार्थत्वे त्वदृष्टार्थता स्यात् । यथा कर्मविधीनां विनैव विध्यन्तरेणाऽर्थपरत्वमौत्सर्गिकमेवं वेदान्तानामपीत्यर्थः । यदि पुनर्न स्वाध्यायविधिर्दृष्टार्थो यदि वा नौत्सर्गिकमर्थपरत्वं वचसां तच्च सविधिकमेवाऽविवक्षितार्थं स्यादित्याह—अन्यथा सविधिकस्यैव विवक्षितार्थत्वप्रसङ्गात् । यद्युच्येत विध्यभावे हि धात्वर्थ एव भावनाभाव्यः, समानपदोपादानत्वात् भवेद्विधौ सति तदतिक्रमेणाऽसमानपदोपादानोऽप्यार्थवादिको ऽप्यपुनरावृत्तिरूपः पुरुषार्थो लभ्यतइति विधिः प्रार्थ्यतइत्यत आह—न च पुरुषार्थत्वाय विधिः प्रार्थ्यतइति । कुतः ? ज्ञानस्य ज्ञेयाऽभिव्यक्तिफलत्वात् । तस्य च तन्नान्तरीयकतया विधिमन्तरेणापि प्राप्तत्वात् । नन्वपुनरावृत्तिः फलं, श्रूयते हि वचनं 'न स पुनरावर्त्तते' इति, न चा ऽसौ विधिं विना शक्या प्रतिपत्तुमित्यत आह—फलान्तराऽनभ्युपगमात् । अपुनरावृत्तिरिति हि मोक्ष उच्यते । न चाऽसौ साध्य इति वक्ष्यते । अपि च प्रतिपत्तिविधिपरत्वे वेदान्तानां ब्रह्मस्वरूपसत्तायामप्रामाण्यप्रसङ्गः । न ह्यसौ विधिना ऽपि तद्विषयो नित्यत्वात्, येन विधिरपेक्ष्येत । प्रतिपत्तिविषयो हि विधिः प्रतिपत्तिविषयमात्मतत्त्वमपेक्षते । तथा च तथात्मशब्दः प्रमाणमिति चेत् । न । आत्मतत्त्वमन्तरेण समारोपेणापि प्रतिपत्तेरुपपत्तेः । एवं

95

Digitized by Google

त्वात्तत्प्रतिपत्त्यर्थमनुष्ठानं गम्येत नात्मतत्त्वाऽवबोधः स्यात् । अतः श्रूयमाणो विधिरेवंजातीयेष्वविवक्षितः । नित्यप्राप्तेः ।

ननु विधिरहितस्याऽनुवादरूपस्य साकाङ्क्षस्य प्रामाण्यमलभ्यम् । अथ केयमनुवादता ? प्रमाणान्तराऽधिगतार्थता, आहो स्विद्भूतार्थता ? प्रमाणान्तराऽधिगतार्थता चेद्विधिशून्यमप्यतादृशमप्यपौरुषेयं नाऽनुवादः । भूता-

च तत्परत्वाऽभावाद्वेदान्तानां ब्रह्मविद्यात्वं प्रतिपत्तुं बाध्येतेत्येतदाह—क्रियापरत्वाद्वा विधेर्वस्तुरूपसत्ताया अविवक्षितत्वात् तत्प्रतिपत्त्यर्थमनुष्ठानं गम्येत नात्मतत्त्वाऽवबोधः स्यात् । नन्वात्मा ज्ञातव्य इति श्रुतिरस्ति, न चासौ प्रमादः । तुल्यं हि साम्प्रदायिकम्, तदेकवाक्यता च वेदान्तानाम्,अतो नियोगाननुगतया नाऽवधानमर्हतीत्येतदुपसंहारव्याजेन निराकरोति—अतः श्रूयमाणो विधिरेवंजातीयकेषु विधानाऽनर्हेष्वविवक्षितः, नित्यप्राप्तत्वात् । सिद्धा हि वेदान्तेभ्यो विधिं विनापि ब्रह्मस्वरूपप्रतिपत्तिः । न ह्यस्ति सम्भवो विदितरूपसङ्गतिः शाब्दन्यायविद्वेदान्तेभ्यो ऽर्थं न प्रतिपद्यत इति प्राप्तत्वा,देवंजातीयकेषु श्रूयमाणो विधिरविवक्षितः । न च प्रमादो, ऽनुवादता ऽप्युपपत्तेः । ननु मा भूत्प्रतिपत्तिविधिः फलं, प्रामाण्यायैव तु विधिराश्रयिष्यते, अन्यथा तदयोगादिति चोदयति—ननु विधिरहितस्याऽनुवादस्वरूपस्य तत एव साकाङ्क्षस्य प्रामाण्यमलभ्य,मनपेक्षलक्षणत्वात्तस्या,ऽन्यथा स्मृतेरपि अप्रामाण्यप्रसङ्गात् । तदेतद्विकल्पयति—अथ केयमनुवादता ? प्रमाणान्तराऽधिगतार्थता ऽऽहो स्विद्भूतार्थता ? दूषयति—प्रमाणान्तराऽधिगताऽर्थता चेत् । विधिशून्यमपि तर्हि भूतार्थमतादृशं प्रमाणान्तरविषयीकृतार्थमपौरुषेयं नाऽनुवादः । ज्ञानपूर्वको हि पश्चाद्वादो ऽनुवादः । अपौ-

क्यत्वं हि सामानाधिकरण्यकार्य्यम् । यथा देवदत्तः श्यामो युवा लोहिताक्षोऽदीनोऽकृपणोऽनवद्य इति । यत्र त्वेकस्मिन् वस्तुनि समन्वयायोग्यं विशेषणद्वयं समानाधिकरणपदनिर्दिष्टम्, तत्राप्यन्यतरत्पदममुख्यवृत्तमाश्रीयते, न द्वयम्, यथा गोर्वाहीक इति । नीलोत्पलादिषु तु विशेषणद्वयान्वयाविरोधादेकमेवोभयविशिष्टं प्रतिपाद्यते ॥

अथ मनुषे, एकविशेषणप्रतिसम्बन्धित्वेन निरूप्यमाणं वस्तु विशेषणान्तरप्रतिसम्बन्धित्वात् विलक्षणमिति घटपटयोरिवैकविभक्तिनिर्देशेऽप्यैक्यप्रतिपादनासम्भवात् समानाधिकरणशब्दस्य न विशिष्टप्रतिपादनपरत्वम्, अपि तु विशेषणमुखेन स्वरूपमुपस्थाप्य तदैक्यप्रतिपादनपरत्वमेवेति। स्यादेतदेवम्, यदि विशेषणद्वयप्रतिसम्बन्धित्वमात्रमेवैक्यं निरुन्ध्यात् । न चैतदस्ति, एकस्मिन्धर्मिण्युपसंहर्तुमयोग्यधर्मद्वयविशिष्टत्वमेव ह्येकत्वं निरुणद्धि । अयोग्यता च प्रमाणान्तरसिद्धा घटत्वपटत्वयोः, नीलमुत्पलमित्यादिषु तु दण्डित्वकुण्डलित्ववत् रूपवत्त्वरसवत्त्वगन्धवत्त्वादिवच्च विरोधो नोपलभ्यते । न केवलमविरोध एव, प्रवृत्तिनिमित्तभेदेनैकार्थबोधकत्वरूपं सामानाधिकरण्यमुपपादयत्येव धर्मद्वयविशिष्टता । अन्यथा स्वरूपमात्रैक्ये अनेकपदप्रवृत्तौ निमित्ताभावात् सामानाधिकरण्यमेव न स्यात् । विशेषणानां स्वसम्बन्धानादरेण वस्तुस्वरूपोपलक्षणपरत्वे सति एकेनैव वस्तूपलक्षितमित्युपलक्षणान्तरमनर्थकमेव, उपलक्षणान्तरोपलक्ष्याकारभेदाभ्युपगमे तेनाकारेण सविशेषत्वप्रसङ्गः । सोऽयं देवदत्त इत्यत्रापि न लक्षणागन्धो विद्यते, विरोधाभावात्, देशान्तरसम्बन्धितयाऽतीतस्य सन्निहितदेशसम्बन्धितया वर्तमानत्वाविरोधात् । अत एव हि सोऽयमिति प्रत्यभिज्ञया कालद्वयसम्बन्धिनो वस्तुन ऐक्यमुपपाद्यते वस्तुनः स्थिरत्ववादिभिः । अन्यथा प्रतीतिविरोधे सति सर्वेषां क्षणिकत्वमेव स्यात् । देशद्वयसम्बन्धविरोधस्तु कालभेदेन परिह्रियते । यतस्समानाधिकरणपदानामनेकविशेषणविशिष्टैकार्थवाचित्वम्, अत एव "अरुणयैकहायन्या पिङ्गाक्ष्या सोमं क्रीणाती"त्यारुण्यादिविशिष्टैकहायन्याः क्रयः साध्यतया विधीयते । ननु

त्तम् "अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यादि"ति । तत्र एवं पूर्व-पक्षी मन्यते, यद्यप्यरुणयेति पदमाकृतेरिव गुणस्यापि द्रव्यप्रकारतैकस्व-भावत्वात् द्रव्यपर्य्यन्तमेवारुणिमानमभिदधाति, तथाप्येकहायन्यन्वयनि-यमोऽरुणिम्नो न सम्भवति, एकहायन्या क्रीणाति तच्चारुणयेत्यर्थ-द्वयविधानासम्भवात् । ततश्चारुणयेति वाक्यं भित्त्वा प्रकरणविहित-सर्वद्रव्यपर्य्यन्तमेवारुणिमानमविशेषेणाभिदधाति । "अरुणये"ति स्त्रीलि-ङ्गनिर्देशः प्रकरणविहितसर्वलिङ्गकद्रव्याणां प्रदर्शनार्थः । तस्मादेकहाय-न्यन्वयनियमोऽरुणिम्नो न स्यादिति । अत्राभिधीयते, "अर्थैकत्वे द्रव्य-गुणयोरैककर्म्यान्नियमः स्यात्," "अरुणयैकहायन्ये"त्यारुण्यविशिष्टद्र-व्यैकहायनीद्रव्यवाचिपदयोः सामानाधिकरण्येनार्थैकत्वे सिद्धे सति एक-हायनीद्रव्यावच्छेदकारुण्यगुणयोररुणयेति पदेनैव विशेषणविशेष्यभावेन सम्बन्धि-तयाऽभिहितयोः क्रयाख्यैककर्मान्वयाविरोधादरुणिम्नः क्रयसाधनभूतै-कहायन्यन्वयनियमः स्यात् । यद्येकहायन्याः क्रयसम्बन्धवत् अरुणिम-सम्बन्धोऽपि वाक्यावसेयः स्यात्, तदा वाक्यार्थद्वयविधानं स्यात् । न चैतदस्ति, अरुणयेति पदेनैवारुणिमविशिष्टद्रव्यमभिहितम्, एकहाय-नीपदसामानाधिकरण्येन तस्यैकहायनीत्वमात्रमवगम्यते न गुणसम्बन्धः । विशिष्टद्रव्यैक्यमेव हि सामानाधिकरण्यस्यार्थः, भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकार्थे वृत्तिः सामानाधिकरण्यमिति हि तल्लक्षणम् । अत एव हि रक्तः पटो भवतीत्यादिष्वैकार्थ्यादेकवाक्यत्वम् । पटस्य भवन-क्रियासम्बन्धे हि वाक्यव्यापारः, रागसम्बन्धस्तु रक्तपदेनैवाभिहितः । रागसम्बन्धि द्रव्यं पट इत्येतावन्मात्रं सामानाधिकरण्येनावसेयम् । एव-मेकेन गुणेन द्वाभ्यां बहुभिर्वा तेन तेन पदेन समस्तेन व्यस्तेन वा विशिष्टमुपस्थाप्य सामानाधिकरण्येन सर्वविशेषणविशिष्टोऽर्थ एक इति ज्ञापयित्वा तस्य क्रियासम्बन्धाभिधानमविरुद्धम्, "देवदत्तः श्यामो युवा लोहिताक्षः दण्डी कुण्डली तिष्ठति," "शुक्लेन वाससा यवनिकां सम्पादयेत्," "नीलमुत्पलमानय" "नीलोत्पलमानय" "गामानय शुक्लां शोभनाङ्गीम्," "अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपे-

Digitized by Google

दि"ति, "एवमरुणयैकहायन्या पिङ्गाक्ष्या सोमं क्रीणाती"ति । एतदुक्तं भवति, यथा "काष्ठैः स्थाल्यामोदनं पचेदि"त्यनेककारकविशिष्टैका क्रिया युगपत्प्रतीयते, तथा समानाधिकरणपदसंघाताभिहितम् एकैकं कारकं तत्तत्कारकप्रतिपत्तिवेलायामेवानेकविशेषणविशिष्टं युगपत्प्रतिपन्नं क्रियायामन्वेतीति न कश्चिद्विरोधः "खादिरैश्शुष्कैः काष्ठैः समपरिमाणे भाण्डे पायसं शाल्योदनं समर्थः पाचकः पचेदि"त्यादिष्विति । यत्तूपात्तद्रव्यकवाक्यस्थगुणशब्दः केवलगुणाभिधायीति "अरुणये"ति पदेन केवलगुणस्यैवाभिधानमिति, तन्नोपपद्यते, लोकवेदयोर्द्रव्यवाचिपदसमानाधिकरणस्य गुणवाचिनः क्वचिदपि केवलगुणाभिधानादर्शनात् । उपात्तद्रव्यकवाक्यस्थं गुणपदं केवलगुणाभिधायीत्यप्यसङ्गतम्, पटः शुक्ल इत्यादिषूपात्तद्रव्यकेऽपि गुणविशिष्टस्यैवाभिधानात् । पटस्य शुक्ल इत्यत्र शौक्ल्यविशिष्टपटाप्रतिपत्तिरसमानविभक्तिनिर्देशकृता, न पुनरुपात्तद्रव्यकत्वकृता । तत्रैव पटस्य शुक्लो भाग इत्यादिषु समानविभक्तिनिर्देशे शौक्ल्यविशिष्टद्रव्यं प्रतीयते । यत्पुनः क्रयस्यैकहायन्यवरुद्धतयाऽऽरुण्यस्य क्रयान्वयो न सम्भवतीति, तदपि विरोधिगुणरहितद्रव्यवाचिपदसमानाधिकरणगुणपदस्य तदाश्रयगुणाभिधानेन क्रियापदान्वयाविरोधादसङ्गतम् । राद्धान्ते चोक्तन्यायेनारुण्यस्य शाब्दद्रव्यान्वये सिद्धे द्रव्यगुणयोः क्रयसाधनत्वानुपपत्त्याऽर्थात् परस्परान्वयः सिध्यतीत्यप्यसङ्गतम् । अतो यथोक्त एवार्थः । तस्मात् "तत्त्वमस्या"दिसामानाधिकरण्ये पदद्वयाभिहितविशेषणापरित्यागेनैवैक्यप्रतिपादनं वर्णनीयम्, तत्तु अनाद्यविद्योपहितानवधिकदुःखभागिनः शुद्ध्यशुद्ध्युभयावस्थाच्चेतनादर्थान्तरभूतमशेषहेयप्रत्यनीकानवधिककल्याणगुणगणैकतानं परमात्मानमनभ्युपगच्छतो न सम्भवति । अभ्युपगच्छतोऽपि समानाधिकरणपदानां यथाऽवस्थितविशेषणविशिष्टैक्यप्रतिपादनपरत्वाश्रयणे त्वम्पदप्रतिपन्नसकलदोषभागित्वं परस्य प्रसज्येत इति चेत् । नैतदेवम्, त्वम्पदेनापि जीवान्तर्यामिणः परस्यैवाभिधानात् ॥

एतदुक्तं भवति, सच्छब्दाभिहितं निरस्तनिखिलदोषगन्धं सत्य-

सङ्कल्पत्वमिश्रानवधिकातिशयासंख्येयानन्तकल्याणगुणगणं समस्तकारण-भूतं परं ब्रह्म "बहु स्यामि"ति सङ्कल्प्य, तेजोऽबन्नप्रमुखं कृत्स्नं जगत् सृष्ट्वा, तस्मिन्नेवादिविचित्रसंस्थानसंस्थिते जगति चेतनं जीववर्गं स्वकर्मा-नुगुणेषु शरीरेष्वात्मतया प्रवेश्य, स्वयञ्च स्वेच्छयैव जीवान्तरात्मतया ऽनुप्रविश्य, एवं भूतेषु स्वपर्यन्तेषु देवाद्याकारेषु संघातेषु नामरूपे व्याकरोत्, एवंरूपसंघातस्यैव वस्तुत्वं शब्दवाच्यत्वञ्चाकरोदित्यर्थः। "अनेन जीवेनात्मना" जीवेन मयेति निर्देशो जीवस्य ब्रह्मात्मकत्वं दर्शयति, ब्रह्मात्मकत्वञ्च जीवस्य जीवान्तरात्मतया ब्रह्मणोऽनुप्रवेशा-दित्यवगम्यते। "इदं सर्वमसृजत यदिदं किञ्च, तत्सृष्ट्वा तदेवानुप्रावि-शत्, तदनुप्रविश्य सच्च त्यच्चाभवदि"त्यत्र इदं सर्वमिति निर्दिष्टञ्चे-तनाचेतनं वस्तुद्वयं सत्त्यच्छब्दाभ्यां विज्ञानाविज्ञानशब्दाभ्याञ्च विभ-ज्य निर्दिश्य चिद्वस्तुन्यपि ब्रह्मणोऽनुप्रवेशाभिधानात्। अत एवंनाम-रूपव्याकरणात् सर्वे वाचकाः शब्दा अचिज्जीवविशिष्टपरमात्मवाचिन इत्यवगतमिति। किञ्च, "ऐतदात्म्यमिदं सर्वमि"ति चेतनमिश्रं प्रप-ञ्चमिदं सर्वमिति निर्दिश्य "तस्यैव आत्मे"ति प्रतिपादितम्। एवञ्च सर्वं चेतनाचेतनं प्रति ब्रह्मण आत्मत्वेन सर्वं चेतनं जगत् तस्य शरीरं च भवति। तथाच श्रुत्यन्तराणि "अन्तःप्रविष्टश्शास्ता जनानां सर्वा-त्मा" "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति स त आत्माऽन्तर्याम्यमृत" इति प्रारभ्य "य आत्मनि तिष्ठन् आत्मनोऽन्तरो यम् आत्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्या-म्यमृत" इत्यादि, "यः पृथिवीमन्तरे सञ्चरन् यस्य पृथिवी शरीरं योऽपामन्तरे सञ्चरन् यस्यापः शरीरमि"त्यारभ्य "योऽक्षरमन्तरे सञ्चरन् यस्याक्षरं शरीरं यमक्षरं न वेद एष सर्वभूतान्तरात्माऽपहत-पाप्मा दिव्यो देव एको नारायण" इत्यादीनि सचेतनं जगत् तस्य शरीरत्वेन निर्दिश्य तस्यात्मत्वेन परमात्मानमुपदिशन्ति। अतः चेतन-वाचिनोऽपि शब्दाश्चेतनस्याप्यात्मभूतं चेतनशरीरकं परमात्मानमेवाभि-

वर्धति । यथाऽचेतनदेवादिसंस्थानपिण्डवाचिनः शब्दास्तच्छरीरकजीवात्मन एव वाचकाः "चत्वारः पञ्चदश रात्रा देवत्वं गच्छन्ती"त्यादिषु, देवा भवन्तीत्यर्थः । शरीरस्य शरीरिणं प्रति प्रकारत्वात् प्रकारवाचिनां च शब्दानां प्रकारिण्येव पर्यवसानात् शरीराभिधायिनां शब्दानां शरीरिपर्यवसानं न्याय्यम् । प्रकारो हि नाम इदमित्थमिति प्रतीयमाने वस्तुनीत्थमिति प्रतीयमानोऽंशः, तस्य तद्वस्त्वपेक्षत्वेन तत्प्रतीतेस्तदपेक्षत्वात् तस्मिन्नेव पर्य्यवसानं युक्तमिति तस्य प्रतिपादकोऽपि शब्दः तस्मिन्नेव पर्य्यवस्यति । अत एव "गौरश्वो मनुष्य" इत्यादिप्रकारभूताकृतिवाचिनः शब्दाः प्रकारिणि पिण्डे पर्य्यवस्यन्तः पिण्डस्यापि चेतनशरीरत्वेन तत्प्रकारत्वात् पिण्डशरीरकचेतनस्यापि परमात्मप्रकारत्वाच्च परमात्मन्येव पर्य्यवस्यन्तीति सर्वशब्दानां परमात्मैव वाच्य इति परमात्मवाचकशब्देन सामानाधिकरण्यं मुख्यमेव । ननु खण्डो गौः खण्डः शुक्ल इति जातिगुणवाचिनामेव पदानां द्रव्यवाचिपदैः सह सामानाधिकरण्यं दृष्टम्, द्रव्याणान्तु द्रव्यान्तरप्रकारत्वे मत्वर्थीयप्रत्ययो दृष्टः, यथा दण्डी कुण्डलीति । नैवम् । जातिर्वा गुणो वा द्रव्यं वा नैतेष्वेकमेव सामानाधिकरण्ये प्रयोजकम्, अन्योन्यस्मिन् व्यभिचारात् । यस्य पदार्थस्य क[१]स्यचित् प्रकारतयैव सद्भावः तस्य तदपृथक्सिद्धिस्थितिप्रतीतिभिस्तद्वाचकानां शब्दानां स्वाभिधेयविशिष्टद्रव्यवाचित्वात् धर्मान्तरविशिष्टतद्द्रव्यवाचिना शब्देन सामानाधिकरण्यं युक्तमेव । यत्र पुनः पृथक्सिद्धस्य स्वनिष्ठस्यैव द्रव्यस्य कदाचित् क्वचिद् द्रव्यान्तरप्रकारत्वमिष्यते तत्र मत्वर्थीयप्रत्यय इति निरवद्यम् । तदेवं परमात्मनः शरीरतया तत्प्रकारत्वादचिद्विशिष्टस्य जीवस्यापि जीवनिर्द्दिष्टविशेषरूपा अहंत्वमित्यादिशब्दाः परमात्मानमेवाचक्षत इति "तत्त्वमसी"ति सामानाधिकरण्येनोपसंहृतम् । एवञ्च सति परमात्मानं प्रति जीवस्य शरीरतया अन्वयात् [२]जीवगता धर्माः परमात्मानं न स्पृशन्ति, यथा शरीर-

१ किंचित्प्रकारतयेति पाठान्तरम् ।

२ हेया इति पुस्तकान्तरेऽधिकः पाठः ।

Digitized by Google

गता बालत्वयुवत्वादयो धर्मा जीवं न स्पृशन्ति । अतः "तत्त्वमसी"ति सामानाधिकरण्ये तत्पदं जगत्कारणभूतं सत्यसङ्कल्पं सर्वकल्याणगुणाकरं निरस्तसमस्तहेयगन्धं परमात्मानमाचष्टे, त्वमिति च तमेव सश[1]रीरजीवशरीरकमाचष्टे, इति सामानाधिकरण्यं मुख्यवृत्तम्, प्रकरणाविरोधः सर्वश्रुत्यविरोधो ब्रह्मणि निरवद्ये कल्याणैकताने ऽविद्यादिदोषगन्धाभावश्च । अतो जीवसामानाधिकरण्यमपि विशेषणभूतात् जीवादन्यत्वमेवापादयतीति विज्ञानमयात् जीवादन्य एवानन्दमयः परमात्मा ॥

यदुक्तम्, "तस्यैष एव शारीर आत्मे"त्यानन्दमयस्य शारीरत्वश्रवणात् जीवादन्यत्वं न सम्भवतीति, तदयुक्तम्, अस्मिन्प्रकरणे सर्वत्र "तस्यैष एव शारीर आत्मा यः पूर्वस्ये"ति परमात्मन एव शारीरात्मत्वाभिधानात् । कथम् । "तस्माद्वा एतस्मादात्मन आकाशः सम्भूत" इत्याकाशादिसृज्यवर्गस्य परमकारणत्वेन प्रति[2]ज्ञा तज्जीवव्यतिरे[3]कस्य परस्य ब्रह्मण आत्मत्वेन व्यपदेशात् तद्व्यतिरिक्ताकाशादीनामन्नमयपर्य्यन्तानां तच्छरीरत्वमवगम्यते । "यस्य पृथिवी शरीरं यस्यापः शरीरं यस्य तेजश्शरीरं यस्य वायुः शरीरं यस्याकाशः शरीरं यस्याक्षरं शरीरं यस्य मृत्युः शरीरम् एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायण" इति सुबालश्रुत्या सर्वतत्त्वानां परमात्मशरीरत्वं स्पष्टमभिधीयते । अतः "तस्माद्वा एतस्मादात्मन" इत्यत्रैवान्नमयस्य परमात्मैव शारीर आत्मेत्यवगतः । प्राणमयं प्रस्तुत्याह "तस्यैष एव शारीर आत्मा यः पूर्वस्ये"ति । पूर्वस्यान्नमयस्य यः शारीर आत्मा श्रुत्यन्तरसिद्धः परमकारणभूतः परमात्मा स एव तस्य प्राणमयस्यापि शारीर आत्मेत्यर्थः । एवं मनोमयविज्ञानमययोर्द्रष्टव्यम् । आनन्दमये तु "एष एवे"ति निर्देशः तस्यानन्यात्म[4]कत्वं दर्शयितुम् । तत् कथम् । विज्ञानमयस्यापि पूर्वोक्तया रीत्या परमात्मैव शारीर

---

१ सशरीरकमिति पाठान्तरम् ।

२ प्रज्ञातजीवव्यतिरिक्तस्येति पाठान्तरम् ।

३ जीवव्यतिरेकस्य परस्येति तु पाठान्तरम् ।

४ अनन्यात्मत्वमिति पाठान्तरम् ।

आत्मेत्यवगतः । एवं सति विज्ञानमयस्य यः शारीर आत्मा स एवानन्दमयस्यापि शारीर आत्मेत्युक्ते आनन्दमयस्याभ्यासावगतपरमात्मभावस्य परमात्मनः स्वयमेवात्मेत्यवगम्यते । एवञ्च स्वव्यतिरिक्तचेतनाचेतनवस्तुजातं स्वशरीरमिति स एव निरुपाधिकः शारीर आत्मा । अत एवेदं परं ब्रह्माधिकृत्य प्रवृत्तं शास्त्रं शारीरकमित्यभियुक्तैरभिधीयते । अतो विज्ञानमयात् जीवादन्य एव परमात्माऽऽनन्दमयः ॥

आह, नायमानन्दमयो जीवादन्यः, विकारशब्दस्य मयट्प्रत्ययस्य श्रवणात् । "मयड् वै तयोरि"ति प्रकृत्य "नित्यं वृद्धशरादिभ्य" इति विकारार्थे मयट् स्मर्य्यते, वृद्धश्चाप्यमानन्दशब्दः । ननु प्राचुर्य्येपि मयडस्ति, "तत्प्रकृतवचने मयडि"ति स्मृतेः । यथाऽन्नमयो यज्ञ इति, स एवायं भविष्यति । नैवम्, "अन्नमय" इत्युपक्रमे विकारार्थत्वं दृष्टम्, अत औचित्यादस्यापि विकारार्थत्वमेव युक्तम् । किञ्च, प्राचुर्य्यार्थत्वेऽपि जीवादन्यत्वं न सिध्यति । तथा हि, आनन्दप्रचुर इत्युक्ते दुःखमिश्रत्वमवर्ज्जनीयम्, आनन्दस्य हि प्राचुर्य्यं दुःखस्याल्पत्वमवगमयति, दुःखमिश्रत्वमेव हि जीवत्वम् । अत औचित्यप्राप्तविकारार्थत्वमेव युक्तम् । किञ्च, लोके "मृण्मयं हिरण्मयं दारुमयमि"त्यादिषु वेदे च "पर्णमयी जुहूः" "शमीमय्यः स्रुचः" "दर्भमयी रशने"त्यादिषु मयटो विकारार्थे प्रयोगबाहुल्यात् स एव प्रथमतरं धियमारोहति । जीवस्य चानन्दविकारत्वमस्त्येव, तस्य स्वत आनन्दरूपस्य सतः संसारित्वावस्था तद्विकार एवेति । अतो विकारवाचिनो मयट्प्रत्ययस्य श्रवणादानन्दमयो जीवादनतिरिक्त इति, तदेतदनुभाष्य परिहरति,

विकारशब्दात् नेति चेत्, न, प्राचुर्य्यात् ॥ १४ ॥

नैतद्युक्तम् । कुतः । "प्राचुर्य्यात्" परस्मिन् ब्रह्मण्यानन्दप्राचुर्य्यात्, प्राचुर्य्यार्थे च मयटः सम्भवात् । एतदुक्तम्भवति, शतगुणितोत्तरक्रमेणाभ्यस्यमानस्यानन्दस्य जीवाश्रयत्वासम्भवात् ब्रह्ममयोऽयमानन्द इति निश्चिते सति तस्मिन् ब्रह्मणि विकारासम्भवात् प्राचुर्य्येऽपि

मय[1]डुःखसद्भावाच्चानन्दमयः परं ब्रह्मेत्यौचित्यात् प्रयोगप्रौढ्या च मयटो विकारार्थत्वमर्थविरोधात् न सम्भवति। किञ्च, औचित्यं प्राणमये एव परित्यक्तम्, तत्र विकारार्थत्वासम्भवात्। अतस्तत्र पञ्चवृत्तेर्वायोः प्राणवृत्तिमत्तामात्रेण प्राणमयत्वं प्राणापानादिषु पञ्चसु वृत्तिषु प्राणवृत्तेः प्रचुरत्वाद्वा। न च प्राचुर्ये मयट्प्रत्ययस्य प्रौढिर्नास्ति, "अन्नमयो यज्ञः" "शकटमयी यात्रे"त्यादिदर्शनात्। यदुक्तम्, आनन्दप्राचुर्यमल्पदुःखसद्भावमवगमयतीति, तदसत्, तत्प्रचुरत्वं हि तत्प्रभूतत्वमेव, तच्चेतरस्य सत्तां नावगमयति, अपि तु तस्याल्पत्वं निवर्त्तयति। इतरसद्भावासद्भावौ तु प्रमाणान्तरावसेयौ। इह च प्रमाणान्तरेण तदभावोऽवगम्यते "अपहतपाप्मे"त्यादिना। तत्रैतावदेव वक्तव्यम्, ब्रह्मानन्दस्य प्रभूतत्वमन्यानन्दस्य स्वल्पत्वमपेक्षत इति, उच्यते च तत् "स एको मानुष आनन्द" इत्यादिना, जीवानन्दापेक्षया ब्रह्मानन्दो निरतिशयदशापन्नः प्रभूत इति। यच्चोक्तम्, जीवस्यानन्दविकारत्वं सम्भवतीति, तदपि नोपपद्यते, जीवस्य ज्ञानानन्दैकस्वरूपस्य केनचिदाकारेण मृद इव घटाद्याकारेण परिणामः सकलश्रुतिस्मृतिन्यायविरुद्धः। संसारदशायान्तु कर्मणा ज्ञानानन्दौ सङ्कुचिताविन्युपपादयिष्यते। अतश्चानन्दमयो जीवादन्यः परं ब्रह्म॥

इतश्च जीवादन्य आनन्दमयः,

तद्धेतुव्यपदेशाच्च॥ १५॥

"को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्, एष ह्येवानन्दयाती"ति। एष एव जीवानानन्दयतीति जीवानामानन्दहेतुरयं व्यपदिश्यते। अतश्चानन्दयितव्यात् जीवादानन्दयिताऽयमन्य आनन्दमयः परमात्मेति विज्ञायते। आनन्दमय एवात्रानन्दशब्देनोच्यते इति चानन्तरमेव वक्ष्यते॥

इतश्च जीवादन्य आनन्दमयः,

मान्त्रवर्णिकमेव च गीयते॥ १६॥

१ मयट्स्थितिसंभवाच्चेति पाठान्तरम्।

Digitized by Google

"सत्यं ज्ञानमनन्तम् ब्रह्मे"ति मन्त्रवर्णोदितं ब्रह्मैवानन्दमय इति गीयते, तत्तु जीवस्वरूपादन्यत् परं ब्रह्म। तथा हि, "ब्रह्मविदाप्नोति परमि"ति जीवस्य प्राप्यतया ब्रह्म निर्दिष्टम् । "तदेषाऽभ्युक्ते"ति तद् ब्रह्माभिमुखीकृत्य प्रतिपाद्यतया परिगृह्य ऋगेषाऽभ्येतृभिरुक्ता, ब्राह्मणोक्तस्यार्थस्य वैशद्यमनेन मन्त्रवर्णेन क्रियत इत्यर्थः । जीवस्योपासकस्य प्राप्यं ब्रह्म तस्माद्विलक्षणमेव । अनन्तरञ्च "तस्माद्वा एतस्मादात्मन आकाशस्सम्भूत" इत्यारभ्योत्तरोत्तरैर्ब्राह्मणैर्मन्त्रैश्च तदेव विशदीक्रियते । अतो जीवादन्य आनन्दमयः ॥

अत्राह, यद्यप्युपासकात् प्राप्यस्य भेदेन भवितव्यम्, तथाऽपि न वस्त्वन्तरं जीवात् मान्त्रवर्णिकं ब्रह्म, किन्तु तस्यैवोपासकस्य निरस्तसमस्ताविद्यागन्धं निर्विशेषचिन्मात्रैकरसं शुद्धं स्वरूपम् । तदेव "सत्यं ज्ञानमनन्तं ब्रह्मे"ति मन्त्रेण विशोध्यते, तदेव च "यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे"ति वाङ्मनसागोचरतया निर्विशेषमिति गम्यते। अतस्तदेव मांत्रवर्णिकमिति । तस्मादनतिरिक्त आनन्दमय इति । अत उत्तरं पठति,

नेतरोऽनुपपत्तेः ॥ १७ ॥

परमात्मन "इतरो" जीवशब्दाभिलप्यो मुक्तावस्थोऽपि न भवति मान्त्रवर्णिकः । कुतः । "अनुपपत्तेः," तथाविधस्यात्मनो निरुपाधिकं विपश्चित्त्वं नोपपद्यते। इदमेव हि निरुपाधिकं विपश्चित्त्वम् "सोऽकामयत बहु स्याम्प्रजायेयेति" सत्यसङ्कल्पत्वप्रदर्शनेन विवरिष्यते। विविधं पश्यत् चित्त्वं हि विपश्चित्त्वम् । पृषोदरादित्वात् पश्यच्छब्दावयवस्य यच्छब्दस्य लोपं कृत्वा व्युत्पादितो विपश्चिच्छब्दः । यद्यपि मुक्तस्य विपश्चित्त्वं सम्भवति, तथाऽपि तस्यैवात्मनः संसा[1]रदशायामविपश्चित्त्वमप्यस्तीति निरुपाधिकं विपश्चित्त्वं नोपपद्यते । निर्विशेषचिन्मात्रतापन्नस्य मुक्तस्य विविधदर्शनाभावात् सुतरां विपश्चित्त्वं न सम्भवतीति न केनापि प्रमाणेन निर्विशेषं वस्तु प्रतिपाद्यत इति च पूर्वमेवो-

१ संसारित्वदशायामिति पाठान्तरम् ।

क्तम् । "यतो वाचो निवर्त्तन्ते" इति च वाक्यं यदि च वाङ्मनसयोर्ब्रह्मणो निवृत्तिमभिदधीत, न ततो निर्विशेषतां वस्तुनोऽवगमयितुं शक्नुयात्, अपितु वाङ्मनसयोस्तत्राप्रमाणतां वदेत्, तथा च सति तस्य तुच्छत्वमेवापद्यते । "ब्रह्मविदाप्नोती"त्यारभ्य ब्रह्मणो विपश्चित्त्वं जगत्कारणत्वमानन्दैकतानत्वमितरान् प्रत्यानन्दयितृत्वं कामादेव चिदचिदात्मकस्य कृत्स्नस्य स्रष्टृत्वं सृज्यवर्गानुप्रवेशकृततदात्मत्वं भयाभयहेतुत्वं वाय्वादित्यादीनां प्रशासितृत्वं शतगुणितोत्तरक्रमेण निरतिशयानन्दत्वमन्यच्चानेकं प्रतिपाद्य वाङ्मनसयोर्ब्रह्मणि प्रवृत्त्यभावेन निष्प्रमाणकं ब्रह्मेत्युच्यत इति भ्रान्तजल्पितम् । "यतो वाचो निवर्त्तन्त" इति यच्छब्दनिर्दिष्टम् "आनन्दं ब्रह्मणो विद्वानि"त्यानन्दशब्देन प्रतिनिर्दिश्य तस्य ब्रह्मसम्बन्धित्वं ब्रह्मण इति व्यतिरेकनिर्देशेन प्रतिपाद्य तदेव वाङ्मनसागोचरं विद्वानिति तद्वेदनमभिदधद्वाक्यं जरद्गवादिवाक्यवत् अनर्थकं वाच्यानन्तर्गतञ्च स्यात् । अतः शतगुणितोत्तरक्रमेण ब्रह्मानन्दस्यातिशयेयत्तां वक्तुम् उपक्रम्य तस्येयत्ताया अभावादेव वाङ्मनसयोस्ततो निवृत्ति"र्यतो वाचो निवर्त्तन्त" इत्युच्यते । एवमियत्तारहितं ब्रह्मण आनन्दं विद्वान् कुतश्चन न बिभेतीत्युच्यते । किंचास्य मान्त्रवर्णिकस्य विपश्चितः "सोऽकामयते"त्यारभ्य वक्ष्यमाणस्वसङ्कल्पावक्लृप्तजगज्जन्मस्थितिजगदन्तरात्मत्वादेः मुक्तात्मस्वरूपादन्यत्वं सुस्पष्टमेव ॥

इतश्चोभयावस्थात्प्रत्यगात्मनोऽन्य आनन्दमयः,

भेदव्यपदेशाच्च ॥ १८ ॥

"तस्माद्वा एतस्मादात्मन आकाश" इत्यारभ्य मान्त्रवर्णिकं ब्रह्म व्यञ्जयत् वाक्यम् अन्नप्राणमनोभ्य इव जीवादपि तस्य भेदं व्यपदिशति "तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्माऽऽनन्दमय" इति । अतो जीवाद्भेदव्यपदेशाच्चायं मान्त्रवर्णिक आनन्दमयोऽन्य एवेति विज्ञायते ॥

इतश्च जीवादन्यः,

कामाच्च नानुमानापेक्षा ॥ १९ ॥

जीवस्याविद्यापरवशस्य जगत्कारणत्वे वर्जनीयाऽऽनुमानिकप्रधानादिशब्दाभिधेयाचिद्वस्तुसंसर्गापेक्षा, तथैव हि चतुर्मुखादीनां कारणत्वम् । इह च "सोऽकामयत बहु स्यां प्रजायेये"ति अचित्संसर्गरहितस्य स्वकामादेव विचित्रचिदचिद्वस्तुनः सृष्टिः "इदं सर्वमसृजत यदिदं किंचे"त्याम्नायते । अतो ऽस्यानन्दमयस्य जगत्स्रजतो नानुमानिकाचिद्वस्तुसंसर्गापेक्षा प्रतीयते । अतश्च जीवादन्य आनन्दमयः ॥

इतश्च जीवादन्यः,

अस्मिन्नस्य च तद्योगं शास्ति ॥ २० ॥

"अस्मिन्" आनन्दमये, "अस्य च" जीवस्य, "तद्योगं शास्ति" आनन्दयोगं शास्ति शास्त्रम् । "रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनन्दी भवती"ति रसशब्दाभिधेयानन्दमयलाभादयं जीवशब्दाभिलपनीयः आनन्दी भवतीत्युच्यमाने यल्लाभात् य आनन्दी भवति स स एवेत्यनुन्मत्तः को ब्रवीतीत्यर्थः । एवमानन्दमयः परं ब्रह्मेति निश्चिते सति "यदेष आकाश आनन्दो न स्यात् विज्ञानमानन्दं ब्रह्मे"त्यादिष्वानन्दशब्देनानन्दमय एव परामृश्यते, यथा विज्ञानशब्देन विज्ञानमयः, अत एव "आनन्दं ब्रह्मणो विद्वानि"ति व्यतिरेकनिर्देशः । अत एव "एतमानन्दमयमात्मानमुपसंक्रामती"ति फलनिर्देशश्च । उत्तरे चानुवाके पूर्वानुवाकोक्तानामन्नमयादीनाम् "अन्नं ब्रह्मेति व्यजानात् प्राणो ब्रह्मेति व्यजानात् मनो ब्रह्मेति व्यजानात् विज्ञानं ब्रह्मेति व्यजानादि"ति प्रतिपादनात् "आनन्दो ब्रह्मे"त्यप्यानन्दमयस्यैव प्रतिपादनमिति विज्ञायते, तत एव तत्राप्यानन्दमयमात्मानमुपसंक्रम्येत्युपसंहृतम् । अतः प्रधानशब्दाभिलप्यादर्थान्तरभूतस्य परस्य ब्रह्मणो जीवशब्दाभिलपनीयादपि वस्तुनोऽर्थान्तरत्वं सिद्धम् ॥

यद्यपि मन्दपुण्यानां जीवानां कामात् जगत्सृष्टिः अतिशयितानन्दयोगो भयाभयहेतुत्वमित्यादि न सम्भवति, तथाऽपि विलक्षणपुण्यानामादित्येन्द्रप्रजापतिप्रभृतीनां सम्भवत्येवेतीमामाशङ्कां निराकरोति,

अन्तरादित्याधिकरणम् । अन्तरधिकरणमिति वा ।

अन्तः, तद्धर्मोपदेशात् ॥ २१ ॥

इदमाम्नायते छान्दोग्ये "य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात् सर्व एव सुवर्णः, तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी, तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदितः, उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद, तस्य ऋक् च साम च गेष्णौ" इत्यधिदैवतम्, अथाध्यात्ममपि "अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते, सैवर्क् तत्साम च तदुक्थं तद्यजुः तद्ब्रह्म तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामे"ति । तत्र सन्दिह्यते, किमयमक्ष्यादित्यमण्डलान्तरवर्ती पुरुषः पुण्योपचयनिमित्तैश्वर्ये आदित्यादिशब्दाभिलप्यो जीव एव एषः, आहोस्वित् तदतिरिक्तः परमात्मेति । किं युक्तम् । उपचितपुण्यो जीव एवेति । कुतः । सशरीरत्वश्रवणात् । शरीरसम्बन्धो हि जीवानामेव सम्भवति, कर्मानुगुणप्रियाप्रिययोगाय हि शरीरसम्बन्धः । अत एव हि कर्मसम्बन्धरहितस्य मोक्षस्य प्राप्यत्वम् अशरीरत्वेन नोच्यते "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तन्न प्रियाप्रिये स्पृशत" इति । सम्भवति च पुण्यातिशयात् ज्ञानाधिक्यं शक्त्याधिक्यञ्च, अत एव लोककामेशत्वादि तस्यैवोपपद्यते, तत एव चोपास्यत्वं फलदायित्वं च, पापक्षपणकरत्वेन मोक्षोपयोगित्वञ्च । मनुष्येष्वप्युपचितपुण्याः केचित् ज्ञानशक्त्यादिभिरधिकतरा दृश्यन्ते, ततश्च सिद्धगन्धर्वादयः, ततश्च देवाः, ततश्चेन्द्रादयः । अतो ब्रह्मादिष्वन्यतम एव एकेकस्मिन्कल्पे पुण्यविशेषेणैवं प्रभूतमैश्वर्यं प्राप्तो जगत्सृष्ट्यावपि करोतीति जगत्कारणत्वजगदन्तरात्मत्वादिवाक्यमस्मिन्नेवोपचितपुण्यविशेषे सर्वज्ञे सर्वशक्तौ वर्तते । अतो न जीवातिरिक्तः परमात्मा नाम कश्चिदस्ति । एवं च सति "अस्थूलमनण्वह्रस्वमि"त्यादयो जीवात्मन एव स्वरूपाभिप्राया भवन्ति । मोक्षशास्त्राण्यपि तत्स्वरूपतत्प्राप्त्युपायोपदेशपराणीति ॥

एवं प्राप्तेऽभिधीयते, "अन्तः, तद्धर्मोपदेशात्" "अन्तः" आदि-

Digitized by Google

स्ये "अन्तः" अक्षिणि च यः पुरुषः प्रतीयते स जीवादन्यः परमात्मैव । कुतः । "तद्धर्मोपदेशात्" जीवेष्वसम्भवन् तदतिरिक्तस्यैव परमात्मनो धर्मोऽयमपहतपाप्मत्वादिः "स एष सर्वेभ्यः पाप्मभ्य उदित" इत्यादिनोपदिश्यते । अपहतपाप्मत्वं हि अपहतकर्मत्वम्, कर्मवश्यतागन्धरहितत्वमित्यर्थः । कर्माधीनसुखदुःखभागित्वेन कर्मवश्या हि जीवाः । अतोऽपहतपाप्मत्वं जीवादन्यस्य परमात्मन एव धर्मः । तत्पूर्वकं स्व[1]रूपोपाधिकं लोककामेशत्वं सत्यसङ्कल्पत्वादिकं सर्वभूतान्तरात्मत्वञ्च तस्यैव धर्मः, यथाह "एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको ऽविजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प" इति । तथा "एष सर्वभूतान्तरात्मा ऽपहतपाप्मा दिव्यो देव एको नारायण" इति । "सोऽकामयत बहु स्यां प्रजायेये"त्यादि सत्यसङ्कल्पत्वपूर्वकसमस्तचिदचिद्वस्तुसृष्टियोगो निरुपाधिकभयाभयहेतुत्वं वाङ्मनसपरिमितिकृतपरिच्छेदरहितानवधिकातिशयानन्दयोग इत्यादयोऽकर्मसम्पाद्याः स्वाभाविका धर्मा जीवस्य न सम्भवन्ति । यत्तु शरीरसम्बन्धाच्च जीवातिरिक्त इत्युक्तम्, तद[2]युक्तम्, न हि सशरीरत्वं कर्मवश्यतां साधयति, सत्य[3]सङ्कल्पस्येच्छयाऽपि शरीरसम्बन्धसम्भवात् । अथोच्येत, शरीरं नाम त्रिगुणात्मकप्रकृतिपरिणामरूपभूतसंघातः, तत्सम्बन्धश्चापहतपाप्मनः सत्यसङ्कल्पस्य पुरुषस्येच्छया न सम्भवति, अपुरुषार्थत्वात् । कर्मवश्यस्य तु स्वस्वरूपानभिज्ञस्य कर्मानुगुणफलोपभोगायानिच्छतोऽपि तत्सम्बन्धोऽवर्ज्जनीय इति । स्यादेतदेवम्, यदि त्रिगु[4]णमयः प्राकृतोऽस्य देहः स्यात्, स तु स्वाभिमतः स्वानुरूपोऽप्राकृत एवेति सर्वमुपपन्नम् । एतदुक्तम्भवति, परस्यैव ब्रह्मणो निखिलहेयप्रत्यनीकानन्तज्ञानानन्दैकस्वरूपतया सकलेतरविलक्षणस्य स्वाभाविकानवधिकातिशयासङ्ख्येयकल्याणगुणगणा[5]श्च

१ स्वरूपोपाधिकमिति पुस्तकान्तरे नास्ति ।
२ तदशोभनमिति पुस्तकान्तरे ।
३ सत्यसङ्कल्पेच्छयेति पाठान्तरम् ।
४ गुणत्रयमय इति पाठान्तरम् ।
५ गणशब्दः पुस्तकान्तरे नास्ति ।

सन्ति, तद्वदेव स्वाभिमतानुरूपैकरूपाचिन्त्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्ज्वल्यसौन्दर्यसौगन्ध्यसौकुमार्य्यलावण्ययौवनाद्यनन्तगुणगण[1]निधिदिव्यरूपमपि स्वाभाविकमस्ति, तदेवोपासकानुग्रहेण तत्तत्प्रतिपत्त्यनुरूपसंस्थानं करोति अपारकारुण्यसौशील्यवात्सल्यौदार्य्यैश्वर्य्यजलधिर्निरस्तनिखिलहेयगन्धोऽपहतपाप्मा परमात्मा परब्रह्म पुरुषोत्तमो नारायण इति । "यतो वा इमानि भूतानि जायन्ते" "सदेव सोम्येदमग्र आसीत्" "आत्मा वा इदमेक एवाग्र आसीत्" "एको ह वै नारायण आसीत् न ब्रह्मा नेशान" इत्यादिषु निखिलजगदेककारणतयाऽवगतस्य परस्य ब्रह्मणः "सत्यं ज्ञानमनन्तं ब्रह्म" "विज्ञानमानन्दं ब्रह्मे"त्यादिषु एवम्भूतं स्वरूपमित्यवगम्यते । "निर्गुणं निरञ्जनम् अपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः" "न तस्य कार्य्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते, पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" "तमीश्वराणां परमं महेश्वरम्, तं दैवतानां परमञ्च दैवतम्," "स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः," "सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन् यदास्ते" वेदाहमेतं पुरुषं महान्तम् आदित्यवर्णन्तमसः परस्तात्" "सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधी"त्यादिषु परस्य ब्रह्मणः प्राकृतहेयगुणान् प्राकृतहेयदेहसम्बन्धं तन्मूलकर्मवश्यतासंबन्धं च प्रतिषिध्य कल्याणगुणान् कल्याणरूपञ्च वदन्ति[2] । तदिदं स्वाभाविकमेव रूपमुपासकानुग्रहेण तत्प्रतिपत्त्यनुगुणाकारं देवमनुष्यादिसंस्थानं करोति स्वेच्छयैव परमकारुणिको भगवान्, तदिदमाह श्रुतिः "अजायमानो बहुधा विजायत" इति । स्मृतिश्च

"अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया" ॥ इति ।
"परित्राणाय साधूनां विनाशाय च दुष्कृताम्" । इति ।

---

१ गणशब्दः पुस्तकान्तरे नास्ति ।
२ वदतीति पाठान्तरम् ।

साधवो ह्युपासकाः, तत्परित्राणमेवोद्देश्यम्, आनुषङ्गिको[1] दुष्कृतां विनाशः, सङ्कल्पमात्रेणापि तदुपपत्तेः । प्रकृतिं स्वामिति, "प्रकृतिः" स्वभावः, स्वमेव स्वभावमास्थाय न संसारिणां स्वभावमित्यर्थः । आत्ममाययेति, स्वसङ्कल्परूपेण ज्ञानेनेत्यर्थः । माया वयुनं ज्ञानमिति ज्ञानपर्य्यायमपि मायाशब्दं नैघण्टुका अधीयते । आह च भगवान् पराशरः

"समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः ।
तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् ॥
समस्तशक्तिरूपाणि तत्करोति जनेश्वर ।
देवतिर्य्यङ्मनुष्याख्यचेष्टावन्ति स्वलीलया ॥
जगतामुपकाराय न सा कर्मनिमित्तजा" । इति ।

महाभारतेऽपि अवतारूपस्याप्यप्राकृतत्वमुच्यते ।

"न भूतसंघसंस्थानो देहोऽस्य परमात्मनः" । इति ।

अतः परस्यैव ब्रह्मणः एवंरूपरूपवत्त्वादयमपि तस्यैव धर्मः । अत आदित्यमण्डलाद्यधिकरण आदित्यादिजीवव्यतिरिक्तः परमात्मैव ॥

भेदव्यपदेशाच्चान्यः ॥ २२ ॥

आदित्यादिजीवेभ्यो भेदो व्यपदिश्यते अस्य परमात्मनः "य आदित्ये तिष्ठन् आदित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयति य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति" "यस्याक्षरं शरीरं यमक्षरञ्च वेद यो मृत्युमन्तरे सञ्चरन् यस्य मृत्युः शरीरं यं मृत्युर्न वेद एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायण इति चास्यापहतपाप्मनः परमात्मनः सर्वान् जीवान् शरीरत्वेन व्यपदिश्य तेषामन्तरात्मत्वेनैनं व्यपदिशति । अतः सर्वेभ्य एवा[2]दित्यादिजीवेभ्यो ऽन्य एव परमात्मेति सिद्धम् ॥

---

१ आनुषङ्गिकस्त्विति ।

२ हिरण्यगर्भादिजीवेभ्य इति पाठान्तरम् ।

“यतो वा इमानि भूतानि जायन्ते” इति जगत्कारणं ब्रह्म इत्यवगम्यते। किं तज्जगत्कारणमित्यपेक्षायाम् “सदेव सोम्येदमग्र आसीत् तत्तेजोऽसृजत” “आत्मा वा इदमेक एवाग्र आसीत् स इमाँल्लोकानसृजत” “तस्माद्वा एतस्मादात्मन आकाशः सम्भूत” इति साधारणैश्शब्दैर्जगत्कारणे निर्दिष्टे ईक्षणविशेषानन्दविशेषरूपविशेषार्थस्वभावात्प्रधानक्षेत्रज्ञादिव्यतिरिक्तं ब्रह्मेत्युक्तम्। इदानीमाकाशादिविशेषशब्दैर्निर्दिश्य जगत्कारणत्वजगदैश्वर्यादिवादेऽप्याकाशादिशब्दाभिधेयतया प्रसिद्धचिदचिद्वस्तुनोऽर्थान्तरमुक्तलक्षणमेव ब्रह्मेति प्रतिपाद्यते “आकाशः, तल्लिङ्गात्” इत्यादिना पादशेषेण।

आकाशाधिकरणम्। **आकाशः, तल्लिङ्गात् ॥ २३ ॥**

इदमाम्नायते छान्दोग्ये “अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति आकाशो ह्येवैतेभ्यो भूतेभ्यो ज्यायानाकाशः परायणमि”ति। तत्र सन्देहः, किं प्रसिद्धाकाशमेवात्राकाशशब्देनाभिधीयते, उतोक्तलक्षणमेव ब्रह्मेति। किं प्राप्तम्। प्रसिद्धाकाश इति। कुतः। शब्दैकसमधिगम्ये वस्तुनि य एवार्थो व्युत्पत्तिसिद्धः शब्देन प्रतीयते स एव ग्रहीतव्यः। अतः प्रसिद्धाकाश एव चराचरात्मकभूतजातस्य कृत्स्नस्य कारणम्, अतस्तस्मादनतिरिक्तं ब्रह्म। नन्वीक्षापूर्वकसृष्ट्यादिभिरचेतनाज्जीवाच्च व्यतिरिक्तं ब्रह्मेत्युक्तम्। सत्यमुक्तम्। दुरुक्तन्तु तत्। तथा हि “यतो वा इमानि भूतानि जायन्ते तद्ब्रह्मे”त्युक्ते कुत इमानि भूतानि जायन्त इत्यादिविशेषाकाङ्क्षायाम् “सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त” इत्यादिना विशेषप्रतीतेर्जगज्जन्मादिकारणमाकाश एवेति निश्चिते “सदेव सोम्येदमग्र आसीदि”त्यादिष्वपि सदादिशब्दाः साधारणाकारास्तमेव विशेषमाकाशमभिदधति। “आत्मा वा इदमेक एवाग्र आसीदि”त्यादिष्वपि आत्मशब्दस्तत्रैव वर्तते, तस्यापि हि चेतनैकान्तत्वं न सम्भवति, यथा मृदात्मको घट इति।

Digitized by Google

आप्नोतीत्यात्मेति व्युत्पत्त्या सुतरामाकाशेऽप्यात्मशब्दो वर्तते । अत एवमाकाश एव कारणं ब्रह्मेति निश्चिते सति ईक्षणादयस्तदनुगुणा गौणा वर्णनीयाः । यदि हि साधारणशब्दैरेव सदादिभिः कारणमभ्यधायिष्यत, ईक्षणाद्यर्थानुरोधेन चेतनविशेष एव कारणमिति निरचेष्यत, आकाशशब्देन तु विशेष एव निश्चित इति नार्थस्वाभाव्यात् निर्णेतव्यमस्ति । ननु "आत्मन आकाशस्सम्भूत" इत्याकाशस्यापि कार्यत्वं प्रतीयते । सत्यम्, सर्वेषामेवाकाशवाय्वादीनां सूक्ष्मावस्था स्थूलावस्था चेत्यवस्थाद्वयमस्ति । तत्राकाशस्य सूक्ष्मावस्था कारणम्, स्थूलावस्था तु कार्यम् । "आत्मन आकाशस्सम्भूत" इति स्वस्मादेव सूक्ष्मरूपात् स्वयं स्थूलरूपः सम्भूत इत्यर्थः । "सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त" इति सर्वस्य जगतः आकाशादेव प्रभवाप्ययादिश्रवणात् तदेव जगत्कारणं ब्रह्मेति निश्चितम् । यत एवं प्रसिद्धाकाशादनतिरिक्तं ब्रह्म, अत एव "यदेष आकाश आनन्दो न स्यात् आकाशो ह वै नामरूपयोर्निर्वहिते"त्येवमादिनिर्देशोऽप्युपपन्नतरः । अतः प्रसिद्धाकाशादनतिरिक्तं ब्रह्मेति ॥

एवं प्राप्ते ब्रूमः । "आकाशः, तल्लिङ्गात्" आकाशशब्दाभिधेयः प्रसिद्धाकाशादचेतनादर्थान्तरभूतो यथोक्तलक्षणः परमात्मैव । कुतः । तल्लिङ्गात्, निखिलजगदेककारणत्वं सर्वस्माज्ज्यायस्त्वं परायणत्वमित्यादीनि परमात्मलिङ्गान्युपलभ्यन्ते । निखि[1]लकारणत्वं ह्यचिद्वस्तुनः प्रसिद्धाकाशशब्दाभिधेयस्य नोपपद्यते, चेतनवस्तुनस्तत्कार्यत्वासम्भवात् । परायणत्वं च चेतनानां परमप्राप्यत्वम्, तच्चाचेतनस्य हेयस्य सकलपुरुषार्थविरो[2]धिनो न सम्भवति । सर्वस्माज्ज्यायस्त्वं च निरुपाधिकं सर्वैः कल्याणगु[3]णैः सर्वेभ्यो निरतिशयोत्कर्षः, तदप्यचितो नोपपद्यते । यदुक्तम्, जगत्कारणविशेषाकाङ्क्षायामाकाशशब्देन विशेष-

१ निखिलजगदेककारणत्वमिति पाठान्तरम् ।
२ विरोधित्वे इति पाठान्तरम् ।
३ गुणगणैरिति पाठान्तरम् ।

समर्पणादन्यत्सर्वं तदनुरूपमेव वर्णनीयमिति, तदयुक्तम्, "सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते" इति प्रसिद्धवत् निर्देशात्। प्रसिद्धवत् निर्देशो हि प्रमाणान्तरप्राप्तिमपेक्षते, प्रमाणान्तराणि च "सदेव सोम्येदमग्र आसीदि"त्येवमादीन्येव वाक्यानि। तानि च यथोदितप्रकारेणैव ब्रह्म प्रतिपादयन्तीति तत्प्रतिपादितं ब्रह्म आकाशशब्देन प्रसिद्धवत् निर्दिश्यते। सम्भवति च परस्य ब्रह्मणः प्रकाशकत्वादाकाशशब्दाभिधेयत्वम्, आकाशते आकाशयति चेति। किञ्चानेनाकाशशब्देन विशेषसमर्पणक्षमेणापि चेतनांशं प्रत्यसम्भावितकारणभावमचेतनविशेषमभिदधानेन "तदैक्षत बहु स्यां प्रजायेये"ति "सोऽकामयत बहु स्यां प्रजायेये"त्यादिवाक्यशेषावधारितसार्वज्ञ्यसत्यसङ्कल्पत्वादिविशिष्टापूर्वार्थप्रतिपादनसमर्थवाक्यार्थोऽन्यथाकरणं न प्रमाणपदवीमधिरोहति। एवमपूर्वानन्तविशेषणविशिष्टापूर्वार्थप्रतिपादनसमर्थानेकवाक्यगतिसामान्यं चैकेनानुवादसरूपेणान्यथा कर्तुं न शक्यते। यत्त्वात्मशब्दश्चेतनैकान्तो न सम्भवति, मृदात्मको घट इत्यादिषु दर्शनादित्युक्तम्, तत्रोच्यते, यद्यपि चेतनादन्यत्रापि क्वचिदात्मशब्दः प्रयुज्यते, तथाऽपि शरीरप्रतिसम्बन्धिन्यात्मशब्दस्य प्रयोगप्राचुर्य्यात् "आत्मा वा इदमेक एवाग्र आसीत्" "आत्मन आकाशः सम्भूत" इत्यादिषु शरीरप्रतिसम्बन्धिचेतन एव प्रतीयते। यथा गोशब्दस्यानेकार्थवाचित्वेऽपि प्रयोगप्राचुर्य्यात् सास्नादिमानेव स्वतः प्रतीयते, अर्थान्तरप्रतीतिस्तु तत्तदसाधारणनिर्देशापेक्षा, तथा स्वतःप्राप्तं शरीरप्रतिसम्बन्धिचेतनाभिधानमेव "स ऐक्षत लोकान्नु सृजा" इति "सोऽकामयत बहु स्यां प्रजायेये"त्यादि तत्तद्वाक्यशेषा एव स्थिरीकुर्वन्ति। एवं वाक्यशेषावधारितानन्यसाधारणानेकापूर्वार्थविशिष्टं निखिलजगदेककारणम् "सदेव सो[1]म्येदमग्र आसीदि"ति वाक्यसिद्धं ब्रह्मैवाकाशशब्देन प्रसिद्धवत् "सर्वाणि ह वा इमानि भूतानी"त्यादिवाक्येन निर्दिश्यत इति सिद्धम्॥

१ सोम्येदमित्यादीति पाठान्तरम्।

Digitized by Google

प्राणाधिकरणम् । **अत एव प्राणः ॥ २४ ॥**

इदमाम्नायते छान्दोग्ये "प्रस्तोतर्या देवता प्रस्तावमन्वायत्ते"ति प्रस्तुत्य "कतमा सा देवता इति प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्ता तां चेदविद्वान् प्रास्तोष्यो मूर्द्धा ते व्यपतिष्यदि"ति । अत्र प्राणशब्दोऽप्याकाशशब्दवत् प्रसिद्धप्राणव्यतिरिक्ते परस्मिन्नेव ब्रह्मणि वर्त्तते, तदसाधारणनिखिलजगत्प्रवेशनिष्क्रमणादिलिङ्गात् प्रसिद्धवत् निर्दिष्टात् । अधिकाशङ्का तु कृत्स्नस्य भूतजातस्य प्राणाधीनस्थितिप्रवृत्त्यादिदर्शनात् प्रसिद्ध एव प्राणो जगत्कारणतया निर्देशमर्हतीति । परिहारस्तु शिलाकाष्ठादिषु चेतनस्वरूपे च तदभावात् "सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहत" इति नोपपद्यत इति, अतः प्राणयति सर्वाणि भूतानीति कृत्वा परं ब्रह्मैव प्राणशब्देनाभिधीयते । अतः प्रसिद्धाकाशप्राणादेरन्यदेव निखिलजगदेककारणमपहतपाप्मत्वसार्वज्ञ्यसत्यसङ्कल्पत्वाद्यनन्तकल्याणगुणगणं परं ब्रह्मैवाकाशप्राणादिशब्दाभिधेयमिति सिद्धम् ॥

अतः परं जगत्कारण[1]त्वव्याप्तेन येन केनापि निरतिशयोत्कृष्टगुणेन जुष्टं ज्योतिरिन्द्रादिशब्दैरर्थान्तरप्रसिद्धैरप्यभिधीयमानं परं ब्रह्मैवेति प्रति[2]पाद्यते "ज्योतिः, चरणाभिधानादि"त्यादिना ।

ज्योतिरधिकरणम् । **ज्योतिः, चरणाभिधानात् ॥ २५ ॥**

इदमाम्नायते छान्दोग्ये "अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेषु इदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिरि"ति । तत्र सन्देहः, किमयं ज्योतिश्शब्दनिर्दिष्टो निरतिशयदीप्तियुक्तोऽर्थः प्रसिद्धमादित्यादिज्योतिरेव कारणभूतं ब्रह्म, उत समस्तचिदचिद्वस्तुजातविसजातीयः परमकारणभूतोऽमि-

१ जगत्कारणत्वादिव्याप्तेनेति पाठान्तरम् ।
२ अभिधीयते इति पाठान्तरम् ।

तभास्सर्वज्ञः सत्यसङ्कल्पः पुरुषोत्तम इति । किं युक्तम् । प्रसिद्धमेव ज्योतिरिति । कुतः । प्रसिद्धवन्निर्देशेऽप्याकाशप्राणादिवत् स्ववाक्योपात्तपरमात्मव्याप्तलिङ्गविशेषादर्शनात् परमपुरुषप्रत्यभिज्ञानासम्भवात् कौक्षेयज्योतिषैक्योपदेशाच्च प्रसिद्धमेव ज्योतिः कारणत्वव्याप्तनिरतिशयदीप्तियोगात् जगत्कारणं ब्रह्मेति ॥

एवं प्राप्ते प्रचक्ष्महे, "ज्योतिः, चरणाभिधानात्" । द्युसम्बन्धितया निर्दिष्टं निरतिशयदीप्तियुक्तं ज्योतिः परमपुरुष एव । कुतः । "पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतन्दिवी"त्यस्यैव द्युसम्बन्धिनः चरणत्वेन सर्वभूतानामभिधानात् । एतदुक्तम्भवति, यद्य[1]पि "अथ यदतः परो दिवो ज्योतिर्दीप्यत" इत्यस्मिन्वाक्ये परमपुरुषासाधारणलिङ्गं नोपलभ्यते, तथाऽपि पूर्ववाक्ये द्युसम्बन्धितया परमपुरुषनिर्देशादिदमपि द्युसम्बन्धि ज्योतिस्स एवेति प्रत्यभिज्ञायत इति । कौक्षेयज्योतिषैक्योपदेशश्च फलाय तदात्मकत्वानुसन्धानविधिरिति न कश्चिद्दोषः । कौक्षेयज्योतिषश्च तदात्मकत्वम्भगवता स्वयमेवोक्तम् "अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रित" इति ॥

छन्दोऽभिधानात् नेति चेत्, न, तथा चेतोऽर्पण-निगमात्, तथा हि दर्शनम् ॥ २६ ॥

पूर्वस्मिन्वाक्ये "गायत्री वा इदं सर्वमि"ति गायत्र्याख्यं छन्दोऽभि[2]धाय "तदेतदृचाभ्यनूक्तमित्युदाहृतायाः "तावानस्य महिमा" इत्यस्या ऋचोऽपि छन्दोविषयत्वात् नात्र परमपुरुषाभिधानमिति चेत्, तन्न, तथा चेतोऽर्पणनिगमात् । न गायत्रीशब्देन छन्दोमात्रमिहाभिधीयते, छन्दोमात्रस्य सर्वात्मकत्वानुपपत्तेः, अपि तु ब्रह्मण[3] एव गायत्रीचेतोऽर्पणमिह निगम्यते, ब्रह्मणि गायत्रीसादृश्यानुसन्धानं फलायोपदिश्यत इत्यर्थः । सम्भवति च "पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवी"ति

१ यदीति पाठान्तरम् ।

२ अभिध्यायेति पाठान्तरम् ।

३ ब्रह्मण्येवेति पाठान्तरं तु युक्तम् ।

चतुष्पदो ब्रह्मणः चतुष्पदया गायत्र्या च सादृश्यम् । चतुष्पदा च गायत्री क्वचिद्दृश्यते, तद्यथा "इन्द्रः शचीपतिर्बलेन पीडितः दुश्च्यवनो वृषा समित्सु सासहिरि"ति, तथा ह्यन्यत्रापि सादृश्याच्छन्दोऽभिधायी शब्दोऽर्थान्तरे प्रयुज्यमानो दृश्यते, यथा संवर्गविद्यायाम् "ते वा एते पञ्चान्ये पञ्चान्ये दश सम्पद्यन्त"इत्यारभ्य "सैषा विराडन्नादि"त्युच्यते ॥

इतश्च गायत्रीशब्देन ब्रह्मैवाभिधीयते,

भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥ २७ ॥

भूतपृथिवीशरीरहृदयानि निर्दिश्य "सैषा चतुष्पदे"ति व्यपदेशो ब्रह्मण्येव गायत्रीशब्दाभिधेये उपपद्यते ॥

उपदेशभेदात् नेति चेत्, न, उभयस्मिन्नप्य-विरोधात् ॥ २८ ॥

पूर्ववाक्ये "त्रिपादस्यामृतं दिवी"ति दिवोऽधिकरणत्वेन निर्देशात् इह च "दिवः पर" इत्यवधित्वेन निर्देशादुपदेशस्य भिन्नरूपत्वेन पूर्ववाक्योक्तं ब्रह्म परस्मिन् न प्रत्यभिज्ञायत इति चेत्, न, उभयस्मिन्नप्युपदेशेऽर्थस्वभावैक्येन प्रत्यभिज्ञाया अविरोधात्, यथा वृक्षाग्रे श्येनो वृक्षाग्रात्परतः श्येन इति । तस्मात् परमपुरुष एव निरतिशयतेजस्को "दिवः परो ज्योतिर्दीप्यत" इति प्रतिपाद्यते, "एतावानस्य महिमा अतो ज्यायांश्च पुरुषः, पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवी"ति प्रतिपादितस्य चतुष्पदः परमपुरुषस्य "वेदाहमेतं पुरुषं महान्तम् आदित्यवर्णं तमसस्तु पारे" इत्यभिहिताप्राकृतरूपस्य तेजोऽप्यप्राकृतमिति तद्रूपतया स एव ज्योतिश्शब्दाभिधेय इति निरवद्यम् ॥

निरतिशयदीप्तियुक्तं ज्योतिश्शब्दाभिधेयं प्रसिद्धवत् निर्दिष्टं परमपुरुष एवेत्युक्तम् । इदानीं कारणत्वव्याप्तामृतत्वप्राप्त्युपायतया उपास्यत्वेन श्रुत इन्द्रप्राणादिशब्दाभिधेयोऽपि परमपुरुष एवेत्याह,

इन्द्रप्राणाधिकरणम् । **प्राणः, तथाऽनुगमात् ॥ २९ ॥**

कौषीतकीब्राह्मणे प्रतर्दनविद्यायाम् "प्रतर्दनो ह वै दैवोदा-

सिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण च" इत्यारभ्य "वरं वृणीष्वे"ति वक्तारम् इन्द्रं प्रति "त्वमेव मे[1] वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस" इति प्रतर्दनेनोक्तः[2] "स होवाच प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्वे"ति श्रूयते। तत्र संशयः, किमयं हिततमोपासनकर्मतया इन्द्रप्राणशब्दनिर्दिष्टो जीव एव, उत तदतिरिक्तः परमात्मेति। किं युक्तम्। जीव एवेति। कुतः। इन्द्रशब्दस्य जीवविशेष एव प्रसिद्धेः। तत्समानाधिकरणस्य प्राणशब्दस्यापि तत्रैव वृत्तेः अयमिन्द्राभिधानो हि जीवः प्रतर्दनेन "त्वमेव वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस" इत्युक्तः "मामुपास्स्वे"ति स्वात्मोपासनं हिततममुपदिदेश, हिततमत्वञ्चामृतत्वप्राप्त्युपाय एव, जगत्कारणोपासनस्यैवामृतत्वप्रा[3]प्त्युपायता "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्य" इत्यवगता। अतः प्रसिद्धजीवभाव इन्द्र एव कारणं ब्रह्मेत्याशङ्कायामभिधीयते, "प्राणस्तथानुगमादि"ति। अयमिन्द्रप्राणशब्दनिर्दिष्टो न जीवमात्रम्, अपि तु जीवादर्थान्तरभूतं परं ब्रह्म, "स एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृत" इतीन्द्रप्राणशब्दाभ्यां प्रस्तुतस्यानन्दाजरामृतशब्दसामानाधिकरण्येनानुगमो हि तथा सत्येवोपपद्यते॥

न, वक्तुरात्मोपदेशादिति चेत्, अध्यात्मसम्बन्धभूमा ह्यस्मिन्॥ ३० ॥

यदुक्तम्, इन्द्रप्राणशब्दनिर्दिष्टस्य "आनन्दोऽजरोऽमृत" इत्यनेनैकार्थ्यादयं परं ब्रह्मेति, तन्नोपपद्यते, "मामेव विजानीहि प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमु[4]पास्स्वेति, वक्ता हीन्द्रस्त्रिशीर्षाणं त्वाष्ट्रमहनमि"त्येवमादिना त्वाष्ट्रवधादिभिः प्रज्ञातजीवभावस्य स्वात्मन एवोपास्यतां प्रतर्दनायोपदिशति, अत उपक्रमे जीवविशेष इत्यवगते सति "आ-

१ मे इति पुस्तकान्तरे नास्ति।
२ प्रतर्दनेनोक्ते इति पाठान्तरम्।
३ प्राप्तिहेतुतेति पाठान्तरम्।
४ अमृतमित्युपास्स्वेति पाठान्तरम्।

नन्दोऽजरोऽमृत" इत्यादिभिरुपसंहारस्तदनुगुण एव वर्णनीय इति चेत्—परिहरति, "अध्यात्मसंबन्धभूमा ह्यस्मिन्," आत्मनि यः सम्बन्धः सोऽध्यात्मसम्बन्धः, तस्य "भूमा" भूयस्त्वं बहुत्वमित्यर्थः। आत्मन्याधेयतया संबध्यमानानां बहुत्वेन सम्बन्धबहुत्वम्, तच्चास्मिन् वक्तरि परमात्मन्येव हि सम्भवति, "तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणे अर्पिताः स एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृत" इति भूतमात्राशब्देनाचेतनवस्तुजातमभिधाय, प्रज्ञामात्राशब्देन तदाधारतया चेतनवर्गं चाभिधाय, तस्याप्याधारतया प्रकृतमिन्द्रप्राणशब्दाभिधेयं निर्दिश्य, तमेव "आनन्दोऽजरोऽमृत" इत्युपदिशति । तदेतच्चेतनाचेतनात्मककृत्स्नवस्त्वाधारत्वं जीवादर्थान्तरभूते तस्मिन् परमात्मन्येवोपपद्यत इत्यर्थः ॥

अथवा "अध्यात्मसम्बन्धभूमा ह्यस्मिन्" परमात्मासाधारणधर्मसम्बन्धो "ऽध्यात्मसम्बन्धः," तस्य "भूमा" बहुत्वम् "अस्मिन्" प्रकरणे विद्यते । तथा हि, प्रथमम् "त्वमेव मे[१] वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस" इति "मामुपास्स्वे"ति च परमात्मासाधारणमोक्षसाधनोपासनकर्मत्वं प्राणशब्दनिर्दिष्टस्येन्द्रस्य प्रतीयते, तथा "एष एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति एष एवासाधु कर्म कारयति तं यमधो निनीषती"ति सर्वस्य कर्मणः कारयितृत्वं च परमात्मधर्मः, तथा "तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिता" इति सर्वाधारत्वं च तस्यैव धर्मः, तथा "स एष प्राण एव प्रज्ञात्मानन्दोऽजरोऽमृत" इत्येतेऽपि परमात्मन एव धर्माः, "एष लोकाधिपतिरेष सर्वेश" इति च परमात्मन्येव सम्भवति। तदेवमध्यात्मसम्बन्धभूम्नोऽत्र विद्यमानत्वात् परमात्मैवात्रेन्द्रप्राणशब्दनिर्दिष्टः ॥

कथं तर्हि प्रज्ञातजीवभावस्येन्द्रस्य स्वात्मन उपास्यत्वोपदेशस्सङ्गच्छत इत्यत्राह

[१] मे इति पुस्तकान्तरे नास्ति ।

शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ ३१ ॥

प्रज्ञातजीवभावेनेन्द्रेण "मामेव विजानीहि मामुपास्स्वे"ति उपास्यस्य ब्रह्मणः स्वात्मत्वेनोपदेशोऽयं न प्रमाणान्तरप्राप्तस्वात्मावलोकनकृतः, अपि तु शास्त्रेण स्वात्मदृष्टिकृतः। एतदुक्तम्भवति, "अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" "ऐतदात्म्यमिदं सर्वम्" "अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः" इत्येवमादिना शास्त्रेण जीवात्मशरीरकं परमात्मानमवगम्य जीवात्मवाचिनामहन्त्वमादिशब्दानां परमात्मन्येव पर्य्यवसानं ज्ञात्वा "मामेव विजानीहि मामुपास्स्वे"ति स्वात्मश[1]रीरं परमात्मानमेवोपास्यत्वेनोपदिदेशेति। "वामदेववत्" यथा वामदेवः परस्य ब्रह्मणस्सर्वान्तरा[2]त्मत्वं सर्वस्य तच्छरीरत्वं शरीरवाचिनां[3] शब्दानां शरीरिणि पर्य्यवसानं पश्यन् "अहमि"ति स्वा[4]त्मशरीरकं परं ब्र[5]ह्म निर्दिश्य तत्सामानाधिकरण्येन मनुसूर्य्यादीन् व्यपदिशति "तद्धैतत्पश्यन् ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्च अहं कक्षीवान् ऋषिर्विप्र" इत्यादि, यथा च प्रह्लादः

"सर्वगत्वादनन्तस्य स एवाहमवस्थितः।
मत्तः सर्वमहं सर्वं मयि सर्वं सनातने" ॥

इत्यादि वदति। अस्मिन्प्रकरणे जीववाचिभिः शब्दैरचिद्विशेषाभिधायिभिश्चोपास्यभूतस्य परस्य ब्रह्मणोऽभिधाने कारणस्त्वोक्तपूर्वकमाह,

---

१ स्वात्मशरीरकमिति पाठान्तरम्।
२ अन्तरात्मकत्वमिति पाठान्तरम्।
३ चेति पुस्तकान्तरेऽधिकः पाठः।
४ स्वात्मकेति पाठान्तरम्।
५ ब्रह्मेति इति पाठान्तरम्।

क्रमिकत्वे चासदुत्पादप्रसङ्गः, अतो वर्तमानलक्षणमेव सर्ववस्तु पूर्वोत्तरकालयोस्तु तस्याभावमात्रं तत्प्रतियोगित्वादेव चातीतत्वादिव्यवहार इति तन्न । धर्माणां धर्मत्वस्य प्राक्साधितत्वेन धर्मत्वे सिद्धे लक्षणत्रयस्याप्यवश्यवक्तव्यत्वात् । वर्तमानसमय एव धर्मत्वमिति न युक्तम् । यतस्तदैव धर्मत्वे सर्वस्य चित्तस्य विरक्तव्यवहारविषयत्वापत्तेः, क्रोधकाले रागसामान्यस्यानाविर्भावात् । यथा यदा कदाचिद्रागसत्त्वे त्वन्मते रक्तश्चित्तमिति व्यवहारः, तथा यदा कदाचिद्रागाभावेन चित्तं विरक्तमित्यपि व्यवहारापत्तिः । एवं चातीतादिकालेऽपि रागादेश्चित्तादिधर्मत्वाद्धर्माणां त्रिलक्षणत्वं सिद्धम् । यच्चाभावप्रतियोगितामात्रेणेत्यादि तदपि न, असति घटे ध्वंसप्रतियोगित्वादिरूपातीतत्वादेर्वृत्त्यनुपपत्तेः । संयोगित्वादिवत्प्रतियोगित्वादेरपि संबन्धिद्वयसत्त्वं विनाऽनुपपत्तेः । सदसतोः संबन्धादर्शनात् । ध्वंसप्रागभावयोरसिद्धेश्च । घटो वर्तमान इतिवद् घटोऽतीतो भविष्यन्निति प्रत्ययाभ्यां घटावस्थाविशेषरूपयोरेव तत्त्वाद्, अन्यथाऽभावाभावोऽप्यतिरिक्तः स्यात् । किं च त्रयाणां लक्षणानां नैकदा एकस्मिन्वस्तुन्यभिव्यक्तिः, किं तु स्वाभिव्यञ्जकं दण्डचक्रादिवस्त्वञ्जनतुल्यं यस्यैवंभूतस्य लक्षणस्य क्रमेणाभिव्यक्तिरिति, नाभिव्यक्तौ साङ्कर्यं स्वरूपतस्तु साङ्कर्यमस्त्येव, अव्यक्तलक्षणयोर्व्यक्तेन लक्षणेनाविरोधात् । तदुक्तं पञ्चशिखाचार्यैः—रूपातिशया वृत्त्यतिशयाश्च विरुध्यन्ते सामान्यानि त्वतिशयैः सह प्रवर्तन्ते धर्माद्यनैश्वर्यान्तान्यष्टौ रूपाणि चित्तस्य, वृत्तयश्च ज्ञानाद्याः शान्तघोरमूढरूपाश्चित्तपरिणामास्तेषामतिशयोऽभिव्यक्तिरूपोत्कटतेति व्याख्यातं, गुणवृत्त्यविरोधादिति सूत्रे यथा रागस्यैव क्वचिद्विषय आविर्भाव इति न तदानीमन्यत्र सामान्याभावः, किं तु केवलं सामान्येन समन्वागत इत्यस्ति तदा

तत्र तस्य भावः, तथा लक्षणस्यापीति बोध्यम्। अयं च धर्माणामेव न धर्मिणां, तेषां त्र्यध्वत्वाभावाद् अवस्थापरिणाम उच्यते । ते वर्त्तमाना धर्मा अतीतानागताश्च धर्मास्तां तां बाल्ययौवनवार्धक्याद्यवस्थां प्राप्नुवन्तोऽन्योन्यमन्यत्वेन भेदेनोच्यन्ते । यं बालो न युवेत्यादिरूपेण, स च व्यवहारोऽवस्थाभेदादेव न द्रव्यभेदात्। एवं च पूर्वावस्थात्तोऽवस्थाऽन्तरप्राप्तिरवस्थापरिणामः । अयं च यद्यप्यतीतानागतयोरप्युच्यते तथाऽपि वर्त्तमाने स्फुटोऽन्यत्र तेनैव दृष्टान्तेनानुमेय इत्युक्तं प्राक् । तत्र निमित्तभेदादन्यत्वव्यवहारे दृष्टान्तः, यथैकत्वव्यञ्जिकारेखाऽङ्कविशेषे बिन्दुद्वयशिरस्कः शतव्यवहारकर्त्ता, तत एकबिन्दुलोपे दशेति बिन्दुद्वयस्यापि लोपे एकत्वव्यवहारकर्त्ता तत्समरेखाऽन्तरदाने एकादशेति यथा चैकैव स्त्री पुत्रपितृभ्रातृभिर्जनकत्वादिनिमित्तभेदात् मातेति दुहितेति स्वसेति चोच्यते ।

अत्रापि बौद्ध आह—अवस्थापरिणामाभ्युपगमे धर्मधर्मिलक्षणावस्थानां चतुर्णामपि कौटस्थ्यापत्तिः व्यापारेणैव निमित्तेन सर्ववस्तुष्वनागताद्यध्वनामन्योन्यं विभागाभ्युपगमात्। यदा धर्मे आश्रितः पदार्थः सव्यापारं न करोति तदाऽनागतो, यदा करोति तदा वर्त्तमानः, यदा कृत्वा निवृत्तस्तदाऽतीत इति तत्राद्यन्तयोर्विभागस्य व्यापारनिमित्तकत्वव्यापाराभावनिमित्तकत्वेन परंपरया । एवं च पूर्वधर्मातीततायां धर्मान्तराभिव्यक्तिरिति परिणामलक्षणाऽनित्यत्वमवस्थानामपि त्वया वाच्यम् अवस्थानां च नित्यत्वे किमप्यनित्यं न स्यादिति धर्मधर्म्यादिरूपं सर्वं जगत् कूटस्थं प्रसज्येतेति तन्न ।

एकान्तनित्यताया एव कूटस्थत्वाद् गुणिनो धर्मिणो नित्यत्वेऽपि गुणानां धर्माणां विमर्दस्य विनाशस्य कूटस्थपुरुषतोऽत्र वैलक्षण्यात्। अत्रोदाहरणं यथा विनाशिनां कार्याणां विनाशेनाविनाशिनां शब्दादि-

तन्मात्राणां धर्ममात्रं संस्थानं पञ्चभूतरूपम् आदिमदन्तं विनाशि च। एवं सत्त्वादिगुणानां धर्ममात्रं महत्तत्त्वम् आदिमद् विनाशि च। एवमहङ्कारादयो घटादयश्च। तानि च स्वविनाशेनाविनाशिनां कारणानां धर्ममात्राणि तेषां विकारसंज्ञा परिणामसंज्ञेति "वाचाऽऽरम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमि"ति श्रुतेः। सत्यत्वं विकारापेक्षया स्थिरत्वम्, एवं च धर्मिणामेव परिणामितया न कौटस्थ्यं, सुतरां तु धर्मलक्षणावस्थानामिति बोध्यम्। तत्र भूतेन्द्रियेषु परिणामत्रयं यथा मृद्धर्मी पिण्डाकाराद्धर्माद्धर्मान्तरमुपसंपद्यमानो धर्मेण परिणमते घटाकार इति, घटाकारश्चानागतं लक्षणं हित्वा वर्तमानलक्षणं प्रतिपद्यते इति लक्षणेन परिणमते घटो नवीनताऽनन्तरं पुराणता प्रतिक्षणमनुभवन्नवस्थापरिणामं प्राप्नोति धर्मादीनां सर्वेषामवस्थात्वसत्त्वेऽपि गोबलीवर्दन्यायेन भेदेन निर्देशः।एवं भूतान्तरेषु इन्द्रियेषु प्रकृत्यादिषु च योज्यम्। एते त्रयोऽपि परिणामा धर्मिस्वरूप एवानुगता अतो धर्मधर्म्यभेदाद्धर्मिपरिणाममात्रमेकमेव सामान्यतो भवति तस्यैवैते प्रकारविशेषा इति बोध्यम्। परिणामशब्दार्थश्च अवस्थितस्य धर्मिणः पूर्वधर्मनिवृत्तौ धर्मान्तरोत्पत्तिः परिणामः। निवृत्त्युत्पत्ती अतीततावर्तमानते।

अथ बौद्धनिरासाय धर्मातिरिक्तं धर्मिणमाह।

शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी ॥ १४ ॥

अतीतवर्तमानानागतधर्मेष्वनुपाती वर्तमानरूपेणानुगतो धर्मीत्यर्थः। एवं च वर्तमानत्वावर्तमानत्ववैधर्म्येण धर्मिणो धर्मस्य च विवेक इति भावः। तत्र योग्यताऽवच्छिन्ना धर्मिणः शक्तिरेव धर्मः, दृग्धशक्तेः संग्रहाय योग्यताऽवच्छिन्नेति। योग्यतावच्छिन्नेत्यस्योदकाहरणादियोग्यतावच्छिन्नेत्यर्थः। एतेन मृदादौ सतां घटादीनां तत

उत्पन्नावपि उदकाहरणादीनि न स्युः, स्वकारणेषु तेषामभावेन तत्प्राप्त्यसंभवादित्यपास्तमिति मिश्राः। एवं चाग्नेर्दाहशक्तिवद्धर्मा अपि धर्मिणि यावद्द्रव्यभाविनः, न हि शक्तिवियोगः शक्तिमतोऽस्ति शक्ति-शक्तिमतोरभेदात्। स चानभिव्यक्तिदशायामपि मृद्येव घटस्तन्तुष्वेव पट इत्येवं फलप्रसवभेदेनाव्यक्ततया ऽनुमितसद्भाव एकस्य धर्मिणोऽनेकोऽपि दृष्टो घटकपालकणिकामृच्चूर्णरूप इति। एकत्वानेकत्वाभ्यां धर्मधर्मिणोर्भेदो भाष्य उक्तः। तत्र वर्तमानो धर्मः स्वव्यापारमनुभवन्नतीतानागतेभ्यो धर्मान्तरेभ्यो भिद्यते यदा त्वतीतानागतावस्थायां सामान्येनाभिव्यक्तत्वस्य विशेषराहित्येन धर्मिणि लीनो भवति तदा धर्मिस्वरूपेणाविभागात्परस्परमपि तेषामविभाग एव। एवमेव ब्रह्माद्वैतमपि बोध्यम्। प्रलये सर्ववस्तूनां परमात्मन्यविभागात् यथाकाशेऽभ्राणामिति। ते च धर्मिणो धर्मास्त्रिविधाः—शान्ता उदिता अव्यपदेश्याश्च। तत्र शान्तास्ते ये कृत्वा व्यापारमुपरताः। उदितास्ते ये सव्यापारास्ते चानागतस्य लक्षणस्य समनन्तराः। एवं वर्तमानस्यानन्तरा अतीताः। नन्वतीतानन्तर्यं वर्तमानतायाः कुतो नेति चेन्न। अनागतावस्थायाः प्रागभावस्थानीयाया वर्तमानावस्थायां हेतुत्वेनातीतवर्तमानतयोः कार्यकारणतानियामकपौर्वापर्याभावात्। एवं च सत्कार्यवादेऽपि पूर्वाभिव्यक्तघटादिव्यक्तेर्न पुनरभिव्यक्तिरिति सिद्धान्तः। तस्यापि पुनरभिव्यक्तौ कदा चित्स एवायं घट इति प्रत्यभिज्ञाऽऽपत्तेः। किं चैवं सत्यनिर्मोक्षापत्तिः, विनष्टान्तःकरणाविद्याकर्मादीनां पुनरुद्भवेन मुक्तस्यापि संसारोदयापत्तेः, न चैवमतीततावेकाले तत्सत्त्वे मानाभावः, लोकानपि तान्द्दृशे इत्यादिवाक्यशतसिद्धयोगिप्रत्यक्षान्यथाऽनुपपत्तेर्मानत्वात्। विषयतत्संनिकर्षयोः प्रत्यक्षे हेतुत्वात्। न चातीतार्थस्य स्मरणमेवास्तु, पूर्वाननुभूतस्यापि

योगिना दर्शनात् । यत्तु योगजधर्म एव संनिकर्ष इति तन्न । प्रत्यक्षं प्रति संनिकर्षनानात्वेनाननुगमाद्धेतुताग्रहानुपपत्तेः । असत्पदार्थेन कस्यापि संनिकर्षस्यानुपपत्तेश्च । किं च ज्ञानादेर्विषयतारूपसम्बन्धस्याप्यसत्येऽनुपपत्तिः, सतोरेव सम्बन्धदर्शनात् । तस्मात्प्रत्यक्षेषु संयोगादिरेव प्रत्यासत्तिः योगजधर्मेण तु तत्प्रतिबन्धकाधर्मतमआदिनिवृत्तिमात्रं क्रियत इति दिक् ।

नन्वव्यपदेश्यत्वं किं, न च करिष्यमाणव्यापारत्वम् । अकरिष्यमाणव्यापारकस्यापि केवलानागतलक्षणस्य वस्तुनः स्वीकारादिति चेन्न ।

सर्वस्य सर्वजातीयशक्तिकत्वेन सर्वत्र परिणामिन्यवस्थितानां सर्वविकारजननशक्तीनामेवाव्यपदेश्यत्वात् । एवं च तादृशशक्तित्वमेवाव्यपदेश्यत्वम् । न च वर्तमानातीतावस्थयोरनुभवस्मरणे प्रमाणे स्तः शक्त्याख्यानागतावस्थायां किं मानं सर्वत्र सर्वशक्तिसत्त्वे च किं मानमिति वाच्यम् । स्थावरे रसादिभिर्मधुराम्लसुरभ्यसुरभिमृदुकठिनत्वादिभिर्यद्वैश्वरूप्यम् अनन्तरूपत्वं तज्जलपृथिव्योः परिणामनिमित्तकमित्यन्वयव्यतिरेकाभ्यां प्रत्यक्षतो दृष्टम्। अतो जलभूम्योः सकलस्थावरात्मकत्वात्तच्छक्तिमत्त्वम् । शक्तिं विनाऽपि कार्यकरणेऽतिप्रसङ्गात् । तथा जङ्गमेषु यदनेकरूपत्वं तत्स्थावराणां परिणामनिमित्तकं दृष्टं मनुष्यादीनां धान्यादिस्थावरकार्याणां धान्यादिविशेषे रूपादिविशेषदर्शनात् । तथा स्थावरेषु यदनेकरूपत्वं तज्जङ्गमपरिणामनैमित्तकं गोमयदुग्धादिभिर्धान्यचम्पकादीनां विचित्ररूपरसादिदर्शनाद्, दाडिमानां च रुधिरावसेकेन तालफलतुल्यफलतादर्शनाच्च एवमादिदृष्टान्तैः सर्ववस्तुषु सर्वविकारजननशक्तिसिद्धेः । यद्यप्यतीतकार्यशक्ति-

Digitized by Google

मत्वं नास्ति तथाऽपि तज्जातीयशक्तिमत्त्वं विवक्षितम्। तदुक्तं भाष्ये जात्यनुच्छेदेन सर्वं सर्वात्मकमिति। एतेनान्यद्रव्यविकारव्यक्तीनामन्यथाभावेऽपि न नियमहानिः तज्जातीयव्यक्त्यन्तरजननशक्तिमत्त्वसंभवात्। किं चैकस्मादेव चतुर्मुखशरीरादखिलदेवदानवनरपश्वादिसमुदयदर्शनेन, अगस्त्यजाठराग्नेः समुद्रशोषदर्शनेन, ब्रह्मविष्णुरुद्रपार्वतीशरीरादिषु विश्वरूपदर्शनेन, योगिनां स्वशरीरमनसोरनन्तविभूतिदर्शनेनान्यतोऽप्यन्योऽत्पादनदर्शनेन सर्वत्र सर्वशक्तिसत्ताऽनुमीयते।

ननु सर्वजातीयशक्त्यङ्गीकारे कथमेकदा नाखिलविकारोत्पत्तिः कथं वा न शिलातः अङ्कुरोत्पत्तिरित्यादीति चेन्न।

देशकालावयवसंयोगविशेषरूपाकाराधर्मादिनिमित्तैः प्रतिबन्धादनेकशक्तीनामेकदा वर्तमानलक्षणपरिणामाभावोपपत्तेः, उक्तरूपसहकारिविरहाद्वा। वस्तुतः सहकारिकारणानां प्रतिबन्धनिवर्तकतैव, अतः शिलाशकलान्नाङ्कुरोत्पत्तिः, अवयवसंयोगविशेषस्य तत्प्रतिबन्धकत्वात्। नाकाश्मीरे केसरोत्पत्ति, नापि निदाघे मेघोत्पत्तिः, न मृष्यां मनुष्योत्पत्तिः, नापुण्यवतः सुखमिति बोध्यम्। अस्मदादिशरीराच्च नाखिलप्राण्युत्पत्तिरधर्मेण प्रतिबन्धाद् ब्रह्माण्डादिशक्तिमतश्च घटादेर्ब्रह्माण्डाद्युत्पत्तिं विनैव प्रायशो नाशदर्शनात्, सा शक्तिराधारविलयाद् घटादिना सहैव लीयते, कदा चित्तु योगीश्वरादिसङ्कल्पतो घटादीनामपि प्रकृत्यापूरवशाद् अव्यवस्थिताखिलपरिणामो भवत्येव। तदुक्तम्।

विषमप्यमृतं क्व चिद्भवेदमृतं वा विषमीश्वरेच्छयेति।

एवं च शक्तिसिद्धौ सदेव सोम्येदमग्र आसीदिति श्रुतिरेव मानम्। अन्यथा कालभेदभिरेवातिप्रसङ्गपरिहारेण सा न सिध्येत्,

घटो भविष्यतीति प्रत्ययश्चेति । एवं चाभविष्यद्व्यापारकशक्तिसिद्धौ हेयं दुःखमनागतमिति पूर्वोक्तमुपपन्नम् । एवं च कश्चिद्विकारो विलक्षण एव अनागतोऽतीतश्चेति । अन्यथाऽनागतदुःखस्य हेयत्वानुपपत्तेः परेषां ह्यनागतदुःखहानं सिद्धत्वान्न पुरुषार्थः स्यात् । मम त्वनागतदुःखं शक्तिरूपं चित्तेन सहैव नश्यतीत्युपपन्नं सर्वम् । यश्चैतेष्वभिव्यक्तेषु धर्मेष्वन्वयी स्थिरः सामान्यविशेषात्मा स धर्मी । एवं चाभिव्यक्तत्वानभिव्यक्तत्वं वैधर्म्येण धर्मधर्मिणोर्विवेकः ।

यस्तु बौद्धो निर्धर्मकं धर्ममात्रं क्षणिकमिदम्, अनेकक्षणस्थायित्वे क्षणसम्बन्धरूपधर्मवत्त्वमेव पदार्थमात्रस्य स्यादिति वदति तस्यात्माऽपि क्षणिकविज्ञानरूप एव स्यादिति भोगाभावापत्तिः, अन्यविज्ञानेन कृतस्य कर्मणोऽन्येन भोगेऽतिप्रसङ्गात्, स्मरणानापत्तेश्च अन्यदृष्टस्यान्येनास्मरणात् । प्रत्यभिज्ञानाच्च धर्मी अतिरिक्तः सिध्यति धर्मान्यथात्वेऽपि प्रत्यभिज्ञादर्शनादिति दिक् ।

ननु धर्मिणोऽतिरिक्तत्वेऽप्येकस्यानेकपरिणामाङ्गीकारो युक्तः एकरूपात्कारणात्कार्यभेदे तस्याकस्मिकत्वप्रसङ्गाद् एकस्यानेकशक्तित्वेऽतिप्रसङ्गादत आह ।

क्रमान्यत्वं परिणामान्यत्वे हेतुः ॥ १५ ॥

एकस्यैव मृद्धर्मिणः प्रथमं चूर्णमृत् ततः पिण्डमृद्भवति । ततश्च घटोत्पत्तौ घटमृद्भवति ततो घटस्य लये कपालमृत् ततः कणमृदित्यादिः परिणामक्रमो दृश्यते, मृद्धर्मी च सर्वत्रानुगतः मृदित्यनुगतप्रत्ययात् । न च धर्माणामयं क्रमः पौर्वापर्यात्मा न तु धर्मिण इति कथमनेन धर्मिणः परिणामबहुत्वसिद्धिरिति, वाच्यम् धर्मक्रमस्यैव धर्मिक्रमत्वात् । यस्य धर्मिणो धर्मान्तरस्य समनन्तरो

यो धर्मः स एव हि तस्य धर्मिणः क्रमः यथा मृदेकेव चूर्णं भूत्वा सहकारिविशेषसमभिहारेण पश्चात्पिण्डो भवतीत्येकः पश्चाच्च पिण्डः प्रच्यवते घट उपजायते इत्यादिप्रकारैर्मृद्धर्मिण एव धर्मपरिणामक्रमबहुत्वम्। एवं घटस्यानागतभावाद्वर्तमानभावप्राप्तिः पिण्डस्य वर्तमानभावादतीतभावप्राप्तिरितिलक्षणक्रमः, लक्षणात् लक्षणान्तरप्राप्तिरूपः अतीतभावाद्वर्तमानतेति न क्रम इति प्रागेवोक्तं तथा घटस्य नवस्य प्रान्ते पुराणता दृश्यते, तच यद्यपि प्रतिक्षणपरिणामो न प्रत्यक्षस्तथाऽपि पुराणता प्रतिक्षणं भिन्नेन स्वरूपसताक्रमसमूहेनाभिव्यज्यमाना चरमावस्थायां स्फुटं प्रत्यक्षतामेतीत्यतः पुराणताऽभिव्यक्तिहेतुतया प्रतिक्षणमवस्थापरिणामोऽनुमीयते। एवं च धर्मलक्षणपरिणामाभ्यां प्रतिक्षणमुपजायमानाभ्यां विलक्षणोऽयं प्रतिक्षणजायमानत्वात्तृतीयोऽवस्थापरिणामः, ईदृशक्षणभङ्गुरत्वमादायैव प्रपञ्चस्य स्वप्नमायाऽऽदिदृष्टान्ता श्रुतिस्मृतिषूक्ताः। त एते क्रम धर्मधर्मिणोर्भेदे सति सम्भवन्ति नेतरथेति सूत्रतात्पर्यम्।

ननु धर्मिणो घटादेः कपालादिधर्मत्वात्कथं धर्मधर्मिणोर्भेद इति चेदन्यधर्मापेक्षया धर्मित्वाक्षतेरदोषः, यो यस्य धर्मो स तस्माद्भिन्न इत्येव नियमात्। न च धर्मिधर्मलक्षणानां भेदे कथमेकस्या एव प्रकृतेः सर्वपरिणामित्वं स्मृत्यादावुक्तमिति वाच्यम्। परमार्थधर्मिणि प्रधाने साक्षात्परम्परयाऽभेदोपचारेण निमित्तेन सर्वोऽपि धर्मः स एवाभिधीयते इति सर्वस्य क्रमस्य प्रधानरूपैकविषयत्वेनैव प्रतीयमानत्वेनादोषात्। परमार्थधर्मित्वं च साक्षात्परम्परया वा सर्वविकाराश्रयत्वम्, अन्येषां त्वपारमार्थिकं धर्मित्वम् आपेक्षिकत्वाद्, यथा महदादीनां सत्यत्वं जीवानामात्मत्वं चापारमार्थिकं घटमृद्देहाद्यापेक्षिकत्वात्। एवं च परमात्मन एव पार-

मार्थिकात्मत्वं न्यायसाम्याद् । अथाभेदोपचारद्वारेणेति भाष्योक्ते धर्मधर्मिणोर्भेद एव व्यावहारिकः अभेदस्तु प्रातिभासिकस्तन्मूलं चाविभाग इति ज्ञायते । तथारम्भवादिभिरस्माकं धर्मधर्म्यभेदसत्कार्ययोरेव विरोधो न तु प्रपञ्चस्यानित्यत्ववादो तेऽभेदप्रत्ययनियामकाविभागलक्षणास्यानङ्गीकारात् प्रागभावध्वंसयोरङ्गीकाराच्च । ब्रह्मविवर्त्तवादोऽपि नास्माकं विरुद्धः, मायापरिणामस्य प्रपञ्चस्य परमात्मन्यतात्त्विकतायाः अस्माकमपीष्टत्वात् ॥

बहुरूप इवाभाति मायया बहुरूपया ।
रममाणो गुणेष्वस्या ममाहमिति बध्यते—

इति स्मृत्या मायाविकारस्य परमात्मान्यारोपावगमाद् शुक्तेबुद्धिपरिणामरजतारोपवत् । बध्यत इत्यस्यांशत इति शेषः । यद्यपि चित्तस्य व्युत्थाननिरोधसंस्काररूपौ द्वावेव परिणामौ सूत्रे उक्तौ तथाप्यन्येऽपि द्रष्टव्याः । तथा हि—चित्तस्य धर्मद्वयं प्रत्यक्षमप्रत्यक्षं च—तत्र वृत्त्यात्मकं प्रत्यक्षं, वृत्तिश्च सात्त्विकप्रतिबिम्बाधानसमर्थः परिणामविशेषस्तस्य ज्ञानेच्छाकृतिसुखदुःखादिरूपः परमाणुतद्रूपादिवत् सात्त्विकप्रतिबिम्बाधानाक्षमतयाऽभासमानो वस्तुमात्रोऽप्रत्यक्षः । स चानुमानमात्रगम्यस्तत्सप्तविधः ।

निरोधधर्मसंस्काराः परिणामोऽथ जीवनम् ।
चेष्टा शक्तिश्च चित्तस्य धर्मा दर्शनवर्जिताः इति ॥

निरोधो वृत्तिनिरोधः स संस्कारजनकत्वेन निवृत्तियत्नद्वारूपोऽनुमीयत इति प्रागुक्तम् । धर्मो दृष्टसामान्यभोगवैचित्र्यादनुमीयते । संस्कारश्च स्मृत्याः परिणामश्चित्तस्योपचयादिर्वृत्त्युत्कर्षादिभिरनुमीयते । जीवनं प्राणनादिरूपव्यापारः स सुषुप्तावपि श्वासप्रश्वा-

Digitized by Google

ताभ्यामनुमीयते, चेष्टा चित्तस्य सञ्चारः स च जाग्रत्स्वप्नसुषुप्त्यादौ चित्तस्य चक्षुरादिदेशसंयोगवियोगाभ्यामनुमीयते। यद्यपि चित्तं विभु तथाऽपि बाह्यसत्त्वाद्युपष्टम्भेनोपचयापचयवदौपाधिकी तत्र क्रियाऽप्यस्ति शक्तिर्ध्यानादिसामर्थ्यं तच्च तत्कार्यानुमेयमिति दिक्।

अथ योगिनः सम्पन्नसर्वयमादिसाधनस्य तत्तद्विभूतिकामनया जिज्ञासितो योऽर्थस्तत्तत्संयमविषयस्तत्तत्संयमसिद्धिसूचिका विभूतयश्च वक्तव्याः केवलमुमुक्षूणां तु सत्त्वपुरुषान्यतासंयमः कर्तव्यस्तत्र परिणामत्रयसंयमं तद्विभूतिं चाह।

परिणामत्रयसंयमादतीतानागतज्ञानम् ॥ १६ ॥

अस्य धर्मिणोऽयं धर्मपरिणामस्तस्य चायं लक्षणपरिणामो लक्षणस्य चायमवस्थापरिणाम इत्येवमनुज्ञाय यत्र कुत्र चिदर्थे संयमात्तत्साक्षात्कारे सति सर्ववस्तुसाधारणेषु तेषु परिणामेषु अतीतानागतज्ञानं प्रणिधानलेशादेव भवतीत्यर्थः। एकत्र ध्यानादित्रयं संयम इत्युक्तम्। अन्यविषयकसंयमात्प्रतिनियतपदार्थान्तरसाक्षात्कारो योगजधर्माद्भवतीत्यत्र शास्त्रं प्रमाणं धर्मविशेषात्स्वर्गविशेषो भवतीत्यत्रेव।

संयमान्तरस्य सिद्ध्यन्तरमाह।

शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानम् ॥ १७ ॥

गौरिति शब्दो गौरित्यर्थो गौरिति ज्ञानं तेषां वक्ष्यमाणात्संकेतरूपादध्यासात्संकरोऽविवेकाग्रहणं वस्तुतस्तेषां भेद एव—तत्तेषां प्रविभागे भेदे संयमात्साक्षात्कारपर्यन्तात्सर्वभूतानां रुतानि ज्ञायन्ते ऽयं काकादिरमुमर्थमनेन शब्देन कथयतीत्यर्थः। तत्र वागिन्द्रियजन्यः शब्दो लोकप्रतीतिसिद्धो वर्ण एव न वाचकपदरूपः।

अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु चेति स्मृतेः ।

श्रोत्रं च ध्वनिरूपपरिणाममात्रविषयं, तत्र ध्वनिर्नाम वागिन्द्रियादिष्वभिहतस्योदानवायोः परिणामभेदः तदभिघातात्तदवच्छिन्नाकाशोपादानको वा न तु वाचकं पदम् । स च वर्णरूपोऽप्यवाचकत्वाद्ध्वनिरित्युच्यते । तृतीयः पदरूपः स च नादानुसंहारबुद्धिनिर्ग्राह्यः नादाख्यगकारादिवर्णान् प्रत्येकं गृहीत्वाऽनु पश्चाद्या बुद्धिः संहरति एकत्वमापादयति । गौरित्येकं पदमिति तया निर्ग्राह्योऽखण्ड एकः स्फोटाख्यः अयं चान्तःकरणस्यैव ग्राह्यः तद्धर्मश्च यो विशोका वा ज्योतिष्मतीति सूत्रे प्रथमपादे हृदयपुण्डरीके प्रणवरूप उक्तः अनुसंहारबुद्धेः सामानाधिकरण्येनैव तद्ग्रहजनकत्वे लाघवात् । यद्यपि पूर्वबुद्धयोऽपि वर्णाकारं पदमेव गोचरयन्ति तथाऽपि न विशदं, चरमे तु विज्ञाने तदतिविशदमित्येवमुक्तम् । न चानुसंहारबुद्धिः श्रोत्रस्यैवास्तु, असम्भवात्, आनुपूर्व्यैक्यं हि एकपदत्वप्रतीतेर्विषयो वाच्यं, न चानुपूर्वी श्रोत्रग्राह्या, श्रोत्रस्य शब्दमात्रग्राहकत्वात् । न च पूर्ववर्णसंस्कारैः स्मृतानां वर्णानामानुपूर्वी मनसा ग्राह्येति वाच्यम् । किमानुपूर्व्या मनसाऽनुभवः उत स्मरणम् । नाद्यः, तदा वर्णानां विनाशेन तत्तदुत्तरक्षणानां च विनाशेन तदसम्भवात् । क्षणस्यास्मदादिमनोग्राह्यत्वाच्च । अत एवान्त्योऽपि न, अथ प्रमाणं चेकं पदमिति प्रत्यय एव, अनेकेषां वर्णानामेकसमुपस्थितेरसम्भवात् परस्परमसम्बद्धस्वभावानां पदत्वसंस्पर्शरहितानां प्रत्येकमर्थानुपस्थापकानामाविर्भूयैव क्षणात्तिरोभूतानां प्रत्येकं मिलितानां चापदस्वरूपताया वृद्धैरुक्तत्वात् । प्रत्येकमर्थोपस्थापकत्वेऽनुभवविरोधो द्वितीयादीनामनुच्चारणप्रसङ्गश्च । न चाग्नेयादीनां परमापूर्वे स्वर्गे वा जननीये यथा संस्का-

रद्वारा साहित्यं तथा वर्णानामपि संस्कारद्वारा साहित्यम्। तादृशा-नेकसंस्कारकल्पने गौरवात्। न च स्मृत्यनुरोधेन क्लृप्ता एव ते। तेषां स्वकारणानुभवविषयस्मृतिमात्रजनकत्वात्। किं चातिरिक्त-स्यापि स्वीकारे तस्याज्ञातस्यार्थप्रत्यायकत्वासम्भव अर्थप्रत्यायनाङ्ग सम्बन्धस्याज्ञातस्य तज्जनकताया अदर्शनात्। न च प्रत्येकवर्णानुभव-जनितसंस्कारपिण्डलब्धजन्मस्मृतिविषयतया जातसहभावा वाचकाः क्रमाक्रमविपरीतक्रमानुभूतानामविशेषेणार्थबोधकत्वापत्तेः। क्रमस्य त्वनुभवाविषयस्य न स्मृतिविषयत्वमित्युक्तमेव। न चैवोऽखण्डपदे ऽपि दोषः, तद्धि प्रत्येकमेव प्रयत्नभेदभिन्नध्वनिभिः परस्परविसदृश-तत्पदं व्यञ्जकैस्तुल्यस्थानकरणनिष्पन्नत्वेन गणगौरगौरित्यादौ गत्वेन सदृशैरेकमप्यनेकमिवानवयवमपि सावयवमिव व्यज्यते। यथा नियतवर्णपरिमाणसंस्थानं मुखमेकमपि मणिकृपाणदर्पणादयो विभि-न्नवर्णपरिमाणसंस्थानमनेकमादर्शयन्ति, न तु परमार्थतस्तस्य ते भागाः तस्माद्वर्णात्मना पदभेदेऽपि एकमेव स्फोटं निर्भागमेव सभा-गमिव सभेदमिव व्यञ्जन्ति। एवं च गोपदरूपस्यैकस्य स्फोटभे-दस्य गकारभागो गणादिपदस्फोटसादृश्येन न निर्धारयति स्वभा-गिनमित्यौकारविशिष्टो निर्धारयति, एवमौकाररूपोऽपि भागः शौचिरादिपदसदृशतया न शक्तस्तं निर्धारयितुमिति गकारवि-शिष्टो निर्धारयतीति वाच्यम्, तच्च न सम्भवति गत्वादिनाऽभि-व्यक्तेः क्षणिकत्वादिति वाच्यम्। संस्कारद्वारेण तेषां सहभावाद् वैशिष्ट्योपपत्तेः। न च भिन्नविषयत्वं, संस्कारयोः भागद्वयविषय-योरनुभवयोस्तज्जन्मनोश्च संस्कारयोरेकपदविषयकत्वात् केवलभा-गानुभवेन पदमव्यक्तमनुभूयते अनुसंहारधिया तु पूर्वसंस्कारसहा कृतया व्यक्तमनुभूयते यथा दूराद्वनस्य तौ पूर्वेऽव्यक्ताः प्रत्यय

व्यक्तवनस्पतिप्रत्ययजनकाः । न चेयं विधा वर्णानामर्थप्रत्ययजनने सम्भविनी, न हि ते पूर्वमव्यक्तमर्थप्रत्ययं जनयन्तीति शक्यं वक्तुं प्रत्यक्षस्थान एव तथा नियमात् । वर्णाधेयस्त्वर्थप्रत्ययो न प्रत्यक्षः वर्णेभ्यो जायमानो ह्यर्थे प्रत्ययो जायमानः स्फुट एव जायेत न वा जायेत न त्वस्फुट इति विशेषात् । न चानुपूर्वीविशिष्टसमूहस्यैकत्वा-देकत्वव्यवहारस्तेन रूपेणार्थप्रत्यायकत्वं चेति वाच्यम् । तदग्रहस्यो-क्तत्वात् । स कीदृश इति चेत् । अन्तःकरणधर्मः स एक एव श्रोत्र-गृहीततत्तद्वर्णैर्व्यहारञ्जनेन वस्त्रस्येव जवया स्फटिकस्येव वा तत्तदु-परक्ततायां सत्यां चरमवर्णग्रहकाले सति पदत्वेन प्रतीयते तत्तदु-परागनाशकं च तस्यान्तःकरणवृत्त्यन्तरमेवेति न दोषः, अत एव तत्र तत्तदुत्तरत्वादिकमपि गृह्यते । तथा बीजाङ्कुराद्यनेकावस्थो वृक्षरूपो धर्मो क्रमिकाभ्यस्ताभ्योऽतिरिक्तः शेषावस्थया पूर्णतया व्यज्यते । अयमाम्रवृक्ष इति, स च बीजादिभ्यो भिन्नाभिन्नः भेदा-भेदयोरनुभवात् । तथा गकारौकाराद्यनेकावस्थो गौरित्यादिरखण्ड-रूपेण क्रमिकाभ्यो गकाराद्यवस्थाभ्योऽतिरिक्तो विसर्जनीयादिचरमा-वस्थयाऽभिव्यज्यते इदं गौरिति पदं न तु गौर इतीत्यादिरूपेण । तच्च गकाराद्यवस्थाभ्यो भिन्नाभिन्नं भेदाभेदयोरनुभवात् स चार्थस्फु-टीकरणात्स्फोट इत्युच्यते । न च वर्णानां पदस्वरूपत्वाभावे कथमि-यन्तो वर्णाः क्रमविशेषविशिष्टा अस्यार्थस्य वाचका इति लोकव्यव-हार इति वाच्यम् । वर्णानां प्रत्येकरूपेण पदभेदेऽप्यवस्थाऽवस्थिनोरभेद-स्यापि सत्त्वेनैकैकस्यापि वर्णस्य बीजाङ्कुरादेर्वृक्षाभेदवद्, यद्वा भेद-स्यापि सत्त्वेनाद्यतः स चैकैको वर्णः पदभावे सहकारीणि यानि वर्णान्तराणि तत्प्रतियोगित्वात् तत्सम्बन्धित्वाद् अनन्तपदरूपता-

मिवापन्नो भवतीति सर्वपदरूपत्वात्सर्वपदार्थाभिधानयोग्यतासम्पन्नो
भवति। वस्तुतस्तस्य तत्त्वान्न नानात्वमत इत्येत्युक्तं गोगणगौरनगर-
इत्यादिषु गोत्वाभिधायिषु दृष्ट इति तत्तदभिधानशक्तिः सोमशोचिरा-
दिषु ईश्वराद्यर्थाभिधायिषु पदेषु ओवर्णो दृष्ट इति सोऽपि तत्तदभिधा-
नशक्तिरिति अनन्तपदरूपता चैवं पूर्वगकारादुत्तरेण ओरिति वर्णद्वयेन
मया इति पदाद्यद्व्यावर्त्यं उत्तरश्च विसर्जनीयः पूर्वेण गकारौकाररूप-
वर्णद्वयेन गौरित्यादिपदेभ्यो व्यावर्त्यविशेषे गौरिति अखण्डे पदे
गोत्ववाचके तादात्म्ये नावस्थाप्यत इति प्रकारेण। एवं ते बहवो वर्णा
आनुपूर्वीविशेषसापेक्षाः पदाभेदतोऽर्थसंकेतेन नियमिताः सहकारिवि-
शेषेण सर्वाभिधानसमर्था अपि एतावत्सङ्ख्याका गकारौकारविसर्जनीया
गोरूपमेवार्थमुपस्थापयन्तीति तेन प्रकारेण वर्णमुखेन तत्पदमेवा-
विवेकतः सङ्केत्यते यतः पदमेव वाच्यस्य वाचकम् । न चान्यस्या-
न्यरूपेण कुतः सङ्केतः, पदाख्यस्य बुद्धिग्राह्यस्य बुद्धिधर्मस्य स्फोटस्य
ध्वनिरूपैरुपरक्ततया तदभेदात् । यथा संयुक्तं कपालद्वयं जलाहर-
णहेतुरित्यविवेकतो बालकेभ्य उपदिश्यते पटादिभ्यो घटस्य व्याव-
र्तकान्तरासम्भवात् ततश्च बालो घटस्य कपालाविवेकेनैव जलाह-
रणहेतुत्वं गृह्णाति तद्वत् स्फोटान्तरव्यावर्तनाय वर्णाविवेकेनैव सङ्के-
तोपदेशः सङ्केतग्रहश्च भवतीति न प्रागुक्तलोकव्यवहारानुपपत्तिरिति
बोध्यम्। तदिदं स्फोटाख्यमेकबुद्धिविषयत्वादेकं पराख्यया पुरुषस्य
प्रधानरूपशक्त्या एकप्रयत्नेन जनितं यावद्व्यवहारस्थायिवर्णवत् क्रम
रहितं वर्णरहितम् अत एव निरंशम् अन्त्यवर्णस्य प्रत्ययरूपव्यापारेणा
भिव्यक्तं परप्रतिपिपादयिषया वक्तृभिरभिधीयमानैः श्रोतृभिश्च श्रूय
माणैर्वर्णैरुपरागात् । अनादिवाग्व्यवहारवासनानां वशीकृतया लोक
बुद्ध्या परमार्थवदन्योन्याभेदेन संवेदनेन प्रतीयते, न तु तदतिरि-

रूपेण । यद्यपि लाक्षाद्युपाधेरपगमे स्फटिकः स्वच्छधवलोऽनुभूयते उपाधिं विना ऽपि काशात् अस्य तूपाधिव्यतिरेकेण प्रतीत्यभावान्न केवलस्य प्रत्ययः । एवं च वागिन्द्रियविषयवर्णानां श्रोतृग्राह्याणां वाचकपदस्य चाविवेकरूपसङ्करः तस्य च पदस्य एतावतां वर्णानामेवमानुपूर्वीकमिलनमस्यार्थस्य वाचकमिति विषयव्यवस्था तु सङ्केतग्रहाद् भवति । सङ्केतस्तु पदपदार्थयोः सङ्केतकर्तुराहार्येतरेतराभेदारोपरूपेतरेतराध्यासरूप अभेदारोपे बीजं तु अविभाग एव त्रयाणामपि बुद्धिधर्मत्वेन परस्परमविभागात् । शब्देन बोद्धार्थस्यैव प्रत्ययात् । तथापि नाधुनिकसङ्केतो विषयव्यवस्थापकः तस्यानियतत्वात् । किं तु स्मृत्यात्मकः पाणिन्यादिस्मृत्यात्मकः । किं च स्मृत्यात्मको ज्ञानविषय एव बोधकः न स्वरूपसन्निति, न चाध्यासस्य सङ्केतत्वं कुतः ओमित्येकाक्षरब्रह्मेत्यादिशास्त्रेषु वृद्धिरादैजित्यादौ व्याकरणे कम्बुग्रीवादिमान्घटइत्यादौ लोके अमरानिर्जरा देवा इत्यादौ कोशे च योऽयं शब्दः सोऽर्थः योऽर्थः स शब्द इत्येवमितरेतराध्यासरूपस्यैव संकेतस्य दर्शनात् । शब्दवाच्यत्वलक्षणायां प्रमाणाभावाद् देवतास्थानाद्यभेदारोपेणैवागमिनो मन्त्रार्थयोरभेदेनोपासनमामनन्ति, मीमांसकाश्च मन्त्रमयीं देवतामाहुः । एवंभूते एव संकेते मुख्ये सतिकथं चिद्वेदं परिकल्प्यास्यार्थस्यायं वाचकइत्यपि कथ चित्संकेतः यथा पाणिनेः कर्मणि द्वितीयेति यथा वाजः प्रगृह्यमिति । वाचकत्वं च तादात्म्यमेवेति दिक् । यत्तु अस्मच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छाविषयत्वं शक्तिरिति तत्कारणत्वादिसाधारणम् । एवमितरेतराध्यासरूपेण संकेतेन निमित्तेन एते शब्दार्थप्रत्ययाः संकीर्णा लोके दृश्यन्ते गौरिति शब्दो गौरित्यर्थो गौरितिज्ञानमिति तत्र शब्दार्थयोस्तिरेतराध्यासः संकेतग्रहेणैव

Digitized by Google

दर्शितः शब्दार्थयोः प्रत्ययेन सह तु एकाकारत्वादन्योन्याध्यासः य एषां प्रविभागज्ञः स सर्वज्ञत्ववित् स एव शब्दादीनां तत्त्वज्ञः यथा च पदवाक्ययोस्तदर्थानां च संकरस्तथा वर्णपदयोरपि तथा हि सर्वपदेषु पदान्तरतत्तदर्थसहकारेणास्ति वाक्यभवनशक्तिः । किं च परेण बुभुत्सितार्थप्रत्यायनाय शब्दप्रयोगः परेण च प्रवृत्त्यादिविषयो बुभुत्सितः स च वाक्यार्थ एवेति सर्वे शब्दास्तत्परा इति यद्यपि केवलपदप्रयोगस्तथापि पदान्तरसाहित्येनैवार्थावगमः केवलस्यासामर्थ्यात् । एवं च वाक्यमेव वाचकपदानि तद्भागतया वर्णानां पदार्थवाचकत्ववद् वाक्यार्थवाचकानि, एवं च वर्णा यथा सर्वार्थाभिधानशक्तिप्रचित, एवं पदमपि एकैकं सर्ववाक्यार्थाभिधानशक्ति इति । एवं च वृक्ष इत्युक्ते आकाङ्क्षापूरणार्थं वृक्षोऽस्ति चलति विच्छिद्यते छिद्यते वेति पदान्तराणां योग्यताकाङ्क्षातात्पर्यादिवशादध्याहारो गम्यते इति तैर्वाक्यैर्वृक्षपदस्य संकरोऽविवेकः । यद्यपि क्रियाविशेषे तात्पर्यादिकं नावधार्यते तथाप्यस्तीति गम्यते सत्तायाः पदार्थेनाव्यभिचाररूपयोग्यतासत्त्वात् लोकेऽस्त्यर्थं विना शुद्धपदार्थानवगतेर्वाऽव्यभिचार आकाङ्क्षासत्त्वाच्च । न चार्थे विशेषे तात्पर्यग्रहेऽपि तदर्थकपदानामानन्त्येन शब्दविशेषानुमाने किं नियामकं, स्वेच्छाया एव नियामकत्वात् । तथा क्रियाया असाधनाया अभावात् पचतीत्युक्ते सर्वकारकपदानामनुमानम् अनुमितानामपि कारकान्तरव्यावृत्त्यर्थश्चैत्रोऽग्निना तण्डुलानित्यादिरनुवादः कदाचित् क्वचिदध्याहारं विनाऽपि पदवाक्ययोरर्थाभेदनिमित्तकः संकरः यथा छन्दोऽधीते इति वाक्यार्थे श्रोत्रियपदादस्य प्राणान्धारयतीति वाक्यार्थे जीवति इति पदस्य प्रयोग एतावताऽपि श्रोत्रियपदस्याद्यसमभिमिलितस्य नैवंविधार्थबोधे सामर्थ्यं शब्दशक्तिस्वभावात् ।

चोपकरणभूतान् परिकल्प्य प्राणाहुतेश्चाग्निहोत्रत्वं परिकल्प्यैवंविधेन प्राणाग्निहोत्रेण परमात्मानं वैश्वानरमाराधयेदिति–'उर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्य' इत्यादिनोपदिश्यते। अतः परमात्मा पुरुषोत्तम एव वैश्वानर इति सिद्धम् ॥

समाप्तं वैश्वानराधिकरणम् ॥ ६ ॥

इति श्रीमद्भगवद्रामानुजाचार्यचरणकृतौ शारीरकमीमांसाभाष्ये समन्वयाख्यस्य प्रथमस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

अथ प्रथमाऽध्याये तृतीयः पादः ।

अथ द्युभ्वाद्यधिकरणम् ॥ १ ॥ द्युभ्वाद्यायतनं स्वशब्दात् ॥ १ ॥

आथर्वणिका अधीयते–

"यस्मिन्द्यौः पृथिवी चान्तरिक्ष-
मोतं मनस्सह प्राणैश्च सर्वैः ।
तमेवैकं जानथ आत्मानमन्या
वाचो विमुञ्चथाऽमृतस्यैष सेतु"रिति ।

तत्र संशयः–किमयं द्युपृथिव्यादीनामायतनत्वेन श्रूयमाणो जीव उत परमात्मेति । किं युक्तम् । जीव इति । कुतः ।

"अरा इव रथनाभौ संहता यत्र नाड्यः
स एषोन्तश्चरते बहुधा जायमान"इति–

परस्मिन् श्लोके पूर्ववाक्यप्रस्तुतं द्युपृथिव्याद्यायतनं 'यत्रे'ति पुनरपि सप्तम्यन्तेन परामृश्य तस्य नाड्याधारत्वमुक्त्वा पुनरपि "स एषोऽन्तश्चरते बहुधा जायमान" इति तस्य[1] बहुधाजायमानत्वञ्चोच्यते । नाडीसम्बन्धो देवादिरूपेण बहुधाजायमानत्वञ्च जीवस्यैव धर्मः[2] । अस्मिन्नपि श्लोके "ओतं मनस्सह प्राणैश्च सर्वै"रिति प्राणपञ्चकस्य मनसश्चाश्रयत्वमुच्यमानं जीव धर्म एव । एवं जीवत्वे निश्चिते सति द्युपृथिव्याद्यायतनत्वादिकं यथाकथञ्चित्सङ्गमयितव्यम्–इत्येवं प्राप्ते प्रचक्ष्महे–

'द्युभ्वाद्यायतनं स्वशब्दात्' ।

द्युपृथिव्यादीनामायतनं परं ब्रह्म । कुतः । 'स्वशब्दात्', परब्रह्मासाधारणशब्दात् । "अमृतस्यैष सेतु"रिति परस्य ब्रह्मणोऽसाधारणशब्दः ।

---

१ तस्येति लि॰ पु॰ नास्ति ।

२ जीवधर्म इति लि॰ पु॰ ।

Digitized by Google

"तमेवं विद्वानमृत इह भवति
नान्यः पन्था अयनाय विद्यत"इति–

सर्वत्रोपनिषत्सु स एवामृतत्वप्राप्तिहेतुः[1] श्रूयते । सिनोतेश्च बन्धनार्थत्वात्सेतुः, अमृतस्य प्रापक इत्यर्थः । सेतुरिव वा सेतुः । नद्यादिषु सेतुर्हि कूलस्य प्रतिलम्भकः । संसारार्णवपारभूतस्यामृतस्यैव प्रतिलम्भक इत्यर्थः । आत्मशब्दश्च निरुपाधिकः परस्मिन् ब्रह्मणि मुख्यवृत्तः । आप्नोतीति ह्यात्मा, स्वेतरसमस्तस्य नियन्तृत्वेन व्याप्तिस्तस्यैव सम्भवति, अतस्सोऽपि तस्यैव शब्दः । "यस्सर्वज्ञस्सर्ववि"दित्यादयश्चोपरितनाः परस्यैव ब्रह्मणश्शब्दाः । नाड्याधारत्वं तस्यापि सम्भवति,

"सन्ततं शिराभिस्तु लम्बत्याकोशसन्निभ"मित्यारभ्य

"तस्याश्शिखाया मध्ये परमात्मा व्यवस्थित" इति श्रवणात् ।

'बहुधा जायमान' इत्यपि परस्मिन् ब्रह्मणि सङ्गच्छते,

"अजायमानो बहुधा विजायते
तस्य धीराः परिजानन्ति योनि"मिति–

देवादीनां समाश्रयणीयत्वाय तत्तज्जातीयरूपसंस्थानगुणकर्मसमन्वितः स्वकीयं स्वभावमऽजहदेव स्वेच्छया बहुधा विजायते परः पुरुष इत्यभिधानात् । स्मृतिरपि–

"अजोऽपि सन्नऽव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायये"ति ।

मनःप्रभृतिजीवोपकरणाधारत्वं च सर्वाधारस्य परस्यैवोपपद्यते ।

इतश्च परमपुरुषः–

मुक्तोपसृप्यव्यपदेशाच्च ॥ २ ॥

अयं द्युपृथिव्याद्यायतनभूतः पुरुषः संसारबन्धान्मुक्तैरपि प्राप्यतया व्यपदिश्यते–

---

१ हेतुश्चेति मु॰ पु॰ ।

"यदा[1] पश्यः पश्यते रुक्मवर्णं
कर्तारमीशं पुरुषं ब्रह्म योनिम् ।
तदा विद्वान्पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति[2] ॥
यथा नद्यस्स्यन्दमानास्समुद्रे
ऽस्तं[3] गच्छन्ति नामरूपे विहाय ।
तथा विद्वान्नामरूपाद्विमुक्तः
परात्परं पुरुषमुपैति दिव्य"मिति ।

संसारबन्धाद्विमुक्ता एव हि विधूतपुण्यपापा निरञ्जना[4] नामरूपाभ्यां विनिर्मुक्ताश्च । पुण्यपापनिबन्धनाऽचित्संसर्गप्रयुक्त[5]नामरूपभाक्त्वमेव हि संसारः । अतो विधूतपुण्यपापैर्निरञ्जनैः प्रकृतिसंसर्गरहितैः परेण ब्रह्मणा परमं साम्यमापन्नैः प्राप्यतया निर्दिष्टो द्युपृथिव्याद्यायतनभूतः पुरुषः परं ब्रह्मैव ।

एवं[6] परब्रह्मासाधारणशब्दादिभिः परमेव ब्रह्मेति प्रसाध्य प्रत्यगात्मासाधारणशब्दाभावाच्चायं पर एवेत्याह—

नानुमानमतच्छब्दात्प्राणभृच्च ॥ ३ ॥

यथाऽस्मिन् प्रकरणे प्रतिपादकशब्दाभावात् प्रधानं न[7] प्रतिपाद्यम्, एवं प्राणभृदपीत्यर्थः । अनुमीयत इत्य'नुमानं' परोक्तं प्रधानमुच्यते, अनुमानप्रमितत्वादनुमान[8]मिति वा । 'अतच्छब्दात्'—तद्वाचिशब्दाभावादित्यर्थः । अर्थाभावे यदव्ययमित्यव्ययीभावः ।

१ यदेति लि· पु· पाठः ।
२ उपैति दिव्यमिति लि· पु· पाठः ।
३ समुद्रे ऽस्तमिति मु· पु· पाठः ।
४ पापनिरञ्जना इति लि· पु· पाठः ।
५ प्रसक्तेति लि· पु· पाठः ।
६ एवमिति मु· पु· नास्ति ।
७ नेति लि· पु· त्रुटितम् ।
८ आनुमानमिति पु· द्वयेऽप्यत्र पाठः, न तु युक्तः ।

इतश्चायं न प्रत्यगात्मा ।

भेदव्यपदेशात् ॥ ४ ॥

"समाने वृक्षे पुरुषो निमग्नो
ऽनीशया शोचति मुह्यमानः ।
जुष्टं यदा[1] पश्यत्यन्यमीश-
मस्य महिमानमेति[2]वीतशोकः" ॥—

इत्यादिभिर्जीवाद्भिन्नत्वेनायं[3] व्यपदिश्यते । अनीशया[4]—भोग्यभूतया प्रकृत्या मुह्यमानश्शोचति जीवः । अयं यदा स्वस्मादन्यं सर्वस्येशं प्रीयमाणम्[5], अस्य—ईश्वरस्य महिमानं च निखिलजगन्नियमनरूपं पश्यति, तदा[6] वीतशोको भवति ।

प्रकरणात् ॥ ५ ॥

प्रकरणञ्चेदं परस्य ब्रह्मण इत्य"ऽदृश्यत्वादिगुणको धर्मोक्ते"रित्यत्रैव दर्शितम्,[7] नाडीसम्बन्धबहुधाजायमानत्वमनःप्राणाधारत्वैश्च प्रकरणविच्छेदाऽऽशङ्काभावमत्र पर्यहार्षं[8] ।

स्थित्यदनाभ्यां च ॥ ६ ॥

"द्वा सुपर्णा[9] सयुजा सखाया
समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्य

१ यथेति लि· पु· पाठः ।
२ महिमानमितीति पु· द्वयेऽपि पाठः, न तूपनिषदनुसारी ।
३ त्वं नायमिति लि· पु· पाठः ।
४ अनीशया—इति तु लि· पु· पाठापभ्रंशः ।
५ प्रियमाणेति पु· द्वयेऽपि पाठः, परं त्वऽशुद्धः ।
६ तथेति लि· पु· ।
७ प्रतिपादितमिति लि· पु· पाठः ।
८ 'त्वैश्च प्रकरणविच्छेदाशङ्काभावपर्यहार्षं—इति लि· पु· पाठः प्रामादिकः ।
९ सुपर्णे—इति लि· पु· पाठः ।

Digitized by Google

ऽनश्नन्नन्यो ऽभि[1]चाकशीति'' ॥-

इत्येकस्य कर्मफलादनमन्यस्य च कर्मफलमनश्नत एव दीप्यमानतया शरीरान्तःस्थितिमात्रं प्रतिपाद्यते । तत्र कर्मफलमनश्नन्दीप्यमान एव सर्वज्ञोऽमृतसेतुः सर्वात्मा द्युभ्वाद्यायतनं भवितुमर्हति, न पुनः कर्मफलमदन् शोचन्प्रत्यगात्मा । अतो द्युभ्वाद्यायतनं परमात्मेति सिद्धम् ॥

द्युभ्वाद्यधिकरणं समाप्तम् ॥ १ ॥

अथ भूमाधिकरणम् ॥ २ ॥ **भूमा संप्रसादादध्युपदेशात् ॥ ७ ॥**

इदमामनन्ति छन्दोगाः "यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा ऽथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्प''मिति। अत्रायं 'भूम'-शब्दो भावप्रत्ययान्तो व्युत्पाद्यते, तथा हि, पृथ्वादिषु बहुशब्दः पठ्यते, ततः "पृथ्वादिभ्य इमनिज्वे''ति इमनिच्-प्रत्यये कृते "बहोर्लोपो भू च बहो''रिति प्रकृतिप्रत्यययोर्विकारे भूमेति भवति । भूमा-बहुत्वमित्यर्थः । अत्र चायं[1] बहुशब्दो वैपुल्यवाची, न संख्यावाची, "यत्रान्यत् पश्यति'तदल्प''मित्यल्पप्रतियोगित्वश्रवणात्। अल्पशब्द[2]निर्दिष्टधर्मिप्रतियोगिप्रतिपादनपरत्वादेव धर्मिपरश्च[3] निश्चीयते, न धर्ममात्रपरः । तदेवं[4] भूमेति विपुल इत्यर्थः । वैपुल्यविशेष्यश्चेहात्मेत्यवगतः, "तरति शोकमात्मवि''दिति प्रक्रम्य भूमविज्ञानमुपदिश्य 'आत्मैवेदं सर्व'मिति तस्यैवोपसंहारात् । अत्र संशय्यते-किमयं भूमगुणविशिष्टः प्रत्यगात्मोत परमात्मेति । किं युक्तम् । प्रत्यगात्मेति । कुतः ' 'श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मवि'दित्यात्मजिज्ञासयोपसेदुषे नारदाय नामादिप्राणपर्यन्तेषूपास्यतयोपदिष्टेषु 'अस्ति भगवो

---

१ अन्यो अभीति लि० पु० पाठः ।

२ अत्रायमिति पाठान्तरम् ।

३ अल्पशब्देति मु० पु० पाठः ।

४ ह्येवमेवेत्युभयत्रैव पाठः, परन्तु 'श्रुतं ह्येव मे'-इत्येवोपनिषदि ।

नाम्नो भूयः, अस्ति भगवो वाचो भूय' इत्यादयः प्रश्नाः, "वाग्वाव नाम्नो भूयसी, मनो वाव वाचो भूय" इत्यादीनि च प्रतिवचनानि प्राणात् प्राचीनेषु दृश्यन्ते, प्राणे तु न पश्यामः । अतः प्राणपर्यन्त एवा-यमात्मोपदेश इति प्रतीयते । तेनेह प्राणशब्दनिर्दिष्टः प्राणसहचारी प्रत्यगात्मैव, न वायुविशेषमात्रम् । 'प्राणो ह पिता प्राणो ह माते'त्यादयश्च प्राणस्य चेतनतामवगमयन्ति 'पितृहा मातृहे'त्यादिना सप्राणेषु पितृप्रभृतिषूपमर्दकारिणि हिंसकत्वनिमित्तोपक्रोशवचनात्, तेष्वेव विगतप्राणेष्वत्यन्तोपमर्दकारिण्युपक्रोशाभाववचनाच्च हिंसायोग्यश्चेतन एव प्राणशब्दनिर्दिष्टः । अप्राणेषु स्थावरेष्वपि चेतनेषूपमर्दभावाभावयोः हिंसातदभावदर्शनादयं हिंसायोग्यतया निर्दिष्टः प्राणः प्रत्यगात्मैवेति निश्चीयते । अत एव चाऽरनाभिदृष्टान्ताद्युपन्यासेन प्राणशब्दनिर्दिष्टः पर इति न भ्रमितव्यम्, परस्य हिंसाप्रसङ्गाभावात् । जीवादितरस्य तद्भोग्यभोगोपकरणभूतस्य कृत्स्नस्याचिद्वस्तुनो जीवायत्तस्थितित्वेन प्रत्य-गात्मन्येवाऽरनाभिदृष्टान्तोपपत्तेश्च । अयमेव च 'प्राण'-शब्दनिर्दिष्टो भूमा, 'अस्ति भगवः प्राणाद् भूय' इति प्रश्नस्या'दो वाव प्राणाद् भूय' इति प्रतिवचनस्य चाभावा,द्भूमसंशब्दनात् प्राक् प्राणप्रकरणस्याविच्छेदात् । किञ्च, प्राणवेदिनोऽतिवादित्वमुक्त्वा, तमेव 'एष तु वा अतिवदती'ति प्रत्यभिज्ञाप्य, 'यस्सत्येनातिवदती'ति तस्य सत्यवदनं प्राणोपासनाङ्गत-योपदिश्य,[1]उपादेयस्य सत्यवदनस्य शेषितया पूर्वनिर्दिष्टप्राणयाथात्म्य-विज्ञानं 'यदा[2]वै विजानात्यथ सत्यं वदती'त्युपदिश्य, तत्सिद्ध्यर्थं च मनन-श्रद्धानिष्ठाप्रयत्नानुपदिश्य, तदारम्भाय च प्राप्यभूतप्राणशब्दनिर्दिष्टप्रत्य-गात्मस्व[3]रूपस्य सुखरूपताज्ञानमुपदिश्य, तस्य च सुखस्य विपुलता 'भूमा त्वेव विजिज्ञासितव्य' इत्युपदिश्यते, तदेवं प्रत्यगात्मन एवाविद्याविमुक्तं रूपं विपुलसुखमित्युपदिष्टमिति 'तरति शोकमात्मवि'दित्युपक्रमाविरोधश्च,

१ उपदिश्यत इति मु· पु· पाठः ।
२ यदेति लि· पु· पाठः ।
३ स्वेति नास्ति लि· पु· ।

अतो भूमगुणविशिष्टः प्रत्यगात्मा । यत एवं भूमगुणविशिष्टः, अत एवा[1]-'ह'मर्थे प्रत्यगात्मनि 'अहमेवाधस्तादहमुपरिष्टा'दित्यारभ्य 'अहमेवेदं सर्व'मिति प्रत्यगात्मनो वैभवमुपदिशति । एवं प्रत्यगात्मत्वे निश्चिते सति तदनुगुणतया वाक्यशेषो नेतव्य इत्येवं प्राप्तेऽभिधीयते–

'भूमा संप्रसादादध्युपदेशात्',

[2]भूमगुणविशिष्टो न प्रत्यगात्माऽपि तु परमात्मा । कुतः । संप्रसादादध्युपदेशात् । संप्रसादः–प्रत्यगात्मा, "एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत" इत्युपनिषत्प्रसिद्धेः । संप्रसादात् प्रत्यगात्मनोऽधिकतया भूमविशिष्टस्य सत्यशब्दाभिधेयस्योपदेशादित्यर्थः । सत्यशब्दाभिधेयं च परं ब्रह्म । एतदुक्तं भवति, यथा नामादिषु प्राणपर्यन्तेषु पूर्वपूर्वाधिकतयो[3]त्तरोत्तराभिधानात्पूर्वेभ्य उत्तरेषामर्थान्तरत्वम्, एवं प्राणशब्दनिर्दिष्टात्प्रत्यगात्मनोऽधिकतया निर्दिष्टस्सत्यशब्दाभिधेयस्तस्मा[4]दर्थान्तरभूत एव । सत्यशब्दनिर्दिष्ट एव भूमेति सत्याख्यं परं ब्रह्मैव भूमेत्युपदिश्यत इति । तदाह वृत्तिकारः–"भूमा त्वेवेति भूमा ब्रह्म, नामादिपरम्परया ऽऽत्मन ऊर्ध्वमस्योपदेशा"दिति । प्राणशब्दनिर्दिष्टादधिकतया सत्यस्योपदेशः कथमवगम्यत इति चेत्, "स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवती"ति प्राणविदोऽतिवादित्वमुक्त्वा[5] "एष तु वा अतिवदति यः सत्येनातिवदती"ति सत्यवेदित्वेनातिवादिनं 'तु'शब्देन पूर्वस्मादतिवादिनो व्यावर्तयति । अत

१ अत एवेत्यस्य स्थाने यत एवा–इति लि· पु· ।

२ संप्रसाद इति अत्राधिकं भवति मु· पु· ।

३ °धिकतयेति लि· पु· पाठः ।

४ °भिधेयस्तस्मा'दिति लि· पु· पाठः ।

५ अतिवादित्वे मुक्त्वेत्यपभ्रष्टः पाठो लि· पु· ।

Digitized by Google

एव 'एष तु वा अतिवदती'त्यत्र प्राणातिवादिनो न प्रत्यभिज्ञा । अतोऽस्यातिवादित्वनिमित्तं सत्यं पूर्वातिवादित्वनिमित्तात्प्राणादधिकमिति विज्ञायते। ननु च प्राणवेदिन एव सत्यवदनमङ्गत्वेनोपदिष्टम्, अतः[1] प्राणप्रकरणाविच्छेद इत्युक्तम्, नैतद्युक्तम्[2] । 'तु'शब्देन ह्यतिवाद्येवान्यः प्रतीयते, न तु तस्यैवातिवादिनः सत्यवदनाङ्गविशिष्टतामात्रम्,[3] । 'एष तु वा अग्निहोत्री यः सत्यं वदती' त्यादिष्वग्निहोत्र्यन्तराप्रतीतेः प्रतीतस्यैवाग्निहोत्रिणः सत्यवदनाङ्गविधानमिति श्लिष्टा गतिराश्रीयते । अत्र त्वतिवाद्यन्तरत्वनिमित्तं सत्यशब्दाभिधेयं परं ब्रह्म प्रतीयते । सत्यशब्दश्च "सत्यं ज्ञानमनन्तं ब्रह्म"त्यादिषु परस्मिन् ब्रह्मणि प्रयुक्तः । अतस्तद्विदस्यातिवादिनः पूर्वस्मादधिकत्वं सम्भवतीति वाक्यस्वरससिद्धमन्यत्वं न बाधितव्यम् । अतिवादित्वं हि वस्त्वन्तरात्पुरुषार्थतया ऽतिक्रान्तस्वोपास्यवस्तुवादित्वम् । नामाद्याशापर्यन्तोपास्यवस्त्वतिक्रान्तस्वोपास्यप्राणशब्दनिर्दिष्टप्रत्यगात्मवादित्वात्प्राणविदः ऽतिवादित्वम्, तस्यापि सातिशयपुरुषार्थत्वान्निरतिशयपुरुषार्थतयोपास्यपरब्रह्मवादिन एव साक्षादतिवादित्वमिति 'एष तु वा अतिवदति यस्सत्येनातिवदती'त्युक्तम् । सत्येनेतीत्थंभूतलक्षणे तृतीया, सत्येन[4] परेण ब्रह्मणोपास्येनोपलक्षितो योऽतिवदतीत्यर्थः । अत एवैवं शिष्यः प्रार्थयते "सोऽहं भगवः सत्येनातिवदानी[5]"ति, आचार्यश्च "सत्यं त्वेव विजिज्ञासितव्य" मित्याह । "आत्मनः प्राण" इति च प्राणशब्दनिर्दिष्टस्यात्मन उत्पत्तिरुच्यते । अतः 'तरति शोकमात्मवि'दिति प्रक्रान्त आत्मा प्राण[6]शब्दनिर्दिष्टादन्य इति गम्यते । यत्तूक्तमस्ति भगवः प्राणाद्भूय इति प्रश्नस्याऽभावाच

१ 'पदिष्टतः-इति लि० पु० पा भ्रंशः ।

२ नैतद्युक्तमिति लि० पु० त्रुटितम् ।

३ मात्रे-इति लि० पु० भ्रंशः ।

४ सत्येवेति लि० पु० पाठः ।

५ वदामीति लि० पु० पाठः ।

६ प्रक्रान्त आत्मनो प्राणेति लि० पु० पाठो न युक्तः ।

प्राणाद्भूय इति प्रतिवचनस्य चादर्शना[1]त्प्रक्रान्त आत्मोपदेशः प्राणोपदेशपर्यवसानो गम्यत इति, तदयुक्तम्, न हि प्रश्नप्रतिवचनाभ्यामेवार्थान्तरत्वं गम्यते, प्रमाणान्तरेणापि तत्सम्भवात् । उक्तं च प्रमाणान्तरम् । अस्ति भगवः प्राणाद् भूय इत्यपृच्छतो[2]ऽयमभिप्रायः—नामादिष्वाशापर्यन्तेष्वप्यु[3]त्तरोत्तरेषूपदिष्टेषु ततद्विदिन आचार्येणातिवादित्वं[4] नोक्तम्. प्राणशब्दनिर्दिष्टप्रत्यगात्मयाथात्म्यवेदिनस्तु पुरुषार्थभूयस्त्वातिशयं मत्वानेन "स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवती"त्यतिक्रान्तवस्तुवादि[5]त्वमुक्तम् । अतोऽत्रैवात्मोपदेशः समाप्त इति मत्वा शिष्यो न पप्रच्छ । आचार्यस्त्विदमपि सातिशयं मत्वा निरतिशयपुरुषार्थभूतं सत्यशब्दाभिधेयं परं ब्रह्म "एष तु वा अतिवदति यः सत्येनातिवदतीति स्वयमेवोपचिक्षेप । शिष्योऽपि परमपुरुषार्थरूपे परस्मिन् ब्रह्मण्युपक्षिप्ते तत्स्वरूपतदुपासन[6]याथात्म्यबुभुत्सया 'सोऽहं भगवः सत्येनातिवदानी'ति प्रार्थयामास । ततो ब्रह्मसाक्षात्कारनिमित्तातिवादित्वसिद्धये ब्रह्मसाक्षात्कारोपायभूतं ब्रह्मोपासनं 'सत्यं त्वेव विजिज्ञासितव्य'मित्युपदिश्य, तदुपायभूतं ब्रह्ममननं "मतिस्त्वेव विजिज्ञासितव्य"त्युपदिश्य, श्रवणप्रतिष्ठार्थत्वान्मननस्य मननोपदेशेन श्रवणमर्थसिद्धं मत्वा श्रवणोपायभूतां ब्रह्मणि श्रद्धां "श्रद्धा त्वेव विजिज्ञासितव्ये"त्युपदिश्य, तदुपायभूतां च निष्ठां "निष्ठा त्वेव विजिज्ञासितव्ये"त्युपदिश्य, तदुपायभूत तदुद्योगभूत[7]प्रयत्नरूपां कृतिमपि "कृतिस्त्वेव विजिज्ञासितव्ये" त्युपदिश्य, श्रवणाद्युपक्रमरूपकृतिसिद्धये प्राप्यभूतस्य सत्यशब्दाभिहितस्य ब्रह्मणः सुखरूपता ज्ञातव्येति "सुखं त्वेव विजिज्ञासितव्य'मित्युपदिश्य,

१ अस्ति भगवः प्राणाद्भूय इति प्रश्नस्यादौ वाव प्राणाद्भूय इति प्रश्नस्यादौ वाव प्राणाद्भूय इति प्रतिवचनस्यादर्शनादिति लि· पु· विभ्रष्टः पाठः ।

२ इत्यत्र पृच्छत इति लि· पु· पाठो नैव युक्तः ।

३ अपिशब्दो नास्ति लि· पु· ।

४ 'वादित्वे-इत्यपभ्रंशः लि· पु· ।

५ वस्त्वतिवादीति लि· पु. ।

६ तत्स्वरूपं तदुपासनमिति व्यस्तपाठो लि· पु· प्रामादिकः ।

७ भूतेति नास्ति मु· पु· ।

Digitized by Google

निरतिशयविपुलमेव सुखं परमपुरुषार्थरूपं भवतीति तस्यैव ब्रह्मणः सुखरूपस्य निरतिशयविपुलता ज्ञातव्येति "भूमा त्वेव विजिज्ञासितव्य" इत्युपदिश्य, निरतिशयविपुलसुखरूपस्य ब्रह्मणो लक्षणमिदमुच्यते "यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमे"ति । अयमर्थः—अनवधिकातिशयसुखरूपे ब्रह्मण्यनुभूयमाने ततोऽन्यत्किमपि न पश्यत्यनुभविता, ब्रह्मस्वरूपतद्विभूत्यन्तर्गतत्वाच्च कृत्स्नस्य वस्तुजातस्य। अत ऐश्वर्यापरपर्यायविभूतिगुणविशिष्टं निरतिशयसुखरूपं ब्रह्माऽनुभवंस्तद्व्यतिरिक्तस्य वस्तुनोऽभावादेव किमप्यन्यन्न पश्यति, अनुभाव्यस्य सर्वस्य सुखरूपत्वादेव दुःखं च न पश्यति। तदेव हि सुखम्, यदनुभूयमानं पुरुषानुकूलं भवति। ननु चेदमेव जगद् ब्रह्मणोऽन्यतया ऽनु[1]भूयमानं दुःखरूपं परिमितसुखरूपं च भवत्कथमिव ब्रह्मविभूतित्वेन तदात्मकतया ऽनुभूयमानं सुखरूपमेव भवेत् । उच्यते—कर्मवश्यानां क्षेत्रज्ञानां ब्रह्मणो ऽन्यत्वेनानुभूयमानं कृत्स्नं जगत्तत्तत्कर्मानुरूपं दुःखं च परिमितसुखं च भवति। अतो ब्रह्मणो[2]ऽन्यतया परिमितसुखत्वेन दुःखत्वेन च जगदनुभवस्य कर्मनिमित्तत्वात् कर्मरूपाविद्याविमुक्तस्य तदेव जगद् विभूतिगुणविशिष्टब्रह्मानुभवान्तर्गतं सुखमेव भवति, यथा पित्तोपहतेन पीयमानं पयः पित्ततारतम्येनाल्पसुखं विपरीतं च भवति । तदेव पयः पित्तानुपहतस्य सुखायैव भवति। यथैव राजपुत्रस्य पितुर्लीलोपकरणमतथात्वेना[3]नुसन्धीयमानं प्रियत्वमनुपगतं तथात्वानुसन्धाने प्रियतमं भवति, तथा निरतिशयानन्दस्वरूपस्य ब्रह्मणोऽनवधिकातिशयासंख्येयकल्याणगुणाकरस्य लीलोपकरणं तदात्मकं चानुसन्धीयमानं जगन्निरतिशयप्रीतये भवत्येव । अतो जगदैश्वर्यविशिष्टमनवधिकातिशयसुखरूपं ब्रह्मानुभवंस्ततोऽन्यत् किमपि न पश्यति,[4] दुःखं च न पश्यति । एतदेवोपपादयति वाक्यशेषः "स वा एष एवं पश्यन्नेवं

---

१ अनु—इति· लि· पु· पाठः ।

२ ब्रह्मणोऽन्यत्वेनानुभूयमानम् अन्यतयेति मु· पु· ऽत्राधिकं भवति न तु युक्तम् ।

३ करणमेव तथात्वेनेति लि· पु· प्रामादिकम् ।

४ किमपि नपश्यतीति लि· पु· ।

मन्वान एवं वि[1]जानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स[2] स्वराड् भवति तस्य सर्वेषु लोकेषु कामचारो भवति अथ येऽन्यथाऽतो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति तेषां सर्वेषु लोकेष्वऽकामचारो भवती"ति। स्वराट्—अकर्मवश्यः। अन्यराजानः—कर्मवश्याः। तथा,

"न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम्।
सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वश" इति च।

निरतिशयसुखरूपत्वं च ब्रह्मण 'आनन्दमयोऽभ्यासा'दित्यत्र प्रपञ्चितम्। अतः प्राणशब्दनिर्दिष्टात्प्रत्यगात्मनोऽर्थान्तरभूतस्य सत्यशब्दाभिधेयस्य ब्रह्मणो भूमेत्युपदेशाद्भूमा परं ब्रह्म।

धर्मोपपत्तेश्च ॥ ८ ॥

अस्य भूम्नो ये धर्मा आम्नायन्ते तेऽपि परस्मिन्नेवोपपद्यन्ते। 'एतदमृत'मिति स्वाभाविकममृतत्वम् 'स्वे महिम्नी'त्यनन्याधारत्वं[3] 'स एवाधस्ता'दित्यादि 'स एवेदं सर्व'मिति सर्वात्मकत्वम्[4] 'आत्मनः प्राण' इत्यादि प्राणप्रभृतिसर्वस्योत्पादकत्वमित्यादयो हि धर्माः परमात्मन एव। यत्त्व'ऽहमेवाधस्ता'दित्यादिना सर्वात्मकत्व[5]मुपदिष्टम्, तद्भूमविशिष्टस्य ब्रह्मणोऽहंग्रहेणोपासन[6]मुपदिश्यते, "अथाऽतोऽहङ्कारादेश" इत्यहंग्रहोपदेशोपक्रमात्। अहं[7]मर्थस्य प्रत्यगात्मनोऽपि ह्यात्मा परमात्मेत्यन्तर्यामिब्राह्मणादिषूक्तम्। अतः प्रत्यगर्थस्य परमात्मपर्यवसानादऽहंशब्दोऽपि परमात्मपर्यवसायीति प्रत्यगात्मशरीरकत्वेन परमात्मानुसन्धानार्थोऽयमहंग्रहोपदेशः। परमात्मनः सर्वशरीरतया सर्वात्मत्वात् प्रत्यगात्मनोऽप्यात्मा परमात्मा। तत्रैव[8] "अथात आत्मादेश" इत्या-

१ मन्वानरूपं वि-इति लि० पु०।
२ स इति नास्ति लि० पु०।
३ महिम्नीत्यारभ्यानन्याधारत्वमिति लि० पु० पाठः।
४ सर्वात्मत्वमिति लि० पु० पाठः।
५ ब्रह्मणोपासनमिति लि० पु० पाठः।
६ स अहमिति लि० पु० पाठः।

हिना "ऽऽत्मैवेदं सर्व"मित्यन्तेनोच्यते । एतदेवो[1]पपादयितुं प्रत्यगात्मनोऽप्यात्मभूतात्परमात्मनः सर्वास्योत्पत्तिरुच्यते "तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मनः प्राण आत्मनः आकाश" इत्यादिनोपासकस्यान्तर्यामितयाऽवस्थितात्परमात्मनः सर्वस्योत्पत्तिरित्यर्थः । अतः परमात्मनः प्रत्यगात्मशरीरकत्वज्ञानप्रतिष्ठार्थमहंग्रहोपासनं कर्तव्यम् । तस्माद्भूमविशिष्टः परमात्मेति सिद्धम् ॥

भूमाधिकरणं समाप्तम् ॥ २ ॥

अक्षराधिकरणम् ॥ ३ ॥ **अक्षरमम्बरान्तधृतेः ॥ ९ ॥**

वाजसनेयिनो गार्गीप्रश्ने[2] समामनन्ति—"स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छाय"मित्यादि । तत्र संशयः—किमेतदक्षरं प्रधानम्, जीवो वा, उत परमात्मेति । किं युक्तम् । प्रधानमिति । कुतः । "अक्षरात्परतः पर" इत्यादिष्वक्षरशब्दस्य प्रधाने प्रयोगदर्शनात्, अस्थूलत्वादीनां च तत्र समन्वयात् । "यया तदक्षरमधिगम्यत" इत्यादिषु परस्मिन्नप्यक्षरशब्दो दृश्यत इति चेन्न, प्रमाणान्तरप्र[3]सिद्धश्रुतिप्रसिद्धयोः प्रमाणान्तरप्रसिद्धस्य प्रथमप्रतीतेः, प्रतीतपरिग्रहे विरोधाभावात् । किंच, "यदूर्ध्वं गार्गि दिवो यदवाक्[4] पृथिव्या" इत्यारभ्य सर्वस्य कालत्रितयवर्तिनः कारणभूताकाशाधारत्वे प्रतिपादिते "कस्मिन्नु[5] खल्वाकाश ओतश्च प्रोतश्चे"त्याकाशस्यापि कारणं तदाधारभूतं किमिति पृष्टे प्रत्यु[6]च्यमानमक्षरं सर्वविकारकारणतया तदाधारभूतं प्रमाणान्तरप्रसिद्धं[7] प्रधानमिति प्रतीयते । अतोऽक्षरं प्रधानम् । इति प्राप्ते—उच्यते—

---

१ तदेवेदमिति लि· पु· ।
२ गार्गिप्रश्न इति पु· द्वयेऽपि पाठः ।
३ प्रेति नास्ति लि· पु· ।
४ अर्वागिति मु· पु· पाठः प्रायः सर्वत्र । लि· पु· अत्र 'अवा'गिति ।
५ न्विति नास्ति लि· पु· ।
६ प्रतीति नास्ति लि· पु· ।
७ 'धारभूतं प्रसिद्धमिति मु· पु· ।

'अक्षरमम्बरान्तधृतेः'

अक्षरं परं ब्रह्म। कुतः। अम्बरान्तधृतेः, अम्बरस्य–आकाशस्य अन्तः पारभूतम् अव्याकृतमम्बरान्तः, तस्य धृतेः। तदाधारतयाऽस्याक्षरस्योपदेशादिति यावत्। अयमर्थः–"कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चे"त्यत्राकाशशब्दनिर्दिष्टं न वायुमदम्बरम्, अपि तु तत्पारभूतमव्याकृतम्, अतस्तस्याव्याकृतस्याप्याधारत्वेनोच्यमानमक्षरं नाव्याकृतं भवितुमर्हतीति। नन्वाकाशशब्दनिर्दिष्टो न वायुमानिति कथमवगम्यते? उच्यते, "यदूर्ध्वं गार्गि दिवो यदवाक्[1] पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते आकाश एव तदोतं च प्रोतं चे"त्युक्ते त्रैकाल्यवर्त्तिनो विकारजातस्याधारतया निर्दिष्ट आकाशो न वायुमदाकाशो भवितुमर्हति, तस्यापि विकारान्तर्गतत्वात्। अतोऽत्राकाशशब्दनिर्दिष्टं भूतसूक्ष्ममिति प्रतीयते। तत[2]स्तस्यापि भूतसूक्ष्मस्याधारभूतं किमिति पृच्छ्यते[3] "कस्मिन्नु[4] खल्वाकाश ओतश्च प्रोतश्चे"ति। अतस्तदाधारतया निर्दिश्यमानमक्षरं न प्रधानं भवितुमर्हति। यत्तु श्रुतिप्रसिद्धात् प्रमाणान्तरप्रसिद्धं प्रथमं प्रतीयत इति, तन्न, अक्षरशब्दस्यावयवशक्त्या स्वार्थप्रतिपादने प्रमाणान्तरानपेक्षणात्। सम्बन्धग्रहणदशायामर्थस्वरूपं येन प्रमाणेनावगम्यते, न तत्प्रतिपादनदशायामपेक्षणीयम्।

एवं तर्ह्यक्षरशब्दनिर्दिष्टो जीवोऽस्तु, तस्य भूतसूक्ष्मपर्यन्तस्य कृत्स्नस्याचिद्वस्तुन आधारत्वोपपत्तेः, अस्थूलत्वाद्युच्यमानविशेषणोपपत्तेश्च। "अव्यक्तमक्षरे लीयते" "यस्याव्यक्तं शरीरम्, यस्याक्षरं शरीरम्" "क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते" इत्यादिषु प्रत्यगात्मन्यप्यक्षरशब्दप्रयोगदर्शनादित्यत्रोत्तरम्–

सा च प्रशासनात् ॥ १० ॥

१ अर्वागिति पुनः पुस्तकद्वयेऽपि।

२ तत इति नास्ति लि· पु·।

३ पृच्छते–इति लि· पु·।

४ तस्मिन्नु–इति मु· पु· पाठः।

Digitized by Google

सा चाम्बरान्तधृतिरस्याक्षरस्य प्रशासनादेव भवतीत्युपदिश्यते, “एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि निमेषा मुहूर्ता अहोरात्राण्यर्द्धमासा मासा[1] ऋतवः संवत्सरा इति विधृतास्तिष्ठन्ती”त्यादिना प्रशासनं प्रकृष्टं शासनम् । न चेदृशं स्वशासनाधीन[2]सर्ववस्तुविधरणं बद्धमुक्तोभयावस्थस्यापि प्रत्यगात्मनः सम्भवति । अतः पुरुषोत्तम एव प्रशासितृअक्षरम् ।

अन्यभावव्यावृत्तेश्च ॥ १२ ॥

अन्यभावः-अन्यत्वं, प्रधानादिभावः । अस्याक्षरस्य[3] परमपुरुषादन्यत्वं वाक्यशेषेण[4] व्यावर्त्यते “तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृ श्रुतं श्रोतृ अमतं मन्त्रविज्ञातं विज्ञातृ नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञात्रेतस्मिन्नु[5] खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चे”ति[6] । अत्र द्रष्टृत्वश्रोतृत्वाद्युपदेशादस्याक्षरस्याचेतनभूतप्रधानभावो व्यावर्त्यते, सर्वैरदृष्टस्यैव सतस्सर्वस्य द्रष्टृत्वाद्युपदेशाच्च प्रत्यगात्मभावो व्यावर्त्यते । अत इयमन्यभावव्यावृत्तिरस्याक्षरस्य परमपुरुषतां द्रढयति । एवं वा ऽन्यभावव्यावृत्तिः, अन्यस्य सद्भावव्यावृत्तिरन्यभावव्यावृत्तिः । यथैतदक्षरमन्यैरदृष्टं सदन्येषां द्रष्टृ च सत् स्वव्यतिरिक्तस्य समस्तस्याधारभूतम्, एवमनेनादृष्टमेतस्य द्रष्टृ च सदेतस्याधारभूतमन्यन्नास्तीति वदन् ‘नान्यदतोऽस्ति द्रष्टृ’त्यादिवाक्यशेषो ऽन्यस्य सद्भावं व्यावर्तयन्नस्याक्षरस्य प्रधानभावं प्रत्यगात्मभावं च प्रतिषेधति । किं च, एतस्य वा अक्षरस्य

---

१ मासा इति नास्ति पु· द्वयेऽपि ।

२ शासनं स्वशासनाधीनेति मु· पु· पाठः ।

३ अक्षरस्यापीति लि· पु· पाठः ।

४ शेषे-इति मु· पु· पाठः ।

५ तस्मिन्-इति लि· पु· पाठः ।

६ ‘श्चेतीति-इति लि· पु· पाठः ।

प्रशासने गार्गि ददतो[1] मनुष्याः[2] प्रशंसन्ति यजमानं देवा दर्वीं पितरोऽन्वायत्ता” इति श्रौतं स्मार्तञ्च यागदानहोमादिकं सर्वं कर्म यस्याज्ञया[3] प्रवर्तते[3] तदक्षरं परब्रह्मभूतः पुरुषोत्तम एवेति विज्ञायते । अपि च, “यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मिँल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद् भवति यो वा एतदक्षरं गार्ग्यऽ[4]विदित्वा[4]ऽस्माल्लोकात् प्रैति स कृपणोऽथ य एतदक्षरं गार्गि विदित्वाऽस्माल्लोकात्प्रैति स ब्राह्मणः” इति यदज्ञानात्संसारप्राप्तिः, यज्ज्ञानाच्चामृतत्वप्राप्तिः, तदक्षरं परं[5] ब्रह्मैवेति सिद्धम् ॥

अक्षराधिकरणं समाप्तम् ॥ ३ ॥

ईक्षतिकर्माधिकरणम् ४ । **ईक्षतिकर्मव्यपदेशात्सः ॥ १२ ॥**

आथर्वणिकाः सत्यकामप्रश्नेऽधीयते—“यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण[6] परं पुरुषमभिध्यायीत स तेजसि सूर्ये सम्पन्नः यथा पादोदरस्त्वचा विनिर्मुच्यत एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते,” इति । अत्र ध्यायतीक्षतिशब्दावेकविषयौ[7], ध्यानफलत्वादीक्षणस्य 'यथाक्रतुरस्मिँल्लोके पुरुष' इति न्यायेन ध्यानविषयस्यैव प्राप्यत्वात्, परं पुरुषमित्युभयत्र कर्मभूतस्यार्थस्य प्रत्यभिज्ञानाच्च । तत्र संशय्यते—किमिह परं पुरुषमिति निर्दिष्टो जीवसमष्टिरूपाण्डाधिपति[8]श्चतुर्मुख उत सर्वेश्वरः पुरुषोत्तम इति । किं युक्तम् । समष्टिक्षेत्रज्ञ इति । कुतः । “स यो ह वै तद् भगवन्मनुष्येषु प्रायणान्तमोङ्कारमभिध्यायीत कतमं वाव स तेन लोकं जयती”ति प्रक्रम्यैकमात्रं प्रणवमुपासीनस्य

---

१ वदत इति लि· पु· ।
२ मनुष्यानिति क्वचित् ।
३ परस्याज्ञाप्रवर्तते–इति लि· पु· पाठः ।
४ गार्गि विदित्वेति मु· पु· अत्र पाठः ।
५ परमिति नास्ति लि· पु· ।
६ त्रिमात्रेणोमित्यनेनैवेति पु· द्वयेऽपि पाठः ।
७ एकौ विवेकविषयाविति लि· पु· पाठः ।
८ रूपेन्द्राधिप इति लि· पु· पाठः ।

Digitized by Google

जीवमुख्यप्राणलिङ्गान्नेति चेत्, न, उपासात्रैविध्या[1]-दाश्रितत्वादिह[2] तद्योगात् ॥ ३२ ॥

"न वाचं विजिज्ञासीत वक्तारं विद्यात् त्रिशीर्षाणं त्वाष्ट्रमहनम-रुन्मुखान् यतीन् शालावृकेभ्यः प्रायच्छम्" इत्यादिजीवलिङ्गात्, "यावद्-स्मिन् शरीरे प्राणो वसति तावदायुः अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयती"ति मुख्यप्राणलिङ्गाच्च नाध्यात्मसम्बन्धभूमेति चेत्, उपासात्रैविध्याद्धेतोः—उपासनात्रैविध्यमुपदेष्टुं तत्तच्छब्देनाभिधानं निखि-लकारणभूतस्य ब्रह्मणः । स्वरूपेणानुसन्धानं भोक्तृवर्गशरीरकत्वेनानुस-न्धानं भोग्यभोगोपकरणशरीरकत्वेनानुसन्धानञ्चेति त्रिविधमनुसन्धान-मुपदेष्टुमित्यर्थः । तदिदं त्रिविधं ब्रह्मानुसन्धानं प्रकरणान्तरेऽप्याश्रितम् "सत्यं ज्ञानमनन्तं ब्रह्म" "आनन्दो ब्रह्मे"त्यादिषु स्वरूपानुसन्धानं "तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत् निरुक्तञ्चा-निरुक्तं च निलयनं चानिलयनञ्च विज्ञानञ्चाविज्ञानञ्च सत्यं चानृ-तञ्च सत्यमभव"दित्यादिषु भोक्तृशरीरतया भोग्यभोगोपकरणशरीरतया चानुसन्धानम् । इहापि प्रकरणे तत् त्रिविधमनुसन्धानं युज्यत एवेत्य-र्थः । एतदुक्तम्भवति । यत्र हिरण्यगर्भादिजीवविशेषाणां प्रकृत्याद्यचेतन-विशेषाणाञ्च परमात्मासाधारणधर्मयोगस्तदभिधायिनां शब्दानां परमा-त्मवाचिशब्दैः सामानाधिकरण्यं वा दृश्यते, तत्र परमात्मनस्तत्तद्वि-दचिद्विशेषान्तरात्मत्वानुसन्धानं प्रतिपिपादयिषितमिति ।

अतोऽत्रेन्द्रप्राणशब्दनिर्दिष्टो जीवादर्थान्तरभूतः परमात्मैवेति सिद्धम् ॥

समाप्तमिन्द्रप्राणाधिकरणम् ॥

इति श्रीमद्भगवद्रामानुजाचार्यचरणकृतौ शारीरकमीमांसाभाष्ये समन्वयाख्यस्य प्रथमस्याध्यायस्य प्रथमः पादः समाप्तः ॥ १ ॥

---

१ उपास्यत्रैविध्यादित्येकस्मिन्पुस्तके पाठः, स तु न युक्तः, भाष्याद्यापरिगृही-तत्वात् ।

२ इह चेति चकारघटितः सूत्रपाठ एकस्मिन् पुस्तके भवति, न तु युक्तः, प्रायो-ऽनुपलम्भात् 'इह तद्योगादित्येतद्व्याचष्टे इहापीती'तिश्रुतप्रकाशिकाविरोधाच्च ।

अथ प्रथमाऽध्याये द्वितीयः पादः ।

प्रथमे पादे, ऽधीतवेदः पुरुषः कर्ममीमांसाश्रवणाधिगतकर्मयाथात्म्यविज्ञानः केवलकर्मणामल्पास्थिरफलत्वमवगम्य वेदान्तवाक्येषु चाऽऽपातप्रतीतानन्तस्थिरफलब्रह्मस्वरूपतदुपासनसमुपजातपरमपुरुषार्थलक्षणमोक्षापेक्षोऽवधारितपरिनिष्पन्नवस्तुबोधनशब्दशक्तिर्वेदान्तवाक्यानां परस्मिन् ब्रह्मणि निश्चितप्रमाणभावस्तदितिकर्त्तव्यतारूपशारीरकमीमांसाश्रवणमारभेतेत्युक्तम् ।

शास्त्रारम्भसिद्धये, अनन्तविचित्रस्थिरत्रसरूपभोक्तृभोग्यभोगोपकरणभोगस्थानलक्षणनिखिलजगदुदयविभवलयलीलं महानन्दैककारणं परं ब्रह्म "यतो वा इमानी"त्यादिवाक्यं बोधयतीति च प्रत्यपादि, जगदेककारणं परं ब्रह्म सकलेतरप्रमाणाविषयतया शास्त्रैकप्रमाणकमित्यभ्यधायि, शास्त्रप्रमाणकत्वञ्च ब्रह्मणः प्रवृत्तिनिवृत्त्यन्वयविरहेऽपि स्वरूपेणैव परमपुरुषार्थभूते परस्मिन् ब्रह्मणि वेदान्तवाक्यानां समन्वयात्सिध्यत इत्यब्रूम, निखिलजगदेककारणतया वेदान्तवेद्यं ब्रह्म वेदवाक्यान्वयादानुमानिकप्रधानादर्थान्तरभूतश्चेतनविशेष एवेत्युपापीपदाम, स च स्वाभाविकाऽनवधिकातिशयानन्दविपश्चित्त्वनिखिलचेतनभयाभयहेतुत्वसत्यसङ्कल्पत्वसमस्तचेतनाचेतनान्तरात्मत्वादिभिर्बद्धमुक्तोभयावस्थाज्जीवशब्दाभिलपनीयाच्चार्थान्तरभूत इति च समार्थयामहि[1] स चाप्राकृताकर्मनिमित्तस्वासाधारणदिव्यरूप इत्युदैरिराम, आकाशप्राणाद्यचेतनविशेषाभिधायिभिर्जगत्कारणतया प्रसिद्धवन्निर्दिश्यमानस्सकलेतरचेतनाचेतनविलक्षणः स एवेति समगरिष्महि, परतस्यासाधारणनिरतिशयदीप्तियुक्तज्योतिश्शब्दाभिधेयो द्युसम्बन्धितया प्रत्यभिज्ञानात्स एवेत्यातिष्ठामहि, परमकारणासाधारणामृतत्वप्राप्तिहेतुभूतः परमपुरुष एव शास्त्रदृष्ट्येन्द्रादिशब्दैरभिधीयत इत्यब्रूमहि । तदेवमतिपतितसकलेतरप्रमाणसम्भावनाभूमिस्सार्वज्ञ्यसत्यसङ्कल्पत्वाद्यपरिमितोदारगुणसागरतया स्वेत-

१ समादधीमहीति पाठान्तरम्, न तु युक्तम् ।

रसमस्तवस्तुविलक्षणः परं ब्रह्म पुरुषोत्तमो नारायण एव वेदान्तवेद्य इत्युक्तम् ।

अतः परं द्वितीयतृतीयचतुर्थेषु पादेषु, यद्यपि वेदान्तवेद्यं ब्रह्मैव, तथाऽपि कानिचिद् वेदान्तवाक्यानि प्रधानक्षेत्रज्ञान्तर्भूतवस्तुविशेषस्वरूपप्रतिपादनपराण्येवेत्याशङ्क्य तन्निरसनमुखेन तत्तद्वाक्योदितकल्याणगुणाकरत्वं ब्रह्मणः प्रतिपाद्यते । तत्राऽस्पष्टजीवलिङ्गानि वाक्यानि द्वितीये पादे विचार्य्यन्ते, स्पष्टलिङ्गानि तृतीये, तत्प्रतिपादनच्छायानुसारीणि चतुर्थे ॥

अथ सर्वत्र प्रसिध्यधिकरणम् १ ।

सर्वत्र प्रसिद्धोपदेशात् ॥ १ ॥

इदमाम्नायते छान्दोग्ये "अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूप"इत्यादि । अत्र स क्रतुङ्कुर्वीतेति प्रतिपादितस्योपासनस्य उपास्यो मनोमयः प्राणशरीर इति निर्दिश्यत इति प्रतीयते । तत्र संशयः, किं मनोमयत्वादिगुणकः क्षेत्रज्ञ उत परमात्मेति । किं युक्तम् । क्षेत्रज्ञ इति । कुतः । मनःप्राणयोः क्षेत्रज्ञोपकरणत्वात्, परमात्मनस्तु"प्राणो ह्यमना" इति तत्प्रतिषेधाच्च । न च 'सर्वं खल्विदं ब्रह्मे'ति पूर्ववाक्यनिर्दिष्टं ब्रह्मात्रोपास्यतया सम्बन्धुं शक्यते, 'शान्त उपासीते'त्युपासनोपकरणशान्तिनिर्वृत्त्युपायभूतब्रह्मात्मकत्वोपदेशायोपात्तत्वात् । न च 'स क्रतुं कुर्वीते'त्युपासनस्योपास्यसाकाङ्क्षत्वाद्वाक्यान्तरस्थमपि ब्रह्म सम्बध्यत इति शक्यं वक्तुम्, स्ववाक्योपात्तेन मनोमयत्वादिगुणकेन निराकाङ्क्षत्वात् । 'मनोमयः प्राणशरीर' इत्यनन्यार्थतया निर्दिष्टस्य विभक्तिविपरिणाममात्रेणोभयाकाङ्क्षानिवृत्तिसिद्धेः ।

एवं निश्चिते जीवत्वे 'एतद्ब्रह्मे'त्युपसंहारस्थं ब्रह्मपदमपि जीव एव पूजार्थं प्रयुक्तमित्यध्यवसीयत इत्येवं प्राप्ते ब्रूमः, "सर्वत्र प्रसिद्धोपदेशात्" । मनोमयत्वादिगुणकः परमात्मैव । कुतः । सर्वत्र वेदान्तवाक्येषु परस्मिन्नेव ब्रह्मणि प्रसिद्धस्य मनोमयत्वादेरिहोपदेशात्, प्रसिद्धं हि

Digitized by Google

मनोमयत्वादि ब्रह्मणः, यथा "मनोमयः प्राणशरीरनेता," "स एषो-ऽन्तर्हृदय आकाशस्तस्मिन्नयं पुरुषो मनोमयोऽमृतमयो[1] हिरण्मयः," "हृदा मनीषा मनसाऽभिक्लृप्तो य एतं विदुरमृतास्ते भवन्ति," "न चक्षुषा गृह्यते नापि वाचा मनसा तु विशुद्धेन" तथा "प्राणस्य प्राणः," "अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति," "सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते" इत्यादिषु। मनोमयत्वम्, विशुद्धेन मनसा ग्राह्यत्वम्। प्राणशरीरत्वम्, प्राणस्याधा-रत्वनियन्तृत्वञ्च। एवं च सति 'एष म आत्माऽन्तर्हृदय एतद्ब्रह्मे'ति ब्रह्म-शब्दोऽपि मुख्य एव भवति। 'अप्राणो ह्यमना'इति मनआयत्तं ज्ञानं प्राणायत्तां स्थितिञ्च ब्रह्मणो निषेधति।

अथवा—'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीते'त्यत्रैवो-पासनं विधीयते, सर्वात्मकं ब्रह्म शान्तः सन्नुपासीतेति। "स क्रतुं कुर्वी-ते"ति तस्यैव गुणोपादानार्थोऽनुवादः। उपादेयाश्च गुणा मनोमयत्वा-दयः। अतः सर्वात्मकं ब्रह्म मनोमयत्वादिगुणकमुपासीतेति वाक्यार्थः। तत्र सन्देहः, किमिह ब्रह्मशब्देन प्रत्यगात्मा निर्दिश्यत उत पर-मात्मेति। किं युक्तम्। प्रत्यगात्मेति। कुतः। तस्यैव सर्वपदसामानाधि-करण्यनिर्देशोपपत्तेः, सर्व-शब्दनिर्दिष्टं हि ब्रह्मादिस्तम्बपर्य्यन्तं कृत्स्नं जगत्, ब्रह्मादिभावश्च प्रत्यगात्मनोऽनाद्यविद्यामूलकर्मविशेषोपाधिको विद्यत एव, परस्य तु ब्रह्मणः सर्वज्ञस्य सर्वशक्तेरपहतपाप्मनो निरस्त-समस्ताविद्यादिदोषगन्धस्य समस्तहेयाकरसर्वभावो नोपपद्यते। प्रत्यगा-त्मन्यपि क्वचित्क्वचिद्ब्रह्मशब्दः प्रयुज्यते, अत एव 'परमात्मा परं ब्रह्मे'ति परमेश्वरस्य क्वचित्सविशेषणो निर्देशः। प्रत्यगात्मनश्च निर्मुक्तोपाधे-र्बृहत्त्वं च विद्यते, "स चानन्त्याय कल्पत" इति श्रुतेः। अविदुषस्तस्यैव कर्मनिमित्तत्वाज्जगज्जन्मस्थितिलयानां'तज्जला'निति हेतुनिर्देशोऽप्युप-

[1] मनोमयो ऽमृतो हिरण्मय इति पाठान्तरम्, अमृतं हिरण्मय इति पुस्त-कान्तरे।

पद्यते। तदयमर्थः—अयं जीवात्मा स्वतोऽपरिच्छिन्नरूपत्वेन ब्रह्मस्वरूपः सन्नऽनाद्यविद्यया देवतिर्य्यङ्मनुष्यस्थावरात्मनाऽवतिष्ठत इति।

अत्र प्रतिविधीयते सर्वत्र प्रसिद्धोपदेशात्, सर्वत्र सर्वं खल्विदं ब्रह्मेति निर्दिष्टे सर्वस्मिन् जगति ब्रह्मशब्देन तदात्मतयाऽभिधीयमानं परं ब्रह्मैव, न प्रत्यगात्मा। कुतः। "प्रसिद्धोपदेशात्", "तज्जला"निति हेतुतः, "सर्वं खल्विदं ब्रह्मे"ति प्रसिद्धवदुपदेशात्[१]। ब्रह्मणो जातत्वाद् ब्रह्मणि लीनत्वाद्ब्रह्माधीनजीवनत्वाच्च हेतोर्ब्रह्मात्मकं सर्वं खल्विदं जगदित्युक्ते यस्माज्जगज्जन्मस्थितिलया वेदान्तेषु प्रसिद्धास्तदेवात्र ब्रह्मेति प्रतीयते, तच्च परमेव ब्रह्म। तथाहि "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मे"ति प्रक्रम्य "आनन्दो ब्रह्मेति व्यजानात् आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते" इत्यादिना पूर्वानुवाकप्रतिपादितानवधिकातिशयानन्दयोगिनो विपश्चितः परस्माद्ब्रह्मण एव जगदुत्पत्तिस्थितिलया निर्दिश्यन्ते। तथा "स कारणङ्करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिप" इति करणाधिपस्य जीवस्याधिपः परं ब्रह्मैव कारणं व्यपदिश्यते। एवं हि सर्वत्र परस्यैव ब्रह्मणः कारणत्वं प्रसिद्धम्। अतः परब्रह्मणो जातत्वात्तस्मिंल्लीनत्वात् तेन प्राणनात् तदात्मकतया तादात्म्यमुपपद्यम्। अतस्सर्वप्रकारं सर्वशरीरकं सर्वात्मभूतं परं ब्रह्म शान्तो भूत्वोपासीतेति श्रुतिरेव परब्रह्मणस्सर्वात्मकत्वमुपपाद्य तस्योपासनमुपदिशति। परब्रह्म हि कारणावस्थकार्यावस्थसूक्ष्मस्थूलचिदचिद्वस्तुशरीरतया सर्वदा सर्वात्मभूतम्। एवंभूततादात्म्यस्य प्रतिपादने परस्य ब्रह्मणः सकलहेयप्रत्यनीककल्याणगुणाकरस्वच विरुध्यते, प्रकारभूतशरीरगतानां दोषाणां प्रकारिण्यात्मन्यऽप्रसङ्गात्, प्रत्युत निरतिशयैश्वर्यापादनेन गुणायैव भवतीति पूर्वमेवोक्तम्॥ यदुक्तं जीवस्य सर्वतादात्म्यमुपपद्यत इति, तदसत्, जीवानां प्रतिशरीरं भिन्नानामन्योन्यतादात्म्यासम्भवात्। मुक्तस्यानवच्छिन्नस्वरूपस्यापि जगत्तादात्म्यं

१ प्रसिद्धवन्निर्देशादिति पाठान्तरम्।

जगज्जन्मस्थितिप्रलयकारणत्वनिमित्तं न सम्भवतीति जगद्व्यापारवर्जमित्यत्र वक्ष्यते। जीवकर्मनिमित्तत्वाज्जगज्जन्मस्थितिलयानां स एव कारणमित्यपि न साधीयः, तत्कर्मनिमित्तत्वेऽपीश्वरस्यैव जगत्कारणत्वात्। अतः परमात्मैवात्र ब्रह्मशब्दाभिधेयः। इममेव सूत्रार्थमभियुक्ता बहु मन्यन्ते, यदाह वृत्तिकारः "सर्वं खल्विति सर्वात्मा ब्रह्मेश" इति।

विवक्षितगुणोपपत्तेश्च ॥ २ ॥

वक्ष्यमाणाश्च गुणाः परमात्मन्येवोपपद्यन्ते "मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर" इति। मनोमयः=परिशुद्धेन मनसैकेन ग्राह्यः, विवेकविमोकादिसाधनसप्तकानुगृहीतपरमात्मोपासननिर्मलीकृतेन हि मनसा गृह्यते। अनेन हेयप्रत्यनीककल्याणैकतानतया सकलेतरविलक्षणस्वरूपतोच्यते, मलिनमनोभिर्मलिनानामेव ग्राह्यत्वात्। प्राणशरीरः=जगति सर्वेषां प्राणानां धारकः, प्राणो यस्य शरीरमाधेयं विधेयं शेषभूतञ्च स प्राणशरीरः। आधेयत्वविधेयत्वशेषत्वानि शरीरशब्दप्रवृत्तिनिमित्तानीत्युपपादयिष्यते। भारूपः=भास्वररूपः, अप्राकृतस्वासाधारणनिरतिशयकल्याणदिव्यरूपत्वेन निरतिशयदीप्तियुक्त इत्यर्थः। सत्यसङ्कल्पः=अप्रतिहतसङ्कल्पः। आकाशात्मा=आकाशवत् सूक्ष्मस्वच्छस्वरूपः, सकलेतरकारणभूतस्याप्याकाशस्याप्यात्मभूत इति वा ऽऽकाशात्मा। स्वयं च प्रकाशते ऽन्यांश्च प्रकाशयतीति वा ऽऽकाशात्मा। सर्वकर्मा=क्रियत इति कर्म, सर्वं जगद्यस्य कर्म असौ सर्वकर्मा, सर्वा क्रिया यस्यासौ वा सर्वकर्मा। सर्वकामः=काम्यन्त इति कामा भोग्यभोगोपकरणादयः, ते परिशुद्धाः सर्वविधास्तस्य सन्तीत्यर्थः। सर्वगन्धस्सर्वरसः=अशब्दमस्पर्शमित्यादिना प्राकृतगन्धरसादिनिषेधादप्राकृताः स्वासाधारणा निरवद्याः निरतिशयाः कल्याणाः स्वभोग्यभूताः सर्वविधाः गन्धरसास्तस्य सन्तीत्यर्थः। सर्वमिदमभ्यात्तः=उक्तमिदं रसपर्यन्तं सर्वं कल्याणगुणजातं स्वीकृतवान्। अभ्यात्त इति भुक्ता ब्राह्मणा इतिवत्कर्तरि क्तः प्रतिपत्तव्यः। अवाकी—वाक उक्तिः, सोऽस्य नास्तीत्यवाकी। कुत इत्याह "अनादर" इति, अना-

Digitized by Google

प्तसमस्तकामत्वेनावक्तव्याभावात् आदररहितः, अत एवावाकी=अज-ल्पाकः परिपूर्णैश्वर्यत्वाद्ब्रह्मादिस्तम्बपर्य्यन्तमखिलं जगत्तृणीकृत्य जोष-मासीन इत्यर्थः । त एते गुणाः विवक्षिताः परमात्मन्येवोपपद्यन्ते ।

अनुपपत्तेस्तु न शारीरः ॥ ३ ॥

तमिमं गुणसागरं पर्य्यालोचयतां खद्योतकल्पस्य शरीरसम्बन्धनि-बन्धनापरिमितदुःखसम्बन्धयोग्यस्य बद्धमुक्तावस्थजीवस्य प्रस्तुतगुणलेशस-म्बन्धगन्धोऽपि नोपपद्यत इति नास्मिन्प्रकरणे शारीरपरिग्रहशङ्का जायत इत्यर्थः ।

कर्म्मकर्तृव्यपदेशाच्च ॥ ४ ॥

"एतमितः प्रेत्याभिसम्भवितास्मी"ति प्राप्यतया परं ब्रह्म व्यप-दिश्यते, प्राप्तृतया च जीवः, अतः प्राप्ता जीव उपासकः, प्राप्यं परं ब्रह्मो-पास्यमिति प्राप्तुरन्यदेवेदमिति विज्ञायते ।

शब्दविशेषात् ॥ ५ ॥

"एष म आत्माऽन्तर्हृदय" इति शारीरः षष्ठ्या निर्दिष्ट उपा-स्यस्तु प्रथमया । एवं समानप्रकरणे वाजिनाञ्च श्रुतौ शब्दविशेषः श्रूयते जीवपरयोः, यथा "व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतण्डुलो वा एवमयमन्तरात्मन् पुरुषो हिरण्मयो यथा ज्योतिरधूम"मिति । अन्तरा-त्मन्निति सप्तम्यन्तेन शारीरो निर्दिश्यते, पुरुषो हिरण्मय इति प्रथमयो-पास्यः । अतः पर एवाऽऽत्मोपास्यः ।

इतश्च शारीरादन्यः ।

स्मृतेश्च ॥ ६ ॥

"सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च,"
"यो मामेवमसंमूढो जानाति पुरुषोत्तमम्,"
"ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया
तमेव शरणङ्गच्छे"ति च शारीरकमुपासकं परमात्मानं चोपास्यं स्मृतिर्द्दर्शयति ॥

Digitized by Google

अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेत्, न, निचाय्यत्वादेवं व्योमवच्च ॥ ७ ॥

अल्पायतनत्वमर्भकौकस्त्वम्, तद्व्यपदेशोऽल्पत्वव्यपदेशः। "एष म आत्माऽन्तर्हृदय" इत्यणीयसि हृदयायतने स्थितत्वादणीयान् "व्रीहेर्वा यवाद्वे"त्यादिना ऽणीयस्त्वस्य स्वरूपेण व्यपदेशाच्च नायं परमात्मा ऽपि तु जीव एव, "सर्वगतं सुसूक्ष्मं यद्भूतयोनिं परिपश्यन्ति धीराः" इत्यादिभिः परमात्मनोऽपरिच्छिन्नत्वावगमाज्जीवस्य चाराग्रमात्रत्वव्यपदेशादिति चेन्नैतदेवम्, परमात्मैव ह्यणीयानित्येवं निचाय्यत्वेन व्यपदिश्यते, एवं निचाय्यत्वेन-एवं द्रष्टव्यत्वेन, एवमुपास्यत्वेनेति यावत्, न पुनरणीयस्त्वमेवास्य स्वरूपमिति। व्योमवच्चायं व्यपदिश्यते, स्वाभाविकं महत्त्वं चास्यैव व्यपदिश्यते "ज्यायान् पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान् दिवो ज्यायानेभ्यो लोकेभ्य" इति, अत उपासनार्थमेवाल्पत्वव्यपदेशः। तथा हि "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीते" ति सर्वोत्पत्तिप्रलयकारणत्वेन सर्वस्यात्मतयाऽनुप्रवेशकृतजीवयितृत्वेन च सर्वात्मकं ब्रह्मोपासीतेत्युपासनं विधाय, "अथ खलु क्रतुमयोऽयं पुरुषो यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवती" ति यथोपासनं प्राप्यसिद्धिमभिधाय, "स क्रतुं कुर्वीते"ति गुणविधानार्थमुपासनमनूद्य "मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यऽनादर" इति जगदैश्वर्य्यविशिष्टस्य स्वरूपंगुणांश्चोपादेयान् प्रतिपाद्य, "एष म आत्माऽन्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वे" त्युपासकस्य हृदयेऽणीयस्त्वेन तदात्मतयो[1]पास्यस्य परमपुरुषस्योपासनार्थमवस्थानमुक्त्वा, "एष म आत्माऽन्तर्हृदये ज्यायान् पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यस्सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर" इत्यन्तर्हृदये ऽवस्थितस्योपास्यमानस्य प्राप्याकारं निर्दिश्य, 'एष म आत्मान्तर्हृदय एतद्ब्रह्मे'त्येवम्भूतं परं ब्रह्म पर-

१ तथा कर्मतयेति पाठान्तरम्।

Digitized by Google

मकारत्रयेणास्मद्बुद्धिग्राह्यविषयाऽस्मद्धृदये संनिहितमितीदमनुसन्धानं विधाय, "एतमितः प्रेत्याभिसम्भवितास्मी" ति यथोपासनं प्राप्तिनिश्चयानुसन्धानं च विधाय, "इति यस्य स्यादद्धा न विचिकित्साऽस्ती" ति एवंविधप्राप्यप्राप्तिनिश्चयोपेतस्योपासकस्य प्राप्तौ न संशयोऽस्तीत्युपसंहृतम् । अत उपासनार्थमभेकौकस्त्वमणीयस्त्वञ्च ॥

सम्भोगप्राप्तिरिति चेत्, न, वैशेष्यात् ॥ ८ ॥

जीवस्येव परस्यापि ब्रह्मणः शरीरान्तर्वर्तित्वमभ्युपगतञ्चेत्तद्वदेव शरीरसम्बन्धप्रयुक्तसुखदुःखोपभोगप्राप्तिरिति चेत्, न, हेतुवैशेष्यात् । न हि शरीरान्तर्वर्तित्वमेव सुखदुःखोपभोगे हेतुरपि तु पुण्यपापरूपकर्मपरवशत्वम् । तच्चाऽपहतपाप्मनः परमात्मनो न सम्भवति, तथा च श्रुतिः "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीती" ति ।

सर्वत्रप्रसिद्ध्यधिकरणं समाप्तम् १ ॥

यदि परमात्मा न भोक्ता, एवं तर्हि सर्वत्र भोक्तृतया प्रतीयमानो जीव एव स्यादित्याशङ्क्याह–

अत्त्रधिकरणम् २ ।

अत्ता चराचरग्रहणात् ॥ ९ ॥

कठवल्लीष्वाम्नायते

"यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः[1]

मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स" इति ।

अत्र, ओदनोपसेचनसूचितोऽत्ता किं जीव एव उत परमात्मेति सन्दिह्यते । किं युक्तम् । जीव इति । कुतः । भोक्तृत्वस्य कर्मनिमित्तत्वात्, जीवस्यैव तत्सम्भवात् ।

अत्रोच्यते–"अत्ता चराचरग्रहणात्" । अत्ता परमात्मैव । कुतः । चराचरग्रहणात्, चराचरस्य कृत्स्नस्याऽत्तृत्वं हि तस्यैव सम्भवति । न चेदत्कर्मनिमित्तं भोक्तृत्वम्, अपितु जगज्जन्मस्थितिलयहेतुभूतस्य परस्य

१ ओदनः–इति पुंलिङ्गपाठः प्रामाणिकः. ओदनमिति तु क्वचित् ।

ब्रह्मणो विष्णोः संहर्तृत्वम्, "सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पद"मित्यत्रैव दर्शनात्, तथाच मृत्युर्यस्योपसेचनमिति वचनात् ब्रह्म च क्षत्रं चेति कृत्स्नञ्चराचरं अवदिहादनीयौदनत्वेन गृह्यते, उपसेचनं हि नाम स्वयमद्यमानं सदन्यस्यादनहेतुः, अत उपसेचनत्वेन मृत्योरप्यद्यमानत्वात्तदुपसिच्यमानस्य कृत्स्नस्य ब्रह्मक्षत्रपूर्वकस्य जगतश्चराचरस्यादनमत्र विवक्षितमित्यवगम्यते । ईदृशं चादनमुपसंहार एव । तस्मादीदृशं जगदुपसंहारित्वरूपम्भोक्तृत्वं परमात्मन एव ।

प्रकरणाच्च ॥ १० ॥

प्रकरणञ्चेदं परस्यैव ब्रह्मणः

"महान्तं विभुमात्मानम्मत्वा धीरो न शोचति" ।

"नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन

यमेवैष वृणुते तेन[1] लभ्यः तस्यैष आत्मा विवृणुते[2] तनूं स्वा"मिति

प्रकृतं, 'क इत्था वेद यत्र स' इत्यपि हि तत्प्रसादादृते तस्य दुरवबोधत्वमेव प्रस्तुतं पूर्वं प्रत्यभिज्ञायते ।

अथ स्याचायं ब्रह्मक्षत्रौदनसूचितः पुरुषोऽपहतपाप्मा परमात्मा, अनन्तरम्

"ऋतम्पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे ।

छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः"

इति कर्मफलभोक्तुरेव सद्वितीयस्याभिधानात् । द्वितीयश्च प्राणो बुद्धिर्वा स्यात् । ऋतपानं हि कर्मफलभोग एव, स च परमात्मनो न सम्भवति, बुद्धिप्राणयोस्तु भोक्तुर्जीवस्योपकरणभूतयोर्यथाकथञ्चित्पानेऽन्वयः सम्भवतीति तयोरन्यतरेण सद्वितीयो जीव एव प्रतिपाद्यते, तदेकप्रकरणत्वात्पूर्वप्रस्तुतोऽत्ताऽपि स एव भवितुमर्हतीति, अत्रोच्यते—

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ ११ ॥

१ स तेनेति क्वाचित्कपाठस्तु नास्त्युपनिषदि ।
२ आत्मा वृणुते—इति पाठोऽन्यत्र ।

न प्राणजीवौ बुद्धिजीवौ वा गुहां प्रविष्टावृतं पिबन्तावित्युच्येते अपि तु जीवात्मपरमात्मानौ हि तथा व्यपदिश्येते । कुतः । तद्दर्शनात्, अस्मिन् प्रकरणे जीवपरयोरेव गुहाप्रवेशव्यपदेशो दृश्यते । परमात्मनस्तावत्,

"तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् ।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाती"ति ।

जीवस्यापि,

"या प्राणेन सम्भवत्यदितिर्देवतामयी ।
गुहां प्रविश्य तिष्ठन्ती या भूतेभिर्व्यजायते"ति ।

कर्मफलान्यत्तीत्यदितिर्जीव उच्यते । प्राणेन सम्भवतीति प्राणेन सह वर्त्तते । देवतामयी, इन्द्रियाधीनभोगा । गुहां प्रविश्य तिष्ठन्ती, हृदयपुण्डरीकोदरवर्त्तिनी । या भूतेभिर्व्यजायत, पृथिव्यादिभिर्भूतैः सहिता देवादिरूपेण विविधा जायते । एवञ्च सति 'ऋतं पिबन्ता'विति व्यपदेशश्छत्रिणो गच्छन्तीतिवत्प्रतिपत्तव्यः । यद्वा, प्रयोज्यप्रयोजकरूपेण पाने कर्तृत्वं जीवपरयोरुपपद्यते ।

विशेषणाच्च ॥ १२ ॥

अस्मिन् प्रकरणे जीवपरमात्मानावेवोपास्यत्वोपासकत्वप्राप्यत्वप्राप्तृत्वविशिष्टौ सर्वत्र प्रतिपाद्येते ।

"ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमां शान्तिमत्यन्तमेती" ति ।

ब्रह्मजज्ञो जीवः, ब्रह्मणो जातत्वाज् ज्ञत्वाच्च, तं देवमीड्यं विदित्वा जीवात्मानमुपासकं ब्रह्मात्मकत्वेनावगम्येत्यर्थः । तथा

"यस्सेतुरीजानानामक्षरम् ब्रह्म यत्परम्
अभयं तितीर्षतां पारं नाचिकेतं शकेमही" त्युपास्यः परमात्मोच्यते, नाचिकेतम्, नाचिकेतस्य कर्मणः प्राप्यमित्यर्थः । "आत्मानं रथिनं विद्धि शरीरं रथमेव चे"त्यादिनोपासको जीव उच्यते, तथा ।

"विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः ।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमम्पद"मिति प्राप्यप्राप्त-

रावभिधीयेते जीवपरमात्मानौ । इहापि छायातपावित्यज्ञत्वसर्वज्ञत्वाभ्यान्तावेव विशिष्य व्यपदिश्येते ।

अथ स्यात्—

"येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके" इति जीवस्वरूपयाथात्म्यप्रश्नोपक्रमत्वात्सर्वमिदं प्रकरणं जीवपरमिति प्रतीयत इति, नैतदेवम् । न हि जीवस्य देहातिरिक्तस्यास्तित्वनास्तित्वशङ्कयाऽयं प्रश्नः, तथा सति पूर्ववरद्वयवरणानुपपत्तेः । तथा हि, पितुः सर्ववेदसदक्षिणक्रतुसमाप्तिवेलायां दीयमानदक्षिणावैगुण्येन क्रतुवैगुण्यं मन्यमानेन कुमारेण नचिकेतसाऽऽस्तिक्यावेसरेण स्वात्मदानेनाऽपि पितुः क्रतुसाद्गुण्यमिच्छता कस्मै मां दास्यसीत्यसकृत् पितरं पृष्टवता स्वनिर्बन्धरुष्टपितृवचनात् मृत्युसदनं प्रविश्य स्वसदनात्प्रोषिते यमेऽनद्दर्शनात्[1] तत्र तिस्रो रात्रीरुपोषुषा स्वोपवासभीततत्प्रतिविधानप्रवृत्तमृत्युदत्ते वरत्रये आस्तिक्यातिरेकात्प्रथमेन वरेण स्वात्मानं प्रति पितुः प्रसादो वृतः । एतच्च सर्वं देहातिरिक्तमात्मानमजानतो नोपपद्यते । द्वितीयेन च वरेणाक्षीणदेहात्मानुभाव्यफलसाधनभूताग्निविद्या वृता, तदपि देहातिरिक्तात्मानभिज्ञस्य न सम्भवति, अतस्तृतीयेन वरेण यदिदं व्रियते

"येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके, नायमस्तीति चैके ।
एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीय" इति,

अत्र परमपुरुषार्थरूपब्रह्मप्राप्तिलक्षणमोक्षयाथात्म्यविज्ञानाय तदुपायभूतपरमात्मोपासनपरावरात्मतत्त्वजिज्ञासयाऽयं प्रश्नः क्रियते । एवं च येयं प्रेत इति न शरीरवियोगमात्राभिप्रायम् अपि तु सर्वबन्धविनिर्मोक्षाभिप्रायम्, यथा "न प्रेत्य सञ्ज्ञाऽस्ती"ति । अयमर्थः, मोक्षाधिकृते मनुष्ये प्रेते सर्वबन्धविनिर्मुक्ते तत्स्वरूपविषयवादिविप्रतिपत्तिनिमित्तास्ति-

१ तदृर्शनादित्येव तु सर्वत्र पुस्तके लभ्यते, सोपि तदर्शनं निमित्तीकृत्येति योजयितुं शक्यः ।

नास्त्यात्मिका येयं विचिकित्सा तदपनोदनाय तत्स्वरूपयाथात्म्यं त्वयाऽनुशिष्टोऽहं विद्यां जानीयामिति। तथा हि बहुधा विप्रतिपद्यन्ते—केचिद्वृत्तिमात्रस्यात्मनः स्वरूपोच्छित्तिलक्षणं मोक्षमाचक्षते, अन्ये वित्तिमात्रस्यैव सतोऽविद्यास्तमयम्, अपरे पाषाणकल्पस्यात्मनो ज्ञानाद्यशेषवैशेषिकगुणोच्छेदलक्षणं कैवल्यरूपम्, अपरेऽपहतपाप्मानं परमात्मानमभ्युपगच्छन्तस्तस्यैवोपाधिसंसर्गनिमित्तजीवभावस्योपाध्यपगमेन तद्भावलक्षणमोक्षमातिष्ठन्ते, त्रैय्यन्तनिष्णातास्तु निखिलजगदेककारणस्याऽशेषहेयप्रत्यनीकानन्तज्ञानानन्दैकस्वरूपस्य स्वाभाविकानवधिकातिशयासङ्ख्येयकल्याणगुणाकरस्य सकलेतरविलक्षणस्य सर्वात्मभूतस्य परस्य ब्रह्मणः शरीरतया प्रकारभूतस्यानुकूलापरिच्छिन्नज्ञानस्वरूपस्य परमात्मानुभवैकरसस्य जीवस्यानादिकर्मरूपाविद्यातिरोहितस्वरूपस्याविद्योच्छेदपूर्वकस्वाभाविकपरमात्मानुभवमेव मोक्षमाचक्षते। तत्र मोक्षस्वरूपं तत्साधनं च त्वत्प्रसादाद्विद्यामिति—नचिकेतसा पृष्टो मृत्युः तस्यार्थस्य दुरवबोधत्वप्रदर्शनेन विविधभोगवितरणप्रलोभनेन चैनं परीक्ष्य योग्यतामभिज्ञाय परावरात्मतत्त्वविज्ञानम्परमात्मोपासनं तत्पदप्राप्तिलक्षणम्मोक्षं च “तं दुर्दर्शं गूढमनुप्रविष्ट”मित्यारभ्य “सोऽध्वनः पारमाप्नोति तद्विष्णोः परमम्पद”मित्यन्तेनोपदिश्य तदपेक्षितांश्च विशेषानुपदिदेशेति सर्वं समञ्जसम्। अतः परमात्मैवात्तेति सिद्धम्॥

अत्त्रऽधिकरणं समाप्तम्॥ २॥

अथाऽन्तराधिकरणम् ३।

अन्तर उपपत्तेः॥ १३॥

इदमामनन्ति छन्दोगाः “य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाचैतदमृतमेतदभयमेतद्ब्रह्मे”ति। तत्र सन्देहः, किमयमक्ष्याधारतया निर्दिश्यमानः पुरुषः प्रतिबिम्बात्मा? उत चक्षुरिन्द्रियाधिष्ठातृदेवताविशेषः? उत जीवात्मा? अथ परमात्मे?ति। किं युक्तम्। प्रतिबिम्बात्मेति। कुतः। प्रसिद्धवन्निर्देशात् दृश्यत इत्यपरोक्षाभिधानाच्च।

जीवात्मा वा, तस्यापि हि चक्षुषि विशेषेण सन्निधानात्प्रसिद्धिरुपपद्यते, उन्मीलितं हि चक्षुर्वीक्ष्य जीवात्मनः शरीरे स्थितिगती निश्चिन्वन्ति। "रश्मिभिरेषोऽस्मिन्प्रतिष्ठित" इति श्रुतिप्रसिद्ध्या चक्षुःप्रतिष्ठो देवताविशेषो वा, एष्वेव प्रसिद्धवन्निर्देशोपपत्तेरेषामन्यतम इति प्राप्ते प्रचक्ष्महे— अन्तर उपपत्तेः, अक्ष्यन्तरः परमात्मा। कुतः। "एष आत्मेति होवाचैतदमृतमेतदभयमेतद्ब्रह्म," "एतं संयद्वाम इत्याचक्षते एतं हि सर्वाणि वामान्यभि संयन्ति," "एष उ एव वामनीरेष हि सर्वाणि वामानि नयति," "एष उ एव भामनीरेष हि सर्वेषु लोकेषु भाती" त्येषां गुणानां परमात्मन्येवोपपत्तेः।

स्थानादिव्यपदेशाच्च ॥ १४ ॥

चक्षुषि स्थितिनियमनादयः परमात्मन एव "यश्चक्षुषि तिष्ठ"न्नि त्यादिना व्यपदिश्यन्ते,'य एषोऽक्षिणि पुरुष' इति स एव प्रतीयते। अतः प्रसिद्धवन्निर्देशश्च परमात्मन्युपपद्यते, तत एव दृश्यत इति साक्षात्कारव्यपदेशोऽपि योगिभिर्दृश्यमानत्वादुपपद्यते।

सुखविशिष्टाभिधानादेव च ॥ १५ ॥

इतश्चाक्ष्याधारः पुरुषोत्तमः,"कं ब्रह्म खं ब्रह्मे"ति प्रकृतस्य सुखविशिष्टस्य ब्रह्मण उपासनस्थानविधानार्थं संयद्वामत्वादिगुणविधानार्थं च 'य एषोऽक्षिणि पुरुष' इत्यभिधानात्। एवकारो नैरपेक्ष्यं हेतोर्द्योतयति।

नन्वग्निविद्याव्यवधानात् 'कं ब्रह्म खं ब्रह्मे'ति प्रकृतं ब्रह्म नेह सन्निधत्ते, तथाहि, अग्नयः 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे' ति ब्रह्मविद्यामुपदिश्य, "अथ हैनं गार्हपत्योऽनुशशासे"त्यारभ्याऽग्नीनामुपासनमुपदिदिशुः। न चाग्निविद्या ब्रह्मविद्याङ्गमिति वक्तुं शक्यम्, ब्रह्मविद्याफलानन्तर्गततद्विरोधिसर्वायुःप्राप्तिसन्तत्यविच्छेदादिफलश्रवणात्। उच्यते, "प्राणो ब्रह्मे"तदमृतमेतदभयमेतद्ब्रह्मे"त्युभयत्र ब्रह्मसंबन्धश्रवणात् "आचार्यस्तु ते गतिं वक्ते" त्यग्निवचनाच्च गत्युपदेशात् पूर्वं ब्रह्मविद्याया असमाप्तेस्तन्मध्यगताग्निविद्या ब्रह्मविद्याङ्गमिति निश्चीयते। अथ हैनं गार्ह-

पत्न्योऽनुशशासेति ब्रह्मविद्याधिकृतस्यैवाग्निविद्योपदेशाच्च । किञ्च व्याधिभिः प्रति[1]पूर्णोऽस्मी इति ब्रह्मप्राप्तिव्यतिरिक्तनानाविधकामोपहतिपूर्वकगर्भजन्मजरामरणादिभवामया[2]भितप्तायोपकोसलाय एषा 'सोम्य तेऽस्मद्विद्याऽऽत्मविद्या चे'ति समुच्चित्योपदेशान्मोक्षैकफलात्मविद्याङ्गत्वमग्निविद्यायाः प्रतीयते । एवं चाङ्गत्वेऽवगते सति फलानुकीर्त्तनमर्थवाद इत्यवगम्यते । न चात्र मोक्षविरोधि फलं किञ्चिच्छ्रूयते "अपहते पापकृत्यां लोकीभवति सर्वमायुरेति ज्योग् जीवति नास्यावरपुरुषाः क्षीयन्त उप वयन्तं भुञ्जामोऽस्मिँश्च लोकेऽमुष्मिँश्च"त्यमीषां फलानां मोक्षाधिकृतस्यानुगुणत्वात् । अपहते पापकृत्याम्, ब्रह्मप्राप्तिविरोधिपापंकर्म्मा ऽपहन्ति । लोकी भवति, तद्विरोधिनि पापे निरस्ते ब्रह्मलोकं प्राप्नोति । सर्वमायुरेति, ब्रह्मोपासनपरिसमाप्तेर्यावदायुरपेक्षितं तत्सर्वमेति । ज्योग्जीवति व्याधिभिरनुपहतो यावद्ब्रह्मप्राप्ति जीवति । नास्यावरपुरुषाः क्षीयन्ते, अस्य शिष्यप्रशिष्यादयः पुत्रपौत्रादयश्च ब्रह्मविद एव भवन्ति । नास्याब्रह्मवित्कुले भवती'ति श्रुत्यन्तरे ब्रह्मविद्याफलत्वेन श्रूयते । उप वयन्तं भुञ्जामोऽस्मिंश्च लोके ऽमुष्मिंश्च, वयमग्नयस्तमेनमुपभुञ्जामः यावद्ब्रह्मप्राप्ति विघ्नेभ्यः परिपालयाम इति । अतोऽग्निविद्यायाः ब्रह्मविद्याङ्गत्वेन तत्सन्निधानाविरोधात्सुखविशिष्टंप्रकृतमेव ब्रह्मेहोपासनस्थानविधानार्थं गुणविधानार्थं चोच्यते । नन्वा'चार्य्यस्तु ते गतिं वक्ते'ति गतिमात्रपरिशेषणादाचार्य्येण गतिरेवोपदिश्यत इति गम्यते, तत्कथं स्थानगुणविध्यर्थतोच्यते । तदभिधीयते, आचार्य्यस्ते गतिं वक्तेत्यस्यायमभिप्रायः ब्रह्मविद्यामनुपदिश्य प्रोषुषि गुरौ तदलाभादनाश्वासमुपकोसलमुज्जीवयितुं स्वपरिचरणप्रीता गार्हपत्यादयो गुरोरग्नयस्तस्मै ब्रह्मस्वरूपमात्रं तदङ्गभूतांश्चाग्निविद्यामुपदिश्य "आचार्य्याद्धैव विद्या विदिता साधिष्ठं प्रापयती[3]"तिश्रुत्यर्थमालोच्य साधुतमत्वप्राप्त्यर्थमाचार्य एवास्य संयद्वामत्वादिगुणकं परं ब्रह्म तदुपासन-

१ परीति पुस्तकेषु प्रायः पाठः ।
२ भवभयेति पाठान्तरम् ।
३ प्रापदिति-इति तु पाठान्तरम् ।

स्थानमर्चिरादिकां च गतिमुपदिशन्त्विति मत्वाऽऽचार्य्यस्तु ते गतिं वक्तेत्य-वोचन्। गतिवक्तृणामुपदेश्यविद्याशेषप्रदर्शनार्थम्, अत एवाचार्य्योऽपि "अ-हन्तु ते तद्वक्ष्यामी"त्यभिधाय यथा "पुष्करपलाश आपो न श्लिष्यन्त एव-मेवंविदि पापं कर्म न श्लिष्यत" इत्युपक्रम्य संयद्वामत्वादिकल्याणगुण-विशिष्टं ब्रह्माक्षिस्थानोपास्यमर्चिरादिकाञ्च गतिमुपदिदेश। अतः 'कं ब्रह्म खं ब्रह्मे'ति सुखविशिष्टस्य प्रकृतस्यैव ब्रह्मणोऽत्राभिधानादयम-क्ष्याधारः परमात्मा। ननु च 'कं ब्रह्म खं ब्रह्मे'ति परं ब्रह्माभिहितमिति कथमवगम्यते यस्येहाक्ष्याधारतयाऽभिधानं ब्रूषे। यावता कं ब्रह्म खं ब्रह्मेति प्रसिद्धाकाशलौकिकसुखयोरेव ब्रह्मदृष्टिर्विधीयत इति प्रति-भाति, 'नाम ब्रह्म' 'मनो ब्रह्मे'त्यादिवचनसारूप्यात्तत्राह—

अत एव च स ब्रह्म ॥ १६ ॥

यतस्तत्र "यदेव कं तदेव ख"मिति सुखविशिष्टस्यैवाकाशस्या-भिधानम्, अत एव 'ख'—शब्दाभिधेयः स आकाशः परं ब्रह्म। एतदुक्तं भवति, अग्निभिः 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे'त्युक्ते उपकोसल[1] उवाच "विजानाम्यहं यत्प्राणो ब्रह्म कं च तु खं च न विजानामी"ति। अस्याय-मभिप्रायः, न तावत्प्राणादिप्रतीकोपासनमग्निभिरभिहितम्, जन्मजराम-रणादिभवभयभीतस्य मुमुक्षोर्ममोपदेशाय प्रवृत्तत्वात्। अतो ब्रह्मैवोपास्य-मुपदिष्टम्। तत्र प्रसिद्धैः प्राणादिभिस्समानाधिकरण्यं ब्रह्म निर्दिष्टम्। तेषु प्राणविशिष्टत्वं जगद्विधरणयोगेन वा प्राणशरीरतया प्राणस्य नियन्तृत्वेन वा ब्रह्मण उपपद्यत इति 'विजानाम्यहं यत्प्राणो ब्रह्मे'त्युक्तवान्, तथा सुखाकाशयोरपि ब्रह्मणः शरीरतया तन्नियाम्यत्वेन विशेषणत्वम्? उता-न्योन्यव्यवच्छेदकतया निरतिशयानन्दब्रह्मस्वरूपसमर्पणपरत्वेन वा? तत्र पृथग्भूतयोः शरीरतया विशेषणत्वे वैषयिकसुखभूताकाशयोर्निया-मकत्वं ब्रह्मणः स्यादिति स्वरूपावगतिर्न स्यात्। अन्योऽन्यव्यवच्छेदकत्वे अपरिच्छिन्नानन्दैकस्वरूपत्वं ब्रह्मणः स्यादित्यन्यतरप्रकारनिर्दिधार-

[1] उपकोशल इति तालव्यघटितपाठोऽपि दृश्यते न तु युक्तः।

Digitized by Google

यिषया "कं च तु खं च न विजानामी"त्युक्तवान् । उपकोसलस्येममाशयं ज्ञानन्तोऽग्नयो "यद्वाव कं तदेव खं यदेव खं तदेव क"मित्यूचिरे । ब्रह्मणस्सुखरूपत्वमेवापरिच्छिन्नमित्यर्थः । अतः प्राणशरीरतया प्राणविशिष्टं यद्ब्रह्म तदेवापरिच्छिन्नसुखरूपं चेति निगमितम् "प्राणञ्च हास्मै तदाकाशं चोचु"रिति । अतः "कं ब्रह्म खं ब्रह्मे"त्यत्रापरिच्छिन्नसुखं ब्रह्म प्रतिपादितमिति परं ब्रह्मैव तत्र प्रकृतम्, तदेव चात्राक्ष्याधारतयाऽभिधीयत इत्यक्ष्याधारः परमात्मा ।

श्रुतोपनिषत्कगत्यभिधानाच्च[1] ॥ १७ ॥

श्रुतोपनिषत्कस्याधिगतपरमपुरुषयाथात्म्यस्यानुसन्धेयतया श्रुत्यन्तरप्रतिपाद्यमानाऽर्चिरादिका गतिर्या, तामपुनरावृत्तिलक्षणपरमपुरुषप्राप्तिकरीमुपकोसलायाक्षिपुरुषं श्रुतवते 'ते "ऽर्चिषमेवाभि[2]सम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्ष"मित्यारभ्य "चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्[3] ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्त" इत्यन्तेनोपदिशतीत्यतोऽयमक्षिपुरुषः परमात्मा

अनवस्थितेरसम्भवाच्च नेतरः ॥ १८ ॥

प्रतिबिम्बादीनामक्षिणि नियमेनाऽनवस्थानादमृतत्वादीनां च निरुपाधिकानां तेष्वसम्भवाच्च परमात्मन इतरश्छायादिरक्षिपुरुषो भवितुमर्हति । प्रतिबिम्बस्य तावत्पुरुषान्तरसन्निधानायत्तत्वान्न नियमेनावस्थानसम्भवः, जीवस्यापि सर्वेन्द्रियव्यापारानुगुणत्वाय सर्वेन्द्रियकन्दभूते स्थानविशेषे वृत्तिरिति चक्षुषि नावस्थानम्, देवतायाश्च "रश्मिभिरेषोऽस्मिन् प्रतिष्ठित"इति रश्मिद्वारेणावस्थितिवचनाद्देशान्तरावस्थितस्यापीन्द्रियाधिष्ठानोपपत्तेर्न चक्षुष्यवस्थानम् । सर्वेषामेवैषां निरुपाधिकाऽमृतत्वादयो न संभवन्त्येव । तस्मादक्षिपुरुषः परमात्मा ॥

अन्तराधिकरणं समाप्तम् ॥ ३ ॥

१ चरहितः सूत्रपाठो लिखितपुस्तके ।
२ अर्चिषमभीति मु॰ पु॰ पाठो न युक्तः ।
३ एतानिति पाठः पुस्तकद्वयेऽपि न युक्तः ।

'स्थानादिव्यपदेशाच्च' इत्यत्र "यश्चक्षुषि तिष्ठ"न्नित्यादिना प्रतिपाद्यमानश्चक्षुषि स्थितिनियमनादिकं परमात्मन एवेति सिद्धं कृत्वाऽक्षिपुरुषस्य परमात्मत्वं साधितम् । इदानीं तदेव समर्थयते—

अन्तर्याम्यधिकरणम् ४ ।

अन्तर्याम्यधिदैवाधिलोकादिषु तद्धर्मव्यपदेशात् ॥ १९ ॥

काण्वा माध्यन्दिनाश्च वाजसनेयिनः समामनन्ति—"यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृत" इति । एवमद्भ्यन्तरिक्षवाय्वादित्य[1]दिक्चन्द्रतारकाऽऽकाशतमस्तेजस्सु देवतेषु च, सर्वेषु च भूतेषु, प्राणवाक्चक्षुःश्रोत्रमनस्त्वग्विज्ञानरेतःस्वात्मात्मीयेषु च तिष्ठन्तं तत्तदन्तरभूतं तत्तदवेद्यं[2] तत्तच्छरीरकं तत्तन्नियमयन्तं कञ्चिन्निर्दिश्य "एष त आत्माऽन्तर्याम्यमृत" इत्युपदिश्यते । माध्यन्दिनपाठे तु "यस्सर्वेषु लोकेषु तिष्ठन् यः सर्वेषु देवेषु[3] यस्सर्वेषु यज्ञेष्वि"ति च पर्यायाः, "यो विज्ञाने तिष्ठ"न्नित्यस्य पर्यायस्य स्थाने "य आत्मनि तिष्ठ"न्निति पर्यायः "स त आत्माऽन्तर्याम्यमृत" इति च विशेषः । तत्र संशय्यते—किमयमन्तर्यामी प्रत्यगात्मोत परमात्मेति । किं युक्तम् । प्रत्यगात्मेति । कुतः । वाक्यशेषे 'द्रष्टा श्रोते'ति करणायत्तज्ञानताश्रुतेरेवं द्रष्टुरेवान्तर्यामित्वोपदेशा"न्नान्योऽतोऽस्ति द्रष्टे"ति द्रष्ट्रन्तरनिषेधाच्चेत्येवं प्राप्तेऽभिधीयते—

'अन्तर्याम्यधिदैवाधिलोकादिषु[4] तद्धर्मव्यपदेशात्' । अधिदैवाधिलोकादिपदचिह्नितेषु वाक्येषु श्रूयमाणोऽन्तर्याम्यपहतपाप्मा परमात्मा नारायणः । काण्वपाठसिद्धेभ्योऽधिदैवादिमन्त्रो वाक्येभ्यो[5]ऽधि-

१ अमृत इत्येवमद्भ्यन्तरिक्षवाय्वादित्येत्यादिः लि० पु० पाठः, अमृतमन्त...... वाय्वादित्येति मु· पु· पाठः । मुन्यनुसारेण तु स्थापितः ।

२ तत्तद्वेद्यमिति मुद्रितपुस्तके लिखितपुस्तके च पाठः । तत्र तत्तद्वेद्यं यस्येत्यर्थं कथञ्चिद्योजनीयः ।

३ वेदेष्विति पाठान्तरम् ।

४ अन्तर्याम्यधिलोकादिष्विति मुद्रितपुस्तके ऽत्र स्थाने पाठः ।

५ वाक्येभ्य इति नास्ति लि· पु· ।

काण्वेऽधिलोकादीनि वाक्यानि माध्यन्दिनपाठे सन्तीति ज्ञापनार्थमधिदैवाधिलोकादिष्वित्युभयोरुपादानम् । तदेवमुभयेष्वपि वाक्येष्वन्तर्यामी परमात्मेत्यर्थः । कुतः । तद्धर्मव्यपदेशात्—परमात्मधर्मो ह्ययम् यदेक एव सन् सर्वलोकसर्वभूतसर्वदेवादीन्नियमयतीति । तथा ह्युद्दालकप्रश्नः- "य इमं च लोकं परं च लोकं सर्वाणि च भूतानि योऽन्तरो यमयती"-त्युपक्रम्य तमन्तर्यामिणं ब्रूहीति, तस्य चोत्तरं 'यः पृथिव्यां तिष्ठ'न्नित्यारभ्योक्तम् । तदेतत्सर्वांल्लोकान् सर्वाणि च भूतानि सर्वाणि च देवतानि सर्वान् वेदान् सर्वांश्च यज्ञानन्तःप्रविश्य सर्वप्रकारनियमनं सर्वशरीरतया सर्वस्यात्मत्वं च सर्वज्ञात्सत्यसङ्कल्पात् पुरुषोत्तमादन्यस्य न सम्भवति । तथा हि,[1] "अन्तःप्रविष्टः शास्ता जनानां सर्वात्मा" "तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभव"दित्यादीन्यौपनिषदानि वाक्यानि परमात्मन एव सर्वस्य प्रशासितृत्वं सर्वस्यात्मत्वमित्यादीनि वदन्ति । तथा सुबालोपनिषदि "नैवेह किञ्चनाग्र आसीदमूलमनाधारमिमाः[2] प्रजाः प्रजायन्ते दिव्यो देव एको नारायणः चक्षुश्च द्रष्टव्यं च नारायणः श्रोत्रं च श्रोतव्यं च नारायण" इत्यारभ्य "अन्तःशरीरे निहितो गुहायामज एको नित्यो यस्य पृथिवी शरीरं यः पृथिवीमन्तरे सञ्चरन् यं पृथिवी न वेद यस्यापः शरीर"मित्यादि "यस्य मृत्युः शरीरं यो मृत्युमन्तरे सञ्चरन् यं मृत्युर्न वेद स[3] एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायण" इति परस्यैव ब्रह्मणः सर्वात्मत्वं सर्वशरीरकत्वं सर्वनियन्तृत्वं च प्रतिपाद्यते । स्वाभाविकं चामृतत्वं परमात्मन एव धर्मः । न च परस्यात्मनः करणायत्तं द्रष्टृत्वादिकम्, अपि तु स्वभावत एव सर्वज्ञत्वात्सत्यसङ्कल्पत्वाच्च स्वत एव । तथा च श्रुतिः—

"पश्यत्यचक्षुस्स शृणोत्यकर्णः ।
अपाणिपादो जवनो ग्रहीते[4]"ति ।

---

१ हीति नास्ति मु॰ पु॰ ।   २ अनाधारा इमा इति पु॰ पाठः ।
३ स इति नास्ति पु॰ द्वयेऽपि ।
४ एवमेव व्युत्क्रमेण प्रथमद्वितीयपादौ पुस्तकद्वयेऽपि स्तः ।

Digitized by Google

न च दर्शनश्रवणादिशब्दाश्चक्षुरादिकरणजन्मनो ज्ञानस्य वाचकाः अपि तु रूपादिसाक्षात्कारस्य। स च रूपादिसाक्षात्कारः कर्मतिरोहितस्वाभाविकज्ञानस्य जीवस्य चक्षुरादिकरणजन्मा, परस्य तु स्वत एव। "नान्योऽतो ऽस्ति द्रष्टे"त्येतदपि पूर्ववाक्योदितान्नियन्तुर्द्रष्टुरन्यो द्रष्टा नास्तीति वदति। "यं पृथिवी न वेद" "यमात्मा न वेद" इत्येवमादिभिर्वाक्यैः पृथिव्यात्मादिनियाम्यैरनुपलभ्यमान एव नियमयतीति यत्पूर्वमुक्तम् तदेवा 'ऽदृष्टो द्रष्टा ऽश्रुतः श्रोते'ति निगमय्य 'नान्योऽतोऽस्ती' त्यादिना तस्य नियन्तुर्नियन्त्रन्तरं निषिध्यते। 'एष त आत्मा' 'स त आत्मे'ति च 'त' इति व्यतिरेकविभक्तिनिर्दिष्टस्य जीवस्यात्मतयोपदिश्यमानो ऽन्तर्यामी न प्रत्यगात्मा भवितुमर्हति।

न च स्मार्तमतद्धर्माभिलापाच्छारीरश्च ॥ २० ॥

स्मार्तं, प्रधानं, शारीरो, जीवः। स्मार्तं शारीरश्च नान्तर्यामी, अतद्धर्माभिलापात्—तयोरसम्भावितधर्माभिलापात्। स्वभावत एव सर्वस्य द्रष्टृत्वं[1]सर्वस्य नियन्तृत्वं सर्वस्यात्मत्वं स्वत एवामृतत्वं च तयोर्न सम्भावनामर्हति। एतदुक्तं भवति, यथा स्मार्तमचेतनं सर्वज्ञत्वसर्वनियन्तृत्वसर्वात्मत्वादिकं नार्हति, तथा जीवोऽप्यतद्धर्मत्वादिति। अमीषामुक्तानां परमात्मन्यन्वयः, प्रत्यगात्मनि व्यतिरेकश्च सूत्रद्वयेन दर्शितः।

निरपेक्षं च हेत्वन्तरमाह—

उभयेऽपि हि भेदेनैनमधीयते ॥ २१ ॥

उभये माध्यन्दिनाः काण्वाश्चा ऽन्तर्यामिणो नियाम्यत्वेन वागादिभिरचेतनैस्सममेनं शारीरमपि विभज्याधीयते "य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृत" इति माध्यन्दिनाः, "यो विज्ञाने तिष्ठ"न्वि-

१ सर्वस्य वेत्तृत्वमित्यधिकः पाठो लिखितपु॰।

त्यादि च काण्वाः । परमात्मनियाम्यतया तस्माद्विलक्षणत्वेनैनमधीयत इत्यर्थः । अतोऽन्तर्य्यामी प्रत्यगात्मनो विलक्षणोऽपहतपाप्मा परमात्मा नारायण इति सिद्धम् ॥

समाप्तमन्तर्याम्यधिकरणम् ॥ ४ ॥

अथादृश्यत्वाधिकरणम् ५ ।

अदृश्यत्वादिगुणको धर्मोक्तेः ॥ २२ ॥

आथर्वणिका अधीयते—"अथ परा यया तदक्षरमधिगम्यते
यत्तदद्रेश्य[1]मग्राह्यमगोत्रमवर्ण-
मचक्षुःश्रोत्रन्तदपाणिपादम् ।
नित्यं विभुं सर्वगतं सुसूक्ष्म-
न्तदव्ययं यद्भूतयोनिम्परिपश्यन्ति धीरा"इति,

तथोत्तरत्र"अक्षरात् परतः पर" इति । तत्र सन्दिह्यते—किमिहादृश्यत्वादिगुणकमक्षरम् अक्षरात् परतः परश्च प्रकृतिपुरुषौ,उतोभयत्र परमात्मैवेति । किं प्राप्तम्[2] । प्रकृतिपुरुषाविति । कुतः । अस्यामक्षरस्या'दृष्टा दृष्टे'त्यादाविव न द्रष्टृत्वादिश्चेतनधर्मविशेष इह श्रूयते । 'अक्षरात् परतः पर' इति च सर्वस्माद्विकारात् परभूतादक्षरादस्मात्परः क्षेत्रज्ञः समष्टिपुरुषः प्रतिपाद्यते । एतदुक्तम्भवति—रूपादिमत्स्थूलरूपाचेतनपृथिव्यादिभूताश्रयं दृश्यत्वादिकं प्रतिषिध्यमानं पृथिव्यादिसजातीयसूक्ष्मरूपाचेतनमेवोपस्थापयति, तच्च प्रधानमेव, तस्मात्परत्वञ्च समष्टिपुरुषस्यैव प्रसिद्धम्, तदधिष्ठितञ्च प्रधानं महदादिविशेषपर्य्यन्तं विकारजातं प्रसूत इति । तत्र दृष्टान्ता उपन्यस्यन्ते—

'यथोर्णनाभिः[3] सृजते गृह्णते च
यथा पृथिव्यामोषधयः सम्भवन्ति ।
यथा सतः पुरुषात्केशलोमानि

---

१ यत्तदतीन्द्रियमिति लि॰ पु॰ पाठः ।
२ किं तावत्प्राप्तमिति लि॰ पु॰ पाठः ।
३ यथोर्णुनाभिरिति मुद्रितपुस्तके पाठो ऽन्यत्र च भवति ।

तथाऽक्षरात्सम्भवतीह विश्व"मिति ।

अतोऽस्मिन् प्रकरणे प्रधानपुरुषावेव प्रतिपाद्येते इत्येवं प्राप्ते ऽभिधीयते[1]—

'अदृश्यत्वादिगुणको धर्मोक्तेः,' अदृश्यत्वादिगुणको ऽक्षरात्परतः परश्च परमपुरुष एव । कुतः । तद्धर्मोक्तेः—'यस्सर्वज्ञस्सर्ववि'दित्यादिना सर्वज्ञत्वादिका[2]स्तस्यैव धर्मा उच्यन्ते । तथाहि, 'यया तदक्षरमधिगम्यत' इत्यादिना ऽदृश्यत्वादिगुणक[मक्षरमभिधाय 'तथाऽक्षरात्सम्भवतीह विश्व'मिति तस्माद्विश्वसम्भवञ्चाभिधाय

"यस्सर्वज्ञः सर्वविद् यस्य ज्ञानमयन्तपः ।

तस्मादेतद्ब्रह्म नाम रूपमन्नञ्च जायत" इति—

भूतयोने][3] रक्षरस्य सर्वज्ञत्वादि प्रतिपाद्यते । पश्चादक्षरात्परतः पर इति च प्रकृतमदृश्यत्वादिगुणकं भूतयोन्यक्षरम् सर्वज्ञमेव परत्वेन व्यपदिश्यते । अतो'ऽक्षरात्परतः पर' इत्यक्षरशब्दः पञ्चम्यन्तः प्रकृतमदृश्यत्वादिगुणकमक्षरं नाभिधत्ते, तस्य सर्वज्ञस्य विश्वयोनेस्सर्वस्मात्परत्वेन तस्मादन्यस्य परत्वासम्भवात् । अतोऽत्राक्षरशब्दो भूतसूक्ष्ममचेतनं ब्रूते ।

इतश्च न प्रधानपुरुषौ[4] ।

विशेषणभेदव्यपदेशाभ्याञ्च नेतरौ ॥ २३ ॥

विशिनष्टि हि प्रकरणं प्रधानात् पुरुषाच्च[5] भूतयोन्यक्षरम्, व्यावर्तयतीत्यर्थः, एकविज्ञानेन सर्वविज्ञानोपपादनादिभिः । तथा ताभ्यामस्याक्षरस्य भेदश्च व्यपदिश्यते 'अक्षरात्परतः पर' इत्यादिना । तथा हि, "स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राहे"ति

१ ब्रूम इति लि· पु· पाठः ।
२ यः सर्वज्ञः सर्वविदित्यादिका इति लि· पु· पाठः ।
३ [ ] एतच्चिह्नितपाठो लि· पु· त्रुटितः ।
४ सूत्रानन्तरम् 'इतश्च न प्रधानपुरुषा'विति लि· पुस्तके ऽस्ति ।
५ प्रधानाच्च पुरुषाच्चेति मु· पु· पाठः ।

सर्वविद्याप्रतिष्ठाभूता ब्रह्मविद्या प्रक्रान्ता । परविद्यैव च सर्वविद्याप्रतिष्ठा । तामिमां सर्वविद्याप्रतिष्ठां विद्यां चतुर्मुखाऽथर्वादिगुरुपरम्परयाऽङ्गिरसा प्राप्तां जिज्ञासु"श्शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ—कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातम्भवती"ति ब्रह्मविद्यायाः सर्वविद्याऽऽश्रयत्वाद् ब्रह्मविज्ञानेन सर्वं विज्ञातम्भवतीति कृत्वा ब्रह्मस्वरूपमनेन पृष्टम् । "तस्मै स होवाच द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा चे"ति ब्रह्म प्रेप्सुना द्वे विद्ये वेदितव्ये, ब्रह्मविषये परोक्षापरोक्षरूपे द्वे विज्ञाने उपादेये इत्यर्थः । अत्र परोक्षं शास्त्रजन्यं ज्ञानम् । अपरोक्षं योगजन्यं ज्ञानम् । तयोर्ब्रह्मप्राप्त्युपायभूतमपरोक्षज्ञानम् । तच्च भक्तिरूपापन्नं "यमेवैष वृणुते तेन लभ्य"[1] इत्यत्रैव विशेष्यमाणत्वात् । तदुपायश्चागमजन्यं विवेकादिसाधनसप्तकानुगृहीतं ज्ञानम्,

तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति
यज्ञेन दानेन तपसाऽनाऽऽशकेने"ति श्रुतेः ।

आह च भगवान् पराशरः—

"तत्प्राप्तिहेतुर्ज्ञानं च[2] कर्म चोक्तं महामुने !
आगमोत्थं विवेकाच्च द्विधा ज्ञानं तथोच्यत" इति ।

'तत्रा ऽपरा ऋग्वेदो यजुर्वेद' इत्यादिना 'धर्मशास्त्राणी'त्यन्तेनाऽऽगमोत्थं ब्रह्मसाक्षात्कारहेतुभूतं परोक्षज्ञानमुक्तम्, साङ्गस्य सेतिहासपुराणस्य सधर्मशास्त्रस्य समीमांसस्य वेदस्य ब्रह्मज्ञानोत्पत्तिहेतुभूतत्वात् । "अथ परा यया तदक्षरमधिगम्यत" इत्युपासनाख्यं ब्रह्मसाक्षात्कारलक्षणं भक्तिरूपापन्नं ज्ञानमुच्यते । 'यत्तदद्रेश्य'मित्यादिना परोक्षापरोक्षरूपज्ञानद्वयविषयस्य परस्य ब्रह्मणः स्वरूपमुच्यते । 'यथोर्णनाभिः सृजते गृह्णते चे'त्यादिना यथोक्तस्वरूपात् परस्माद् ब्रह्मणो ऽक्षरात् कृत्स्नस्य चेतनाचेतनात्मकप्रपञ्चस्योत्पत्तिरुक्ता, 'विश्व'मिति वचनाच्चेतनमात्रस्य ।

१ न तेन लभ्य इति मु० पु० ।
२ हेतुर्विज्ञानमिति क्वचित्पाठो भवति ।

तपसा चीयते ब्रह्म ततोऽन्नमभिजायते ।

अन्नात्प्राणो मनस्सत्यं लोकाः कर्मसु चामृत" मिति—

ब्रह्मणो विश्वोत्पत्तिप्रकार उच्यते । तपसा ज्ञानेन, "यस्य ज्ञानमयं तप" इति वक्ष्यमाणत्वात् । चीयते—उपचीयते, 'बहु स्या'मिति सङ्कल्परूपेण ज्ञानेन ब्रह्म सृष्ट्युन्मुखं भवतीत्यर्थः । 'ततोऽन्नमभिजायते', अद्यत इत्यन्नम्, विश्वस्य भोक्तृवर्गस्य भोग्यभूतं भूतसूक्ष्ममव्याकृतं परस्माद् ब्रह्मणो जायत इत्यर्थः । प्राणमनःप्रभृति च स्वर्गापवर्गरूपफलसाधनभूतकर्मपर्यन्तं सर्वं विकारजातं तस्मादेव जायते । 'यस्सर्वज्ञस्सर्ववि'दित्यादिना सृष्ट्युपकरणभूतं सार्वज्ञ्यसत्यसङ्कल्पत्वादिकमुक्तम् । सर्वज्ञात्सत्यसङ्कल्पात्परस्मात् ब्रह्मणोऽन्नादेतत् कार्याकारं ब्रह्म नामरूपविभक्तं भोक्तृभोग्यरूपं च जायते । 'तदेतत्सत्य'मिति परस्य ब्रह्मणो निरुपाधिकसत्यत्वमुच्यते ।

मन्त्रेषु कर्माणि कवयो यान्यपश्यं-
स्तानि त्रेतायां बहुधा सन्ततानि ।
तान्याचरत नियतं सत्यकामा" इति—

सार्वज्ञ्यसत्यसङ्कल्पत्वादिकल्याणगुणाकरमक्षरं पुरुषं स्वतस्सत्यं[1] कामयमानास्तत्प्राप्तये फलान्तरेभ्यो विरक्ता ऋग्यजुस्सामाथर्वसु कविभिर्दृष्टानि वर्णाश्रमोचितानि त्रेताग्निषु बहुधा सन्ततानि कर्माण्याचरतेति । 'एष वः पन्था' इत्यारभ्य 'एष वः पुण्यस्सुकृतो ब्रह्मलोक' इत्यन्तेन कर्मानुष्ठानप्रकारं श्रुतिस्मृतिचोदितेषु कर्मस्वेकतरकर्मवैधुर्येपीतरेषामनुष्ठितानामपि निष्फलत्वमयथानुष्ठितस्य चाननुष्ठितसमत्व[2]मभिधाय,

"प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म ।
एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्यू[3] ते पुनरेवापियन्ति" ॥

१ सत्यं नित्यमिति लि॰ पु॰ पाठः ।
२ निष्फलत्वमयथानुष्ठितसमत्वमभिधायेति लि॰ पु॰ पाठः ।
३ जरामृत्युमिति क्वचित्पाठो भवति ।

इत्यादिना फलाभिसन्धिपूर्वकत्वेन ज्ञानविधुरतया चाऽवरं कर्माचरतां पुनरावृत्तिमुक्त्वा "तपःश्रद्धे ये ह्युपवसन्ती" त्यादिना पुनरपि फलाभिसन्धिरहितं ज्ञानिनाऽनुष्ठितं कर्म ब्रह्मप्राप्तये भवतीति प्रदर्श्य, "परीक्ष्य लोका" नित्यादिना केवलकर्मफलेषु विरक्तस्य यथोदितकर्मानुगृहीतं ब्रह्मप्राप्त्युपायभूतं ज्ञानम् जिज्ञासमानस्य चाचार्योपसदनं विधाय, "तदेतत्सत्यं यथा सुदीप्ता"दित्यादिना "सोऽविद्याग्रन्थिं विकिरतीह सोम्ये"त्यन्तेन पूर्वोक्तस्याक्षरस्य भूतयोनेः परस्य ब्रह्मणः परमपुरुषस्यानन्तैः स्वरूपगुणैः[1] सह सर्वभूतान्तरात्मतया विश्वशरीरत्वेन विश्वरूपत्वं तस्माद्विश्वसृष्टिं च विस्पष्टमभिधाय, "आविस्सन्निहित"मित्यादिना तस्यैवाक्षरस्याव्याकृतात्परतोऽपि पुरुषात्परभूतस्य परस्य ब्रह्मणः परमव्योम्नि प्रतिष्ठितस्यानवधिकातिशयानन्दस्वरूपस्य हृदयगुहायामुपासनप्रकारमुपासनस्य च परभक्ति[2]रूपत्वमुपासीनस्याविद्याविमोकपूर्वकं ब्रह्मसमं ब्रह्मानुभवफलं चोपदिश्योपसंहृतम् । अत एवं विशेषणाद्भेदव्यपदेशाच्च नास्मिन् प्रकरणे प्रधानपुरुषौ प्रतिपाद्येते । भेदव्यपदेशोऽपि हि ताभ्यां परस्य ब्रह्मणोऽत्र विद्यते–

"दिव्यो ह्यमूर्तः पुरुषस्स बाह्याभ्यन्तरो ह्यजः ।
अप्राणो ह्यमनाश्शुभ्रो ह्यक्षरात्परतः परः" इत्यादिभिः ।

अक्षरादव्याकृतात्परो यः समष्टिपुरुषः, तस्मादपि परभूतोऽदृश्यत्वादिगुणकोऽक्षरशब्दाभिहितः परमात्मेत्यर्थः । अश्नुत इति वा न क्षरतीति वाऽक्षरम् । तदव्याकृतेऽपि स्व[3]विकारव्याप्त्या वा महदादिवत्कार्यान्तराभिलापयोग्यक्षरणाभावाद्वाऽक्षरत्वं कथञ्चिदुपपद्यते ।

रूपोपन्यासाच्च ॥ २४ ॥

"अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ
दिशश्श्रोत्रे वाग्विवृताश्च वेदाः ।

---

१ स्वरूपगुणैरिति लि॰ पु॰ पाठः प्रामादिकः ।

२ परमभक्तीति लि॰ पु॰ पाठः ।

३ अक्षरं तदव्याकृतं स्वेति लि॰ पु॰ प्रामादिकः ।

Digitized by Google

वायुः प्राणो हृदयं विश्वमस्य
पद्भ्यां [1]पृथिवी ह्येष सर्वभूतान्तरात्मा ॥–

इतीदृशं रूपं सर्वभूतान्तरात्मनः परमात्मन एव संभवति,[2] अतश्च परमात्मा ॥

अदृश्यत्वादिगुणकाधिकरणं समाप्तम् ॥ ५ ॥

अथ वैश्वानराधिकरणम् ६ ।

वैश्वानरस्साधारणशब्दविशेषात् ॥ २५ ॥

इदमामनन्ति छन्दोगाः "आत्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषि तमेव नो ब्रूही"ति प्रक्रम्य "यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते" इति । तत्र संदेहः–किमयं वैश्वानर आत्मा परमात्मेति शक्यनिर्णय उत नेति । किं प्राप्तम् । अशक्यनिर्णय इति । कुतः । 'वैश्वानर'–शब्दस्य चतुर्ष्वर्थेषु प्रयोगदर्शनात् । जाठराग्नौ तावत्–"अयमग्निर्वैश्वानरो येनेदमन्नं पच्यते यदिदमद्यते तस्यैष घोषो भवति यमेतत्कर्णावपिधाय शृणोति स यदोत्क्रमिष्यन् भवति नैनं घोषं शृणोती"ति । महाभूततृतीये च–"विश्वस्मा अग्निं[3] भुवनाय देवा वैश्वानरं केतुमह्नामकृण्व"न्निति । देवतायां च–"वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्री"रिति । परमात्मनि च–"तदात्मन्येव हृदयेऽग्नौ वैश्वानरे प्रास्यत्"[4], "स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरुदयत"[5]इति च । वाक्योपक्रमादिषूपलभ्यमानान्यपि लिङ्गानि सर्वानुगुणतया नेतुं शक्यानि[6] । इत्येवं प्राप्तेऽभिधीयते–

'वैश्वानरस्साधारणशब्दविशेषात्'

---

१ नाभिपद्भ्यामिति जि॰ पु॰ पाठो नैव युक्तः ।
२ संभवेति जि॰ पु॰ पाठः ।
३ विश्वस्य अग्निमिति जि॰ पु॰ पाठः ।
४ हृदये वैश्वानरेन्द्र्यादिति जि॰ पु॰ पाठः ।
५ ऽग्निरुदय आग्नौ स इति जि॰ पु॰ पाठः ।
६ नेतुमशक्यानीति जि॰ पु॰ पाठो विपरीतार्थकः ।

Digitized by Google

वैश्वानरः परमात्मा । कुतः । साधारणशब्दविशेषात् । विशेष्यत इति[1] विशेषः, साधारणस्य 'वैश्वानर'-शब्दस्य परमात्मासाधारणैर्धर्मैर्विशेष्यमाणत्वादित्यर्थः । तथाहि, औपमन्यवादयः पञ्चेमे महर्षयः समेत्य "को न आत्मा किं ब्रह्मे"ति विचार्य "उद्दालको ह वै भगवन्तोऽयमारुणिस्सम्प्रतीममात्मानं वैश्वानरमध्येति तं हन्ताभ्यागच्छामे"त्युद्दालकस्य वैश्वानरात्मविज्ञानमवगम्य तमभ्याजग्मुः, स चोद्दालक एतान्वैश्वानरात्मजिज्ञासूनभिलक्ष्याऽऽत्मनश्च तत्राऽकृत्स्नवेदित्वं मत्वा तान्होवाच "अश्वपतिर्वै भगवन्तोऽयं कैकेय[2]स्संप्रतीममात्मानं वैश्वानरमध्येति तं हन्ताभ्यागच्छामे"ति, ते चोद्दालकषष्ठास्तमश्वपतिमभ्याजग्मुः, स च तान्महर्षीन् यथार्हं पृथगभ्यर्च्य 'न मे स्तेन' इत्यादिना 'यक्ष्यमाणो ह[3] वै भगवन्तोऽहमस्मी'त्यन्तेनात्मनो व्रतस्थतया प्रतिग्रहयोग्यतां ज्ञापयन्नेव ब्रह्मविद्भिरपि प्रतिग्रहपरिहरणीयतां विहितकर्मकर्तव्यतां च प्रज्ञाप्य[4] "यावदेकैकस्मा ऋत्विजे धनं दास्यामि तावद्भगवद्भ्यो दास्यामि वसन्तु [मे] भगवन्त"[5] इत्यवोचत्, ते च मुमुक्षवो वैश्वानरमात्मानं जिज्ञासमानास्तमेवात्मानमस्माकं ब्रूहीत्यवोचन् । तदेवं 'को न आत्मा किं ब्रह्मे'ति जीवात्मनामात्मभूतं ब्रह्म जिज्ञासमानैस्तज्ज्ञमन्विच्छद्भिर्वैश्वानरात्मज्ञसकाशमागम्य पृच्छ्यमानो वैश्वानरात्मा परमात्मेति विज्ञायते, आत्मब्रह्मशब्दाभ्यामुपक्रम्य पश्चात्सर्वत्रात्मवैश्वानरशब्दाभ्यां व्यवहाराच्च ब्रह्मशब्दस्थाने निर्दिश्यमानो वैश्वानरशब्दो ब्रह्मैवाभिधत्त इति विज्ञायते । किञ्च, "स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वऽन्नमत्ति तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्त" इति च वक्ष्यमाणं वैश्वानरात्मविज्ञानफलं वैश्वानरात्मानं परं ब्रह्मेति ज्ञापयति ।

इतश्च वैश्वानरः परमात्मा—

---

१ विशेष्य इतीति लि. पु॰ पाठः ।
२ केकय इति पु॰ द्वयेऽपि पाठः स न युक्तः ।
३ 'हे'ति पु॰ द्वयेऽपि पाठः, उपनिषदि तु न भवति ।
४ प्रतिज्ञाप्येति लि॰ पु॰ पाठः स तु न युक्तः ।
५ मे–इति पु॰ द्वयेऽपि नास्ति । भगवन्त इति मु॰ पु॰ पाठः ।
६ इषीकतूलमिति मु॰ पु॰ पाठो, मनूपनिषदि तथा ।

स्मर्यमाणमनुमानं स्यादिति ॥ २६ ॥

द्युप्रभृति पृथिव्यन्तमवयवविभागेन वैश्वानरस्य रूपमिहोपदिश्यते, तच्च श्रुतिस्मृतिषु परमपुरुषरूपतया प्रसिद्धम्, तदिह तदेवेदमिति 'स्मर्यमाणं' प्रत्यभिज्ञायमानं वैश्वानरस्य परमपुरुषत्वे ऽनुमानम् लिङ्गमित्यर्थः। 'इति'शब्दः प्रकारवचनः, इत्थंभूतं रूपं प्रत्यभिज्ञायमानं वैश्वानरस्य परमात्मत्वे ऽनुमानं स्यात्। श्रुतिस्मृतिषु हि परमपुरुषस्येत्थं रूपं प्रसिद्धम्, यथा ऽऽथर्वणे—

"अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ
दिशः श्रोत्रे वाग्विवृताश्च वेदाः।
वायुः प्राणो हृदयं विश्वमस्य
पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मे"ति,

अग्निरिह द्युलोकः "असौ वै लोकोऽग्नि"रिति श्रुतेः।
स्मरन्ति च मुनयः

"द्यां मूर्धानं[1] यस्य विप्रा वदन्ति
खं वै नाभिं चन्द्रसूर्यौ च नेत्रे।
दिशः श्रोत्रे विद्धि पादौ क्षितिं च
सोऽचिन्त्यात्मा सर्वभूतप्रणेते"ति,
यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः।
सूर्यश्चक्षुर्दिशः श्रोत्रं तस्मै लोकात्मने नम" इति च।

इह च द्युप्रभृतयो वैश्वानरस्य मूर्धाद्यवयवत्वेनोच्यन्ते। तथाहि, तैरौपमन्यवप्रभृतिभिर्महर्षिभिः 'आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूही'ति पृष्टः कैकेय[2]स्तेभ्यो वैश्वानरात्मानमुपदिदिक्षुर्विशेषप्रश्नान्यथानुपपत्त्या वैश्वानरात्मन्येतैः किञ्चिज्ज्ञातं किञ्चिदज्ञातमिति विज्ञाय ज्ञाताज्ञातांशबुभुत्सया तानेकैकं पप्रच्छ। तत्र 'औपमन्यव कं त्वमात्मानमुपास्स' इति पृष्टे 'दिवमेव भगवो राज'न्निति तेन चोक्ते दिवि तस्य

१ द्यौर्मूर्द्धानमिति लि· पु। २ कैकय इति पु· द्वये ऽपि पुनः पाठः।

Digitized by Google

पूर्वं वैश्वानरात्मबुद्धिं निवर्तयन्वैश्वानरस्य 'क्षोर्मूर्धे'ति चोपदिशंस्तस्या वैश्वानरांशभूताया दिव'स्सुतेजा' इति गुणनामधेयं प्राचिख्यपत् । एवं सत्ययज्ञादिभिरादित्यवाय्वाकाशाऽपपृथिवीनामेकैकेनैकैक[1]मुपास्यमानतया कथितानां 'विश्वरूपः' 'पृथग्वर्त्मा' 'बहुलो' 'रयिः' 'प्रतिष्ठे'त्येकैकगुणनामधेयानि वैश्वानरात्मनश्चक्षुःप्राणसन्देहबस्तिपादावयवत्वं चोपदिष्टम् । सङ्क्षेपो मध्यकाय उच्यते । अत एवंभूतद्युमूर्धत्वादिविशिष्टं परमपुरुषस्यैव रूपमिति वैश्वानरः परमपुरुष एव ।

पुनरप्यनिर्णयमेवाशङ्क्य परिहरति

शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेत्, न, तथादृष्ट्युपदेशादसम्भवात्पुरुषमपि चैनमधीयते ॥ २७ ॥

यदुक्तं वैश्वानरः परमात्मेति निश्चीयत इति, तन्न, शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च जाठरस्याप्यग्नेरिह प्रतीयमानत्वात् । शब्दस्तावद् वाजिनां वैश्वानरविद्याप्रकरणे "स एषोऽग्निर्वैश्वानर" इति वैश्वानरसमानाधिकरणतयाऽग्निरिति श्रूयते । अस्मिन्प्रकरणे च "हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीय" इति वैश्वानरस्य हृदयादिस्थस्याग्नित्रयकल्पनं क्रियते "तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयम् स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात् प्राणाय स्वाहे"त्यादिना प्राणाहुत्याधारत्वं च वैश्वानरस्यावगम्यते, तथा वैश्वानरस्यास्मिन्पुरुषेऽन्तःप्रतिष्ठानं वाजसनेयिनः समामनन्ति "स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेदे"ति । अतोऽग्निशब्दसामानाधिकरण्यादग्नित्रेताऽपरिकल्पनात्प्राणाहुत्याधारभावादन्तःप्रतिष्ठानाच्च वैश्वानरस्य जाठरत्वमपि प्रतीयत इति नैकान्ततः परमात्मत्वमिति चेत्, तन्न, तथादृष्ट्युपदेशात्=पूर्वोक्तस्य त्रैलोक्यशरीरस्य परस्य ब्रह्मणो वैश्वानरस्य जाठराग्निशरीरतया तद्विशिष्टो[2]पासनस्योपदेशात् । अग्निशब्दादिभिर्हि न केवलो

---

१ एकैकमित्येव पाठः । एकैकमिति कथनक्रियाविशेषणम्, उपास्यमानत्वेन एकैकतया कथितानामादित्यादीनामित्यर्थः ।

२ तद्विशिष्टस्येति लि० पु० व्यस्तः पाठः ।

जाठरः प्रतिपाद्यते, अपि तु जाठराग्निविशिष्टः परमात्मा—कथमिदमवगम्यत इति चेत्। असम्भवात्—जाठरस्य केवलस्य त्रैलोक्यशरीरत्वासम्भवात्[1] त्रैलोक्यशरीरतया प्रतिपन्नवैश्वानरसमानाधिकरणो जाठरविषयतया प्रतीयमानोऽग्निशब्दो जाठरशरीरतया तद्विशिष्टं परमात्मानमेवाभिदधातीत्यर्थः। यथोक्तं भगवता—

"अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विध'मिति।

जाठरानलशरीरो भूत्वेत्यर्थः। अतस्तद्विशिष्टस्योपासनमत्रोपदिश्यते। किंच, पुरुषमपि चैनमधीयते वाजसनेयिनः—"स एषोऽग्निर्वैश्वानरो यत्पुरुष" इति। न हि जाठरस्य केवलस्य पुरुषत्वम्, परमात्मन एव हि निरुपाधिकं पुरुषत्वम्, यथा 'सहस्रशीर्षा पुरुषः' 'पुरुष एवेदं सर्व'मित्यादौ।

अत एव न देवता भूतं च ॥ २८ ॥

उक्तेभ्य एव हेतुभ्यो देवतायाश्च तृतीयस्य महाभूतस्यापि न वैश्वानरत्वप्रसङ्गः।

साक्षादप्यविरोधं जैमिनिः ॥ २९ ॥

वैश्वानरसमानाधिकरणस्याग्निशब्दस्य जाठराग्निशरीरतया तद्विशिष्टस्य परमात्मनो वाचकत्वं तथैव परमात्मन उपास्यत्वं चोक्तम्॥ जैमिनिस्त्वाचार्यो वैश्वानरशब्दवदग्निशब्दस्यापि परमात्मन एव 'साक्षात्'—अव्यवधानेन वाचकत्वे न कश्चिद्विरोध इति मन्यते। एतदुक्तं भवति, यथा वैश्वानरशब्दः साधारणोऽपि परमात्मासाधारणधर्मविशेषितो विश्वेषां नराणां नेतृत्वादिना गुणेन परमात्मानमेवाभिदधातीति निश्चीयते, एवमग्निशब्दोऽप्यग्रनयनादिना येनैव गुणेन योगाज्ज्वलने वर्तते, तस्यैव गुणस्य निरुपाधिकस्य काष्ठागतस्य परमात्मनि सम्भवादस्मिन् प्रकरणे परमात्माऽसाधारणधर्मविशेषितः परमात्मानमेवाभिधत्त इति।

---

१ शरीरत्वसम्भवादिति कि॰ पु॰ पाठो विपरीतार्थकः।

यस्त्वेतमेवं प्रादेशमात्रमभिविमानमित्यपरिच्छिन्नस्य परस्य ब्रह्मणो द्युप्रभृतिपृथिव्यन्तप्रदेशसम्बन्धिन्या मात्रया परिच्छिन्नत्वं कथमुपपद्यते? तत्राह—

अभिव्यक्तेरित्याश्मरथ्यः ॥ ३० ॥

उपासकाभिव्यक्त्यर्थं प्रादेशमात्रत्वं परमात्मन इत्याश्मरथ्य आचार्यो मन्यते, 'द्यौर्मूर्धा ऽऽदित्यश्चक्षुर्वायुः प्राण आकाशो मध्यकाय आपो बस्तिः पृथिवी पादा'विति द्युप्रभृतिप्रदेशसम्बन्धिन्या मात्रया परिच्छिन्नत्वं कृत्स्नमिदमभिव्याप्तवतो विगतमानस्य ह्यभिव्यक्तेरेव हेतोर्भवति ।

मूर्धप्रभृत्यवयवविशेषैः पुरुषविधत्वं[1] परस्य ब्रह्मणः किमर्थमिति चेत्, तत्राह—

अनुस्मृतेर्बादरिः ॥ ३१ ॥

तथोपासनार्थमिति बादरिराचार्यो मन्यते । "यस्त्वेतमेवं प्रादेशमात्रमभिविमान[2]मात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ती"ति ब्रह्मप्राप्तये ह्युपासनमुपदिश्यते । 'एतमेव'मिति उक्तप्रकारेण पुरुषाकारमित्यर्थः । सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु वर्तमानं यदन्नं भोग्यं तदत्ति, सर्वत्र वर्तमानं स्वत एवानवधिकातिशयानन्दं ब्रह्मानुभवति । यत्तु सर्वैः कर्मवश्यैरात्मभिः प्रत्येकमनन्यसाधारणमन्नं भुज्यते, तन्मुमुक्षुभिस्त्याज्यत्वादिह न गृह्यते ।

यदि परमात्मा वैश्वानरः, कथं तच्छिरःप्रभृतीनां वेद्यादित्वोपदेशः, यावता जाठराग्निपरिग्रह एवैतदुपपद्यत इत्यत्राह—

सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति ॥ ३२ ॥

अस्य परमात्मन एव वैश्वानरस्य द्युप्रभृतिपृथिव्यन्तशरीरस्य समाराधनभूताया उपासकैरहरहः क्रियमाणायाः प्राणाहुतेरग्निहोत्र-

१ पुरुषधर्मविशिष्टत्वमिति लि॰ पु॰ पाठः ।
२ यस्त्वेतमेवमभिविमानमिति मु॰ पु॰, यस्त्वेतमेवमादेशमात्रमभिविमानमिति लि॰ पु॰ पाठः ।

त्वसम्पादनायाऽयमुरःप्रभृतीनां वेदित्वाद्युपदेश इति जैमिनिराचार्यो मन्यते । तथाहि, परमात्मोपासनोचितमेव फलं प्राणाहुत्याग्निहोत्रसम्पत्तिं च दर्शयति श्रुतिरियम्—"स य इदमऽविद्वा[1]नग्निहोत्रं जुहोति यथाऽङ्गारानपोह्य भस्मनि जुहुयात्तादृक् तत्स्यात् अथ य एतदेवं विद्वानऽग्निहोत्रं जुहोति[2] तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवति तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते" इति ।

आमनन्ति चैनमस्मिन् ॥ ३३ ॥

एवं परमपुरुषं द्युमूर्धत्वादिविशिष्टं वैश्वानरमेस्मिन् उपासकशरीरे प्राणाहुत्याधारत्वाया ऽऽमनन्ति च "तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजा" इत्यादिना । अयमर्थः—"यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते" इति त्रैलोक्यशरीरस्य परमात्मनो वैश्वानरस्योपासनं विधाय 'सर्वेषु लोकेष्वि'त्यादिना ब्रह्मप्राप्तिं च फलमुपदिश्या ऽस्यैवोपासनस्याङ्गभूतं प्राणाग्निहोत्रं 'तस्य ह वा एतस्ये'त्यादिनोपदिशति यः पूर्वमुपास्यतयोपदिष्टो वैश्वानरस्तस्यावयवभूतानऽभ्वादित्यादीन्[3] सुतेजोविश्वरूपादिनामधेयानुपासकशरीरे मूर्धादिपादान्तेषु सम्पादयन्तीति[4] । 'मूर्धैव सुतेजाः' उपासकस्य मूर्धैव परमात्ममूर्धभूता द्यौरित्यर्थः । 'चक्षुर्विश्वरूपः' आदित्य इत्यर्थः । 'प्राणः पृथग्वर्त्मा' वायुरित्यर्थः । 'सन्देहो बहुलः', उपासकस्य मध्यकाय एव परमात्ममध्यकायभूत आकाश इत्यर्थः । 'बस्तिरेव रयिः', अस्य बस्तिरेव तदवयवभूता आप इत्यर्थः । 'पृथिव्येव पादौ', अस्य पादावेव तत्पादभूता पृथिवीत्यर्थः । एवमुपासकस्वशरीर एव परमात्मानं त्रैलोक्यशरीरं वैश्वानरं सन्निहितमनुसंधाय स्वकीयान्युरोलोमहृदयमनआस्यानि प्राणाहुत्याधारस्य परमात्मनो वैश्वानरस्य वेदिबर्हिर्गार्हपत्यान्वाहार्यपचनाहवनीयानऽग्निहो-

१ इदं विद्वानिति मु॰ पु॰ पाठोऽत्र विपरीतार्थः प्रामादिकः ।
२ विद्वानग्निहोत्रं जुहोतीत्येतावन्मु॰ पु॰ नास्ति ।
३ भूतान् द्युभ्वादित्यादीनिति ल॰ पु॰ पाठः । दुभ्वादित्यादीनित्येवं तु युक्तम् ।
४ संपादयति—इति मु॰ पु॰ पाठः ।

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्य
श्रीभाष्यस्य प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं॰श्रीराममिश्रशास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः	७।)
श्रीभाष्यस्य प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा	६)
श्रीभाष्यस्य तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा	३=)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः	२।)
वेदपूर्त्तः प्रथमो बिन्दुः सत्सम्प्रदायाचार्यपं॰स्वामिश्रीराममिश्रशास्त्रिप्रणीतो निर्विशेषाद्वैतनिराकरणपरः	१॥=)
वेदपूर्त्तिसहितो वेदार्थसंग्रहः	३॥)
शास्त्रदीपिका	६।)
सङ्कर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टचन्द्रिकोपेतम्, पं॰स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् ।	१।)
काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजपं॰दामोदरशास्त्रिणा संशोधिता पूर्वार्द्धरूपा	५॥)
तथा उत्तरार्द्धम्	८॥)
माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता	७॥)
काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता	६॥)
श्रीतिहन्तार्णवतरणिः	६)
दिग्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता	॥=)
जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता	५॥)
लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, श्रीशार्ङ्गधराचार्यविरचितया न्यायमुक्तावल्याख्यया टीकया सहिता	॥)
सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम्	॥)
तत्त्वमुक्ताकलापः-सर्वार्थसिद्धियुतः, बौधायनीयार्षसिद्धान्तानुसारी विशिष्टाद्वैतब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्किककेसरिणा सर्वतन्त्रस्वतन्त्रधिषणेन श्रीवेङ्कटनाथदेशिकेन प्रणीतः	५॥=)
वेदान्तसिद्धान्तमुक्तावली, आर्थर्वीनिस्साहबकृताङ्गलभाषानुवादयुता	१॥)
काव्यप्रकाशस्य इङ्गलण्डीयभाषानुवादः	२॥)
अथर्ववेदसंहिताया इङ्गलण्डीयभाषानुवादः	१२)
आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्यकाराणां परमगुरुणा श्रीयामुनाचार्यस्वामिना प्रणीतम्	॥)
तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्विश्वकर्मविरचितया न्यायप्रदीपाख्यटीकया सहिता	१॥)

CONTENTS.

Page.

MEMANSA NYAYAPRAKASH by Apodeva, edited by P. Ganganath Jha, M. A., Professor of Sanskrit Muir Central College, Allahabad 65

BIDHIVEVEKA of MANDAN MISRA with commentary Nyayakanika by Wachaspatti Misra, edited by P. Ram Shastri Tailang, Professor Sanskrit College, Benares 81

SHRIBHĀSHYA OF RĀMĀNUJA, (Text only,) Edited by Revd. J. J. Johnson, Benares 97-137

PĀTANJALA SŪTRA VRITTI OF NĀGESH BHUTT, Ed. by Pandit Taraktirath P. Jewa Nath Misra, Professor Sanskrit College, Benares 121

Digitized by Google

18 60

काशीविद्यासुधानिधिः

HARVARD COLLEGE LIBRARY
DEC 19 1905
CAMBRIDGE, MASS.

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 4.] April 1905. [Vol. XXVII.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1905.

Copyright on each article reserved.

Price Rs. 9 per annum.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
विधिमीमांसा, अप्पयदीक्षितकृता श्रीरामशास्त्रिणा संशोधिता	१)
Page 75.] To the above we make the following reply:—The momentary character of things cannot be proved by the mere fact of their existence; as in the case of such an inference we could form no idea of the absence of the *Probans* ('existence') in the contradictory of the Subject.

Objection: "We have the notion that 'that which is devoid of simultaneity and succession is non-existent as for instance, the horns of the horse,' and also that 'that which has more than a momentary existence, is devoid of succession and simultaneity.' And this contrary notion setting aside simultaneity and succession from 'non-momentary' entites,—we have the notion of their absence or *negation* of existence."

Reply: Not so; the mere non-cognition of the non-momentary thing does not necessarily bring an idea of the preclusion of 'existence' from it; as it is only when we perceive the existence of water, that we have the idea of the non-existence of Fire and Smoke. In the same manner an idea of the absence of *existence* could follow from the absence of succession and simultaneity, only when there would be a perception of the *non momentary thing.* For you, however, there is no 'non-momentary' thing.

Objection: "In the case of the ghost, we find that though the ghost is not actually perceived, yet we have an idea of its

preclusion from something else,—in the form that *the post is not a ghost*; and so we could also have in the case in question (even though we may not perceive the non-momentary object)."

Reply; That could not be; because preclusion is cognisable only by means of *negation*; and the Negation (of one thing) consists of the perception of something different from it; as it is not possible without the perception of its counter-entity. And if there were a total difference in the forms of the *ghost* and the *post*, the "ghost" could not be precluded from the 'post.'

Question: "How then have we the idea that the *post is not the ghost*?"

Answer: In this idea we have a negation, not of relationship, but of identity; and this could be possible only if we admitted the visibility of the *ghost* which was suspected to be indentical with the *post*,—not otherwise. As has been declared: 'all negation of identity is due to an admission of perceptibility.' The idea of the *post* restricted to the one form of the *post*, serves as the basis of the preclusion of all things not identical with that *post*. If the *post* were the *ghost*, then it would certainly be cognised in that character; as a matter of fact however we find that the idea of the *post* does not include any idea of the *ghost*, as it does that of the '*post*'; and hence we have the idea that *the post is not the ghost*.

Objection: "There is nothing, either momentary or non-" momentary, apart from such objects as the *blue* and the like. " As a matter of fact when the 'blue-moment' perceived by a " previous cognition is wrongly supposed to be identical with the " 'blue-moment' perceived by a present cognition, then that " 'blue-moment' is spoken of as 'non-momentary;' and when " the two are recognised as distinct, then they are known as 'mo-" mentary'; and the cognition of the absence or negation of exis-" tence is with reference to the 'blue,' this negation being brought " about by the preclusion of simultaneity and succession. And

"if what is cognised is only the 'moment' perceived before, then it "would either do the present useful action on the previous occa- "sion, or the past useful action on the present occasion; and "there would be no gradual performance of actions; as the contra- "dictory natures of the 'doer' and the 'non-doer' could not belong "to one and the same. Nor could it do all the actions on the "previous occasion; as in that case having no useful actions on "the present occasion, it would have no existence at the present "time."

Reply: But in this case too, has any real contradictory of the *Probans*, or of the *existence*, been shown? Or, has such contradictory been proved to be such as is only imposed by imagination? In fact there is no actual contradictory; as the *non-momentary* 'Blue' &c., have no real existence. Then one who wishes to obtain from Inference a real knowledge of things, should,—for the sake of the ascertaining of the threefold form of the middle term, as in the case of the Inference from 'smoke,'—show that it has a such an existence in the Subject (*Paksha*) of the Inference, as is only cognised by the recognised means of knowledge, and not as a mere imaginary imposition. As a matter of fact, there is nothing *non-momentary* that has such a character, and hence there is an impossibility of the negation (of the middle term). And this not being established, there could not be an affirmation of it either, as an affirmation (or positive existence) is always preceded by a negation. And thus the *Probans* becomes open to the fallacy of *Asādhāraṇa*

Page 76.] Then again, what has been proved by the contrary cognition is the absence of existence, from *non-momentary* things; but how do you establish the concomitance of *momentariness* and *existence*? The mere preclusion of existence from the contrary of *momentariness* can not prove that concomitance; as in that case, even an *asādhāraṇa Probans* would prove the conclusion. The negative inference—*i. e.* the inference of mere negation—cannot be desirable for you.

Digitized by Google

Objection: "When it is proved that *existence* cannot belong to the *non-momentary*, it follows as a necessary corrollary from this that *existence* belongs to the *momentary*."

Reply: Not so; as the mere assertion of its following as a corrollary does not contain a statement of the reason for existence (*i. e.* it does not constitute the necessary Minor premiss); and that of which the invariable concomitance with the Minor term ('existence') has not been established can never serve as the right *Probans*.

"*Objection*: "The contrary cognition itself will have the "double function of proving either another proof or the invari- "able concomitance (necessary for it) and of proving the con- "trary); and it would prove this with regard to the 'twelve "*Āyatanas*;' as no invariable concomitance could be cognised, "except with reference to a certain object; and there is no object "apart from the twelve '*Āyatanas*;' and when the concomitance "of *existence* with these has been recognised, there is cognition "of *momentariness* also; as the cognition of relationship always "accompanies the cognition of that which is related; and thus we "have the purposelessness of existence in the subject (major "term) of the inference; and this would constitute a cognition "of invariable concomitance of *existence in general*, and would "make the *specific existence* the middle term in the inference."

Reply: Not so; because there can be no cognition of the generality devoid of individuals. And as for the generalities of 'momentariness,' and 'existence' inhering in specific individuals, that are cognised,—we find the momentariness of such things as 'blue' and the like duly cognised; (and these having existence), it is well said that there is a purposelessness of 'existence'!

Objection: "From the aforesaid contrary cognition we have the cognition of the invariable concomitance of the *preclusion of non-momentariness* and the *preclusion of existence*; and from *existence* follows the cognition of the momentary character of all that has the character of a substance."

न चैवं वाक्यस्य गुरुतरस्य कदाऽपि प्रयोगो न स्यात्। संक्षेपव्याख्यानाय तत्प्रयोगस्यापि सम्भवात्। पदेषु तद्भागतया तदर्थशक्तिमत्स्वपि केवलात्सहकारिणं विना तदर्थाप्रत्ययाच्च ।

नन्वेवं सर्वत्र वाक्यस्यैव बोधकत्वे किमर्थं व्याकरणे पदानामन्वाख्यानं, किं च पदवद्वाक्यमखण्डमेव न सन्त्येव पदानीति तदन्वाख्यानमसम्भवि चेति चेन्न ।

वाक्यात्कल्पनयैव पदं प्रविभज्य कल्पितक्रियावाचकत्वेन कारकवाचकत्वेन वाऽन्वाख्यानात् । अन्यथा घटो भवति, भवति ! भिक्षां देहि, अश्वस्त्वं, अश्वो याति, अजापयः पिब, अजापयः शत्रून्, इत्यादौ नामाख्यातसारूप्यादन्वाख्यानं विना क्रियाकारकार्थत्वान्यतरेणाज्ञातं कथं क्रियायां कारके वा प्रयुज्येत । तत्र हि त्वं गतवान्, अश्वत्वजातिमागच्छति, छागाः पयः पिब, शत्रूननाशय इत्याद्यर्थप्रतीतिः । तस्मादपोद्धृत्यान्वाख्यानं, न त्वन्वाख्यानादेव पारमार्थिको विभागः पदानाम् । एवं चाप्रविभागदर्शनाद् वर्णानामपि पदेऽविभागं मन्यन्ते लौकिकाः । यथा च वाक्ये पदभागाः कल्पिता, एवं पदे वर्णभागा इति तात्पर्यम् । न चैवं शब्दार्थप्रत्ययानामविभाग एवास्तु प्रतीत्या भेदस्य सिद्धेः । तथा हि । श्वेतत इति साध्यरूपक्रियाऽर्थः शब्दः, श्वेतः प्रासाद इति सिद्धरूपतया कारकार्थः शब्दः । अभिहितत्वाच्च कारकविभक्तेरभावः तयोः शब्दयोः क्रियाऽऽत्माकारकात्मा चार्थः प्रत्ययश्च तत्तदर्थविषयो भिन्न एव । न चाभेदेन प्रतीत्या सङ्करात्कुतस्तेषां प्रविभागः । सोऽयमित्यभिसम्बन्धरूपसङ्केतोपाधिक एकाकारप्रत्ययो न तात्त्विक इत्यदोषात् । वस्तुतः शब्दप्रत्यययोरालम्बनं श्वेतोऽर्थः, स च शब्दादिव्यावृत्ताभिर्नवपुराणत्वादिभिरवस्थाभिः स्वाभिर्विक्रियमाणत्वान्न शब्दप्रत्यययोः सहगतस्ता-

भ्यामभिन्नः सर्वशब्दः स्वावस्थाभिर्विक्रियमाणो नार्थबुद्ध्योः सह-गतः । एवं प्रत्ययेऽपीति परस्परविभक्त एवैतेषु मनुष्यवचनविषये प्रविभागसंयमात्साक्षात्कारपर्यन्ताद्योगी सर्वभूतरुतज्ञो भवति तेषां रुतं तदर्थभेदं तत्प्रत्ययञ्च योगी जानातीति दिक् ।

संयमान्तरस्य सिद्ध्यन्तरमाह ।

संस्कारसाक्षात्करणात्पूर्वजातिज्ञानम् ॥ १८ ॥

अथ संस्कारसंयमेनेति सूत्रस्यादिः । द्विविधाः संस्काराः स्मृतिरागादिक्लेशहेतवो वासनारूपाः, जात्यायुर्भोगरूपविपाकहेतवो धर्माधर्मरूपाश्च । अविद्यासत्त्वेऽपि रागादिवैचित्र्यदर्शनात्तेषु वासनानां हेतुत्वमावश्यकम् । ते च पूर्वजन्मोपचिताः परिणामचेष्टानिरोधशक्ति-जीवनरूपचित्तधर्मवत्साक्षिभास्यत्वाभाववन्तश्चित्तधर्माः तेषु क्रिय-माणः संयमस्तत्साक्षात्करणे समर्थो भवति । तेषु शब्दानुमानाभ्यां सामान्यतो ज्ञातेषु विशेषज्ञानफलः संयमः कार्यः तत्संस्कारसाक्षात्क-रणात्पूर्वजातिज्ञानं भवति । देशकालनिमित्तानुभवैर्विना तत्साक्षा-त्कारासम्भवात् । देशो जन्मभूमिः स्वर्गनरकादिः, कालो युगादिः, निमित्तं मातापित्रादिः, अनुभवो विषयीकरणम्, सविषयकगुणज्ञानस्य विषयोपरागेणैव ज्ञानेच्छाऽऽदिस्थले दृष्टत्वात् । सूत्रे पूर्वजातीत्युपल-क्षणं परजन्मादिज्ञानस्यापि । संस्कारसाक्षात्करणात्पूर्वादिजन्मान्यशेष-विशेषैर्ज्ञायन्त इत्यत्र-इदमाख्यानं श्रूयते भगवतो जैगीषव्यस्य संस्कार-साक्षात्करणाद् दशसुप्राकृतसर्गेषु । जन्मक्रमं बाल्ययौवनवार्धकादि-रूपं तत्परिणामक्रमं च साक्षात्कुर्वतो विवेकजं ज्ञानं प्रादुरभूत् । अथ भगवानावट्यो लिङ्गधारी आकाशविहारी परीक्षार्थं तनुधरो निर्माणकाय-धारी भूत्वा पप्रच्छ दशसु महासर्गेषु कल्पेषु कुशलत्वादनभिभूतबुद्धि-सत्त्वेन त्वया नरकतिर्यगादिगर्भसम्भवं दुःखमुपभुञ्जता देवमनु-

ष्येषु पुनः पुनरुत्पद्यमानेन त्वया सुखमुपभुञ्जता च सुखदुःखयोर्मध्ये किमधिकमुपलब्धमिति" ततस्तं जैगीषव्य उवाच, तत्र देवमनुष्येषु पुनः पुनरुत्पद्यमानेन यत्किञ्चिदनुभूतं सुखं तत्सर्वं दुःखमेव प्रत्येमि। यथा सुखस्यापि दुःखत्वं तथा गुणवृत्त्यविरोधाच्चेत्यनेनोक्तम् पुनरावट्यः पप्रच्छ "यदिदमायुष्मतः स्वेच्छया प्रकृतिप्रयोक्तृत्वरूपप्रधानवशित्वेन ऐश्वर्यसुखं तथा प्रधानवशित्वेन कामसमाप्त्याविषये स्वतंत्रप्रत्ययरूपवैतृष्ण्याख्यसन्तोषजन्यं यच्चिन्नस्य स्वाभाविकं सुखं सर्वतोऽप्युत्तमं किमिदमपि दुःखपक्षे निक्षिप्तमिति"। ततो जैगीषव्य उवाच, विषयसुखापेक्षयैवेदमनुत्तमं सन्तोषसुखमुक्तं कैवल्यापेक्षया दुःखमेव, यतोऽयं सन्तोषाख्योऽलंप्रत्ययो बुद्धिधर्मत्वात् त्रिगुणः सुखादिगुणत्रयवान्, त्रिगुणश्च प्रत्ययो बुद्धिपरिणामो हेयपक्षे दुःखपक्षे न्यस्तो। मधुविषसंपृक्तान्नवद् इति तृष्णा हि दुःखसाधनत्वात् दुःखरूपस्तत्तत्वैन्धकारज्जहेतुस्तज्जन्यदुःखरूपसन्तापापगमाद् वैषयिकदुःखाकलुषितत्वरूपप्रसन्नत्ववद्, अत एवाऽबाधमक्षयं, यावद्बुद्धिस्थापि सर्वेषामेव प्रियमेतावन्मात्रेण प्रधानवशित्वमूलकस्य सुखत्वमुक्तं शास्त्रेष्विति ।

प्रत्ययस्य परचित्तज्ञानम् ॥ १९ ॥

प्रत्ययस्य रागादिमत्याश्चित्तवृत्तेः संयमेनाश्रयादिरूपाशेषविशेषैः साक्षात्करणादन्यचित्तस्याशेषविशेषतो ज्ञानं सङ्कल्पमात्रेण भवतीत्यर्थः। न च यथा संस्कारसाक्षात्कारे तद्विषयदेशादिकमपि विषयीक्रियते, तथा न परचित्तसाक्षात्कारोऽमुकविषयकरागवानित्येवं भवतीति वाच्यम् । परचित्तालम्बनस्य संयमविषयेण स्वचित्तेनाविषयीकरणात्, तत्प्रतिपादकशास्त्राभावाद् रागवदित्येव ज्ञानादिति दिक्।

संयमान्तरस्य सिद्ध्यन्तरमाह ।

कायरूपसंयमात्तद्ग्राह्यशक्तिस्तम्भे चक्षुःप्रकाशासंयोगेऽन्तर्धानम् ॥ २० ॥

स्वशरीररूपस्य संयमेन कारणाद्यशेषविशेषतः स साक्षात्कारे सति सङ्कल्पमात्रेण स्वकीयरूपस्य दृश्यताशक्तिं परचक्षुःसंयोगयोग्यतां प्रतिबध्नाति, तत्स्तम्भे सति परचक्षुःप्रकाशेस्तत्किरणैरसंयोगेऽन्तर्धानमुत्पद्यते योगिनः। दिवाऽन्धेनेव केनाप्यसौ न दृश्यत इत्यर्थः। एवं यदा स्वस्य शब्दस्पर्शरसगन्धसंयमात्तेषां ग्राह्यताशक्तिम् प्रतिबध्नाति, तदा श्रोत्रादिसंनिकर्षप्रतिबन्धाद्योगिनः शब्दादिबधिरादिनेव न केनापि श्रूयत इति बोध्यम् ।

सिद्ध्यन्तरमाह ।

सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरान्तज्ञानमरिष्टेभ्यो वा ॥ २१ ॥

आयुष्करकर्मज्ञानादेव चिरशीघ्रतारूपेण मरणज्ञानं तच्च विद्यमानजन्मभुज्यमानकर्मभिः सहैकभविकमायुष्करं कर्म द्विविधं सोपक्रमं निरुपक्रमं च । तत्राद्यं तीव्रवेगेन फलदातृ यथा कलिकालीनप्रजासु बाल्ययौवनवार्धक्याद्यवस्थानामारम्भकम् । अन्त्यं मन्दवेगेन फलदातृ यथा सत्यादिकालीनप्रजासु तदारम्भकम् । यथाऽऽर्द्रवस्त्रप्रसारितमल्पकालेन शुष्येद्, यथा वा शुष्के तृणे मुक्तो वह्निर्वातेन युक्तः शीघ्रमेव दहति तद्वदाद्यम् । यथा च संपिण्डितं वासश्चिरेण शुष्यति, यथा वाऽग्निस्तृणराशावार्द्रे वाताभावे क्रमेण न्यस्तश्चिराद्दहति तद्वदन्त्यम् । परान्तः प्रलयस्तमपेक्ष्यापरान्तो मरणम् । कर्मणः सोपक्रमत्वज्ञाने झटिति मरणमिति ज्ञानं निरुपक्रमत्वज्ञाने विलम्बेन मरणमिति ज्ञानं, जन्मान्तरभोग्यस्य कर्मणोऽज्ञानं

न वर्त्तमानदेहस्यापरान्तज्ञाने हेतुरतो विद्यमानेत्यादि । अरिष्टेभ्यो वेति । अरिवत् त्रासयतीत्यरिष्टम् । अरिष्टं च त्रिविधम् । आध्यात्मिकमाधिभौतिकमाधिदैविकं च । तत्राद्यं यथा पिहितकर्णः स्वदेहान्तर्घोषं वह्निज्वलनशब्दवच्छब्दविशेषं न शृणोति, तथा नेत्रेऽङ्गुल्यादिनाऽवष्टब्धे ज्योतिर्न पश्यति । द्वितीयं, यमपुरुषान्पश्यति पितॄनतीतान् पश्यति ग्रामान्तरगताननागतानेवाकस्मात्पश्यति । तृतीयम् अकस्मात्स्वर्गसिद्धान् वा पश्यति एवं मनुष्यलोकदेवलोकमित्यादि विपरीतम् । सर्वमिन्द्रजालादिकं विनैव पश्यति तदा मरणमुपस्थितमिति ज्ञेयम् । अन्यान्यप्यरिष्टान्यरिष्टाध्याये द्रष्टव्यानि ।

सिद्ध्यन्तरमाह ।

मैत्र्यादिषु बलानि ॥ २२ ॥

मैत्रीकरुणामुदितेति त्रयविषयास्तिस्रो भावनाः संयमाः । तत्र सुखितेषु मैत्री, एवंस्वरूपा एवमादिसाधनिकेत्यशेषविशेषैः संयमेन साक्षात्कृता सती अवन्ध्यमैत्री वीर्यदा भवति परेषु मैत्र्यर्थयत्नो विफलो न भवतीति यावत् । एवं दुःखितेषु करुणा पुण्यशीलेषु मुदिता । यद्यपि सूत्रे भावनाशब्दो नास्ति तथाऽपि तन्त्रान्तरानुसारेण भाष्य उक्तः । तदर्थश्च समाधिरिति यस्तेषूक्तः सोऽत्रत्यसंयमरूपो बोध्यः । यद्वा भावना चिन्तनं ध्यानधारणारूपं ततो यः समाधिः स संयमो बोध्यः । ततस्तत्तद्बलान्युक्तरीत्याऽवन्ध्यवीर्याणि जायन्ते पापशीलेषु मैत्राद्यभावरूपोपेक्षेत्र न तु तस्यामभावरूपायां प्रतियोग्यतिरिक्तविशेषस्याभावेन तत्र भावना,ऽतस्तस्यां नास्ति समाधिरिति तस्यां संयमाभावान्नोपेक्षातो बलमिति दिक् ।

बलेषु हस्तिबलादीनि ॥ २३ ॥

हस्तिबले संयमाद्धस्तिबलः वैनतेयबले संयमात्तद्बलः वायुबले संयमात्तद्बल इत्यादिरीत्योह्यम् ।

सिद्ध्यन्तरमाह ।

प्रवृत्त्यालोकन्यासात्सूक्ष्मव्यवहितविप्रकृष्टविज्ञानम् ॥ २४ ॥

व्यवहितमावृतं, विप्रकृष्टं दूरवर्त्ति, बुद्धिपुरुषान्यतरसाक्षात्काररूपिणी मनसः प्रवृत्तिः प्रथमपादे ज्योतिष्मतीत्युक्ता, तत्कालीनो य आलोकः सत्त्वप्रकाशस्तं योगी सूक्ष्माद्यर्थेषु विन्यस्य तमर्थं साक्षात्करोतीत्यर्थः । अत्र न्यासमात्रवचनात् तेषु संयमापेक्षा नास्ति चक्षुर्न्यासमात्रेण घटदर्शनवद्धि शुद्धसत्त्वप्रतिसन्धानमात्रेणैव तत्साक्षात्कारसम्भवात् । परम्परया बुद्ध्यादिविषयकसंयमसाध्यत्वेनास्याः संयमसिद्धिमध्ये गणनमिति बोध्यम् ।

भुवनज्ञानं सूर्ये संयमात् ॥ २५ ॥

तत्र भुवनविन्यासः कथ्यते । तत्रादौ सप्त लोकाः । तत्रावीचिर्नाम नरकविशेषः सर्वलोकाधस्तात् । तमादाय मेरुपृष्ठपर्यन्तं भूर्लोकः । मेरुपृष्ठादारभ्य तत्पृष्ठोपलक्षितभूर्लोकस्योपरि ध्रुवपर्यन्तं ग्रहनक्षत्रताराविचित्रोऽन्तरिक्षलोकः स एव भुवर्लोकः । ध्रुवात्परः पञ्चविधः स्वर्लोकः । एतेन त्रिलोकव्यवस्थाऽपि दर्शिता । पञ्चानां स्वर्लोकत्वेनैक्यात् । तत्र माहेन्द्रस्तृतीयो लोको भूर्लोकात्स स्वर्लोकश्चतुर्थः । प्राजापत्यो महर्लोकः । त्रिविधो ब्राह्मः । जनलोकस्तपोलोकः सत्यलोक इति ।

ब्राह्मस्त्रिभूमिको लोकः प्राजापत्यस्ततो महान् ।
माहेन्द्रश्च स्वरित्युक्तो दिवि तारा भुवि प्रजा इति

संग्रहश्लोकः । तथा गोवेहपर्युपरि निविष्टाः षण्महानरकभूमयः शिलायत्र तद्रूपघनसलिलानलानिलाकाशतमःसामाधाराः महाकालाम्बरीषरौरवमहारौरवकालसूत्रान्धतामिस्राख्याः । तमोऽन्धकारः । एतेषां महानरकत्वादन्येऽप्युपनरकाः कुम्भीपाकादयो नन्तास्तत्र बोध्याः । यत्र स्वकर्मोपार्जितदुःखभोगिनः प्राणिनः कष्टमायुर्दीर्घं गृहीत्वा जायन्ते ततः षण्महानरकभूम्यूर्ध्वे महातलरसातलातलसुतलवितलतलातलपातालाख्यानि सप्त पातालानि । तेषां च सप्तपातालानां भूर्लोके प्रवेशः । एवं चतुर्दशलोका भवन्ति । भूमिरियमष्टमी सप्तद्वीपा वसुमती । यस्याः सुमेरुर्मध्ये पर्वतराजः काञ्चनस्तस्य पूर्वादिप्रदक्षिणक्रमेण राजतवैदूर्यस्फाटिकहेममणिमयानि शृङ्गाणि । तत्र वैदूर्यप्रभाऽनुरागान्नीलोत्पलपत्रश्यामो नभसो दक्षिणभागः । पूर्वभागो रजतप्रभाऽनुरागात् श्वेतः । पश्चिमः स्फटिकवत्स्वच्छः प्रतिबिम्बोद्ग्राही । उत्तरः स्वर्णवर्णः कुरण्टकपुष्पाभः, अस्य सुमेरोरुपरि दक्षिणपार्श्वे जम्बूनामावृक्षः यन्नाम्ना लवणोदधिवेष्टितो जम्बूद्वीपः निरन्तरं सूर्यस्य प्रदक्षिणीकरणात्तस्य सुमेरोरवच्छेदभेदेन रात्रिन्दिवं संयुक्तमिव भ्रमति । यमेवास्य भागं सूर्यस्त्यजति तत्र रात्रिर्यमेव भागमलङ्करोति तत्र दिनमिति । तथा तस्य सुमेरोरुत्तरदिशि नीलनामकश्वेतनामकशृङ्गवन्नामकास्त्रयः पर्वताः प्रत्येकं द्विसहस्रयोजनायामाः तेषामन्तरेषु त्रीणि त्रीणि वर्षाणि नवयोजनसहस्रविस्ताराणि । तत्र नीलगिरिमेरुलग्नस्तदुत्तरे रमणकम् । श्वेतस्योत्तरे हिरण्मयम् । शृङ्गवत उत्तरे समुद्रपर्यन्तमुत्तराः कुरवः सुमेरोर्दक्षिणदिशि निषधहेमकूटहिमशैला द्विसहस्रयोजनविस्तारास्तदन्तरेषु त्रीणि वर्षाणि नवयोजनसहस्राणि । हरिवर्षंकिंपुरुषं भारतमिति पूर्ववत् । तथा सुमेरोः पूर्वदिशि तत्संयुक्तो माल्यवान्पर्वतः तमेव

सीमानं कृत्वा समुद्रपर्यन्तं भद्राश्वनामकं वर्षस्तन्नामैव च देशः। तथा सुमेरोः पश्चिमदिशि तत्संसक्तो गन्धमादनः पर्वतस्तमारभ्य समुद्रपर्यन्तं केतुमालनामा देशस्तन्नामकमेव वर्षम्। कूपाकारस्य सुमेरोरधोभागे वर्षमिलावृतम्। चतुर्दिक्षु च पर्वताश्चत्पार्श्वस्थावरबाहा इव मेरुपार्श्वेष्वेव संसक्ता इति बोध्यम्।

मेरोश्चतुर्दिशस्तत्र नवसाहस्रविस्तृतम्।

इलावृतं महाभाग चत्वारस्तत्र पर्वता इति।

विष्णुपुराणात्। ते पर्वताश्च प्रत्येकं पादोनसहस्रायामा इति बोध्यम्। तदेवं पर्वतैः सह जम्बूद्वीपं लक्षयोजनविस्तारम्। तदेवं सुमेरुणा सह सुमेरोश्चतुर्दिक्षु पञ्चाशत्पञ्चाशद्योजनसहस्रेण स्थितं जम्बूद्वीपं सुमेरोश्च परिमाणं चतुरशीतिसाहस्रं योजनैरस्य चोच्छ्रयः।

प्रविष्टः षोडशाधस्ताद् द्वात्रिंशन्मूर्ध्नि विस्तृतः।

मूले षोडशसाहस्रो विस्तारस्तस्य भूभृत

इति। सोऽयं जम्बूद्वीपो द्विगुणेन लवणोदधिना वलयाकृतिना वेष्टितः। ततो जम्बूद्वीपक्रमेण उत्तरोत्तरं द्विगुणद्विगुणाः शाककुशक्रौञ्चशाल्मलिगोमेदपुष्करद्वीपाः स्वस्वद्वीपाद् द्विगुणाः समुद्राश्च सर्षपराशिकल्पाः नात्यन्तमुच्छ्रिता नापि भूमेः समाः कूलद्वयस्थितविचित्रशैलावतंसा इक्षुरससुरासर्पिर्दधिमण्डक्षीरस्वादूदका वलयाकृतयः समुद्राः सर्वे लोकालोकपर्वतपरिवारा द्वीपाः सप्तसमुद्रपरिवेष्टिता वलयाकृतयः इतरलोकसहिता पञ्चाशत्कोटियोजनपरिमिताः। तदेतत्समग्रम् पञ्चाशत्कोटिपरिमितं भूगोलं सुप्रतिष्ठितमण्डमध्ये व्यूढं ताद्रूप्यं च शतकोटिविस्तारमेवाण्डं सप्रावरणसहितमपि प्रधानस्याणुरवयवो यथाऽऽकाशे खद्योतः प्रकृतिं प्रकृत्य।

अण्डानां तु सहस्राणां सहस्राण्ययुतानि च ।
ईदृशास्तत्र दृश्यन्ते कोटिकोटिशतानि चेति
विष्णुपुराणात् ।
मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगदिति

श्रुतेश्च शक्तिशक्तिमतोरविभागेन शक्त्यंशेषु शक्तिमदंशत्वमपीति तदाशयः । तत्र पाताले जलधौ पर्वतेषु चैतेषु देवनिकाया देवसमूहा असुरगन्धर्वकिन्नरकिंपुरुषयक्षराक्षसोरगभूतप्रेतपिशाचापस्मारकाप्सरोब्रह्मराक्षसकूष्माण्डविनायकाश्च प्रतिवसन्ति । सर्वेषु द्वीपेषु पुण्यात्मानो देवा मनुष्याश्च प्रतिवसन्ति । सुमेरुस्त्रिदशानामुद्यानभूमिः । तत्र मिश्रवनं नन्दनं चैत्ररथं सुमानसमित्युद्यानानि । सुधर्मा देवसभा सुदर्शनं पुरम् । वैजयन्तः प्रासादः । तदूर्ध्वमन्तरिक्षलोके रव्यादयो ग्रहा अश्विन्यादीनि नक्षत्राणि तदितराणि ज्योतीरूपास्तारकाश्च सर्वोपरिमेढिकावन्निश्चलतयास्थिते ध्रुवसंज्ञके ज्योतिर्विशेषे वायुरज्ज्वा निबद्धा वायोः प्रतिनियतसंचारेण कालविशेषैरवधृतगतयः सुमेरोरुपर्युपरिभावेन संनिविष्टाः दिवि भुवर्लोके भ्रमन्ति । न च सुमेरोरुपरि ज्योतिर्मण्डलभ्रमणे कथं मेरुणा ज्योतिश्चक्रस्यावरणं यतो रात्रिंदिनव्यवस्थेति वाच्यम् । वृत्तेन सूर्यव्यवधानवद् मेरोरेकपार्श्वस्थस्य सूर्यादेः पार्श्वान्तरेण व्यवधानसम्भवात् । माहेन्द्ररूपस्वर्लोकनिवासिनं षड्देवजातीयाः समूहाः त्रिदशा अग्निष्वात्ता याम्यास्तुषिता अपरिनिर्मितवशवर्तिनः परिनिर्मितवशवर्तिनश्चेति सर्वे सङ्कल्पसिद्धा अणिमाद्यष्टैश्वर्ययुक्ता ब्रह्मदिनरूपकल्पायुषो वृन्दारकाः पूज्याः कामभोगिनः पित्रोः संयोगं विनैव लब्धदेहा उत्तमानुकूलाभिरप्सरोभिः कृतपरिचाराश्च । ततो महर्लोके प्राजापत्ये पञ्चविधो देवनिकायः कुमुदा

स्भवः प्रतर्दनाञ्जनाभाः प्रचिताभा इति एते सर्वे महाभूतानां परिण-
मने स्वतन्त्रा ध्यानमात्रतृप्ताः कल्पकल्पसहस्रायुषः । ततो ब्रह्मणः प्रथमे
जनलोके चतुर्विधो देवनिकायः ब्रह्मपुरोहिता ब्रह्मकायिका ब्रह्ममहा
कायिका अमरा इति । ते सर्वे भूतानामिन्द्रियाणां च परिणमने
समर्थाः द्विसहस्रकल्पायुषः । द्वितीये ब्रह्मणो लोके तपसि त्रिविधा
देवनिकायाः आभास्वरा महाभास्वराः सत्यमहाभास्वरा इति । एते सर्वे-
भूतेन्द्रियान्तःकरणानां परिणमने समर्थाः स्वेच्छयाऽन्यनिर्माणे चि-
त्तनिर्माणे च समर्थाः ध्यानतृप्ता ऊर्ध्वरेतसोऽस्खलितरेतः ऊर्ध्व
सत्यलोकादौ अप्रतिहतज्ञानाः अधोऽधोलोकेषु अनावृतज्ञानविषया
उत्तरोत्तरं द्विगुणायुषश्च । तृतीये ब्रह्मणः सत्यलोके चत्वारो देवनि-
काया अकृतभवनन्यासाः स्वप्रतिष्ठा उपर्युपरिस्थिताः पूर्वपूर्वापेक्षयो-
र्ध्वमूर्ध्वस्थिताः । सत्यलोकेऽप्यवान्तरलोकभेदात् मूलप्रकृतेः परिणमने
समर्थाः । सर्वे यावत्सर्गायुषश्च तेषां नामानि तु अच्युताः शुद्धनिवासाः
सत्याभाः संज्ञासंज्ञिनश्च । तत्राद्याः सवितर्कध्यानेनैव सुखिनः ।
द्वितीयाः सविचारध्यानसुखा । तृतीया आनन्दमात्रध्यानसुखा । तुरीया
अस्मितामात्रध्यानसुखा । ते लोके चतुर्दशभुवनमध्ये एव तिष्ठन्ति न
ब्रह्माण्डाद्बहिः । न चाण्डस्य सर्वजीवसाधारण्यात् कथं ब्रह्माण्डसंघेति
वाच्यम् । सर्वेषामेषां हिरण्यगर्भस्य लिङ्गदेहेन सर्वलोकव्यापनादंशांशि-
भावेन सर्वजीवानां तदभेदाच्च सर्वेषां ब्रह्मतया ब्रह्माण्डत्वादतेः ।
विदेहप्रकृतिलयास्तु मुक्तप्रायत्वाद् ईश्वरकोटित्वात् ब्रह्माण्डस्यान्त-
र्बहिश्च स्वातन्त्र्येण तेषां व्यापाराद् न लोकवासिजनमध्ये गणिता
इत्येतत्सर्वं भुवनं वैराग्यातिशयाद् सूर्यद्वारे सूर्यान्तश्छिद्रे ब्रह्मलो-
कद्वारभूते सुषुम्णायां वा संयमं कृत्वा योगिना साक्षात्करणीयम् । एवं
योगशास्त्रोक्तेनान्यथापि संयमेनेदं भुवनं द्रष्टव्यम् । एवं संयमं तावद्
भ्यसेत् यावदिदं सर्वं दृष्टं भवतीति दिक् ।

चन्द्रे ताराव्यूहज्ञानम् ॥ २६ ॥

चन्द्रे संयमं कृत्वा ताराव्यूहं जानीयात् ।

ध्रुवे तद्गतिज्ञानम् ॥ २७ ॥

ताराव्यूहज्ञानानन्तरं ध्रुवे संयमं कृत्वा ताराणां गतिं जानीयात् । एवं यत्र कुत्र चिद्विमाने कृतसंयमः सर्वाणि तानि साक्षात्कुर्यात् ।

नाभिचक्रे कायव्यूहज्ञानम् ॥ २८ ॥

शरीरमध्यवर्त्तिनाभिकन्दरूपं कदलीकन्दवदादावुत्पद्यते । यतः शाखापल्लवादिवच्छिरःपादादिकमवयवजातमूर्ध्वमधश्चाविर्भवति । तत्र नाभिचक्रे संयमेन साक्षात्कारपर्यन्तेन कायस्थपदार्थवातपित्तत्वगसृगादिव्यूहं जानीयात् । वातपित्तश्लेष्माणस्त्रयो दोषाः, धातवः सप्त रसलोहितमांसस्नाय्वस्थिमज्जाशुक्राणि पूर्वपूर्वमेषां बाह्यमित्येषां विन्यासः ।

कण्ठकूपे क्षुत्पिपासानिवृत्तिः ॥ २९ ॥

जिह्वाया अधस्तात्तन्तुस्ततोऽधस्तात्कण्ठस्ततोऽधःकूप उरःपर्यन्तं, तत्र संयमात् क्षुत्पिपासे न बाधेते ।

कूर्मनाड्यां स्थैर्यम् ॥ ३० ॥

उरसि कुण्डलितसर्पगोधाऽन्यतरवत् स्थिता कूर्माकारा या नाडी तस्यां कृतसंयमः स्थिरां चित्तवृत्तिं लभत इत्यर्थः ।

मूर्धज्योतिषि सिद्धदर्शनम् ॥ ३१ ॥

शिरःकपालमध्यस्थच्छिद्रस्यान्तः स्वप्रकाशरूपं ज्योतिरस्ति । तत्र संयमपूर्वकात्साक्षात्कारात् द्यावापृथिव्योरन्तरचारिसिद्धदर्शनं भवतीत्यर्थः । मूर्धशब्देन सुषुम्णा नाडी लक्ष्यत इति मिश्राः ।

प्रातिभाद्वा सर्वम् ॥ ३२ ॥

Digitized by Google

प्रातिभं स्वप्रतिभोत्थमनौपदेशिकं ज्ञानं संसारतारकोपायत्वात्तारकं विवेकजस्य वक्ष्यमाणस्य ज्ञानस्य पूर्वरूपं लिङ्गं यथा सूर्यस्योदयपूर्वरूपं प्रभातेनोत्पन्नेन योगी सर्वमेवातीतानागतादि जानाति। पूर्वोक्तसंयमं विनाऽपीत्यर्थः। प्रातिभस्यापि वस्तुतः क्रमादिसंयमजन्यताया वक्ष्यमाणत्वाद् एवा अपि परम्परया संयमसिद्धित्वेन तासु गणनमिति बोध्यम्। यद्यपि तारकं सर्वविषयमित्यागामिसूत्रे विवेकज्ञानमेव तारकं प्रातिभं च वक्ष्यते, तथाऽप्यत्र प्रातिभादिति हेतुवचनाद् विवेकज्ञानपूर्वरूपमेव लक्षणया प्रातिभं तारकं चेति व्याख्यातम्।

इदानीं संयमस्य सत्त्वपुरुषान्यताख्यातिरूपां मुख्यां सिद्धिं विवक्षुस्तत्संयमहेतुभूतायाश्चित्तसंविदः कारणमाह।

हृदये चित्तसंवित्॥ ३३॥

यदिदमस्मिन् बृहत्वात् ब्रह्मणो जीवस्य पुरे शरीरे दहरं सगर्तं पुण्डरीकाकारं वेश्म तत्र विज्ञानं विज्ञानवृत्तिकमन्तःकरणं ब्रह्मणः सिंहासनकल्पं विद्यतेऽतस्तस्मिन्हृदयाख्ये वेश्मनि संयमात् चित्तसाक्षात्कारो भवतीत्यर्थः।

एवंभूतेषूक्तेषु संयमेषु भावनाप्रकारो योगशास्त्रविशेषाद् गुरुमुखाच्च प्रत्येतव्यः। चित्ते च ज्ञाते ततो विवेकेनात्मसाक्षात्कारो भवतीति क्रमानुसारेणाह।

सत्त्वपुरुषयोरत्यन्तासङ्कीर्णयोः प्रत्ययाविशेषो भोगः परार्थत्वात्स्वार्थसंयमात्पुरुषज्ञानम्॥ ३४॥

सत्त्वाधिक्याद्बुद्धेः सत्त्वं यद्बुद्धिसत्त्वं प्रख्याशीलतया समानसत्त्वाधीनवृत्तिके रजस्तमसी अभिभूय सत्त्वपुरुषान्यतासाक्षात्का-

रूपेण परिणतं प्रकृष्टज्ञानैश्वर्यानन्दादिमयमात्माकारतयाऽऽत्मकल्पं तस्मादपि परिणामिनोऽत्यन्तविधर्मा पुरुषः परिणामशून्यत्वाद् अत एव शुद्धोऽन्यश्चितिमात्ररूपः । एवं च तादृशचित्तेनासङ्कीर्णस्य बाह्याद्याकारचित्तेनासङ्कीर्णत्वमर्थात्सिद्धमित्यत्यन्तासङ्कीर्णत्वं पुरुषस्य । एवं तयोरत्यन्तासङ्कीर्णयोर्यः प्रत्ययाविशेषः प्रत्यययोर्विविच्याग्रहणं स भोगः । अयमविवेको बुद्धिधर्मः तत्र बुद्धेः प्रत्ययः सुखादिमती विषयाद्याकारवृत्तिः, पुरुषस्य च प्रत्ययो बुद्धिवृत्तिप्रतिबिम्बावच्छिन्नश्चैतन्यांशः, सुखाद्यात्मकशब्दाद्यनुभवनामा । यद्यपि पौरुषेयः प्रत्ययः पुरुषातिरिक्तो न भवति, तथाऽपि दृश्योपरागेण परिच्छिन्नांश एव प्रत्ययः पुरुषस्त्वपरिच्छिन्नो महाकाशवदिति तयोर्भेदः । तयोरविवेके बीजं तु पुरुषस्य दर्शितविषयत्वम् । यतो बुद्ध्या पुरुषे प्रतिबिम्बमर्पितं ततो जपास्फटिकयोरिव धर्मसङ्करादविवेकः धर्माविवेकेनैव च धर्मिणोः साङ्कर्यं तद्धर्मविवेकेनैव निरसितुं शक्यत इति धर्मविवेकसंयमः कार्य इति प्रतिपादयितुमत्र भोगो लक्षितः । एवमुभयात्मकस्य भोगस्य मध्ये यः सत्त्वस्यांशो भोगप्रत्ययः स परप्रयोजनकत्वाद् दृश्यः । यस्तु तस्मात्परार्थादन्यो विशिष्टश्चितिमात्रः पुरुषांशप्रत्ययः स परस्य बुद्ध्यादेरदृश्यत्वात्स्वार्थो भोगांशस्तत्र यथोक्तविवेकेन साक्षात्कारपर्यन्तात्संयमात् पुरुषविषयः साक्षात्कारो भवति दिव्यः । एवं चायं मुख्यो भोगोऽविविक्तप्रत्ययात्मकोंऽशभेदेनोभयोरेव भवति । यस्तु "चिदवसानो भोग" इति साङ्ख्यसूत्रे उक्तः स गौणः पुरुषस्यैव । यस्तु विकारान्तर्गतो भोगः शब्दाद्याकारवृत्तिरूपः स बुद्धेरेव तावेतौ भोगापवर्गौ बुद्धावेव वर्तमानाविति तत्र तत्र भाष्यात् । स हि तत्फलस्य भोक्तेति तत्र तत्र भाष्यकृता विपाकफलस्य सुखादेर्भोगान्तरवचनाच्चेति बोध्यम् ।

नन्विदं पुरुषज्ञानं किं बुद्धेरुत पुरुषस्य, आद्ये बुद्धेश्चेतनत्वापत्तिः। अन्त्ये स्वस्य स्वज्ञेयत्वे कर्तृकर्मविरोधः सदैव ज्ञानप्रसक्तिश्चेति चेन्न बुद्धिसत्त्वधर्मेण पुरुषाकारप्रत्ययेन ज्ञेयतया पुरुषो न भास्यते किं तु पुरुष एव स्वस्वरूपाकारां बुद्ध्यारूढां वृत्तिं स्वस्मिन्प्रतिबिम्बितां पश्यतीत्यदोषात्। एवं च स्वप्रतिबिम्बवत् स्वाकारबुद्धिवृत्तेः प्रतिबिम्बनात्मकमेव दर्शनं पुरुषस्य पुरुषज्ञानं यथा घटाद्याकारवृत्तिप्रतिबिम्बनरूपं वृत्तिदर्शनमेव पुरुषस्य घटदर्शनम्। न चात्र कर्मविरोधः। तत्र हि स्वस्मिन्स्वसम्बन्धा उपपत्तिरेव बीजं प्रकाशसम्बन्धस्यैव प्रकाश्यत्वात् स च सम्बन्ध एकस्मिन्नपि बिम्बप्रतिबिम्बाख्यरूपभेदेनोपपन्नः। आत्माकारवृत्त्यवच्छिन्नो हि ज्ञेयः ज्ञाता केवलश्च ज्ञेयः ज्ञाता इति विशेषात् स्वप्रकाशत्वं चात्मनः स्वज्ञेयत्वमेव "चेतनात्मा स्ववेदनः" इति स्मृतेः। एतेनात्मनो ज्ञेयत्वाभाव एवेति चिन्त्यम्।

यत्तु वृत्तिव्याप्य एवात्मा न फलव्याप्य इति। तत्र केचित् फलव्याप्यत्वस्य सामान्यतो व्यवहारहेतुतया क्लृप्तत्वेन चैतन्यात्मफलव्याप्यतां विना चैतन्यव्यवहारानुपपत्तिः, अन्यथा घटादिव्यवहारस्यापि वृत्तिव्याप्यत्वेनैवोपपत्तौ विषयप्रकाशकतया चैतन्यकल्पनावैयर्थ्यापत्तेः, "यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति" तु अस्मदादिमनोवृत्त्यगोचरत्वमेव प्रतिपादयति।

अध्यात्मयोगाधिगमेन देवं।

मत्वा धीरो हर्षशोकौ जहातीति श्रुत्या योगिमनोविषयत्वावगमाच्च। पुरुषस्यैव स्वज्ञातृत्वं श्रुतिराह विज्ञातारमरे केन विजानीयादिति। आत्मा यदि न नित्यज्ञानरूपः स्यात्तदा केन ज्ञाना-

न्तरेण विज्ञातारमात्मानं लोको विजानीयादिति तदर्थः । इयं हि श्रुतिर्न प्रेत्यसंज्ञाऽस्ति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन किं पश्येदिति पूर्ववाक्येन स्वयं ज्ञानस्वरूपोऽपि सर्वकारणविलयात् सर्वदृश्यविलयाच्च मोक्षकाले किमपि न पश्यतीति मैत्रेयीं प्रत्युक्ते मोक्षकाले नाभिज्ञत्वमात्मा ज्ञानस्वरूप एव माऽस्त्विति तदा शङ्कां मनसि निधाय तन्निरासाय प्रवृत्ते, आत्मा यदि ज्ञानस्वरूपो न स्यात् तद्विषयकज्ञानान्तरकल्पनेऽनवस्था स्यादित्याशयिका। एतेनेयं श्रुतिः पुरुषस्य संवेद्यावेद्यत्वं वदतीति व्याख्यानं चिन्त्यम् ।

ततः प्रातिभश्रावणवेदनादर्शास्वादवार्ता जायन्ते॥३५॥

ततः स्वार्थसंयमजन्यपुरुषसाक्षात्कारात् । यत्तु स्वार्थसंयमादिति, तच्च तज्जन्यायाः पुरुषज्ञानरूपसिद्धेरुक्तत्वेन चकाराभावेन च पुरुषज्ञानस्यैव पूर्वसूत्रे विशेष्यतया च परामर्शस्यैवौचित्यात् ततो मनआदीनां प्रातिभादिसंज्ञकशक्तिविशेषरूपाः सिद्धयो भवन्ति तत्र प्रतिभोपदेशादिनैरपेक्ष्येण सूक्ष्मादीनां मानं संयमार्थज्ञानं तत्सामर्थ्यं प्रातिभम् । एवं श्रावणाद्यपि । वेदनाद्यास्तु त्वक्चक्षूरसनाघ्राणानां सामर्थ्यसंज्ञाः । तत्र प्रातिभात् सूक्ष्मव्यवहितं विप्रकृष्टातीतानागतज्ञानं श्रावणात् तेषां दिव्यशब्दानां च श्रवणं, वेदना दिव्यस्पर्शज्ञानम्, आदर्शो दिव्यरूपज्ञानम् आस्वादो दिव्यरसज्ञानं, वार्ता दिव्यगन्धज्ञानं कामनां विनाऽपि जायते ।

ते समाधावुपसर्गा व्युत्थाने सिद्धयः ॥ ३६ ॥

ते प्रातिभादयस्ते, समाहितचित्तस्य जायमाना उपसर्गाः तस्य समाहितस्य यद्दर्शनं पुरुषैकाग्र्यं तद्विरोधित्वाद् व्युत्थितचित्तस्य तु जायमानाः सिद्धयो भवन्ति अतस्ता उपेक्ष्य पुरुषदर्शनाभ्यास एव कार्य इति भावः ।

सिद्ध्यन्तरमाह ।

बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः ॥ ३७ ॥

व्यापकत्वादात्मचित्तयोर्भोक्तृभोग्यभावेन यच्छरीरे नियमनं सोऽयं बन्धः। व्यापकस्य सतः कर्मवशादेकशरीरे या प्रतिष्ठा ज्ञानहेतुः स बन्धविशेषः स बन्धः। तादृशबन्धकारणस्य कर्मणः शैथिल्यं देहबन्धनाक्षमता समाधिसामान्याच्च जायते। तथा एवंप्रकारेण अनया नाड्या चित्तं शरीरे प्रविशति निर्गच्छतीत्येवं चित्तगतिसाक्षात्कारश्चित्तस्य प्रचारसंवेदनं तदपि समाधिसामान्यबलजमेव। एवं कर्मनिमित्तकस्य निर्गमप्रतिबन्धकसंयोगविशेषस्य क्षयात् चित्तप्रचारसंवेदनाच्च योगिचित्तं स्वशरीरान्निष्कृष्य शरीरान्तरेषु निक्षिपति निक्षिप्तं चित्तं चेन्द्रियाण्यनुपतन्ति यथा मधुकरराजमुत्पतन्तं मक्षिका अनूत्पतन्ति निविशमानमनुनिविशन्त इति दिक्।

योगशास्त्रोक्तसंयमविशेषेणोदानजयात् सिद्धिमाह ।

उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च॥३८॥

प्राणापानादिरूपा सर्वेन्द्रियवृत्तिर्जीवननाम्नी न च सुषुप्तौ चक्षुराद्युपरमेऽपि प्राणादिवृत्तीनां दर्शनात्सर्वेन्द्रियाणामित्ययुक्तं किं तु जीवनयोनियत्नवशात् अन्तःकरणस्यैव वृत्तिरिति युक्तमिति वाच्यम्। सुप्तेन्द्रियाणां ज्ञानकर्मलक्षणवृत्त्योरेव प्रतिषेधेन प्राणादिवृत्तेः सत्त्वोपपत्तेः। न च बाह्यवायुभिरन्तःस्थप्राणानां तुल्यलक्षणत्वाद् वायुविशेषा एव प्राणादयः सन्तु किमर्थं करणानां वायुतुल्यक्रियाकल्पनमिति वाच्यम्। प्राणात् शुद्धां च वायुश्चेति श्रुतौ वायोः प्राणकार्यत्वश्रवणात् "न वायुक्रिये पृथगुपदेशादि"ति वेदान्तसूत्रे वायुतत्त्वंचाराभ्यामतिरेकस्य प्राणावधारणाच्च। किं चान्तःकरणस्य शोकादिना प्राणस्य कम्प-

सोऽविमुक्ते प्रतिष्ठित इति, सोऽविमुक्तः कस्मिन्प्रतिष्ठित इति, वरणायां नाश्यां मध्ये प्रतिष्ठित इति, का वै वरणा का च नाशीति, सर्वाणीन्द्रियकृतानिपापानि वारयति नाशयतीति वरणा नाशीति, कतमच्चास्य स्थानं भवतीति, भ्रुवोर्घ्राणस्य च यस्सन्धिस्स एष द्युलोकस्य परस्य च सन्धिर्भवतीति" । अस्यार्थः । य एष प्रसिद्धः परमात्माऽनन्तोऽव्यक्तः स्वरूपेणानभिव्यक्तो दुर्विज्ञेय इति यावत् । तं कथं विजानीयामित्यत्रिप्रश्ने कृते याज्ञवल्क्यस्योत्तरं "स" इति । परमात्मा जीवात्मन्यविमुक्ते व्यवहारतः संसारिणि प्रतिष्ठितः परस्यैव प्रत्यक्त्वादित्यर्थः । पुनरत्रिरपृच्छ- "त्स" इति । याज्ञवल्क्यो ब्रूते "वरणाया" मिति । वरणादिपदार्थं वदनपदे निर्वक्ति "सर्वाणी" ति । सर्वानिन्द्रियवृत्तिकृतान्दोषान्वारयति तेन वरणा भ्रुवावित्यर्थः । तान्दोषान्नाशयतीति नाशी । तथा च नियम्यजीवद्वारनियन्तुरीश्वराधिष्ठानत्वान्नाश्या भ्रुवोः पापनाशकत्वमिति सिद्धम् । तत्रापि स्थानविशेषजिज्ञासया पृच्छति "कतमच्चे" ति । पूर्वोक्तमध्यशब्दार्थं स्पष्टयति "भ्रुवो" रिति । तदेव स्थानमित्यर्थः । स सन्धिर्द्युलोकस्य स्वर्गस्य परस्य च ब्रह्मलोकस्य सन्धित्वेन ध्येय इत्याह "स" इति । तस्मात्परमेश्वरोपास्तिपरं वैश्वानरवाक्यमिति सिद्धम् ।

इति प्रथमाध्यायस्य द्वितीयः पादः ॥

द्युभ्वाद्यायतनं स्वशब्दात् ॥ १ । ३ । १ ॥

पूर्वं त्रैलोक्यात्मा वैश्वानरः परमात्मेत्युक्तम् । तर्हि त्रैलोक्यायतनमन्यदित्याशङ्क्य समाधानाक्षेपसङ्गतिः ।

यथोपक्रमस्थसाधारणशब्दस्य वाक्यशेषस्थलिङ्गेन द्युमूर्ध-त्वादिना ब्रह्मपरत्ववदिहाप्युपक्रमस्थसाधारणायतनत्वस्य वाक्यशेषस्थसेतुश्रुत्या परिच्छिन्ने प्रधानादौ सेतुशब्दार्हत्वव्यवस्थाऽस्त्विति दृष्टान्तसङ्गतिः । प्रायशो निर्विशेषे ब्रह्मण्यस्मिन्पादे वाक्यानां समन्वयप्रतिपादनाच्छ्रुत्यध्यायपादसङ्गतयो बोध्याः । अत्र पूर्वपक्षे प्रधानाद्युपास्तिः फलं, सिद्धान्ते ब्रह्मप्रमितिरिति विवेकः । अथर्वणे श्रूयते । "यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैस्तमेवैकं विजानथात्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतु"रिति । अस्यार्थः । लोकत्रयाधिष्ठानत्वोक्त्या पञ्चीकृतभूताधिष्ठानत्वमाह "यस्मि"न्निति । कार्यब्रह्माख्यसमष्ट्यन्तः करणस्यात्मन्येव कल्पितत्वमाह "मन"इति । इन्द्रियसमष्टिदेवतानां तत्रैव कल्पितत्वं सूचयति "सहे"ति । प्राणैरिन्द्रियाधिष्ठानदेवैः । चकारेण भूतसूक्ष्माविद्याजीवान्तर्यामिणामध्यस्तत्वं ध्वनितम् । सविलासं प्रकृतिं मायाख्यां श्रुत्युक्ततर्काग्निना विलाप्य तमेवाधिष्ठानभूतमद्वयमात्मानं विजानथेति मुमुक्षून्प्रत्याह माता श्रुति "स्तमेवे"ति । वाच्यवाचककल्पनानामैक्यसाक्षात्काराद्बाधमाह, "अन्या"इति । एष साक्षात्कारस्सविलासाविद्यानिवृत्तिलक्षणामृतत्वस्य सेतुर्व्यवस्थापक इत्याह, "अमृतस्ये"ति । विजानथेत्यनेनोक्तः साक्षात्कार एष इत्युच्यते । अमृतस्यामृतत्वस्य । अत्र द्युभ्वादीनामोतत्वश्रवणात्किञ्चिदायतनं प्रतीयते । तत्किं प्रधानमुतजीव आहोस्विद्ब्रह्मेति संशयः । तत्र प्रधानादिरिति प्राप्ते ब्रूमो "द्युभ्वाद्यायतनं स्वशब्दात्" । द्युभ्वाद्यायतनं द्यौश्च भूश्च द्युभुवौ द्युभुवावादी यस्य द्यौः पृथिव्यन्तरिक्षमित्येवमात्मकस्य तद्द्युभ्वादि तदाय-

तनं ब्रह्मैव । कुतः । स्वशब्दात्स्वस्य परब्रह्मणो वाचको य आत्मशब्दस्तस्मादित्यर्थः । "तमेवैकं विजानथात्मान"मित्यात्मशब्दश्रवणादिति ॥

मुक्तोपसृप्यव्यपदेशात् ॥ १ । ३ । २ ।

किं च द्युभ्वाद्यायतनं ब्रह्मैव । कुतः । मुक्तैरुपसृप्यं मुक्तोपसृप्यम् । भावप्रधानो निर्देशो, मुक्तोपसृप्यत्वव्यपदेशादिति । यद्वा, मुक्तैरुपसृप्यं प्राप्यं यत्तस्यैवात्र निर्देशादित्यर्थः । "मुक्तोपसृप्यत्वव्यपदेशा"दिति पाठे न कश्चित्प्रयासः । "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे", "यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्य"मिति । इदं च मुक्तोपसृप्यत्वं ब्रह्मण एव श्रुत्यन्तरे प्रसिद्धं, "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिता अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत" इति । अपि च "तमेवैकं विजानथात्मानमन्या वाचो विमुञ्चथे"ति वाग्विमोकपूर्वकं विज्ञेयत्वं ब्रह्मलिङ्गम् । श्रुत्यन्तरे तथा दृष्टत्वात्, "तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणो नानुध्यायाद्बहूञ्शब्दान्वाचो विग्लापनं हि त"दिति । हृदयग्रन्थिर्मिथ्याज्ञानद्वारा द्वेषादिः । तद्रहितो भूत्वा छिन्नसंशयः सन्क्षीणकल्मषो यस्तस्य हृदये परमात्मा प्रकाशत इत्यर्थः । दृष्ट इति निमित्ते सप्तमी, तद्दर्शनार्थमित्यर्थः । यद्वा यथाश्रुत एवार्थः । यथा नद्यः स्वनामरूपाभ्यां विनिर्मुक्ताः समुद्रं प्राप्य तदात्मना तिष्ठन्ति, तथा विद्वानपि साक्षात्कृतब्रह्मा नामरूपकारणादविद्यातो विमुक्तः परादव्याकृताख्यादज्ञानात्परमस्पृष्टानर्थं पुरुषं पूर्णं दिव्यमखण्डचिद्धातुमात्मत्वेना-

प्रैतीति मुक्तोपसृप्यत्ववाक्यार्थः । यदा ज्ञानावस्थायामस्य विदुषो हृदि स्थिताः कामादयस्तन्मूलाऽविद्या च निवर्तते, पुनर्जन्मसंपादककर्माभावावस्थां वक्त्यथेति । धीरो विवेकज्ञानी । विवेकज्ञानमत्र पदार्थज्ञानम् । प्रज्ञामभेदलक्षणवाक्यार्थज्ञानम् । वाक्यार्थज्ञानार्थित्वेन कर्मकाण्डे वैमुख्यं मुमुक्षुणा कार्यमित्याह "नानुध्याया"दिति । अनात्मार्थशब्दाध्ययनफलमाह "वाच"इति । वाच इत्येतत्कण्ठताल्वादीनामष्टस्थानानामुपलक्षणम् । वागादिशोषणमेव बहुशब्दचिन्तनफलमित्यर्थः । तस्माद्द्युभ्वाद्यायतनं परं ब्रह्म ॥

नानुमानमतच्छब्दात् ॥ १ । ३ । ३ ॥

अनुमीयत इत्यनुमानं सांख्यपरिकल्पितप्रधानं न द्युभ्वाद्यायतनम् । कस्मात् । अतच्छब्दात्तस्य प्रधानस्यानुमानस्य शब्दस्तच्छब्दः । न सोऽतच्छब्दः । तस्मात्प्रधानप्रतिपादकशब्दस्याश्रवणादित्यर्थः । प्रत्युत तद्विरोधिशब्दा एव "यः सर्वज्ञः सर्ववि"दित्यादयो वर्तन्त इति भावः ॥

प्राणभृच्च ॥ १ । ३ । ४ ॥

प्राणभृज्जीवोऽपि न द्युभ्वाद्यायतनम् । कुतः । अतच्छब्दादेव । यद्यप्यात्मशब्दस्साधारणस्तथाऽपि जीवस्य सर्वज्ञत्वं द्युभ्वाद्यायतनत्वं चाञ्जसा न सम्भवतीत्यात्मशब्दस्यातच्छब्दत्वमेव ॥

जीवनिरासे हेत्वन्तरमाह

भेदव्यपदेशात् ॥ १ । ३ । ५ ॥

न प्राणभृद्द्युभ्वाद्यायतनम् । कुतः । भेदव्यपदेशात् । "तमेवैकं विजानथे"ति ज्ञातृज्ञेयभावेन भेदव्यपदेशादि-

Digitized by Google

त्यर्थः । जीवस्य मुमुक्षुत्वेन ज्ञातृत्वात्परिशेषाज्ज्ञेयं द्युभ्वाद्यायतनं परं ब्रह्मेति ॥

तत्रैव हेत्वन्तरमाह

प्रकरणाच्च ॥ १ । ३ । ६ ॥

"कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञात"मित्युपक्रमात्परमात्मन एवेदं प्रकरणम् । न हि जीवज्ञानात्सर्वज्ञानं सम्भवति । तस्मात्प्रकरणादपि न प्राणभृदित्यर्थः ॥

अपि च

स्थित्यदनाभ्यां च ॥ १ । ३ । ७ ॥

न प्राणभृद्द्युभ्वाद्यायतनम् । कुतः । स्थित्यदनाभ्याम् । स्थितिश्चादनं च ताभ्यामिति पञ्चमीद्विवचनम् । द्युभ्वाद्यायतनं प्रकृत्य "द्वा सुपर्णे"ति मन्त्रे जीवस्यादनं परमात्मनः स्थितिरिति द्वे निर्दिश्येते । "तयोरन्यः पिप्पलं स्वाद्वत्ती"त्यदनं, "अनश्नन्नन्यो ऽभिचाकशीती"त्यौदासीन्येन स्थितिर्निर्दिश्यते । इदं च द्युभ्वाद्यायतनस्य ब्रह्मत्वे घटते नान्यथेति । तस्माद्द्युभ्वाद्यायतनं परं ब्रह्म ज्ञेयमिति सिद्धम् ॥

भूमा सम्प्रसादादध्युपदेशात् ॥ १ । ३ । ८ ॥

पूर्वमात्मशब्दाद्द्युभ्वाद्यायतनं ब्रह्मेत्युक्तम् । तदयुक्तं, "तरति शोकमात्मवि"दित्यत्राब्रह्मण्यप्यात्मशब्दप्रयोगादित्याक्षेपसङ्गत्याऽस्यारम्भः । पूर्वपक्षे प्राणोपास्तिः फलं, सिद्धान्ते ब्रह्मप्रमितिरिति । एवमेव निर्विशेषवाक्यविचारे पूर्वपक्षे यस्य कस्य चिदुपास्तिः, सिद्धान्ते ब्रह्मज्ञानमेवेति बोध्यम् । छान्दोग्ये श्रूयते "श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मां भगवाञ्छोकस्य परं पारं तारय"त्विति नारदेन

Digitized by Google

पृष्टः सनत्कुमारो नाम ब्रह्मेत्युपदिदेश । पुनर्नारदः, "अस्ति भगवो नाम्नो भूय" इति पप्रच्छ । तस्योत्तरं "वाग्वाव नाम्नो भूयसी"ति । तथा, "अस्ति भगवो वाचो भूय"-इति प्रश्ने, "मनोवाव वाचो भूय"इत्युत्तरम् । एवं प्राण-पर्यन्तं भूयःप्रश्नोत्तरे दृश्येते । प्राणोपदेशानन्तरं प्रश्नं विनैवेदं श्रूयते, "एष तु वा अतिवदति यः सत्येनातिवदती"ति, "भूमात्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा, अथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्प"मित्यादि । अस्यार्थः । नाल्पे सुखमस्ति । भूमैव सुखम् । तस्मान्निरतिशयं सुखमिच्छता भूमैव विजिज्ञासितव्यो विशेषेण ज्ञातुमेष्टव्य इति सनत्कुमारेणोक्ते मुमुक्षुर्नारदस्तदुपश्रुत्य भगवन्भूमानमेव विशेषेण ज्ञातुमिच्छामीत्याह "भूमानं भगव"इति । भूम्नो लक्षणमाह "यत्रे"ति । व्यवहारातीतं पूर्णं वस्त्वेव भूमेत्यर्थः । लक्षणं व्यतिरेकमुखेन स्पष्टयितुं परिच्छिन्नलक्षणमाह, "अथे"ति । एवं स्थिते संशयः, किं प्राणो भूमा, उत परमात्मेति । "प्राणो वा आशाया भूया"निति पूर्वं प्राणस्य सन्निधानात्प्राणो भूमेत्युक्तम् । न च "तरति शोकमात्मवि"दिति प्रश्नवाक्य आत्मोपक्रमेणात्मप्रकरणात्सन्निधेर्दुर्बलत्वमिति वाच्यम्, "नाम ब्रह्मेत्युपास्वे"ति समाधानवाक्ये नामादेरब्रह्मण एवोपदेशेन प्रश्नस्थात्मशब्दस्यापि नामादिपरत्वेनानात्मपरत्वादात्मप्रकरणासिद्धेः, प्रश्नोत्तरयोरेकार्थत्वनियमात् । तस्मात्प्राणो भूमेति प्राप्ते ब्रूमः । भूमा परमात्मैव । कुतः । संप्रसादादध्युपदेशात् । सम्यक्प्रसीदत्यस्मिञ्जीवस्वरूपमिति संप्रसादः सुषुप्त्यवस्था । तस्यां चावस्थायां प्राणो जागर्तीति सम्प्रसादशब्देन प्राण-

उच्यते । प्राणादूर्ध्वं भूम्न उपदेशादित्यर्थः । प्राणोपदेशानन्तर "मेष तु वा अतिवदति यः सत्येनातिवदती"ति "तु"शब्देन प्राणवादस्यानतिवादत्वमुक्त्वा सत्यशब्दवाच्यपरमात्मवादस्यातिवादत्वं ब्रुवन्भूमानमुपदिदेश। अतो भूम्नः प्राणादूर्ध्वमुपदेश इति गम्यते । किं च "तरति शोकमात्मवि"दित्यात्मप्रकरणाद्भूमा परमात्मा । न च प्रकरणासिद्धिः, आत्मोपदेशार्थं नामाद्युपदेशेन "नामब्रह्मेत्युपास्वे"त्यादे "स्तरति शोकमात्मवि"दिति प्रश्नोत्तरत्वसिद्धेः । अतो भूमा परमात्मा । नामादिप्राणान्तमतीत्य सत्यशब्दवाच्य आत्मोत्कृष्ट इति यो वदति स एषोऽतिवादीति श्रुत्यर्थः ॥

धर्मोपपत्तेश्च ॥ १ । ३ । ९ ॥

किं च "यत्र नान्यत्पश्यती"त्यादिनोक्तानां सर्वव्यवहाराभावादिधर्माणां परमात्मन्येवोपपत्तेश्च परमात्मैव भूमा, "यत्र त्वस्य सर्वात्मैवाभूत्तत्केन कं पश्ये"दित्यादि श्रुत्यन्तरे सर्वव्यवहाराभावस्य परमात्मधर्मत्वेनावगतत्वात्। "यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुख"मिति दुःखसहितसुखनिराकरणेन भूम्नः सुखत्वं दर्शितम् । एवं "योवै भूमा तदमृत"मिति श्रूयमाणममृतत्वं ब्रह्मधर्मः, "अतोऽन्यदार्त"मिति श्रुतेः । आर्तमार्तिमद्विनाशीति यावत् । एवं स्वमहिम्नि प्रतिष्ठितत्वं सर्वगतत्वं सर्वात्मकत्वं चैते धर्मा ब्रह्मण्येवोपपद्यन्ते । तस्मात्प्राणो नोपास्यः,किं तु भूमा परमात्मा ज्ञेय इति सिद्धम् ॥

अक्षरमम्बरान्तधृतेः ॥ १ । ३ । १० ॥

पूर्वं सत्यशब्दस्य ब्रह्मणि रूढत्वाद्भूमा ब्रह्मेत्युक्तम् । तद्वदत्राप्यक्षरशब्दस्य वर्णेषु रूढत्वाद्वर्ण एवाक्षरमस्त्विति

Digitized by Google

दृष्टान्तसङ्गतिः । ओङ्काररूपोपास्तिर्ब्रह्मज्ञानमित्युभयत्र फलम् । बृहदारण्यके श्रूयते "कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्च सहोवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्व"त्यादि । अस्यार्थः । "यदूर्ध्वं दिवो यदवस्तात्पृथिव्या ये चोभे द्यावापृथिव्यौ यदन्तरिक्षं यद्भूतं यच्च भवच्च विष्यच्च तत्सर्वं कस्मिन्नोतं प्रोतं चे"ति गार्ग्या प्रश्ने कृते, याज्ञवल्क्येन "आकाशे तत्सर्वमोतं प्रोतं चे"ति निरस्ते गार्गी पुनरपृच्छदाकाशोऽव्याकृताख्यः कस्मिन्नोतप्रोतत्वेन तिष्ठतीति । याज्ञवल्क्य आह, हे गार्गि त्वया यत्पृष्टमाकाशस्याधिकरणं तदेतदक्षरमस्थूलादिविशेषणकं ब्रह्मविदो वदन्तीति । तत्र संशयः किमक्षरशब्देन वर्ण उच्यते, उत ब्रह्मेति । अक्षरसमाम्नाय इत्यादावक्षरशब्दस्य वर्णे प्रसिद्धत्वाद्वर्ण एवाक्षरशब्दवाच्य इति प्राप्ते ब्रूमः । अक्षरं ब्रह्मैव । कुतः । अम्बरान्तधृतेः । पृथिव्यादेराकाशान्तस्य विकारजातस्य धारणादित्यर्थः । विषयवाक्यार्थकथनसमयेऽम्बरान्तधारणं प्रतिपादितम् ॥

नन्वम्बरान्तधृतिः प्रधानेऽपि सम्भवतीत्यत आह

सा च प्रशासनात् ॥ १ । ३ । ११ ॥

सा च धृतिः परमेश्वरस्यैव कर्म नान्यस्याचेतनस्य । कुतः । प्रशासनात् । "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः" इत्यादिना प्रशासनश्रवणादित्यर्थः । प्रशासनं नामाज्ञा । सा च चेतनस्यैव, नाचेतनस्य प्रधानस्येति । तस्मादक्षरं ब्रह्म ॥

अन्यभावव्यावृत्तेश्च ॥ १ । ३ । १२ ॥

इतश्च परमात्मैवाक्षरशब्दवाच्यस्तस्यैवेश्वरस्य प्रशासनं कर्म । कुतः । अन्यभावव्यावृत्तेः । अन्यस्य प्रधाना-

Digitized by Google

देर्भावो धर्मोऽन्यभावस्तद्व्यावृत्तेस्तद्विपरीतधर्मश्रवणादि-त्यर्थः । तथा, "एतदक्षरं गार्ग्यदृष्टं द्रष्टृश्रुतं श्रोत्रमतं मन्तृविज्ञातं विज्ञात्रि"ति द्रष्टृत्वादयो नाचेतने सम्भवन्ति तस्माद्द्रष्टृत्वादिसमानाधिकरणप्रशासनवान्परमात्मैवाक्षरं, नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञात्रिति द्रष्ट्राद्यन्तरनिषेधाच्च न जीवोऽप्यक्षरमिति । तस्मादक्षरं ब्रह्म ज्ञेयमिति सिद्धम् ॥

ईक्षतिकर्मव्यपदेशात्सः ॥ १ । ३ । १३ ॥

पूर्वमोंकारस्य पूर्वपक्षत्वेन बुद्धौ सान्निध्यात्तस्मिन्नोंकारे ध्यातव्यमिह निरूप्यत इति बुद्धिसान्निध्यसङ्गतिः । यद्वा पूर्वमक्षरशब्दस्य वर्णे रूढस्यापि जगद्धृतिलक्षणलिङ्गेन ब्रह्मणि न क्षरतीति व्युत्पत्त्याऽचलत्वादनादित्वाद्व्यापित्वाद्वा योगवृत्तिराश्रिता । तद्वदिहापि देशपरिच्छिन्नफलश्रुतिलिङ्गेन परशब्दस्यापेक्षकपरत्वविशिष्टे हिरण्यगर्भे वृत्तिरस्त्विति दृष्टान्तसङ्गतिः । कार्यब्रह्मण उपास्तिः पूर्वपक्षे फलं, सिद्धान्ते परब्रह्मोपास्तिरिति भेदः । आथर्वणे श्रूयते, "एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेती"ति प्रकृत्य, "यः पुनरेतत्त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीते"त्यादि । अस्यार्थः । पिप्पलादो नामाचार्यः सत्यकामेन पृष्टो व्याचष्टे । हे सत्यकाम परं निर्विशेषमपरं च कार्यं ब्रह्म यदेतदेव योऽयमोङ्कारः । स हि प्रतिमेव विष्णोस्तस्य प्रतीकः । तस्मात्प्रणवं ब्रह्मात्मना विद्वानेतेनोङ्कारध्यानेनायतनेन प्राप्तिसाधनेन परापरयोरेकतरमन्वेति । यथाध्यानमेकमात्रे द्विमात्रे वा हिरण्यगर्भोपास्तिं कुर्यादिति दर्शयित्वा ब्रवीति यः पुनरोमित्येतदक्षरम् । त्रिमात्रेणेति

तृतीया द्वितीयात्वेन नेया, ब्रह्मोङ्काराभेदोपक्रमात् । तथा च विश्वमक्षरं सूर्यान्तस्थं परं ध्यायीतेति । स उपासकः सूर्यं प्राप्तः सामभिर्ब्रह्मलोकं प्रतिनीयत इति । अत्र संशयः, किमपरं ब्रह्म ध्यातव्यमुपदिश्यते, किं वा परं ब्रह्मेति । अपरमिति प्राप्ते ब्रूमः । स ध्यातव्यः परमात्मैव । कुतः । ईक्षतिकर्मव्यपदेशाद्वाक्यशेषे ध्यातव्यस्येक्षतिकर्मत्वेन व्यपदेशादित्यर्थः । "स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षत" इति । स ध्याता । जीवघनशब्देन ब्रह्मलोक उच्यते, सकलजीवाभिमानिहिरण्यगर्भाधारत्वात् । तथा च ब्रह्मलोकाल्लोकान्तरापेक्षया परात्परं पुरुषं परमात्मानमीक्षते साक्षात्करोतीत्यर्थः । ईक्षतिपदार्थस्य दर्शनस्य लोके यथार्थविषयकत्वाद्यथार्थस्वरूपपरमात्मैवेक्षतिकर्मेति तत्समानविषयकध्यानस्यापि परमात्मैव विषयो,ध्यानेक्षणयोरेकविषयकत्वनियमात् । "यथा पादोदरस्त्वचा निर्मुच्यत एवं ह वै स पाप्मना विनिर्मुच्यत"इति पापविनिर्मोकफलवचनं परमात्मानं ध्येयं सूचयति । पादोदरः सर्पः । तस्मात्क्रममुक्त्यर्थमोंकारे ध्यातव्यः परमात्मेति सिद्धम् ॥

दहर उत्तरेभ्यः ॥ १ । ३ । १४ ॥

पूर्वं परमपुरुषशब्दस्य ब्रह्मणि रूढत्वाद्ब्रह्मोपास्यमित्युक्तं भवति । तद्वदिहाप्याकाशशब्दस्य भूताकाशे रूढत्वात्तस्यैवोपास्यत्वमस्त्विति दृष्टान्तसङ्गतिः । पूर्वपक्ष आकाशाद्युपास्तिः फलं, सिद्धान्ते परोपास्तिद्वारा प्रमितिरिति । छान्दोग्ये भूमविद्यानन्तरं श्रूयते, "अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्य"मि-

त्यादि । अस्यार्थः । विद्यान्तरारम्भणार्थोऽथशब्दः । यदिदमिति प्रसिद्धं हृदयं परामृष्टम् । अस्मिन्निति प्रत्यक्षत्वोक्तिः । ब्रह्मपुरं शरीरम् । तस्मिन्दहरं सूक्ष्मं हृत्पुण्डरीकं, तदाकारत्वात् । हृदयस्य वेश्मत्वं सम्पादयति "दहर"-इति । दहरः सूक्ष्मः । अस्मिन्हृदयेऽन्तराकाशः परमात्मा सदा तिष्ठतीत्यर्थः । "तस्मि"न्हृदये । व्यवहितत्वेऽपि योग्यत्वात्तच्छब्देन हृदयपरामर्शः । तदाकाशाख्यं ब्रह्मान्वेष्टव्यं विचार्यं विजिज्ञासितव्यं ज्ञेयमिति । अत्र दहरे पुण्डरीके यो दहराकाशः श्रुतः स किं भूताकाश आहोस्वित्परमात्मेति संशये, प्रसिद्धिबलाद्भूताकाश इति प्राप्तम् । यद्वा ब्रह्मपुरशब्देन शरीरमभिदधता तत्स्वामिजीवोपस्थितेर्जीवो दहर इति प्राप्ते ब्रूमः । दहराकाशः परमात्मैव । कस्मात् । उत्तरेभ्यो वाक्यशेषगतेभ्यो हेतुभ्यः । तथा हि जिज्ञास्यत्वेन विहितस्य दहरस्याकाशस्य "तं चेद्ब्रूयु"रित्युपक्रम्य, "किं तदत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्य"मित्याक्षेपपूर्वकं समाधानवाक्यम् । "स ब्रूयाद्यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन्द्यावापृथिवी अन्तरे वा समाहिते" इत्यादिकमाकाशोपमानत्वद्यावापृथिव्यधिष्ठानत्वेन दर्शयति । श्रुत्यर्थस्तु । तमाचार्यं शिष्या ब्रूयुः । किमिति ब्रूयुः । किं तदिति । हृत्पुण्डरीकमेव तावदल्पं, तस्मिन्विद्यमानआकाशोऽल्पतरः, इत्यल्पे पुण्डरीके किमस्ति यच्छ्रुतियुक्तिभ्यामन्वेष्टव्यं यद्वाव साक्षात्कर्तव्यमित्यल्पतारूपेण दोषेण दहरस्य ज्ञेयत्वमाक्षिप्तं शिष्यैः । तत्र समाधानं "स ब्रूया"-दिति । स आचार्यो ब्रूयात् । किमिति, "यावा"निति । "अस्मि"न्निति दहराकाशोक्तिः । अल्पत्वदोषश्चाकाशोपमानेन निराकृतः । तथा च द्यावापृथिव्यधिष्ठानमाकाशो-

पमितं दहराकाशाख्यं ब्रह्मैव । एवमेष "आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प"इति चात्मत्वापहतपाप्मत्वादयो गुणा न भूताकाशे जीवे वा सम्भवन्ति । जीवे वाऽऽत्मत्वसम्भवेऽप्युत्तरगुणानामसम्भवो बोध्यः । विमृत्युर्मरणरहितः । विजिघत्सो विगता जिघत्साऽत्तुमिच्छा यस्य स विजिघत्सः । तथा "तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत"इति कर्मणामन्तवत्फलत्वमुक्त्वा, "अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवती"ति प्रकृतदहराकाशविज्ञानस्यानन्तफलवत्त्वं वदन्परमात्मत्वमस्य सूचयति । सत्यान्कामांश्चेति चकारेण तेषामप्युपास्यत्वमुक्तम् । तथा च सत्यकामादिगुणकमात्मानमनुविद्यानुभूय ये परलोकं व्रजन्ति तेषां सर्वेषु लोकेषु कामचारः स्वेच्छया सञ्चरणमप्रतिहतमनन्तमैश्वर्यं भवतीत्यर्थः । तस्मादेतेभ्य उत्तरेभ्यो हेतुभ्यो दहराकाशः परमात्मा ॥

गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च ॥ १ । ३ । १५ ॥

उत्तरेभ्य इत्यस्य प्रपञ्चोऽयम् । किं च, "इमाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ती"ति दहरवाक्ये प्रकृतं परमेश्वरं ब्रह्मलोकशब्देनाभिधाय प्रजाशब्दवाच्यानां जीवानां प्रत्यहं तद्विषया गतिरुच्यमाना गन्तव्यस्य दहराकाशस्य ब्रह्मतां गमयति । गतिं ब्रह्मलोकशब्दं चाभिप्रेत्य गतिशब्दाभ्यामित्युक्तं सूत्रकारैः । प्रत्यहं सुषुप्त्यवस्थायां जीवस्य ब्रह्मगमनम् । तथा हि दृष्टं श्रुत्यन्तरे "सता सोम्य तदा सम्पन्नो भवती"त्यादौ । तथा च दहराकाशगमनं ब्रह्मगमनमेवेति दृढीकृतम् "तथा हि दृष्ट"मित्यनेन ।

प्रत्यहं हिरण्यगर्भब्रह्मलोकगमनासम्भवाद्ब्रह्मैव लोकइति कर्मधारयसमास एव ग्राह्य इत्यस्मिन्नर्थेऽहरहर्गमनमेव लिङ्गमित्यनेनोक्तम् । च शब्देन निषादस्थपतिन्यायोऽपि कर्मधारयसमासग्रहणेन सूचितः ॥

धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॥ १ । ३ । १६ ॥

धृतेरपि हेतोः परमेश्वर एव दहराकाशः । अनतिक्रान्तप्रकरणं दहराकाशं निर्दिशति, "अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसम्भेदाये"ति । विधृतिरिति क्तिन्नन्तत्वाद्विधारक इत्युच्यते । सेतुशब्देन वर्णाश्रमाद्यसङ्करहेतुत्वमुच्यते । न हि सर्वलोकविधारकत्वं ब्रह्मणोऽन्यस्य सम्भवति । अस्य च विधारणलक्षणमहिम्नोऽस्मिन्परमात्मन्यन्यत्रापि श्रुत्यन्तर उपलब्धेः परमात्मलिङ्गत्वमेव । "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठेते"इति । तथा, "एष सर्वेश्वर एष लोकाधिपतिरेष भूतपाल एष सेतुर्विधारण एषां लोकानामसम्भेदाये"ति ॥

प्रसिद्धेश्च ॥ १ । ३ । १७ ॥

दहराकाशशब्दोऽपि परमात्मन्येव प्रसिद्धो, न जीवे "आकाशो ह वै नाम नामरूपयोर्निर्वहिता", "सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त"इत्यादिदर्शनात् । यद्यप्याकाशशब्दस्य भूताकाशेऽपि प्रसिद्धिरस्ति, तथाऽपि "यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश" इति तस्योपमानत्वेन ग्रहणान्नोपमेयदहराकाशत्वं सम्भवतीति दहराकाशः परमेश्वर एव ॥

इतरपरामर्शात्स इति चेन्नासम्भवात् ॥ १ । ३ । १८ ॥

Digitized by Google

ननु "य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचे"ति सम्प्रसादशब्देनेतरस्य जीवस्याप्यस्मिन्प्रकरणे परामर्शात्स जीवो दहराकाशोऽस्त्विति चेन्नासम्भवात् । जीव आकाशोपमेयत्वापहतपाप्मत्वादीनामसम्भवादित्यर्थः । श्रुत्यर्थस्तु । "य एष"इति सर्वनामरूपाभ्यां विद्वानुक्तः । तमेव सुप्तं सर्वकालुष्यनिर्मुक्तं वक्ति"सम्प्रसाद"इति । सम्प्रसादशब्देन सुषुप्त्यवस्थावाचकेनावस्थावानित्युच्यते । अस्मादभिमानद्वयविषयाच्छरीरात्स्थूलसूक्ष्मशरीरद्वयात्समुत्थाय विविक्तमात्मानं ज्ञात्वा । विवेकज्ञानं चात्र श्रवणमननिदिध्यासनानि । तत्फलमाह "भिनिष्पद्यत"इति । अभिनिष्पत्तिः साक्षात्कारः । अस्य फलमाह "पर"मिति । उपसम्पद्य निष्पद्यत इत्येतन्मुखं व्यादाय स्वपितीतिवद्द्रष्टव्यम् । ज्योतिः शब्दस्य सूर्यादिपरत्वभ्रमं वारय"त्येष"इति । गुरुरिति शेषः ॥

उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥ १ । ३ । १९ ॥

नन्वपहतपाप्मत्वादीनामसम्भवान्न जीवो दहराकाश इत्यसङ्गतं, श्रुतिबलेन जीवस्याप्यपहतपाप्मत्वादिसम्भवात् । तथा हि दहरविद्याया उपरि प्रजापतिविद्याया 'य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचे"ति जाग्रदवस्थापन्नं द्रष्टारं जीवमुपक्रम्य, "एतं त्वेव ते भूयोऽनुव्याख्यास्यामी"ति जीवमेव परामृश्य, "य एष स्वप्ने महीयमानश्चरत्येष आत्मेति", "तद्यत्रैतत्सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानात्येष आत्मे"त्यवस्थात्रयविशिष्टं जीवं प्रतिपाद्य, तस्यैव जीवस्यापहतपाप्मत्वादि दर्शयति । "एतदमृतमभयमेतद्ब्रह्मेति", "नाह खल्वयमेवं

Digitized by Google

सम्प्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूता-
नी"ति सुषुप्त्यवस्थायामिन्द्रेणोक्तं दोषमुपलभ्य पुनः प्र-
जापति रेतं त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्य-
त्रैतस्मा' दित्युपक्रम्य शरीरनिन्दापूर्वकं 'मेष सम्प्रसादो-
ऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणा-
भिनिष्पद्यते स उत्तमः पुरुष"इति जीवमेव शरीरात्समु-
त्थितं पुरुषं दर्शयति । तस्मादपहतपाप्मत्वादीनां श्रुतिब-
लाज्जीवे सम्भवाज्जीवो दहराकाश इ"त्युत्तराच्चे"दिति
सूत्रावयवार्थः। उत्तरा"द्य एषोऽक्षिणी"त्यादि वाक्यात्।
श्रुत्यर्थस्तु । इन्द्रविरोचनौ खलु सुरासुरराजानावात्मानं
विविदिषन्तौ समित्पाणी प्रजापतिं जग्मतुः। आगत्य द्वा-
त्रिंशद्वर्षाणि ब्रह्मचर्यमूषतुः। अथैनौ प्रजापतिरुवाच किं
कामाविह स्थो युवामिति। तावूचतु"र्य आत्माऽपहतपा-
प्मा तमावां विविदिषाव"इति। ततः प्रजापतिरुवाच।
प्रथमं "य एषोऽक्षिणी"ति । जाग्रदवस्थायामक्षिस्थानः
सन्यो दृश्यते शास्त्रतः स आत्माऽपहतपाप्मेत्युवाच ।
य एवापहतपाप्मत्वादिगुण एतदमृतमभयमेतद्ब्रह्मेति ।
एतच्छ्रुत्वा तावप्रक्षीणकल्मषतयाऽक्षिनिष्ठच्छायापुरुष-
मात्मत्वेन गृहीत्वा पुनः प्रजापतिं पप्रच्छतुरथ योऽयं भग-
वोऽक्ष्यादर्शोपलादौ च दृश्यते कतम एतेष्वसावथ वा सर्वे-
ष्वेक एवेति। तमेतं प्रश्नं श्रुत्वा प्रजापतिरेतौ भ्रान्ताविति
ज्ञात्वा यदि वयं युवां भ्रान्तौ स्थ इति ब्रूमस्तदा दौर्मनस्येन
तत्त्वं न गृह्णीयातामित्यनयोराशयमनुरुध्य प्रत्युवाच, उद-
शराव आत्मानमीक्षेथां तत्र यद्दृश्यते तन्मां प्रतिब्रूतमि-
ति। तौ दृष्ट्वा सन्तुष्टहृदयौ नाब्रूताम्। अथ प्रजापतिरेतौ
विपरीतग्राहिणौ मा भूतामित्याशयवान्पप्रच्छ किमत्राप-

Digitized by Google

श्यतमिति । तौ होचतुर्नखलोमादिमन्तं प्रतिबिम्बपुरुषमु-
दशरावेऽपश्यावे ति उत्पत्तिनाशवत्त्वाद्यथा शरीरमात्मा
न भवत्येवं छायापुरुषोऽपि नात्मेत्येवं तौ जानीयातामि-
त्याशयवान्प्रजापतिरुवाच साध्वलङ्कृतौ सुवसनौ परि-
ष्कृतौ भूत्वा पुनरुदशरावे पश्यतं तमात्मानमिति । साध्व-
लङ्कृतौ सुवसनौ छिन्ननखलोमानौ भूत्वा तथैव चक्रतुः ।
पुनः प्रजापतिना पृष्टौ तमेवच्छायात्मानमूचतुः । तदुपश्रु-
त्य प्रजापतिर्बताहो अद्यापि भ्रमो न शान्तोऽनयोरिति
मत्वा, आत्मतत्त्वं कथयामि तावता कालेन कल्मषक्षये-
ऽस्मद्वाक्यसन्दर्भपर्यालोचनयाऽऽत्मतत्त्वं प्रतिपत्स्येते स्वय-
मेवेत्युवाच "य आत्माऽपहतपाप्मा, एतदमृतमभयमेतद्ब्र-
ह्मे"ति । तयोर्मध्ये विरोचनो देहानुसारित्वाच्छायाया देह
एवात्मतत्त्वमिति मत्वा स्वगृहमागत्य तथैवासुरानुपदि-
देश । इन्द्रस्तु स्वगृहमागच्छन्मार्ग एवच्छायात्मनोऽनित्य-
त्वादिदोषं चिन्तयित्वा पुनः समित्पाणिः सन्प्रजापतिस-
मीपमागत्य तेन पृष्टः सन्मार्गे चिन्तितमुवाच । प्रजापति-
स्तु हे इन्द्र त्वं कल्मषक्षयाय पुनर्द्वात्रिंशद्वर्षाणि ब्रह्मचर्यं
चर, अथ प्रक्षीणकल्मषाय तेऽहमेतमात्मानं भूयोऽनुव्या-
ख्यास्यामीत्यवोचत् । स च तथा चरितब्रह्मचर्यः प्रजाप-
तिमुपससाद । उपसन्नायेन्द्राय प्रजापतिर्व्याचष्टे योऽक्षिणि
पुरुषो दर्शितः प्रथमे पर्याये सोऽयमेव स्वप्ने वासनामयैर्व-
नितादिभिर्विषयैर्महीयमानः सेव्यमानोऽनेकविधान्भोगा-
न्भुञ्जानो विहरतीति यावत् । इदं श्रुत्वा देवेन्द्रः शोकभ-
यादिविविधव्याध्यनुभवात्स्वप्ने किञ्चिदस्तीत्युवाच । एव-
मुक्तवति मघवति प्रजापतिः पुनर्द्वात्रिंशद्वर्षाणि ब्रह्मचर्यं
चराद्याप्यक्षीणकल्मषोऽसीत्युवाच । चरित्वाऽऽगताये-
न्द्राय प्रजापतिर्व्याचष्टे योऽयमाद्यद्वितीयपर्याययोरक्षिणि-

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्य
श्रीभाष्यस्य प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं॰श्रीराममिश्र-शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः	७।)
श्रीभाष्यस्य प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा ..	६)
श्रीभाष्यस्य तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा ..	३=)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः	२।)
सेतुपूर्त्तिः प्रथमो बिन्दुः सत्सम्प्रदायाचार्यपं॰स्वामिश्रीराममिश्रशास्त्रि-प्रणीतो निर्विशेषाद्वैतनिराकरणपरः	१॥=)
सेतुपूर्त्तिसहितो वेदार्थसंग्रहः	३॥।)
शास्त्रदीपिका	६।)
सङ्कर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टचन्द्रिकोपेतम्, पं॰स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् ।	१।)
काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजप॰दामोदर-शास्त्रिणा संशोधिता पूर्वार्द्धरूपा	५॥।)
तथा उत्तरार्द्धम्	८॥।)
माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता	७॥)
काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता	६॥)
श्रीतिङन्तार्णवतरणिः	६)
दिग्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता	॥=)
जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता ..	५॥)
लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, शेषशार्ङ्गधराचार्यविरचितया न्याय-मुक्तावल्याख्यया टीकया सहिता	॥।)
सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम्	॥।)
तत्त्वमुक्ताकलापः-सर्वार्थसिद्धियुतः, बोधायनीयार्षसिद्धान्तानुसारी विशिष्टाद्वैतब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्किककेसरिणा सर्वतन्त्रस्वतन्त्राधिपेन श्रीवेङ्कटनाथदेशिकेन प्रणीतः	५॥=)
वेदान्तसिद्धान्तमुक्तावली, आर्थर्वीनिसृष्टाङ्गलकृताङ्गलभाषानुवादयुता ..	१॥।)
काव्यप्रकाशस्य इङ्गलण्डीयभाषानुवादः	२॥)
अथर्ववेदसंहिताया इङ्गलण्डीयभाषानुवादः	१२)
आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्यकाराणां परमगुरुणा श्रीमद्यामुनाचार्यस्वामिना प्रणीतम्	॥।)
तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्विश्वकर्मविरचितया न्यायप्रदीपाख्यटीकया सहिता	१

Digitized by Google

CONTENTS.

Page.

MEMANSA NYAYAPRAKASH by Apodeva, edited by P. Ganganath Jha, M. A., Professor of Sanskrit Muir Central College, Allahabad 257

PADARTH-DHARM-SANGRAH, translated by Pandit Ganganath Jha, M. A. Professor of Sanskrit Muir Central College, Allahabad 273

PÁTANJALA SÛTRA VRITTI or NÁGESH BHUTT, Ed. by Pandit Taraktirath P. Jewa Nath Misra, Professor Sanskrit College, Benares 289

BRAHMAMRITAVARSHINI, Translated by S. Venkataramanan, B. A., B. L., High Court, Triplicane, Madras. 305

Digitized by Google

IX 60

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 6.] June 1905. [Vol. XXVII.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1905.

Copyright on each article reserved.

Price Rs. 9 per annum.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
विधिमीमांसा, अप्पयदीक्षितकृता तै॰ श्रीरामशास्त्रिणा संशोधिता .. .	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधित	।=)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतबालन्टाइनसाहेबेनाङ्ग्लदेशीयभाषायामनूदिता ..	८)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रम्. श्रीयुतगाफ़साहेबेनाङ्ग्लदेशीयभाषायामनूदितम्	४)
मानवधर्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	५)
शाश्वतधर्मदीपिका, ...	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	॥=)
श्रौतपदार्थनिर्वचनम्	३)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीकामकोल्लकशास्त्रि-संशोधिता	४)
काव्यप्रदीपः, पं॰ रामशास्त्रिभागवताचार्येण परिशोधितः	≡॥)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
खण्डनखण्डखाद्यं सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	५)

Digitized by Google

मनुष्यलोकप्राप्तिमभिधाय, द्विमात्रमुपासीनस्यान्तरिक्षलोकप्राप्तिमभिधाय, त्रिमात्रमुपासीनस्य प्राप्यतयाऽभिधीयमानो ब्रह्मलोकोऽन्तरिक्षात्परो जीवसमष्टिरूपस्य चतुर्मुखस्य लोक इति विज्ञायते, तद्गतेन चेक्ष्यमाणस्तल्लोकाधिपतिश्चतुर्मुख एव । "एतस्माज्जीवघनात्परात्पर"मिति च देहेन्द्रियादिभ्यः पराद्देहेन्द्रियादिभिः सह घनीभूताज्जीव[1]व्यष्टिपुरुषाद्ब्रह्मलोकवासिनः समष्टिपुरुषस्य चतुर्मुखस्य परत्वेनो[2]पपद्यते । अतोऽत्र निर्दिश्यमानः परः पुरुषः समष्टिपुरुषश्चतुर्मुख एव । एवं चतुर्मुखत्वे निश्चिते ऽजरत्वादयो यथाकथञ्चिन्नेतव्या इति प्राप्ते प्रचक्ष्महे –

'ईक्षतिकर्म व्यपदेशात्सः'

ईक्षतिकर्म सः–परमात्मा । कुत । व्यपदेशात्, व्यपदिश्यते हीक्षतिकर्म परमात्मत्वेन । तथा हि, ईक्षतिकर्मविषयतयोदाहृते श्लोके "तमोङ्कारेणैवायतनेना[3]न्वेति विद्वान् यत्तच्छान्तमजरममृतमभयं परं चे"ति, परं शान्तमजरमभयममृतमिति हि परमात्मन एवैतद्रूपम्, "एतदमृतमेतदभय[4]मेतद् ब्रह्मे"त्येवमादिश्रुतिभ्यः । "एतस्माज्जीवघनात्परात्पर"मिति च परमात्मन एव व्यपदेशो, न[†] चतुर्मुखस्य, तस्याऽपि जीवघनशब्दगृहीतत्वात् । यस्य हि कर्मनिमित्तं देहित्वम्, स जीवघन इत्युच्यते[†] । चतुर्मुखस्याऽपि तच्छ्रूयते 'यो ब्रह्माणं विदधाति पूर्व"मित्यादौ । यत्पुनरुक्तम्-अन्तरिक्षलोकस्योपरि निर्दिश्यमानो ब्रह्मलोकश्चतुर्मुखलोक इति प्रतीयते, अतस्तत्रस्थश्चतुर्मुख इति, तदयुक्तम्, "यत्तच्छान्तमजरममृतमभय"मित्यादिनेक्षतिकर्मणः परमात्मत्वे निश्चिते सतीक्षितुः स्थानतया निर्दिष्टो ब्रह्मलोको न क्षयिष्णुश्चतुर्मुखलोको भवितुमर्हति । किञ्च, "यथा पादोदरस्त्वचा विनिर्मुच्यत एवं ह वै[5] स पाप्मना विनि-

१ जीवस्येति मु· पु· ।
२ परत्वे नेति पदद्वयं मु· पु· ।
३ 'वायनेनेति पाठान्तरम् ।
४ एतद्रूपम् एतदभयमेतदमृतमिति लि· पु· पाठः ।
†† एतच्चिह्नान्तर्गतपाठो लि· पु· त्रुटितः । ५ हैव-इति मु· पु· ।

मुक्तः स सामभिरुन्नीयते ब्रह्मलोक''मिति सर्वपापविनिर्मुक्तस्य प्राप्यतयोच्यमानं न चतुर्मुखस्थानम् । अत एव चोदाहरणश्लोके इममेव ब्रह्मलोकमधिकृत्य[1] श्रूयते "यत्तत्कवयो वेदयन्त" इति, कवयः-सूरयः । सूरिभिर्दृश्यं च वैष्णवं पदमेव, "तद्विष्णोः परमं पदं सदा पश्यन्ति सूरय" इत्येवमादिभ्यः । न चान्तरिक्षात्परश्चतुर्मुखलोकः, मध्ये स्वर्गलोकादीनां बहूनां सद्भावात् । अतः "एतद्वै[2] सत्यकाम परं चापरं च ब्रह्म यदोङ्कारस्तस्माद्विद्वानेतेनैवायतनेनै[3]कतरमन्वेती''ति प्रतिवचने यदपरं कार्यं ब्रह्म निर्दिष्टम्, तदैहिका[4]मुष्मिकत्वेन द्विधा विभज्य, एकमात्रं प्रणवमुपासीनानामैहिकं मनुष्यलोकावाप्तिरूपं फलमभिधाय, द्विमात्रमुपासीनानामामुष्मिकमन्तरिक्षशब्दोपलक्षितं फलं चाभिधाय, त्रिमात्रेण परब्रह्मवाचिना प्रणवेन परं पुरुषं ध्यायतां परमेव ब्रह्म प्राप्यतयोपदिशतीति सर्वं समञ्जसम् । अत ईक्षतिकर्म परमात्मा ॥

ईक्षतिकर्माधिकरणं समाप्तम् ॥ ४ ॥

अथ दहराधिकरणम् ५ । **दहर उत्तरेभ्यः ॥ १३ ॥**

इदमामनन्ति छन्दोगाः-"अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्य"मिति । तत्र संदेहः-किमसौ हृदयपुण्डरीकमध्यवर्ती दहराकाशो महाभूतविशेष उत प्रत्यगात्मा ऽथ परमात्मेति । किं तावद्युक्तम्, महाभूतविशेष इति । कुतः । आकाशशब्दस्य भूताकाशे प्रसिद्धिप्रकर्षात्, "तस्मिन्यदन्तस्तदन्वेष्टव्य"मित्यन्वेष्टव्यान्तरस्याधारतया प्रतीतेश्च-इत्येवं प्राप्ते[5]ऽभिधीयते-

---

१ श्लोकेन्द्रमेव ब्रह्मलोकमवधीकृत्येति लि· पु· पाठः प्रामादिकः ।

२ एतच्चैवेति लि· पु· ।

३ अयनेनेति लि· पु· पाठः ।

४ तथैवेहिकेति लि· पु· पाठः ।

५ किं तात विशेषे इति कुतः आकाशशब्दस्य भूताकाशे ब्रह्मणि च प्रसिद्धत्वेऽपि भूताकाशे प्राप्ते-इति लि· पु पाठः प्रामादिकः ।

‘दहर उत्तरेभ्यः’,

दहराकाशः परं ब्रह्म । कुतः । उत्तरेभ्यो वाक्यगतेभ्यो हेतुभ्यः, “एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको ऽविजिघत्सो ऽपिपासस्सत्यकामस्सत्यसङ्कल्प” इति निरुपाधिकात्मत्वमपहतपाप्मत्वादिकं सत्यकामत्वं सत्यसङ्कल्पत्वं चेति दहराकाशे श्रूयमाणा गुणा दहराकाशं परं ब्रह्मेति ज्ञापयन्ति । “अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवती”त्यादिना “यं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठति तेन सम्पन्नो महीयत” इत्यनेन दहराकाशवेदिनः सत्यसङ्कल्पत्वप्राप्तिश्चोच्यमाना दहराकाशं परं ब्रह्मेत्यवगमयति । यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश’ इत्युपमानोपमेयभाव[1]श्च दहराकाशस्य भूताकाशत्वे नोपपद्यते । हृदयावच्छेदनिबन्धन उपमानोपमेयभाव इति चेत्, तथा सति हृदयावच्छिन्नस्य द्यावापृथिव्यादिसर्वाश्रयत्वं नोपपद्यते । ननु च दहराकाशस्य परमात्मत्वेऽपि बाह्याकाशोपमेयत्वं न सम्भवति, ‘ज्यायान् पृथिव्या ज्यायानन्तरिक्षा’दित्यादौ सर्वस्माज्ज्यायस्त्वश्रवणात् । नैवम्, दहराकाशस्य हृदयपुण्डरीकमध्यवर्तित्वप्राप्ताल्पत्वनिवृत्तिपरत्वादस्य वाक्यस्य, यथा ऽधिकजवेऽपि सवितरि ‘इषुवद् गच्छति सविते’ति वचनं गतिमान्द्यनिवृत्तिपरम् । अथ स्यात् “एष आत्माऽपहतपाप्मे”त्यादिना दहराकाशो न निर्दिश्यते, ‘दहरोऽस्मिन्नन्तर आकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्य”मिति दहराकाशान्तर्वर्तिनस्ततो ऽन्यस्यान्वेष्टव्यत्वेन प्रकृतत्वादिह “एष आत्मा ऽपहतपाप्मे”ति तस्यैवान्वेष्टव्यस्य निर्देष्टुं युक्तत्वात् । स्यादेतदेवम्, यदि श्रुतिरेव दहराकाशं तदन्तर्वर्तिनं च न व्यभङ्क्ष्यत्.[2] व्यभाङ्क्षीत्तु सा । तथा हि, “अथ यदस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाश[3]स्तस्मिन् यदन्तस्तदन्वेष्टव्य”-

---

१ भाव इति नास्ति लि॰ पु॰ ऽत्र ।
२ व्यभाङ्क्षीदिति मु॰ पु॰ पाठः । व्यभाङ्क्ष्यत—इति लि॰ पु॰ पाठः ।
३ अन्तर आकाश इति व्यस्तः पाठो मु॰ पु॰ प्राक् चात्र चास्ति न तु युक्तः ।

Digitized by Google

मिति ब्रह्मपुरशब्देनोपास्यतया सन्निहितपरब्रह्मणः पुरत्वेनो[1]पासकशरीरं निर्दिश्य तन्मध्यवर्ति च तदवयवभूतं पुण्डरीकाकारमल्पपरिमाणं हृदयं परस्य ब्रह्मणो वेश्मतयाऽभिधाय सर्वज्ञं सर्वशक्तिमाश्रितवात्सल्यैकजलधिमुपासकानुग्रहाय तस्मिन्वेश्मनि सन्निहितं सूक्ष्मतया ध्येयं दहराकाशशब्देन निर्दिश्य तदन्तर्वर्ति चापहतपाप्मत्वादि स्वभावतो-निरस्तनिखिलहेयत्वसत्यकामत्वादिस्वाभाविकानवधिकातिशयकल्याण-गुणजातं च ध्येयं तदन्वेष्टव्यमित्युपदिश्यते । अत्र तदन्वेष्टव्यमिति तच्छब्देन दहराकाशं तदन्तर्वर्ति[2] गुणजातं च परामृश्य तदुभयमन्वेष्टव्यमित्युपदिश्यते। "य[3]इदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म" इत्यनूद्य तस्मिन् दहरपुण्डरीकवेश्मनि यो दहराकाशो यच्च तदन्तर्वर्ति गुणजातं तदुभयमन्वेष्टव्यमिति विधीयत इत्यर्थः । दहराकाशशब्दनिर्दिष्टस्य परब्रह्मत्वं 'तस्मिन्[3]यदन्त'रिति निर्दिष्टस्य च तद्गुणत्वं तच्छब्देनोभयं परामृश्योभयस्याप्यन्वेष्टव्यतया विधानं च कथमवगम्यत इति चेत्, तदवहितमनाः शृणु, "यावान्वा अय[4]माकाशस्तावानेषोऽन्तर्हृदय आकाश" इति दहराकाशस्यातिमहत्तामभिधाय,—

उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते।

उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ ॥

विद्युन्नक्षत्राणी"ति प्रकृतमेव दहराकाश'मस्मि'न्निति निर्दिश्य तस्य सर्वजगदाधारत्वमभिधाय, "यच्चास्येहा[5]स्ति यच्च नास्ति सर्वं तदस्मिन्समाहित"मिति पुनरप्य'स्मि'न्निति तमेव दहराकाशं परामृश्य तस्मिन्नस्योपासकस्येह लोके यद् भोग्यजातमस्ति, यच्च मनोरथमात्र-गोचर इह[6] नास्ति, सर्वं तद् भोग्यजातमस्मिन् दहराकाशे समाहित-

१ परत्वेनेति लि॰ पु॰ ।
२ वर्तिनः—इति मु॰ पु॰ पाठः ।
३ तदस्मिन्निति मु॰ पु॰ पाठः ।
४ यावान्तावान् अयमिति लि॰ पु॰ प्रमादः ।
५ यच्चेत्यस्येहेति लि॰ पु॰ पाठः प्रामादिकः ।
६ गोचरमिहेति पाठान्तरं न युक्तम् ।

मिति निरतिशयभोग्यत्वं दहराकाशस्याभिधाय, तस्य दहराकाशस्य देहावयवभूतहृदयान्तर्वर्तित्वे ऽपि[1] देहस्य जराप्रध्वंसादौ सत्यऽपि परमकारणतया ऽतिसूक्ष्मत्वेन निर्विकारत्वमुक्त्वा, तत एव 'तत्सत्यं ब्रह्मपुर'मिति तमेव दहराकाशं सत्यकारणतया[2] सत्यभूतं ब्रह्माख्यं पुरं निखिलजगदावासभूतमित्युपपाद्य, "अस्मिन्कामास्समाहिता" इति दहराकाश'मस्मि'न्निति निर्दिश्य काम्यभूतांश्च गुणान् 'कामा' इति निर्दिश्य तेषां दहराकाशान्तर्वर्तित्वमुक्त्वा, तदेव दहराकाशस्य काम्यभूतकल्याणगुणविशिष्टत्वं[3] तस्यात्मत्वं च "एष आत्मा ऽपहतपाप्मे"त्यादिना "सत्यसङ्कल्प" इत्यन्तेन स्फुटीकृत्य, 'यथा ह्येवेह प्रजा अन्वाविशन्ती"त्यारभ्य तेषां सर्वेषु लोकेष्वऽकामचारो[4]भवती"त्यन्तेन तदिदं गुणाष्टकं तद्विशिष्टं दहराकाशशब्दनिर्दिष्टमात्मानं चाऽविदुषा[4]मेत[5]द्व्यतिरिक्तभोग्यसिद्धये च कर्म कुर्वतामन्तवत्फलावाप्तिमसत्यसङ्कल्पत्वं चाभिधाय, "अथ य इहात्मानमनुविद्य व्रजन्त्ये[6]तांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवती"त्यादिना दहराकाशशब्दनिर्दिष्टमात्मानं तदन्तर्वर्तिनश्च काम्यभूतानऽपहतपाप्मत्वादिकान् गुणान् विजानतामुदारगुणसागरस्य तस्य परमपुरुषस्य प्रसादादेव सर्वकामावाप्तिः सत्यसङ्कल्पता चोच्यते । अतो दहराकाशः परं ब्रह्म, तदन्तर्वर्ति चापहतपाप्मत्वादि काम्यगुणजातम्,-तदुभय'मन्वेष्टव्यं' 'विजिज्ञासितव्य'मिति चोच्यत इति निश्चीयते । तदेतद् वाक्यकारोऽपि स्पष्टयति-"तस्मिन्यदन्तरिति कामव्यपदेश" इत्यादिना । अत एतेभ्यो हेतुभ्यो दहराकाशः परमेव ब्रह्म ।

अतश्च दहराकाशः परं ब्रह्म-

१ अपि-इति लि· पु· नास्ति ।
२ सत्यकारणतयेति लि·पु· नास्ति ।
३ 'त्वं चेति लि. पु· पाठः ।
४ लि· पुस्तकेऽत्र 'लोकेषु कामचार' स्थाने 'च विदुषा'मिति प्रामादिकम् ।
५ 'मेव तदिति मु· पु· पाठः ।
६ प्रव्रजन्तीति मु· पु· पाठः ।

Digitized by Google

गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च ॥ १४ ॥

"तद्यथा हिरण्यनिधिं निहितमक्षेत्रज्ञा[1] उपर्युपरि संचरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढा' इत्ये'त'मिति प्रकृतं दहराकाशं निर्दिश्य तत्राहरहस्सर्वेषां क्षेत्रज्ञानां गमनं, गन्तव्यस्य तस्य दहराकाशस्य ब्रह्मलोकशब्दनिर्देशश्च दहराकाशस्य परब्रह्मतां गमयतः। कथमनयोरस्य परब्रह्मत्व[2]साधकत्वमित्यत आह "तथा हि दृष्ट"मिति। परस्मिन् ब्रह्मणि सर्वेषां क्षेत्रज्ञानामहरहः सुषुप्तिकाले गमनमन्यत्राभिधीयमानं दृष्टम्— "एवमेव खलु सोम्येमाः सर्वाः प्रजास्सति संपद्य न विदुः सति संपद्यामह"[3] इति, "सत आगम्य न विदुः सत आगच्छामह" इति च[4]। तथा, ब्रह्मलोकशब्दश्च परस्मिन् ब्रह्मणि दृष्टः "एष ब्रह्मलोकः सम्राडिति होवाचे"ति। मा भूदन्यत्र ब्रह्मणि गमनदर्शनम्, एतदेव तु दहराकाशे सर्वेषां क्षेत्रज्ञानां प्रलयकाल इव निरस्तनिखिलदुःखानां सुषुप्तिकाले ऽवस्थानं श्रूयमाणमस्य परब्रह्मत्वे पर्याप्तं लिङ्गम्, तथा, ब्रह्मलोकशब्दश्च समानाधिकरणवृत्त्या[5]ऽस्मिन् दहराकाशे प्रयुज्यमानो ऽस्य ब्रह्मत्वे प्रयोगान्तरनिरपेक्षं पर्याप्तं लिङ्गमित्याह "लिङ्गं चे"ति[6]। निषादस्थपतिन्यायाच्च षष्ठीसमासात्समानाधिकरणसमासो न्याय्यः[7]। अथ वा, 'अहरहर्गच्छन्त्य' इति न सुषुप्तिविषयं गमनमुच्यते, अपि त्वन्तरात्मत्वेन सर्वदा वर्तमानस्य दहराकाशस्य परमपुरुषार्थभूतस्योपर्युपर्यहरहर्गच्छन्त्यः सर्वस्मिन् काले वर्तमानाः तमजानन्त्य[8]स्तं न विन्दन्ति[9] न लभन्ते, यथा,

---

१ निहितमेव क्षेत्रज्ञा इति लि· पु· पाठः प्रामादिकः।
२ त्व–इति नास्ति लि· पु·।
३ संपत्स्यामह इति लि· पु· पाठो न युक्तः।
४ चेति मु· पु· नास्ति।
५ वृत्त्येति लि· पु· पाठः।
६ लिङ्गं चेति–इति प्रतीकग्रहणं नास्ति लि· पु·।
७ न्याय इति लि· पु·।
८ अजानन्त्य इति मु· पु· लि· पु· च पाठो न तु युक्तः।
९ विदन्तीति मु· पु· पाठः।

Digitized by Google

हिरण्यनिधिं निहितं[1] तत्स्थानमजानानास्तदुपरि सर्वदा वर्तमाना अपि न लभन्ते, तद्वदित्यर्थः । सेयमेवमन्तरात्मत्वेन स्थितस्य दहराकाशस्योपरि तन्नियमितानां सर्वासां प्रजानामजानतीनां[2] सर्वदा गतिरस्य दहराकाशस्य परब्रह्मतां गमयति । तथा ह्यन्यत्र परस्य ब्रह्मणोऽन्तरात्मतयाऽवस्थितस्य स्वनियाम्याभिः स्वस्मिन् वर्तमानाभिः प्रजाभिरवेदनं दृष्टम्, यथाऽऽन्तर्यामिब्राह्मणे "य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति," "अदृष्टो द्रष्टाऽश्रुतः श्रोते"ति च । मा भूदन्यत्र दर्शनम्, स्वयमेव त्विदं निधिदृष्टान्तावगतपरमपुरुषार्थभावस्यास्य हृदयस्थस्योपरि तदाधारतयाऽहरहस्सर्वदा सर्वासां प्रजानामजानतीनां[2] गतिरस्य परब्रह्मत्वे पर्याप्तं लिङ्गम् ।

इतश्च दहराकाशः परं ब्रह्म—

धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॥ १५ ॥

"अथ य आत्मे"ति प्रकृतं दहराकाशं निर्दिश्य "स सेतुर्विधृतिरेषां लोकानामसम्भेदाये" त्यस्मिन् जगद्विधरणं श्रूयमाणं दहराकाशस्य परब्रह्मतां गमयति । जगद्विधरणं हि परस्य ब्रह्मणो महिमा "एष सर्वेश्वर एष सर्वभूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसम्भेदाये"ति "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत" इत्यादिभ्यः[3] । स चायं तस्य परस्य ब्रह्मणो धृत्याख्यो महिमाऽस्मिन् दहराकाश उपलभ्यते, अतो दहराकाशः परं ब्रह्म ।

प्रसिद्धेश्च ॥ १६ ॥

आकाशशब्दश्च प्रसिद्धः परस्मिन् ब्रह्मणि "को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्" "सर्वाणि ह वा इमानि

---

१ तथा हिरण्यनिधिनिहितमिति लि॰ पु॰ पाठो न युक्तः ।

२ अजानन्तीनामिति लि॰ पु॰ पुनःपुनः पाठः ।

३ 'तस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत इत्यादिभ्यो'—एतावल्लिखितपुस्तकेऽत्र स्थाने भ्रमादधिकं लिखितमस्ति ।

भूतान्याकाशादेव समुत्पद्यन्त" इत्यादिषु । अपहतपाप्मत्वादिगुणस-नाथा प्रसिद्धि[1]र्भूताकाशप्रसिद्धेर्बलीयसीत्यभिप्रायः ।

एवं तावद्दहराकाशस्य भूताकाशत्वं प्रतिक्षिप्तम् । अथेदानीं दहराकाशस्य प्रत्यगात्मत्वमाशङ्क्य निराकर्तुमुपक्रमते—

इतरपरामर्शात् स इति चेत्, ना, ऽसम्भवात् ॥ १७ ॥

यदुक्तं वाक्यशेषवशाद्दहराकाशः परं ब्रह्मेति, तदयुक्तम्, वाक्य-शेषे परस्मादितरस्य जीवस्यैव साक्षात्परामर्शात् "अथ य एष सम्प्रसा-दोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्प-द्यत एष आत्मेति होवाच एतदमृतमभय[2]मेतद् ब्रह्मे"ति । यद्यपि दहरोऽस्मिन्नन्तर आकाश इति हृदयपुण्डरीकमध्यवर्तितयोपदिष्टस्याका-शस्योपमानोपमेयभावाद्यसम्भवाद्भूताकाशत्वं न सम्भवति, तथाऽपि वाक्यशेषवशात् प्रत्यगात्मत्वं युक्तमाश्रयितुम् । आकाशशब्दोऽपि प्रका-शादियोगाज्जीव एव वर्तिष्यत इति चेत्, तत्रोत्तरम् 'नासम्भवा'दिति । नायं जीवः, न ह्यपहतपाप्मत्वादयो गुणा जीवे सम्भवन्ति ।

उत्तराच्चेदाऽऽविर्भूतस्वरूपस्तु ॥ १८ ॥

उत्तरात् प्रजापतिवाक्याज्जीवस्यैवापहतपाप्मत्वादिगुणयोगो निश्चीयत इति चेत् । एतदुक्तं भवति—प्रजापतिवाक्यं जीवपरमेव । तथा हि, "य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघत्सोऽपि-पासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वां-श्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानाती"ति प्रजापतिवचनमैतिह्यरूपेणोपश्रुत्यान्वेष्टव्यात्मस्वरूपजिज्ञासया प्रजापति-मुपसेदुषे मघवते प्रजापतिर्जागरितस्वप्नसुषुप्त्यवस्थं जीवात्मानं सशरीरं क्रमेण शुश्रूषयोपनतापरीक्षितविषयो[3]पदिश्य तत्र तत्र भोग्यमपश्यते परि-

१ गुणसमानाधिकरणप्रसिद्धिरिति लि॰ पु॰ पाठः ।

२ एतदभयमिति लि॰ पु॰ नास्ति ।

३ परीक्षितविषयेति मु॰ पु॰ लि॰ पु॰ च पाठो न तु न्याय्यः ।

शुद्धात्मस्वरूपोपदेशयोग्याय तस्मै मघवते "मघवन्मर्त्यं वा इदं शरीरमात्तं मृत्युना तदस्या[1]मृतस्या[2]शरीरस्यात्मनोऽधिष्ठान"मिति शरीरं स्याधिष्ठानतामात्मनश्चाधिष्ठातृतामशरीरस्य च तस्यामृतत्वस्वरूपतां चोक्त्वा "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत" इति कर्मारब्धशरीरयोगिणः[3] तदनुगुणसुखदुःखभागित्वरूपाऽनर्थं तद्विमोक्षे च तदभावमभिधाय 'एवमेवैष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत' इति जीवात्मनः स्वरूपमेव शरीरवियुक्तमुपदिदेश "स उत्तमः पुरुषः स तत्र पर्येति जक्षत्[4] क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीर"मिति प्राप्यस्य परस्य ज्योतिषः पुरुषोत्तमत्वं[5] निवृत्ततिरोधानस्य परं ज्योतिरुपसंपन्नस्य प्रत्यगात्मनो ब्रह्मलोके यथेष्टभोगावाप्तिं प्रियाप्रियावियुक्तकर्मनिमित्तशरीराद्यपुरुषार्थाननुसन्धानं[6] चाभिधाय "स यथा प्रयोग्य आचरणे युक्त[7] एवमेवायमस्मिञ्[8] शरीरे प्राणो युक्त" इति यथोक्तस्वरूपस्यैव संसारदशायां कर्मतन्त्रं शरीरयोगं युग्यशकटयोगदृष्टान्तेनाभिधाय "अथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणमथ यो वेदेदमभिव्याहराणीति स आत्माऽभिव्याहाराय वागथ यो वेदेदं शृणवानीति स आत्मा श्रवणाय श्रोत्रमथ यो वेदेदं मन्वानीति स आत्मा मनोऽस्य दैवं चक्षु"रिति चक्षुरादीनां करणत्वं रूपादीनां ज्ञेयत्वमस्य च ज्ञातृत्वं प्रदर्श्य तत एव शरीरेन्द्रियेभ्यो

१ शरीरमात्रं मत्यु अन्यतदस्या—इति लि॰ पु॰ प्रामादिकः पाठः ।

२ अमतस्यस्येति मु॰ पु॰ पाठः ।

३ योगिन इति पु॰ द्वयेऽपि पाठः ।

४ जक्षिति क्वचिदुपनिषत्पुस्तकेऽपि पाठो दृश्यते स चेत्प्रामाणिक आर्षत्वात्साधुः ।

५ निवृत्तत्वमिति लि॰ पुस्तकेऽत्राधिकमस्ति न तु नह्युक्तम् ।

६ प्रियाप्रियवियुक्त...द्यपुरुषार्थानुसंधानेति लि॰ पु॰ पाठः स तु न युक्तः ।

७ प्रयुक्त इति लि० पु० पाठः ।

८ एवमस्मिन्निति मु० पु० पाठः ।

ऽस्य व्यतिरेकमुपपाद्य, "स वा एष एतेन दिव्येन चक्षुषा मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके" इति तस्यैव विधूतकर्मनिमित्तशरीरेन्द्रियस्य 'मनः'[1]शब्दाभिहितेन दिव्येन स्वाभाविकेन ज्ञानेन सर्वकामानुभवमुक्त्वा, "तं वा एतं देवा आत्मानमुपासते तस्मात्तेषां सर्वे च लोका आप्ताः सर्वे च कामाः' इत्येवंविधमात्मानं ज्ञानिनो जानन्तीत्यभिधाय, "सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाचे"त्येवंविधमात्मानं विदुषः सर्वलोकसर्वकामावाप्त्युपलक्षितं ब्रह्मानुभवं फलमभिधायोपसंहृतम्। अतस्तत्रापहतपाप्मत्वादिगुणको ज्ञातव्यतया प्रक्रान्तो जीव एवेत्यवगतम्। यतो[2] जीवस्यापहतपाप्मत्वादयः सम्भवन्ति, अतो दहरवाक्यशेषे श्रूयमाणस्य जीवस्यापहतपाप्मत्वादिगुणसम्भवात्स एव दहराकाश इति निश्चीयत इति चेदिति। तत्राह—'आविर्भूतस्वरूपस्त्व'ति, पूर्वमनृततिरोहितापहतपाप्मत्वादिगुणकस्वस्वरूपः[3]पश्चाद्विमुक्तकर्मबन्धः शरीरात्समुत्थितः परं ज्योतिरुपसम्पद्य आविर्भूतस्वरूपः सन्नपहतपाप्मत्वादिगुणविशिष्टस्तत्र प्रजापतिवाक्ये ऽभिधीयते। दहरवाक्ये त्वतिरोहितस्वस्वभावापहतपाप्मत्वादिविशिष्ट एव दहराकाशः प्रतीयते। आविर्भूतस्वरूपस्यापि जीवस्यासम्भावनीयास्सेतुत्वसर्वलोकविधरणत्वादयस्सत्यशब्दनिर्वचनावगतं चेतनाचेतनयोर्नियन्तृत्वं दहराकाशस्य परब्रह्मतां साधयन्ति। सेतुत्वसर्वलोकविधरणत्वादय आविर्भूतस्वरूपस्यापि न सम्भवन्तीति "जगद्व्यापारवर्ज"मित्यत्रोपपादयिष्यामः।

यद्येवम्, दहरवाक्ये 'अथ य एष सम्प्रसाद" इत्यादिना जीवप्रस्तावः किमर्थ इति चेत्, तत्राह—

अन्यार्थश्च परामर्शः ॥ १६ ॥

दहराकाशस्यापहतपाप्मत्वजगद्विधरणत्वादिवन्मुक्तस्य तदुप-

१ 'न्द्रियमन इति लि· पु·

२ अत इति मु· पु· लि· पु· च पाठः।

३ 'गुणकः स्वस्वरूप इति मु· पु· पाठः। 'त्वादिकस्वस्वरूप इति· लि· पु·।

Digitized by Google

सम्पन्नस्याऽपहतपाप्मत्वादिकल्याणगुणविशिष्टस्वाभाविकरूपप्राप्तिकथनेन तद्धेतुस्वरूपं[1] परमपुरुषासाधारणं गुणमुपदेष्टुं प्रजापतिवाक्योक्तस्य जीवस्यात्र परामर्शः । प्रजापतिवाक्ये च मुक्तात्मस्वरूपयाथात्म्यविज्ञानं दहरविद्योपयोगितयोक्तम्, ब्रह्म प्रेप्सोर्हि जीवात्मनः स्वस्वरूपं च ज्ञातव्यमेव, स्वयमपि कल्याणगुण एव सन्ननवधिकातिशयासंख्येयकल्याणगुणगणं परं ब्रह्मानुभविष्यतीति ब्रह्मोपासनफलान्तर्गतत्वात्स्वस्वरूपयाथात्म्यविज्ञानस्य । “सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्” “स तत्र पर्येति जक्षन् क्रीडन्”नित्यादिकं प्रजापतिवाक्ये कीर्त्यमानं फलमपि दहरविद्याफलमेव ।

अल्पश्रुतेरिति चेत्तदुक्तम् ॥ २० ॥

दहरोऽस्मिन्नित्यल्पपरिमाणश्रुतिराराग्रोपमितस्य जीवस्यैवोपपद्यते न तु सर्वस्माज्ज्यायसो ब्रह्मण इति चेत्, तत्र यदुत्तरं वक्तव्यम्, तत् पूर्वमेवोक्तं “निचाय्यत्वादेव”मित्यनेन । अतो दहराकाशोऽनाद्यनाविद्याद्यशेषदोषगन्धरहितस्वाभाविकनिरतिशयज्ञानबलैश्वर्यवीर्यशक्तितेजः-प्रभृत्यपरिमितोदारगुणसागरः पुरुषोत्तम एव । प्रजापतिवाक्यनिर्दिष्टस्तु “घ्नन्ति त्वेवैनं विच्छाययन्ती”त्येवमादिभिरवगतकर्मनिमित्तदेहपरिग्रहः पश्चात्परं ज्योतिरुपसम्पद्याविर्भूतापहतपाप्मत्वादिगुणकस्वस्वरूप इति न दहराकाशः ।

इतश्चैतदेवम्—

अनुकृतेस्तस्य च ॥ २१ ॥

तस्य दहराकाशस्य परस्य ब्रह्मणोऽनुकारादयमपहतपाप्मत्वादिगुणको विमुक्तबन्धः प्रत्यगात्मा, न दहराकाशः । तदनुकारः तत्साम्यम् । तथा हि[2] प्रत्यगात्मनो विमुक्तस्य परब्रह्मानुकारः श्रूयते—

“यदा[3] पश्यः पश्यते रुक्मवर्णं
कर्तारमीशं पुरुषं ब्रह्म योनिम् ।

---

१ तद्धेतुत्वरूपमिति लि. पु. ।
२ हीति नास्ति लि. पु. ।
३ पर्येति लि. पु. ।

तदा विद्वान् पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैती"ति ।

अतोऽनुकर्ता प्रजापतिवाक्ये निर्दिष्टः,[1] अनुकार्यं ब्रह्म दहराकाशः ।

अपि स्मर्यते ॥ २२ ॥

संसारिणोऽपि मुक्तावस्थायां परमसाम्यापत्तिलक्षणः परब्रह्मानुकारस्स्मर्यते—

"इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति चे"ति ।

केचित् 'अनुकृतेस्तस्य च" "अपि स्मर्यत"इति सूत्रद्वयमधिकरणान्तरं

"तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाती"—

त्यस्याश्श्रुतेः परब्रह्मपरत्वनिर्णयाय प्रवृत्तं वदन्ति, तत्त्व "ऽदृश्यत्वादिगुणको धर्मोक्तेः" "द्युभ्वाद्यायतनं स्वशब्दा"दित्यधिकरणद्वयेन तस्य प्रकरणस्य परब्रह्मविषयत्वप्रतिपादनात् "ज्योतिश्चरणाभिधाना"दित्यादिषु परस्य ब्रह्मणो भारूपत्वावगतेश्च पूर्वपक्षानुत्थानादयुक्तम्, सूत्राक्षरवैरूप्यं च[2] ॥

दहराधिकरणं समाप्तम् ॥ ५ ॥

अथ प्रमिताधिकरणम् ६ । शब्दादेव प्रमितः ॥ २३ ॥

कठवल्लीषु श्रूयते—

"अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ।
ईशानो भूतभव्यस्य न ततो विजुगुप्सते ॥

---

१ वाक्यनिर्दिष्ट इति समस्तपाठो मु॰ पु॰ ।
२ वैरूप्याच्चेति लि॰ पु॰ पाठः ।

एतद्वै तत् ।

अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः[1] ॥
ईशानो भूतभव्यस्य स एवाद्य स उ श्वः[2] ॥

एतद्वै तत्" ।

"अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा
सदा जनानां हृदये सन्निविष्टः ।
तं स्वाच्छरीरात्प्रवृहे-
न्मुञ्जादिवेषीकां धैर्येण ॥
तं विद्याच्छुक्रममृत"मिति ।

तत्र सन्दिह्यते–किमयमङ्गुष्ठमात्रप्रमितः प्रत्यगात्मोत परमात्मेति । किं युक्तम् । प्रत्यगात्मेति । कुतः । जीवस्यान्यत्राङ्गुष्ठमात्रत्वश्रुतेः

"प्राणाधिपः सञ्चरति स्वकर्मभिः ॥
अङ्गुष्ठमात्रो रवितुल्यरूपः
सङ्कल्पाह[3]ङ्कारसमन्वितो यः" इति ।

न चान्यत्रोपासनार्थतया ऽपि परमात्मनोऽङ्गुष्ठमात्रत्वं श्रूयते । एवं निश्चिते जीवस्य ईशानत्वं शरीरेन्द्रियभोग्यभोगोपकरणापेक्षया ऽपि[4] भविष्यति–इति प्राप्ते ब्रूमः–

'शब्दादेव प्रमितः',

अङ्गुष्ठमात्रं प्रमितः[5] परमात्मा । कुतः । 'ईशानो भूतभव्यस्ये'ति शब्दादेव । न च भूतभव्यस्य सर्वस्येशितृत्वं कर्मपरवशस्य जीवस्योपपद्यते ।

---

१ रिवाधूमकमिति लि॰ पु॰ पाठः ।
२ स एवाद्यः स ईश्वर इति लि॰ पु॰ पाठः कृत्रिमः ।
३ संकल्पादहमिति लि॰ पु॰ पाठो न श्रुत्यनुसारी ।
४ अपि-इति नास्ति लि॰ पु॰ ।
५ अङ्गुष्ठप्रमित इति मु॰ पु॰ पाठः ।

कथं तर्हि परमात्मनो[1]ऽङ्गुष्ठमात्रत्वमित्यत्राह—

हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॥ २४ ॥

परमात्मन उपासनार्थमुपासकहृदये वर्तमानत्वादुपासकहृदयस्याङ्गुष्ठप्रमाणत्वात्, तदपेक्षयेदमङ्गुष्ठप्रमितत्वमुपपद्यते । जीवस्याप्यङ्गुष्ठप्रमितत्वं हृदयान्तर्वर्तित्वात्तदपेक्षमेव, तस्याराग्रमात्रत्वश्रुतेः । मनुष्याणामेवोपासकत्वसम्भावनया शास्त्रस्य मनुष्याधिकारत्वात्, मनुष्यहृदयस्य च तत्तदङ्गुष्ठप्रमितत्वात् खरतुरगभुजगादीनामनङ्गुष्ठ[2]प्रमितत्वेऽपि न कश्चिद्दोषः । स्थितं तावदुत्तरत्र समापयिष्यते ॥

अथ देवताधिकरणम् ७ ।

तदुपर्यपि बादरायणः सम्भवात् ॥ २५ ॥

परस्य ब्रह्मणोऽङ्गुष्ठ[3]प्रमितत्वोपपत्तये मनुष्याधिकारं ब्रह्मोपासनशास्त्रमित्युक्तम्, तत्प्रसङ्गेनेदानीं[4] ब्रह्मविद्यायां देवादीनामप्यधिकारोऽस्ति ? नास्तीति विचार्यते । किन्तावद्युक्तम् । नास्ति देवादीनामधिकार इति । कुतः । सामर्थ्याभावात् । न ह्यशरीराणां देवादीनां विवेकविमोकादिसाधनसप्तकानुगृहीतब्रह्मोपासनोपसंहारसामर्थ्यमस्ति । न च देवादीनां सशरीरत्वे प्रमाणमुपलभामहे । यद्यपि परिनिष्पन्नेऽपि वस्तुनि व्युत्पत्तिसम्भावनया[5] वेदान्तवाक्यानि परे ब्रह्मणि प्रमाणभावमनुभवन्ति, तथाऽपि देवादीनां विग्रहवत्त्वप्रतिपादनपरं न किञ्चिदपि वाक्यमुपलभ्यते । मन्त्रार्थवादास्तु कर्मविधिशेषतयाऽन्यपरत्वान्न देवादिविग्रहसाधने प्रभवन्ति । कर्मविधयश्च स्वापेक्षितोद्देश्यकारकत्वातिरेकि देवतागतं किमपि न साधयन्ति । अत एव तासामर्थित्वमपि न सम्भवति । अतस्सामर्थ्यार्थित्वयोरभावाद्देवादीनामनधिकार इत्येवं प्राप्ते प्रचक्ष्महे—

'तदुपर्यपि बादरायणः सम्भवात्',

१ कथं तर्हि तस्य परमात्मन इति लि. पु. ।
२ तुरङ्गशरभ (शरभ) भुजङ्गादीनामङ्गुष्ठेति लि. पु. ।
३ मात्र—इत्यधिकं लि. पु. ।
४ तत्प्रमाणं मनुष्याणामिति लि. पु. पाठः सर्वथैवाऽसंगतः ।
५ व्युत्पत्त्यसंभावनयेति लि. पु. ।

'तदुपर्य्यपि', तत्-ब्रह्मोपासनम्, उपरि—देवादिष्वपि सम्भवतीति भगवान्बादरायणो मन्यते, तेषामर्थित्वसामर्थ्ययोस्सम्भवात्। अर्थित्वं तावदाध्यात्मिकादिदुर्विषहदुःखाभितापात्परस्मिन् ब्रह्मणि च निरस्तनिखिलदोषगन्धे ऽनवधिकातिशयासंख्येयकल्याणगुणगणे निरतिशयभोग्यत्वादि[1]ज्ञानाच्च सम्भवति, सामर्थ्यमपि पटुतर[2]देहेन्द्रियादिमत्तया सम्भवति। देहेन्द्रियादिमत्त्वं च ब्रह्मादीनां सकलोपनिषत्सु सृष्टिप्रकरणेष्वामननप्रकरणेषु च श्रूयते। तथाहि, "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्[3] तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत" इत्यारभ्य सदचेतनं[4] तेजोऽबन्नप्रमुखावस्थाविशेषवद् व्याकृत्य[5] "अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी"ति सङ्कल्प्य ब्रह्मादिस्थावरान्तं चतुर्विधं भूतजातं तत्तत्कर्मोचित[6]शरीरं तदुचितनामभाक् चाप्यकरो[7]दित्युक्तम्। एवं सर्वत्र सृष्टिवाक्येषु देवतिर्यङ्मनुष्यस्थावरात्मना चतुर्विधा सृष्टिराम्नायते। देवादिभेदश्च तत्तत्कर्मानुगुणब्रह्मलोकप्रभृतिचतुर्दशलोकस्थफलभोगयोग्यदेहेन्द्रियादियोगायत्तः, आत्मनां स्वतो देवादित्वाभावात्। तथा, "तद्धोभये देवासुरा[8] अनुबुबुधिरे ते होचुः" "इन्द्रो ह वै देवानामभिप्रवव्राज विरोचनोऽसुराणान्तौ हासंविदानावेव समित्पाणी प्रजापतिसकाशमाजग्मतुः तौ ह द्वात्रिंशतं वर्षाणि[9] ब्रह्मचर्य्यमूषतुः तौ ह प्रजापतिरुवाचे"त्यादिना विस्पष्टमेव शरीरेन्द्रियवत्त्वं देवादीनां प्रतीयते। कर्म्मविधिशेषभूतमन्त्रार्थवादेष्वपि "वज्रहस्तः पुरन्दरः" "तेनेन्द्रो

१ अनवधिकातिशयकल्याणगुणे निरतिशयकल्याणगुणे निरतिशयभोग्यत्वादीति लि॰ पु॰ पाठः।

२ पटुतरं-इति लि॰ पु॰।

३ एकमेवाद्वितीयम्-इति मु॰ पु॰ नास्ति।

४ सत्-इति अत्राधिकं लि॰ पु॰।

५ व्याकृत्येति लि॰ पु॰ प्रामादिकम्।

६ भूत-इति अत्राधिकं मु॰ पु॰।

७ भाक्तं चाकरोदिति लि॰ पु॰।

८ देवा असुरा इति मु॰ पु॰ पाठो न युक्तः।

९ द्वात्रिंशद्वर्षाणीति मु॰ पु॰ पाठः। तौ ह वा त्रिंशतवर्षाणीति लि॰ पु॰।

वज्रमुद्यच्छ"दित्यादिभिः प्रतीयमानं विग्रहादिमत्त्वं प्रमाणान्तराविरुद्धं तत्प्रमेयमेव । न चानुष्ठेयार्थप्रकाशनस्तुतिपरत्वाभ्यां प्रतीयमानार्थान्तराविवक्षा शक्यते वक्तुम्, स्तुत्याद्युपयोगात्, तेन विना स्तुत्याद्यनुपपत्तेश्च । गुणकथनेन हि स्तुतित्वम्, गुणानामसद्भावे स्तुतित्वमपि हीयते । न चाऽसति गुणे कथिते तेन[1] प्ररोचना जायते । अतः कर्म्म प्ररोचयन्तो गुणसद्भावं बोधयन्त्येवार्थवादाः । मन्त्राश्च कर्म्मसु विनियुक्तास्तत्रतत्र किञ्चित्करत्वायानुष्ठेयमर्थं प्रकाशयन्तो देवतादिगत[2]विग्रहादिगुणविशेषमभिदधत एव तत्र किञ्चित्कुर्वन्ति, अन्यथेन्द्रादि[3]स्मृत्यनुपपत्तेः । न ह निर्विशेषा देवता धियमधिरोहति । तत्र प्रमाणान्तराप्राप्तान् गुणान् स्वयमेव बोधयित्वा तैः कर्म प्ररोचयन्ति, गुणविशिष्टं वा प्रकाशयन्ति, †देवतादिगतविग्रहादिगुणविशेषमभिदधत एव तत्र† प्राप्तांश्चानूद्य तैः प्ररोचनप्रकाशनङ्कुर्व्वन्ति[4] । विरुद्धत्वे तु तद्वाचिभिश्शब्दैरविरुद्धान्[5]गुणाल्ँलक्षयित्वा कुर्व्वन्ति । कर्म्मविधेश्च देवतायाः प्रमाणान्तरप्राप्त[6]मैश्वर्य्यमपेक्षितमेव, कामिनः कर्त्तव्यतया कर्म्म विधीयमानं स्वयं क्षणप्रध्वंसि कालान्तरभाविनः[7] फलस्य स्वर्गादेस्साधकमपेक्षते । मन्त्रार्थवादयोश्च "वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन[8]भागधेयेनोपधावति स एवैनम्भूतिं[9] गमयति" "यदनेन हविषाऽऽशास्ते तादृश्यात तदृध्या तदस्मै[10]देवा राधन्तामि"त्यादिषु देवतायाः कर्म्मणाऽऽराधितायाः फलदायित्वन्त-

[1] नह्यऽसता गुणेन कथितेनेति मु॰ पु॰ पाठः ।

[2] देवताधिगतेति लि॰ पु॰ पाठः ।

[3] अन्यार्थेन्द्रादीति लि॰ पु॰ ।

†† एतच्चिह्नान्तर्गत पाठः पुस्तकद्वये ऽप्यस्ति, परन्तु पूर्वगत एव पाठो लेखकप्रमादात्पुनरागत इति प्रतिभाति ।

[4] प्राप्तान् गुणाननूद्य तैः प्ररोचनप्रकाशने कुर्वन्ति—इति लि॰ पु॰ पाठः ।

[5] अविरुद्धादिति लि॰ पु॰ तु प्रमादात् ।

[6] प्रमाणान्तरप्राप्तमिति लि॰ पु॰ नास्ति न च युक्तम् ।

[7] भाविनः—इति लि॰ पु॰ ।

[8] स्वेनेति नास्ति लि॰ पु॰, भाष्यन्तु तेन ।

[9] भूतमिति मु॰ पु॰ पाठः ।

[10] तस्मै—इति लि॰ पु॰ पाठः ।

तत्र विश्वेदेवानुवादेन द्रव्यविधानं वैश्वदेवीशब्देनैव कर्त्तव्यं, पदश्रुतेः । यथा भावनायां करणसमर्पणं धातुनैव क्रियते पदश्रुतेः न तूपपदेनेत्युक्तं भावार्थाधिकरणे तद्वत् । तत्र च वषट्कर्त्तुः प्रथमभक्षइतिवदेकप्रसरताविरोधः । अतो यागानुवादेनापि द्रव्यविधानार्थं वैश्वदेव्यामिक्षेत्यत्र यजिकल्पनं तावदवश्यं कर्त्तव्यम् । ततश्च पशुसोमाधिकरणन्यायवैषम्यम् । ऐन्द्रवायवं गृह्णातीत्यत्र देवताविशिष्टग्रहणविधानेन यज्यकल्पनात् । यजिकल्पने च वैश्वदेव्यामिक्षेत्यत्रैव द्रव्यदेवताविशिष्टकर्मविधानं युक्तं, रूपद्वयश्रवणात् । एवं चाग्नेयोऽष्टाकपालः सौम्यश्चरुरित्यादिवाक्यैर्वैश्वदेव्यामिक्षेत्यस्यवाक्यस्य प्रायपाठो रक्षितो भवति । अन्यथा हि तेषु सर्वेषु द्रव्यदेवतासम्बन्धकल्पितयागविधानमत्र च द्रव्यमात्रविधानमिति वैरूप्यं प्रसज्येत ।

(१६५) किञ्च वैश्वदेवेन यजेतेत्यत्र वैश्वदेवस्य देवतासमर्पकत्वे यद्विश्वेदेवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वमित्येतस्यार्थवादस्यात्यन्तमेव निरालम्बनत्वम् । एतदर्थवादाद्धि वैश्वदेवशब्दो विश्वेदेवकर्तृकत्वेन कर्मणि प्रवृत्त इति ज्ञायते । तद्देवतासमर्पकत्वे विरुध्यते । किञ्च वैश्वदेवेन यजेतेत्यस्य यागविधित्वे आमिक्षाया नोत्पत्तिशिष्टत्वम् । तथा च तया न वाजिनं बाधितुं शक्यत इति उभयोरपि आमिक्षावाजिनयोर्यागाङ्गत्वं स्यात् । तथा च विकल्पः

स चाष्टदोष[२८८] इति । तस्माद्वैश्वदेव्यामिक्षेत्यत्रैव यागविधानम् । इतरस्य त्वनुवादत्वम् । अनुवादत्वे च यथा नानर्थक्यं तथोक्तमित्यास्तां तावत् । तत्सिद्धं वैश्वदेवस्य कर्मनामधेयत्वम् ।

(१६६) तदेवं निरूपितं मत्वर्थलक्षणादिप्रकारचतुष्टयनिरूपणेन नामधेयस्य विधेयार्थपरिच्छेदकत्वेनार्थवत्त्वम् ।

(१६७) अनर्थहेतुकर्मणः सकाशात्पुरुषस्य निवृत्तिकरत्वेन निषेधानां पुरुषार्थानुबन्धित्वम्[२८९] । तथा हि यथा विधयः प्रेरणामभिदधतः स्वप्रवर्तकत्वनिर्वाहार्थम् विधेयस्य यागादेः श्रेयःसाधनत्वमाक्षिपन्तः पुरुषं तत्र प्रवर्तयन्ति, एवं न कलञ्जं भक्षयेदित्यादयो निषेधा अपि निवर्तनामभिदधतः स्वनिवर्तकत्वनिर्वाहार्थं निषेध्यस्य कलञ्जभक्षणादेः अनर्थहेतुत्वमाक्षिपन्तः पुरुषं ततो निवर्तयन्ति ।

(१६८) “[२९१] ननु कथं निषेधानां निवर्तनाप्रतिपादकत्वम् । यावता न भक्षयेन्न हन्तव्य इत्येवमादावव्यवधानेन[२९२] नञर्थस्याभावस्य धात्वर्थेनान्वये

---

२८८ तथा हि प्रथमत आमिक्षायागे प्राप्तस्य यागपदस्य बाधस्तदुत्पत्तेश्च च द्वितीये तस्य तद्वाक्यस्य च प्रातिपदिकस्याकार इति चत्वारो दोषाः । एवं वाजिनपक्षेऽपीति भावः ।

२८९ अनर्थो नरकादि दुःखं तद्धेतुत्वात्कर्मणोऽप्यनर्थत्वम् ।

२९० स्वस्य निवर्तकत्वनिर्वाहार्थमिति विग्रहः ।

२९१ प्राभाकरः शङ्कते ।

२९२ यद्यपि धात्वर्थादव्यवहितं नञ्पदादि तथापि समासं विना न तदन्वयो घटत इत्याशयः । न च प्रागभावात्मनो वर्जनस्य कथं कर्तव्यतेत्यपि शङ्क्यम् ? योगक्षेमसाधारणकर्तव्यतायास्तत्रापि भावात् ।

धात्वर्थवर्ज्जनकर्त्तव्यतैव सर्वत्र वाक्यार्थः प्रतीयते । ततश्च यथा यजेतेत्यादौ यागकर्त्तव्यता वाक्यार्थः एवं निषेधेषु तत्तद्धात्वर्थवर्ज्जनकर्त्तव्यता वाक्यार्थो न निवर्त्तते इति" चेत्—

(१६९) नैवम् । अव्यवधानेऽपि धात्वर्थस्य प्रत्ययार्थोपसर्ज्जनत्वेनोपस्थितस्य तस्य नञर्थेनान्वयायोगात् । न ह्यन्योपसर्ज्जनमन्येनान्वेति । मा भूद्राजपुरुषमानयेत्यत्र राज्ञ आनयनान्वयित्वम् । ततश्चाव्यवधानेऽपि नञर्थस्य न धात्वर्थेनान्वयः । आरुण्ययैकहायन्या । नापि कलञ्जादिपदार्थैरन्वयः । तेषामपि कारकोपसर्ज्जनतयोपस्थितत्वेन भिन्नपदस्य नञर्थेनान्वयायोगात्, एकहायन्या इवारुण्येन । अतश्चान्येनान्वयायोगान्नञर्थः प्रत्ययार्थेन सम्बध्यते । तस्य प्राधान्यात् । क्रमभावनयेवारुण्यादीनि । तत्रापि नाख्यातांशवाच्यया ऽर्थभावनया तस्या अपि लिङ्त्वांशवाच्यप्रवर्त्तनोपसर्ज्जनत्वेनोपस्थितत्वात् । अतो [२८३]लिङ्त्वांशेन नञ् सम्बध्यते । तस्य सर्वापेक्षया प्राधान्यात् । नञश्चैष स्वभावो यत्स्वसम्बन्धिप्रतिपक्षबोधकत्वम् । नास्तीत्यत्र ह्यस्तीति सत्त्वशब्देन सम्बध्यमानो नञ् सत्त्वप्रतिपक्षमसत्त्वं गमयति । तदिह लिङर्थस्तावत्प्रवर्त्तना । अतस्तेन सम्बध्यमानो नञ् प्रवर्त्तनाप्रतिपक्षं निवर्तनां गमयति । विधिवाक्यश्रवणे ऽयं मां प्रवर्त्तयतीति प्रव-

२८३ तद्वंन ।

तेनाप्रतीतिवन्निषेधवाक्यश्रवणे ऽयं मां निवर्त्तयतीति निवृत्त्यनुकूलव्यापारनिवर्त्तनायाः प्रतीतेः । अतश्च सर्वत्र निषेधेषु निवर्तनैव वाक्यार्थः । एवं च विधिनिषेधयोर्भिन्नार्थत्वं सिद्धं भवति ।

(१७०) हननादिवर्जनकर्त्तव्यतावाक्यार्थपक्षे तु कर्त्तव्यताया एवोभयत्र प्रतिपाद्यत्वात्तयोरेकार्थत्वं स्यात् । तच्च न युक्तम् । यथाहुः

अन्तरं यादृशं लोके ब्रह्महत्याऽश्वमेधयोः
दृश्यते तादृगेवेदं विधानप्रतिषेधयोरिति ।

तथा

फलबुद्धिप्रमेयाधिकारिबोधकभेदतः
पञ्चधात्यन्तभिन्नत्वाद्भेदो विधिनिषेधयोरिति

(१७१) [२६४] यन्मते इष्टसाधनत्वं लिङर्थस्तन्मते लिङ्संसृष्टो नञ् इष्टसाधनत्वप्रतिपक्षमनिष्टसाधनत्वं गमयति । सर्वथापि तु नञः[२६५] प्राधान्यात्प्रत्ययेनान्वयः । यदा तु तदन्वये किंचिद्बाधकं तदाऽगत्या धात्वर्थेनान्वयः ।

(१७२) तच्च बाधकं द्विविधम् । तस्य व्रतमित्युपक्रमो विकल्पप्रसक्तिश्च । तेन च बाधकद्वयेन नञ्युक्तेषु वाक्येषु पर्युदासाश्रयणं भवति । तदभावे निषेध एव—

---

२६४ मण्डनमिश्राणां मते ।

२६५ धात्वर्थं प्रति प्रत्ययार्थभावनाया एव प्राधान्यनियमात् ।

पर्युदासः स विज्ञेयो यत्रोत्तरपदेन[२६६] नञ्
प्रतिषेधस्स विज्ञेयः क्रियया सह यत्र नञिति च-

तयोर्लक्षणम् । तत्र नेक्षेतोद्यन्तमादित्यमि-
त्यादौ पर्युदासाश्रयणम्, तस्य व्रतमित्युपक्रमात् । तथा हि व्रतशब्देन[२६७] कर्त्तव्योऽर्थ उच्यते । अतश्च स्नातकस्य कर्त्तव्यार्थानां वक्तव्यत्वेनोपक्रमात् किं तत्कर्तव्यमित्यपेक्षायामग्रे नेक्षेतोद्यन्तमित्यादौ कर्त्तव्य एवार्थो वक्तव्यः. आकाङ्क्षिताभिधानात् । अर्थान्तरोक्तौ च पूर्ववाक्यस्य[२६८] साकाङ्क्षत्वेनाप्रामाण्यं स्यात् । न हि कर्तव्यार्थस्य वक्तव्यत्वेनोपक्रमे ऽग्रे च तदनभिधाने पूर्ववाक्यस्य निराकाङ्क्षत्वं सम्भवति । न च साकाङ्क्षस्य प्रमाण्यम्, गौरश्वः पुरुष इत्यादावपि प्रसङ्गात् । किं च नेक्षेतेत्यस्योपक्रमेण प्रतीयमाना एकवाक्यता च न स्यात् अर्थान्तरोक्तेः । अतश्चास्मिन्वाक्ये कश्चित्कर्त्तव्य एवार्थो वक्तव्यः । तदुक्तौ च न नञः प्रत्ययेन सम्बन्धो घटते । तत्सम्बन्धे कर्त्तव्यार्थोक्तेरनुपपत्तेः । प्रत्ययाश्रावतारितो नञ् धातुना सम्बध्यते । तत्सम्बन्धे च न नञः प्रतिषेधकत्वम् । विधायकसम्बन्धेनैव तस्य प्रतिषेधकत्वात् । प्रतिषेधकत्वस्य विधायकप्रतिपक्ष-

---

२६६ अत्रोत्तरपदत्वञ्च क्रियार्थकं व्यवहिताव्यवहितसाधारणम् । तेन नदीक्षि-तस्याश्नीयादित्यादौ पर्युदाससिद्धिः । वस्तुतस्त्वभावार्थकपदस्याक्रियार्थकपदा-र्थः-स इति तत्त्वम् ।

२६७ संकल्पवत्त्वार्थः । अत एव अधःशायी स्यादित्यादिस्मृतिकाराणामुक्तयः सङ्गता भवन्ति ।

२६८ अर्थापूर्णत्वेन ।

त्वात् । नामधातुयोगे तु न नञः प्रतिषेधकत्वम् । तयोरभिधायकत्वात् । यथाऽऽहुः ।

नामधात्वर्थयोगी तु नैव नञ् प्रतिषेधकः[२९८]

वदत्यब्राह्मणाधर्मावन्यमात्रविरोधिनाविति ।

अतश्च नेक्षेतेत्यत्र नञो धातुयोगान्नञीक्षति-भ्यामीक्षणविरोधीकश्चनार्थः प्रतिपाद्यते ।

(श्लो॰ वा॰ अपोह ३३)

(१०२) ननु तदन्यत्तद्विरुद्धतदभावेषु नञिति सत्यऽपि स्मरणे नञः स्वसंसृष्टाभाव एव शक्तिः लाघवात् न तु तदन्यतद्विरुद्धयोः, तयोरभावघटितत्वेन गौरवात् । अनेकार्थत्वस्य चान्याय्यत्वात् । अतो नञो धातुयोगे धात्वर्थाभावबोधकत्वमेव, न तु तद्विरुद्धार्थबोधकत्वमिति चेत्"–

(१०३) सत्यम् । नञो ऽभाव एव शक्तिः स्मरणं तु प्रतीत्यभिप्रायं न शक्त्यभिप्रायम् । नामधात्वर्थयोगीत्यपि प्रतीत्यभिप्रायम् । तथापि नेक्षेतेत्यत्र प्रत्ययस्य नञाऽसम्बन्धात्तेन तावत्कश्चिदर्थो विधेयः । तत्र न तावद्धात्वर्थो विधातुं शक्यते, नञा तदभावबोधनात् । नापि तदभावो विधातुं शक्यते, अभावस्याविधेयत्वात् । अतश्च नञीक्षतिभ्यां विधानयोग्यः कश्चनेक्षणविरोधी अर्थो लक्षणया प्रतिपाद्यते । स चेक्षणविरोधी लक्ष्यमाणः पदार्थो नेक्षेतेत्य-

---

२९८ ब्राह्मणाधर्माविति न क्रमेणान्यमात्रं विरोधिमात्रं च वक्तीति योजना ब्राह्मणशब्दोऽन्यमात्रं वदति, अधर्मशब्दो विरोधिमात्रमिति भावः ।

Digitized by Google

नीक्षणासंकल्पः तस्येक्षणविरोधित्वात् । सत्यपि पदार्थान्तरस्येक्षणविरोधित्वे सर्वक्रियाऽविनाभूतत्वेन संकल्पस्यैव लक्षणात् । स एव नेक्षेतेत्यत्र कर्तव्यतया विधीयते । अनीक्षणासंकल्पेन भावयेदिति भाव्याकाङ्क्षायां च एतावता हैनसा वियुक्तो भवतीति वाक्यशेषावगतः पापक्षयो भाव्यतया सम्बध्यते । एवं चात्र पापक्षयार्थसंकल्पस्य कर्त्तव्यतया विधानात्तस्य व्रतमित्यनेनैकवाक्यता सिद्धा भवति । तत्सिद्धं नेक्षेतेत्यत्र तस्य व्रतमित्युपक्रमात्पर्युदासाश्रयणमिति ।

(१७५) नानुयाजेषु ये यजामहं करोतीत्यत्र विकल्पप्रसक्त्या तदाश्रयणम् । तथा हि यद्यत्र प्रधानसम्बन्धलोभान्नञः प्रत्ययसम्बन्धः स्वीक्रियते तथा सत्यनेन वाक्येनानुयाजेषु येयजामहः प्रतिषिध्यते इति वक्तव्यमनुयाजेषु येयजामहं न कुर्यादिति । न च तत्र तस्य प्रतिषेधः प्राप्तिं विना सम्भवति प्राप्तिसापेक्षत्वात्प्रतिषेधस्य । अत एव नान्तरिक्षे न दिवीत्यस्य न प्रतिषेधकत्वमन्तरिक्षे चयनाप्राप्तेः । अत एव न ब्राह्मणो हन्तव्य इत्यस्य नित्यवद्धननिवर्तकत्वमुपपद्यते । सर्वो हि पुरुषः कदाचिद्धननादौ प्रवर्तते कदाचिन्न रागाद्यभावेन निवर्त्तते । तत्र यदि निषेधस्य प्राप्तिसापेक्षत्वं न स्यात्तदा रागादिविरोधाय हननादावप्रवृत्तं प्रत्येव शास्त्रप्रामाण्योपपत्तौ रागादिना हननादौ प्रवृत्तेन पुंसा न ततो निवर्त्तितव्यम् । प्राप्तिसापेक्षत्वे

तु स्वयमप्रवृत्तं प्रति प्रसक्त्यभावेन निषेधशास्त्राप्रवृत्तेः। अतश्च ब्राह्मणो न हन्तव्य इति रागादिना प्रवृत्तं प्रत्येव भ्रान्तिनिमित्तरागबाधेन निषेधशास्त्रप्रवृत्तेर्युक्ता प्रवृत्तस्य ततो निवृत्तिः। अतश्च ब्राह्मणो न हन्तव्य इत्यस्य निषेधस्य निवृत्तिनियमबोधकत्वम्। व्रीहीनवहन्यादित्यस्येवावघातनियमबोधकत्वम्। यथा खलु व्रीहीनवहन्यादिति शास्त्रं वैतुष्यार्थमवघाते स्वतः प्रवृत्तं पुरुषं प्रति न प्रवर्त्तते वैयर्थ्यात्, किं तु विदलनादौ प्रवृत्तं प्रति। एवं न हन्यादिति शास्त्रं हननात्स्वयं निवृत्तं पुरुषं प्रति न प्रवर्त्तते वैयर्थ्यात्, किं तु हनने प्रवृत्तं पुरुषं प्रति कर्त्तव्यत्वेन प्रसक्तस्य निषेधाद्यत्कर्त्तव्यं तन्नेति। अतश्च प्राप्तिसापेक्षत्वात्प्रतिषेधानामनुयाजेषु येयजामहप्रतिषेधेनैतस्य तत्र प्राप्तिर्वक्तव्या। सा न तावद्धननादाविव रागतः सम्भवति। अतो यजतिषु येयजामहं करोतीति शास्त्रात्सा वक्तव्या। शास्त्रप्राप्तस्य च निषेधे विकल्पः स्याच्छास्त्रेण भ्रान्तिनिमित्तरागस्येव शास्त्रान्तरस्यात्यन्तबाधायोगात्। न च[299] पदशास्त्रेणाहवनीयशास्त्रस्येव नानुयाजेष्विति विशेषशास्त्रेण यजतिषु येयजामहं करोतीति सामान्यशास्त्रस्य बाधः स्यादिति वाच्यम्। शास्त्रयोर्हि तत्र बाध्यबाधकभावो यत्र परस्य निरपेक्षता। न हि पदशास्त्रस्य स्वार्थविधानार्थमाहवनीयशास्त्रापेक्षा-

२९९ पदे जुहोतीति शास्त्रेणेत्यर्थः।

Digitized by Google

स्ति। निषेधशास्त्रस्य तु प्रसक्तमयं यजतिषु येयजा-
महं करोतीति विधेरस्त्यपेक्षा। एवं च निषेधशा-
स्त्रस्य विशेषविषयत्वेन प्राबल्यवद्विधिशास्त्रस्याप्यु-
पजीव्यत्वेन प्राबल्यमस्तीति न निषेधेन विधेरत्य-
न्तबाधो युक्त इति विहितप्रतिषिद्धत्वाद्विकल्पः
स्यात्। स च न युक्तः। विकल्पे हि पक्षे शास्त्रस्याप्रा-
माण्यं भवति। न ह्यनुयाजेषु येयजामहकरणे नानु-
याजेष्वित्यस्य प्रामाण्यं सम्भवति। व्रीह्यनुष्ठानसमय
इव यवशास्त्रस्य द्विरदृष्टकल्पना च स्यात्। विधेर्हि
एवं ज्ञायते यदनुयाजेतरेषु येयजामहकरणे कश्च-
नोपकारो भवतीति। निषेधाच्च तदकरणादिति
ज्ञायते अनृतवदनाकरणादिवद्दर्शपूर्णमासयोः। स
चोपकारोऽदृष्टरूप इति द्विरदृष्टकल्पनाप्रसङ्गः। अत-
श्च विकल्पो न युक्तः। प्रतिषेधाश्रयणे च तदाप-
त्तेर्न तदाश्रयणं, किं तु नञः अनुयाजशब्देन सम्ब-
न्धमाश्रित्य पर्युदास आश्रीयते नञनुयाजशब्दाभ्या-
मनुयाजव्यतिरिक्तलक्षणात्। अनुयाजव्यतिरिक्तेषु
येयजामहं करोतीत्यत्र च वाक्ये येयजामह कर्त्त-
व्यतया न विधीयते, यजतिषु येयजामहं करोती-
त्यनेनैव विहितत्वात्। किं तु सामान्यशास्त्रविहि-
तयेयजामहानुवादेन तस्यानुयाजव्यतिरिक्तविषय-
ता विधीयते—यत् यजतिषु येयजामहं करोति तदनु-
याजव्यतिरिक्तेष्विति। एवं च सामान्यशास्त्रस्य विशे-
षापेक्षिणः नानुयाजेष्वित्यनेनानुयाजव्यतिरिक्तवि-

Digitized by Google

षयसमर्पणादनुयाजव्यतिरिक्तेषु येयजामहः कर्त्त-व्यतया[300] प्राप्तः । अनुयाजेषु तु स न कर्तव्य-तया प्राप्तो न वा प्रतिषिद्ध इति न विकल्पः । लक्ष-णया चानुयाजव्यतिरिक्तविषयसमर्पणान्नानुयाजेष्वि-ति वाक्यस्य नाप्रामाण्यमतश्च पर्युदासाश्रयणे न किं-चिद्बाधकम् । तत्सिद्धं नानुयाजेष्विति वाक्ये विक-ल्पभयात्पर्युदासाश्रयणमिति ।

(१०६) "ननु पर्युदासाश्रयणे यजतिषु येयजा-महं करोतीति शास्त्रेण यागसामान्ये प्राप्तस्य येयजा-महस्य नानुयाजेष्वित्यनेनानुयाजव्यतिरिक्ते सङ्कोच-नात् पर्युदासस्योपसंहाराभेदः स्यात् । उपसंहारे हि सामान्ये प्राप्तस्य विशेषे सङ्कोचो भवति । यथा पुरोडाशं चतुर्द्धा करोतीति पुरोडाशसामान्ये प्राप्तं चतुर्द्धाकरणमाग्नेयं चतुर्द्धा करोतीत्याग्नेये सङ्कोच्यत" इति चेत्—

(१०७) न । तन्मात्रसङ्कोचार्थत्वादुपसंहारस्य, तदन्यमात्रसङ्कोचार्थत्वात् पर्युदास्येति केचित् ।[301] अन्ये तु उपसंहारो नाम सामान्यतः प्राप्तस्य विशेषे सङ्कोचनरूपो[302] व्यापारविशेषो विधेः 'पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्'—इत्यभियुक्तोक्त्या प्रत्य-यातिरिक्तेन धातुना वा नाम्ना वा नञः सम्बन्धः । अतोऽनयोस्तावत्स्वरूपतः स्पष्ट एव भेदः । एवं

---

३०० प्राप्नोतीत्यर्थः ।
३०१ सम्प्रदायमतमाह ।
३०२ सङ्कोचनं उच्यतेऽनेनेति विग्रहः ।

Digitized by Google

सत्यप्यभेदस्याशङ्क्येत यदि यत्र पर्युदासो विहि-
तस्तत्रावश्यमुपसंहारः स्यात् । न चैतदस्ति । नेक्षे-
तोद्यन्तमित्यादौ सत्यपि तस्मिन्नुपसंहाराभावात् ।
न हि तत्राग्नेयचतुर्द्धाकरणमिव सामान्ये प्राप्तं किं
चिद्विशेषे सङ्कोच्यते । पापक्षयोद्देशेनानीक्षणसङ्क-
ल्पमात्रविधानात्[103] । प्रकृतोदाहरणे तु यजिसा-
मान्ये प्राप्तस्य येयजामहस्यानुयाजव्यतिरिक्तेषु
सङ्कोचनाद्यदि विधेरुपसंहारविधित्वं भवति नैता-
वता किं चिद्विरुध्यते । विध्यभावे हि कथं विधि-
कार्यमुपसंहारः पर्युदासेन क्रियत इति भवति वि-
रोधः । न चात्र विधिर्नास्ति नञोऽनुयाजपदसम्ब-
न्धेन विधेर्विधायकत्वस्याख्यापनात् । अत्र हि पर्यु-
दासो ऽनुयाजव्यतिरिक्तविषयसमर्पकः, आग्नेयवत् ।
उपसंहारकस्तु विधिरेव ।

(१०८) न च—"अत्र तन्मात्रसङ्कोचाभावान्नोपसं-
हार"इति वाच्यम् । तन्मात्रसङ्कोच इति कोऽर्थः । आ-
ग्नेयमात्रे सङ्कोचो वा, सामान्यप्राप्तस्य विशेषमात्रे
सङ्कोचो वा । आद्ये ऽनारभ्याधीतसाप्तदश्यस्य मित्र-
विन्दादिप्रकरणस्थेन वाक्येनोपसंहारो न स्यादा-
ग्नेये सङ्कोचाभावात् । द्वितीये चतुर्द्धाकरणस्य पुरो-
डाशमात्रे प्राप्तस्याग्नेये सङ्कोचवत् अनुयाजानुया-
जसाधारण्येन प्राप्तस्याननुयाजेषु सङ्कोचादुपसंहारः

[103] मात्रशब्दो भिन्नक्रम विधानमात्रादित्यर्थः । अयमभिप्रायः । फलसाधनत्वेन वहितः स्वर्गादिपापक्षयार्थत्वेन विधीयेत भवेदपि तदा सङ्कोचः, न चैवमस्ति सङ्कल्पविधायकविधिचतुष्टयस्यैवाङ्गीकारात् ।

स्यादेव । एतावांस्तु विशेषः । आग्नेयादिवाक्येषु आग्नेयादयो विशेषाः स्वपदोपस्थिताः । प्रकृते तु पर्युदासेन तस्योपस्थितिरिति । उपसंहारन्यायस्त्वविशिष्ट एव ।

(१७९) यच्च तदन्यमात्रसङ्कोचनार्थत्वात्पर्युदासस्येति । तत्र नेक्षेतेत्यत्र सत्यपि पर्युदासे सङ्कोचाभावात् । न ह्यसामान्ये प्राप्तं तदन्यमात्रे सङ्कोच्यते सङ्कल्पमात्रविधानादित्युक्तमित्यास्तां तावत् ।

(१८०) तत्सिद्धं मानुयाजेष्वित्यत्र विकल्पप्रसक्त्या पर्युदासाश्रयणमिति ।

(१८१) यत्र तु स आश्रयितुं न शक्यते तत्र तत्प्रसक्तावपि निषेध एवाश्रीयते । यथा नातिरात्रे षोडशिनं गृह्णातीत्यत्र । नह्यतिरात्रे षोडशिनं गृह्णातीति शास्त्रप्राप्तमतिरात्रे षोडशिग्रहणं प्रतिषिध्यत इति विहितप्रतिषिद्धत्वाद्विकल्पप्रसक्तावपि पर्युदासो नाश्रीयते ऽशक्यत्वात् । यद्यत्र नञः षोडशिपदेन सम्बन्धः स्वीक्रियेत तदाऽतिरात्रे षोडशिव्यतिरिक्तं गृह्णातीति वाक्यार्थः स्यात्तत्र चातिरात्रे षोडशिनं गृह्णातीतिप्रत्यक्षविधिविरोधः । अत एवातिरात्रपदेन न नञः सम्बन्धो ऽतिरात्रे षोडशिनं गृह्णातीति प्रत्यक्षविधिविरोधात् । अतश्चात्र पर्युदासस्यानुपपत्तेर्निषेध एव स्वीक्रियते विकल्पो ऽस्वीक्रियते अनन्यगतेः ।

(१८२) अतश्चैतत्सिद्धम्—यत्र तस्य व्रतमित्याद्युपक्रमः विकल्पप्रसक्तिश्च नास्ति तत्र प्रतिषेधः

Digitized by Google

यथा न कलञ्जं भक्षयेदिति। यत्र वा विकल्पप्रसक्तावपि पर्युदास आश्रयितुं न शक्यते तत्र प्रतिषेधः यथा नातिरात्रे षोडशिनं गृह्णातीति। एतावांस्तु विशेषः। यत्र [१०४]विकल्पापादकः प्रतिषेधः तत्र प्रतिषिध्यमानस्यानर्थहेतुत्वम् उभयोरपि विधिनिषेधयोः क्रत्वर्थत्वात्। यत्र तु न विकल्पः प्रसज्यते प्राप्तिश्च रागतः प्रतिषेधश्च पुरुषार्थः तत्र निषिध्यमानस्य नानर्थहेतुत्वम्। यथा कलञ्जभक्षणस्य। दीक्षितो न ददाति न जुहोतीत्यादिषु दानहोमादीनां शास्त्रप्राप्तावपि पुरुषार्थत्वेन प्राप्तत्वात् क्रत्वर्थत्वेन च प्रतिषेधात्तुल्यार्थत्वाभावेन विकल्पाप्रसक्तावपि न तेषामनर्थहेतुत्वम्, रागप्राप्त्यभावात्। रागतः प्राप्तस्यापि क्रत्वर्थत्वेन प्रतिषेधे तदनुष्ठानात् क्रतोर्वैगुण्येनानर्थोत्पत्तिः। यथा स्वस्त्र्युपगमनादिप्रतिषेधो रागतः प्राप्तस्य पुरुषार्थत्वेन प्रतिषेधे निषिद्ध्यमानस्यानर्थहेतुत्वमिति दिक्।

(१८३) तत्सिद्धं निषेधानां पुरुषार्थानुबन्धित्वम्। एवं सर्वस्यापि वेदस्य पुरुषार्थानुबन्धित्वम्। प्रकृतमनुसरामः।

(१८४) तदेवं यथा विध्यादीनामध्ययनविध्युपात्तानां नानर्थक्यमेवमर्थवादानामपि तदुपात्तत्वेनानर्थक्यानुपपत्तेः स्वार्थप्रतिपादने च प्रयोजनाभावा-

१०४ क्रत्वर्थ इति शेषः। उपलक्षणमिदम्, पुरुषार्थविकल्पापादकोऽपि यत्र निषेधस्तत्रापि न निषेध्यस्यानर्थजनकत्वम्, निषेधस्यानावश्यकताज्ञापनपरत्वात्।

Digitized by Google

लक्षणया प्रयोजनवदर्थपर्यवसानं[१०५] वक्तव्यम् ।

(१८५) ते चार्थवादाः द्विविधाः[१०६] विधिशेषा निषेधशेषाश्च । तत्र वायव्यं श्वेतमालभेतेत्यादिविधिशेषाणां वायुर्वै क्षेपिष्ठा देवतेत्यादीनामर्थवादानां विधेयार्थस्तावकतयार्थवत्त्वम्[१०७] । बर्हिषि रजतं न देयमित्यादिनिषेधशेषाणां सोऽरोदीदित्यादीनामर्थवादानां तु[१०८] निषेध्यनिन्दकतयेति । अतश्च लक्षणया प्राशस्त्यमर्थवादैर्बोध्यते । तच्च प्राशस्त्यज्ञानं शब्दभावनायामितिकर्त्तव्यतात्वेन सम्बध्यते, परमप्रकृतम् । तत्सिद्धं वक्ष्यमाणार्थभावनाभाव्यका लिङादिज्ञानकरणिका प्राशस्त्यज्ञानेतिकर्त्तव्यता शाब्दी भावना लिङ्त्वांशेनोच्यत इति ।

अथ शाब्दीभावना ।

(१८६) ननु केयं "शाब्दी भावना" । उच्यते । पुरुषप्रवृत्त्यनुकूलो व्यापारविशेषः । स[१०९] एव विध्यर्थः । लिङादिश्रवणे ऽयं मां प्रवर्तयतीति नियमेन[११०] प्रतीतेः । यत्तु इष्टसाधनत्वं विध्यर्थस्तन्न । तथा सति इष्टसाधनमिति शब्दस्य विधिशब्दः पर्यायः स्यात् । न च

---

१०५ प्रवर्तकनिवर्तकत्वान्यतरपर्यवसायकत्वम् ।

१०६ विधेः शेषाः विधिशेषाः । तदेकवाक्यतापन्ना इत्यर्थः । एवं निषेधशेषा इत्यत्रापि ।

१०७ यतो वायुः क्षिप्रगामी अतो यजमानाय क्षिप्रं फलं दास्यतीत्येवं स्तावकेत्यर्थः

१०८ निषेध्यस्य निषेधविषयस्य रजतस्येत्यर्थः पुरास्य संवत्सराद्रुदितमित्यर्थवादेन तस्य तत्त्वम् ।

१०९ अनन्यलभ्यो व्यापार एव ।

११० मत्प्रवृत्त्यनुकूलव्यापारवानयमित्यपि बोध्यम् ।

Digitized by Google

पर्यायत्वं युज्यते । सन्ध्योपासनं ते इष्टसाधनं तस्मात्त्वं कुर्विति सहप्रयोगात्, पर्यायाणां च सह प्रयोगाभावात्[311] । अतश्च व्यापारविशेष एव विध्यर्थः । स च लोके पुरुषनिष्ठोऽभिप्रायविशेषः । वेदे तु [312]पुरुषाभावाच्छब्दनिष्ठ एव प्रेरणापरपर्याय इत्युक्तम् ।

(१८७) "ननु लोके शब्दनिष्ठे प्रेरणापरपर्याय-व्यापारे शब्दप्रयोगाभावेन शक्तिग्रहाभावात्कथं तस्य विधिशब्दात्प्रतिपत्तिरिति" चेत्सत्यमेतत् । तथापि[313]बालस्तावत्स्तनदानादौ स्वकृतरोदनादिजनितमात्रप्रवृत्तेः स्वाभिप्रायरूपप्रवर्त्तनाज्ञानजन्यत्वावधारणात्सविधिकप्रयोजकवाक्यश्रवणसमनन्तरभाविनीं प्रयोज्यवृद्धप्रवृत्तिमुपलभ्य तत्कारणत्वेन तस्य प्रवर्त्तनाज्ञानमनुमिमीते । यद्यपि भोजनादौ स्वप्रवृत्तेः समीहितसाधनताज्ञानपूर्वकत्वावधारणात्प्रयोज्यवृद्धप्रवृत्तेरपि तत्पूर्वकत्वाध्यवसानं युक्तम् । तथाप्यन्यप्रेरितप्रवृत्तौ प्रवर्त्तनाज्ञानजन्यत्वस्योक्तमात्रप्रवृत्तौ दर्शनेन प्रयोज्यवृद्धप्रवृत्तेरप्यन्यप्रेरितप्रवृत्तित्वात्तत्कारणत्वेन प्रवर्त्तनाज्ञानस्यैवाध्यवसानम् तच्च प्रवर्त्तनाज्ञानमन्वयव्यतिरेकाभ्यां प्रयोजकवा-

---

३११ यौगपद्यापत्तेः ।

३१२ येथा हि पुरुषानुप्रवेशः पदपदार्थज्ञानपूर्वकत्वाद्वाक्यवाक्यार्थज्ञानपूर्वकत्वाद्वाक्यस्यैव वा भारतादिवत्पुरुषप्रणीतत्वात् । न ह्येतदुभयमपि वेदे सम्भवति पदपदार्थज्ञानस्यानादित्वादाकाङ्क्षादिवशात्तैः पदार्थैरेव वाक्यार्थप्रत्ययजननात् स्मर्तृत्वे सत्यस्मरणात्कर्तुरिति हृदयम् ।

३१३ तस्याप्येतेनानुमिमीत इत्यनेन सम्बन्धः ।

Digitized by Google

कार्यजन्यमित्यवधारयति । तत्र [३१४]आवापोद्वापाभ्यां प्रवर्त्तनायां विधिशक्तिमवधारयति प्रवृत्त्यनुकूलो व्यापारः प्रवर्त्तना। स च व्यापारः प्रैषादिरूपो विविध इति प्रत्येकं व्यभिचारित्वाद्विधिशब्दवाच्यत्वानुपपत्तेः प्रवर्त्तनासामान्यमेव विधिशब्दवाच्यमिति कल्पयति । एवं च विधिश्रवणे प्रैषादिरूपस्य वक्त्रभिप्रायस्य प्रवर्त्तनात्त्वेनैव रूपेण प्रतीतिर्न विशेषणतया, तथैव शक्तिग्रहात् । विशेषरूपेण तु प्रतीतिर्लक्षणयैव । एवं च वैदिकलिङादिश्रवणे ऽपि प्रवर्त्तनासामान्यमेव प्रतीयते ।

(१८८) तत्र कोऽसौ व्यापार इत्यपेक्षायां प्रैषादिरूपस्य वक्त्रभिप्रायस्यापौरुषेये वेदे ऽनुपपत्तेः शब्दनिष्ठ एव प्रेरणापरपर्यायः कश्चिद् व्यापार इति कल्प्यते । अतश्च शब्दनिष्ठ एव प्रेरणापरपर्यायो व्यापारः शाब्दी भावना । सैव च प्रवर्त्तनात्वेन रूपेण विध्यर्थ इति । अयमेव चार्थो 'ऽभिधा भावनामाहुरन्यामेव लिङादय' इति (तं॰ वा॰ ३४४) वार्त्तिकस्याभिधीयते। अनेनेति व्युत्पत्त्या ऽभिधाशब्देन शब्द उच्यते । तद्व्यापारात्मिका भावना लिङादिवाच्येति केचिदाचार्या आहुः ।

(१८९) अन्ये त्वाहुः । सत्यं प्रवर्त्तनासामान्यं विध्यर्थः तथैव शक्तिग्रहात्प्रवृत्त्यनुकूलो व्यापारः प्रवर्त्तना ऽपौरुषेये च वेदे प्रैषादेरसम्भवात्कश्चित्पुरुष-

---

३१४ अन्वयव्यतिरेकाभ्याम् ।

र्थता चेत् कुतः सापेक्षता ? यदि लौकिकवचसां प्रमाणान्तराऽधिगतगोचरत्वाद्भूतार्थानां सापेक्षत्वं दृष्टम् औषधपानादिषु, विषयो ऽपि लौकिकास्तथेति विधिमत्तद्प्यपेक्षेत । अथाऽपौरुषेयत्वान्नाऽपेक्षते ततो ऽपौरुषेयत्वमितरत्राप्यपार्थम् । अथ प्रमाणान्तरसंभवाद्भूतार्थस्य साऽपेक्षता, न विधिमतः । विध्यर्थे तदसंभवाल्लौकिकस्यापि तदनपेक्षताप्रसङ्गः ।

रुषेये तु वक्तुः कर्तुरभावान्न ज्ञानपूर्वक इति नाऽनुवादः । सापेक्षतेत्यनुषज्यते । पौरुषेयं हि वचः प्रमाणान्तरेणार्थं प्रतीत्य निर्मीयमाणं प्रमाणान्तरापेक्षं स्यान्न त्वेवमपौरुषेयमित्यर्थः । द्वितीयपक्षमाश्रित्याह-भूतार्थता चेत्किंकृता सापेक्षता ? भूतार्थत्वसापेक्षत्वयोर्न प्रतिबन्धोऽस्ति कश्चिदित्यर्थः ।

शङ्कते-यदि लौकिकवचसां प्रमाणान्तराऽधिगतगोचरत्वाद्भूतार्थानां सापेक्षत्वं दृष्टमिति वैदिकान्यपि भूतार्थानि सापेक्षाणि । तत्रोत्तरम्-औषधपानादिषु विधयो लौकिकास्तथा साऽपेक्षा इति विधिमद्वैदिकमपेक्षेत । अथ विधिमद्वैदिकमपौरुषेयत्वान्नाऽपेक्षते ततो ऽपौरुषेयत्वमितरत्रापि वैदिकभूतार्थे ऽप्यपार्थमिति । अथ प्रमाणान्तरसंभवाद्भूतार्थस्य वैदिकस्य सापेक्षता न विधिमतः । कुतः ? विध्यर्थे तदसंभवात् । प्रमाणान्तरासंभवात् । उत्तरं लौकिकस्याप्यौषधादिविधेस्तदनपेक्षत्वप्रसङ्गः । यदि मन्येत शब्दानामौत्सर्गिकी नियोगार्थता तदर्थस्वार्थता वा । तन्न । तदर्थस्वार्थानि द्रव्यगुणकर्मवचनानि न स्वार्थे केवलमेव नियोगेन घटयितुमीशत इति विनियोगमन्तराश्रयन्ते । सो ऽयमजहत्क्रियाकारकसंसर्ग एषामर्थस्य नियोगसंबन्ध इति वैदिकी स्थितिः । उत्सर्गस्याऽनपोदितस्य[1] तावदवस्थ्यात् अतो पौरुषेये नियोगविनियोगयोरबुद्धिपूर्वकत्वादनपेक्षत्वं शब्दस्य ।

[1] अनपेक्षितस्य० १ पु० पा० ।

पुरुषबुद्धिप्रभवत्वाद्धि नियोगस्य तत्सापेक्षतया तत्र सापेक्षत्वम्, अपौरुषेये वचसि। सोऽपि न केवलं बुद्ध्यन्तरनिरपेक्षः, मानान्तराविषयोऽपि। तद्ध्यपौरुषेयवचननिमित्तोऽनपेक्ष इति यतोऽसावनपेक्षत्वकारणं न मानान्तरासम्भवः। पौरुषेयता च सापेक्षत्वे हेतुः। नियोगनिष्ठेऽपि लौकिके वचसि सापेक्षत्वान्न प्रमाणान्तरसंभवः। तथा च

लोकस्तु प्रमाणेनोपलभ्यार्थमन्यतोऽनुपलभ्य[1] वा समारोप्य वचनानि रचयति। यथा 'ज्वरितः पथ्यमश्नीयात्' 'द्रुमो नमाख्यो नैरात्म्यं[2] भावयेत्' इति। न च नियोगः प्रमाणान्तरविषये समारोपविषये वा, अन्यत्रानुपलब्धेः। तद्विषयस्तु विनियोगः प्रमाणान्तरगोचरः समारोपगोचरो वा संभवति। यथोपलम्भनं च विवक्षा, यथाविवक्षितं वचनरचनेत्यौत्सर्गिकीं नियोगपरतामपहाय लक्षणया विनियोगपरतामवलम्बते, पौरुषेयं च वस्तुतः सापेक्षमिति चेद्दर्शयति—पुरुषबुद्धिप्रभवत्वाद्धि नियोगस्य सापेक्षतया तत्र सापेक्षत्वम्। अपौरुषेये तु सोऽपि विनियोगोऽपि न केवलं नियोगो बुद्ध्यन्तरनिरपेक्षः। पुरुषबुद्धिप्रभवत्वं ह्याप्तवाक्ये विनियोगस्य ज्ञेयतयाऽनाप्तवाक्ये चाऽऽरोपिततयाऽवगन्तव्यम्। परिहरति—मानान्तराविषयोऽपि भूतरूपोऽर्थो नियोग इवापौरुषेयवचननिमित्तोऽनपेक्षः। यतः पौरुषेयताऽनपेक्षत्वकारणं न मानान्तरासम्भवः। पौरुषेयता च सापेक्षत्वे हेतुः। अत्रैवान्वयव्यतिरेकौ दर्शयति—नियोगनिष्ठेऽपि लोकवचसि सापेक्षत्वात्। अयमर्थः। यदि न लौकिकं वचनं नियोगनिष्ठं भवेत् ततो वैदिकमपि न स्यात्, लोकावगतसम्बन्धस्य शब्दस्य वेदेऽपि बोधकत्वात्। अगृहीतसम्बन्धस्य तु बोधकत्वे प्रथमश्राविणोऽप्यर्थप्रत्ययः प्रसज्येत। तस्माद्यद्यपि परेषां राद्धान्ते न नियोगनिष्ठता पौरुषेयाणां वचसामपि तु विनियोगप्रधानता तथाप्यापाद्य नियोगनिष्ठत्वमेतदुक्तमिति मन्तव्यम्।

१ अर्थमुपलभ्य २ पु॰ पा॰ ।   १ नैरात्म्यम्॰ २ पु॰ पा॰ ।

सापेक्षत्वे प्रत्यक्षाऽनुमानयोः परस्परविषयसंभवात्सापेक्षत्वात्प्रमाणत्वहानिः । अतः प्रमाणान्तरोपलब्धिविषयापुरःसरप्रवृत्तित्वाद्विधिमदितरस्वाद्वा वचनं सापेक्षम्, अतथाभाद्वैदिकमुभयमप्यनपेक्षमिति चतुरस्रम् । तेन प्रमाणत्वार्थमपि न विधिविवक्षा ।

न प्रमाणान्तरसम्भवः सापेक्षत्वे हेतुः । सत्यपि तस्मिन् वैदिकस्य विनियोगस्यानपेक्षत्वात् । अत्रैव प्रसङ्गान्तरमाह—तथा च सापेक्षत्वे प्रत्यक्षानुमानयोः परस्परस्य विषयसम्भवात्सापेक्षत्वात्प्रमाणत्वहानिः । एतदुपसंहरति—अतः प्रमाणान्तरोपलब्धिविषयापुरःसरप्रवृत्तित्वाद्विधिमदितरद्वा पुरुषवचः सापेक्षम् । अतथाभावात् वैदिकमुभयमप्यनपेक्षमिति चतुरस्रम् । प्रकृतमुपसंहरति—तेन प्रमाणत्वार्थमपि न विधिविवक्षा ।

कश्चिदाह सत्यमपौरुषत्वादनपेक्षता, तदेव तु प्रमाणान्तराऽगोचरार्थतया सिध्यति । न खल्वनालिख्य बुद्धावर्थं तत्प्रत्यायनाय वचनं रचयन्ति लौकिकाः । न च प्रमाणान्तराऽगोचरो ऽर्थः शक्यो बुद्धावालिखितुम् । औत्सर्गिकी च नियोगपरता शब्दानां, नेयमसत्यपवादे शक्या निह्नोतुम् । आम्नाये नियोगस्य प्रमाणान्तराऽगोचरः शब्दैकसमधिगम्य इति तदर्थत्वादपौरुषेयता ऽऽम्नायस्य । पौरुषत्वे हि मुख्या नियोगार्थता हीयेत । अत एव वाक्यत्वादयोऽप्यागमबाधितविषया नाम्नायस्य पौरुषेयतां साधयितुमीशते । ततश्चाऽनपेक्षता । न चेयं विधा 'ज्वरितः पथ्यमश्नीया'दित्यादिषु सम्भवति, स्पष्टदृष्टेन पौरुषेयत्वेन मुख्यमपि नियोगार्थत्वमपोद्य लक्षणया विनियोगपरत्वाऽऽपादनात् । यदि पुनराम्नायस्य भूतार्थता भवेत्तदा तस्य प्रमाणान्तरयोग्यतया शक्यवचनत्वेन पौरुषेयता दुर्वारा भवेदिति प्रयत्नेन भूतार्थतामपनीय कार्यपरत्वमाम्नायस्य व्युत्पाद्यत इति ।

नन्वन्यदेवेदं शब्दप्रभवादात्मतत्त्वगोचरं ज्ञानं विधीयते । न हि शाब्दज्ञानपरिवेद्यं[1] ब्रह्मस्वरूपम् । वाक्यलक्षणो हि शब्दः प्रमाणं, पदार्थसंसर्गात्मा च तदर्थः, प्रत्यस्तमिताऽखिलभेदप्रपञ्चं चात्मतत्त्वं, तत्कथमस्य गोचरः? तस्मात्प्रलीनसकलाऽवच्छेदोल्लेखमद्वैततत्त्वाऽवभासात्मकं ज्ञानमन्यदेव शाब्दाद्विधीयते ।

तदनुपपन्नम् । सिध्येदयमं मनोरथो यदि तथाविधो विधिराम्नायगोचरः स्यात्, न त्वयं तद्गोचरः संभवतीत्युपपादितं नियोगपरीक्षायाम् । अपि चाऽयमौपनिषदोऽपि पुरुषो न प्रमाणान्तरगोचर इति कथमुपनिषदामपि पौरुषेयता दुर्वारा? तथाविधस्यान्यस्य सिद्धरूपस्य प्रमाणान्तरगोचरत्वमुपलब्धमित्यस्यापि सिद्धतयतदर्थत्वमिति चेत् । एवं तर्हि क्रियात्मनः कार्यस्य मानान्तरगोचरतेति कार्यतया नियोगस्यापि तदर्थत्वमिति तदर्थस्यापि वेदस्य पौरुषेयता दुर्वारा भवेत् । स्वरूपेण वा तस्य प्रमाणान्तराऽगोचरत्वे औपनिषदस्याऽऽत्मनोऽपि तदिति सर्वं समानमन्यत्राभिनिवेशात् । तदास्तां तावत् ।

एवं तावन्न श्रुतमयी प्रतिपत्तिर्विधानक्षमेत्युक्तम् । ननु मा नामेयं विधायि, साक्षात्कारवती तु विधायिष्यते इति चोदयति— नन्वन्यदेवेदं शब्दप्रभवाद्विज्ञानादात्मतत्त्वगोचरं ज्ञानं विधीयते । कस्मात्पुनरात्मतत्त्वगोचरत्वं न शाब्दस्येत्यत आह— न हि शाब्दज्ञानपरिवेद्यं ब्रह्मस्वरूपं, वाक्यलक्षणो हि शब्दः प्रमाणं, पदमात्रस्याऽप्रमाणत्वात् । तथापि किं? मित्याह—पदार्थसंसर्गात्मा च तदर्थः, संसर्गश्च संसृज्यमानाऽनेकार्थतन्त्रत्वादेकोऽपि नानात्वदूषितः । न चाऽऽत्मतत्त्वमेवंभूतमित्याह—प्रत्यस्तमिताऽखिलभेदप्रपञ्चं चात्मतत्त्वं, तत्कथमस्य गोचरः? उपसंहरति—तस्मात्प्रलीनस-

[1] कर्तव्य. मू. पु. ।

356

वार्त्तमेतत् । न खलु फलांशो विधिगोचरः । निष्प्रपञ्चात्मतत्त्वाऽवभासश्च फलमेव न ततोऽन्यदभीप्स्यते । मोक्ष इति चेत् । ततोऽव्यतिरेकात् । सप्रपञ्चात्मतत्त्वावऽभासो हि संसारः । निष्प्रपञ्चात्मावऽभासो हि मोक्षः स्वात्मनि स्थितिः । अन्यथा कार्य्यत्वादमोक्षात् । बन्धहेतुश्च कर्म्मादिप्रपञ्चोऽविद्या, तदुच्छेदश्च विद्यैव । यदि च न कलावच्छेदेऽलङ्ख्यमद्वैततत्त्वावभासनात्मकं ज्ञानमन्यदेव शाब्दाद्विधीयते ।

एतद् दूषयति—वार्त्तमेतत् । न खलु फलांशो विधिगोचरो, यथाह महर्षिः । 'तस्य लिप्सा ऽर्थलक्षणा निष्प्रपञ्चात्मतत्त्वावभासस्य फलमेव' । निष्प्रपञ्चेति विगलितनिखिलदुःखत्वमाह । प्रपञ्चो हि दुःखं, तत्त्वग्रहणेनाऽऽनन्दात्मतां सूचयति । बहुलमानन्दश्रुतेः फलत्वमेव दर्शयति । न ततो ऽन्यद्धीप्स्यते विगलितदुःखत्वादानन्दात्मत्वाच्च ।

चोदयति । मोक्ष इति चेत् । श्रूयते हि 'न स पुनरावर्त्तते' इति । परिहरति—न । ततो निष्प्रपञ्चाऽऽत्मतत्त्वाऽवभासाद्-व्यतिरेकात् । अव्यतिरेकमेव दर्शयति—सप्रपञ्चात्माऽवभासो हि संसारः । निष्प्रपञ्चात्माऽवभासो मोक्षः । संसारविरुद्धस्वभावो मोक्ष इति तत्स्वभावकथनाय संसारो ऽपि दर्शितः । न चाऽसौ प्रवृत्तिविषयो ऽपि, सिद्धत्वादित्याह—स्वात्मनि स्थितिः । अनेन पराऽभिमता मोक्षावस्था व्युदस्ता वेदितव्या । तद्व्युदासहेतवश्च ब्रह्मसिद्धौ प्रपञ्चिताः । यदि तु न स्वात्मनि स्थितिः, अपि तु पराऽभिमतो मोक्षस्तत्राह—अन्यथा कार्यत्वादमोक्षात् । अथाऽविद्योच्छेदः कस्मान्न भवती? त्यत आह—बन्धहेतुश्च कर्मादिरूपः प्रपञ्चो ऽविद्या, नाऽन्या । ततः किं? तदुच्छेदकश्च विद्यैव । निष्प्रपञ्चात्मतत्त्वावभा-

कथं चिदपि शब्दज्ञानविषयो ब्रह्म कथं तज्ज्ञानविधिः शक्यप्रतिपत्तिः ? विषयतश्च ज्ञाननिरूपणं, सिद्धश्च तन्निरूपयति, तत्सिद्धिश्च प्रमाणान्तराऽभावात् स्यात् । तस्यापि चेदविषयः तदसिद्धेर्ज्ञानविशेषाऽप्रतिपत्तेर्विध्यप्रतिपत्तिः । अथ कथं चित्तद्विषयः, न तर्हि शाब्दज्ञानाऽनपेक्षता । प्रतिपत्तिकर्त्तव्यतापरत्वाच्च वचनस्येदृक्ता नाऽऽगमार्थः स्यादित्युक्तम् । नाप्यार्थो ऽर्थः । अध्यारोपेणापि प्रतिपत्तेः संभवात् । अतो न नियोगाऽनुप्रवेशेन स आत्मतत्त्वमेव स, स एव च मोक्ष इति न प्रवृत्तिविषयः । अत्रैव दूषणान्तरमाह—यदि च न कथं चिदपि शब्दज्ञानविषयो ब्रह्म, कथं तज्ज्ञानविधिः शक्यप्रतिपत्तिः ? किमिति न शक्यप्रतिपत्ति? रित्यत आह—विषयतश्च ज्ञाननिरूपणम् । चो हेत्वर्थे । निरूप्यतां विषयेण, को दोष? इत्यत आह—सिद्धश्च विषयो ज्ञानं निरूपयति । सो ऽपि सिध्यतु, का क्षति? रित्यत आह—तत्सिद्धिश्च प्रमाणान्तराऽभावाच्छब्दादभ्युपेतव्या । तस्यापि चेदविषयः तदसिद्धेर्विषयाऽसिद्धेर्ज्ञानविशेषाऽप्रतिपत्तेर्विध्यप्रतिपत्तिः ।

शङ्कते । अथ कथं चित्तद्विषयः । यद्यपि तत्स्वरूपं न शब्दगोचरस्तथापि भेदप्रपञ्चविलयद्वारेण निरूपणाद्विषयभाव इत्यर्थः । परिहरति—न तर्हि शाब्दज्ञानाऽपरिच्छेद्यता । प्रथमपक्षोक्तं दूषणमत्रापि योजयति—प्रतिपत्तिकर्तव्यतापरत्वाच्च वचनस्य, ईदृशं प्रतिपत्तव्यमितीदृक्ता नाऽऽगमार्थः स्यादित्युक्तं, यत्परः शब्दः स शब्दार्थः । प्रतिपत्तिकर्तव्यतापरश्चेन्न प्रत्येतव्यत्वपर इत्यर्थः । स्यादेतत् । कर्तव्यतायाः प्रतिपत्तिगोचरत्वात्प्रतिपत्तेश्च प्रतिपाद्यविषयत्वात्कर्तव्यतैव प्रतिपत्तिं तद्विषयं[1] चाऽऽक्षेप्स्यति, ततश्च प्रत्येतव्यतत्त्वनिश्चय इत्यत आह—नाप्यार्थो ऽर्थः । कुतः? अध्यारोपेणापि प्रति-

---

१ प्रतीत्यर्थ. मू. पु. । २ कर्तव्यतैव प्रतिपत्तिस्तद्विषयम्. ब पु. पा. ।

358

वस्तुतत्त्वं प्रकाश्यते । न हि तत्र शब्दस्य प्रामाण्यम् । एवमनपेक्षतया प्रामाण्यसिद्धेः कार्य्याऽन्वयरहितभूतादिकमप्यवगमयितुमलमाम्नाय इत्यसमञ्जसमेतत् । यदि कार्य्यरूप एव वेदार्थः कथं तर्हि मन्त्राऽर्थवादाः सोपनिषत्काः? यस्माद्भूतादिकमर्थं चोदनैव गमयति । कथम्? कार्य्यमर्थमेवमवगमयन्ती भूतादिकमपि गमयति ।

पत्तिसंभवात् । सत्यं, प्रत्येतव्यमाविशति प्रतिपत्तिविषया कर्तव्यता, न तु तस्य तथात्वमपि, समारोपेणापि प्रत्येतव्योपपत्तेरित्यर्थः । इदं दूषणमुपसंहरति—अतो न नियोगाऽनुप्रवेशेन वस्तु तत्त्वं प्रकाश्यते । न हि तत्र वस्तुतत्त्वे शब्दस्य प्रामाण्यम् ।

उपसंहरति—एवं भूतार्थत्वेऽप्यनपेक्षतया प्रामाण्यसिद्धेः कार्याऽन्वयरहितः स्वरूपेणाऽपि भूतादिकमर्थमवगमयितुमलमाम्नाय इति । चोदना हीति भाष्यग्रन्थस्य निबन्धनकृतो व्याख्यानमसमञ्जसमित्याह—इत्यसमञ्जसमेतत् । सर्वनामपरामृष्टं निबन्धनकृतो व्याख्यानमाह—यदि कार्यरूप एव वेदार्थः कथं तर्हि मन्त्राऽर्थवादाः सोपनिषत्का भूतार्थाऽभिधायिन इत्याशङ्क्याऽवतारितं चोदना हीति, तस्याऽर्थमाह—यस्माद्भूतादिकमर्थं चोदनैव गमयति । यदि भूतादिरर्थश्चोदनाया न स तर्हि कार्यरूपो वेदार्थः, न चाऽनपेक्षत्याशयवान्पृच्छति—कथम्? उत्तरं—कार्यमवगमयन्ती भूतादिकमपि गमयति । द्विविधो हि शब्दः कार्याऽभिधायी लिङादिः, भूताद्यभिधायी च लडादिः । तत्र लिङादेस्तावत्कार्याऽभिधायित्वादेव तत्परत्वम् । लडादयस्तु[1] भूतादिकार्यपरतया तदन्वितमेवाऽभिदधति । ततश्च तेषामपि कार्ये तात्पर्यात्कार्यार्थत्वं सिद्धम् । तथा च भूताद्यभिधायिनामपि निरपेक्षत्वम् । यथाह नाऽन्यत्किं चनेन्द्रियमिति । इदं च व्याख्यानम्, न च प्रमाणान्तरगोचरोऽय-

1 लडादयस्तु· १ पु पा· ।

359

Digitized by Google

अन्ये तु शाब्दज्ञानविधानसंतानविधानमिच्छन्ति । तस्य संहृतनिखिलभेदोल्लेखविशुद्धविशदज्ञानफलत्वात् मित्यादिना । एतदुक्तं भवति । न कार्यसम्बन्धिना रूपेण प्रमाणान्तरेणाऽवगम्यत इति । तदिदमसमञ्जसम् । भूतार्थपरत्वे ऽप्यनपेक्षत्वेन प्रामाण्योपपत्तेः । स्यादेतत् । वृद्धव्यवहाराऽवगम्यः शब्दाऽर्थसंबन्धः । स च प्रवृत्त्यात्मकः । प्रवृत्तिश्च कार्येऽवगमपूर्विका प्रेक्षावताम्, अतः कार्य एव सर्वे साक्षात्तदन्वितस्वार्थतया वा लब्धव्युत्पत्तयः शब्दा इति कार्यरूप एव वेदार्थ इति ब्रूमो न पुनः प्रामाण्यायेति । तदप्युक्तम् अन्यथापि व्युत्पत्तेरुपपत्तेः । तथा हि । वृन्दमित्रः प्रतिपन्नदेवदत्तानन्दनिबन्धनपुत्रजन्मा देवदत्तगृहादेव वार्ताहारेण सह देवदत्ताऽभ्याशमागतः पटवासोपायनाऽर्पणपुरःसरं दिष्ट्या देवदत्त वर्धसे, ते पुत्रो जात इति वार्ताहरव्याहारसमनन्तरमुन्मीलत्पुलककपोलमुत्फुल्ललोचनयुगलमतिस्मेरं मुखमहोत्पलमवलोक्य देवदत्तमुत्पन्नप्रमोदमनुमिमीते, तत्प्रमोदजन्यहेतुश्च पुत्रजन्मविज्ञानमन्यस्य तदानीमनुपलब्धेः । वचनोच्चारणानन्तरं च तद्भावाद्वचनस्य तत्र हेतुतामवगच्छति । न चाऽसमर्थस्याऽसाविति सामर्थ्यमवैति । एवंविधविषये हर्षजनकं हेत्वन्तरं शङ्कमाना जनन्तिरशङ्कया ऽऽत्मनोऽपि ब्राह्मण्यं प्रति संदिहाना नाऽधिकारभाजो ब्राह्मणोचितासु क्रियास्विति कृतं मीमांसाऽभ्यासपरिश्रमेण तेषाम् । अपि चाऽव्युत्पन्नकाष्ठशब्दार्थोऽव्युत्पन्नविभक्त्यर्थश्च वर्तमानाऽपदेशेऽपि देवदत्तः स्थाल्यामोदनं काष्ठैः पचतीति पचत्यर्थे करणं पश्यति, तस्य काष्ठप्रातिपदिकार्थतां च प्रतिपद्यत इति सिद्धं विशदाध्यासितं वचनं कार्याऽसङ्गताऽर्थगोचरं तत्र प्रमाजननात् यद्यत्र प्रमाजननं तत्तद्गोचरं यथा रूपादिगतं चक्षुरादीति ।

सम्प्रति चिन्तामयीं प्रतिपत्तिं निराचिकीर्षुस्तामुपन्यस्यति – अन्ये तु शाब्दज्ञानविधानसन्तानविधानमिच्छन्ति । न च तत्फलरूपं येन न विधीयते, अपि तु फलस्याऽऽत्मतत्त्वसाक्षात्कारस्य साधनमतो

अत्रापि[1] नात्मरूपाऽवगतिः । ज्ञानप्रकर्षश्चाऽभ्यासनिबन्धनः प्रथितइति न चोदनार्थता । तस्माद् दृष्टार्थेषु कर्म्मसु विशेषविधयः । उपनिषदात्मतत्त्वं त्वनपेक्षविध्यन्तराद्वाक्यात्प्रतीयते । अलं वा गुरुभिर्विवादेन ।

विधातव्यमित्याह—तस्य संहृतनिखिलभेदोल्लेखविशुद्धविशदज्ञानफलत्वात् । संशयादिपर्युदासो विशुद्धिः । साक्षात्कारो विशदता । तच्च तावत्पूर्वोक्तं दोषमासञ्जयति—अत्रापि नाऽऽत्मरूपाऽवगतिः, प्रतिपत्तिविधिपरत्वाद्वेदान्तानामिति । भावनाऽऽधेयविशदाभत्वं च विज्ञानानामन्वयव्यतिरेकसिद्धमिति प्राप्तत्वान्न शाब्दज्ञानसमानज्ञानसन्तानो भावनापरनामा विधेय इत्याह[2]—ज्ञानप्रकर्षश्चाऽभ्यासनिबन्धनः प्रथित इति न चोदनार्थता युक्ता ।

ननु 'तस्माच्छान्तो दान्तः समाहितो भूत्वा ऽऽत्मन्येवाऽऽत्मानं पश्ये'दित्यादिवाक्यान्यात्मदर्शनं शान्तत्वादिगुणोपेतं विदधत्येव, न चाऽविधीयमाने आत्मदर्शनाश्रयिणो गुणा विधातुं शक्यन्ते इति शान्तत्वादिगुणविधानायाऽऽत्मदर्शनमपि विधातव्यमित्यत आह—तस्माद् दृष्टार्थेष्वेव कर्मसु विशेषविधय, उपनिषदात्मतत्त्वं त्वनपेक्षितविध्यन्तराद्वाक्यात्प्रतीयते । इदमत्राकूतम् । गुणविधयो हि भावार्थसिद्धिमपेक्षन्ते न पुनस्तद्विधानमपि तेन, यथैव रागतः प्राप्ते द्रव्याऽर्जने ब्राह्मणादीनां प्रतिग्रहादयो नियम्यन्ते तथेहापि नित्यानन्दमयमात्मतत्त्वं विगलितनिखिलदुःखाऽनुषङ्गं साक्षात्कुर्वाणैरन्वयव्यतिरेकाऽवगतध्यानसाधनस्याऽऽत्मध्याने प्रवृत्तस्य शान्तत्वादिविधिरिति । ततस्तिसृणामपि प्रतिपत्तीनां विधानाऽनर्हत्वादात्मतत्त्वप्रतिपादनपरत्वं हि वेदान्तानामुपपादितम् । सर्वं चैतद् ब्रह्मसिद्धौ कृतश्रमाणामनायाससमधिगमनीयमिति नेहाऽस्माभिरुपपादितम् ।

---

१ तथापि मू० पु० ।

२ शाब्दं ज्ञानं विधेयमित्याह—२ पु० पा०

भवतु वा प्रतिपत्तिकर्त्तव्यता[1] नियोगद्वारेणात्मतत्त्वावगतिर्लौकिकवचांसि भूयांसि भूतान्वाख्यानानीत्युक्तम् ।

ननु वैयर्थ्यमत्रोक्तम् । प्रतिपत्तिविधावपि तुल्यमेतत् । भूतार्थप्रतिपत्तेरनतिरेकात् । अथाऽविपरीतात्मप्रतिपत्तिरेव । सा भूताऽऽख्यानपर्य्यवसाने पि तुल्या । अस्तु तर्हि प्रवृत्तिनिवृत्तिपर्य्यवसायित्वमेव सर्ववचसां भूतोप्यर्थः कथ्यते । तेनाऽन्यत्र प्रवृत्तिं कर्तुं तत्रैव वा, अन्यथार्थाभावात् । न । कुतूहलनिवृत्तेरप्यर्थत्वात् । तथा

इदानीमभ्युपेत्याह—अनं वा गुरुभिर्विवादेन । अनुतराहैतासाम्यादौपचारिकं गौरवम् । भवतु प्रतिपत्तिकर्तव्यता नियोगद्वारेणात्मतत्त्वावगते,र्लौकिकवचांसि तु भूयांसि भूताऽन्वाख्यानानीत्युक्तम् । तथाप्यप्रवर्तकवचनजन्मन्यपि प्रख्यायां साम्यादिति हेतुः सिद्धो भवतीत्यर्थः । ननु नाऽप्रवर्तकं वचो, यतो वैयर्थ्यमत्रोक्तम् । परिहरति—प्रतिपत्तिविधावपि तुल्यमेतत् । कुतः ? भूतार्थ[2] प्रतिपत्तेरनतिरेकात् । यदि भूतोऽर्थः प्रयोजनाऽभावान्नाऽऽख्यातव्यस्तर्हि प्रतीतिरपि तद्विषया न विधातव्या । न ह्येतस्याः प्रत्येतव्यव्याप्तेरन्यत् फलमस्तीत्यर्थः । अथाऽविपरीताऽऽत्मप्रतिपत्तिरेवार्थः प्रतिपत्तिविधेः । प्रतिपत्तिविधिपक्षे तावदयमर्थो न भवतीत्युक्तम् । अभ्युपगम्य परिहारान्तरमाह—सा प्रतिपत्तिर्भूताख्यानपर्यवसाने ऽपि तुल्या ।

पुनश्चोदयति- अस्तु तर्हि प्रवृत्तिनिवृत्तिपर्यवसायित्वमेव सर्ववचसां भूतो ऽप्यर्थः कथ्यते । तेनाऽन्यत्र प्रवृत्तिं कर्तुं तत्रैव वा, ऽन्यथा ऽर्थाभावात् । इदमत्राऽऽकूतम् । सर्वो हि शब्दः परार्थमुच्चार्यते प्रेक्षावद्भिः, परश्च तमेवाऽर्थं प्रतिपद्यते यस्तेन प्रतित्सितः, यस्तस्य हेय उपादेयो वा, उपेक्षणीयप्रत्यायने प्रेक्षावत्त्वव्याघातात् ।

---

१ ध्यानविषयतापर्यत· मू· पु· ।

२ तुल्यमेतत । न । भूतार्थ २ पु· पा· ।

हि । अजिहासिताऽनुपादित्सितदूरदेशराजसंज्ञाचरितगोचराः कुतूहलिनां दृश्यन्ते प्रश्नाः। कुतूहलनिवृत्तिपराणि च तज्ज्ञानां वचांसि। अटवीवर्णकादयः प्रवृत्तिनिवृत्तिशून्या भारतादिषु भूतपर्य्यवसायिनो रूपादेव प्रीतिहेतवः, प्रीत्युत्पत्त्यर्थं चेष्टाख्यानानि न प्रवृत्तये निवृत्तये वा श्रोतुरित्यलमतिप्रसङ्गेन ।

विशेषतस्तु वेदराशेः स्वाध्यायाऽध्ययनविधिसमयसमासादितपुरुषार्थविशेषभावस्य । तेन भूतार्थप्रतिपत्तेर्भवतु नाम शब्दस्य कारणत्वं, किंतु शब्दस्य प्रवृत्तिनिवृत्तिपरत्वमिति । परिहरति—न । कुतूहलनिवृत्तेरप्यर्थत्वात् । एतदेव दर्शयति—तथा हि । अजिहासिताऽनुपादित्सितदूरदेशराजसंज्ञाचरितादिगोचराः कुतूहलिनां दृश्यन्ते प्रश्नाः । कुतूहलनिवृत्तिपराणि च तज्ज्ञानां वचांस्यटवीवर्णकादयश्च प्रवृत्तिनिवृत्तिशून्या भारतादिषु भूतपर्यवसायिनो रूपादेव प्रीतिहेतवः । प्रीत्युत्पत्त्यर्थे च चेष्टा[1]ऽऽख्यानानि न प्रवृत्तये निवृत्तये वा श्रोतुरित्यलमतिप्रसङ्गेन । इदमत्राकूतम् । प्रेक्षावन्तो न प्रवृत्तिनिवृत्तिविषयमेवार्थमवगमयन्ति, अपि तु प्रयोजनवन्तम् । प्रयोजनवत्ता च क्व चिदर्थस्वरूपप्रत्ययोत्तरकालाभ्यां प्रवृत्तिनिवृत्तिभ्यां परिसमाप्यते, क्व चिदर्थस्वरूपप्रत्ययेनैव । तदुक्तम्-कुतूहलनिवृत्तेरप्यर्थत्वादिति । एवं ब्रह्मस्वरूपमप्यपहतपाप्मत्वानमायमौपनिषदं स्वयमेव पुरुषार्थं इति स्वाध्यायविध्यविरोधान्नोपनिषदां प्रवृत्तिनिवृत्तिपरतेति साम्प्रतम् । नन्विदं क्रिया साधनयोगिनी समाऽन्यस्मिन्निति न प्रतिभाया आलम्बनम् । न च निरालम्बनेयम् । तत्पारिशेष्यात् हितोपायताविषयेति ।

यदुक्तं स्वरविशेषाद्राश्रयविशेषात् शिशुशकुन्तादीनां पूर्वपूर्वशब्दभावनाऽनुगमाद्विप्रकृष्टशब्दव्यापारा प्रतिभा प्रवृत्तिनिबन्धनं नोपा-

---

१ दृष्ट॰ २ पु॰ प॰

शिशुशकुन्तादीनां यथा विप्रकृष्टः शब्दो निमित्तम् भावनाऽनुगमात् प्रतिभायाः, तथा तादृशमेवोपायज्ञानं प्रवृत्तिनिवृत्तिमुखेन किं नेष्यते? जातिविशेषादयश्च शब्दभावनाया इवोपायज्ञानभावनायाः प्रबोधकाः।

ननु प्रतिभालम्बनस्य स्वरूपतोऽनिष्पत्तेः शब्दज्ञानाकारेणैव निरूपणा। न च प्रत्युत्पन्नः शब्दोऽस्ति। तदस्याश्रयणीया भावना। नैतत्सारम्। अनिष्पत्तिर्हि अ-
यज्ञानमिति, तत्राह—शिशुशकुन्तादीनां यथा विप्रकृष्टः शब्दो निमित्तं भावनानुगमात्प्रतिभायाः, तथा तादृशमेवोपायज्ञानं प्रवृत्तिनिवृत्तिनिबन्धनं भावनाऽनुगममुखेन किं नेष्यते? किं विप्रकृष्टशब्देन? उपायज्ञानस्यैव प्रवृत्तिहेतुतया अन्यच्च स्वाऽनुभवसिद्धत्वात्। यथा चैतत्तथोपरिष्टाद्वक्ष्यते। यदि मन्येत उपायज्ञानाऽऽहिता चेद्भावना प्रवृत्तिहेतुः तथाऽनुभूतचरशकुन्तजन्मनो मनुष्यस्यापि किमिति न तथा प्रवृत्तिरित्यत आह—जातिविशेषादयश्च शब्दभावनाया इवोपायज्ञानभावनायाः प्रबोधकाः। अथ शब्दभावनापि किमिति न तथा? जातिविशेषादृष्टादिति चेत्। उपायज्ञानभावनायामपि तुल्यमेतदित्यर्थः।

अथ चोदयति—ननु प्रतिभालम्बनस्य समीहितोपायस्य क्रियाविशेषस्य स्वरूपतोऽनिष्पत्तेर्नाऽऽलम्बनम्। न च निरालम्बनं ज्ञानमित्युक्तं भवतैव, अतः शब्दज्ञानाकारेणैव निरूपणा। न च प्रत्युत्पन्नशिशुशकुन्तादीनां शब्दोऽस्ति। तदवश्याऽऽश्रयणीयाऽपूर्वशब्दभावना। परिहरति—नैतत्सारम्। विकल्पाऽनुपपत्तेः। तत्र तावद्विकल्पयति—अनिष्पत्तिर्हि वर्तमानत्वाद्वाऽनेकार्थसमाहारादेकात्मभावाद्वा प्रतिभालम्बनस्योच्यते। वर्तमानविषयं खलूपायज्ञानं न प्रवर्तयति प्रवृत्तविषयत्वात्। अतोऽनागतविषयमेषितव्यम्। तथा

वर्तमानत्वाद्वा ऽनेकार्थसमाहारा,देकात्मभावाद्वा प्रति-भालम्बनस्योच्यते । शब्दे ऽप्यसौ तुल्या । सो ऽपि तत्प्रतीतो वर्णसमाहारात्मको नैकः समस्ति । भेददर्शना-ऽभावात्, अभेददर्शनाच्चेत्युक्तम् ।

चाऽसत्त्वनिष्पत्तिः प्रतिभालम्बनस्य । अथ वा प्रतिभाविषयस्य पदार्थसंसर्गात्मकत्वात्तस्य चैकस्याऽनुपपत्तेः परस्परव्यवच्छिन्नक्रियाकारकाऽनेकार्थसमाहारभावत्वात् । न चाऽनेकात्मकमेकं भवितुमर्हति, अनेकेषामप्येकत्वप्रसङ्गात् । तथा च न संसर्गः । नानात्वे च संसर्गिण एव । तथा च न संसर्ग इत्यन्ताभावो निष्पत्तिरित्यर्थः । तदेतदुभयं परपक्षे तुल्यमित्याह—शब्दे ऽप्यसौ तुल्या । सो ऽपि ह्यप्रतीतो वर्णसमाहारात्मको नैकः समस्ति ।

ननु वर्णव्यतिरिक्तः स्फोटात्मा शब्दः परैरभिमतः, स चैक इति स युक्तः प्रतिभालम्बनमिति शङ्कां निराचिकीर्षुः स्फोटनिराकरणपराणि सिद्धवद्भाष्याक्षराणि पठति—भेददर्शनाऽभावादभेददर्शनाच्चेत्युक्तं भाष्यकृता । वर्णेभ्यो भिद्यते इति भेदः स्फोट उच्यते । तद्दर्शनाऽभावात् । भेददर्शनाऽभावात् । न जातु गौरिति चतुर्थ्यामपि बुद्धौ क्रमभेदवदनुभवकर्मतो ऽप्रश्लिष्टवर्णचयाऽवगाहिन्यामन्यो वर्णेभ्यः कश्चिदाभासते । यद्युच्येत जरा राजेति तत्त्वे ऽपि वर्णानामर्थधीभेदादन्यो वर्णेभ्यो वाचकः, स च स्फोट इति, तत्राह—अभेददर्शनाच्च । भिद्यन्त इति भेदाः, न भेदा अभेदा वर्णास्तेषां दर्शनात् । एतदुक्तं भवति, न तु जरा राजेति पदयोरपि बुद्ध्योर्वर्णाऽतिरिक्तौ परस्परविभिन्नवाचकौ चकास्तः, किं तु त एव वर्णाः क्रमभेदवदनुभवाहितसंस्कारभेदा भासन्ते, ते च स्फोटधीभेदमाधास्यन्ति । अवश्याभ्युपेतव्यत्वादनवयवपदवादिनामपि संस्कारभेदस्येति दिङ्मात्रमत्र सूचितमाचार्यमतमनुवर्तमानैः ।

नन्वेवंजातीयकेष्वेवाऽभेदवस्तुबुद्धेरेकशब्दात्मकमु-
पागमन्। न ह्यवस्तुषु संसर्गसमूहात्यन्ताऽसदादिषु संस-
र्गिषु वा नानात्मस्वेकवस्तुप्रतिभासः संभवति। विनैकस्य

पुनः प्रकारान्तरेण परः प्रत्यवतिष्ठते—नन्वेवंजातीयकमेवा-
भेदवस्तुबुद्धेरेकशब्दात्मकमुपागमन् धीराः। तथा हि। क्रियाका-
रकगुणगुणिप्रयोजनप्रयोजनिप्रभृतिषु संसर्गिषु समूहिषु वा शिंशपा-
ऽशोककिंशुकादिषु संसर्गः समूहश्चैको वस्तुभूतश्चकास्ति, चकासति
वा शशविषाणाऽऽकाशवकादयो वस्तुभूताः। सेयंविधेष्वेकबुद्धिर्व-
स्तुबुद्धिश्चैकमनवयवशब्दात्मानमेवाऽवलम्बते।

अथ संसर्गादय एव तद्वन्तो वा एकबुद्धेर्वस्तुबुद्धेश्च कस्मा-
न्नाऽऽलम्बन? मित्यत आह—न ह्यवस्तुषु संसर्गसमूहाऽत्यन्ताऽसंसर्गिषु
वा नानात्मस्वेकवस्तुप्रतिभासः संभवति। संसर्गादयो हि न परमार्थ-
सन्तः संभवन्ति। तथा हि प्रसङ्गसाधनम्। यदनेकवृत्ति तन्नाना तद्य-
था भिन्नभाजनगतानि तालफलानि। अनेकवृत्तिश्च पराभ्युपगतः संस-
र्गादिरिति स्वभावहेतुः। नानात्वाऽभावाच्चाऽनेकवृत्तित्वाभाव इत्य-
तिप्रसङ्गविपर्ययो व्यापकाऽनुपलब्धिः। न चैकत्वाऽनेकवृत्तित्वयोरवि-
रोधात्संदिग्धो व्यतिरेक इति वाच्यम्। अविरोधाऽसिद्धेः। तथा हि।
एकस्य सत्त्वं विरोध्यभावेन व्याप्तं तद्विरुद्धश्चेह विरोध्ये व्यापकवि-
रोधोपलब्ध्या भाविकमेकत्वं निवर्तयति। तथा चैकत्वाऽभावात्सं-
सर्गिण एव न संसर्गः। तथा हि। एकस्मिन्संसर्गिणि परिच्छिद्यमाने
तदभावो व्यवच्छिद्यते। तदभाववन्तश्चाऽन्ये संसर्गिण इति ते ऽपि
व्यवच्छिद्यन्ते। अन्यथा ऽसौ संसर्गाऽपरिच्छेद्यो न स्यात्। तथा
तत्संसर्गिसम्बन्धं च स्वभावे संसर्गस्य परिच्छिद्यमाने तत्संसर्गिस्वभा-
वाऽभावो व्यवच्छेतव्यः। तदभाववन्तश्च संसर्ग्यन्तरसम्बन्धस्वभावा
इति ते ऽपि व्यवच्छेतव्याः। तदव्यवच्छेदे स एव तत्स्वभावः स

शब्दात्मनः प्रत्यासात् परिणामाद्विवर्त्ताद्वेति । न । अन्यथा-एवाऽनन्यस्वभावश्चेति विरुद्धमापद्येत । सो ऽयं तद्देशत्वातद्देशत्वल क्षणविरुद्धधर्माध्यासः । तदाह देशकालाऽवस्थाविशेषनियतैकसंसर्ग-व्यवच्छिन्नस्वभावान्तरविरहादनेकवृत्तेरेकस्य तद्देशादिविशेषवत्ता ऽन्ये-न योग इति । अपि च स्मृतेव संसर्गिणि गृह्यमाणे तद्गतः संसर्गोऽपि गृह्येत, तेनैव स्वभावेन संसर्गान्तरेष्वप्यस्तीति तान्यपि ग्रहीतव्यानि । न च तानि गृह्यन्ते, इति संसर्गोऽपि न गृह्येतेति सो ऽयं ग्रहणा-ऽग्रहणलक्षणो विरोधः । तथा नानासंसर्गिषु वर्तमानः संसर्गो भा-गशो वर्तते, कार्त्स्न्येन वा? न तावद्भागशो, निर्भागत्वात् । सभा-गत्वे वा ऽनवस्थापातात् । नापि कार्त्स्न्येन, संसर्गान्तरे तदभाव-प्रसङ्गात् । न च प्रकारान्तरमस्ति, तयोरन्यतरनिषेधस्याऽन्यतरवि-धिनान्तरीयकत्वात् । तस्मान्न संसर्गसमूहो परमार्थसन्तो । एतेन-ऽवयविसामान्यादयः प्रत्युक्ता वेदितव्याः । गवयविषाणादेस्त्वाऽसत्त्वं प्रसिद्धतरमेवेत्यभिप्रायः ।

न चैष संसर्गादिबाधकप्रकारः पदे निरवयवे समस्तीत्याह—विनैकस्य शब्दात्मनः प्रत्यासात्परिणामाद्विवर्त्ताद्वा । प्रत्यासो ऽध्या-सः । यथा वस्तुनः स्वच्छधवले लाक्षारसावसेकतिरस्कृतधवलिम्नि स्वच्छीयसि स्फटिकमणौ तदीयस्तया लाक्षालक्तकद्रव्यारञ्जिताल्लाक्षागु-णाऽऽरोपेणाऽरुणः स्फटिकमणिरिति मतिरध्यासः । तथा नानाप-दार्थेषु तिरस्कृतभेदेषु तस्य स्फोटात्मनस्तात्त्विकमेकत्वमारोप्यैको वाक्यार्थः संसर्गात्मेति । समूहेषु च किंशुकादिषु च तिरस्कृतभे-देषु वनमिति वा समूह इति वा पदस्य तात्त्विकमेकत्वमारोप्यैक-त्वबुद्धिः । एवं गवयविषाणादिष्वसद्भूतेषु गवयविषाणमित्यादिपदगत-सत्त्वाऽध्यारोपेण प्रतीतिरिति प्रत्यासार्थः । परिणामो ऽपि यथैकं सुवर्णतत्त्वं कटकमुकुटकर्णिकाङ्गुलीयादिभेदेन विपरिणमते तथा

सिद्धेः। संसर्गस्तावद्वाक्यार्थलक्षणः कारकोपसर्जनक्रियाप्रधानो ऽतुल्यप्रधानसंसर्गी ।

शब्दतत्त्वमपि नानापदार्थरूपेणेति । एतस्मिंश्च दर्शने भेदानां कथंचित्पदतत्त्वाद्भिन्नानां पारमार्थिकत्वम् । एवं स्फुरणमात्रेण चाऽस्य पक्षस्योपन्यासः । विवर्तस्तु यथा मुखमेकमनेकेषु मणिकृपाणदर्पणादिषु सद्भूतेषु विवर्तमानं तच्छायापत्तौ विभिन्नवर्णपरिमाणदेशं चकास्ति, न तु तत्र तत्त्वतो भिन्नवर्णपरिमाणदेशानि मुखानि सन्ति, एवमनाद्यविद्यावासनोपधानवशात्पदतत्त्वमेकमनेकपदार्थात्मना प्रथते, न तु पदार्थास्ततो विभिद्यमानात्मानः परमार्थतः सन्तीति । एते प्रत्यासपरिणामविवर्तौ मतभेदेन मन्तव्या इति ।

परिहरति—न । अन्यथासिद्धेः । तामेवाह—संसर्गस्तावद्वाक्यार्थलक्षणः कारकोपसर्जनक्रियाप्रधानो ऽतुल्यप्रधानसंसर्गी । अयेदमाकूतम् । यत्तावदिदमुक्तम् अनेकवृत्तित्वान्नानात्वमिति, तदनेकवृत्तित्वस्यैकवृत्तित्वेनापि सह संभवात्संदिग्धव्यतिरेकतया नानात्वेन प्रतिबन्धासिद्धेरयुक्तम् । न चैकस्य नानावृत्तित्वस्तद्देशत्वाऽतद्देशत्वलक्षणो विरोधः संभवति । सह संभवात् । युक्तमेतत् । यद्वस्तुनि परिच्छिद्यमाने तदभावो व्यवच्छिद्यत इति स्वाऽभावव्यवच्छेदरूपत्वेन भावानां तदव्यवच्छेदे परिच्छेदाऽनुपपत्तेः, भावपरिच्छेदात्मकत्वात् तदभावव्यवच्छेदस्य । अथ संसर्गान्तरं कस्माद्व्यवच्छिद्यते? तदभावत्वादिति चेत् । तदेव कुतः? प्रत्यक्षेण तादात्म्येनाऽप्रतिभासनात् । अन्यथैकसंसर्गवत्संसर्गान्तरमपि प्रथेत । यथाह तत्परिच्छिनत्ति ततो ऽन्यद् व्यवच्छिनत्तीति । त एव तर्हि परस्पराऽभावात्मानो न ये प्रत्यक्षेण कदाचिदपि परस्परसंकीर्णाः प्रत्यवभासन्ते । संसर्गः पुनरयं नानापि संसर्गिष्वभिन्नः प्रत्यक्षेण न विरोधमधिरोहति ।

स विज्ञेयः कथार्थस्यापि सूचकः । विष्कम्भको द्विधा ज्ञेयः शुद्धः संकीर्ण एव च, शुद्धो मध्यमपात्रेण संकीर्णो मध्यमाधमैः, संस्कृतोक्त्या च शुद्धः स्यात्संकीर्णो नीचभाषया" इति । अत्र च मध्यमपात्रप्रयोजितसंस्कृतमयत्वाच्छुद्ध एव ज्ञेयः ॥ अस्यावश्यकत्वं वन्दिप्रवेशसूचकतया । यथोक्तं सङ्गीतकल्पतरौ । "असूचितस्य पात्रस्य प्रवेशो नैव युज्यते । ततो विष्कम्भकेणास्य प्रवेशं रचयेद्बुधः" इति । तथा च केनासादिवृत्तान्तवर्णनस्य नाटकवृत्तानुपयोगितया नीरसतया त्याज्यम् । यथोक्तं दशरूपके "अपेक्षितं परित्यज्य नीरसं वस्तु विस्तरम् । यदा सन्दर्शयेच्छेषं कुर्याद्विष्कम्भकं तदा" इति ॥

इति शुद्धविष्कम्भकः

वयस्य मित्र गजेन्द्रदन्तानां याः स्निग्धाः चिक्कणाः शलाकाः तासां सङ्घेण निर्मितेषु मञ्चेषु आसीनाः उपविष्टाः इमे राजानः कुङ्कुमेन कृतः अङ्गरागो यैस्ते तथाभूतास्सन्तः । अमलेन स्वच्छेन स्फाटिकेन निर्मिताः ये प्रासादाः, तेषां शिखरेषु आसङ्गिनः आरूढाः कनकसिंहा इव राजन्ते शोभन्ते । कान्तिसाम्येन कनकोपमानता पौरुषातिरेकसाम्याच्च सिंहोपमानतेति ध्येयम् । पुनः अमुग्धः चिरपरिणतो यो दुग्धसागरः, तस्य या लहर्यः तासां शिखराणि अवलम्बन्ते ये ते तथाभूताः । अभिनवोद्गतः अचिरोदितस्य निशाकरस्य बिम्बस्य मण्डलस्य प्रतिबिम्बा इव शोभन्ते ॥

(पृ. ११) मञ्चावलीं वर्णयन्नाह- स्वांस्वामिति । स्वांस्वां स्वकीयाम् । तत्तदीयत्वेन नियमितामिति यावत् । दिशं श्रितवतामुपतिष्ठतां राज्ञां निवहेन समूहेन आकलितमधिष्ठितं मञ्चावलीवलयं मञ्चपंक्तिमण्डलं विभाति शोभते ॥ किमिव शोभत इत्यपेक्षायामाह सीतेत्यादिना । सीतायाः स्वयंवरस्य विलोकने यत् कौतुकं कुतूहलं तेन तत्कारणात् पुञ्जीकृता आकृतिर्यस्य तत् तथाभूतम् । एकीभूतमिति यावत् । दिशां दशदिग्भागानां चक्रवालं मण्डलमिव ॥ दशदिशोऽप्यद्भुतजानकीस्वयंवरविलोकनोत्कण्ठिताः यथावस्थानमनवलोकनसमर्था इत्यत एकीभूताः राजमण्डलरूपेणेति भावः । राजानश्च दिक्पालसमानसमारम्भा इति ध्वनितम् ॥ उत्प्रेक्षाऽत्रालङ्कारः । वसन्ततिलकं वृत्तम् ॥ २८ ॥

पुनरपि मञ्चान् नृपांश्च वर्णयन्नाह-नटतीति । नराणां जनकराजपुरुषाणां कराग्रेषु व्ययं लग्नं यत् सूत्रं तस्य अग्रेषु प्रान्तेषु लग्ना द्विपदशनशलाकामञ्चरूपा पाञ्चालिका गजदन्तनिर्मितमञ्चरूपा पुत्तलिका । "पांचालिका पुत्रिका स्याद्वस्त्रदन्तादिभिः कृता" इत्यमरः । इयमग्रवर्तिनी नटति नृत्यति । कथमिव ? त्रिपुरमथनस्य शिवस्य यच्चापः तस्य आरोपणे उत्कण्ठितानां सोत्साहानां क्ष्माभृतां नृपाणाम् अनिरम्भवती अतिव्यग्रा चित्तवृत्तिरिव ॥ स्वयंवरे नृपतिभिरधिष्ठिताः सर्वे मञ्चाः एकसूत्रलग्नाः राजपुरुषैः तथा रङ्गभूमौ

भ्राम्यन्ते यथा इत्थं नृपाः अक्लेशेनैव सकललोकालोकिताः भवेयुरिति शिष्टाचारः । तदेव भ्रामणमत्रोत्प्रेक्ष्यते । यथा दारुमयी पुत्तलिका अन्यैर्नर्त्यते तथैव सर्व्वा अपीति भावः ॥ तथा च नृपाणां चित्तवृत्तिरपि उत्कण्ठया नृत्यतीति । यथैव त्वं तथैव सर्व्वा अपीत्याशयः ॥ अत्र रूपकोत्प्रेक्षयोरङ्गाङ्गिभावः सङ्करः, मालिनी वृत्तम् ॥ २६ ॥

सीतायाः करग्रहे या वासना उत्कण्ठा सैव या वसन्तलक्ष्मीः मधुमाससमृद्धिः तया विलसन्ति यानि पुलकान्येव मुकुलानि पुष्पाणि तेषां यज्जालं पटलं तेन मण्डितं शोभितं निजबाहुरूपचूतवृक्षं विलोकयन् मुहुर्मुहुर्गौरवेणावलोकयन् तिष्ठति ॥

निजयश एव यः परिमलः सुगन्धः तेन प्रमोदिताः हर्षिताः, ये चारणाः यशोगायका एव चञ्चरीकाः भ्रमराः तेषां यः चयः समूहः तस्य कोलाहलेन यशोगानेन मुखरितः शब्दायमानः दिशां चक्रवालम् मण्डलं येन स एवम्भूतः क्ष्मापालः नृपः कुन्तलस्य तन्नाम्नो देशस्य अलङ्कारो भूषणं मल्लिकापीड इति नाम्ना ख्यातः । नूपुरकोलाहलप्रतिपालनायैव यशःपरिमलेति रूपकोपन्यासः ॥

दूरम् अपसारितं कटकं याभ्याम् अतश्च प्रकटितः धनुर्गुणाकर्षणजनितः यः किणः मांसग्रन्थिः स एव या कृष्णा लेखा सैव मण्डनं ययोस्ते तथाभूते भुजदण्डे ॥

(पृ॰ १२) कुबेरदिक् उदीचीदिगेव या अङ्गना स्त्री तस्याः यो ललाटतटः । परिसरभूमिरिति यावत् । तस्मिन् विलासलम्पटः तद्विलासचतुरः काश्मीरस्य तन्नाम्नो देशस्य तिलको भूषणम् ॥ पक्षे उत्तरदिग्रूपाङ्गनायाः ललाटे काश्मीरस्य कस्तूरिकायाः तिलकः ॥

निजप्रताप एव यो दिनकरः तस्य यः उद्गमः उदयः तस्य तद्धेतुभूतः । कारणीभूत इति यावत् । यः पूर्वगिरिः तस्य शिखरस्य सहचरं समानशीलोऽयम् ॥

निजप्रतापस्य या प्रभा कान्तिः तस्य पटलेन समूहेन पिञ्जरितः पिङ्गीकृतः मलयाचलस्य नितम्बतटः येन एवम्भूतः काञ्च्याः तन्नाम्नो देशस्य मण्डनं भूषणम् ॥

हर्षेण उल्लसत् उद्गच्छत् यत् पुलकं तेन विसंष्ठुलम् अस्थिरीकृतं यत् कपोलस्थलं तस्मिन् चलितं यत् कुण्डलं तद्युग्मं यत् संवेशनं धारणं (आकर्णाकृष्टहरधनुःशिञ्जिनीकत्वेन) तस्य पदेशेन तन्मिषेण प्रकटितो हरशरासनमेव यः कर्णपूरः तस्मिन् मनोरथः येन स तथाभूतः । कर्णान्ताकृष्टशिञ्जिनीकं धनुः कर्णपूरीकरिष्यामीति तस्य मनोरथ इति भावः ।

असमः अद्वितीयो यो रण एव महार्णवः समुद्रः तस्मिन्नेकः अद्वितीय एव मकरः तत्सदृशः अकुतोभयसञ्चरणशील इति यावत् ।

अमलः स्वच्छो यो मलयजरसः चन्दनद्रवः । तेन धवलितो यो भुजदण्डः तेन विडम्बिता अनुकृता भुजङ्गराजस्य सर्पस्य श्रीः शोभा

येन स तथाभूतः । स्मररिपोः शिवस्य शरासनं धनुः शिरीषकुसुमवदतिशयेन सुकुमारम् अतिकोमलं लघु कलयन् । निजशौर्यातिरेकेणेति भावः ।

विमलया स्वच्छया मुक्तावल्या विराजमानः शोभमानो वक्षस्तटः उरस्थलं यस्य स एवम्भूतः । पुनः तुङ्गः उत्तुङ्गः भुज एव तरङ्गो यस्य सः ॥ (अत्र सर्वत्र मञ्जीरकोलाहलो नामानुगुणान्येव विशेषणानीति ध्येयम्) ॥

(पृ· १३) अलमनेनेति । कृतं राज्ञां वर्णनेनेत्यर्थः । प्रकृतं जनकानुज्ञातं स्वाधिकारम् जनकप्रतिज्ञाख्यापनरूपमिति यावत् ॥

जनकप्रतिज्ञामेव ख्यापयति—आकर्णान्तमिति । त्रिपुरमथनः शिवः तस्य उत्कटकोदण्डे विपुले धनुषि नद्धां बद्धां मौर्वीं ज्यां यः कोऽपि इह अत्र आकर्णान्तं कर्षति तस्य परिसरभुवं प्रान्तभूमिम् । समीपमिति यावत् । अयोनिजा राजपुत्री जानकी । कूजन्ती या काञ्ची जघनरशना तया मुखरं शब्दायमानं जघनं यस्याः सा एवम्भूता सती । श्रोत्रनेत्रयोरुत्सवाय हर्षाय भविता । काञ्चीशब्देन श्रोत्रस्य रूपलावण्यादिभिर्नेत्रस्योत्सव इति भावः । मन्दाक्रान्ता वृत्तम् ॥ ३० ॥

अमी नरेन्द्रा इत्यागामिना सम्बन्धः ॥ कामारीति । कामारेः शिवस्य यत् कार्मुकं धनुः । तस्य कर्षणे यत् कौतूहलं तस्य ऊर्मिकल्लोलः । तेन रोमाञ्चिता अत एव द्विगुणपीवरा उत्साहेन मांसलीभूता बाहुदण्डाः येषां ते तथाभूताः । पुनः सीतायाः यः करग्रहः तस्मिन् मिलत् यत् कुतुकं हर्षः तेन अतिमात्रं निर्भरं यथा स्यात्तथा विस्तीर्यमाणानि उत्साहेन प्रफुल्लानि हृदयानि येषां ते तथाभूताः परितः समन्तात् नरेन्द्राः सन्ति इति त्वया पश्यतामिति सम्बन्धः । वसन्ततिलकं वृत्तम् ॥ ३१ ॥

समसमये एकस्मिन्नेव काले यत्सञ्चरणं धनुरागमनाय उत्थानं तेन मिलन्ति यानि कपोलतलानि तेषां यः संघट्टः घर्षणं तेन मसृणं कोमलं यथा स्यात्तथा रणन्ति रणरणायमानानि मणिकुण्डलानि यस्य तत् तेन तथाभूतेन राजमण्डलेन ॥

एतेषां राज्ञाम् अन्योन्यसंघट्टमानानि यानि केयूराणि तेभ्यः समुच्छलन्तो ये कनककणाः तन्मिषेण । केयूरेभ्यो ये कणास्ते नृपप्रतापाग्निविस्फुलिङ्गा एवेति भावः ॥

राज्ञां धनुरुत्थापनायासविफलत्वमाह—पङ्क्त्येति । सुभटैः वीरैः नृपतिभिः भक्तिरेव स्फुटभावं गमिता प्रकटिता । धनुषीति शेषः । न तु शक्तिः वीर्यं स्फुटभावं गमितेत्येवं सर्वत्राभिसन्धिः । धनुर्गौरवबहुमानेन अञ्जलिः भक्तिसूचको विरचितः न तु मुष्टिः धनुषीति सर्वत्रानुषज्यते । मौलिरेव स्वशिर एव नमितः लज्जातिरेकात् न तु चापः ॥ स्वागता वृत्तम् । तल्लक्षणं च—"स्वागतेति रनभाद्गुरुयुग्मम्" इति ॥ ३२ ॥

Digitized by Google

(पृ॰ १४) आरम्भरमणीयो निष्फलावसान इति भावः । संरम्भः प्रोत्साहः ॥

उर्वीतलस्य निर्वीरत्वं विभाव्य मञ्जीरकस्य विषादः ॥

आद्वीपादिति । द्वीपान्तात् आ परतोऽपि द्वीपान्तात् अमी सर्वे नृपतयः समागताः । कोऽपि नावशिष्यत इति भावः । इयं कन्या जानकी च कलधौतं कनकं ("कलधौतं रौप्यहेम्नोः" इत्यमरः) तद्वत् सलावण्या अथ च कोमला मृदुला मधुरा इति यावत् । रुचिः कान्तिर्यस्याः सा तथाभूता चम्पकवर्णा लावण्यवती च । सर्वथा कमनीयेति भावः । कीर्तिः शैवधनुर्भञ्जनयशश्च लाभास्पदम् सर्वथाऽभिलषणीया ॥ सत्यप्येवं इदमपवर्ति धनुः केनापि नाकृष्टं, नापि टात्कृतं किञ्चिदप्याकर्षणेन शब्दायितं, नापि नमितम् । किं बहुना । स्थानादपि न चालितमिति अहो इति खेदे । किमधुना । उर्वीतलं जगन्मण्डलं निर्वीरम् जातमिति शेषः ॥ शार्दूलविक्रीडितं वृत्तम् ॥ ३३ ॥

अलीकवैतालिकः दुर्वैतालिकः । केवले जीर्णधनुरानमनविषये निर्वीरं भूमण्डलं किम् । अतोऽपि अधिकतरवीर्यकर्माणः सन्त्यस्मादृशाः तत्किमत्रैव निर्वीरं भूमण्डलं व्यपदिशसीति भावः ॥

महीतले चलतो राज्ञो रथस्य चक्रेषु यो रवः शब्दः तद्वत् कर्कशः दुःश्रवः ॥ भावि रावणागमनस्य अशुभत्वाद्राहुसाम्यम् ॥

प्रच्छन्नरूपो रावणोऽयमिति सकलदेशदर्शिनोऽपि मञ्जीरकस्य अपरिचयो युक्त एवेति न कश्चिद्विरोधः ॥

पुरुषः प्रच्छन्नरूपो रावणः । आटोपेन गौरवेण सहितं साटोपम् । वैतालिकेष्वपसदो नीचः । तत्सम्बुद्धौ । कतिपयासु स्वल्पसंख्याकासु ग्रामटिकासु क्षुद्रग्रामेषु पर्यटनेन दुर्विदग्धः अपटुः तत्सम्बुद्धौ । संवरणीयं गोपनीयं स्वनाम दशकण्ठ इति । निर्वाहयामि दर्शीति हठादुक्तमन्यथा सफलयामि । दश दिश एव या विलासिन्यः तासां कर्णपूरीकृतः कीर्तिरूपो निजयशोरूप एव पल्लवो यस्य स तं त्रिभुवने वीर इति नामधेयं यस्य स तं त्रिभुवनैकवीरम् । यथा कूपस्थो मण्डूकः सागरमजानन् कुतश्चित्तस्य नामोपश्रुत्य तमविख्यातं मन्यते तथा त्वमपि अशेषदिग्विख्यातं मामविख्यातमपदिशसीति भावः ॥ कर्णान्ते निवेशनीयाः सुश्राव्याः गुणाः यस्य तत्तथाभूतं कन्यैव रत्नम् । कर्णान्तपर्यन्तं निवेशनीयः कर्षणेन आनमयितव्यः गुणः यस्य तत्तथाभूतं कार्मुकं धनुश्च ॥

(पृ॰ १५) चरमं पश्चात् । धनुरानमनानन्तरमिति यावत् ॥ राशिचक्रपाठकानां ज्योतिर्विदामित्यर्थः । मेषादिराशिगणनायां धनुषः प्रागेव कन्या पठ्यत इति भावः ॥

वाचाटतां वाचालतां बहुवचनचातुरीमिति यावत् । ("वाचाटो बहुगर्ह्यवाक् इत्यमरः") । अनयैव वाचाटतयैव । निवारयामि उपशमयामि । नक्षत्रविद्यायां ज्योतिःशास्त्रे कुशलो निपुणः, अथ

च नकारच्छेदेन चन्द्रविद्यायां धीरवृत्तौ न कुशल इति भावः । उत्तरेण वाक्येन रावणं प्रकोपयति ।

तत्कथमिति । आकर्णान्तमित्यादिश्लोकसूचितां जनकप्रतिज्ञां श्रुत्वा च धनुरानमनमकृत्वैव यत्कन्यामालोकयितुमिच्छसि तद्भवतो धीरवृत्त्यपाटवं सूचयतीत्यर्थः, । ममापीति हेलयोत्तोलितकैलासस्येति भावः । मम चापारोपणसंशयः तदैव सम्भवेत् यदा ऽपराण्यपि असम्भाव्यानि जगति भवेयुरिति भावं प्रकटयन्नाह—विनेत्यादिना ॥ अम्भोवाहं मेघं विनैव बहुलरुचिभिर्लिप्तात् उत्कीर्णनक्षत्रकिरणकीर्णात् अम्बरतलात् आकाशात् हेमद्युतेः स्वर्णकान्तेर्या विततिः श्रेणी तद्वत् रम्या मनोहरा तडिल्लेखा विद्युल्लता विलसति । यदिदमसम्भाव्यमानं भवेत् तदैव मे चापारोपणसंशयो भवेदित्यभिसन्धिः । अपरञ्च यदि स्वर्गङ्गां मन्दाकिनीं विनैव नभसि आकाशे रभसेन उन्मुद्राः चलायमाना याः शफर्यः क्षुद्रमत्स्यविशेषाः तासां परीवर्तैः इतस्ततः सञ्चारैः साकं नवनीलोत्पलवनं यदि स्फुरति तदैव संशयः स्यादिति पूर्ववदभिसन्धिः ॥ शिखरिणी वृत्तम् ॥ विशेषोऽत्रालङ्कारः “विना प्रसिद्धमाधारमाधेयस्य व्यवस्थितिः” इति लक्षणात् ॥ १४ ॥

स्वकीयचापारोपणसंशयसमर्थकदर्शनीयं दृष्टं विभाव्य विवादेन रावणस्य ॥

विलोक्येति । सौधशिखरस्थां जानकीमिति शेषः । विनेत्यादिना कृतां प्रतिज्ञां व्याहन्तुमुद्यत एवाम्भोवाहमम्बरतलपरिणामः । निर्मेघेऽम्बरतले जानकीशरीररूपतडिल्लेखाविलसनात्, स्वर्गङ्गारहितसौधशिखररूपाकाशे नेत्रसंचाररूपशफरीसमूहसहितनेत्ररूपनीलोत्पलस्फुरणाच्चेति भावः ॥ तथैवेति यथा गतश्लोके प्रतिज्ञातं तथैवेति भावः ॥ मत्प्रतिज्ञातासम्भाव्यद्वयदर्शनान्मन्ये वदनेन विधिर्मत्कर्तृकधनुरानमनसंशयं पुष्णातीति रावणोक्तेर्भावः ॥

विधेरपि स्वायत्ततां वक्ति मयीति । क्षीरोदन्वति क्षीरसागरे निभृतं प्रसुप्तो यो मुरजित् विष्णुः तस्य नाभिनलिनीं निजक्रीडासरसि कमलिनीं कर्तुमनसि मयि सति (कर्तुं मनो यस्य स तस्मिन्, तुंकाममनसोरपीति मकारलोपः) अयं विधिः ब्रह्मा पदभ्रंशाशङ्का स्वाश्रयकमलनाशात् स्वस्थानभ्रंशं मत्तः शङ्कमानो मधुरालापचतुरः मधुरभाषणशीलैः स्ववक्त्रैरनुनयपरोऽभूत् । स्तुतिभिर्मामनुनीतवान् ॥ सकललोकपितामहोऽपि मामनुनीतवानित्यपिना द्योत्यते । शिखरिणी वृत्तम् ॥ १५ ॥

(पृ. १६) निरूप्य । जानकीरूपमिति शेषः ॥ सादृश्येन नायिकाङ्गस्य तडिल्लेखया सह तरलनयनयुगलस्य च मीनक्षोभितनलिनीवनेन सहेति यावत् ॥ वचनं तद्विपर्यासं चाह—तडिल्लेखेति । इयं दृष्टस्वरूपा तडिल्लेखा विद्युल्लता न, किन्तु सौधशिखरे प्रासादचन्द्रशालायां

अन्यस्याः कस्याश्चिन्नायिकायाः कनकवद्रुचिरा मनोज्ञा चम्पकलतिके-वेत्यवधारयामि । मीनैः सरसं शोभितमप्य उन्मज्जत् शोभमानं कुवलयवनमिदं न, किन्तु तस्या एव नायिकायाः नयनयोर्य आलोकः चपलेक्षणं तस्य सलिलं कोटरायितमेव स्फुरति विकसति । शिखरिणी वृत्तम् ॥ १६ ॥

सीतास्वरूपं वर्णयन्नाह—राजीवेति । हे राजीव कमल कुरङ्ग हंस गज त्वं मुधा व्यर्थमेव कूर्दसि । अस्याः कामिन्याः वदननयनगमनादिभिः पराभूतः सर्वोऽसि इति भावः । हे सुधाकर चन्द्र त्वमस्याः नायिकायाः वदनस्यापि न समः तुल्यः कुतः पुनस्तस्याः मुखस्य तुल्य इति शेषः । मत्तद्भवः कुरङ्गशावकाः कुरङ्ग नेत्रस्य यदि कुरङ्गः शावकोऽपि समः, न कोऽपि । न साम्यं भजते इति भावः । स्व-मूते इति हे कज्जल ! त्वमपि किं जनरञ्जनाय लोचनविलासाह्लादनाय प्रभवसि, न कदाऽपीति काक्वा व्यज्यते ॥ प्रतीपो ऽलङ्कारः । वसन्ततिलकं वृत्तम् ॥ १७ ॥

सरभसं सोत्साहम् । जानक्याः ऊरू वर्णयन्नाह कदलीति । चमूरुदृशः कुरङ्गाक्ष्याः । "चमूरुप्रियकावपि, समूरुश्चेति हरिणाः" इत्यमरः । ऊरुयुगं भुवनत्रितयेऽपि तुलां समतां न बिभर्ति धत्ते । अत्युत्कृष्टत्वादिति भावः । तदेवाह ऊरुसादृश्याभ्युपमानानि निरस्यति कदलीत्यादिभिः । कदली रम्भाव्याख्यः कदली । के शिरसि दलानि पत्राणि यस्यास्ता तथाभूता । यद्वा 'केन' वायुना 'दल्यते' विदी-र्यते इति । ततश्च न नायिकोरुसदृशी ॥ करभः करिशावकः करभः । करेण शुण्डादण्डेन भातीत्येवम्भूतः । यद्वा करभ आ मणिब-न्धात्कनिष्ठामूलपर्यन्तो हस्तभागः स करभः करे भाति । अतो नैवे-तयोरुसादृश्यम् ॥ करिराजकरः गजराजशुण्डादण्डः करिराजकरः । करिराजेन कीर्यते प्रक्षिप्यते यः स तथाभूतः । अतो नैवास्योरुसा-म्यम् ॥ सर्वाणि ख्यातानि उपमानानि नैवोरुयुगलेन साम्यं भजन्त इति भावः । व्यतिरेको ऽलङ्कारः । तोटकं वृत्तम् । तल्लक्षणं च— "इह तोटकमब्धिसकारयुतम्" इति ॥ यद्वा कदलीकरभकरिराजकराः ऊरुसादृश्यं न भजन्त इत्येवार्थः । द्विकृतयस्तु सरभसोत्साह सङ्कलन्ते ॥ १८ ॥

कस्याश्चिदपि अन्तःपुरपरिचारिकाया इति । भर्तृदारिकेति । भर्तृदारिका जानकी । अन्यश्च कोऽप्यधुनाऽज्ञातनामादिकः नीलोत्प-लस्य दामवत् श्यामलः । कृष्णश्यामवर्ण इति यावत् । पुनः कुसु-मशरः कामः तत्सदृशं रूपं स्वरूपं यस्य सः मदनसमानमनोज्ञस्वरूपः । कुण्डलीकृतः कर्णान्ताकर्षणेन निजकर्णकुण्डलवत् वक्रीकृतो हर-चापो येन सः । एवम्भूतः चक्रवर्तिनः कस्यापि राज्ञः कुमारः नाति-क्षित इति पूर्वेण सम्बन्धः ॥

(पृ. १७) मुग्धः चतस्वभावः अबलाजनः नारीजनः । राज्ञि जनके कठोरप्रतिज्ञे चापारोपणेनैव कन्यां प्रदास्यामीति दृढप्रतिज्ञे सति किशोरं अल्पं वयो यस्य स तम् बालकमिति यावत् जामातरम् आशंसति वाञ्छति । दुहितायया धर्मचारिण्या मैत्रेय्येति भावः । उद्भिन्नः उद्गतः अङ्कुरित इति यावत् । मनोरथाङ्कुरोद्गमस्य हेतुमाह—देवीति । कालत्रयदर्शित्वं सिद्धिषु परिगणितं योगशास्त्रसम्प्रदायविद्भिः । कठोराणि कर्कशानि अङ्गानि यस्य स तथाभूतः ॥

कोऽयमिति भयकारणमित्यर्थः । अपसारयामीति । अस्मात्स्थलादनायासेनैव दूरीकरोमीत्यर्थः । रावणं प्रस्तुत्य । अये इति । दीयतां दृष्टिरिति । सोऽधमरावलोकनादुद्विग्नमेत्यर्थः ।

न केवलमवलोकयामि अपि तु नमयामि च । धनुरिति रावणस्य भावः ।

शिरःशेखरभ्रंशः अपशकुनमिति विभाव्य रावणस्य विषादः । विलोकयतीति । शेखरमिति शेषः ॥ अये इति अये कथात् विस्रस्तो यः शेखरः तदवलोकनेन अलम् मुधैव अवलोकयसि शिरःपतितं शेखरमित्यर्थः । समयो याति, तत् तस्मात्कारणात् तूर्णं शीघ्रं हरकार्मुकं शैवं धनुः गृहाण ।

अये लङ्केशेत्यत्र लङ्केशपदं सम्बोधनमपि । अत एव चायमस्वगतोक्तौ रावणस्य शङ्कते विदितोऽस्मि राक्षसत्वेनेति भावः ॥ घुणाक्षरन्यायगतम् आकस्मिकमित्यर्थः । ससंरम्भं सक्रोधमित्यर्थः ॥

सावहेलेति । अवहेलया अनतियत्नेन सहितं यथा स्यात् तथा अत एव कमनीयं सुन्दरं यथा स्यात् तथा उदस्य उत्तोल्य । कार्मुकमित्यागामिना सम्बन्धः । मौर्वीं धनुर्ज्यां च (चकारोऽत्र भिन्नक्रमो नेयः) (पक्षे मेखलां) क्रीडयेव हेलयेव विनिबध्य स्वस्थाने नियोज्य हरकार्मुकमेतत् कष्टमेव न कोऽप्यत्र सन्देह इति भावः । अथ सुहृद्यः शोभनाङ्ग्याः जानक्याः इति यावत् हृद्यं दर्शनीयं रमणीयमिति यावत् । हृदयं च कष्टमेव वशीकृतमेव मत्पराक्रमावलोकनेन प्रीतेव अस्मासु जानकीत्यवेहीति भावः ॥ अतिशयोक्तिरलङ्कारः । कार्मुककर्षणरूपकारणस्य जानकीहृदयाकर्षणरूपकार्यस्य चैतयोरेककालिकत्वेन वर्णनात् ॥ स्वागता वृत्तम् । तल्लक्षणञ्च स्वागतेति रनभाद्गुरुयुग्ममिति ॥ ४० ॥

(पृ· १८) न चलत्यपीति । का कथा नमनादिकस्येत्यपिना व्यज्यते ॥ धनुरितीति । धनुरुन्नमय्य सीतापहरणमिति । अतिदीर्घकालापेक्षः कुटिलो मार्गः कार्यसाधनस्य तत् तस्मात्कारणात् सरलेन अनतिकालापेक्षेण सुसाध्येन करवालस्य धारया भीषयित्वा घातयित्वा च जनकजनान् सीतां नयामीति भावः ॥ अत्र मार्गयोर्दुर्योर्वक्रत्वसरलत्वयोर्धनुर्यष्टेर्वक्रता करवालस्य चावक्रता कारणमन्तर्गर्भितमिति ध्येयम् ॥

Digitized by Google

राजमण्डलं वर्णयन्नाह—रोषेति । रोषेण रावणवधगमनजन्येन क्रोधेन रूक्षीकृतं यद्विलोचनं नयनं तस्य कान्त्या प्रभया भिन्नः सम्भिन्नो यो भ्रूभङ्गः । तेन भीमं यथा स्यात् तथा घटितो यो भ्रुकुटीविटङ्कः भ्रुकुट्युन्नतप्रदेशो यस्य तत् तथाभूतम् । पुनः उत्खाता कोशान्निस्सारिता अथ च लोला चाल्यमाना या करवाललता खड्गः तया करालं भीमं यो दोर्दण्डः बाहुदण्डः तेन चण्डं प्रचण्डं, लोकभयङ्करमिति यावत्, चरितं यस्य तत् तथाभूतम् । नरवीराणां चक्रं समूहं न विलोकयसीति पूर्वेण सम्बन्धः। हठात्सीतानयने सर्वे एवैते वीराः त्वां निवारयिष्यन्तीति विचिन्त्य प्रवर्तितव्यमित्याशयः । वसन्ततिलकं वृत्तम् ॥ ४१ ॥

नृपान् बिभीषयन्निव स्वकरवालं वर्णयति निर्भिन्नेति । निर्भिन्नाः ये वैरिकरिणां मत्तहस्तिनां कुम्भाः तेषां यास्तट्यः ताभ्यो विमुक्तानि पर्यस्तानि यानि मुक्ताफलानि तेषां प्रकरेण समूहेन तारकिता तारकापूर्णेव कृता अम्बरस्याकाशस्य श्रीः शोभा येन स एवं भूतो यो रणो कालरात्रिरिव सर्वलोकक्षयकरत्वात्प्रलयरात्रिरिव भाति स एव कृपाकृपणः दयाशून्यः क्रूर इति यावत् । मम कृपाणः इति हे नृपाः यूयं पश्यत इति पूर्वेण सम्बन्धः। वसन्ततिलकं वृत्तम् ॥ ४२ ॥

आकाश इति । यदाह भरतः—"पात्रस्याल्पतया यत्र पात्रं नैव प्रवेश्यते ॥ नेपथ्य इत्युक्त्वाकाशे लक्ष्यं बद्ध्वेति चोच्यते । किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् ॥ श्रुत्वेवानुक्तमप्येकस्तत्स्यादाकाशभाषितम्" इति ॥

आकाशभाषितं प्रत्याह—एक इति । एक एवाहं बहुभिरुपस्थितैः सुभटैः वीरैः सह संग्रामडम्बरं युद्धं कथं करोमि इति विचारं विस्मयं त्यज । नात्र कश्चिद्विस्मयावकाश इति भावः ॥ यतः यं मां सुलभं बहुभिः सुजेयं मन्यसे तेन मया सह समरे युद्धे समरेष्वपि सर्वेषु तुल्यभावेन चेतः चित्तं निधेहि । सर्वे मिलित्वा मया सह युद्धं कुर्वन्त्विति भावः ॥ वसन्ततिलकं वृत्तम् ॥ ४३ ॥

निजमूर्तिप्रकटनेच्छया स्वभुजानाह्वयन्नाह मन्दाकिनीति । मन्दाकिन्याः स्वर्गङ्गायाः यानि कनकपद्मानि स्वर्णकमलानि तेषां बिसाङ्कुराणाम्, अथ च उग्रा उन्मत्ताः ये दिग्गजाः तेषां लसन्तो ये दशनाः तेषामङ्कुराणां च उन्मूलनैः लीलोत्खातनव्यापारादिभिः, यैः भुजैः शैशवम् अनीयत ते तथाभूता मे निजाः स्वकीया भुजाः प्रकटीभवन्तु ॥ वसन्ततिलकं वृत्तम् ॥ ४४ ॥

(पृ· १६) सकलवीरेति । सकलानां वीराणां यानि वृन्दानि समूहाः तैर्वन्दनीया माननीया प्रशंस्येति यावत् बन्दिजातिः । दूतानां बन्दिनां च सदैवावध्यत्वात् ॥ ततश्च सकलभुवने समस्ते जगन्मण्डले एकोऽद्वितीयो वीरः कथं विपरीतं नीतिविरुद्धम् अधिष्टमिति यावत् ।

Digitized by Google

तथया स्यात्तथा वर्तिष्यते व्यवहरिष्यति ॥ नैवेति प्रश्नकाक्वा व्यज्यते ॥

यदि मां न धर्षयितुमर्हति तदा किञ्चित्कथयामीति नूपुरकोक्तेरर्थः ॥

अस्थान इति । अनुचितस्थाने नृपसमरोद्योगसमये इति भावः ॥ नूपुरकस्य हास्योक्तिं स्वशिरश्छेदांशांसत्वेन सङ्गृह्य अमङ्गलं मन्यते रावणः ॥ **स्थान इति ।** कस्मिंश्चित् स्थानविशेषे शिवार्चनसमय इति भावः । **भवत इति ।** स्वशिरश्छेदनप्रसादितहरलब्धवरस्येति भावः ।

(पृ. २०) पुरातननिजशिरश्छेदनद्वारा स्वपौरुषं स्मारयति—**विद्याधरेति ।** विद्याधराणां याः प्रणयिन्यः विद्याधर्यः तासां यानि करपल्लवाग्राणि तैः लीलया विमुक्तानि यानि कुसुमानि तेषां प्रकरैः समूहैः अवकीर्णं परिपूर्णं । शिवा युक्तः चन्द्रचूडः तस्य शिवस्य चरणे । तथा रणे समरे च कामं यदृच्छया छिन्नोऽपि मम मस्तकगणो मङ्गलायैवेति ॥ यथा शिवपादयोरर्पितानि शिरांसि शिवप्रसादसाधकानि तथा समरमूर्ध्नि छिन्नानि मम वीरस्य शिरांसि निःश्रेयससाधनानीति भावः ॥ रणे चेत्यनेन भावि रामकरिष्यमाणं स्वशिरश्छेदनं स्वनिःश्रेयससाधनमिति सूचितम् । हरप्रसादनाय रावणकृतनिजशिरश्छेदकथा पुराणेष्वनुसन्धेया ॥ वसन्ततिलकं वृत्तम् ॥ ४५ ॥

ईदृश इति । वीर इत्यर्थः । निजरूपगोपनपूर्वकचौरवृत्तिवर्णनेन भाविजानकीहरणं सूचितम् ।

रूपगोपनकारणं वर्णयन्नाह—**ये चन्द्रेति ।** ये मम भुजाः चन्द्रचूडाचलस्य कैलासस्य चालने यत् एकमद्वितीयं चातुर्यं पाटवं तस्य चिन्तामणयः आश्रयभूताः सन्ति तैरेव भूयिष्ठतरैः सारवत्तमैः भुजैः चापाधिरोपणाय क्षुद्रधनुरानमनाय प्रवृत्तो यदि भवेयं तर्हि कथं न लज्जे । अत एव त्यक्तनिजरूप एव अत्रागत आसमिति भावः । इन्द्रवज्रा वृत्तम् ॥ ४६ ॥

कथयेति । येन बलादेव तामानीय गमिष्यामीति भावः ॥

यस्या इति । वत्से । यस्याः तव कुलगुरुः योगिराजो याज्ञवल्क्यः, तातः च एव राजर्षिर्जनकः, जननी च धरित्री सकललोकधात्री । एवम्भूता परिरक्षिता त्वमपि दुर्विधेः वैशसेन क्रौर्येण क्रूरविधिवशात् निशाचरस्य रावणस्य कराङ्कगता भवित्री । अचिरादेव रावणः त्वां बलात् नयिष्यतीति भावः ॥ अनेन दण्डकारण्यात् रावणेन कृतं भावि जानकीहरणं सूचितम् । वसन्ततिलकं वृत्तम् ॥

पुरत इति । अग्रे भूत्वा अमुं निवारयेत्यर्थः ।

सहसबाहुपदोपन्यासेन सहस्रबाहोर्बाणस्य प्रवेशः सूचितः । उक्तं च सङ्गीतकल्पतरौ—"असूचितस्य पात्रस्य प्रवेशो नैव युज्य-

Digitized by Google

न" इति । कार्तवीर्यादित्यत्र कृते योगे पञ्चमी । (पृ॰ २१) बाहु-सहस्रसाम्येन बाणमेव कार्तवीर्यं मन्यते नूपुरकः । जीवितोऽस्मीति सहस्रबाहुरस्याग्रे भूत्वा एनं निवारयिष्यतीति भावः ॥

जामदग्न्यकृतकार्तवीर्यवधकथा पुराणेष्वनुसन्धेया ॥ अनर्थान्त-रम् बाणस्यापि राक्षसत्वात् । विषस्येति । विषरूपस्य रावणस्य अपरो विषरूपो बाणो निवारको भविष्यतीति भावः ॥ यथा लोके एकविषस्य उपद्रवशान्त्यै अपरविषस्य प्रयोगः क्रियते, तथाऽत्रापि रावणजन्यविघ्नस्य बाणेनोपशमनं भविष्यतीत्याशयः ॥ कैलासाधिक-भारमित्यादिश्लोकानुसरणवृत्तान्तं स्वाभिलाषरूपेणाह-कैलासेति । कैलासशैलशिखरादपि भूरिः भूयिष्ठः भारो यस्य तत् ततोऽप्यधिक-भारमित्यर्थः । एवम्भूतं निस्सीमोऽपरिच्छेद्यः भारो गुरुत्वं यस्य तत् इन्दुमौलेः शिवस्य धनुः पुष्पसदृशं, हेलयैवेति यावत्, करपल्लवेन आलम्ब्य उन्नमय्य भुजा एव द्रुमाः तेषां स्फीतं वनं सफलीकरोमि । यथा वृक्षाः पल्लवाग्रे पुष्पं धृत्वा फलवन्तो भवन्ति तथैव मे भुज-द्रुमाः करपल्लवाग्रधृतहरकार्मुकरूपपुष्पाः फलिनो भविष्यन्तीति भावः ॥ वसन्ततिलकं वृत्तम् । उपमारूपकयोरत्र सङ्करः ॥ ४८ ॥

नारोपणीयमिति । न केवलं नारोपितमेव अपि तु कदा-ऽप्यारोपणीयमपि नेत्यर्थः ॥ चन्द्रहासो रावणधृतः खड्गविशेषः ॥ वीरडम्बरमिति । विरोऽहमिति डम्बरं वीर्यदर्पं इति यावत् ॥ अलीकपण्डितः मिथ्यापाण्डित्याभिमानी ॥

निजवीर्यं वर्णयन्नाह रावणः उद्दण्डचण्डिमेति । उद्दण्डः यः चण्डिमा क्रौर्यं तेन लसन् यो भुजदण्डखण्डः तेन हेलयैव अनायासेनैव चलाचलः चञ्चलायमानः हरस्य अचलः पर्वतः कैलासः तेन आर्जा कीर्तिः यस्य स तस्यैवम्भूतस्य मम । तुलितः साम्यं नीतो बाल-मृणालस्य काण्डः अभिनवबिसाङ्कुरः येन तत् तथाभूतं यत् कोदण्डं धनुः तस्य कर्षणे यत् कदर्थना क्लेशः तया कीदृग् यशः कीर्तिः स्यात् । बहुसारं कैलासमुत्थाप्य पुनः क्षुद्रधनुराकर्षणेनालमिति भावः । वसन्ततिलकं वृत्तम् ॥ ५० ॥

चलाचलेत्येतत् पदं चरिचलिपतिवदीनां वा द्वित्वमच्यकचाभ्या-सस्येति वक्तव्यमिति वार्तिकेन साधु भवति ।

(पृ॰ २२) बहुमुखतेति । मुखबाहुल्येन मुखरः वाचाल एव भवति । बाहुबाहुल्येनैव तु वीरः ॥ अतो दशमुखत्वेन त्वं वाचाल एव भवन्तु बाहुसहस्रत्वेन वीर इति हृदयम् ॥ पलालेति । पलालस्य निष्फल-धान्यपुञ्जकाण्डस्य भारः समूहः तद्वत् निस्सारेण, बलवीर्यरहितेनेति यावत् ॥ आत्मानं वीरम्मन्यते इति वीरम्मन्यः वृथावीर्यदर्पितः ॥

समरेति । समरकलासु संग्रामविद्यासु कुण्ठः मुग्धः,अपटुरिति तत्सम्बुद्धौ । अपेवेत्यस्य भुजसहस्रे इत्यनेन अग्रिमेण सम्बन्धः ॥ स्वभु-

अविक्रमं वर्णयति–पितुरिति । पितुः बलेः पादाम्भोजे चरणकमले या प्रणतिः भक्तिः तया रभसेन हठात् उत्क्षिप्तं प्रोत्साहितं हृदयं यस्य स एवम्भूतोऽहं पातालं प्रयातः सन् पितरं द्रष्टुमिति भावः सकलं समस्तं क्षितिवलयं भूमण्डलं बाहूनां सहस्रे आसज्य बद्ध्वा फणिपतेः जगदाधारस्य शेषस्य फणाफलकमालां फणा एव फलकाः पट्टाः तेषां माला पंक्तिः तां कति कति वारान् अनेकवारम्, बहुधेति यावत्, अमन्दारोद्वेलामकरवम् अमतो भारात् भूमण्डलवहनभारात् उद्वेलामुच्छ्वासां, स्वच्छन्दामिति यावत् । भूमण्डलं निजबाहुषु विधृत्य शेषस्य फणाभारं नीतवानहमित्यर्थः ॥ त्वमेकमेव कैलासमात्रमुत्क्षिप्य गर्वितोऽसि अहं तु कैलासाद्यनेकगिरिनद्याद्याधारभूतं भूमण्डलमेव समस्तं बहुधा विधृतवान् इति किमावयोः साम्यमिति हृदयम् ॥ शिखरिण्यां वृत्तम् ॥ ५० ॥

बलितनयेति । बलितः सम्यगाचरणेन प्रतिपालितो नयो नीतिर्येन स तत्सम्बुद्धौ हे बलितनय त्वं चलिता नयः नीतिः नीतिशास्त्रोक्ता पद्धतिः यस्य स तथाभूतोऽसीति विरोधः । तत्परिहारे तु बाणस्य बलिपुत्रत्वात् बलितनयेति पदस्य हे बलिपुत्रेत्यर्थो ज्ञेयः ॥ त्वमेवेति । नान्यः कोऽपीत्येवकारार्थः ॥ स्वभुजयोर्वीर्यं वर्णयन्नाह दोष्णामिति । किं मम दोष्णां बाहूनां वीरलक्ष्मीप्रासादविभ्रमवर्ती वीरलक्ष्म्याः यः प्रासादः निवासस्थानं तस्य यो विभ्रमो विलासः तद्वर्ती, वीर्यलक्ष्मीनिवासस्थानापन्नामिति यावत्, एवम्भूतामथ च गरिष्ठां गुर्वीं पदवीं चरितं न विदितवानसि । ये बाहवः करपल्लवानां येऽङ्कुराः त एव पर्यङ्कः तस्मिन् शायी तस्मिन् चन्द्रशेखरगिरौ कैलासे कलशप्रतिष्ठां प्रासादशिखरभूषणसमतां दधुः न्यासितवन्तः ॥ राक्षसस्य बाहवः वीरलक्ष्म्याः प्रासादः । अतः तत्करपल्लवोद्धृतः कैलासः तत्प्रासादशिखरभूषणमिवासीदिति भावः ॥ वसन्ततिलकं वृत्तम् ॥५१॥

तदिदमिति । धनुरारोपणेनैव ज्ञास्यते कः आवयोर्वीरतर इति । तरतमयोर्भावस्तारतम्यमिति भावः । (पृ० २३) किमिदमिति । दर्पान्वितराक्षसद्वयेन अवश्यं धनुरारोपणीयं भविष्यति ततश्च जानकी निशाचरकराङ्कगता भविष्यतीति भीतस्य मञ्जीरकस्योक्तिः ॥ नरवीरेषु य एको ऽद्वितीयः (राममभिप्रैति) तस्मै समर्पणीया या सीता तस्याः परिणये यः मनोरथोऽभिलाषः तेन विफलं वृथा यथा स्यात् तथा चेतःपदवी चित्तसरणिरायास्यते खिद्यते । मनोरथपथगतरथपथानुसारेणैव पदवीपदविन्यास इति ध्येयम् ॥

भवतु नरवीरसमर्पणीया सीता, न मे तेन कापि क्षतिरित्याशयेनाह बाणः त्रिपुरेति । मम धीः चित्तं त्रिपुरमथनस्य शिवस्य धनुश्चापः तस्यारोपणाय उत्कण्ठिता न तु जनकपुत्र्याः सीतायाः पाणिग्रहणाय । अपि तु बहूनां बाहूनां यो व्यूहः समूहः तस्य

निर्व्यूढा सम्यक् प्रसारिता या माला श्रेणी तस्याः या कलपरिणतिः शक्तिनैपुण्यं तया यो हेलाताण्डवः क्रीडानृत्यं तस्य आडम्बराय अट्टहासाय धीः उत्कण्ठतेत्यनुषङ्गः । ममात्रागमने सीतापरिणयो न प्रयोजनं, किं तु कैलासाधिकसारधनुरारोपणेन निजबाहुपरम्परायाः सार्थकत्वप्रदर्शनमेवेति भावः ॥ मालिनीवृत्तम् ॥ ५२ ॥

स्वमनोरथं समर्थयन्नाह रावणः उन्मीलितेनेति । हराचलस्य कैलासस्य उन्मीलितेन चालितेन शिखरेण प्रागेव मम भुजबलस्य परीक्षा कृता । अधुना एषा उपस्थिता विदेहतनयायाः जानक्याः कुचकुम्भकेलिषु यत् कौतूहलं तस्मात्, तत्कारणादिति यावत्, गिरिशस्य शिवस्य कार्मुककर्मणि धनुरानमने दीक्षा परीक्षणमित्यर्थः ॥ धनुरारोपणं न मच्छक्तिपरीक्षायै अपि तु सीतापरिणयायैवेति बाणोक्तेर्यद्विपरीत एव ममौत्सुक्यमिति भावः ॥ वसन्ततिलकं वृत्तम् ॥ ५३ ॥

नरवीरेत्यादिमञ्जीरकोक्तिं प्रतिषेधन्निव नेपथ्ये आह जनकः असुरेति । राक्षसाद्यन्यतममध्ये यः कोऽपि एतत् हरचापं नमयति स मद्दुहितुः सीतायाः करग्रहं करोतु तस्मै अहं स्वदुहितरं समर्पयामीति भावः ॥ पुष्पिताग्रा वृत्तम् ॥ ५४ ॥

रेरे भुजा इति । रेरे मम भुजाः चन्द्रकलाकिरीटिनः शिवस्य कोदण्डस्य धनुषः कर्षणेन आनमनेन यद्यशः तेन त्रिलोकीं जगत्त्रयं श्वेतां कुरुध्वम् । पुनः विदेहपुत्र्याः जानक्याः वक्षोजे स्तने यच्चन्दनरजः तेन परिधूसरत्वं अङ्गीकुरुध्वम् ॥ हरचापारोपणं कृत्वा निजयशश्चन्द्रिकया जगतीतलं श्वेतीकृत्य सीतां परिणीय तदालिङ्गनेन धूसरत्वं स्वीकुरुध्वमित्यर्थः ॥ परिवृत्तिरत्रालङ्कारः वसन्ततिलकं वृत्तम् ॥ ५५ ॥

दुर्विगाहमिति । दुस्साध्यम् अशक्यारोपणमिति यावत् ॥ (पृ॰ २४) नूतनागतत्वेनैव मान्योऽसि नान्यथेत्यर्थः ॥ अलमिति । धनुरारोप्य सीतां नयिष्यति बाण इति मा मंस्था इति भावः । कुण्ठीकृतो विफलायासः कृतो दशकण्ठो येन तत् तथाभूते हरकार्मुके अयं बाणः कतरः न कोऽपीति भावः ॥ नानेन धनुरारोपयितुं शक्यमिति तत्त्वम् ॥ अन्योऽपीति । अथ वा यदि अन्यः कोऽपि धीरो वीरो नरः इमं चापं विकृष्य आरोप्य सीताकरग्रहविधिं विदधीत विधिवत् सीतापाणिग्रहं कुर्यात् । तर्हि एनां जनकेन्द्रपुत्रीं सीतां लङ्कां नयामि । बलादिति शेषः । गिरा वचसा अनुनयामि प्रसादयामि द्राक् झटिति वशे चानयामि स्वायत्तां करोमि ॥ भावि जानकीहरणमनेन सूचितम् । वसन्ततिलकं वृत्तम् ॥ ५६ ॥

बाणस्येति । बाणस्य बाहुशिखरैः परिपीड्यमानम् आकृष्यमाणमपि इदम् इन्दुमौलेः शिवस्य धनुर्न चलति । स्थानादिति शेषः । किमिव ? कामातुरस्य पुरुषस्य वचसां संविधानैः चाटूक्तिभिः अभ्य-

र्यितम् । अकरणीयकरणायेति शेषः । प्रकृत्या स्वभावेनैव चारु सुशीलम् अविचलनीयं सतीनां मन इव ॥ रावणोक्तिपरिहारोऽनेन सूचितः । कदाऽपि सत्याः सीतायाः सत्पथात् मनो न प्रविचलिष्यतीति मृषैव ते मनोरथ इति हृदयम् ॥ वसन्ततिलकं वृत्तम् ॥ ५७ ॥

कथमिति । सतीमनसोऽविचलनीयत्वं श्रुत्वा स्वाभिलषितसीताहरणानुनयादीनां निष्फलत्वसूचकं मन्यते मञ्जीरकोक्तं रावणः । प्रत्यूहस्य विघ्नस्य पिशुना सूचिका ॥ पूर्वकथां स्मारयित्वोपालम्भयति **अपि नामेति । हैहयराजेनेति ।** कार्तवीर्येण रावणदमनं कृतमिति पुराणेषु प्रसिद्धम् ॥ **अनेकरुचिरेति ।** अनेकैर्बहुभिः रुचिरैः रमणीयैः चापैर्धनुर्भिः (पक्षे इन्द्रचापैः) चुम्बिताः निजबाहव एव बलाकाः मेघाः तैः निर्मुक्तानां नाराचानां धारासारैः शमयामि शान्तिं नयामि ॥

(पृ॰ २५) **रे बाणेति ।** रे बाण त्वं पञ्च बाणशतानि मुञ्च नाहं तेभ्यो बिभेमि यतः मम करतले करवालवल्ली अस्ति । येन अहं त्वद्बाणसमूहं खण्डयिष्यामि । रे पञ्चबाण मकरध्वज त्वमपि स्वबाणान् विशृणु प्रकटीकुरु । प्रहरेति यावत् । यतः इयं तच्छामकोपायभूता युवतीनां लोके मण्डले ललामा ललिता मनोज्ञेति यावत् वल्ली लता । एवम्भूता जानकी एति आगच्छति अतो नाहं बिभेमि तव पञ्चबाणेभ्य इति भावः । वसन्ततिलकं वृत्तम् ॥ ५८ ॥

मन्दोदरीति । मन्दोदर्याः यः कुटिलः कुन्तलितः अथ च कोमलः स्निग्धः केशभारः तस्मिन् पिनद्धं यन्मन्दाराणां सुरतरुपुष्पाणां दाम मालिका तस्य मकरन्दरसं पिबन्तः । अथ च वीणानिनादवत् दीणाध्वनिवत् मधुरं ध्वनिमुद्गिरन्तः मधुकराः भ्रमराः अपि (का कथा देवमनुष्याणामित्यपिव्यङ्ग्यम्) मद्विक्रमं कीर्तयन्ति वर्णयन्ति । वसन्ततिलकं वृत्तम् ॥ ५९ ॥

सुरतरुकुसुमेति । सुरतरोः मन्दारस्य यत् कुसुमदाम पुष्पमाला तेन कमनीयो यः कामिनीजनः तस्य उपभोगे यत् सौभाग्यं तत् विडम्बयति स्वायत्तमेव अलीकं वर्णयतीत्यर्थः ॥

स्वकरणीयं सूचयन्नाह बाणः । **अमीति ।** तुलितं हरशैलस्य कैलासस्यैकं प्रधानं शिखरं यैस्ते तथाभाविनः अमी मे दोर्दण्डाः । अहङ्कृत्या गर्वेण सहितं यथा स्यात्तथा करतले न्यस्तः कुलिशो येन स तं तुरासाहमिन्द्रं पराभूय विजित्य । कैलासतुलनया इन्द्रपराजयेन च रावणकृतं सकलं सम्पाद्येति भावः । स्वैरं यथेष्टं त्रिदशवनं नन्दनम् उन्मूल्य मम क्रीडोद्यानं सुरतरुभिः मनोज्ञं रमणीयं विदधतु ॥ बाणागमननिमित्तमेतत् कविचातुर्यादुपन्यस्तं रावणकृतनिजसुरतरुसौभाग्यवर्णनोत्थितहृदयबाणकृतस्वमनोरथवर्णनम् ॥ शिखरिणी वृत्तम् ॥ ६० ॥

Digitized by Google

षद्विङ्करमिति। आगन्तुकमारीचाक्रन्दसूचकमेतत्। वत्से जानकीति। बाणे गते स्वच्छन्दो रावणो बलादेव सीतां नयिष्यतीति मञ्जीरकस्य भयम्॥ यदि दैववैदग्ध्येन अधुना केनचिद्रावणानुचरस्य आक्रन्दः श्रुतो भवेत् तदा रक्षिता भविष्यसीति हृदयम्। दिष्ट्येति। सौभाग्येनेत्यर्थः॥ इममिति। आकर्णितरावणवृत्तान्तमित्यर्थः॥

अङ्कलक्षणं दशरूपके— "प्रत्यक्षनेतृचरितो बिन्दुव्याप्तिपुरस्कृतः, अङ्को नानाप्रकारार्थसंविधानरसाश्रयः" इति। भारते च "प्रस्तुतार्थोपसंहारो यत्राङ्कः सोऽभिधीयते" इति। पुनः "बीजार्थयुक्तियुक्तं च कृत्वा कार्यं यथारसम्। निष्क्रमं तु ततः कुर्यात् सर्वेषां रङ्गवर्तिनाम्" इति॥

इति श्रौतस्मार्ताचारपरायणमैथिलप्रवरोपाध्यायो-
पनामकश्रीतीर्थनाथशर्मतनूजमङ्गनाथकृतायां
प्रसन्नराघवव्याख्यायां भावबो-
धिन्यां प्रथमाङ्कव्याख्या॥

Digitized by Google

प्रसन्नराघवटीकायाम्

भावबोधिन्याम्

द्वितीयाङ्कव्याख्या

(पृ० २७) अनेकेति । अनेकशुकशावकानामनुगमेन समागमेन निकामं सातिशयं हरित् या लता (स्वभावहरिल्लतायाः शुकशावकसमागमेनातिहरितत्वम्) सैव यद्वितानम् तेन मनोरमो य आरामः तेन रमणीयः सन्निवेशो यस्य स तथाभूतः ।

कीटवदिति । यथा कीटाः अनवरतं महीं पर्यटन्ति तथैव पर्यटनेनेत्यर्थः ।

निरीहाणामिति । त्यक्तसर्वसङ्गानां कामनारहितानामित्यर्थः ।

भवादृशामिति । ब्रह्मविद्याविनोदिनां भिक्षूणामित्यर्थः ।

राजाऽपीति । ब्रह्मविद्यायाः ब्राह्मणा एव समुपलभ्यमानत्वात् राजन्यसम्भावनीयतेत्यपिना काक्वा व्यज्यते ।

देवस्येति । अभ्यस्तत्वाद्ब्राह्मणकपठेत्युच्चारणाय उद्यतेन अनिच्छताप्युच्चारितम् ॥ तद्गोपनाय च क्षितितलपठेत्यादि पूरणम् ॥

अपलापेनेति । स्वपरिचयनिगूहनेनेत्यर्थः ।

विश्रब्धमिति । यतोऽहं राक्षसः त्वमपि स्वपरिचयं निःशङ्कं मां कथय । यतस्त्वमपि राक्षसवत्प्रतिभासि इति भावः ॥

(पृ. २८) सकलेति । लङ्केश्वरस्य प्रधानमन्त्रिणेत्यर्थः । माल्यवतेति पदेन सहानुग्राहस्य प्रतिपालनाय माल्यपदोपन्यसनम् ॥

मुनिरितीति । मुनिः माननीयो न चास्य वचनमतिक्रमितव्यमिति मनसि कृत्वेत्यर्थः ॥ निजनयनेति । सर्वेष्वङ्गेषु नेत्रयोरतीव प्रियत्वं सुप्रसिद्धम् । तस्येति । सम्बन्धसामान्ये षष्ठी ।

तदिदमिति । इदं ताटङ्कयुगम् वीरसूकर्णनिवेशोचितम् । वीरं सूते या सा वीरसूः तस्याः कर्णयोर्निवेशाय उचितम् । इत्येवं रूपं वृत्तम् रत्नानां ताटङ्कखचितानामन्तः अन्तर्वर्तिनी स्फुरन्ती द्योतमाना असौ वर्णमाला वर्णस्य रक्तादिरागस्य पक्षे अक्षरस्य, माला पंक्तिरिव शंसति ज्ञापयति । अक्षरविन्यासो यथा किमपि वृत्तं गमयति तथा ताटङ्कस्यरत्नज्योतिर्माला लोकोत्तरचमत्कारवत्त्वेन बोधयति यदिदमलौकिकरत्नमयताटङ्कयुगं वीरजननीधारणयोग्यमिति परिस्फुटार्थः ॥ १ ॥

Digitized by Google

अनुमतं चेति । स्वीकृतमित्यर्थः । लङ्केश्वरेति । रावण एवैको वीर इति हृदयम् । प्रस्थापितः माल्यवतेति शेषः ॥

कथमिति । केन प्रकारेण इदं सकलं विश्वामित्रादिवृत्तान्तं श्रुतं तेनेत्यर्थः ॥

(पृ· २९) वार्ता चेति । कौतुकवती कुतूहलिनी वार्ता, अथ च विमला स्वच्छा, विशुद्धेति यावत्, विद्या, पुनः कुरङ्गनाभेः मृगमदस्य कस्तूरिकायाः लोकोत्तरः लोकेषूत्तरः श्रेष्ठः (तथा चामरः "उत्तर्यूर्ध्वोदीच्यश्रेष्ठेष्वप्युत्तरः" इति) यद्वा लोकादुत्तरः सामान्यतोऽलभ्य इत्यर्थः, एवम्भूतः परिमलः सौरभः सर्वमेतत्त्रयमपि दुर्निवारं निवारयितुमशक्यं यथा स्यात्तथा लोके जगति स्वयमेव प्रसरति ॥ उपमानमाह— तैलस्येति । वारिणि जले सर्वत्र प्रवर्तकाभावेऽपि यथा तैलबिन्दुः प्रसरति तथा वार्तादयोऽपि जगति स्वयमेव प्रसरन्तीति भावः ॥ अत्र दीपकोपमयोरङ्गाङ्गिभावः सङ्करः । वसन्ततिलकं वृत्तम् ॥ २ ॥

बहुतरेति । बहुतरान् प्रणिधीन् चारान् प्रणिधाति पोषयति यः सः । बहवस्तस्य चाराः अतश्चास्य गुप्तवृत्तान्तोऽपि श्रुतिपथमायाति का कथा पुनः सर्वजनीनवृत्तान्तस्येति भावः ॥ कथमिति । ताटकां प्रति प्रहितो मिथिलायां कुतः आगतोऽसीत्यर्थः ।

सताटङ्कमिति । आहृतं कौशल्यायाः कौशिकदत्तताटङ्कयुगलं ताटकयेति प्रश्नार्थः ।

सताटकमिति । ताटकया सहितं रहितं वा तद्वनमित्येव ताव-त्प्रष्टव्यमित्यर्थः ॥

केन पुनरिति । यथा प्रतीहारो जनान् राजपुरं प्रवेशयति, कस्तथा ताटकायाः यमराजपुरीप्रवेशक इत्यर्थः ॥ प्रतीहारवदाचरितं प्रतीहारायितम् ॥

ताटकामनुगत इति । रामबाणेन हत इत्यर्थः ।

शिशुक्रीडोचितेनेति । शिशुक्रीडावद्रामनाराचेन पीडितः । लीलयैव रामेण हतो दूरं गत इति भावः ॥

जीवन्मुक्त इवेति । नाराचेन तथा हतो यथा जीवन्नपि शरीरवैकल्यान्मृत एवास्तीति भावः । शिवशिवेति । रामपराक्रमश्रवणे त-न्नाय इदं पदम् ।

(पृ· ३०) कथितमिति । मारीचस्य आक्रन्दमेव श्रुत्वा सर्वं वृत्तान्तजातं ज्ञातवान् रावण इत्यर्थः ॥

सीताभिलाषेति । शीतलस्थाने अग्नेरुज्ज्वलनासम्भव इति भावः । अधुना सीताप्राप्त्यभिलाषेण तथा व्यपोत्कण्ठितो रावणो यथा किमप्यन्यदस्य हृदयं नैव प्राविशतीति हृदयम् ।

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्य
श्रीभाष्यस्य प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं॰श्रीराममिश्र-शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः	७।)
श्रीभाष्यस्य प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा	६)
श्रीभाष्यस्य तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा	१=)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः	३।)
वेदपूर्त्तः प्रथमो बिन्दुः सत्सम्प्रदायाचार्यपं॰स्वामिश्रीराममिश्रशास्त्रि-प्रणीतो निर्विशेषाद्वैतनिराकरणपरः	१॥=)
वेदपूर्त्तिसहितो वेदार्थसंग्रहः	३॥।)
शास्त्रदीपिका	६।)
सङ्कर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-न्द्रिकोपेतम्, पं॰स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् ।	१।)
काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाज॰दामोदर-शास्त्रिणा संशोधिता पूर्वार्द्धरूपा	५॥।)
तथा उत्तरार्द्धम्	८॥।)
माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता	७॥)
काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता	६॥)
श्रीतिङन्तार्णवतरणिः	६)
दिग्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता	॥=)
जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता	५॥)
लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, शेषशार्ङ्गधराचार्यविरचितया न्याय-मुक्तावल्याख्यया टीकया सहिता	॥।)
सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम्	॥)
तत्त्वमुक्ताकलापः-सर्वार्थसिद्धियुतः, बौधायनीयार्यसिद्धान्तानुसारी विशिष्टाद्वै-तब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्कि-ककेसरिणा सर्वतन्त्रस्वतन्त्रधिषणेन श्रीवेङ्कटनाथदेशिकेन प्रणीतः	५॥=)
वेदान्तसिद्धान्तमुक्तावली, आर्थर्वेनिस्साहबकृताङ्गलभाषानुवादयुता	१॥।)
काव्यप्रकाशस्य इङ्गलण्डीयभाषानुवादः	२॥)
अथर्ववेदसंहिताया इङ्गलण्डीयभाषानुवादः	१२)
आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्य-काराणां परमगुरुणा श्रीयामुनाचार्यस्वामिना प्रणीतम्	॥।)
तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्विश्वकर्मविरचितया न्यायप्रदी-पाख्यटीकया सहिता	१॥।)

CONTENTS.

Page.

SHRIBHĀSHYA of RĀMĀNUJA, (Text only,) Edited by Revd. J. J. Johnson, Benares · 321

MEMANSA NYAYAPRAKASH by Apodeva, edited by P. Ganganath Jha, M. A., Professor of Sanskrit Muir Central College, Allahabad 337

BIDHIVIVEKA of MANDANA MISRA with commentary Nyayakanika by Wachaspatti Misra, edited by P. Ram Shastri Tailang, Professor Sanskrit College, Benares 353

BHĀVABODHINĪ TĪKĀ of Jaideva's Prasaraaghavva Natak, edited by Pandit Ganganath Jha, M. A. Professor of Sanskrit Muir Central College, Allahabad 369

Digitized by Google

18 ७०

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 7 & 8.] July & Aug. 1905. [VOL. XXVII.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1905.

Copyright on each article reserved.

Price Rs. 9 per annum.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
विधिमीमांसा, अप्पय्यदीक्षितकृता तै० श्रीरामशास्त्रिणा संशोधिता	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधित	।=)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतडाक्तरबालण्टैनाचार्य्येणाङ्गलदेशीयभाषायामनूदिता ..	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्य्येणाङ्गलदेशीयभाषायामनूदितम्	४)
मानवधर्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका, ...	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	२॥=)
षोडशपदार्थनिर्वचनम्	३)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीकामकोल्लूकशास्त्रि-संशोधिता	४)
काव्यप्रदीपः, पं० रामशास्त्रिभागवताचार्येण परिशोधितः	२॥)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
खण्डनखण्डखाद्यं सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	५)

Digitized by Google

स्वप्ने चात्मादर्शितः स एष सुषुप्त्यवस्थायां प्रकाशत इत्याह "तद्यत्रैतत्सुप्त" इति । तदेतदिति सम्बन्धः । यत्र यस्यां सुषुप्त्यवस्थायामेतत्स्वप्नं यथा न स्यात्तथा सुप्तस्तस्यामवस्थायामुपसंहृतकरणग्रामः समस्तकरणव्यापारकृतकालुष्यहीनः सम्प्रसन्नः स्वप्नमज्ञानमात्रतया विलापयन्मुक्ताद्यावृत्तः स्वप्नप्रयुक्तं तैजसत्वं विहाय प्राज्ञो भूत्वा ज्ञान क्रियां विना स्वरूपचैतन्येनाज्ञानसाक्षीसाद्यस्य देहादेः स्वसत्तास्फूर्तिप्रदत्वादात्मेत्यर्थः । इदं श्रुत्वा पुनरिन्द्रो न किञ्चित्तत्र ज्ञायत इत्याह "नाहे"ति । अहेति निपातः खेदार्थे । खिद्यमानो हीन्द्र उवाच, अयं सुप्तः पुरुषोऽयमस्म्यहमित्येवं नात्मानमस्यामवस्थायां जानातीमानि भूतानि नो एव जानाति विनाशनेव प्राप्तो भवति नाहमत्र भोग्यं पश्यामीत्येवं दोषं दृष्ट्वा पुनः प्रजापतिमुपससाद । उपसन्नं पुनरुवाच, एतावतापि ते कल्मषक्षयो नाभवत्तदर्थं पुनः पञ्चवर्षाणि ब्रह्मचर्यं चरेति । तदेवमेकोत्तरशतं ब्रह्मचर्यं चरते सहस्राय ब्रह्मचर्यसम्पन्नाय मृदितकल्मषाय प्रजापतिर्व्याचष्टे योऽयमाद्यद्वितीयतृतीयपर्यायेष्वक्षिणि स्वप्ने सुषुप्तौ चानुस्यूतोऽपहतपाप्मत्वादिगुणो दर्शितस्तमेव भूयोऽनुव्याख्यास्यामि नैतस्मादन्यमित्युपक्रम्य तुरीये 'मघवन्मर्त्यं वा इदं शरीर"मित्यादिना शरीरं निन्दित्वा तस्मादुत्थितं जीवमेवोत्तमं पुरुषं दर्शयति प्रजापति "र्य एष सम्प्रसादोऽस्मा"दित्यादिना । तस्मादपहतपाप्मत्वादीनां जीवे सम्भवाज्जीव एव दहराकाश इति प्राप्ते ब्रूमः । आविर्भूतस्वरूपस्तु । तुशब्देन पूर्वपक्षव्यावृत्तिः । उत्तरात्प्रजापतिवाक्यादपि न जीवशङ्का युक्तेत्यर्थः, यत आविर्भूतस्वरूपोऽत्र जीवो विवक्षितो न तु जीवत्वेन रूपेणेति । "परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत"इत्युपसं-

Digitized by Google

ह्यारदर्शनाच्चदपहतपाप्मत्वादिभिः प्रतिपाद्यं परं ब्रह्म तदेव जीवस्य पारमार्थिकं स्वरूपं, न तु जीवत्वम् । तथा चाविर्भूतस्वरूपस्य जीवस्य ब्रह्मत्वेनापहतपाप्मत्वादिकमुपपद्यते, न तु जीवत्वेन रूपेण । "नासम्भवा"दिति पूर्वसूत्रस्थहेतुर्नासिद्ध इति भावः ॥

ननु दहराकाशस्येश्वरत्वे "ऽथ य एष सम्प्रसाद" इत्यादिना जीवपरामर्शो व्यर्थः स्यादित्यत उत्तरं पठति ।

अन्यार्थश्च परामर्शः ॥ १ । ३ । २० ॥

अन्यार्थोऽयं जीवपरामर्शो न जीवप्रतिपादनाय । 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत' इत्युपसम्पत्तव्यपरात्मपर एवायं जीवपरामर्शः । जीवोपसम्पत्तव्यत्वेन हि परमात्मोपदिश्यते । स चोपदेशो जीवपरामर्शं विना न सम्भवतीति तदर्थं जीवपरामर्शो न जीवप्रतिपादनार्थमिति ॥

अल्पश्रुतेरिति चेत्तदुक्तम् ॥ १ । ३ । २१ ॥

ननु 'दहरोऽस्मिन्नन्तराकाश'' इत्याकाशस्याल्पत्वश्रवणान्न परमात्मत्वं किं त्वाराग्रमात्रजीवत्वं युक्तमिति चेत्तत्र समाधानमुक्तं "मर्भकौकस्त्वात्तद्व्यपदेशाच्चे" त्यत्र । उपासनार्थमौपाधिकमल्पत्वं परमेश्वरेऽप्यविरुद्धमित्यर्थः । तस्माद्दहराकाशः परमात्मैवोपास्य इति सिद्धम् ॥

अनुकृतेस्तस्य च ॥ १ । ३ । २२ ॥

पूर्वं "परं ज्योतिरुपसम्पद्ये"ति वाक्यार्थविचारप्रसङ्गात्, "तच्छुभ्रं ज्योतिषां ज्योति" रिति वाक्योक्तपरंज्योतिष्ट्वसाधकं "न तत्रे" ति वाक्यं विचार्यत इति प्रासङ्गसङ्गतिरस्याधिकरणस्य । यद्वा पूर्वमात्मश्रुत्याद्यनुरोधादाकाशशब्दस्य रूढित्यागेनेश्वरे वृत्तिरुक्ता । तथे-

ह्यापि "तत्रे"ति सतिसप्तम्या 'तत्र' शब्दवाच्यस्य तेजोऽन्तराभिभावकत्वप्रतीत्यनुरोधात् "न भाती"त्यस्य वर्तमानार्थत्यागेन यस्मिन्सति सूर्यादिकं न भास्यति स तेजोधातुरुपास्यत्वेनोच्यत इति पूर्वपक्षोत्थानादृद्दृष्टान्तसङ्गतिः। पूर्वपक्षे ऽलौकिकतेजउपास्तिः फलं, सिद्धान्ते निर्विशेषब्रह्मप्रमितिरिति भेदः। मुण्डकोपनिषदि श्रूयते "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निस्तमेव भान्तमनुभाति सर्वं तस्य भासासर्वमिदं विभाती"ति। सिद्धान्ते तत्रेति विषय सप्तमी। तथा च तत्र तस्मिन्ब्रह्मणि विषये सूर्यादयो न भासकत्वेन भासन्ते, यथा घटादौ विषय आलोकादिकं भासकत्वेन भासते तद्वत्। अल्पतेजसो वह्नेः फल्गुत्वमभिप्रेत्य कैमुतिकन्यायमाह "कुत इति। इतश्च सूर्यादेर्न ब्रह्मणि भासकत्वमित्याह "तमेवे"ति। यथा सूर्यादिप्रकाश्यो घटादिर्न सूर्यादिप्रकाशक एवं ब्रह्मप्रकाश्यः सूर्यादिर्न ब्रह्मप्रकाशक इत्यर्थः। ननु यथा गुरौ गच्छति शिष्यस्यानुगमनं स्वनिष्ठगमनकृतमेवं सूर्यादेः स्वनिष्ठभानकृतमनुभानं किं नेत्यत आह "तस्ये"ति। यथाऽयःपिण्डस्य दाहक्रिया वह्निनिष्ठैव तथा सूर्यादेर्भानं ब्रह्मनिष्ठमेव, न पृथग्भानमित्यर्थः। अत्र संशयः, सूर्यादि जगद्भासकतया प्रतीयमानं तेजोविशेषो वा ब्रह्मवेति। तेजस एव प्रकाशकत्वप्रसिद्धेः प्रबलेन तेजसा दुर्बलस्याभिभवदर्शनाच्च तेजोविशेष एवेति प्राप्ते ब्रूमः। अत्र तथा प्रतीयमानं ब्रह्मैव। कुतः। अनुकृतेः। अनुकरणं य "स्तमेव भान्तमनुभाति सर्व"मित्यनुभानं तदनुकृतिशब्देनोच्यते। न हि तेजस्तेजोऽन्तरे भासमाने भासते। तस्मात्स्वप्रकाशतया भासमानं चैतन्यमनु सर्वं सूर्यादि भासत इति युक्तम्।

सूत्रे "तस्य चे"त्यनेनोदाहृतवाक्ये चतुर्थचरणोऽभिप्रेतः । "तस्य भासा सर्वमिदं विभाती"ति सर्वभासकत्वं तेजोऽन्तरस्याप्रसिद्धं विरुद्धं च, भासमानस्य तेजसस्तेजोऽन्तराभिभावकत्वेन भासकत्वाभावात् । ब्रह्मणस्तूपपन्नं "तदेव ज्योतिषां ज्योति"रित्यादौ प्रसिद्धं च । "न तत्रे"ति तच्छब्देन च "हिरण्मये परे कोशे विरजं ब्रह्म निष्कलं तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदु"रिति प्रकृतब्रह्मग्रहणमेव युक्तमिति । श्रुत्यर्थस्तु । हिरण्मये ज्योतिर्मय आनन्दमय इत्यर्थः । तस्मिन्नन्नमयाद्यपेक्षया परे कोशे "ब्रह्मपुच्छं प्रतिष्ठे"ति यत्प्रतिष्ठाभूतं ब्रह्म तत्प्रतिष्ठितं तच्च विरजमागन्तुकमलशून्यं निष्कलं निरवयवं शुभ्रं नैसर्गिकदोषशून्यं ज्योतिषां सूर्यादीनां ज्योतिरवभासकं तच्च विदुषामनुभवसिद्धमिति ॥

अपि च स्मर्यते ॥ १ । ३ । २३ ॥

अपि च ब्रह्मणः सूर्याद्यप्रकाश्यत्वं तत्प्रकाशकत्वं च भगवद्गीतासु स्मर्यते ।

"न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥
यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥"

इति । तस्मादनन्यप्रकाश्यः सर्वजगद्भासकः परमात्मा ज्ञेय इति सिद्धम् ॥

शब्दादेव प्रमितः ॥ १ । १ । २४ ॥

पूर्वत्रानुमानादिना लिङ्गेन तत्रेति विषयसप्तमीं कृत्वा न भातीत्यादौ णिजध्याहारेण न भासयतीत्यर्थो वर्णितो भवति, भासकत्वेन न भान्ति सूर्यादय इत्यर्थकथनात् । तथेहाप्यङ्गुष्ठमात्र इति परिमाणलिङ्गाज्जीवमा-

दायेशानोऽसोति स्मारयेदिति विध्यऽध्याहारेणोपास्तिपरमङ्गुष्ठवाक्यमस्त्विति दृष्टान्तसङ्गतिः। पूर्वपक्षेऽङ्गुष्ठमात्रजीवोपास्तिः फलम्, सिद्धान्तेऽभेदप्रमितिः फलम् । कठवल्लीषु पठ्यते, "अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठती"ति,तथा "ऽङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमक ईशानो भूतभव्यस्य स एवाद्य स उश्व एतद्वैतत्" इति।अस्यार्थः। स्वाभाविकं परिच्छेदं वारयति "पुरुष" इति। पूर्णत्वेन सर्वत्रोपलभ्यमान इत्यर्थः। तर्हि कथमङ्गुष्ठमात्रत्वमित्याशङ्क्याभिव्यक्तिस्थानद्वारा तदाह "मध्य" इति। आत्मनि देहमध्ये हृदयसद्मनीत्यर्थः। जीवभावमापन्नस्य ब्रह्मण इदमङ्गुष्ठमात्रत्वसमर्थनमिति बोध्य "मीशानो भूतभव्यस्ये"त्यादिना त्वंपदवाच्याङ्गुष्ठमात्रजीवानुवादेनाभेदबोधनादिति। तस्यैव परमात्मत्ववादिवाक्यान्तरमुदाहृतं "तथे"ति। "अधूमक"मिति लिङ्गव्यत्ययेन ज्योतिः परत्वात्। यथाऽधूमकं ज्योतिरकलुषितमेकरूपं प्रकाशमात्रं दृष्टं, तथाऽयमपि वस्तुतः कूटस्थस्वप्रकाशधातुरित्यर्थः। शोधितत्वमर्थस्य तदर्थतामाह "शान" इति। भूतभव्यग्रहणं भवतोऽपि प्रदर्शनार्थम्। अद्वितीयत्वमाह "स एवे"ति। अद्य वर्तमानकाले स एवास्ति, श्वो भविष्यत्काले स एव भविता, अतीतकाले स एवासीत्। यन्नचिकेतसा पृष्टं "मन्यत्र धर्मा"दित्यादिना तदेवाद्वितीयं वस्त्विति। अत्र संशयः किमिदमङ्गुष्ठवाक्यं जीवपरमुत ब्रह्मपरमिति। तत्राङ्गुष्ठपरिमाणस्य ब्रह्मण्यसम्भवाज्जीवपरमिदं वाक्यमिति प्राप्ते ब्रूमः। प्रत्यगभिन्नः परमात्मा वाक्यप्रतिपाद्यः प्रमितः। कस्मात्। शब्दादेव। "ईशानो भूतभव्यस्ये"त्यत्रत्येशानशब्दात्। न हि जीव ईशानशब्द आञ्जसः। न चाङ्गुष्ठपरिमाणलिङ्गाज्जीवः प्रतिपाद्य इति युक्तं, लिङ्गश्रुत्योर्वि-

Digitized by Google

रोधे श्रुतेः प्रबलत्वात् । एतत्सूचनार्थमेवकारः । ननु वाक्यस्य परमात्मपरत्वे कथमङ्गुष्ठमात्रत्वस्योपपत्तिरिति चेत्, काऽत्र कथन्ता, त्वंपदवाच्याङ्गुष्ठमात्रजीवानुवादेन ब्रह्माभेदपरे वाक्येऽनुपपत्त्यभावादिति ॥

ननु जीवस्य वस्तुतः सर्वगतस्य कथमङ्गुष्ठमात्रत्वमित्यत आह ।

हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॥ १ । ३ । २५ ॥

तुशब्दः शङ्कानिरासार्थः । वस्तुतः सर्वगतस्यापि जीवभावमापन्नस्य परमात्मनोऽङ्गुष्ठपरिमाणहृदयावच्छिन्नतयाऽङ्गुष्ठमात्रत्वमुपपद्यत इत्यर्थः । ननु गजपुत्तिकादिशरीरेषु हृत्पुण्डरीकस्यानियतपरिमाणत्वात्कथं जीवस्याङ्गुष्ठमात्रत्वनियमस्तत्राह "मनुष्याधिकारत्वा"दिति । शास्त्रस्येति शेषः । षष्ठे फलार्थे कर्मणि तिर्यगादेरपि स्वर्गकामस्याधिकारः स्वर्गकामश्रुतेरविशेषादित्याशङ्क्याङ्गश्रुत्यर्थवत्त्वाय समर्थविषयतया तिर्यगादेः सामर्थ्याभावेन स्वर्गकामपदं सङ्कोच्य मनुष्याधिकारत्वे स्थिते चातुर्वर्ण्यमधिकरोति शास्त्रमिति प्राप्य "वसन्ते ब्राह्मणोऽग्निनाऽऽदधीत ग्रीष्मे राजन्यः शरदि वैश्य" इति त्रयाणामेवाग्निसम्बन्धश्रवणात्तेषामेवाधिकार इति राद्धान्तितम् । तथा च मनुष्याणां हृदयस्याङ्गुष्ठमात्रत्वात्तदपेक्षयाऽङ्गुष्ठमात्रत्वमित्यविरोध इति तात्पर्यम् । एवमङ्गुष्ठमात्रजीवानुवादेन विरुद्धांशं परित्यज्याभेदो बोध्यतेऽनेन वाक्येन । इममर्थमुत्तरग्रन्थसन्दर्भेण स्पष्टीकरिष्यति, "अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टस्तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण तं विद्याच्छुक्रममृत"मिति । अस्यार्थः । योऽन्तरात्मा पुरुषत्वात्पूर्णोऽयं जनानां हृदये सन्निविष्टः । अतोऽङ्गुष्ठमात्र इति

त्वंपदवाच्यानुवादः । तस्यान्वयव्यतिरेकाभ्यां तदनुसारि श्रुत्या च शोध्यत्वमाह "तं स्वा"दिति । शरीरं स्थूलं सूक्ष्मं च तस्मात्स्वाभिमानविषयात्प्रवृहेत्पृथक्कुर्याद्धैर्येण समाधिनेति यावत् । तं विविक्तमात्मानं विशुद्धममृतं ब्रह्मैव जानीयादित्याह "त"मिति । तदेवं काठकवाक्य प्रत्यग्ब्रह्मणि ज्ञातव्ये समन्वितमिति सिद्धम् ॥

तदुपर्यपि बादरायणः सम्भवात् ॥ १ । ३ । २६ ॥

पूर्वं मनुष्याधिकारं शास्त्रमित्युक्तम् । तर्हि क्रममुक्त्यर्थाभिरुपासनाभिर्मनुष्याणां देवत्वं प्राप्तानामधिकारो न स्यादित्याक्षिप्य समाधीयत इत्याक्षेपसङ्गत्याऽस्यारम्भः प्रसङ्गसङ्गत्या वा । अत्र चाधिकारनिरूपणद्वारा मन्त्रार्थवादादीनां मानान्तरप्राप्तिविरोधयोरसतोर्देवताविग्रहादौ समन्वयोक्तेरध्यायसङ्गतिः । एवं मन्त्रादीनां स्वार्थे प्रामाण्ये न्यायसाम्यादुपासनाऽधिकार्यादिसमर्पकाणां स्वार्थे प्रामाण्यात्तत्त्वमस्यादिवाक्यानां ब्रह्मात्मैक्ये पर्यवसानमिति श्रुतिशास्त्रपादसङ्गतयः । पूर्वपक्षे मन्त्राद्यप्रामाण्याद्युपगमनादिवाक्यानामपि स्वार्थे तदयोगात्तत्त्वमस्यादेरपि नैक्यनिष्ठतेति फलं, सिद्धान्ते तत्सर्वसम्भवादैक्यनिष्ठतेति फलम् । यद्वा देवानामनधिकारात्क्रममुक्तिसाधनेषूपासनेषु देवादिभोगद्वारा मोक्षकाममनुष्यप्रवृत्तिर्नास्तीति पूर्वपक्षे फलं, सिद्धान्ते तादृशप्रवृत्तिरस्तीति । बृहदारण्यके श्रूयते "तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणा"मिति । देवादीनां मध्ये यो यो ब्रह्म प्रत्यक्त्वेन साक्षादकरोत्स एव ब्रह्मात्मनाऽतिष्ठदित्यर्थः अत्र किं देवादीनां ब्रह्मविद्यायामधिकारोऽस्त्युत नास्तीति विशये शास्त्रस्य मनुष्याधिकारत्वान्नास्तीति प्राप्तेऽभिधीयते । तदुपर्यपि बादरायणः सम्भवादिति ।

Digitized by Google

तेषां मनुष्याणामुपरिष्टाद्ये देवादयस्तेषामपि ब्रह्मविद्यायामधिकारोऽस्तीति बादरायण आचार्या मन्यते स्म । कस्मात् । सम्भवादर्थित्वसामर्थ्याद्यधिकारकारणसम्भवादित्यर्थः । देवादीनां सदा भोगशालित्वेऽपि भोग्यवस्तुष्वनित्यत्वदोषदर्शनाद्वैराग्यादिकं निरतिशयानन्दमोक्षार्थित्वं च सम्भवतीति भावः ॥

विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥ १ । ३ । २७ ॥

ननु देवादीनां विग्रहवत्त्वं विना ब्रह्मविद्यायामनधिकारात्तदङ्गीकरणीयम् । तथा सति कर्मण्यपि शरीरित्वयर्त्विगादिवत्सन्निधानेनैवोपकारकत्वं स्यात् । तच्च न सम्भवत्येकस्य शरीरस्यानेकत्र युगपत्सन्निधानासम्भवात् । तस्माद्विग्रहवत्त्वाङ्गीकारे कर्मणि देवताया उपकारकत्वविरोधः प्रसज्येतेति चेन्नैष दोषः । कस्मात् । अनेकप्रतिपत्तेर्दर्शनात् । एकस्य देवस्यानेकेषां शरीराणां युगपत्प्राप्तेः श्रुतौ दर्शनादित्यर्थः । तथा हि बृहदारण्यके शाकल्यब्राह्मणं, "अथ हैनं विदग्धः शाकल्यः पप्रच्छ कति देवा याज्ञवल्क्य" इत्युपक्रम्य, "स हैतयैव निविदा प्रतिपेदे यावन्तो वैश्वदेवस्य निविद्युच्यन्ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रे" इत्युक्त्वा, "कतमे त" इति पृष्टायां "महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा" इति त्रिसहस्रषडधिकत्रिशतदेवानां त्रयस्त्रिंशद्देवेष्वन्तर्भावमुक्त्वा, त्रयस्त्रिंशतोऽपि षट्सु, षण्णां त्रिषु, त्रयाणां द्वयोः, द्वयोरेकस्मिन्वाय्वात्मके देवेऽन्तर्भावं ब्रुवदेकस्य वायोरनेकरूपतां दर्शयति । अस्यार्थः । एनं याज्ञवल्क्यं विदग्धः शाकल्यो वैश्वदेवनामकस्य शस्त्रस्य निविदि शस्यमाना देवाः कतीति पप्रच्छ । तत्र याज्ञवल्क्यस्योत्तरं

Digitized by Google

"निविदि त्रयश्चे"त्यादि । शस्यमानदेवनिष्ठसंख्यावाचकं मन्त्रपदं निविदित्युच्यते । एवं षडधिकत्रिशताधिकत्रिसहस्रसंख्यानिर्णयानन्तरं "कतमेत" इति संख्येयस्वरूपप्रश्ने ऽष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिरिन्द्रश्चेति त्रयस्त्रिंशद्देवेषु सर्वेषामन्तर्भावो दर्शितः । "महिमान एवैषा" मित्यादिनैषां त्रयस्त्रिंशद्देवानां महिमानो विस्तारा एव वस्तुतस्त्रयस्त्रिंशद्देवा इत्यर्थः । तेऽपि त्रयस्त्रिंशद्देवाः षण्णामग्निपृथिवीवाय्वन्तरिक्षादित्यदिवां महिमानः । तेऽपि षड्देवास्त्रयाणां लोकाणां महिमानः । ते त्रयो देवा द्वयोरन्नप्राणयोस्तौ चैकस्य प्राणशब्दवाच्यस्य वायोर्महिमानाविति । यद्वाऽनेकप्रतिपत्तेर्दर्शनादनेकत्र कर्मण्येकस्य प्रतिपत्तिरङ्गभावस्तस्य लोके दर्शनादित्यर्थः । यथा बहुभिर्नमस्कुर्वाणैर्युगपदेव ब्राह्मणो नमस्क्रियमाणो दृश्यते, एवमेकां विग्रहवतीं देवतामुद्दिश्य युगपत्सर्वे हवींषि त्यजन्तीति न कश्चित्कर्मणि देवताया उपकारकत्वे विरोधः ॥

शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम् ॥ १ । ३ । २८ ॥

ननु माऽस्तु कर्मणि विरोधः । तथाऽपि शब्दे वेदवाक्ये विरोधः स्यादेव, अनित्यविग्रहवद्देवताया नित्यवेदार्थत्वाङ्गीकारे शब्दस्यार्थेन नित्यसम्बन्धाभावेन नित्यानित्यसंयोगविरोधादिति चेत्, नायमप्यस्ति विरोधः । कुतः । अतः प्रभवात् । देवादिनिष्ठनित्याकृतिवाचकाच्छब्दराशेरेव देवादिप्रपञ्चस्य प्रभवादुत्पन्नत्वश्रवणादित्यर्थः । तथा हि स्मृतिः ॥

"अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा ।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥

नाम रूपं च भूतानां कर्मणां च प्रवर्तनम् ।
वेदशब्देभ्य एवादौ निर्ममे स महेश्वरः ॥"

इति । श्रुतिरपि "एत इति ह्वै प्रजापतिर्देवानसृजतासृग्रमिति मनुष्यानिन्दव इति पितॄंस्तिरः पवित्रमिति ग्रहानाशव इति स्तोत्रं विश्वानीति शस्त्रमभिसौभग इत्यन्याः प्रजा इति तथा स मनसा वाचं मिथुनं समभवदि"ति । अस्यार्थः । एतेऽसृग्रमिन्दवस्तिरः पवित्रमाशवो विश्वान्यभिसौभग इत्येतन्मन्त्रस्थपदैर्देवादीन्स्मृत्वा ससर्ज ब्रह्मा । तत्रैतच्छब्द इन्द्रियाधिष्ठानदेवस्मारकः । असृग्रशब्दोऽसृक्शब्दवाच्यरुधिरप्रधानदेहरमणमनुष्यस्मारकः । इन्दुमण्डलमध्यवर्तिपितृस्मारक इन्दुशब्दः । पवित्रं सोमं स्वमध्ये तिरस्कुर्वतां धारयतां ग्रहाणां तिरः पवित्रशब्दः स्मारकः । ऋचोऽनुवतां स्तोत्राणां गानरूपाणामाशवशब्दः स्मारकः । विश्वदेवशंसिशस्त्राणां विश्वशब्दः स्मारकः । अभिसौभग इति शब्दो निरतिशयसौभाग्यवाचकः प्रजानां स्मारक इति । स प्रजापतिर्मनसा सह वाचं मिथुनभावं समभवत्समभावयत्तत्प्रकाशितां सृष्टिं मनसाऽऽलोचितवानिति यावत् । सूत्रस्थप्रत्यक्षानुमानशब्देन सृष्टेर्वेदप्रभवत्वप्रतिपादकश्रुतिस्मृती गृह्येते । तथा च श्रुतिस्मृतिभ्यां वेदशब्दप्रभवत्वं सृष्टेरित्यर्थः । आकृत्यालिङ्गितविग्रहानङ्गीकारे कस्य सृष्टिः स्यादिति भावः । तस्माद्यथा गवादिशब्दानां नित्याकृतिवाचकत्वमेवं वैदिकशब्दानां नित्याकृतिवाचकत्वमिति न शब्देऽपि विरोध इति ॥

अत एव च नित्यत्वम् ॥ १ । ३ । २९ ॥

अस्मृतकर्तृकत्वादिना सिद्धमेव वेदस्य नित्यत्वमनित्यार्थसंयोगेनानुपपन्नमित्याशङ्क्य, वेदादेवाकृतिविशे-

Digitized by Google

षावच्छिन्नदेवादिसृष्टिरिति प्रतिपादनान्नित्याकृतेरेव शब्दार्थत्वान्नानुपपन्नमित्यभिप्रायेण परिहरति । अत एव नित्याकृतेः शब्दार्थत्वादेव वेदस्य नित्यत्वं नानुपपन्नमित्यर्थः । एतत्सूत्रसूचितः प्रयोगश्च "वेदोऽवान्तरप्रलयावस्थायी जगद्धेतुत्वादीश्वरव"दिति । अवान्तरप्रलयावस्थायित्वमेव हि नित्यत्वं नाम । अनुमानसिद्धार्थे श्रुतिरपि "यज्ञेन वाचः पदवीयमायंस्तामन्वविन्दन्नृषिषु प्रविष्टा"मिति । यज्ञेन पुण्यकर्मणा वाचो वेदस्य पदवीयं ग्रहणयोग्यतामायन्प्राप्तवन्तः । अतस्तामृषिषु विद्यमानां वाचं याज्ञिका अन्वविन्दन्नुपलब्धिमन्तो बभूवुरित्यर्थः । एवं स्थितामेव वाचं सर्वे ज्ञातवन्त इति तात्पर्यम् ॥

समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च ॥ १ । ३ । ३० ॥

नन्वाकृतिपदार्थकत्वे पि प्रलये सर्वाकृतिकव्यक्तिनाशे पुनस्तदाकृतिकव्यक्त्युत्पत्तौ मानाभावान्नित्यानित्यसंयोगविरोधस्तदवस्थ इति चेदुच्यते । सृष्टिप्रलयावृतावपि न शब्दे विरोधः । कस्मात् । समाननामरूपत्वात् । न हि प्रलये जगतो निरन्वयनाशोऽस्ति येनोत्पद्यमानं जगद्विलक्षणं स्यात् । किं तु संस्कारात्मनाऽविद्यायां तिष्ठत्येव जगदनुभवइव भावनाख्यसंस्कारात्मना । न चार्थसंस्कारे मानाभावो मृदि मण्डूकसंस्कारदर्शनान्नित्यप्रलयाख्यसुषुप्तौ सविषयेन्द्रियाद्यर्थसंस्कारसद्भावाच्च प्रबोधे पूर्वसजातीयव्यवहारात् । न च प्रतिदिनं सृष्टिप्रलययोः सद्भावे मानाभावः, "यदा सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन्प्राण एवैकधा भवति तदैनं वाक्सर्वैर्नामभिः सहाप्येति चक्षुः सर्वै रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति स यदा प्रबुध्यते तदाऽग्नेर्व-

त्ततः सर्वा दिशो विस्फुलिङ्गाः विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः सर्वे प्राणा यथाऽऽयतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः" इत्यादिश्रुतेर्मानत्वात् । अस्यार्थः । अथ शब्दस्तदाऽर्थको यदेत्युपक्रमात् । प्राणशब्दः परमात्मपरः । अस्मिन्प्राणे जीव एवैकधा भवति तदात्मना तिष्ठतीत्यर्थः । तदैकीभावावस्थायामेनं प्रकृतं प्राणं परमात्मानमन्तर्बहिरिन्द्रियाणि सर्वाणि सविषयाण्यपियन्ति परमात्मनि लीनानि भवन्तीत्यर्थः प्रबोधे तस्मादेव परमात्मनो जगतो जन्मावभास इति । अविलम्बितोत्पत्तौ दृष्टान्त "स्तदे"ति । यथा संस्कारबलात्पूर्वमण्डूकादिसमाननामरूपत्वमुत्तरकार्यस्यैवं पूर्वकल्पप्रपञ्चसमाननामरूपत्वादुत्तरप्रपञ्चस्य पूर्वाकृतिकव्यक्त्युत्पत्तेर्न शब्दे कश्चिद्विरोधः । समाननामरूपत्वं च श्रुतौ दर्शनात्स्मृतेश्चाभ्युपगन्तव्यम् । "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयद्दिवं च पृथिवीं चान्तरिक्षमथो सुव"रिति । तथा नक्षत्रेष्टौ, "अग्निर्वा अकामयतान्नादो देवानां स्यामिति स एतमग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निरवप"दिति । भाविवृत्तिमाश्रित्य यजमानोऽग्निरित्युच्यते । एवं कामयित्वा किं कृतवांस्तदाह "स"इति । कृत्तिकाभ्यः कृत्तिकाख्यनक्षत्रदेवतायै । बहुवचनं नक्षत्रबाहुल्यादिति बोध्यम् । अष्टकपालमष्टसु कपालेषु पचनीयं निरवपदुक्तपुरोडाशहविष्कामेष्टिं कृतवानित्यर्थः । तथा च योऽग्निर्यस्मा अग्नये निरवपत्तयोः समाननामरूपत्वं दर्शयतीति सिद्धम् । स्मृतिरपि ।

"यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये ।
दृश्यन्ते तानि तान्येव तथाभावा युगादिषु ॥"
इत्यादिका द्रष्टव्या ॥

उक्तं देवादीनामधिकारमाक्षिपति ।

मध्वादिष्वसम्भवादनधिकारं जैमिनिः ॥ १ । ३ । ३१ ॥

देवादीनां ब्रह्मविद्यायामनधिकारं जैमिनिराचार्यो मन्यते । कस्मात् । मध्वादिष्वसम्भवात् । एवं हि मधुविद्या श्रूयते । असौ वा आदित्यो देवमधु । देवानां मोदनान्मध्विव मधु । तस्य मधुनो द्युलोक एव तिरश्चीनवंशः । अन्तरिक्ष आदित्याख्यमधुनोऽवस्थानात्तदेव मध्वाधारोऽपूपः । रोहितं शुक्लं कृष्णं परं कृष्णं गोप्यं चेति पञ्च रोहितादीन्यमृतानि प्रागाद्यूर्ध्वान्तं पञ्चदिगवस्थिताभिरादित्यरश्मिनाडीभिर्मधुच्छिद्रभूताभीरोहिताद्याख्याभिस्तत्तद्वेदोक्तकर्मकुसुमेभ्यस्तत्तद्वेदिकमन्त्रमधुकरैरादित्यमण्डलमानीतानि । पञ्चमममृतं गोप्याख्यं प्रणवकुसुमादुपासनाभ्रमरैरूर्ध्वदिग्गतसूर्यरश्मिरूपगोप्याख्यमधुच्छिद्रद्वाराऽऽदित्यमण्डलमानीतम् । रोहितादिकममृतं मकरन्दस्थानभूतं वह्नौ हुतसोमाज्यपयःपुरोडाशादिरूपं द्रष्टव्यम् । तानि च रोहितादीन्यमृतानि यशस्तेजोवीर्यसकलेन्द्रियान्नरूपेण निष्पन्नान्यादित्यमधुसम्बद्धानि प्रागादिदिक्षु क्रमेण विद्यमानानां वसुरुद्रादित्यमरुत्साध्यरूपाणां देवानामुपजीव्यानीत्येवं चिन्तयतां फलं वस्वाद्याप्तिरुच्यते । वस्वादीनां समानानां मध्य एको भूत्वा यशआद्यमृतं प्रत्यक्षानुमानादिभिः करणैरुपलभ्य तृप्यतीति । न ह्येवंभूतमधुविद्यायां सूर्यवस्वादीनां देवानामधिकारः सम्भवति, एकस्योपास्योपासकप्राप्यप्रापकयोर्भावयोर्विरोधात् । सूत्रस्थादिशब्देन यासु विद्या "स्वादित्यो ब्रह्म" त्येवमादिरूपासु देवानामुपास्यत्वं ता विद्या गृह्यन्ते । तथा, "इमावेव गौतमभरद्वाजावयमेव गौतमोऽयं भरद्वाजः," "इमावेव विश्वामित्रजमदग्नी अयमेव विश्वा-

मित्रोऽयं जमदग्निः," "इमावेव वसिष्ठकश्यपा वयमेव वसिष्ठोऽयं कश्यपो वागेवात्रि' रित्याद्यास्त्वृषय उपास्याः। तेषु न तेषामेवर्षीणामधिकारः सम्भवति । श्रुत्यर्थस्तु । इमौ दक्षिणवामकर्णौ क्रमेण गौतमभरद्वाजावित्युपास्यौ। द्वितीयेमावित्यनेन दक्षिणवामाक्षिद्वयोक्तिः । तृतीयेमावित्यनेन दक्षिणवामनासिकाद्वयोक्तिः । एवं सप्तसु शीर्षण्येन्द्रियेषु सप्तर्ष्युपास्तिरित्यर्थः । न च मध्वादिविद्यासु देवादीनामनधिकारेऽपि ब्रह्मविद्यायामधिकारः किं न स्यादिति वाच्यं, विद्यात्वाविशेषेण ब्रह्मविद्यायामप्यनधिकारात् । तथा चायं प्रयोगः, ब्रह्मविद्या न देवादीनामधिकरोति विद्यात्वान्मध्वादिविद्यावदिति ॥

अपि च ।

ज्योतिषि भावाच्च ॥ १ । ३ । ३२ ॥

भ्रमणवत्तया परिदृश्यमानज्योतिर्मण्डल एव सूर्यचन्द्रादिदेवताशब्दानां लोके प्रयोगसद्भावान्मण्डलस्य मृत्पिण्डादिवदचेतनत्वेन विग्रहाभावादग्निवाय्वादीनामपि तत्तुल्यत्वेन सामर्थ्यादेश्चेतनधर्मस्याभावान्न देवादीनामधिकारः । न च मन्त्रार्थवादेभ्यो देवादीनां विग्रहवत्त्वसिद्धेः सर्वं सुस्थितमिति वाच्यम्, तेषामन्यपरत्वेन स्वार्थ प्रामाण्याभावात् । तस्माद्देवादीनां ब्रह्मविद्यायामधिकाराभावं जैमिनिर्मन्यत इति शङ्कासूत्रयोरभिप्रायः ॥

सिद्धान्तयति ।

भावं तु बादरायणोऽस्ति हि ॥ १ । ३ । ३३ ॥

तुशब्दः शङ्कानिरासार्थः । बादरायण आचार्यो ब्रह्मविद्यायां देवादीनामधिकारस्य भावं मन्यते । यद्यपि देवतामिश्रोपसनास्वनधिकारस्तथाऽपि निर्गुणब्रह्मविद्या-

र्यां देवादीनामप्यधिकारोऽस्ति हि । पूर्वमुक्तस्य विद्यात्वादित्यनुमानस्य, ज्योतिष्टोमादि न ब्राह्मणकर्तव्यं कर्मत्वाद्राजसूयवदित्याभाससाम्यं द्रष्टव्यम् । यद्वा ज्योतिषि भावाच्चेत्यस्योत्तर"मस्ति हि" । यद्यपि देवताशब्दा ज्योतिरादौ प्रयुज्यन्ते तथाऽपि तदभिमानिदेवतापरा एव सम्भवन्ति । अस्ति ह्यैश्वर्ययोगाज्ज्योतिरादिरूपेणावस्थातुं विग्रहं गृहीत्वा व्यवहर्तुं च सामर्थ्यम् । तथा हि श्रूयते "मेधातिथिं मेष"इति । मेधातिथिं काण्वायनं मेषो भूत्वेन्द्रो जहारेत्यर्थः । तथा स्मर्यते चादित्यः पुरुषो भूत्वा कुन्तीमुपजगामेति । नन्वर्थवादादीनां स्वार्थे प्रामाण्याभावात्कथं तेभ्यो विग्रहवत्त्वसिद्धिरिति चेन्न । तथाऽप्यस्ति ह्रीत्येवोत्तरम् । मानान्तरविरोधसंवादयोरभावे तेभ्य एव विग्रहसिद्धिरस्ति । तथा ह्यर्थवादादिभिः स्तुत्यादिकं लक्षयता वाच्यार्थोऽङ्गीकृत्य एव । न हि वाच्यार्थाभावे लक्षणा युक्ता । किं च "व्रात्योव्रात्यस्तोमेन यजेते"त्यादौ व्रात्यस्वरूपाकांक्षायां सावित्रीपतितो व्रात्यो यस्य पिता पितामहो वा सोमं न पिबेत्स व्रात्य इति व्रात्यस्वरूपं विध्यपेक्षितं सन्निधिप्रमाणकमित्युच्यते । यथा वा स्वर्गरूपं विध्यपेक्षितं सन्निधिप्रमाणकं, तथा निस्स्वरूपदेवतोद्देशेन द्रव्यत्यागायोगाद्विध्यपेक्षितं देवतादिस्वरूपं विग्रहवत्त्वं विधिप्रमाणकमेव । एवं मन्त्रार्थवादप्रत्यक्षमूलेतिहासपुराणादिभिरपि विग्रहवत्त्वसिद्धिः । न च प्रत्यक्षमूलत्वं पुराणादीनामसिद्धमिति वाच्यं, तत्कर्तॄणां योगमाहात्म्याद्देवादिभिः सह प्रत्यक्षव्यवहारसम्भवात् । तथा च श्रुतिर्योगमाहात्म्यमाह "पृथिव्यप्तेजोऽनिलखे समुत्थिते पञ्चात्मके योगगुणे प्रवृत्ते न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं

Digitized by Google

शरीरम्'' इति । पादतलमारभ्या जानोर्जानोरा नाभेर्नाभेराग्रीवं ग्रीवाया आकेशप्ररोहं केशप्ररोहाद्वा ब्रह्मरन्ध्रं क्रमेण पृथिव्यादिधारणया पृथिव्यादिपञ्चात्मके भूतसमुदाये समुत्थिते प्रतिपत्तिद्वारा वशीकृते योगगुणे चाणिमादौ प्रवृत्ते योगाभिव्यक्तं तेजोमयं देहं प्राप्तस्य योगिनो न रोगादिप्राप्तिरित्यर्थः । तस्मात्समूलेतिहासपुराणादिभ्यो विग्रहवत्त्वसिद्धावर्थित्वादिसम्भवाद्देवादीनां ब्रह्मविद्यायामधिकारोऽस्तीति क्रममुक्त्युपासनासु मुमुक्षुप्रवृत्तिरविकलेति सिद्धम् ॥

शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि ॥ १ । ३ । ३४ ॥

पूर्वं यथा तद्यो यो देवानामिति देवशब्दश्रुत्या मनुष्याधिकारनियमापवादेन देवानामधिकार उक्तः, तथा मुमुक्षौ जानश्रुतौ शूद्रशब्दश्रुत्या लिङ्गेन द्विजात्यधिकारनियममपोद्य शूद्रस्याप्यधिकारोऽस्त्विति दृष्टान्तसङ्गत्येदमारभ्यते । शूद्रशब्दस्य सिद्धान्ते क्षत्रियसमन्वयोक्तेरध्यायान्तर्भावोऽस्य युक्तः । शूद्रशब्द एव वेदान्तानां स्वार्थे समन्वयसिद्धेः श्रुत्यादिसङ्गतयः । पूर्वपक्षे जातिशूद्रस्यापि ब्रह्मविद्यायां त्रैवर्णिकादविशेषः फलं, सिद्धान्ते ततो विशेष इति विवेकः । एवं किलात्र च्छान्दोग्ये चतुर्थाध्याय उपाख्यायते । जानश्रुतिः पौत्रायणः प्रियातिथिर्बहुन्नदाता बहुसन्नुणो बभूव । तस्य राज्ञो गुणगणगरिमसन्तोषिताः सन्तो देवर्षयो हंसरूपमास्थाय निदाघसमये प्रासादोपरिशयानस्यास्य राज्ञ उपरि माला माबध्याजग्मुः । तेषामग्रेसरं हंसं संबोध्य पृष्ठत आगच्छन्नेको हंसः साद्भुतमभ्युवाच, भो भो भल्लाक्ष भल्लाक्षास्य राज्ञो जानश्रुतेर्द्युलोकं व्याप्य विद्यमानं तेजो न पश्यसि

Digitized by Google

किं, तत्तेजस्त्वां धक्ष्यति, अतस्तन्नातिलङ्घ्य न गच्छेति । भल्लाक्षेत्युपहासो भद्राक्षेत्यर्थः । इदमुपश्रुत्याग्रगामी हंसः प्रत्युवाच "कं वर एनमेतत्सन्तं सयुग्वानमिव रैक्वमात्थे"ति । अयमर्थः । वरेति सोपहाससंबोधनमवरेत्यर्थः । यद्वा वरो वराको जानश्रुतिः । 'कं' पदमाक्षेपार्थकं कथमित्यर्थः । रैक्वो नाम कश्चन ब्राह्मिष्ठः । योजयति देशान्तरं गमयति स्वारूढमिति युग्वा गन्त्री शकटी । तया सह वर्तत इति सयुग्वा तमित्यर्थः । तथा चैनं वराकं जानश्रुतिं प्राणिमात्रं सन्तं मूढमरे सयुग्वानं भगवन्तमसह्यतेजसं रैक्वमिव कथमेतद्वचनं ब्रवीषि । इदं श्रुत्वाऽयं राजा ब्रह्मविद्यार्थं रैक्वसमीपं गत्वा कृतार्थो भविष्यतीति दयापूर्णो हंसानामभिप्रायः । अथैष राजा हंसप्रयुक्तमनादरवाक्यं श्रुत्वा स्वस्यात्यन्तनिकर्षमुत्कृष्टतां च रैक्वस्य ज्ञात्वा दुःखितमनाः कथमपि निशामतिवाहयांबभूव । ततो निशावसानसूचकं बन्दिवृन्दसमारब्धस्तुतिसहस्रसंवलितमङ्गलतूर्यनिर्घोषमाकर्ण्य तल्पतलस्थ एव राजा झटिति यन्तारमाहूयादिदेश, विविक्तदेशेषु पर्वतगुहादिषु तेषु तेषु रैक्वाह्वयं सयुग्वानमन्विष्य यत्नतोऽस्मभ्यमाचक्ष्वेति । स यन्ता तथैव क्वचिदतिविविक्तदेशे शकटस्याधस्तात्सन्तं पामार्तं कण्डूयमानं दृष्ट्वाऽयमेव रैक्व इति निश्चित्यातिकुशलो रैक्वस्य तैस्तैरिङ्गितैर्गार्हस्थ्येच्छां धनेच्छां चोन्नीय राज्ञे निवेदयामास । स राजा तन्निशम्य गवां षट्शतानि हारं रथं चाश्वयुक्तमादाय सत्वरं रैक्वमुपससाद । उपसद्य चोवाच, हे रैक्वेदं सर्वं गवादि गृहीत्वाऽनुशाधि मां भगवन्निति । अथैवमुक्तवन्तं ससम्भ्रमं सस्पृहं चोवाच रैक्वः, "अह हारेत्वा शूद्र तवैव सह गोभिरस्त्व"ति । अहेति निपातः । साटोपाह्वानमाह । हारेण

युक्तो रथो हारेत्वा गोभिः सहितस्तवैवास्तु किमेनाच-
न्मात्रेण मम निर्वाहानुपयोगिनेति भावः । एवं स्थिते
चिन्ता, किं शूद्रस्य ब्रह्मविद्यायामधिकारोऽस्ति न वेति ।
अस्तीति तावत्प्राप्तम् । कस्मात् । अर्थित्वादिसम्भवात्,
वेदाध्ययनसाध्याहवनीयाद्यभावेनाग्निसाध्यकर्मानधिका-
रेऽपि देवादिवद्विद्यायामधिकारसम्भवात्संवर्गविद्यायां
मुमुक्षौ जानश्रुतौ शिष्ये रैक्वेण गुरुणा शूद्रशब्दप्रयोगा-
च्चेति । अत्र ब्रूमः । न शूद्रस्य ब्रह्मविद्यायामधिकारः,
उपनयनाभावेन वेदाध्ययनाभावात् । न हि वेदवाक्य-
विचारसाध्यब्रह्मविद्यायामनधीतवेदस्याधिकारः सम्भ-
वति, शास्त्रीयसामर्थ्याभावात् । न चैवं सति देवानाम-
प्यनधिकार इति साम्प्रतं, तेषां स्वयंप्रभातवेदत्वात् । न
च शूद्रस्यापि लिखितपाठादिना वेदप्राप्तिरिति युक्तं,
गुरूपसदनपूर्वकाध्ययनसंस्कृतवेदस्यैव ब्रह्मविद्याद्युपकार-
कत्वात् । न च शूद्रशब्दश्रवणलिङ्गेन तस्याधिकारो, न्याया-
भावेन लिङ्गस्यासाधकत्वात् । तर्हि वैदिकशूद्रशब्दोऽन-
र्थकः स्यादित्याशङ्क्य तं व्याख्यातुमिदं सूत्रं "शुगस्य"
इत्यादि । अस्य जानश्रुतेः क्षत्रियस्य तदनादरश्रवणात्तस्य
हंसस्यानादरश्रवणाद्या शुगुत्पन्ना सा शूद्रशब्देन सूच्यते
हि रैक्वेण । स्वस्य सर्वज्ञत्वज्ञापनार्थं रैक्वः शूद्रशब्दं प्रयु-
क्तवानिति भावः । शूद्रशब्दं योगेन क्षत्रिये वर्तयति "त-
दाद्रवणा"दिति । तस्याः शुचा जानश्रुतिं प्राप्तत्वादि-
त्यर्थः । यद्वा तस्य जानश्रुतेः शुचं प्राप्तत्वादिति । अथवा
तं रैक्वं प्रति जानश्रुतिः शुचा दुद्रावेति शूद्रो जानश्रुतिरु-
च्यते । अतो न शूद्रस्याधिकारः ॥

ननु मुख्य एव शूद्रो जानश्रुतिरस्तु, किं जघन्येन
योगेनेत्यत आह ।

Digitized by Google

क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॥ १ । ३ । ३५ ॥

जानश्रुतिर्न मुख्यशूद्रः । कुतः । क्षत्रियत्वगतेः क्षत्रियत्वावधृतेरित्यर्थः । साऽपि कुतः । उत्तरत्र संवर्गविद्यावाक्यशेषे चैत्ररथेन प्रसिद्धक्षत्रियेणाभिप्रतारिनामकेन सह समभिव्याहारात्मकलिङ्गादित्यर्थः । सजातीयानामेव हि प्रायेण सहचारो भवतीति भावः । एवं ह्यभिप्रतारी संकीर्त्यते, "अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं सूदेन परिविष्यमाणौ ब्रह्मचारी बिभिक्षे" इति । संवर्गविद्याविध्यनन्तरमर्थवादारम्भार्थोऽथशब्दः । शुनकस्यापत्यं शौनकं कापिगोत्रं कापेयं पुरोहितमभिप्रतारिणं च नाम्ना राजानं कक्षसेनस्यापत्यं काक्षसेनिं तौ भोक्तुमुपविष्टौ सूदेन पाचकेन परिविष्यमाणौ सेव्यमानौ भिक्षितवानित्यर्थः । अस्य चाभिप्रतारिणश्चैत्ररथत्वं कापेयेन चित्ररथपुरोहितेन योगादवगन्तव्यम् । चित्ररथपुरोहितत्वं च कापेयानां श्रुतौ प्रसिद्धं, "एतेन वै चित्ररथं कापेया अयाजयन्" इति । एतेन द्विरात्रेण । समानान्वयानां हि प्रायेण समानान्वया एव याजका भवन्ति । ननु चित्ररथपुरोहितकापेययोगादभिप्रतारिणश्चैत्ररथत्वं भवतु । तथाऽपि कथं क्षत्रियत्वमिति चेन्न, "तस्माच्चैत्ररथिर्नामैकः क्षत्रियपतिरजायत" इति श्रुतेः । तस्माच्चित्ररथादित्यर्थः । एवमभिप्रतारिणः क्षत्रियत्वे सिद्धे, तत्समभिव्याहारात्मकलिङ्गाज्जानश्रुतेः क्षत्रियत्वमिति सिद्धम् ॥

संस्कारपरामर्शात्तदभावाभिलापाच्च ॥ १ । ३ । ३६ ॥

आद्यसूत्रे वेदाध्ययनाङ्गोपनयनाभावान्न जातिशूद्रस्याधिकार इत्युक्तम् । इदानीं तु ब्रह्मविद्याङ्गोपनयना-

भावान्न तस्याधिकार इत्युच्यत इति भेदः । इतश्च न जातिशूद्रस्याधिकारः । कस्मात् । विद्याप्रदेशेषूपनयनसंस्कारपरामर्शात् । "तं होपनिन्ये," "अधीहि भगव इति होपससाद," 'ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा एष ह वै तत्सर्वं वक्ष्यतीति तेह समित्पाणयो भगवन्तं पिप्पलादमुपसन्ना इति । अयमर्थः । तं विद्याऽर्थिनमाचार्यः किलोपनिन्य उपनीतवाननुपनीताय विद्यादानायोगादिति तात्पर्यम् । सनत्कुमारं प्रति नारदोऽ"धीहि भगव" इतीमं मन्त्रमुच्चार्य गुरूपसदनं कृतवानित्याह "धीही"ति । भरद्वाजादयः षडृषयः परं ब्रह्म पर वेनोपगतवन्त इति ब्रह्मपरास्तज्ज्ञाननिष्ठाश्च ब्रह्मनिष्ठाः परं परमार्थरूपं ब्रह्म विचारयन्तो निर्णयार्थमेष पिप्पलादस्तज्जिज्ञासितं सर्वं वक्ष्यतीति निश्चित्य रिक्तहस्तानां गुरूपसदनायोगात्समित्पाणयः सन्तस्तमुपसन्नाः किलेत्याह "ब्रह्मे"ति । ननु "तान्हानुपनीयैवे"त्यनुपनीतानामपि वैश्वानरविद्यायामधिकारश्रुतेरनियतमुपनयनमिति चेन्न, निषेधस्य प्राप्तिपूर्वकत्वात्प्राप्तोपनयनानां प्राचीनशालादीनां द्विजातीनामेवाधिकारात् । निषेधस्तु विद्योपदेष्टुरश्वपते राज्ञो न्यूनवर्णत्वादूर्ध्वपृच्छ्यः । तान्प्राचीनशालादीनृषीननुपनीयैवाश्वपती राजोवाचेति श्रुत्यर्थः । ननु शूद्रस्याप्युपनयनं कल्प्यतामित्याह "तदभावाभिलापाच्चे"ति । "न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हति," "शूद्रश्चतुर्थो वर्ण एकजाति"रित्यादिनोपनयनादिसंस्काराभावाभिलापादित्यर्थः । पातकं भक्ष्याभक्ष्यविभागाभावकृतम् । एकजातिरुपनयनरहितः । इति स्मृत्यर्थः । किञ्च ।

तदभावनिर्धारणे च प्रवृत्तेः ॥ १ । ३ । ३७ ॥

जाबालो हि मृतपितृको गुरूपसदनं कर्तुं कामो गोत्रमजानानो मातरं पप्रच्छ "किं गोत्रोऽहमस्मी"ति । सा चाप्यहं न जानामीत्युवाच । ततः स जाबालो गौतममुपससाद । उपसद्य चोवाच, हे भगवन् ब्रह्मचर्यं चरितुं त्वय्यीच्छामि मामनुगृह्णातु भवा"निति । ततो गौतमेन किं गोत्रोऽसीति पृष्टः सत्यकामो जाबाल आह, नाहं गोत्रं वेद नापि मन्मातेति । ततः स गौतमस्तदीयेन सत्यवचनेन जाबालस्य शूद्रत्वाभावं निश्चित्य प्रवव्रृते "नैतदब्राह्मणो विवक्तुमर्हति समिधं सोम्याहरोप त्वा नेष्ये न सत्यादगा" इति । एतत्सत्यवचनं विविच्य निःसन्दिग्धं वक्तुमब्राह्मणो नार्हत्यतस्त्वं न सत्यादगाः सत्यवचनान्नातिगतोऽस्यतस्त्वामुपनेष्ये तदर्थं समिधमाहरे त्यर्थः । ततश्च सूत्रस्यायमर्थः । तस्य शूद्रत्वस्याभावनिर्धारणे सत्येव विद्योपदेशप्रवृत्तिदर्शनादिति । तस्मान्न शूद्रस्याधिकारः ॥

श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च ॥ १ । ३ । ३८ ॥

इतश्च न जातिशूद्रस्याधिकारः । कुतः । स्मृतितः, वेदश्रवणस्य तदध्ययनस्य तत्प्रयोजनयोरर्थज्ञानानुष्ठानरूपयोरर्थयोः प्रतिषेधादित्यर्थः । एवं स्मरन्ति, "अथास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रपूरण"मिति श्रवणस्य निषेधः । त्रपुजतुभ्यां स्रुतसाभ्यां सीसलाक्षाभ्यामस्य शूद्रस्य द्रुताभ्यां श्रोत्रद्वयपूरणं वेदश्रवणप्रायश्चित्तमित्यर्थः । "पद्यु ह वा एतत् श्मशानं यच्छूद्रस्तस्माच्छूद्रसमीपे नाध्येतव्य"मित्यध्ययननिषेधः । न ह्यश्रुतस्याध्ययनं सम्भवति । पद्युपादयुक्तं सञ्चारसमर्थमिति यावत् । तादृशं श्मशानं यच्छूद्र इत्यन्वयः । "न शूद्रायमतिं दद्या" दिति तदर्थज्ञाननिषेधः । "द्विजातीनामध्ययनमिज्यादा-

न''मिति तदर्थानुष्ठाननिषेधः । दानशब्देनात्र नित्यदानमुच्यते । नैमित्तिकदाने शूद्रस्याप्यधिकार इति द्रष्टव्यम् । विदुरधर्मव्याधप्रभृतीनां तु पूर्वजन्मकृतश्रवणादिना गर्भस्थवामदेववज्ज्ञानोत्पत्तिर्मन्तव्या । तस्मान्न कथमपि ब्रह्मविद्यायां शूद्रस्य वेदपूर्वकोऽधिकार इति सिद्धम् ॥

कम्पनात् ॥ १ । ३ । ३९ ॥

समाप्तः प्रासङ्गिकोऽधिकारविचारः । इदानीं प्रकृतं वाक्यार्थविचारं प्रवर्तयिष्यामः । ''शब्दादेव प्रमित'' इत्यत्र ब्रह्मवाक्ये जीवानुवादो ब्रह्मैक्यज्ञानायेत्युक्तम् । न तथेह ''यदिद''मित्यादिवाक्ये प्राणानुवादो युक्तः, प्राणस्य स्वरूपेणापि कल्पितस्य ब्रह्मैक्यायोगादिति प्रत्युदाहरणसङ्गत्याऽस्यारम्भः । प्रासङ्गिकत्वाभावाव्यवहितेन सङ्गत्यपेक्षा । पूर्वपक्षे प्राणोपास्तिः फलं, सिद्धान्ते निर्विशेषब्रह्मज्ञानमिति भेदः । काठकवाक्यं पठ्यते ''यदिदं किञ्च जगत्सर्वं प्राण एजति निःसृतं महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ती''ति । अस्यार्थः । यत्किञ्चेदमवशिष्टं जगत्सर्वं प्राणे निमित्ते सत्येजति वेपते । ''एजृ कम्पने''इति धातोः कम्पनार्थकत्वात्कम्पनं वेपथुरेवेति वेपत इत्युक्तम् । तच्च जगत्तस्मादेव निःसृतमुत्पन्नम् । तच्च प्राणाख्यं जगत्कारणं महद्भयमविच्छिन्नम् । बिभेत्यस्मात्सर्वं वाय्वादीति भयं, ''भीषाऽस्माद्वातः पवत''इत्यादिश्रुत्यन्तरात् । तदेव भयहेतुत्वं निरूपयति ''वज्र''मिति । उद्यतं वज्रमिवेत्यर्थः । प्राणाख्यब्रह्मज्ञानस्य मोक्षहेतुत्वमाह ''य''इति । अत्र संशयः, किं प्राणशब्देन मुख्यप्राणवायुं गृहीत्वा वज्रशब्देन चाशनिहेतुं वायुं लक्षयित्वोभयविषयकमेकमुपासनं विधेयं, उत निर्विशेषं ब्रह्मानेन

वाक्येन प्रतिपाद्यमिति । तत्र तावदुपास्तिपरमिति युक्तं, प्राणशब्दस्य तत्र प्रसिद्धेः । वायौ हि पर्जन्यभावेन विवर्तमाने विद्युन्मेघवृष्ट्यशनयो जायन्त इत्यशनिहेतुवायुलक्षकत्वं वज्रशब्दस्यापि युक्तम् । न च मोक्षफलश्रवणविरोधः, "एतस्माद्वायुरेव व्यष्टिर्वायुः समष्टिरपमृत्युं जयति य एवं वेदे"ति वायुवेदनस्यापि मोक्षहेतुत्वश्रवणात् । इत्येवं प्राप्ते ब्रूमः । "शब्दादेव प्रमित" इति व्यवहितमपि मण्डूकप्लुत्याऽनुवर्तते । अस्मिन्वाक्ये प्राणादिशब्दात्परमात्मैव प्रमितः । कुतः । कम्पनात् । सर्वशब्दवाच्यस्य सवायुकस्य जगतः कम्पनाज्जीवनादिचेष्टाहेतुत्वादित्यर्थः । ब्रह्मण्यपि प्राणशब्दप्रयोगो बहुलं वेदे दृष्टः "प्राणस्य प्राण"मित्यादौ । वज्रशब्दोऽपि भयहेतुत्वसाम्यादुपपद्यत इत्युक्तं वाक्यार्थकथनसमये । कम्पनहेतुत्वं ब्रह्मणः श्रुत्यन्तरे प्रसिद्धं "न प्राणेन नापानेन मर्त्यो जीवति कश्चन—इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ" विति । इतरेणात्मना । एतौ प्राणापानौ । किञ्च कम्पनवाक्यात्पूर्वमुत्तरत्र च ब्रह्मोक्तेरिहापि ब्रह्मग्रहणं न्याय्यम् । "तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते तस्मिँल्लोकाः श्रितास्सर्वे तदु नात्येति कश्चने"ति पूर्ववाक्ये ब्रह्मोक्तम् । शुक्रं ज्योतिष्मदमृतं कूटस्थम् । उक्तं सर्वाधिष्ठानत्वं व्यतिरेकमुखेनाह "तदु ने"ति । किञ्चन जडं तद्ब्रह्म नात्येत्यनतिक्रमेण न वर्तत इत्यर्थः । तथोत्तरत्रापि "भयादस्याग्निस्तपति भयात्तपति सूर्यो भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चम" इति । अस्येश्वरस्य भयादग्न्यादयः स्वव्यापारे नियमेनानुवर्तन्ते राजाज्ञया भृत्यादिवदिति । उक्ताग्न्याद्यपेक्षया मृत्योः पञ्चमत्वम् । यदुक्तं वायुवेदनस्य मोक्षहेतुत्वं श्रुतमिति तन्न, विशेषसामान्यात्मकस्य व्यष्टिसम-

ष्टिवायोर्ज्ञानादपमृत्युनिवृत्तिमात्रश्रवणात् । तस्मादनेन वाक्येन निर्विशेषं ब्रह्म ज्ञेयमिति सिद्धम् ॥

ज्योतिर्दर्शनात् ॥ १ । ३ । ४० ॥

पूर्वं सर्वशब्दश्रुतिसङ्कोचानुपपत्त्या प्रकरणात्प्राणशब्दं ब्रह्मेत्युक्तम् । न तथेह सम्प्रसादवाक्ये प्रकरणानुग्राहकं किञ्चिदस्ति येन प्रकरणाज्ज्योतिश्शब्दं ब्रह्म स्यादिति प्रत्युदाहरणसङ्गत्याऽस्यारम्भः । पूर्वपक्ष आदित्योपास्त्या क्रममुक्तिः, सिद्धान्ते ब्रह्मज्ञानान्मुक्तिरिति फलभेदः । छान्दोग्ये प्रजापतिविद्यायां श्रूयते "य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष" इति । एतदर्थो दहराधिकरणेऽनुसंधेयः । तत्र संशयः, किं ज्योतिश्शब्देन प्रसिद्धसूर्यादितेजोऽभिधीयते, उत ब्रह्मेति । तत्र सूर्यादीति युक्तं प्रसिद्धत्वात्, "अथ या एता हृदयस्य नाड्य" इत्यादिनाडीखण्डे, "अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमत" इति मुमुक्षोरादित्यप्राप्त्यभिधानादत्रापि ज्योतिरुपसम्पद्येति श्रवणाच्च। अयमर्थः । विशेषज्ञानोपरमानन्तर्यमथशब्दार्थः । यत्र प्रारब्धकर्मावसानकाले । एतदुत्क्रमणं यथा तथेति क्रियाविशेषणम् । अस्मादभिमानविषयाद्देहादुत्क्रमणं यदाकरोत्यथ तदैतैरेवादित्यस्य रश्मिभिरालम्बनैरारूढः सन्नाक्रमत उपरि गच्छति तत आदित्यं गच्छतीति । एवं प्राप्तेऽभिधीयते । ज्योतिरत्र ब्रह्मैव । कुतः । दर्शनात् । "य आत्माऽपहतपाप्मे"त्युपक्रमालोचनया ब्रह्मण एव प्रतिपाद्यतयाऽनुवृत्तिदर्शनादित्यर्थः । यदुक्तं मुमुक्षोरादित्यप्राप्तिरभिहितेति तन्न, अस्य निर्गुणब्रह्मप्रकरणत्वात् । न हि निर्गुणब्रह्मविदो गत्यु-

त्क्रान्ती स्तः, "अत्र ब्रह्म समश्नुत" इति श्रुतेः। तस्मात्परं ज्योतिर्ब्रह्मैहोपसम्पत्तव्यत्वेन निर्दिश्यत इति सिद्धम् ॥

आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥ १ । ३ । ४१॥

पूर्वमुपक्रमवशादर्थान्तरे प्रसिद्धोऽपि ज्योतिश्शब्दः स्वार्थात्प्रच्यावितः । तथाऽऽकाशोपक्रमवशाद्ब्रह्मादिशब्दोऽपि स्वार्थात्प्रच्याव्यतामिति दृष्टान्तसङ्गत्येदमारभ्यते । पूर्वपक्षे भूताकाशाभिन्नसर्वाधिष्ठानभूताकाशात्मकब्रह्मण उपास्त्या क्रममुक्तिः, सिद्धान्ते सर्वाधिष्ठानब्रह्मधिया साक्षान्मुक्तिरिति फलभेदः । छान्दोग्येऽन्ते श्रूयते "आकाशो ह वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मे"ति । ते नामरूपे यस्माद्ब्रह्मणो भिन्ने तदित्यर्थः । यद्वा नामरूपे यस्य ब्रह्मणोऽन्तरा मध्ये वर्तेते तदित्यर्थः । तत्र किमाकाशशब्देन भूताकाश उच्यत उत परमात्मेति विशये, रूढया भूताकाश इति प्राप्ते ब्रूमः। परमात्मैवाकाशशब्दवाच्यः । कस्मात् । अर्थान्तरत्वादिव्यपदेशात् । "ते यदन्तरे"त्याकाशस्य नामरूपाभ्यामर्थान्तरत्वेन व्यपदेशात् । न हि नाम.य.न्तः पातितस्याकाशस्य भूतस्य स्वस्मादर्थान्तरत्वं युक्तम् । आदिशब्देन "तद्ब्रह्मे"त्यादिना ब्रह्मत्वादिव्यपदेशो द्रष्टव्यः। तस्मादाकाशः परमात्मा ज्ञेय इति सिद्धम्।

सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ १ । ३ । ४२ ॥

"व्यपदेशा"दित्यनुवर्तते। पूर्वं नामरूपाभ्यां भेदेन व्यपदेशादाकाशो ब्रह्मेत्युक्तम् । तदयुक्तं "प्राज्ञेनात्मना सम्परिष्वक्त" इत्यत्राभिन्ने जीवे भेदोपचारादि.या.शङ्क्य, प्राज्ञशब्दस्य ब्रह्मपरतया स भेद औपचारिक इति समाधानात्सङ्गतिः। पूर्वपक्षे जीवानुवादेन कर्मशेषकर्तुः स्तुतिः

फलं, सिद्धान्ते जीवानुवादेन प्रत्यग्ब्रह्मैक्यधीरिति विवेकः । बृहदारण्यके षष्ठप्रपाठके "कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष" इत्युपक्रम्य सुषुप्त्याद्यवस्थामध्य उपन्यस्य "स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपति"रित्युपसंहारो दृश्यते । अस्यायमर्थः । देहादीनामन्यतमो वा तदतिरिक्तो वाऽऽत्मेति जनकस्य प्रश्ने याज्ञवल्क्यस्योत्तरं "योऽयमिति" । विज्ञानं बुद्धिस्तन्मयस्तत्प्रायः । प्राणेषु हृदीति व्यतिरेकार्थे सप्तम्यौ । प्राणबुद्धिव्यतिरिक्त इत्यर्थः । बुद्धवृत्तेर्विविनक्ति, "अन्त"रिति । अज्ञानाद्भिन्न इति ज्योतिरिति । पुरुषः पूर्णः । योऽयमेवंभूतः स आत्मेत्यर्थः । स्वाधीनं सर्वं नियन्तुं शक्तिरस्यास्तीति वक्तुं "सर्वस्येशान" इत्युक्तम् । स्वाधीनं स्वनियम्यं च सर्वमधिष्ठाय पालयतीति वक्तुं "सर्वस्याधिपति"रित्युक्तमिति । अत्र संशयः, किमयं वाक्यसन्दर्भो जीवानुवादकः उत जीवानुवादेनासंसारिस्वरूपप्रतिपादनपर इति । तत्रावस्थाद्युपन्यासात्परमात्मवाचकशब्दाभावाज्जीवानुवादक इति प्राप्ते ब्रूमः । विज्ञानमयसुषुप्त्यवस्थावज्जीवानुवादेन ब्रह्माभेदप्रतिपादनपरोऽयं वाक्यसन्दर्भो न जीवानुवादकः । कस्मात् । सुषुप्त्युत्क्रान्त्योरवस्थयोः शारीराद्भेदेनेश्वरस्य प्राज्ञशब्देन व्यपदेशात् । तथा हि सुप्तौ तावद्व्यपदेशो दृश्यते "तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमेवमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तर"मिति । उत्क्रान्तावपि, "अयं शारीर आत्मा प्राज्ञेनात्मनाऽन्वारूढ उत्सर्ज-

न्याती"ति श्रुतिः शारीराद्भेदेन परमात्मानं प्राज्ञशब्देन व्यपदिशति । अन्वारूढोऽधिष्ठितः । उत्सर्जन्वेदनातः शब्दं कुर्वन्निति यावत् । ननु भेदव्यपदेशमात्रेणाभेदप्रतिपादनपरोऽयं सन्दर्भ इति कथं गम्यत इति चेदुच्यते । "ध्यायतीव लेलायतीवे"त्यादिग्रन्थप्रवृत्तिदर्शनात् । बुद्धौ ध्यायन्त्यां स्वपरमात्मा ध्यायतीव चलन्त्यां चलतीव वस्तुतो न ध्यायति न चलतीत्यर्थः । एव "मत ऊर्ध्वं विमोक्षायैव ब्रूही"ति पदे पदे प्रश्नः, "अनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुष"इति पदे पदे प्रतिवचनं च वाक्यसन्दर्भस्याभेदपरत्वे फलयति । अस्यार्थः । अतः कामादिविवेकानन्तरं मोक्षसाधनीभूतसाक्षात्कारायैव ब्रूहीति जनकप्रश्नार्थः । तेन जाग्रद्भोगादिनाऽनन्वागतोऽस्पृष्टो भवत्यसङ्गत्वादिति ॥

पत्यादिशब्देभ्यः ॥ १ । ३ । ४३ ॥

इतश्च जीवस्यासंसारित्वप्रतिपादनपरमिदं वाक्यजातं, यतोऽस्मिन्वाक्ये पत्यादयः शब्दा असंसारित्वप्रतिपादनपराः संसारित्वप्रतिषेधपराश्च दृश्यन्ते । "सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपति"रित्यसंसारित्वप्रतिपादनपराः । "स न साधुना कर्मणा भूयान्नो एवासाधुना कनीया"नित्याद्याः संसारित्वप्रतिषेधका इति । तस्मादसंसारिपरमात्मस्वरूपप्रतिपादनपरोऽयं वाक्यसन्दर्भ इति सिद्धम् ॥

इति प्रथमाध्यायस्य तृतीयः पादः ॥

एवं तावत्प्रथमे पादे जिज्ञास्यत्वेन प्रतिज्ञाते ब्रह्मणि जगज्जन्मादिकारणे सर्वज्ञे समन्वयं वेदान्तानां प्रसाध्य

Digitized by Google

ब्रह्मलक्षणस्य प्रधानेऽतिव्याप्तिमाशङ्क्याशब्दत्वेन निराकृत "मोक्षतेर्नाशब्द"मित्यत्र । तदनन्तरं स्पष्टब्रह्मलिङ्गानि वाक्यानि सर्वाणि समन्वितानीत्यप्युक्तम् । द्वितीय-तृतीयपादयोरस्पष्टब्रह्मलिङ्गानि प्रायश उपास्यगानि ज्ञेय-गानि च समन्वितानीत्युक्तम् । इदानीं तु प्रधानस्याश-ब्दत्वमसिद्धं, क्वचिच्छाखासु तत्परशब्दानामपि दर्शना-दित्याशङ्क्य तेषामन्यपरत्वप्रतिपादनार्थमयं पाद आर-भ्यते ।

आनुमानिकमप्येकेषामिति चेन्न शरीररू-पकविन्यस्तगृहीतेर्दर्शयति च ॥ १ । ४ । १ ॥

पूर्वस्मिन्सूत्रसन्दर्भे ब्रह्मैव जगत्कारणं वेदान्तप्रति-पाद्यं न प्रधानादीत्युक्तमयुक्तं, ब्रह्मवत्प्रधानस्यापि जग-त्कारणत्वेन वेदान्तबोध्यत्वात्, न च कारणद्वयवैयर्थ्यं कल्पभेदेन व्यवस्थानादिति ब्रह्माङ्गीकारेणाक्षेप इत्याक्षे-पसङ्गतिः पूर्वग्रन्थेनास्याधिकरणस्य सूत्रकारैरेवा "प्येक" शब्दौ प्रयुञ्जानैः सूचिता । अव्यवहिताधिकरणेन तु प्रसि-द्धजीवोक्तिभङ्गेनाप्रसिद्धब्रह्मोक्तिवदप्रसिद्धप्रधानोक्तिप-रमेव काठकवाक्यमस्त्विति दृष्टान्तसङ्गतिः । प्रधानस्या-शब्दत्वप्रतिपादनेन ब्रह्मणि वेदान्तानां समन्वयदार्ढ्या-दिस्त श्रुत्यध्यायसङ्गतिः । अविरोधनयपर्यन्तं पदविचार-त्वात्सर्वेषां नयानामापादं पादसङ्गतिः । पूर्वपक्षे ब्रह्म-ण्येव वेदान्तानां समन्वय इति नियमाभावः फलं, सि-द्धान्ते तु तादृशनियम इति विवेकः । काठकवाक्यं पठ्यते, "आत्मानं रथिनं विद्धि शरीरं रथमेव तु बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च । इन्द्रियाणि हयान्याहुर्विषयां-स्तेषु गोचरानात्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ।

सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पद''मिति । अनियतेन्द्रियादेः पुंसः संसारित्वं नियतेन्द्रियस्याध्वनः पारं विष्णोः परमं पदमिति भावयित्वा किं तदध्वनः पारं विष्णोः पदमित्याकांक्षायां तेभ्य एवेन्द्रियादिभ्यः परत्वेन परमात्मानं विष्णोः पदं दर्शयन्ति, ''इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनो मनसश्च परा बुद्धिर्बुद्धेरात्मा महान्परः । महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गति''रिति । अस्यार्थः । आत्मनो भोक्तृत्वेन प्राधान्याद्रथित्वं रथस्वामित्वम् । स्थूलं शरीरं भोगायतनत्वेन गुणतया रथसमम् । विवेकाविवेकवृत्तिभ्यां बुद्धिरेव शरीरद्वारा भोक्तारं सुखे दुःखे वोपनयतीति सारथिः । मनसाऽश्वरशनास्थानीयेन विवेकिना विषयेभ्य इन्द्रियाणि निगृह्यन्ते, तेनाविवेकिना विषयेषु प्रवर्त्यन्ते, तेन युक्तं मनसः प्रग्रहत्वम् । इन्द्रियाणि संयतानि मुक्तिद्वारं प्रापयन्त्यसंयतान्यनर्थं संसारमिति हयत्वं तेषाम् । यथाऽश्वो मार्गमालक्ष्य चलत्येवमिन्द्रियहयाः स्वार्थमुपलभ्य चलन्तीति । शरीरादिषु मध्ये शब्दादीनां विषयाणां मार्गत्वम् । ननु मार्गे रथिनो रथाद्यपेक्षा न भोगे चिद्रूपतया स्वभावेनैव तद्भोगादित्यत आह '' त्मे'' ति । आत्मा भोक्तेत्याहुरिति सम्बन्धः । तस्यासङ्गस्यार्थेन्द्रियासन्निकर्षे भोगायोगादिन्द्रियमनोयोगो यथाभवतीति क्रियाविशेषणेन भोक्तृत्वमाह ''न्द्रिये''ति । भावे निष्ठा । यद्वाऽऽत्मा देहस्तद्युक्तमात्मानं भोक्तेत्याहुरिति योजना । यद्यप्यन्तरङ्गत्वादिन्द्रियाणामर्थापेक्षया परत्वं तथाऽपीन्द्रियाणां ग्रहत्वमर्थानां शब्दादीनामतिग्रहत्वं श्रुतौ निर्दिष्टमित्यर्थानामेव परत्वम् । गृह्णन्ति वशीकुर्वन्ति पुरुषपशुमिति ग्रहा इन्द्रियाणि । तेषां ग्राहकत्वं विषया-

धीनमित्यतिग्रहा विषयाः । तेनातिग्रहतयाऽर्थानां प्राधान्यमित्याह "न्द्रियेभ्य"इति । सर्वेन्द्रियार्थव्यवहारस्य मनोमूलत्वान्मनसोऽर्थेभ्यः परत्वम् । निश्चयात्मकबुद्धिद्वारा विषया भोक्तुरुपकुर्वन्तीति संशयात्मकमनसो बुद्धेः प्राधान्यम् । पूर्वं यो रथित्वेनोक्त आत्मा स भोक्ता बुद्धेः परः । भोगोपकरणत्वात्तस्याः स्वामित्वाद्यात्मनो महत्त्वम् । यदि महत्त्वस्यात्मविशेषणत्व "आत्मनः परमव्यक्त"मिति स्यात्तस्य विशेष्यत्वादिति ब्रूषे, तदा महच्छब्देन हिरण्यगर्भबुद्धिरुच्यते । तस्या व्यष्टिबुद्धिव्यापनादात्मत्वं च । एवं भूतहिरण्यगर्भबुद्धिं स्मृतिर्दर्शयति "मनो महान्मतिर्ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वरः । प्रज्ञा संविच्चितिश्चैव स्मृतिश्च परिपठ्यत"इति । अयमर्थः । सर्वे प्रथमान्ता हिरण्यगर्भबुद्धिपराः । तस्या मनस्त्वे सन्देहरूपत्वं स्यादित्यत आह "मति"रिति । महत्त्वमुपपादयति "ब्रह्मे"ति । भोग्यजाताधारत्वमाह "पू"रिति । निश्चयात्मत्वमाह "बुद्धि"रिति । चितिशक्तिमती ख्यातिः । ईश्वरो नियामकः । प्रज्ञा लौकिकप्रकृष्टज्ञानम् । संविज्ज्ञानफलम् । उपासकस्य तत्प्राप्तिश्चितिः । चित्प्रधाना स्मृतिर्ज्ञातसर्वार्थानुसन्धानशक्तिमती । चित्तप्रसिद्धिमुक्तबुद्धावनुकूलयति 'परी'ति । श्रुतिरपि "यो ब्रह्माणं विदधाति पूर्व"मित्यादिका हिरण्यगर्भबुद्धौ वेदाविर्भावमीश्वरानुग्रहाद्दर्शयन्ती तस्या उक्तरूपत्वमाह । एतादृशी बुद्धिः सर्वासां बुद्धीनां परोत्कृष्टा । अस्मिन्पक्षे पुरुषग्रहणेनैव तदभिन्नो रथी भोक्ता गृहीतो द्रष्टव्यः । "आत्मानं रथिनं विद्धी"त्यादिवाक्यनिर्दिष्टाः सर्वे गृहीताः । अवशिष्टं रथत्वेन कल्पितं शरीरमव्यक्ताख्याविद्याकार्यं लक्षणयाऽव्यक्तशब्देन निर्दिशति "महतः परमव्यक्त"मिति । एवं

वस्तुगत्याऽर्थः प्रदर्शितः । तत्र संशयः, किमव्यक्तशब्देन प्रधानमुच्यते, उत पूर्वप्रकृतं शरीरमिति । तत्र सांख्यस्मृतौ महदव्यक्तपुरुषशब्दानां तत्त्वत्रये प्रसिद्धत्वादव्यक्तं प्रधानमेवेत्याह “नुमानिकमप्येकेषामिति चे”दिति । अनुमानगम्यं प्रधानमप्येकेषां शाखिनां प्रत्यक्षमव्यक्तशब्देन पठ्यत इत्यशब्दत्वमसिद्धमिति चेदिति सूत्रावयवार्थः । परिहरति “ने”ति । कुतः “शरीरे”ति । शरीरस्य पूर्ववाक्ये रथरूपेण विन्यस्तस्य कल्पितस्याव्यक्तशब्देन गृहीतेर्ग्रहणादित्यर्थः । रूपकात्मना रथात्मना विन्यस्तं रूपकविन्यस्तं शरीरं च तद्रूपकविन्यस्तं च तत्तथोक्तं तस्य गृहीतेरिति विग्रहः । कथं शरीरपरोऽव्यक्तशब्दस्तत्राह “दर्शयति चे”ति । पूर्वापरवाक्यसन्दर्भः पर्यालोच्यमान औचित्येन प्रकृतं परिशिष्टं च शरीरमेवाव्यक्तशब्दबोध्यं दर्शयतीत्यर्थः ॥

ननु स्थूलशरीरस्य व्यक्तशब्दार्हस्य कथमव्यक्तशब्दार्हत्वमित्यत उत्तरं पठ्यते ॥

सूक्ष्मं तु तदर्हत्वात् ॥ १ । ४ । २ ॥

दर्शयतीत्यनुषङ्गः । तुशब्दः शङ्कानिरासार्थः । स्थूलशरीरारम्भकभूतानां सूक्ष्मं कारणमव्यक्तशब्देन दर्शयति । कुतः । तदर्हत्वादव्यक्तशब्दार्हत्वादित्यर्थः “गोभिः श्रीणीत मत्सर”मित्यादिवत्प्रकृतिवाचकशब्देन विकारो लक्ष्यत इति भावः । गोभिर्गोविकारैः पयोभिर्मत्सरं सोमं श्रीणीत मिश्रं कुर्यादित्यर्थः ॥

ननु भूतसूक्ष्मात्मकाव्यक्ताङ्गीकार आगतः प्रधानकारणवादः, सांख्यैस्तस्यैव प्रधानत्वेनाङ्गीकारादित्यत आह ।

Digitized by Google

तदधीनत्वादर्थवत् ॥ १ । ४ । ३ ॥

इतः प्रधानकारणवादो न मयाङ्गीकृतः । कुतः । तद-धीनत्वादीश्वराधीनत्वाङ्गीकारात् । स्वतन्त्रं चेतनानधि-ष्ठितमव्यक्तं जगत्कारणमिति सांख्यमतम् । सिद्धान्ते त्वीश्वराधिष्ठितं मायाविद्याकाशादिशब्दवाच्यं जगत्का-रणमिति महद्वैलक्षण्यम् । नन्वीश्वरादेव जगदुत्पत्तावव्यक्तवैयर्थ्यमित्याशङ्क्याह, "अर्थव" दिति । प्रयोजनवदि-त्यर्थः । "देवात्मशक्तिं स्वगुणैर्निगूढाम्", "मायां तु प्रकृतिं विद्या"दिति श्रुतिसिद्धमीश्वरस्य सहकारिभूतमव्यक्तमवश्यमङ्गीकर्तव्यम् । न हि शक्तिरहित ईश्वरः कार्यलेशं वा कर्तुं समर्थोऽसङ्गत्वादिति तात्पर्यम् । नन्वेवमपि कथं शरीरस्य महतः परत्वं, कथं वाऽव्यक्तकार्यत्वस्येन्द्रियादीनामविशेषे स्थूलशरीरस्यैवाव्यक्तपदार्हत्वमिति चेदुच्यते । महच्छब्दवाच्यभोक्त्रपेक्षया हिरण्यगर्भ-बुद्ध्यपेक्षया वाऽव्यक्ताख्याविद्यायास्तावत्परत्वं सर्वसिद्धं, तदधीनत्वाङ्गीकारादेः । तथा च तन्निष्ठपरत्वं तद्विकारे देह उपचर्यते । इन्द्रियादीनां तत्कार्यत्वाविशेषेऽपि स्वस्व-शब्दैरेवोपात्तत्वात्परिशेषात्प्रकृताकांक्ष्यव्यक्तशब्देन स्थूल-देहग्रहणं न्याय्यमिति । आचार्यदेशीयैः सूत्रद्वयमिदम-न्यथा व्याख्यातम् । शरीरं द्विविधं, स्थूलं सूक्ष्मं च । द्वयमपि पूर्ववाक्ये रथत्वेन गृहीतम् । उत्तरस्मिन्वाक्ये सूक्ष्ममेवाव्यक्तशब्देन गृहीतं तदर्हत्वात् । तस्यार्थवत्तद-धीनत्वाद्बन्धमोक्षव्यवहारस्येति सर्वथाऽपि प्रधानस्य ना-वकाशः ॥

अपि च ।

ज्ञेयत्वावचनाच्च ॥ १ । ४ । ४ ॥

दिदृश्यते तच लाघवात्सामानाधिकरण्येन कार्यकारणभावस्यैव युक्तत्वं अन्यथर्मेणान्यपरिणामे ऽतिप्रसङ्गात् अदृष्टकल्पनापत्तेश्च तस्य च वायुरधिष्ठात्री देवता सूर्यश्चक्षुर्भूत्वा प्राण इत्यादि श्रुतेः" तस्मात्तेषामेव परिणामभेदाः प्राणाः ज्ञानादिहेतुपरिणामस्तु करणानीति भेदः देवतयाऽभेदात्तु सूर्यश्चक्षुरिति वायुः प्राण इति व्यवहारः । यत्त्वत्र भाष्ये प्राणादिजीवनशब्दाभ्यां प्राणादिनामकवायुक्रियाविशेषहेतुः प्रयत्नभेद एवोक्तः स च करणनिष्ठ इति भाष्यार्थ इति तन्न तस्य क्रियापञ्चतयी मुखनासिकागतिः प्राण इत्यग्रिमभाष्ये प्राणादीनां गत्यादिवचनेन विरोधात् अत एव लिङ्गशरीरमध्ये प्राणा न गण्यन्ते करणे प्रवेशात् तन्त्र करणसामान्यस्य क्रियेत्यलक्षितपरिणामभेदः पञ्चविधः तत्र प्राणो मुखनासिकागतिराहृदयं समसमनुरूपं नाडीषु रसानां नयनात्समानो हृदयान्नाभिपर्यन्तवृत्तिः मूत्रपुरीषगर्भाणामयनत्वहेतुरपानो नाभेः पादतलपर्यन्तवृत्तिः । ऊर्ध्वगतिप्रदत्वादूसादूर्ध्वयनाद्वोदानो नासिकाग्राद्ब्रह्मरंध्रपर्यन्तवृत्तिः । सर्वदेहव्यापिवृत्तिकोऽचलनादिहेतुर्व्यानः एषां प्राणः प्रधानं प्राणोपदृश्नाति पिबतीति तेनैवान्येषां धारणात् प्राणमुत्क्रामं तमनु सर्वे प्राणा उत्क्रामन्तीति तदुत् क्रमे सर्वेषामुत्क्रमेण श्रवणाच्च अतो मुख्यनाम्ना सर्वेषां व्यवहारात् पञ्चप्राणा इत्यादि व्यवहारोपपत्तिः । तस्योदानस्य शास्त्रोक्तसंयमेन जपाज्जलपङ्ककंटकादिष्वसङ्गो त्रिकारहेतोः संयोगस्य तेरभावः तथार्चिरादिमार्गगमनाय स्वेच्छया मरणकाले उत्क्रान्तिश्च भवति ।

समानजयाज्ज्वलनम् ॥ ३९ ॥

संयमविशेषेण समानजयात्तेजस उपध्मानं कृत्वा सतीवत्स्वशरीरम् ज्वलयति दहतीत्यर्थः ।

श्रोत्राकाशयोः सम्बन्धसंयमाद्दिव्यं श्रोत्रम् ॥४०॥

सर्वश्रोत्राणामाकाशं कर्णशष्कुल्यवच्छिन्नम् । प्रतिष्ठा अधिष्ठानं । उपकारापकाराभ्यां श्रोत्रस्योपकारापकारदर्शनात् । इन्द्रियाणां प्रकाशात्मकतया प्रकाशात्मकान्तःकरणोपादानकत्वेन भूतोपादानकत्वाभावात् । तद्भूतसंसृष्टतयोपचारैस्तु परेषां भौतिकत्वव्यवहारः शब्दस्य च गुणिपरिणामत्वे तदाश्रयाधिष्ठानं श्रोत्रयोगादनन्तत्वे तु सम्यगेव शब्दप्रतिष्ठानमाकाशस्य एवं च श्रोत्रशब्दयोराश्रय आकाशम्। श्रोत्राणामाकाशाश्रयत्वं पञ्चशिखेनाप्युक्तम् । तुल्यदेशश्रवणानामेकश्रुतित्वं सर्वेषां भवतीति । अस्यार्थः कालभेदेन तुल्यदेशानि श्रवणान्युपस्थानानि येषां पुंसां तेषामेकदेशावच्छिन्नश्रोत्रकत्वं तत्तत्काले भवतीत्यर्थः स चैकदेशस्तद्देशावच्छिन्नमाकाशं एवं च यः प्रतियमाहंकारिकश्रोत्रमयस्कान्तमणितुल्येन वक्तृशक्तस्थेन शब्देनाकृष्टं स्ववृत्तिपरम्परया वक्तृशक्तगतं शब्दं गृह्णाति अत एव तत्तद्दिग्देशवर्तित्वेन शब्दप्रतीतिर्जीवमात्रस्योपपन्ना: एवं च यानि तन्मात्ररूपाण्याहंकारिकाणि पृथिवीजलवायुतेजोरूपभूताधिष्ठानानि । स्वाश्रयवृत्तिगन्धादिगुणसहकारेणैव तेषां बाह्यपृथिव्यादिगुणगन्धादिग्राहकत्वं तदेतत् श्रोत्रमाकाशस्य लिङ्गं । मूर्तद्रव्यस्य निराश्रयस्थितेरभावात् । गन्धवत् । कर्णशष्कुली च न तस्याधारो लोकान्तरगतिकाले तदभावात् । नापि शून्यमाधारः अभावानभ्युपगमादभावस्य भावाधारत्वासम्भवाच्च । नापि पृथिव्यादिकं तदाश्रयः आश्रयगतस्वसजातीयगुणसहकारेणैव तेषां स्वग्राह्यगुणग्राहकत्वात् । नापि कर्णशष्कुल्यवच्छिन्नः पुरुषस्तदाश्रयः बिवरपिधानेऽपि तदवच्छेदेन चैतन्याभिव्यक्तया पुरुषादेरनावृततया शब्दग्रहणप्रसङ्गात् । तस्मात्पिधानयोग्यं परिशेषादाकाशमेवाश्रयः एवं शब्दाश्रयोऽप्याका-

Digitized by Google

शमेव । न वायुः द्रव्यान्तरपूरिते वंशादौ वायुसंयोगेन शब्दप्रस-ङ्गात् । न च छिद्रवायुसंयोगोऽपि शब्दकारणम् । तथासति संयोगा-धारतया छिद्रस्य द्रव्यत्वसिद्धौ तस्यैव शब्दाश्रयताया युक्तत्वात् । एवमवकाशरूपावरणमप्याकाशलिङ्गम् । अन्यथा स्थाल्यादिष्वन्त-स्तेजः प्रवेशो न स्यात् । न च पुरुष एवावकाशः आवरणासम्भवात् । न च दिक्कालावेवावकाशस्तयोर्नभःपरिणामविशेषत्वात् तथा विभ्वप्या-काशं परिच्छिन्नत्वे हि मूर्तत्वापत्तौ अतश्च पृथिव्यादिस्थले मूर्ताना-मसमानदेशत्वरूपानावरणादर्शनात् अस्य मूर्तान्तरैर्घटादिभिः समान-देशत्वदर्शनाद्विभुत्वेनामूर्तत्वसिद्धेः किं चानावरणस्याकाशलिङ्गत्वे सिद्धे यत्र यत्रानावरणं तत्र तत्राकाशमिति सर्वगतत्वेन विभुत्व-सिद्धिः । न ह्याकाशस्य विभुत्वे कथं कार्यत्वं कथं चाकाशपरमाणुक-थनमिति वाच्यं आकाशस्याप्यन्तःकरणवद्वैशेषिकारणां पृथिव्यादि-वच्च कार्यकारणरूपेण द्वैविध्यात् तत्र कारणाकाशं तमोगुणविशेष एव । तदानीमाकाशताव्यञ्जकशब्दादिविशेषगुणाभावात् । कारण-पृथिव्यादिवत् तच्च कारणाकाशं गुणान्तरोपष्टब्धं सद्यत आदौ शब्दजननयोग्यार्थरूपेण परिणमते क्षीराब्धिरिवामृतमथनेऽत उद-धिरूपेण ततश्चाणुसङ्घातेनैव महापृथिवीवद्वैव महाभूताकाशमह-ङ्कारापेक्षयापरिच्छिन्नं वायोरावरणमुपपद्यते । एवमन्तःकरणोत्पत्ति-रपि बोध्या । एवं च क्रियायाः करणसाध्यत्वाच्छब्दग्रहणक्रियया तत्करणं श्रोत्रमनुमीयते । न च चक्षुराद्येवतदस्तु बधिराबधिरयोरि-तरेन्द्रियसत्त्वेऽपि बधिरस्य शब्दाश्रवणात् तयोःश्रोत्राकाशयोः सम्ब-न्धसंयमात् दिव्यं तन्मात्रादिसूक्ष्मशब्दग्राहकं श्रोत्रं भवति । इद-मुपलक्षणं त्वग्वातयोश्चक्षुस्तेजसो रसनाजलयोर्घ्राणपृथ्व्योः सम्ब-न्धसंयमाद्दिव्यं त्वगादीत्यपि बोध्यम् ।

कायाकाशयोः सम्बन्धसंयमात् लघुतूलसमापत्तेश्चाकाशगमनम् ॥ ४१ ॥

चोऽत्र वार्थे। यथासनादौ कायस्तच्छरीरावच्छेदेन चाकाशं तिष्ठति तस्यावकाशदातृत्वादतः कायस्य यस्तेन सम्बन्धः प्राप्तिरूपस्तत्र सम्बन्धे कृतसंयमस्तत्सम्बन्धं साक्षात्कारेण वशीकृत्य लघुषु वा तूलादिष्वापरमाणुभ्यः संयमेन स्वायत्तीकृताकाशसम्बन्धः प्रथमं लघुर्भवति येन जले पृथिव्यामिव पद्भ्यां सञ्चरति। तत ऊर्णनाभितन्तुमात्रे विहृत्य रव्यादिरश्मिषु विहरति ततो यथेष्टमाकाशगतिरस्य भवति।

बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः ॥ ४२ ॥

शरीराद्बहिर्मनसो वृत्तिलाभो बहिर्वस्तूनां सङ्कल्पवशताद्रूपः सा विदेहानामधारणेति संज्ञिका। सा यदि शरीरप्रतिष्ठस्य मनसो बहिर्वृत्तिमात्रेण भवति तदा कल्पितेत्युच्यते। या तु त्यक्तशरीरस्यापि मनसो बहिर्वृत्तिः सा खल्वकल्पिता। सा च कल्पितया साध्यते। यया साधितया परशरीराण्याविशन्ति योगिनः सेयमकल्पिता महाविदेहेत्युच्यते। अनया च प्रकाशात्मनो बुद्धिसत्त्वस्य यदावरणं क्लेशाः कर्म च विपाकत्रयं च रजस्तमोमूलकम् तस्य समूलस्य क्षयो भवति तेषां क्षये च निरावरणं योगिनश्चित्तं स्वेच्छया विहरति च जानाति च। इदानीं ग्रहीतृग्रहणग्राह्यसंयमसिद्धिमध्ये ग्रहीतृग्रहणयोर्ग्राह्यनिरूप्यत्वादादौ तत्संयमसिद्धिमाह।

स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः ॥ ४३ ॥

स्थूलं च स्वरूपं च सूक्ष्मं चान्वयश्चार्थवत्त्वं च तेषु साक्षात्कारपर्यन्तसंयमाद्भूतानां जयो वशवर्तित्वमित्यर्थः पृथिव्यादि पञ्चभूतानां

सामान्यविशेषसमूहरूपाणामेकैकाधिकास्तन्मात्रभिन्नाः शब्दादयो विशेषा यस्य गन्धाकारादिभिर्धर्मैः सह धर्मधर्मिणोर्भेदाभेदाभ्यां स्थूलशब्देन शास्त्रे उक्ता विशेषाश्च षड्जगान्धारादयः शीतोष्णादयो नीलपीतादयो मधुराम्लादयः सुरभिदुरभिदुर्गन्धादयश्च । एते हि नामरूपादिभिः परस्परस्माद्भिद्यन्त इति विशेषाः आकारादयश्च । आकारो गौरवं रौक्ष्यं वरणं स्थैर्यमेव च । वृत्तिर्भेदः क्षमा कार्ष्ण्यं काठिन्यं सर्वभोग्यतेति भूमेः । आकारोऽवयवसंस्थानविशेषः वरणमावरकत्वं । वृत्तिः सर्वभूताधारता । भेदो विदारणं क्षमा धारणसामर्थ्यम् । स्नेहः सौक्ष्म्यं प्रभा शौक्ल्यं मार्दवं गौरवं च यत् । शैत्यं रक्षा पवित्रत्वं संधानं चौदका गुणाः २ । रक्षा आवरणादिना रक्षकत्वं ऊर्ध्वभाक्पाचकं दग्धृपावकं लघुभास्वरम् । प्रध्वंस्योजस्वि वै तेजः पूर्वाभ्यां भिन्नलक्षणम् ३ । तिर्यग्यानं पवित्रत्वमाक्षेपो नोदनं बलम् । चलमच्छायता रौक्ष्यं वायोर्धर्माः पृथग्विधाः ४ आक्षेपः पातनं छायाशून्यत्वमच्छायता । सर्वतोगतिरव्यूहो विष्टम्भश्चेति ते त्रयः । आकाशधर्मा व्याख्याताः पूर्वपूर्वविलक्षणाः ५ सर्वतो गतिर्व्यापकत्वम् अव्यूहः सर्वपदार्थानां प्रविरलीकरणम् अविष्टम्भोऽवकाशः एतत्स्वपोतगन्धरूपेण्यादं रूपं भूतानां । द्वितीयं रूपं स्वरूपं तु सामान्यं साधारणमतञ्च यथा भूमेः सांसिद्धिककाठिन्यरूपमूर्तिर्व्यङ्ग्या पृथिवीत्वजातिः । सामान्यविशेषयोरभेदात्तु मूर्तिर्भूमिरिति भाष्ये प्रयुक्तं स्नेहव्यङ्ग्यजलत्वजातिर्जलस्य । वोष्ण्यव्यङ्ग्यतेजस्त्वजातिस्तेजसः । वहनशीलत्वरूपप्रणामित्वव्यङ्ग्यवायुत्वजातिर्वायोः । विभुत्वव्यङ्ग्याकाशत्वजातिराकाशस्य कार्यरूपेणाकाशस्याप्यनेकत्वात् । इदं चोक्तशब्दादिविशेषाणां सामान्यं ते हि तां तां जातिमितरेभ्यो व्यावर्तयन्ति । तत्तज्जात्याश्रयाणां च परस्परं भेदं कुर्वन्ति । तदुक्तं स्वजातिस-

मन्वितानामेवं तत्तद्रसादि धर्ममात्रेण सजातीयान्तराद्व्यावृत्तिरिति सामान्यविशेषसमुदायो ऽवयवास्ते द्रव्यं अतिरिक्तावयव्यभ्युपगमे ऽपि तयोरभेदाभ्युपगमात् । अन्यथा घटो मृत् तन्तवः पट इत्यभेदप्रत्ययानुपपत्तिः अवयवानुपलम्भे तदपलापे तदाधारतानुपपत्तेश्च तदतिरिक्तावयव्यनुपलब्धेश्च तत्र सामान्यं नाम घटे घटव्यक्तिरूपघटपरमाणुमत्त्वं रूपक्रियादीनामप्यस्मन्मते द्रव्यत्वात् सर्वत्र तत्तद्व्यक्त्यनुपगमोऽस्त्येव अनुगताकारप्रतीतिजनक इति बोध्यम् । न च समूहमात्रस्य द्रव्यत्वे वनस्याप्येकद्रव्यत्वापत्तिः समुदायस्य द्वाभ्यां प्रकाराभ्यां स्थिते तथा हि एकः शब्देनानुपस्थितभेदकावयवेष्वनुगतः यथा शरीरं वृक्ष इत्येकद्रव्यरूपः समूहः यूथवनमिति चानेकद्रव्यरूपस्तदनुगतसमूहः यूथादौ विशिष्टस्यातिरिक्तत्वाभिप्रायेणावयवानुगतत्वं बोध्यम् । अपरस्तु शब्दोपस्थितभेदकावयवेष्वनुगतः समूहः यथोभये देवमनुष्याः । अत्रोभयशब्दवाच्यस्य समुदायस्योभावयवौ यस्येति व्युत्पत्त्या तदवयवभेदस्योपादानात् । देवमनुष्या इति शब्देन च बहुवचनेन च तयोरप्यनेकेऽवयवा भेदेनोपात्ताः अत्र हि समूहस्य देवा एको भागः मनुष्या द्वितीयो भागः ताभ्यामेव च समूहो ऽभिधीयते स द्विविधोऽपि समुदायो भेदाभेदाभ्यां प्रयोक्तृभिर्विवक्षितो भवति । यथा आम्राणां वनं ब्राह्मणानां संघ इति षष्ठ्या भेदेन आम्रवनं ब्राह्मणसंघ इति च कर्मधारये ऽभेदेन स द्विविधो ऽपि पुनर्द्विविधः । युतसिद्धावयवः अयुतसिद्धावयवश्च युत सिद्धत्वं पृथग्भावेन सिद्धत्वं आद्यो वनं संघो यूथ इति तदवयवानां गोवृक्षादीनां सान्तरालत्वात् अन्त्यः शरीरं वृक्षः परमाणुरिति परमाणूनां पञ्चचतुरादि तन्मात्रसमूहत्वात् तदवयवानां निरन्तरत्वात् तेष्वयुतसिद्धावयवभेदानुगतः समूहो द्रव्यमिति पतञ्जलिः संयोगविशेषावच्छिन्नेष्ववयववि-

शेषेषु अनुगतः सामान्यविशेषसमूहोऽवयव्याख्यं द्रव्यमिति तदर्थः । अवयवसाधारणं लक्षणं तु सामान्यविशेषसमुदायविशेषत्वमेवेति बोध्यम् । सामान्यविशेषाभ्यां द्रव्यमिति तु न युक्तं तन्मते तत्र समुदायोऽस्ति न वा अन्त्ये तु भवदपलापः तदाधारत्वासम्भवश्च आद्ये तु तदेवास्तु द्रव्यं तदतिरिक्तस्य तदाधारस्यानुपलम्भाच्च सावयवो ऽवयवसमुदायवत् एतत्स्वरूपमित्युक्तं स्वरूपत्वं च स्थिरतामात्रेण विशेषाद्यागमापायित्वान्न स्वरूपाणि आद्यपादे तु स्थूलस्वरूपे एकीकृत्य वितर्कानुगतविषयः स्थूलमित्युक्तं एवमेव विचारानुगतस्य त्रैविध्यमपि द्रष्टव्यं । एषां भूतानां सूक्ष्मं रूपं तु पञ्च तन्मात्रं भूतानसाक्षात्कारणत्वात् तस्य हि भूततन्मात्रस्यैकावयवकार्यं परमाणुः सोऽपि घटादिवदेव सावयवः द्व्यादि तन्मात्रकार्यत्वात् अन्यथा स्थूलत्वानुपपत्तेः इत्येवं परमाणोरपि सूक्ष्मत्वात् तन्मात्राणि सूक्ष्माणीत्युक्तानि एतत्तृतीयं रूपं अन्वयाख्यं चतुर्थं रूपं तु ख्यातिक्रियास्थितिशीलाः सत्त्वरजस्तमोरूपा गुणास्ते हि कार्यरूपो यः स्वीयो भावः स्वात्मकः पदार्थस्तदनुगतत्वादन्वयशब्देनोच्यन्ते कार्यमात्रे सुखदुःखमोहात्मकत्वदर्शनेन तदनुगम उन्नीयते अर्थवत्त्वरूपं पञ्चमं रूपं गुणेषु वर्तमानं भोगापवर्गजननं भोगविवेकख्यातिरूपं तत् । न च गुणेषु तद्वर्तमानत्वेऽपि भूतानां कथमर्थवत्त्वं गुणानां तन्मात्रभूतभौतिकेष्वनुगतत्वात् । यद्यपि भोगापवर्गावन्तःकरणे एव तथापि अनागतावस्थया वासनारूपेण वा प्रलये गुणेष्ववस्थानान्न दोषः तद्वर्तमानेषु स्थूलभूतेषु पञ्चसु पञ्चरूपेषु संयमात्तस्य रूपस्य दर्शनं वशीकाररूपो जयश्च भवति तत्र पञ्चभूतस्य रूपाणि जित्वा भूतेषु जयी भवति । एकैकमात्रजये हि भागो भूतजयः तज्जयाद्वत्सानुसारिण्य इव गावोऽस्य सङ्कल्पानुविधायिन्यो भूतकारणानि भूतप्रकृतयो भवन्ति इति दिक् ।

तेषां सङ्कल्पानुविधायित्वे यत्फलं तदाह ।

ततोऽणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघातश्च ॥४४॥

तत्राणिमा ऽणुत्वं सङ्कल्पमात्रेण तत्तया देवाश्रयवादपक्षये न देहस्य सौक्ष्म्यं । तद्भूतप्रकृतिवशित्वात् । लघिमा लघुत्वं गुरुतरशरीरस्यापीषीकातूलवल्लघुत्वं २ महिमा महत्त्वं यथा विक्रमादेः ३ इन्द्रियैः प्राप्तिः यथा भूमिष्ठोऽङ्गुल्यग्रेण चन्द्रं स्पृशति ४ एताश्चतस्रः स्थूलसंयमसिद्धयः प्राकाम्यं इच्छानभिघातः इच्छायां सत्यामस्य रूपं भूतस्य स्वरूपेणे च्छिद्यते भूतस्वरूपतां जितत्वात् यथा जलमिव भूमिमुद्भिद्योन्मज्जति उत्तिष्ठति जले इव भूमौ मज्जति प्रविशति च । एषा स्वरूपसंयमस्य सिद्धिः ५ वशित्वं भूतेषु व्यष्टिषु भौतिकेषु तत्कार्येषु वशीभवति स्वेच्छया परिणमने समर्थो भवति न तु ब्रह्मांडादिषु समष्टिभूतेषु जगद्व्यापारवर्जमिति वेदान्तसूत्रेणादिसर्गसामर्थ्यवर्जनात् । तत्कारणतन्मात्रविजयात् रागादिना तेषामवश्यश्च भवति । सूक्ष्मसंयमसिद्धिफलमिदं ६ ईशित्वं एषां भूतानां तन्मात्रद्वारकोत्पत्तिविनाशयोर्व्यूहाव्यूहसंस्थानविशेषे च सामर्थ्यं भूतानां मूलप्रकृतिजयात् । एषान्वयसंयमसिद्धिः ७ कामावसायित्वं सत्यसङ्कल्पता । यथा सङ्कल्पस्तथा भूतप्रकृतीनां गुणतन्मात्राणामवस्थानं परिणामः विजितार्थसम्बन्धो हि योगी दुस्तु यदर्थतया सङ्कल्पयति तत्तदर्थकमेव भवति विषमप्यमृतत्वेन सङ्कल्प्य भोजयन् जीवयति । न चैवं जलमपि तेजः कुर्याद्गुणमप्यधर्मं मत्यश्चः स्यैव स्यात् । यत्केनापि पदार्थे विपर्यासाकरणात् पूर्वपूर्वयोगिनां यथा दृष्टेष्वेव सङ्कल्पात् । धाता यथा पूर्वमकल्पयत् इति स्वनियमपालनार्थमन्तर्यामिणा तथैव सिद्धानां प्रेरणात् । अर्थवत्त्वसंयमसिद्धि-

रेवा ८ इत्यणाद्यैश्वर्याणि कायसंपत्तद्धर्मानभिघातः पृथिवी मूर्त्या न निरुणद्धि योगिनः शरीरादिक्रियां शिलामप्यनुप्रविशति नापः स्निग्धाः क्लेदयन्ति नाग्निरुष्णो दहति न वायुः प्रणामी वहति अनावरणात्मकेऽप्याकाशे भवत्यावृतकायः सिद्धानामप्यदृश्य इति ॥ एष च संयमातिशये सति सङ्कल्पं विनैव भवतीति । प्राकाम्यादेः पृथगुक्तकायसंपदमाह ॥

रूपलावण्यबलवज्रसंहननानि कायसंपत् ॥ ४५ ॥

दर्शनीयकान्तिमान् अतिशयबलः वज्रवद्दृढगात्रश्च भवति योगी ।

ग्रहणसंयमसिद्धीराह ।

ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः ॥ ४६ ॥

ग्रहणं च स्वरूपं चास्मिता चान्वयश्चार्थवत्त्वं चेति पञ्च । सामान्यविशेषात्मा शब्दादिर्विषयं तेष्विन्द्रियाणां वृत्तिरालोचनं विषयाकारपरिणामश्चिन्तावधारणाभिमानसंयमरूपादन्तःकरणसाधारणवृत्तिवत्तृष्णादिलक्षणाद्दर्शनस्पर्शनादिरूपाग्रहणं यद्यप्येषापि स्मृत्यनुरोधादन्तःकरणस्य तथापि चक्षुराद्युपक्रमेण भवतीति दर्शनादिस्वचक्षुरादीनामुच्यते । न चालोचनशब्दार्थो निर्विकल्पकज्ञानं चक्षुरादिमात्रवृत्त्येवास्तु सर्ववृत्तीनां चित्तनिष्ठत्वस्य भाष्ये उक्तत्वात् यत्तु बौद्धः इन्द्रियवृत्तिः सामान्यमात्रविषया विशेषस्तु मनोमात्रगोचरः तदुक्तं इन्द्रियं सामान्यमात्रेण यत् ग्रहणं तदाकारं तद्रूपवृत्तिमदिति तन्न । तस्य विशेषस्येन्द्रियेणानालोचितस्य मनसा ग्रहणानुपपत्तेः । मनसो बहिरस्वातन्त्र्यात् अन्यथा चक्षुराद्यगोचराणामपि मनसा विशेषग्रहणप्रसङ्गात् अन्धबधिरादिमनसापि रूपग्रहणापत्तेश्च बाह्यविषयसामान्यग्रहणस्य तेनान्तर्निष्ठविशेषग्रहणे हेतुत्वेन न दोष इति

Digitized by Google

चेत् । लाघवेनेन्द्रियाणां विशेषविषयग्रहणाकारत्वकल्पनमेवोचितं इन्द्रियाणां द्वितीयं रूपं स्वरूपं तु प्रकाशात्मनो बुद्धिसत्त्वस्य कार्ये ऽयुतसिद्धा अवयवभेदाः सात्त्विकाहङ्काररूपास्तेष्वनुगतः सामान्यविशेषरूपयोः समूहो द्रव्यमिन्द्रियं । एवं विशेषरूपं ग्रहणरूपानीलपीताद्याकारावृत्तिरूपाः परिणामाः सामान्यं च चक्षुरादि इन्द्रियाणां सात्त्विकाहङ्कारकार्यत्वात् प्रकाशात्मकत्वं । तेषामिन्द्रियाणां तृतीयं रूपमस्मितालक्षणो ऽहङ्कारः अभिमानाख्यवृत्तिनिरासायास्मितालक्षण इन्द्रियस्मितावृत्तिक इत्यर्थकम् । यथा च तन्मात्रस्य सामान्यस्य भूतानि विशेषास्तथा । अहङ्कारस्य सामान्यस्येन्द्रियाणि विशेषास्तत्कार्यत्वात् इन्द्रियेष्वनुगतत्वाद्वाहङ्कार इन्द्रियाणां रूपं भूतानां तन्मात्रवत् चतुर्थं रूपं व्यवसायाख्यमहत्तत्त्वरूपबुद्धिरूपेण परिणताः सत्त्वरजस्तमोगुणा येषामिन्द्रियाणि साहङ्काराणि कार्यं । पञ्चमरूपं इन्द्रियवृत्तिगुणेष्वनुगतं पुरुषार्थवत्त्वं पञ्चस्वेतेष्विन्द्रियरूपेषु यथाक्रमं ग्रहणादक्रमेण संयमः कार्यः एवं तत्र जयं कृत्वा पञ्चरूपजयात्सर्वरूपैरिन्द्रियवङ्कृत्यानुविधायिन्यो भवन्तीति दिक्

अथ सत्रीकारस्तेन चेन्द्रियप्रकृतयः ॥

ततो मनोजवित्वं विकरणभावः प्रधानजयश्च ॥ ४७ ॥

कायस्यानुत्तमो मनोवच्छीघ्रतरे गतिलाभो मनोजवित्वं तत्कर्मेन्द्रियवृत्तिजयाद्भवति स्थूलदेहसंपर्कराहित्येन विदेहानामिन्द्रियाणां चित्तस्य चाभिप्रेतदेशकालविषयापेक्षा वृत्तिलाभो विकरणभावोऽभिहितेति यावत् सर्वेषां व्यक्तिभेदेनानन्तानां भूतेन्द्रियप्रकृतीनां सत्त्वादिगुणानां तद्विकाराणां च स्वेच्छया नियोजनं प्रधानजयः भूतजयरूपपूर्वभूमिकायामेव तज्जये कृतेपि उत्तरभूमिकायामेकीकृत्य सर्वजयकथनान्न विरोधः एता एव पूर्वस्थाने प्रकृतिलया इत्युच्यन्ते ।

एतास्तिस्रः सिद्धयो मधुप्रतीकसंज्ञा उच्यन्ते एताश्च करणपञ्चकस्य ग्रहणादिपञ्चरूपस्य जयादधिगम्यन्ते । प्रकृतिमहदहङ्काराणामपि इन्द्रियरूपेष्वन्तर्भूतत्वात् तज्जयेन तेषामपि जयो बोध्यः ॥

अथ ग्रहीतृसंयमसिद्धिमाह ।

सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्व सर्वज्ञातृत्वं । ४८ ॥

मात्रशब्देन ख्यातेः संयमरूपत्वं लब्धं धर्मधर्म्यभेदात्संयमवत इत्यस्य सर्वभावेषु प्रकृतितत्कार्यरूपेष्वधिष्ठातृत्वं स्वेच्छया नियोक्तृत्वं सद्य एव भवति प्रकृतिपुरुषादि सर्वज्ञातृत्वं चेत्यर्थः संयमोऽत्रापि साक्षात्कारपर्यन्तः । परार्थात्स्वार्थसंयमादिति सूत्रे पौरुषेयप्रत्यये सुखाद्यनुभवरूपे परिच्छिन्न एव संयम उक्तः अत्र तु तेन संयमेन जातेऽपरिच्छिन्ने पुरुषे बुद्धिविवेकसंयम उच्यत इति विशेष तथा हि निर्धूतरजस्तमोमलस्य बुद्धिसत्त्वस्यातिसूक्ष्मवस्तुप्रतिबिम्बग्रहणसामर्थ्यरूपपरमस्वच्छत्वे जाते परमाणुपरममहत्त्वान्तोऽस्य वशीकार इत्युक्तपरवशीकारसंज्ञायां वर्त्तमानस्य सत्त्वपुरुषान्यताख्यातिमात्ररूपेण प्रतिष्ठस्य सर्वभावाधिष्ठातृत्वं करणतद्विषयात्मकार्यं सर्वभावाः प्रकाशजडरूपास्तान्तदात्मकीभूय स्वामिनं चेतनं प्रति उपस्थापकत्वं । सङ्कल्पमात्रेण येन भोग्यं वस्तु अयस्कान्तलोहवत् पुरुषमुपतिष्ठते इति यावत् । सर्वज्ञातृत्वं च सर्वपुरुषाणां बद्धमुक्तेश्वराणां शान्तोदिताव्यपदेश्यधर्मविशिष्टगुणानां च युगपत् ज्ञातृत्वं तच्च प्रकृतिपुरुषविवेकाज्जायमानत्वेन विवेकजमित्युच्यते यथा विशोका नाम सिद्धिः यां प्राप्य योगी सर्वज्ञः क्षीणक्लेशबन्धनत्वाच्छोकशून्यो वशी विहरति ।

अथास्य संयमस्य मुख्यं सिद्धिमाह ।

तद्वैराग्यादपि दोषबीजक्षये कैवल्यम् ॥ ४९ ॥

अपि: कैवल्यमित्यनेनान्वेति। तस्यां विवेकख्यातौ तज्जायां यथोक्तसिद्धौ च वैराग्यादसम्प्रज्ञातयोगेन दुःखदोषस्य बीजानामखिलवासनाकर्मणां चित्तेन सह लये सति पुरुषस्य कैवल्यं पुनर्गुणासंयोगरूपमपि विभवतीत्यर्थः। तथा हि यदास्य योगिनः क्लेशकर्मक्षयरूपसत्त्वसमाप्तौ बुद्धिसत्त्वस्यायं विवेकप्रत्ययः सत्त्वं च हेयपक्षे। पुरुषश्चापरिणामी सत्त्वादन्य इत्येवं विचारेण विरज्यमानस्य यानि क्लेशबीजानि दग्धशालिबीजकल्पानि अप्रसवसमर्थानि तानि मनसा सहास्तङ्गच्छन्ति तेषु प्रलीनेषु पुरुषस्तापत्रयं भुंक्ते तदापरवैराग्यावस्थायां एषां दुःखबीजगुणानां च चादिगुणस्थानां कार्यावस्थे मनसि क्लेशकर्मविपाकरूपेणाभिव्यक्तिस्वभावानां चरितार्थानां प्रतिप्रसवे मनसा सह लये सति पुरुषस्यात्यन्तिको गुणवियोगः कैवल्याख्यो भवति तदा स्वरूपप्रतिष्ठा चितिशक्तिरेव पुरुष इति दिक्।

कैवल्याख्यसिद्ध्यर्थिनो योगिनो यथोक्त वैराग्यदोषसाधनान्तरमाह।

स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात् ॥ ५० ॥

स्थानिनः स्वर्गादिलोकाधिकारिणो देवा इन्द्रादयस्तेषां स्वर्गलोके नयनाय योगिनो निमन्त्रणे सति सङ्गस्मययोरकरणमुपायः तत्करणे पुनरपि संसारप्रसङ्गात्। सङ्गः प्रीतिः स्मयश्च देवानां प्रार्थनेनात्मनि कृतार्थताभिमानः। तथा हि चत्वारः खलु योगिनः प्राथमकल्पिको मधुभूमिकः प्रज्ञाज्योतिरतिक्रान्तभावनीयश्च। तत्राभ्यासी प्रवृत्तमात्रज्योतिः प्रवृत्तमात्रं न तु निष्पन्नज्योतिर्ज्ञानं यस्य सः सवितर्कादिरूपापरप्रत्ययवान् प्राथमकल्पिकाख्य आद्यः ऋतम्भरप्रज्ञः ऋतं सत्यमेव बिभर्तीति यत्प्रत्ययं निर्वितर्कमथ ऋतंभराप्र-

स्मात्तद्वान् मधुभूमिको द्वितीयः। भूतेन्द्रियजयी तृतीयः प्रज्ञाज्योतिराख्यः स हि सर्वेषु भावितेषु उत्पादितेषु कृतरक्षाबन्धो यतस्तेभ्य न च्यवते भावनीयेषूत्पादनीयेषु विशोकादिसिद्ध्यादिषु असम्प्रज्ञात तेषु विहितसाधनवान् साधनविषयस्यैव पुरुषयत्नस्य साध्यनिष्पादकत्वात्। चतुर्थो निक्रान्तभावनीयः तस्य चित्तप्रतिसर्गो ऽसम्प्रज्ञातसमाधिसाध्यः स एवैकोऽर्थः कर्तव्यत्वेन शिष्यते। तत्र प्रथमभूमिकायां देवानामीदृगनुग्रह एव न भवति तृतीयचतुर्थयोस्तु देवा उपेक्षणीया एव भवन्ति। अतो मधुमती भूमिका स्वस्य निष्पन्नेत्यनुभवतो ब्राह्मणस्य स्थानिनो देवाः सत्त्वशुद्धिमनुपश्यन्तः स्थानैः इह रम्यतामिह कमनीयोऽयं भोगः कमनीयेयं कन्या रसायनमिदं जरां मृत्युं बाधते वैहायसमिदं यानं अमी कल्पद्रुमाः पुण्या मन्दाकिनी-सिद्धा महर्षयश्चेमे इमा उत्तमा अनुकूला अप्सरसः इदं च दिव्ये श्रोत्रचक्षुषी वज्रोपमः कायः स्वगुणैः सर्वमिदमर्जितमायुष्मता प्रतिपद्यतामिदमक्षयमजरममरं स्थानं देवानां प्रियमित्येवमुप निमन्त्रयन्ते अजरत्वं सदानवत्वं उपनिमन्त्र्यमाणश्च घोरेषु। संसाराङ्गारेषु पाच्यमानेन मया जननमरणान्धकारे विपरिवर्तमानेन कथञ्चिदासादितः क्लेशतिमिरविनाशी योगदीपः तस्य चैते तृष्णायोनयो विषयवायवः प्रतिपक्षाः स खल्वहं लब्धालोकः कथमनया मृगतृष्णया वञ्चितः तस्यैव पुनः प्रदीप्तसंसाराग्नेरात्मानमिन्धनीकुर्यामिति विषयप्रीतिजदोषदर्शनात् सङ्गदोषान् चिन्तयेत् एवं विचार्य सङ्गं त्यक्त्वा स्वस्ति वः स्वप्नोऽयमेभ्यः कृपणजनप्रार्थनीयेभ्यो विषयेभ्य इत्येवन्निश्चितमतिः समाधिं भावयेत् कुर्यात् एवं सङ्गन्त्यक्त्वा एवमहन्देवानां प्रार्थनीय इति स्मयमपि न कुर्यात् स्मयादयं सुस्थितं मन्यतया मृत्युना न केशगृहीतमात्मानं न भावयिष्यति एवं चास्यां तत्प्रतीतिनित्यं प्रमाद-

तीर्थः प्रमादो कार्यो मृत्युलब्धविवरस्तेनांशानुनं भविष्यति ततश्च पुनरनिष्टप्रसङ्गः एवमस्य सङ्गस्मयावकुर्वतो भावितो दृढो भविष्यति भावनीयश्चाभिमुखो भविष्यति ।

पुनः सर्वज्ञता साधकं संयमान्तरमाह ।

क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानम् ॥ ५१ ॥

विवेकात्पूर्वसूत्रोक्तसत्त्वपुरुषान्यताख्यातिरूपाज्जायमानं ज्ञानं विवेकजं ज्ञानं इतरेतरव्यावृत्ततया सर्ववस्तूनामशेषविशेषैः साक्षात्कारं तत्क्षणतत्क्रमयोः संयमादपि भवति । प्रतिक्षणं सर्ववस्तुपरिणामात् क्षणेषु तत्क्रमेषु च साक्षात्कृतेषु सर्ववस्तूनां परिणामतत्क्रमयोः साक्षात्कारात् सर्ववस्तूनां विवेकेन ज्ञानं भवतीति भावः । तत्र क्षणोनाम यथा लोष्ठादेर्भिद्यमानस्य परमापकर्षावधिः सत्त्वादिगुणविशेषः परमाणुरेवं कालस्यापकर्षावधिभूतोऽवयवविशेषः पूर्वापरांशशून्यो यः स क्षणः । यद्वा यावतासमयेन चलितः परमाणुः पूर्वदेशं जह्यात् तावान्कालः विभक्तो वा यावताकालेनोत्तरदेशेन संयुज्येत तावान्कालः क्षणः मध्यवर्तिद्रव्यस्य देशत्यागो बहुक्षणेनापि कदाचित् अवयवानां क्रमेण संचारादत उक्तं परमाणुरिति । देशस्यावयविनः क्रिययाऽनेकक्षणेन अभिमतदेशस्य गत्यावृत्तये चलित इति । क्रमस्तु तत्प्रवाहाविच्छेदः तेषां क्षणानां यः प्रवाह उत्तरोत्तरभागेनावस्थानं तस्याविरलतेति तदर्थः क्षणानां मध्यवर्तितानन्तर्यरूपतत्क्रमाणां च क्षणिकत्वादेव नास्ति वस्तुभूतः समाहारो मिलनमतो मुहूर्ताहोरात्रादयो बुद्धिसमाहारा एव । न च स्थूलकालस्य वस्तुनोऽभावे कथं लोकानां तत्र यथार्थत्वप्रतीतिः तस्यावस्तुनो बुद्धिनिर्मितस्यापि शब्दज्ञानानुपातित्वाद्व्युत्थितदर्शनानां भ्रान्तानां वस्तुस्वरूपत्वाभिमानात् । न च क्षणोऽप्येवम्भूत एवास्तु क्षणस्य वस्तुकोटिपतितत्वात् ।

आनन्तर्यरूपक्रमस्य क्षणरूपप्रतियोग्यनुयोगिघटितत्वेन तस्य वस्तुरूपत्वावश्यकत्वात् । आनन्तर्यरूपक्रमस्य क्षणरूपप्रतियोग्यनुयोगिघटितत्वेन तस्य वस्तुरूपतावश्यकत्वात् । तस्यैव कालसिद्धिः कालत्वेन कथनात् तस्य च क्षणद्वयास्थपत्वभावाद्व्याख्यातेभ्यो विभागः । कालनित्यत्वप्रतिपादकश्रुतयस्तु प्रवाहरूपकालपराः स च सत्त्वादीनां सदातनस्य परिणामविशेषः स एवाख्याकमस्थितो न तु पदार्थमात्रमिति वैदूष्मणां विशेषः । क्षणस्य स्थैर्यप्रत्यभिज्ञाद्यभावात् । यत्तु पूर्वदेशविभागाद्यवच्छिन्नः परमाणुक्रियादिरेव क्षण इति तन्न विभागस्यानतिरेके विशेष्यविशेषणतत्सम्बन्धानां त्रयाणामपि स्थिरत्वेन क्षणव्यवहारस्यानापत्तत्वात् अतिरेके तु सिद्धं न इष्टं अस्माभिरपि तादृशस्यैव गुणपरिणामस्य क्षणत्वाङ्गीकारात् नित्याखण्डकाले च न प्रमाणमस्ति इदानीमित्यादिखिलव्यवहाराणां खण्डकालमात्रविषयकत्वात् दिक्काकाश एव पूर्वादिव्यवहार इव तत्तां दुपाध्यवच्छिन्नाकाशेनैव स्थिराधारत्वेन देशव्यवहारवत् अत एव श्रुतिषु क्वचिद्दृष्टः श्रोत्रं क्वचिदाकाशाच्छ्रोत्रमिति श्रूयते तददिहत्थुमिति दिक्क्रमोऽपि वैकल्पिक एवेति मिश्राः क्षणतत्क्रमयोर्वस्तुसमाहाराभावः कुत इति चेत् । शृणु द्वयोः क्षणयोः सहभावाभावात् द्वयोः क्षणभुवोः क्रमस्यासम्भवाच्च । तथा हि पूर्वस्मादुत्तरस्य भाविनो यदानन्तर्यमव्यवधानं क्षणान्तरस्य क्रमः तस्माद्वर्तमान एक एव क्षणस्तिष्ठति न पूर्वोत्तरक्षणास्तत्सहभावेन तिष्ठन्तीत्यतो नास्ति मिलनमिति तत्समाहाराभावः अतो मुहूर्तादिविकल्प एव ये पुनर्भूतभाविवर्तमानाः क्षणास्ते सर्वेऽपि सर्ववस्तुपरिणामाः एकदेववार्थकाद्यदर्शनात् क्षणत्वेनपरिणामहेतुत्वादित्युत्तरपादे क्षणप्रतियोगीत्यादिसूत्रे व्याख्येयाः अतः एकैकेन क्षणेन सर्वो लोकः परिणाममनुभवति यतोऽ-

तस्तत्क्षणोपारूढाः सर्वे पदार्था इति तयोः क्षणतत्क्रमयोः संयमा-
त्तयोः साक्षात्कारादखिलपरिणामतत्क्रमसाक्षात्कारद्वारा सर्ववस्तूना-
मन्योन्यव्यावृत्तया स्वरूपधारणं भवतीति विवेकजं ज्ञानं भवति
तस्य विवेकजज्ञानस्य सर्वविषयकस्य शिष्यव्युत्पत्तये एकमुदाहर
णमाह ।

जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः ॥ ५२ ॥

जातिलक्षणदेशैर्भेदावधारणासम्भवे विवेकजज्ञानादेव साक्षा-
त्कारो भवतीत्यर्थः तत्र तुल्ययोर्देशलक्षणसारूप्ये जातिभेदोऽन्यताहेतु-
र्यथा गोगवययोः तुल्ययोर्देशजातितुल्यत्वे लक्षणमन्यताहेतुर्यथा काला-
क्षीयं गौरियं स्वस्तिमती गौरिति लक्षणमभिव्यक्तौ धर्मभेदः एवं
द्वयोरामलकयोर्जातिलक्षणसारूप्ये देशभेदोऽन्यत्वकरः इदं पूर्वमि-
दमुत्तरमिति यत्र जात्यादिभिरन्यत्वानुमानं न सम्भवति तादृशं
देशस्यामलकं विषयान्तरव्यग्रस्य ज्ञातुर्विवेकं करिष्यतो योगिन
उत्तरदेशे स्थाप्यते तदा द्वयोरामलकयोरेकदेशत्वे सति पूर्वदेशोपल-
क्षितमिदमिदं चोत्तरदेशोपलक्षितं वेति विवेकानुपपत्तिः तयोर्जा-
त्यादिविवेकसाम्यात् योगिनोऽसन्दिग्धेन तत्त्वज्ञानेन भवितव्यमत
उक्तं सूत्रकारेण ततो विवेकज्ञानात्प्रतिपत्तिरिति कथमेतदिति चेत्
शृणु आमलकस्य क्षणेन सहवर्तते यः पूर्वदेशः स आमलकान्तरक्ष-
णेन सहमानादुत्तरदेशाद्भिन्नः अतः स्वदेशक्षणप्राप्तिमति आमलके
भिन्ने तत् क्षणविशिष्टस्यैकदेशसम्बन्धासम्भवात् अतो भिन्नयोः पूर्वो-
त्तरदेशसम्बन्धक्षणयोः साक्षात्कारस्तयोरामलकयोरन्यत्वहेतुर्यथोक्त-
विवेकग्रहे कारणं य आमलकपूर्वपूर्वापरदेशाभ्यां पौर्वापर्यपरिणामक्षण
आसीत् । तद्देशान्तरकृतपौर्वापर्यपरिणामक्षणविशिष्टत्वमनुभवन्सं-
यमान्ते भिन्ने प्रत्येति ॥ एवं द्विविधक्षणमात्रेण ज्येष्ठकनिष्ठयोर्ज्येष्ठकनि-

स्यादेतत् । अमूल्यदानक्रयी खल्वयं संसर्गो नास्ति, यतो न भिन्नानेष्याकारमर्पयति, प्रत्यवतां तु स्वीकर्तुमिच्छतीति । तदयुक्तम् । निराकारविज्ञानवेद्यत्वव्यवस्थापनेन नीलादीनामप्यमूल्यदानक्रयित्वेनाऽसत्त्वप्रसङ्गात् । न च संसर्गिणः संसर्गं त्रातुमुत्सहते । न चायं संसर्गिभ्यो न भिद्यते । विरुद्धधर्मास्पदत्वात् । न खल्वयं संसर्गिषु परस्परं व्यावर्तमानेष्वनुवर्तमानो ऽनुवर्तमानेषु च निवर्तमानस्तदात्मा भवितुमर्हति, चैत्रोऽस्यस्येत्यप्रसङ्गात् । तेनास्तु तद्दृश्यत्वतदभावयोर्विरोधो, न पुनस्तद्दृश्यत्वाऽतद्दृश्यत्वयोर्भवितुमर्हति । न हि नञः प्रयोगमात्राद्विरोधाऽवगतिः । मा भूच्चैत्रो ऽचैत्र इति नानात्वमेकस्यापि पुंसस्येति ।

स्यादेतत् । येनैव स्वभावेनैकस्मिन्संसर्गिणि संसर्गो वर्त्तते किं तेनैव संसर्ग्यन्तरे ऽपि, किं वा स्वभावान्तरेणे? ति । न तावत्स्वभावान्तरेण । स्वभावेनोपादेयभेदे भावभेदप्रसङ्गात् । तेनैव चेत्संसर्गिणामत्यन्ताभेदप्रसङ्ग इति । तच वक्तव्यम् । अथ रूपं येन स्वभावेनोपादेयं रूपान्तरं जनयति किं तेनैव स्वाऽऽलम्बनं विज्ञानं स्वभावान्तरेण वेति तुल्यमेवैतत् । यद्युच्येत, स्वभावो वा सामर्थ्यं वा न रूपादतिरिच्यते, तदेव तु स्वप्रत्ययाऽधीनजन्मभेदमुभयजननमेकं प्रत्यक्षेणाऽवसीयमानं न भेदमर्हति । न च कारणभेदः कार्याऽभेदमापादयति, अन्यत्वात् । तत्किमिदानीं नानासंसर्गिषु एको न भासते प्रत्यक्षेण संसर्गः स्वभावासंसर्गिणः, येन ते तदभेदादभिन्ना भवेयुः । प्रतीत्यसमुत्पादमात्रं कार्यकारणभावो न भाविकः कश्चिदुभयाश्रयः, तेनाऽन्यस्य कारणस्याभेदे ऽपि न कार्यभेद इति चेत् । ननु संसर्गिभिः संसर्गस्यापि न कश्चिदपरसंसर्ग इति तदभेदे ऽपि न संसर्गिणामभेदो ऽन्यत्वात् असंबन्धः । संसर्गः कथं तेषामेवे? ति चेत् । अथाऽसंबन्धे किमिति रूपमेव प्रतीत्यरूपविज्ञाने समुत्पद्यते

न पुना रसादिकमपि ? स्वभावभेदादिति चेत् । सो ऽत्रापि तुल्यः । तस्माद्विरोधाऽसिद्धेः संदिग्धव्यतिरेकत्वादनेकवृत्तित्वं नानात्वं प्रत्यसाधनाङ्गम् । न च ग्रहणाऽग्रहणलक्षणविरोधः संसर्गे संभवति । सकलसंसर्गिग्रहणाधीननिरूपणस्य तस्याऽग्रहणे ग्रहणादेव तद्ग्रहणे वा ग्रहणादेवेति । वृत्तिविकल्पश्च साकल्यवैकल्यलक्षणो ऽत्रानवकाश एव । नानात्वे कार्यसमवायिनी साकल्यवैकल्ये नाऽभिन्ने तत्त्वे संभवः । तस्मात्स्वभावतो वर्तते संसर्गिषु संसर्ग इत्येतावद् वक्तुमीश्महे, न पुनः कार्त्स्न्यभागाभ्यामिति । एतेन समूहो व्याख्यातः, प्रत्याख्याताश्च कतिपये ऽवयविसामान्यादिनिराकरणहेतवो न सर्वे विस्तरभयात् ।

तदेवं प्रत्यक्षसंसर्गः संसर्गिद्वयाऽऽधार एको गुणगुणिनोर्जातिजातिमतोः क्रियाकारकयोरवयवाऽवयविनोर्द्रव्ययोरनुभवसिद्धो विना बाधकं न प्रत्याख्यानमर्हति । वाक्यार्थलक्षणस्तु देवदत्तः स्थाल्यामोदनं पचतीत्यादिर्यद्यपि प्रतिसंसर्गिद्वयं भिद्यते तथापि कारकाणां क्रियार्थत्वात्तस्याः प्रधानत्वेन वाक्यार्थभूतया एकत्वात्तत्प्रधानः संसर्गो ऽप्येक उक्तः । नानाकारकोपरक्तक्रियार्थत्वे ऽपि च वाक्यस्य पदार्थमात्रस्याऽन्यतः प्राप्तेः प्राप्ताप्राप्तविवेकेन संसर्गो वाक्यार्थः । तदिदमुक्तं, कारकोपसर्जनक्रियाप्रधान इति । यत्र तर्हि क्रियाद्वयं प्रतीयते यथा निजभुजवीर्यमास्थाय शूरानादिशूरो जयति, तत्र कथं वाक्यार्थस्यैकत्व ? मित्यत आह, अतुल्यप्रधानसंसर्गी । अतुल्यो ऽत एव प्रधानं संसर्गी यस्य स तथोक्तः । एतदुक्तं भवति । न क्रियेत्येव वाक्यार्थो ऽपि तु प्रधानमिति । जयार्थे च जिगीषोरादिशूरस्य निजभुजवीर्याऽऽश्रयक्रियेत्यप्रधानत्वान्न वाक्यार्थः । विजयक्रियैव तु प्राधान्यात्तथा ।

समूहो ऽपि नान्तरेण तद्भावनिमित्तमेकं समूहिनाम् । तत्र तदुपाधिरेकप्रकाशः । शशविषाणादयो ऽपि जात्यन्तरपरिदृष्टवस्तुरूपेणोत्प्रेक्ष्यमाणा वस्त्वात्मकाः प्रकाशन्ते । अन्यथैकवाक्यगम्ये नैकवाक्यता स्यात् । न च तत्र शब्दभेदः । रूपाऽभेदात् । अर्थभेदाद्भेद इति चेत् । कथमन्यथा प्रतीतो ऽन्यथा । अर्थभेदाऽनुमानादिति चेत् ।

समूहमुपपादयति—समूहो ऽपि नान्तरेण तद्भावनिमित्तमेकं समूहिनाम् । समानदेशकालाः खलु किंशुकादयः समूह इति वा वनमिति वा व्यपदिश्यन्ते, तेन सोऽपि समूहिनां संबन्ध्यनेकेन देशेन कालेन समूहभावनिमित्तेन विना न भवतीति । तत्र समूहिषु तदुपाधिरेकदेशकालोपाधिरेकप्रकाश एकविषयः प्रकाश इत्यर्थः । शशविषाणादयो ऽपि गवादिजात्यन्तरपरिदृष्टविषाणवस्तुरूपेणोत्प्रेक्ष्यमाणाः समारोप्यमाणा वस्त्वात्मकाः प्रकाशन्ते । तेनाऽन्यथापि सिद्धेः संसर्गादिष्वेकप्रत्ययप्रत्यक्षभावस्य नैकशब्दात्मप्रत्यासादिकल्पना युक्ता । अपि चाऽन्यथैकस्य शब्दात्मनः प्रत्यासेन भिन्नस्वभेदकल्पनायामेकवाक्यगम्येनैकवाक्यता स्यात् । यथा श्वेतो धावतीत्येकस्मादेव वाक्यादर्थद्वयमवगम्यते, शुक्लो निर्णेनेक्तीति कौलेयक इतो द्रुतं गच्छतीति । तदेतदर्थद्वयमेकवाक्यसमधिगम्यं तत्प्रत्यासादभिन्नमेव भासेनेत्यर्थः ।

नन्वत्रापि प्रत्यर्थं शब्दभेद इत्यत आह—न च तत्र शब्दभेदः । कुतः? रूपाऽभेदात् । न हि निर्णेजने गतौ वा वाक्यस्वरूपस्य भेदकं प्रतिपादयामहे । शङ्कते—अर्थभेदाद्भेद इति चेत् । उत्तरम्—कथमन्यथा एकत्वेन प्रतीतो ऽन्यथा नाना? पुनः शङ्कते—अर्थभेदानुमानादिति चेत् । यथा ज्वाला स्थिरा ऽवगम्यमानापि प्रत्य-

प्राक्चेदर्थभेदाभेदाववगम्येते पश्चाच्छब्दभेदाभेदाविति न शब्दप्रत्यासत्तिनिमित्तोऽर्थेष्वेकताऽवभासः। समूहैकशब्दयोश्चाऽविशेषः। अविदितसमूहशब्दस्य च तत्तदवभासो न दूरतः स्यात्। अभावे शब्द इति च भावशब्दप्रतीते-

यथाऽनुमानेनाऽऽशुतरविनाशिनी निश्चीयते एवं प्रत्यक्षाऽवगतेऽस्य-मपि वाक्यमर्थभेदान्नाना निश्चीयत इति । परिहरति - प्राक्चेदर्थभेदाऽभेदाववगम्येते, पश्चाच्छब्दभेदाऽभेदाविति न शब्दप्रत्यासत्तिनिमित्तोऽर्थेष्वेकताऽवभासः । अगृहीतभेदः खल्वर्थः शब्दगताभेदाध्यवसायादभिन्नो भासते । न हि जातु शुक्तित्वप्रतिपत्तौ रजतसमारोपो भवति । अर्थभेदश्चेत्प्राक् शब्दभेदाऽभेदाभ्यां गृहीतो नाऽर्थस्य शब्दवत्त्वभेदः शक्यसमारोप इत्यर्थः । दोषान्तरमाह - समूहैकशब्दयोश्चाविशेषः । यदि शब्दैकत्वसमारोपाद्भिन्नानामप्यर्थानामेकता ततो यथैकमाकाशमित्यभिन्नस्यैकत्वमनौपाधिकमवगम्यते तथा समूह इत्यत्रापि नोपाध्यपेतमवगम्येत । उपाध्यपेतत्वे चैकमाकाशमित्यपि न शुद्धमवगम्येतेत्यविशेषः प्रसज्यते । क्वचित्पाठः समूहैकशब्दयोश्चाऽविशेष इति । तस्यार्थः । यथा बहूनां धवादीनां समूह इत्येकशब्दनिबन्धनमेकत्वमवभासते तथा वृक्षा इत्यत्राप्येकत्वमवभासेत । न चैतदस्ति । किं च यदि शब्दप्रत्यासत्तिकृतमेकत्वम् अविदितशब्दविशेषो न रूपत एव एकमर्थमवगच्छेदित्याह—अविदितसमूहशब्दस्य च तदवभासो न दूरतः स्यात् । अपि चाऽभावेऽशब्द इति च भावशब्दप्रतिपत्तेर्विवक्षितार्थहानिः । शब्दाऽभावे खल्वभाव इति शब्द एवाध्यस्य प्रतिपत्तव्यः स च भाव इति विवक्षितार्थहानमेवमशब्द इति च शब्द इत्यर्थः । विवर्तपरिणामयोरप्येते दोषाः प्रसञ्जनीयाः ।

विधिविच्छिन्नार्थहानिः । विवर्तपरिणामयोस्तु सर्वस्यैकत्वादवान्तरैकत्वं नैकशब्दालम्बनम् । वस्त्ववस्तुविभागश्च न स्यात् । अथ तुल्येपि शब्दविवर्ते ऽन्यनिबन्धनो ऽयं विभागः । न, शब्दविवर्तनिबन्धनः । शशविषाणाऽलातचक्रा-

एष त्वधिको ऽपि परिणामविवर्तयोर्दोष इत्याह—विवर्तपरिणामयोस्तु सर्वस्यैकत्वादवान्तरैकत्वं नैकशब्दालम्बनम् । ये हि परस्परविभिन्नानां शब्दानामध्यासमाहुस्तेषामवान्तरैकत्वं गौरिति वा ऽश्व इति चोपपद्येतेव । ये पुनरभिन्नस्य शब्दब्रह्मणो विवर्तं वा परिणामं वा ऽभिमान्यन्ते तेषां सर्वेष शब्दब्रह्मणो ऽविशेषादवान्तरैकत्वं पदार्थानां वाक्यार्थानां च कुतस्त्यमित्यर्थः । किं च वस्त्ववस्तुविभागश्च न स्यात् । न ह्यस्मिन्दर्शने समस्ति तत्प्रमेयं न यच्छब्दब्रह्मणः परिणामो वा विवर्तो वा । तथाविधं च सर्वं सदेवेति नाऽसत्प्रमेयमेतेत्यर्थः । अथ शङ्कते—अथ तुल्ये ऽपि शब्दविवर्ते ऽन्यनिबन्धने ऽनाद्यविद्यावासनावैचित्र्यनिबन्धनो ऽयं विभागः । उत्तरम्—न, शब्दविवर्तनिबन्धनः । अयमभिसन्धिः । अनुभवसिद्धो नाऽसति बाधके ऽनाद्यविद्यानिबन्धनः शक्यो वक्तुम् । शब्दब्रह्मण्यपि तथाप्रसङ्गात् । तच्च शब्दविवर्तनिबन्धनस्तस्य तद्रूपतया निषेधात्मत्वाऽयोगात् । तस्मात्पारमार्थिक एवेति युक्तम् । यथाह न्यायवादी 'सत्सदिति गृह्यमाणं यथाभूतमविपरीतं च तत्त्व'मिति । नन्वस्तु तात्त्विको विभागो भावाऽभावयोः । अभावानां पुनरनधिगतस्वलक्षणभेदानां कुतः परस्परविभाग ? इत्यत आह—शशविषाणाऽलातचक्रादिषु वस्त्वाकारनिरूपणा । विभाग इत्यनुषङ्गः । यद्यपि शशविषाणाऽलातचक्राद्यभावानां न स्वरूपेण भेदस्तथाप्यवच्छेदकभावाऽधीननिरूपणत्वाद्भावानां च स्वरूपभेदात्तदुपाधिरभावानामपि परस्पर-

Digitized by Google

दिषु वस्त्वाकारनिरूपणा । पराक्रान्तमेव च बहुधा स्वयूथ्यैरित्यलमतिप्रसङ्गेन । तस्मादीप्सितस्योपायता कर्तृप्रवृत्तिहेतुः ।

ननु कर्त्तव्यतावगमात्प्रवर्त्तते, सैव तथा ऽस्तु । का पुनरियम् ? कर्त्तव्यतैव । केन प्रमाणेनाऽवगम्यते । नेन्द्रियैरध्यक्षमीक्ष्यते । तत्पुरःसरत्वान्नेतरैः । सत्यम् । न शब्दातिरेकिभिः । ननु शब्दो ऽपि संविदपेक्षयेतरसिद्धिमपेक्षते । ननु नियोगतः । शब्दे ऽपि तत्सम्भवात् । नन्वित-

विभाग इत्यर्थः । स्फोटस्वरूपनिराकरणप्रयत्नाभावं प्रति कारणमाह—पराक्रान्तमेव चाऽत्र बहुधा स्वयूथ्यैर्भाष्यकारवार्त्तिककारप्रभृतिभिरित्यलमतिप्रसङ्गेन ।

प्रकृतमुपसंहरति—तस्मादीप्सितस्योपायता कर्तुः प्रवृत्तिहेतुः । एवं पूर्वपक्षैकदेशिनि निरस्ते सम्प्रति परमपूर्वपक्षी ब्रूते—ननु कर्त्तव्यताऽवगमात्प्रवर्त्तते, सैव तथा ऽस्तु । दूषयति—का पुनरियं कर्त्तव्यता ? न निरालम्बनं ज्ञानं, न च श्रेयःसाधनता त्वयेष्यत इति भावः । पूर्वपक्षिण उत्तरम्—कर्त्तव्यतैव । यदाभासं विज्ञानं तदालम्बनं, कर्त्तव्यताऽवगमश्च कर्त्तव्यताऽऽभास इति कर्त्तव्यतैवाऽस्यालम्बनमित्यर्थः । सिद्धान्ती पृच्छति—केन प्रमाणेनाऽवगम्यते ? कर्त्तव्यताऽवगमो हि प्रमाणस्य कार्यमसति कारणे प्रमाणे न भवितुमर्हतीत्यर्थः । स एवैकग्रन्थ्येनाह—नेन्द्रियैरध्यक्षमीक्ष्यते । ननु मा नामेन्द्रियाणि प्रवर्त्तिषत, कस्मात्पुनर्नानुमानादिगोचरः कर्त्तव्यते ? त्यत आह—तत्पुरस्सरत्वान्नेतरैः । अनुमानादयो हि प्रत्यक्षपुरस्सरास्तत्कार्यत्वाश्चाऽसति प्रत्यक्षे प्रवर्तन्त इत्यर्थः । पूर्वपक्षी ब्रूते—सत्यं, न शब्दाऽतिरेकिभिर्गम्यते । कर्त्तव्यताशब्देन तु गंस्यत इत्यर्थः । सिद्धान्ती ब्रूते—ननु शब्दोऽपि संविदपेक्षया संबन्धज्ञानाऽपेक्षया प्रथमश्राविणोऽप्रतीतेः इतरसिद्धिमितरेण कर्त्तव्यतायाः सिद्धिमपेक्षते । पूर्वपक्षी त्वाह—ननु नियोगतः प्रमाणान्तरादेव सिद्धिमर्थस्याऽपेक्षते । कुतः ? शब्दतः सिद्धेऽपि तत्सम्भवात्संबन्धज्ञानसंभवात् । सिद्धान्ती ब्रूते—

Digitized by Google

रेतराश्रयः स्यात् । न । अनादित्वाच्छब्दभावनायाः । न खलु शब्दः साक्षादेव कर्त्तव्यताप्रतिभामाविर्भावयति विप्रकृष्टः, अपि तु भावनाऽनुगममुखेन । तत्र विप्रकृष्टशब्दभावनाद्वारसिद्धेः कर्त्तव्यतात्मनि परत्र प्रवृत्तिप्रसवोन्नीतप्रत्यये नाऽसुकरा प्रत्युत्पन्नशब्दसंवित् । उक्तं च ।

साक्षाच्छब्देन जनिता भावनानुगमेन ।
इति कर्त्तव्यता या तां न कश्चिदतिवर्त्तते ॥

नन्वितरेतराश्रयः स्यात् । शब्दतः सिद्धौ सत्यां संबन्धविज्ञानं संबन्धविज्ञाने च सति शब्दतः सिद्धिरिति । पूर्वपक्षिण उत्तरम्—अनादित्वाच्छब्दभावनायाः । यथा हि बीजादङ्कुरोऽङ्कुराद्बीजमिति बीजाङ्कुरजात्योरन्योन्याश्रयत्वेऽपि व्यक्तिभेदाद्व्यवस्था । न हि यस्या बीजव्यक्तेर्याऽङ्कुरव्यक्तिरुपजायते तस्या एवाऽङ्कुरव्यक्तेः सैव बीजव्यक्तिरपि तु तज्जातीयाया अन्यस्याः । इयमस्याश्चान्या जनिष्यते । तेन यत्राऽन्योन्याश्रयं न तत्र जन्यजनकभावः । यत्र च तद्भावो न तत्राऽन्योन्याश्रयत्वमिति । तथेहापि शब्दप्रवृत्तेः कर्त्तव्यतावगमेन भावना प्राग्भवीया । तस्याश्चेह जन्मनि कर्त्तव्यताऽवगमे तत्र विदितसंबन्धस्य शब्दस्य प्रवृत्तिस्ततः प्रत्युत्पन्नशब्दतः कर्त्तव्यताऽवगमः, ततो भावनेति । तदिदं शब्दप्रवृत्तिकर्त्तव्यताऽवगतिभावनाचक्रमनिशमावर्त्तते इति नेतरेतराश्रयत्वम् ।

ननु भावनायां किं प्रमाणम्? मत आह—न खलु शब्दः साक्षादेव कर्त्तव्यताप्रतिभासमाविर्भावयति, यतो विप्रकृष्टः, अपि तु भावनामुखेन, एवं च सति शब्दैकसमधिगम्येऽपि कर्त्तव्यतात्मनि नासुकरा संविदित्याह—तत्र विप्रकृष्टभावनाद्वारसिद्धेः कर्त्तव्यतात्मनि स्वज्ञानेन प्रवृत्तिहेतौ परत्र प्रवृत्तिप्रसवेनोन्नीतप्रत्ययेनाऽसुकरा प्रत्युत्पन्नस्य वर्त्तमानस्य शब्दस्य संविद् ज्ञानमिति । उक्तं च ।

कर्तव्यतावगमादेव प्रवृत्तिः, नेप्सितोपायतायाः। नित्येष्वप्यप्रवृत्तिप्रसङ्गात्। ईप्सितोपायत्वे वा नित्यत्वव्याघातः।

उच्यते –

पूर्वशब्दैर्व्यवहृतिव्युत्पत्तेरनपेक्षणम्।
भवेद्विशेषहेतुः को बीजमर्थेन तु श्रुतौ॥

का पुनरियं शब्दभावना? शब्दविषया शब्दज्ञानबीज, मुत शब्दाऽभिहिता ऽर्थज्ञानबोजम्। यदि शब्दविषया तैरेवाऽनष्टस्मृतिसंस्कारैः प्राग्भवीयैः शब्दैर्व्यभि-

साक्षाच्छब्देन जनिता भावनाऽनुगमेन वा।
इतिकर्तव्यता या तां न कश्चिदतिवर्तते॥ इति।

कृतव्याख्यानमेतत्। इदं च वेदवादिभिरवश्याभ्युपेतव्यं न पुनरभिमतसाधनत्वम्, अव्यापकत्वादित्याह–कर्तव्यताऽवगमादेव प्रवृत्तिर्नेप्सितोपायतायाः। नित्येष्वप्यप्रवृत्तिप्रसङ्गात्। अथ नित्यमपि समीहितोपायः कस्मान्न भवती? त्याह–ईप्सितोपायत्वे वा नित्यस्याऽनित्यत्वप्रसङ्गः। काम्यतया पुरुषेच्छातन्त्रत्वेनाऽवश्यकर्तव्यताऽनुपपत्तेः। तदेतद् दूषयति–उच्यते।

पूर्वशब्दैर्व्यवहृतिव्युत्पत्तेरनपेक्षणम्।
भवेद्विशेषहेतुः को बीजमर्थेन तु श्रुतौ॥

भावनाऽनुगमेनेत्युक्तं, तच भावनां विकल्पयति–का पुनरियं शब्दभावना? शब्दविषया वाचकत्वविशिष्टविषया शब्दवाचकत्वज्ञानबीज,मुत शब्दाभिहिता ऽर्थज्ञानबीजं, कर्तव्यतामात्रज्ञानस्य वा बीजं करणम्। भावनाविज्ञानयोः कार्यकारणभूतयोः समानविषयत्वात्। अथ प्रथमं कल्पमधिकृत्याह–यदि शब्दविषया तैरेवाऽनष्टस्मृतिसंस्कारैः प्राग्भवीयैः शब्दैर्व्यभिचारः स्यात्। स्मृतिजनकः संस्कारो न

चारः स्यात् । व्युत्पत्तिश्च तदा नाऽपेक्ष्येत । शब्दाऽभिहिता चेत्तथापि पूर्वस्यां सत्यां स एव प्रसङ्गः । अर्थेयमेव । विशेषहेतुर्वक्तव्यो, यत् तुल्येषु प्रत्ययपाटवाऽभ्यासाऽऽदरेषु शब्दार्थसंबन्धविषयेष्वर्थ एव भावनाबीजं न शब्दसंबन्धयोः । प्रायणं दुःखं वोच्छेत्तृ जात्यन्तरव्यवधानं वा शब्द-

वेगादिरित्यर्थः । स च वाचकतया शब्दः स्मर्येतेति व्युत्पत्तिश्च नापेक्ष्येत । तथा च प्रथमश्रावणेऽप्यर्थप्रत्ययप्रसङ्गः । तदिदमुक्तं पूर्वशब्दे व्यवहृतिर्व्युत्पत्तेरनपेक्षणं भवेदिति । कल्पान्तरं शङ्कते—शब्दाऽभिहिता ऽर्थविषया चेद्, भवतु, तथापि वाचकशब्दविषयाप्यस्ति भावनेति तस्यां पूर्वस्यां सत्यां स एव प्रसङ्गः । अथैवमर्थविषयैवाऽस्ति भावना न पूर्वशब्दविषयः । उत्तरं—विशेषहेतुर्वक्तव्यो यत्तुल्येषु प्रत्ययपाटवाऽभ्यासाऽऽदरेषु शब्दार्थसंबन्धविषयेष्वर्थ एव भावनाबीजं तत्प्रत्ययपाटवादयो न तु शब्दसंबन्धयोः । त्रीणि कारणानि भावनायाः समस्तव्यस्तानि । तथा हि सकृदनुभूतेषु प्रत्ययपाटवाद्भावना भवन्ति । यथा दुर्जनवचनजनिते दुःखे मन्दस्यापि प्रत्ययस्याऽभ्यासो भावयति भावनां, यथा जडस्य शास्त्राऽभ्यासः, तथा सकृन्मन्दमनुभूयमानेऽपि प्रत्ययादरादुद्भवति भावना । यथा देवह्रदे महाचेऽर्च्यां बुद्बुदवत्किंचिदुत्पन्नं कनकनलिनदर्शनादीति व्यस्तानि समस्तानि चोहनीयानि । तदेतत्त्रितयमपि संस्कारकारणं शब्दार्थसम्बन्धेषु तुल्यमिति कथमर्थ एव संस्कारो न तु सम्बन्धशब्दयोरिति । तदिदमुक्तं विशेषहेतुः वे.। बीजमर्थेन तु श्रुतो । यदि मन्येत अर्थवच्छब्दसम्बन्धयोरप्युत्पन्नैव भावना, सा तु प्रायणेन वा दुःखेन वा गर्भवासजन्मना जातिव्यवस्थानेन वा विनष्टा न स्मृतिं जनयतीत्यत आह—प्रायणं दुःखं वोच्छेत्तृ जात्यन्तरव्यवधानं

Digitized by Google

संबन्धयोर्भावनाबीजानां नाऽर्थेषु । तेष्वपि च भावनानुगमश्चेत्, जात्यन्तरबधिरास्तज्जन्माऽनुभूतानिव रूपशब्दप्रकारान् जन्मान्तराऽनुभूतानाचक्षीरन् । अथापि पूर्वाऽभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसंप्रतिपत्तेः कासांचिद्भावनानामनुगमो न सर्वासाम् । व्युत्पन्नवद्-

वा शब्दसम्बन्धयोर्भावनाबीजानां नार्थेष्विति । विशेषहेतुर्वक्तव्य इत्यनुषज्यते । भावनारूपाणि बीजानि स्मृतेरित्यर्थः । न जातु कारणाऽनियमे कार्यनियमः संभवति, तस्याऽऽकस्मिकत्वप्रसङ्गादिति भावः । यदि तु कश्चिद्वैयात्यादभ्युपैति, शब्दार्थसम्बन्धेषु भावनाऽनुवर्तत इति, तं प्रत्याह—तेष्वपि चाऽविशेषेण भावनाऽनुगमे जात्यन्धबधिरास्तज्जन्माऽनुभूतानिव रूपशब्दप्रकारान् जन्मान्तरानुभूतान् आचक्षीरन् ।

तत्र चोदयति—अथापि पूर्वाभ्यस्तस्मृत्यनुबन्धाज्जातस्य हर्षभयशोकसंप्रतिपत्तेः कासांचिद्भावनानामनुगमो न सर्वसाम् । अस्यार्थः । निकायविशिष्टाभिरपूर्वाभिः शरीरेन्द्रियबुद्धिवेदनाभिरभिसबन्धो जन्म, तत्कृतो जातस्तस्याऽभिप्रेतविषयप्रार्थनायां तत्प्राप्तौ सुखाऽनुभवो हर्षोऽनिष्टविषयसाधनसन्निपाते तज्जिहासोर्हान्यशक्यता भयम् । इष्टविषयवियोगे सति तस्येष्टस्य प्राप्त्यशक्यस्य प्रार्थना शोकः । तदेतेषां हर्षभयशोकानां संप्रतिपत्तिरनुभवः पूर्वाभ्यस्तस्मृत्यनुसम्बन्धाद् भवति । पूर्वस्मिन् जन्मनि अभ्यस्तस्याऽर्थस्य स्मृत्यनुबन्धात् । एकविषयो वा एकाऽऽकारविषयो वा अनेकविज्ञानोत्पादोऽभ्यासः, स तत्कर्माऽभ्यस्तं यथा देवदत्तोऽनेनाऽभ्यस्तः शालयो वाऽभ्यस्ता इति गृहीतनिरोधे तदनुसंधानविषयः प्रत्ययः स्मृतिरनुबध्यतेऽनेनेत्यनुबन्धः स्मृतेरनुबन्धो भावना । तस्मात्पूर्वाऽभ्यस्तस्मृत्यनुबन्धाद्धेतोर्जातस्य कुमारस्याऽसत्यपीन्द्रियविषयसंप्रयोगे हर्षभयशोकसंप्रतिपत्तेः प्राग्भवीयानां कासांचित्तदीयभावनानाम्

व्यवहाराद्वालस्य ।

भवतु, किं तु

पूर्वसिद्धिव्यपेतत्वान्मानं तत्र न किं चन ।
सिद्धे सामान्यतो वृत्तिविशिष्टे लिङ्गवाक्ययोः ॥

न तावल्लिङ्गादिजं ज्ञानं तत्र प्रमाणम् । संवित्प्रभव अनुगमः। आसीच्च पूर्वं शरीरान्तरसम्बन्धः । हर्षादिसंप्रतिपत्तिरसिद्धेति चेन्न । स्मितरुदितादिमत्त्वेनैतदनुमानात् । तथा हि । हर्षादिमदात्मवती बाल्यावस्था स्मितरुदितादिमत्त्वाद् यौवनावस्थावत् । एवं बाल्यावस्था स्मृतिमदात्मवती हर्षादिमदात्मवत्त्वात् यौवनावस्थावत् । तथा बाल्यावस्था संस्कारवदात्मवती स्मृतिमदात्मवत्त्वाद् यौवनावस्थावत् । तथा च बाल्यावस्थाऽनुभूतचरानुभववदात्मवती संस्कारवदात्मवत्त्वाद्यौवनावस्थावत् । तथा बाल्यावस्थाऽनुभवकाले शरीरसम्बन्धवदात्मवती अनुभववदात्मवत्त्वाद् यौवनावस्थावत् इति प्रसङ्गात्परलोकसिद्धिरपि सूचिता । तदेवं कासां चिदनुगमो न सर्वासां भावनानाम् । कुतः ? व्युत्पन्नवदव्यवहाराद् बालस्य । कार्यदर्शनोन्नेया हि भावना यावत्कार्यदर्शनं व्यवतिष्ठत इत्यर्थः ।

एवं सिद्धान्तैकदेशिनो दूषणे परिहृते पूर्वपक्षवादिना परमसिद्धान्ती दूषणमाह—भवतु, किं तु

पूर्वसिद्धिव्यपेतत्वान्मानं तत्र न किं चन ।
सिद्धे सामान्यतो वृत्तिविशिष्टे लिङ्गवाक्ययोः ॥

तद्व्याचष्टे—न तावल्लिङ्गादिजं तत्र ज्ञानं प्रमाणं न पदं प्रत्ययो वा तत्र कर्तव्यतायां प्रमाणमिति । केन हेतुना ? प्रथमप्रवृत्तेभ्यो लिङ्गादिभ्योऽनुत्पादात्कर्तव्यता ज्ञानस्य संवित्प्रभवत्वस्य

Digitized by Google

तया पूर्वसिद्ध्यपेक्षत्वेन । नापि भावनाजं, तन्निमित्त-ज्ञानाऽपेक्षत्वेन । नापि लिङ्गवाक्यजे । तयोः सामान्यरूप-प्रसिद्धेर्विशिष्टावगाहित्वेनाऽप्रसिद्धपदार्थवाक्यार्थप्रती-

मानान्तरतः पूर्वसिद्ध्यपेक्षत्वेन । नापि भावनाजं तन्निमित्तज्ञानापेक्षत्वेन, यदाकारं हि विज्ञानं भावनया जनयितव्यं तदाकारमेवासावनुभवं स्वकारणमेवाऽपेक्षते मानान्तरतः, न च तदस्तीत्युक्तम् । ननु लिङ्गवाक्ये कर्तव्यतावगाहिनी भविष्यतः, तयोः प्रमाणान्तराऽनवगतार्थगोचरत्वात्, अन्यथा प्रामाण्याऽनुपपत्तेरित्यत आह—नापि लिङ्गवाक्यजे । हेतुमाह—तयोः सामान्यरूपप्रसिद्धेः विशिष्टाऽवगाहित्वेन गृहीतसम्बन्धं लिङ्गिनं गमयति, सम्बन्धश्च पक्षव्यापकत्वे सति स्वसाध्येन नियमः । न चाऽगृहीते दृष्टान्तधर्मिवर्तिनि साध्यधर्मे तेन सह हेतोर्नियमः शक्यसाधनः । न चाऽपूर्ववस्तुसत्तासाधने पक्षधर्मता । तथा हि । कदाचित्सत्तायां साध्यायां भावधर्मो वा हेतुरुच्येताऽभावधर्मो वा, प्रकारान्तराभावात् । तत्र बाह्या अप्याहुः ।

'नाऽसिद्धे भावधर्मोऽस्ति व्यभिचार्युभयाश्रयः ।
धर्मो विरुद्धो भावस्य सा सत्ता साध्यते कथम्' ॥ इति ।

तस्मादनुमानं सामान्यरूपेण यो वह्निः प्रसिद्धः तेन विशिष्टं वस्तु पर्वतादिकमवगाहते । वह्निभावाभावसाधारणेन रूपेण वा यः प्रसिद्धः पर्वतादिः साधनाश्रयस्तमेव वह्निविशिष्टमवगाहते । तदनेन निःमात्पक्षधर्मताख्यसम्बन्धद्वयवित्तावनुमानप्रवृत्तिर्नाऽन्यथेति सूचितम् । एवं वाक्यमपि सामान्यप्रसिद्धक्रियं पदार्थं सामान्यरूपप्रसिद्धमेव पदार्थान्तरेण कारकरूपेण विशिष्टमवगाहते । तदनयोर्विशिष्टविषयता, न पुनरपरिदृष्टपरवस्तुसद्भावविषयतेत्युक्तं भवति । कुतो वाक्यमेवंविध ? मित्याह—अप्रसिद्धपदार्थवाक्या-

Digitized by Google

त्यनुपपत्त्या सामान्यरूपप्रसिद्धिनिबन्धनप्रमाणाऽपेक्षायां तदभावे प्रामाण्याऽभावः । यथा चेह जन्मनि तथा पूर्वस्मिन्पूर्वतरे ऽपि सा ऽपेक्षितेति प्रमाणाऽभावः । तत्र किं विकल्पमात्रमेवेदमनादिशब्दवासनानिबन्धनं स्यात्तच्च पुरस्तात्प्रत्युक्तम् ।

र्थप्रतीत्यनुपपत्त्या पदार्थस्येतरेतरपदार्थविशिष्टस्यैव वाक्यार्थत्वात् । अगृहीतसम्बन्धस्य चाऽपदार्थत्वात् । अतः सामान्यरूपप्रसिद्धिनिबन्धनस्य च कर्त्तव्यतायां प्रमाणस्याऽभावाल्लिङ्गवाक्ययोर्विशिष्टायां तस्यां प्रामाण्याऽभावः ।

ननूक्तं कथं शब्दप्रवृत्तिकर्त्तव्यताऽनुभवभावनाक्रमनियमावर्त्तनशक्ति, किमत्र मानान्तरेण ? इत्यत आह—यथा चेह जन्मनि तथा पूर्वस्मिन्पूर्वतरे ऽपि सा ऽपेक्षितेति प्रमाणाऽभावः । अत्रेदमाकूतम् । प्राग्भवीयभावनाजनितकर्त्तव्यतावगमाद्बालस्य स्वयं प्रवृत्तौ सिद्धायामनादिना परिहारः स्यात्, सैव त्वसिद्धा । तथा हि । यद्विषयाऽनुभवभाविता या भावना सा तत्रैव स्मृतिमाधत्ते, न त्वर्थान्तरेऽपि, अतिप्रसङ्गात् । न च कर्त्तव्यतासामान्यमपि विशेषप्रवृत्तिहेतुः । न च यत्क्रियाभेदगोचरा प्रागपि भवे कर्त्तव्यताऽवगता तत्क्रियागोचरैव बालेन स्मृता क्रियान्तरे प्रवृत्तिमुत्पादयितुमर्हति । नापि क्रियान्तरे स्मर्यते । न खलु पाटलिपुत्रउपलब्धस्य प्रासादस्य शिलाह्रदे स्मरन्नभ्रान्तः । अतः स्तनपानादिगोचरकर्त्तव्यताऽवगतौ भावनाया अन्यत्कारणं वक्तव्यं, न च तच्छक्यमिह जन्मनि सर्वेषु जन्मस्विति प्रमाणाऽभावः । अपेक्षितोपायतां स्तनपानादेः प्रत्यभिज्ञासिद्धया तज्जातीयतया बालो ऽप्यनुमिमीते । तच्च विषयस्याप्यसिद्धौ सत्यां विकल्पमात्रमेवेदमनादिशब्दवासनानिबन्धनं स्यात् ।

Digitized by Google

अपि च—

कर्त्तुरिष्टाऽभ्युपाये हि कर्त्तव्यमिति लोकधीः।
विपरीते त्वकर्त्तव्यमिति तद्विषये ततः॥

यः खलु प्रत्ययो यमर्थमन्वेति स तस्य विषयः शुक्ल इव शुक्लप्रत्ययस्य। अपेक्षितोपायतां तद्विपरीततां चाऽनुयातौ कर्त्तव्यमिति प्रमितिप्रत्ययौ लौकिकानाम्। तेन तयोर्गोचराविति गम्यते।

तत्र पुरस्तात्प्रत्युक्तं न निरालम्बनं ज्ञानमिति। तत्पारिशेष्यात्कर्तुरीप्सितोपायतैव प्रवृत्तिहेतुः कर्तव्यताज्ञानस्याऽऽलम्बनम्।

अपि चाऽन्वयव्यतिरेकाभ्यामपि सैवाऽऽलम्बनमित्याह—

कर्तुरिष्टाऽभ्युपाये हि कर्तव्यमिति लोकधीः।
विपरीते न कर्तव्यमिति तद्विषये ततः॥

ननु कृतिव्याप्यतद्विपरीतताागोचरौ कर्तव्यत्वाऽकर्तव्यत्वप्रत्ययौ कथं समीहिततद्विपरीतसाधनते गोचरयितुमर्हतः? न च साधनताकर्तव्यतयोस्तादात्म्यं, सिद्धसाध्यत्वेन दहनतुहिनवत्स्वभावविरोधादित्यत आह—यः खलु प्रत्ययो यमर्थमन्वेति स तस्य विषयः शुक्ल इव शुक्लप्रत्ययस्य। अपेक्षितोपायतां तद्विपरीततां चाऽनुयातौ कर्तव्यमकर्तव्यमिति प्रत्ययौ प्रवृत्तिनिवृत्तिहेतू लौकिकानाम्। तेन ते अपेक्षितोपायतातद्विपर्ययते तयोः कर्तव्यमकर्तव्यमिति प्रत्ययोर्गोचराविति गम्यते अन्वयव्यतिरेकाभ्याम्। इदमत्राकूतम्। सत्यं, कृतिसाध्यतामात्रं कर्तव्यता। न तु तन्मात्रं हेतुः, समीहितस्यापि कर्तव्यतया तद्धेतुत्वप्रसङ्गात्। न खलु फलं कर्तव्यमिति प्रवृत्तिगोचरस्तत्साधनं तु स्यात्। न चाऽन्यस्य कर्तव्यताऽन्यत्र प्रवर्तयति। अतिप्रसङ्गात्। साधनतया नाऽतिप्रसङ्ग इति चेत्,

Digitized by Google

तर्हि प्राप्ताऽप्राप्तविवेकेन साधनत्वमेव प्रवृत्तिहेतुः, न तु तन्मात्रम्, अपि तु कर्तुरिष्टाऽभ्युपाय इत्युपपादयिष्यति स्वयमेवाऽऽचार्यः । तस्मात्कर्तुरिति वचनादाचार्यस्य कर्तव्यतैकार्थसमवायिनी समीहितसाधनता प्रवृत्तिहेतुः कर्तव्यताज्ञानालम्बनमभिमता । न चाऽनयोर्भिन्नकालयोरैकाधिकरण्ये कश्चिद्विरोध इति उपपादयिष्यामः । न च कर्तव्यतामात्रोपयोगिनी समीहितसाधनता प्रमाणान्तःपातिनी न प्रवृत्तिहेतुः । कर्तव्यतैव तद्धेतुः । सा च क्वचित्साधनतयाऽवगम्यते, क्वचिच्छब्दतः, तेनाऽसत्यामपि समीहितसाधनतायां नित्येषु कर्तव्यताऽवगम्यमाना प्रवृत्तिहेतुरिति साम्प्रतम् । तेन कर्तव्यतामात्रं प्रवृत्तिहेतुरित्युक्तम् । अपि च भवतु प्रमाणान्तःपातिनी, तथाप्यस्ति हि किंचित्प्रमाणं यदभावात्प्रमेयं निवर्तते, यथा कृतकत्वं भावानामनित्यत्वे प्रमाणम् । अथ च तदभावादनित्यत्वं निवर्तते, नैव ह्यस्ति संभवः अकृतकश्चाऽनित्यश्च भाव इति । तथेहापि कृतिव्याप्यता कार्यता, कृतिश्च पुरुषप्रयत्नः, स चेच्छाद्वेषजीवनयोनिः स्वयोनिनिवृत्तौ न भवति, धूम इव धूमध्वजनिवृत्तौ । न च हिताऽहितप्राप्तिपरिहाराऽसाधनसाधनेषु नैमित्तिकनिषेधाऽपूर्वेष्विवाऽसंभवः । द्वेषजीवने त्वनाशङ्कनीये एवाऽनुपादेयत्वाद्विधेयविषयत्वाच्च । नन्वेतदनुमानं, तच्चाऽपूर्वकर्तव्यताविधायिनि परिपन्थिनि नित्यतयाऽनपेक्षप्रामाण्ये सति शब्दे बाधितविषयतया नोदेतुमर्हति । अबाधितविषयत्वमपि हि पक्षधर्मतावदनुमानसामग्रीनिविष्टमिति तद्विदः । तत्किं सहस्रसंवत्सरे सत्रे सहस्रायनजीविन एव सन्त्वधिकारिणः ? सहस्रसंवत्सरनिर्वर्तनीयमेतदाम्नायते सत्रम् । सहस्रसंवत्सरजीविनां पुंसामसंभवात्संवत्सरशब्दो जघन्यप्रवृत्तिर्दिवसेष्विति चेत् । न असंभवस्याऽसिद्धेः । आम्नायत एव हि मानान्तर-

Digitized by Google

तस्मात्कर्त्तव्यतापि नाऽन्या कर्तुः समीहितोपायतायाः। यथोक्तं "कर्त्तव्यस्य सुखं फल"मिति। कथं तर्हि नित्येषु नित्यता कर्त्तव्यता वा। यथाशक्ति चाङ्गो-

निरपेक्ष त्सहस्रसंवत्सरसत्रविधायिनः संभविष्यन्ति सहस्रायुषः पुरुषाः। स्यादेतत्। विवादाध्यासिताः पुरुषाः न सहस्रायुषः पुरुषत्वाद्‌-स्मदादिवदित्यनुमानादसंभव इति। नन्वागमबाधितमनुमानं नोदीयत इत्युक्तम्। सत्यं, प्रवृत्त आगमोऽनुमानं बाधते, तत्प्रवृत्तिरेव तु स्मारितपदार्थाऽन्वययोग्यताऽवधारणपुरःसरा, तदवधारणसमये च बाधितविषयमनुमानं प्रवृत्तं सत्रकर्तव्यतासहस्रसंवत्सराणामन्वयम योग्यत्वान्निरुध्य संवत्सरशब्दं जघन्यवृत्तिमापादयतीति चेत्। न। इहापि समानत्वात्। न खल्वपेक्षणीये नैमित्तिकनिषेधाऽपूर्वे प्रयत्नं प्रति प्राधान्येनाऽन्वयमर्हतः। न चैकशब्दवाच्ययोरन्वयो न योग्यतामपेक्षत इति युक्तम् शब्दाऽवधारणसमये योग्यताहीनयोरन्वयाऽनवधारणेनैकशब्दवाच्याऽन्वयाऽनुपपत्तेः। कामाधिकारे कामाऽनुकूलतया कृत्यन्वयोपपत्तिरिति चेत्। किमायातं नैमित्तिकनिषेधाऽधिकारयोः? तत्र तच्छब्दप्रत्यभिज्ञानात्कामस्याऽश्रुतेरपूर्वमात्रकर्तव्यताऽवगतिरिति चेत्। तर्हि कर्तव्यताशरीरनिवेशिनाऽकामेनापि भवितव्यं नियोज्येनेव निमित्तवता निषिध्यमानक्रियाकर्त्रा वा श्रुतेनापि। तथा च न नियोगमात्रकर्तव्यता। नैमित्तिकनिषेधाऽधिकारयोस्तन्मात्रत्वे च कर्तव्यताहानिर्नियोज्याऽभाव इवेति कर्तुरपेक्षितोपायता कर्तव्यता, तद्विपरीतता चाऽकर्तव्यतेति सिद्धम्। तदेतदुपसंहरति—तस्मात्कर्तव्यतापि नाऽन्या समीहितोपायतायाः। अत्रैव भाष्यग्रन्थं पठति—तदुक्तं कर्तव्यस्य सुखं फलम् इति।

अत्र चोदयति—यदि कर्तुः समीहितसाधनतैव कर्तव्यता, कथं तर्हि नित्येषु नित्यता कर्त्तव्यता वा? न ह्येतन्नित्यं समीहितसाधनं भवतीति भावः। क्वचित्पाठः कथं तर्हि नित्येऽप्यनित्यता कर्तव्य-

REPRINT FROM THE PANDIT

॥ श्रीः ॥

आपदेवकृतो

मीमांसान्यायप्रकाशः

काशीस्थराजकीयपाठशालाध्यापकशाब्दिकमीमां-
सकपाठकाभिधश्रीमदनमोहनशर्मनिर्मितया टिप्पण्या सनाथः

उपाध्यायोपनामकेन श्रीगङ्गानाथ-
शर्मणा परिष्कृतः

काश्याम् ।

मेडिकल्-हाल्-नामके-यन्त्रे-मुद्रितः ।

Digitized by Google

प्रवृत्त्यनुकूलो व्यापारविशेषः कल्पनीयः। विधिशब्दाभिधेयप्रवर्त्तनासामान्यस्य विशेषमन्तरेणापर्यवसानात्। तत्र कोऽसौ व्यापार इत्यपेक्षायां धात्वर्थावगतसमीहितसाधनत्वमेवेति कल्प्यते। तस्यापि प्रवृत्त्यनुकूलत्वात्। सर्वो हि समीहितसाधनतां ज्ञात्वा प्रवर्त्तते। अन्यप्रेरितो यदीष्टसाधनतां न जानाति तदा नैव प्रवर्त्तते। स्वतन्त्रप्रेरणावादेऽपि तदाक्षिप्तसमीहितसाधनताज्ञानं स्वीक्रियत एव। अन्यथा विधेः प्रवर्त्तकत्वानुपपत्तेः। अतश्चावश्यकत्वात्समीहितसाधनतैव प्रवर्त्तनात्वेन रूपेण विध्यर्थः। एवं च विधिशब्दस्यान्यनिष्ठव्यापारबोधकत्वं लोकसिद्धं सिद्धं भवति।

(१९०) किं च शब्दे एको व्यापारः स्पन्दाद्यतिरिक्तः[३१५] कल्पनीयः। तस्य च स्वप्रवृत्तौ पराधीनप्रवृत्तेर्वाकारणत्वेनाक्लृप्तस्य प्रवर्त्तनात्वेन रूपेण ज्ञातस्य प्रवृत्त्यनुकूलत्वं शब्दस्य च परनिष्ठव्यापारज्ञापकत्वेन क्लृप्तस्य स्वनिष्ठव्यापारबोधकत्वम् विधेश्च प्रवर्त्तकत्वनिर्वाहार्थं धात्वर्थस्य समीहितसाधनत्वमिति कल्पनादूरमावश्यकस्यैव समीहितसाधनत्वस्य स्वप्रवृत्तिहेतुत्वेन क्लृप्तस्य प्रवर्त्तनात्वेन रूपेण विध्यर्थकल्पनं लाघवात्, अन्यनिष्ठत्वाच्च।

(१९१ न च "विधेः प्रवर्त्तकत्वनिर्वाहार्थं समीहितसाधनत्वकल्पनात्प्रेरणानभिधाने च विधेः प्रव-

---

३१५ शाब्दभावनाकथः।

र्त्तकत्वाभावाद्धात्वर्थस्य समीहितसाधनत्वकल्पक-
मेव नास्तीति" [216]वाच्यम् । प्रवर्त्तनाभिधानेनैव
तन्मतेपि विधेः प्रवर्त्तकत्वाद्विध्यभिहितस्य प्रवर्त्त-
नासामान्यस्य विशेषमन्तरेणापर्यवसानात्समीहित-
साधनत्वाक्षेपकत्वात् । न चेष्टसाधनत्वस्य विध्य-
र्थत्वे सन्ध्योपासनं ते इष्टसाधनं तत्त्वं कुर्विति सह-
प्रयोगानुपपत्तिरिति वाच्यम् । इष्टसाधनत्वस्य
विशेषरूपेण विधिनाऽनभिधानात् । प्रवर्त्तनात्वेन
रूपेणाभिधानात् । सामान्यशब्दस्य च विशेषशब्देन
दृष्टः सहप्रयोगः । पाञ्चालराजा द्रुपद इत्यादौ ।
तस्मात्समीहितसाधनतैव प्रवर्त्तनात्वेन रूपेण वि-
ध्यर्थः । [217]सैव च तेन रूपेण शब्देनैवाभिधीयत
इति शाब्दी भावना ।

(१९२) उक्तवार्तिकस्यापि अयमेवाभिप्रायः । [218]
अभिधीयते सा ऽभिधा समीहितसाधनता सैव प्रव-
र्त्तनात्वेनाभिहिता पुरुषप्रवृत्तिं भावयतीति भावना
तां लिङादय आहुरिति । यथाहुः

पुंसां नेष्टाभ्युपायत्वात्क्रियास्वन्यः प्रवर्त्तकः ।
प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्त्तनामिति ।

Vidhiviveka ~~(तं वा.)~~

तत्सिद्धं यजेतेत्यत्र लिङ्त्वांशेन शाब्दी भाव-
नोच्यत इति ।

---

२१६ प्रेरणाया अत्र प्रवर्त्तकत्वात् ।
२१७ इष्टसाधनतैव ।
२१८ भावे प्रत्ययः ।

Digitized by Google

अथ आर्थीभावना ।

(१९३) आख्यातांशेनार्थीभावनोच्यते ।

(१९४) "ननु केयमार्थी भावना । कर्तृव्यापार इति चेन्न । यागादेरपि तद्व्यापारत्वेन भावनात्वोपपत्तेः । तस्य प्रकृत्यर्थत्वेन प्रत्ययार्थत्वाभावादिति"[११८] चेत् ।

(१९५) अत्राहुः । सत्यं न यागो भावना किन्तु स्वर्गेच्छाजनितो यागविषयो यः प्रयत्नः स भावना । स एव चाख्यातांशेनोच्यते । यजेतेत्याख्यातश्रवणे यागेन यजेतेति प्रतीतेर्जायमानत्वात् । यश्च प्रयत्नपूर्वकं गमनादि करोति तस्मिन्देवदत्तो गमनं करोतीति करोतिप्रयोगदर्शनात्, वातादिना स्पन्दमाने तु नायं करोति किं तु वातादिना ऽस्य स्पन्दो जायत इति प्रयोगात्करोत्यर्थस्तावत्प्रयत्नः । करोतिसामानाधिकरण्यं चाख्याते दृश्यते । यजेत यागेन कुर्यात्, पचति पाकं करोति, गच्छति गमनं करोतीति । अतश्च करोतिसामानाधिकरण्यात्प्रयत्नस्याख्यातवाच्यत्वम् । न च रथो गच्छतीति प्रयोगानुपपत्तिः-रथे यत्नाभावादिति वाच्यम् । वोढृश्वगतं प्रयत्नं रथे आरोप्य प्रयोगोपपत्तेः ।

(१९६) यन्मतेप्यन्योत्पादनानुकूलं व्यापारसामान्यं भावना तन्मतेपि रथे गमनातिरिक्तव्यापारानुपल-

---

११८ न्यायसुधाकाराः ।

ब्धे रथो गच्छतीति प्रयोगस्यौपचारिकत्वमेवेति । अतश्च यत्न एवार्थी भावना । यथाहुः ।

प्रयत्नव्यतिरिक्तार्थीभावना तु न शक्यते ।
वक्तुमाख्यातवाच्येह प्रस्तुतेत्युपरम्यते इति ।

(१९७) अन्ये त्वाहुः । भवितुर्भवनानुकूलो भावकव्यापारस्तावद्भावना । यस्मिन्व्यापारे कृते करणं फलोत्पादनाय समर्थं भवति तादृशो व्यापार इति यावत् । स एव चाख्यातार्थः । कुठारेण छिनत्तीत्याख्यातश्रवणे हि भवत्येतादृशी मतिः कुठारेण तथा व्याप्रियेत यस्मिन्व्यापारे कृते कुठारात् छेदनं भवतीति । एवं यजेत स्वर्गकाम इत्यस्यायमर्थः—यागेन तथा व्याप्रियेत यस्मिन्व्यापारे कृते यागात्स्वर्गो भवतीति । स च व्यापारः [320]क्वचिदुद्यमननिपतनादिः [321]क्वचिच्चाग्न्यन्वाधानादिप्रायणान्तपर्यन्तः । कथंभावाकाङ्क्षायां विशेषरूपेण पश्चादवगम्यते अन्योत्पादनानुकूलत्वेन सामान्यतस्त्वाख्यातादेव । रथो ग्रामं गच्छतीत्यत्रापि आख्यातेन ग्रामप्राप्त्यनुकूलो व्यापार एव प्रतीयते । रथस्तथारूपगमनेन व्याप्रियते यस्मिन्व्यापारे कृते गमनाद्ग्रामप्राप्तिर्भवतीति प्रतीतेः । नत्वत्र गमनमात्रमाख्यातार्थः तस्य धातुनोक्तत्वात् ।

(१९८) तत्रको ऽसौ व्यापार इत्यपेक्षायां पूर्वोत्तरावान्तरदेशविभजनरूप इति पश्चादवग-

---

३२० छिदादौ । ३२१ यागादौ

म्यते । पूर्वेण प्रदेशेन विभज्योत्तरेण संयुज्य रथो ग्रामं गच्छतीति प्रयोगात् । उद्यम्य निपात्य-कुठारेण-च्छिनत्तीति-वत् । एवं देवदत्तः प्रयतत इत्यत्रापि देवदत्तस्तथा व्याप्रियते यथा प्रयत्नः भवतीति प्रयत्नानुकूलो व्यापार एवाख्यातार्थो न तु प्रयत्नः । तस्य धातुनोक्तत्वात् । व्यापारविशेषापेक्षायां चेच्छादिः, पश्चादवगम्यते उद्यमन-निपातनवत् । तथा च सर्वत्रानुगतत्वादन्योत्पादनानुकूलव्यापारसामान्यमेवाख्यातार्थः, न तु प्रयत्नमात्रम् । रथो गच्छति देवदत्तः प्रयतत इत्यादिषु तदभावात् । न चात्रौपचारिकत्वं वक्तुं युक्तम् मुख्ये सम्भवति तस्यान्याय्यत्वात् । करोत्यर्थोऽप्यन्योत्पादनानुकूलो व्यापारएव न प्रयत्नमात्रम् । करोतेश्चेतनाचेतनकर्तृकाख्यातसामानाधिकरण्यादिति ।

(१९९) तत्सिद्धमन्योत्पादनानुकूलो व्यापार आर्थी भावनेति । सैव च यजेतेत्यत्राख्यातांशेनोच्यते भावयेदिति । तस्याश्च भाव्याकाङ्क्षायां स्वर्गादिर्भाव्यत्वेन सम्बध्यते । करणाकाङ्क्षायां यागादिः करणत्वेन सम्बध्यते । प्रयाजादय इतिकर्तव्यतात्वेन । एवं च यजेतेत्यादिना स्वर्गाद्युद्देशेन यागादेर्विधानात्सिद्धं यागादेर्धर्मत्वं प्रयोजनमुद्दिश्य वेदेन विहितत्वादिति ।

(२००) सोऽयं धर्मो यदुद्देशेन विहितस्तदुद्देशेन क्रियमाणस्तद्धेतुः, श्रीगोविन्दार्पणबुद्ध्या क्रियमाणस्तु

Digitized by Google

निःश्रेयसहेतुः[३२२] । न च तदर्पणबुद्ध्या ऽनुष्ठाने प्रमाणा-भावः । यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।

यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणमिति

स्मृतेः (भगवद्गीता) । [३२३]अस्याश्चाष्टकादिस्मृतिव-त्प्रामाण्यादित्यन्यत्र विस्तरः ।

क्वाऽहं मन्दमतिः क्वेयं प्रक्रिया भट्टसम्मता ।
तस्माद्भक्तेर्विलासोऽयं गोविन्दगुरुपादयोः ।
ग्रन्थरूपो मदीयोऽयं वाग्व्यापारः सुशोभनः ।
अनेन प्रीयतां देवो गोविन्दो भक्तवत्सलः ॥२॥

इति श्रीमदनन्तदेवसूनुना आपदेवेन कृतं मीमांसान्यायप्रकाशसंज्ञकं मीमांसाप्रकरणम् ॥

---

३२२ मोक्षहेतुः । स च भोगायतनभोगसाधनभोग्यानामत्यन्तनिवृत्तौ भवति संसारसम्बन्धविलयश्चैतस्मिन्नते मोक्षत्वादिति शास्त्रदीपिकादौ प्रपञ्चितम् ।

३२३ चकारो यद्यपीत्यर्थकः । तथाप्यस्याः पौरुषेयत्वं तथाप्यष्टकादिस्मृतिवत्-स्मृतमूलश्रुत्यनुमानेन निर्णयाकत्वम् । एवं पौरुषेयानुमतानामेवा प्रवृत्ता स्मृतेः प्रामाण्य मुपपादितमिति दिक् ।

पुनरपरेण तमेव वर्णयन् वसन्तवायोर्मन्दतां परामृशन्नाह—मलयेति। मलयशिखरात् दक्षिणपर्वतमारभ्य आकैलासम् उत्तरपर्वतपर्यन्तं भुवनवलयं जगतीतलं मनोभवस्य कामदेवस्य शासनात् आज्ञया जेतुं स्वायत्तीकर्तुं वाञ्छन् इच्छन् सन् वसन्तसमीरणो वसन्तवायुः, कैलासाग्रे कैलासशिखरे विहिता निष्पादिता वसतिर्वासो येन स तं, कैलासस्थमिति यावत् भुजङ्गधरं सर्पालङ्कृतं हरं शिवं मनसि विमृशन् चिन्तयन् भीतः शिवमनोभवयोः वैरं स्मृत्वा स्वस्वामिनाशकं तमथ च स्वभक्षकान् सर्पान् दृष्ट्वा भयविह्वलः सन् शनैःशनैः मन्दमन्दं प्रयाति इति शङ्के। शिवभयमेवास्य मन्दत्वे हेतुरित्यहं मन्य इति भावः। हरिणी वृत्तम्। हेतूत्प्रेक्षा चात्रालङ्कारः॥ ४॥

तत्समयेऽपि वसन्तं वर्णयन् वसन्तवायुमन्दतामन्यथा सम्भावयन्नाह—पथिपथीति। पथिपथि स्रवन्ति गच्छन्ति मधुशीकराणि मकरन्दकणाः यस्मात् तत् तथाभूतं कुसुमनिकरं पुष्पसमूहं वर्षन्तीभिः लता एव याः लोलाक्ष्यः चञ्चलापाङ्गाः स्त्रियः ताभिः हर्षेण सहितं यथा स्यात् तथा अर्चिते इत्र मधुकरवधूनाम् भङ्गीणां गीतेषु गुञ्जितेषु आसक्तं बद्धचित्तं कुरङ्गकं हरिणं स्वोचितवाहनमास्थितः आरूढः सन् वसन्तसमीरणो वने मन्दमन्दं प्रयाति। वायोः कुसुममकरन्देन गुरुता मन्थरता तथा च कुरङ्गकस्य गीतासक्तिः प्रसिद्धा। अतो वाहनस्य गीतासक्तचित्ततया स्वयं च कुसुमरसमन्थरतया गतिव्याघातः समुचित एव। पूर्ववदलङ्कारो वृत्तञ्च॥ ५५॥

सायन्तनेति। सायं भवं सायन्तनं, सायंकालीनमिति यावत् एवम्भूतं यद्देवतार्चनं तत्रोचितानि॥

बाढमिति प्रतिज्ञायाम्। "भृशप्रतिज्ञयोर्बाढम्" इत्यमरः। चण्डिकां नमस्कुर्वन्नाह **मातः कृपातरङ्गिणीति**। करुणायाः कृपायाः। "करुणा तु कृपायां स्यात्" इति हैमः। तरङ्गिणी आश्रयभूता सरित् तत्सम्बुद्धौ। पुनः विकसतोः (कृपयेति शेषः) नयनयोः यदमृतं तस्य याः ऊर्मयो लहर्यः ता एव शीकराः बिन्दवो ("शीकरोऽम्बुकणाः स्मृताः" इत्यमरः) यस्यां सा तत्सम्बुद्धौ, करुणामृतमयीति यावत्। एवम्भूते। तरुणो नवीनो यः सितकिरणः चन्द्रः स एव चूडामणिः मौलिभूषणं यस्य स तस्य चन्द्रशेखरस्य रमणी तत्सम्बुद्धौ हे गौरि मातः त्वां नमस्यामि नमस्करोमि। (नमो वरिवश्चेत्यनेन नमसश्च्यच्यवि लटि रूपम्)॥ वृत्तमत्र उपगीतिप्रभेद एव॥ ५॥

मदकलेति। मदेन कलः समधुरास्फुटध्वनिः यः कलहंसः तेन उत्तंसिताः भूषिताः याः सितसरोजराजयः श्वेतकमलपंक्तयः ताभिः राजिता विभूषिता इयं सरसी पद्मपूर्णं सरः मे चेतः चित्तं सरसीकरोति रसैकतानतां नयतीत्यर्थः। **कलहंसेति**। कलहंसस्य पोतः

Digitized by Google

श्रावकः। **मदकलकरीति।** मदेन कलो यः करी गजः तस्य या कनकशृङ्खला पादबद्धा तस्यां यो मणिः तस्य रणितं शब्दमनुकरोति यः सः। गजगमनसादृश्यात् नायिकागमनस्यास्या नूपुरध्वनौ गज-शृङ्खलाध्वनिसादृश्यम्। **राजहंसेति।** राजहंसस्य (गतिसा-म्यात्) शिञ्जितं हरति जयति यत्तत्। **सलीलेति।** सलीलं सहेलं यथा स्यात्तथा चलता चरणेन रणन्तौ शब्दायमानौ मणिनूपुरौ यस्याः सा तया तथाभूतया। **तदवलोकयामीति।** राजकुमारी न कस्यापि स्त्री अपि तु स्वयंवरविषयभूता सर्वजनावलोकनीयेति भावः।

(३२) जानकीं वर्णयन्नाह-**केयमिति।** श्यामं यदुपलं निकषप्रस्तरम् तस्मिन् उल्लेखभूता या हेम्नः स्वर्णस्यैका रेखा तद्वत् लग्नानि यथा-स्थानं सन्निविष्टानि यानि तैः तथाभूतैः। लतामध्ये स्थिता जानकी श्यामोपलगतहेमरेखेव भातीति भावः। पुनः कनककदल्या यः कन्दली गर्भः तद्वद्गौरैः। पुनः हारिद्रं हरिद्रासम्बन्धि यदम्बु जलम् तस्य सहचरं समानं कान्तिपूरम् उज्ज्वलकनककान्तिं वहद्भिः अङ्गैः उपलक्षिता सती कामक्रीडायै या भवनवलभी भवनगता चन्द्रशाला सौधोर्ध्ववेश्मेति यावत्। ("शुद्धान्ते वलभीचन्द्रशाले सौधोर्ध्ववे-श्मनी" इत्यमरः) तस्या दीपिका इव उद्योतिनीव आविर्भूता। सेयं का। अत्र रूपकोपमयोः सङ्करः। मन्दाक्रान्ता वृत्तम्॥ ६॥

अतिमात्रमिति। अतिशयमित्यर्थः। **मन्मथेनेति।** अनेन रामकर्तृकोपवनशोभा सूचिता। **अनवद्याङ्गीति।** न अवद्यानि निन्दनीयानि अङ्गानि यस्याः सा तत्सम्बुद्धौ। अत्र सख्याः संस्कृ-तोक्तिः वैदग्ध्यं ख्यापयति। यथोक्तं भरतेन-"संस्कृतभाषाचाराः प्रायो नाट्येषु न स्त्रियः श्लाघ्याः। क्वचिदपि तपःप्रभावाद्विदग्धताबोध-नाच्च शस्यन्ते" इति।

सीतायाः सर्वेषामङ्गानामनवद्यतां प्रदर्शयन् स्वोक्तिं समर्थयते-**बन्धूकेति।** बन्धूकस्य मधुरीपुष्पस्य बन्धुः सदृशः अस्याः अधरः। चक्षुर्नेत्रं च सितकेतकस्य आभा इव आभा यस्य तत्तथाभूतम्। कपोलः मधूकस्य पुष्पविशेषस्य कलिकावन्मधुरो मनोहरः। दन्तानामवली पंक्तिः विजिता दाडिमबीजानां राजिः श्रेणी यया सा तथाभूता। आस्यं मुखं च विकचं प्रफुल्लं यत् पङ्कजं तस्मै दत्तं दास्यं नीचभावो येन तत् तथाभूतं, न्यग्भावितप्रफुल्लपङ्कजमिति यावत्। तदास्यदास्ये-ऽपि गतोऽधिकारितां न शारदः पार्थिवपूर्वशेखरः इति नैषधचरि-तोक्तिरत्रानुसन्धेया। अत्रोपमाव्यतिरेकयोः सङ्करः वसन्ततिलकं वृत्तम्॥ ७॥

मुग्धाया इति। अपरिपक्वबुद्धेः इन्द्रिक्रान्तशैशवामात्राया इत्यर्थः। **प्रकृतेति।** प्रकृत्या स्वभावेनैव कमनीयः सुन्दरो यः पदार्थः तस्य परिशीलनस्य परिचयस्य अय च गुणग्रहणस्य पटीयस्त्वं तस्मिन् चातुरी।

(३३) सीतायाः कमनीयपदार्थपरिशीलनौचित्यचातुर्यं समर्थयमानमाह-पदाभ्यामिति । पदाभ्यां चरणाभ्याम् उन्निद्रां प्रफुल्लां शोणाम्बुजस्य रक्तकमलस्य रुचिं शोभाम् अधरयति ग्लपयति, तिरस्करोतीति यावत् । कराभ्यां हस्ताभ्यां नवकिसलयानां नवपल्लवानाम् अरुणतां रक्तताम् आदत्ते गृह्णाति । दशनवसनयोरधरयोरोष्ठेण प्रवालस्य विद्रुमस्य छायां शोभां पिबति गृह्णाति । स्मितस्य ईषद्धसितस्य ज्योत्स्नापूरैः कान्तिकलापैः हिमरुचेः चन्द्रस्य शोभां हसति तिरस्करोति । तद्गुणव्यतिरेकयोरत्र सङ्करः । शिखरिणी वृत्तम् ॥ ८ ॥

शशधरेति । शशधरमौलेः चन्द्रचूडस्य देहार्धधारिणी तत्सम्बुद्धौ । त्रिभुवनेति । त्रिभुवनमेव यद्गृहं तस्य सुवासिनी तत्सम्बुद्धौ । जगद्व्यापिनीत्वाद्देव्याः एतद्विशेषणं सङ्गच्छते । समुचितेति । शशधरमौलिदेहार्धधारिणीत्यत्र गौर्याः स्वपतिसाहित्यवर्णनेन स्वकीयसमुचितपतिप्राप्त्यभिलाषा सूचिता जानक्येति हृदयम् । अलीकेति । न मे कश्चिदेताद‍ृशो गूढातिशय आसीदिति भावः ।

सखी जानक्यर्थं देव्याः आशिषं याचते-कान्तमिति । इन्दुमणीनां चन्द्रकान्तमणीनां यद्धाम तद्वत् कोमला कमनीया तत्सम्बुद्धौ पुनः कोमलेन्दुमुकुटस्य बालचन्द्रशेखरस्य अङ्के शेते या सा तत्सम्बुद्धौ । एवम्भूते हे गौरि । अचिरेण शीघ्रमेव मम इन्दुवत् सुन्दरमुखं यस्याः सा तथाभूता सखी जानकी इन्दुवच्चारुं चन्द्रवत्सुन्दरकान्तिं पतिं विन्दतां लभताम् । इदमेव मया भवत्याः सकाशाद्याच्यत इति शेषः । रथोद्धता वृत्तम् ।

परिणयेति । परिणयस्य विवाहस्य यो मनोरथः तस्य प्रणयी, विवाहाभिलाषिणीति यावत् ।

वयस्सन्धाविति । शिशुत्वेऽपक्रान्ते उचित एव अस्या जानकीविवाहाभिलाषः । वयःसन्धिं वर्णयन्नाह-अपक्रान्त इति । बाल्ये बाल्यावस्थायाम् अपक्रान्ते व्यतीते सति, तरुणिमनि तरुणस्य भावः तरुणिमा तस्मिन् आगन्तुमनसि सति आगन्तुं मनो यस्य स तस्मिन् (तुं काममनसोरपीत्यनेन मकारलोपः) न आगते इति यावत् । पुनः मुग्धत्वे मुग्धावस्थायां प्रयाते सति अथ च चतुरिमणि चातुर्ये आश्लेषरसिके सति तस्याः आलिङ्गनाकाङ्क्षिणि सति । इन्दीवरदृशः कमललोचनायाः यद् वपुः केनापि वयसा न स्पृष्टं बाल्ये गते स्पृष्टं तारुण्ये चानागते तत् पञ्चेषोः पञ्चबाणस्य कामदेवस्य परमं मर्म सारभूतं तात्पर्यम् इह जगति जयति सर्वोत्कर्षेण वर्तते । शिखरिणी वृत्तम् ॥ १० ॥

(३४) राजहंसेति । राजहंसस्य कन्यका पूर्ववर्णितराजहंससहचरी तत्सम्बुद्धौ । पक्षे राज्ञां मध्ये यो हंसः श्रेष्ठो जनकः तस्य कन्यका

सीता तत्सम्बुद्धौ । लक्ष्मणो राजहंसीं वक्ति । किन्तु तदुक्तिः सीतापक्षेऽपि सङ्गच्छते ।

करिकलभेति । करिकलभस्य गजशावकस्य यः कण्ठनिर्घोषः शब्दः तद्वन्मधुरः सुश्राव्यः । वात्सल्यात्कलभपदन्यसनम् । यद्यपि कलभशब्दस्य करिशावकार्थत्वे करिपदसन्निवेशो व्यर्थ एव तथापि तत्प्रयोगः-"विशिष्टवाचकपदानां सति विशेषणसमभिव्याहारे विशेष्यमात्रपरत्वम्"-इति वामनोक्त्या समर्थनीयः ।

लतामुपालम्भयन्नाह-स्तनविजितेति । अयि लतिके । स्तनाभ्यां विजिता स्तवकानां गुच्छानां श्रीः शोभा यस्याः सा तथाभूता । तया च अधरेण अधरिता तिरस्कृता प्रवालस्य नवपल्लवस्य "प्रवालो विद्रुमे वीणादण्डेऽभिनवपल्लवे" इति हैमः नवा लक्ष्मीः शोभा यस्याः सा तथाभूता सती त्वं तरलदृशं चलापाङ्गां तां जानकीं तिरयन्ती प्रच्छादयन्ती लज्जां नावलम्बसे किम् । व्यापको व्याप्यं स्वगुणेन प्रच्छादयति त्वं पुनः स्वोत्कृष्टां कथं प्रच्छादयसीति भावः । गीतिश्छन्दः ॥ ११ ॥

श्यामच्छवीनामिति । श्यामा छविः कान्तिर्येषान्ते तेषां तथाभूतानां कदलीदलानाम् अन्तराले प्रादुर्भवन्ती नयनपथम् अधिरोहन्तीयं नवनीरदानां नवीनमेघानाम् अन्तराले चान्द्री कलाइव कौमुदीव मां चकोरवन्मुदितं करोति आह्लादयति । यथा मेघान्तराले दृश्यमाना चान्द्रमसी कला चकोरम् आनन्दयति तथैव इयं श्यामकदलीदलानामन्तराले आविर्भवन्ती माम् आह्लादयतीत्यभिसन्धिः । इन्द्रवज्रे पेन्द्रवज्रयोः सङ्कर उपजातिश्छन्दः ॥ १२ ॥

कदलीमुपालम्भयन्नाह-हे बालहेमेति । बाला न कठोरा, मृदुलेति यावत्, अथ च हेम्नः सदृशी कान्तौ लतिका तत्सम्बुद्धौ । ध्रुवं निश्चितमेव तरलायताक्ष्याः चलापाङ्गायाः ऊर्वोः श्रियं शोभां (मृदुलतां स्वर्णसदृशत्वं च) कलयितुं प्राप्तुम् त्वम् ईहसे वाञ्छसि चेत् तर्हि विलासवतीं हावभावनावण्यशालिनीम् एनां जानकीं चिरं बहुकालपर्यन्तं विलम्बय । स्वसन्निधाविति शेषः । हि यतः स्त्रीणां कलाः परिचिताः सत्यः स्थिरतां प्रयान्ति स्थिरीभवन्ति । यत एवं ततो यदि चिरकालमियं तव सन्निधौ तिष्ठेत् तदैव त्वमस्याः ऊरुश्रियं लभेथाः इति भावः । अत्र परिकरोत्प्रेक्षाव्यतिरेकार्थान्तरन्यासा अलङ्काराः । वसन्ततिलकं वृत्तम् ॥ १३ ॥

(३५) शिखण्डीति । शिखण्डिनो मयूरस्य पिच्छेन बर्हेण मण्डितः भूषितः कर्णपूरो यस्य सः । मुग्धत्वेति । मुग्धत्वेन बालभावेन (कारणेन) विमुक्तो लोचनविकारः अपाङ्गभङ्गः येन सः । बालतया वक्रेक्षणाद्यस्य नैव संवृत्तमित्यर्थः । केयमस्यामित्यादिना भाविनीं तस्या निजभक्तिपात्रतां व्यनक्ति । सुचिरेति । यथा चिरकालपरि-

Digitized by Google

चयजनिता भक्तिः सुमित्रायां तथैवास्यामपीत्यर्थः । इमं कुमारमित्यादिना भाविनं तयोर्विवाहमाक्षिपति । सख्यपि जानक्याः विवाहमाक्षिपति ।

कस्यचिदिति रामचन्द्रं परामृशति । **अपरिशीलितास्वपीति ।** अपरिचितास्वपीत्यर्थः । **परिसरेति ।** परिसरे समीपे वर्तते यः स तेन । **नाथवन्तमिति ।** सरक्षकमित्यर्थः । **कुसुमित इति ।** यतो रामचन्द्रोऽत्रैवास्ति अतो नूनमनयोः सीतारामचन्द्रयोः परस्परालोकनेन प्रीतिर्जनयिष्यते, ततश्च मे समीहितं सिध्येदिति भावः । मनोरथद्रुमश्च सीताविवाहसम्बन्धी ।

पुनर्व्यावृत्त्येति । सीतायाः गमनेच्छा सङ्कोचशीलजन्या, पुनरावर्तनं च रामचन्द्रदर्शनोत्कण्ठाजनितम्, सहकारपादपदर्शनं तु व्याजमात्रमेवेत्यवधेयम् ।

(३६) सीतायाः प्रत्यागमनं वर्णयन्नाह-**मन्मन इति ।** मम मन एव यत्कुमुदं तस्यानन्दे आह्लादने शरदः शरत्कालीना पार्वणशर्वरी पौर्णमासीरात्रिरियं पुनरप्यभिवर्तते व्यावृत्ता भवतीति । अलङ्कारोऽत्र च परम्परितरूपकम् ॥ १४ ॥

पुनर्जानकीं वर्णयन्नाह-**वहत्यस्या इति ।** अस्याः जानक्याः दृष्टिः विकचं प्रफुल्लं यन्नीलोत्पलं तस्य तुलां तुलनां वहति भजते । इदमस्याः वदनं मुखम् अखण्डस्य पूर्णस्य चन्द्रस्य अभिख्यां शोभाम् अभिख्या नाम शोभयोः इत्यमरः । कलयति भजते । अस्याः कुचौ किञ्चित् ईषत् मीलतोः मुकुलितयोः कमलयोः तुलनां समतां कन्दलयतः प्राप्नुतः । चिकुरनिकुरम्बं केशपाशः चित्रां विचित्रां तमःशोभां रात्र्युचितां कुरुते । जानक्याः शरत्पार्वणशर्वरीरूपत्वसमर्थनपरतयाऽयं श्लोको व्याख्येयो भवति । वदनेन्दोः पूर्णत्वं कुचकमलयोर्मुकुलितत्वं, मुखचन्द्रस्य पश्चाद्भागे केशतमस्त्वमित्यादिकं सर्वं शारदपार्वणशर्वरीत्वं सूचयति । किन्तु अस्मिन् पक्षे रात्रौ दृष्टिकमलविकचत्ववर्णनं कविकुलसम्प्रदायविरुद्धमित्यन्यथैव व्याख्यातः । शिखरिणी वृत्तम् ॥ १५ ॥

कथमिति । वासन्तीलतया सह यस्य सहकारपादपस्य सङ्गमोऽभिलषितः तस्य रामचन्द्राभिमुख्यवर्णनेन भङ्ग्या भावि वृत्तं सूचितम् । **नखेति ।** नखशिखाभिः विलिखितैः चिह्नितैः कोमलदलैः नवपल्लवैः । **विदग्धेनेति ।** कामकलाकलापकोविदेनेत्यर्थः । **अथवेति ।** अथ वा मन्मथ एव चूतलतिकां निजचापयष्टिं मत्वा तां धृतवान् । नखाङ्गुलीरेखाश्चैता इति भावः । सर्वमेतद्रामचन्द्रस्पर्शबोधकम् ।

(३७) सीतायाः सम्भावनामन्यथयन् चूतलतिकायां न मन्मथस्य निजचापभ्रान्तिः अपितु जानकीतनावेवेत्यभिप्रायेणाह-**मत्वेति ।** हे शशिमुखि पुष्पधन्वा कामः तव तन्वीम् अनतिस्थूलां तनुलतां

निजं चापमिति मत्वा (त्रैलोक्यमोहनत्वादुभयोः साम्यं तन्मूला च भ्रान्तिः) मध्यदेशे मुष्टिना बभार विधृतवान् । अमुमेवार्थं काव्यलिङ्गेन समर्थयमानश्चाह-यस्मादिति । यस्मात् कारणात् अत्र तव मध्यदेशे त्रिभुवनवशीकारमुद्रामनुकुर्वन्ति याः ताः तथाभूताः (रेखायास्त्रित्वेन जगतश्च त्रित्वेन त्रिभुवनवशीकारेत्याद्युक्तिः) तिस्रोऽङ्गुलीसन्धिरेखाः कुसुमायुधकराङ्गुलीसन्धिचिह्नानि त्रिवलिकपटात् उदरदेशवर्तित्रिवलित्रयमिषेण भान्ति शोभन्ते । अत्र प्रथमार्धे भ्रान्तिमानलङ्कारः, उत्तरार्धे त्वपह्नुतिः, मन्दाक्रान्ता वृत्तम् ॥ १६ ॥

वासन्तीलतोपरि भ्रमतो भ्रमरान् वर्णयन्नाह-वासन्तीति । इन्दिन्दिराः भ्रमराः सुन्दरं मनोहरं वासन्तीरसबिन्दुं माधवीमकरन्दस्यन्दं चरन्ति पिबन्ति । अथ च चिरमन्दिरं चिरकालवासस्थानमरविन्दं कमलं मन्दमन्दं शनैः शनैः परिहरन्ति त्यजन्ति । अतोऽत्र वासन्त्याः उत्कर्षसूचकमिदम् । वृत्तमत्रार्याप्रभेद एव ॥ १७ ॥

सीताया लतासाम्यं प्रदर्शयन् आह-निर्मुक्तेति । निर्मुक्ता शैशववयसा बाल्यावस्थैव शिशिरः तदाख्यः ऋतुर्यया सा । नवीनं नूतनं सम्प्राप्ता यौवनमेव यो वसन्तः तस्य मनोरमा श्रीः शोभा यया सा । पुनः उन्मीलितौ मुकुलितौ स्तनावेव नवस्तबकौ यस्याः सा । एवम्भूता एणीदृशो मृगलोचनायाः तनुलता (तनुर्लतेव) नोऽस्माकं मुदं निकाममतिशयं तनुते कुरुते । अतः किं लतान्तरवर्णनयेति पूर्वेण सम्बन्धः । यथा शिशिरात्यये वसन्तागमे च लता किञ्चिद्विकसितकुसुमा अतीव आह्लादयति तथैव इयमपि त्यक्तशैशवावस्था सम्प्राप्तयौवना ईषदुन्मीलितकुचा नितान्तं मनो रमयतीति परिस्फुटार्थः । रूपकमत्रालङ्कारः । वसन्ततिलकं वृत्तम् ॥ १८ ॥

इयमसाविति । अनेन लतोपहरणमुखेन सीतायाः स्वयं रामचन्द्राधिष्ठितोपवनप्रदेशोपसर्पणं परामृशति सखी । अत एव आनन्दाः सप्रणयकोपोक्तिः । परिसरं समीपमित्यर्थः ।

सीतायाः प्रणयकोपावस्थां वर्णयन्नाह-अमलमृणालेति । अमलो निर्मलो यो मृणालकाण्डः मृणालनालः तद्वत् कमनीया मनोहरा कपोलस्य रुचिः कान्तिः यस्याः सा तस्यास्तथाभूतायाः तरलं चञ्चलमत एव सलीलं लीलया सहितं यथोत्तनलितं तद्वत् प्रतिफुल्ले दृशौ यस्याः सा तस्यास्तथाभूतायाः । पुनः विकसन् प्रफुल्लो योऽम्भोजस्तद्वत् शोणां रक्तां करस्य कान्तिं बिभर्ति या सा तस्यास्तथाभूतायाः । सुतनोः रमणीयाकृतेः रमण्याः मदेन यौवनावलेपेन लुलितानि चञ्चलानि ललितानि लीलायितानि सुकुमाराङ्गविन्यासाः शृङ्गारभावजानि, सविलाससञ्चरणादीनीति यावत् । मनः हरन्ति मनोरमतया आकर्षयन्ति । स्त्रीणां विलासबिब्बोकविभ्रमा ललितं तथा हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः इत्यमरः ।

नर्दटकं वृत्तम्। तल्लक्षणं च "यदि भवतो नजौ भजजला गुरुर्नर्दटकम्" इति ॥ १९ ॥

(३८) रामचन्द्रं दृष्ट्वा तमेव वर्णयन्त्याह स्फुरन्तेति। स्फुरन् प्रफुल्लः अथ च पेशलः कोमलो यः उत्पलपलाशः कमलपत्रं तस्य पुञ्जवत् समूहवत् श्यामलः। पुनः महेशस्य सौम्यशेखरे मनोहरे मौलौ स्फुरन् भासमानो यः सोमः चन्द्रः तद्वत् कोमलः स्निग्धः कमनीय इति यावत्। पुनः अनङ्गस्य कामदेवस्य दर्पस्य खण्डनः ततोऽप्यधिकतरसौन्दर्यशाली। एवम्भूतः शिखण्डिमण्डनः मयूरपुच्छभूषितः मे नयनयोः सुखमानन्दं ददाति। सोऽयं कः। पंचचामरवृत्तम् ॥ २० ॥

अन्यचित्तेति। ततातिरिक्तवस्त्वायत्तचित्तेयम्। अतो न मद्वचनं शृणोतीत्यर्थः। चित्तगजेति। चित्तमेव यो गजः तस्य बन्धनाय आलानं स्तम्भः "आलानं बन्धस्तम्भः" इत्यमरः। अस्मिन्नेव आकृष्टचित्तेयमिति भावः। अयमिति। रामपरं क्रोधपरं चेति श्लिष्टोक्तिः। हृदयमित्यत्र उपान्वध्याङ्वस इति द्वितीया।

अवगताऽस्मीति। किमियं मे सखी ज्ञातवती यदहं रामचन्द्रपरवशचित्ता संवृत्तेति भावः। लज्जामिति। सख्युक्तिं रामपरामेवावगत्य सीतायाः लज्जानाटनम्। अन्यतो नयामीति। अन्यपरामेव निजोक्तिमवधारयामीत्यर्थः। कथमित्यादिना निजोक्तं क्रोधपरतया प्रदर्श्य सीतायाः लज्जामपसारयति।

सम्भाविताऽसीति। अनाकर्णितकेनाप्युत्तरा त्वमिति भावः। (३९) आकारेति। आकारस्य (आरामपदगतस्य) प्रकटनेनैव (उच्चारणेनैव) आकारस्य (चित्तगतवस्तुस्वरूपस्य, रामविषयकप्रीतिचेष्टाया इति यावत्) गुप्तिं गोपनं कृतवत्यसि। 'रामे' इत्यस्य स्थाने 'आरामे' इत्युक्त्वा स्वचित्तविश्रामस्थानस्य रामविषयकप्रीतेः स्वरूपगोपनं कृत्वा मां प्रतारयसीति भावः। आकारप्रकटनेन आकारगुप्तिमित्यत्र विरोधाभासः। यद्वा यद्यपि त्वम् 'आ' इत्यक्षरं रामे योजयसि। तथापि स्पष्टमिदं यत्त्वं तस्याक्षरस्य गोपनं वाञ्छसीति भावः। यद्वा आकारस्य स्वहृदनविकारस्य रोमच्चादेः प्रकटनेन प्रकटत्वेन आकारस्य (आ इत्यक्षरस्य) गोपनमेव स्वरभिलषितमित्यर्थः कृतवत्यसि।

सीतामधोमुखीं दृष्ट्वाऽऽह-उत्तरङ्गयेति। हे कुरङ्गलोचने मृगाक्षि कमलगर्वमोचने कमलदर्पदलने कमलादप्यधिकतरकमनीये लोचने उत्तरङ्गय उन्नमय तेन च अम्बरमाकाशः कलिन्दनन्दिन्याः यमुनायाः वीचीनां तरङ्गाणां डम्बरेण समूहेन गंभीरं गहनमस्तु। तव नयनोन्नमनात् त्वत्कटाक्षसंयोगेन अम्बरमेतादृशं भवतु। यमुनावीचिवत्

श्च मो रमणीयश्च ते कटाक्षपात इति भावः । अत्र उपमाव्यतिरेकतद्गुणानां सङ्करः । रथोद्धतावृत्तम् ॥ ३९ ॥

हृदयापलापेनेति । हृदयस्य हृदयगतविषयस्य, प्रीतेरिति यावत् अपलापेन गोपनेन । **अत्रेति** । शिखण्डमण्डने मयूरशिखाभूषिते पुनः पुण्डरीकवत् कमलवत् कमनीये सुन्दरे लोचने यस्य स तस्मिन् । पुनः श्यामं यत्तामरसं कमलं तस्य दामवत् कोमलः स्निग्धस्तस्मिन् । एवम्भूते राम इति नाम यस्य स तस्मिन् तथाभूते मनोभवे कामदेवे ते तव मनः श्वस्ति चुम्बितमिति शेषः । इति मया विदितमिति पूर्वेण सम्बन्धः । रूपकमत्रालंकारः । तत्र केचित्–रूपके मनोभवस्य प्राधान्यात् विशेषणानाञ्चाप्रधानाङ्गभूतरामपरत्वाच्चोव इत्याहुः । तदयुक्तम् । उपात्तविशेषणानां मनोभवपरत्वासम्भवात् । रथोद्धता वृत्तम् ।

मदनेति । मदनवधूः रतिः तस्याः नूपुरस्य रववद्रमणीयं यथा स्यात्तथा किमपि किमपि, अनिर्वचनीयमव्यक्तमिति यावत् (किमपिद्विरुक्तिः कूजितस्यानिर्वचनीयत्वामनवरतत्वं च द्योतयति) तथा कूजन् । पुनः माकन्दः चूतः तस्य मुकुलस्य मञ्जर्याः मधुरसेन मकरन्देन मधुरं मुखं यस्य स एवम्भूतो मधुकरो भ्रमरो भ्रमति । शृङ्गाररसोद्दीपनविभावत्वेन भ्रमरकूजितवर्णनम् । अनेन च वर्णनेन भ्रमराभिमुखीं सखीं कृत्वा रामावलोकनावसरं सम्पादयति सीतेति ध्येयम् ॥ ७३ ॥

(४०) स्वनयने प्रत्याह–**अयीति** । अयि लोचने प्रियजनस्य वदनं मुखमेव अरविन्दं कमलं तस्य मकरन्दं पिबतम् । निपुणमवलोकयतं प्रियजनमुखमिति भावः । स्वविनयं प्रदर्शयन्त्याह–**अयि तरल इति** । हे तरले चञ्चले लोचने क्व युवां मम नेत्रे नातीव कमनीये क्व चायमपूर्वो नितान्तरमणीयः पुरुष इति विचारयतम् । यतोऽयमतीव रमणीयाकृतिः । सत्वरमेव अन्यत्र गमिष्यति । अहं च गौरीं प्रपूज्य गृहं गमिष्यामि । अतो यावदीदृशं युवयोः सौभाग्यं वर्तते तावन्निपुणं विलोकयतमेनमिति हृदयम् । नयनाञ्चलेनेति । नयनयोरञ्चलेन प्रान्तभागेन कटाक्षेणेति यावत् । सलीलमिति सशृङ्गारभावविलासमित्यर्थः ॥ ७४ ॥

सीतायाः आलोकनं वर्णयन्नाह–**सर्वस्वमिति** । नवयौवनस्य सर्वस्वम् । अस्याः परो यौवनस्य सारो न कोऽप्यस्तीति भावः । पुनः भोगस्य भवनम् एकमात्राश्रयभूतम् । दृशां नेत्राणां भाग्यम् महता भाग्योदयेनैव ईदृशमवलोकितं नेत्रस्येति भावः । मदविभ्रमस्य यौवनमदलास्यस्य सौभाग्यम् । यौवनोचितलास्यादिकमप्येनामेव आसाद्य आत्मनः सौभाग्योदयं मन्यत इति भावः । जगतः संसारस्य सारं सर्वोत्कृष्टं तत्त्वम् । जन्मनः फलम् अस्या एव आलोकनेन जन्म

Digitized by Google

सफलतामेतीति भावः । कुसुमायुधस्य साकूतं कामदेवस्य आशयेकस्थानम् । रामस्य हृदयम् रामहृदयव्यापित्वादवलोकनचमत्कारस्य । रतेः तत्त्वं परा काष्ठा । शृङ्गारस्य रहस्यम् । एवम्भूतं उत्पन्नदृशः कमललोचनायाः किञ्चित् आलोकितं कटाक्षपातः अस्तीति शेषः । किञ्चिदिति सातिशयानिर्वचनीयत्वमवलोकनस्य द्योतयति । अत्र रतिशृङ्गारपदयोरनौचित्यं प्रतिभाति रसभावादीनां स्वशब्दवाच्यत्वं रसहानिकरमिति काव्यसम्प्रदायविदः । तथा च प्रकाशे—"व्यभिचारिरसस्थायिभावानां शब्दवाच्यता कष्टकल्पनया व्यक्तिरनुभावविभावयोः । प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः । अकाण्डे प्रथनच्छेदावङ्गस्याप्यतिविस्तृतिः । अङ्गिनोऽननुसन्धानं प्रकृतीनां विपर्ययः अनङ्गस्याभिधानं च रसे दोषाः स्युरीदृशाः" इति । किन्तु यदि रतिपदं कामवधूपरं शृङ्गारपदञ्च नेपथ्यविधानपरं नीयेत तदाऽदोषता स्यात् । शार्दूलविक्रीडितं वृत्तम् ॥ २७ ॥

तामेवेति । अयिपिबहेत्यादि । सखी भ्रमरव्याजेन रामं वर्णयन्त्याह दलदमलेति । दलत् विकसितं अमलं स्वच्छं कोमलं च यदुत्पलं कमलं तस्य पलाशस्य पत्रस्य शङ्कया भ्रमेण आकुलः अयम् अलिपोतः भ्रमरः तव लोचनयोः परिसरं प्रान्तं अनुवेलम् प्रतिक्षणम् अनुसरति । रामचन्द्रः क्षणं क्षणं त्वां विलोकयतीत्यान्तरार्थः । वृत्तमार्याप्रभेद एव ॥ २८ ॥

सीता सख्युक्तेर्भ्रमरपरतां भङ्ग्या रामपरतां च विभाव्याह—अयीति । यद्यपि लोचनषट्पदवर्णनमनया कृतम् तथाऽपि रामचन्द्रकृतस्वावलोकनपरतया कर्णयोः सुखं करोतीत्याशयः ।

सीतावलोकनं वर्णयन्नाह—अमृतमयेति । अमृतमयो यः पयोधिः तस्य क्षीरस्य जलस्य "क्षीरं पानीयदुग्धयोः" इति हैमः कल्लोलवत् तरङ्गवत् लोलैश्चञ्चलैः नेत्रपातैः कटाक्षैः । इयं तरलाक्षी चपलनयना यत्र यस्मिन् मुहूर्ते मां स्नपयति प्रक्षालयति, आह्लादयतीति यावत् सोऽयं सन्मुहूर्तः उत्तमः समयः सदा भवतु सर्वदा स्थायी अस्तु इत्याशा । सांसारिकसुखस्य अचिरस्थायित्वं विभाव्य सविषादमाह कुतोवेति । कुतो वा एतादृशो भविता । यतो विधातुः सृष्टयः मधुरेण सुखेन विधुरेण दुःखेन च मिश्राः मिश्रिताः सन्ति अतो न सदातनोऽयं मुहूर्तो भविष्यतीति भावः । क्षणान्तरे सीतायाः गमनस्य, तथा च रावणकृतजानकीहरणस्य सूचकमेतत् । मालिनी वृत्तम् ॥ २९ ॥

(४१) मण्ड्यतामिति । विभूष्यतामित्यर्थः । स्नेहमुग्धा इति । स्नेहपरवशत्वादनभिज्ञा इत्यर्थः । निसर्गेति । निसर्गतः स्वभावादेव लावण्यं शरीरकान्तिः अस्याः सा ताम् एवम्भूतां चन्द्रलेखां जानकीरूपाम् । एतदर्थानुसन्धेयौ श्लोकौ । यथा रघौ—"तपस्विवेशक्रियया-

Digitized by Google

ऽपि तादृशः प्रेक्षणीयः सुतरां बभूव राजेन्द्रनेपथ्यविधानशोभा तस्योदिताऽसीत्पुनरुक्तदोषा" इति । शाकुन्तले च "किमिव हि मधुराणां मण्डनं नाकृतीनाम्" इति ।

जानकीलावण्यस्य चन्द्रलेखात्वम् तथा च नेपथ्यस्यानावश्यकत्वं प्रदर्शयन्नाह-अयीति । तव मुखलेखा चन्द्रबिम्बे सदेहा तत्सदृशा. सदृशा सदृशे रज्यन्त इति भावः । दशनां किरणलक्ष्मीः ज्योतिः शोभा अच्छज्योत्स्नायाः स्वच्छचन्द्रिकायाः सदृशी । कुवलयदलस्य अब्जपत्रस्य या द्रोणी दोना इति हिन्दीभाषायाम् नेत्रकुणा तत्सङ्काशाद् वहन्ती अथ च तरला चञ्चला वहनम् अधिकं मिष्टा मधुरा दुग्धधारेव तव दृष्टिरित्यनुषङ्गः । यद्येवं तर्हि किन्ते कृत्रिममुखमण्डनादिव्यापारेणेति न विचारयन्ति ते मातर इति हृदयम् । मालिनी वृत्तम् । "दुग्धकुल्येव दृष्टिः" इत्युत्तररामचरिते ॥२८॥

(४२) अप्याविरस्त्विति । भूयोऽपि पुनरपि मम लोचनयोः इयं जानकी आविरस्तु । पुनर्मे नेत्रयोरतिथिर्भवत्विति भावः । दिवसे अन्तर्हिता सूर्यकिरणैः तिरोहिता नक्तं रात्रौ चन्द्रिकेव चकोरयोः । यथा सूर्यकिरणान्तरिता चन्द्रिका चकोरयुगलं क्षणं खेदयित्वा पुनरपि रात्रौ आविर्भूय तत्सुखयति तथेयमपि क्षणान्तरे आगत्य मां सुखयत्विति सपत्याशोक्तिः । किञ्चित्कालोत्तरभाविविवाहसूचकमेतत् । पुनः सूर्योदये चन्द्रिका म्लायतीति नोपमादोषः । यतः एतदपि भावि जानकीवियोगसूचकत्वात्तत्रत्यविप्रलम्भशृङ्गारपोषकमेवेति ध्येयम् ॥ २९ ॥

आर्येयमिति । आर्ये इयम् आविरस्ति । अथ वा आर्या इयमाविरस्तीति छेदः । उभयथाऽपि, विशेषतो द्वितीयच्छेदे जानक्यागमनबोधकत्वेन अध्यवसितं रामेण । अत एव तस्य सहर्षोक्तिः । सन्ध्यागमनं वर्णयन्नाह-मुग्धस्येति । मुग्धस्य सुन्दरस्य । पुनः केल्या हेलयैव विजिता स्मरस्य चापयष्टिर्येन स तस्य एवम्भूतस्य सुधाकरस्य रुचिं शोभामतीव अतिशयं निपुणं यथा स्यात्तथा आतन्वती आदधती अथ च विस्तारयन्ती (सन्ध्या चन्द्रशोभां बिभर्ति अभिसारिका च स्वकान्त्या चन्द्रकान्तिं विस्तारयति) । विजितस्मरचापयष्टिचन्द्रकान्तिविजयेन स्मरचापयष्टिरमणीयताधिक्यं सूचितमभिसारिकायाः । पुनः रागेण अस्तमितदिनकरकिरणारक्तिमजन्येन, अथ च नायकप्रीत्या, उल्बणा उद्धता प्रबला । पुनः उदञ्चिता प्रदर्शिता तारकाणामथ च अक्षिकनीनिकानां श्रीः शोभा यया सा । एवम्भूता सन्ध्या काऽपि पतिंवरा इव वृणवन्ती अभिसारिकेव स्फुटं यथा स्यात्तथा आविरस्ति प्रकटीभवति । अस्य श्लोकस्य पताकास्थानकत्वे-केलिविजितः स्मरः अथ च चापयष्टिर्हरधनुर्येन स तस्य सुधाकरस्य चन्द्रसुन्दरस्य रामस्य रुचिरिति पतिंवरा च जानकी-

स्यादि व्याख्येयम् । पतिंवरेत्यत्र पतिं वृणोति या इति विग्रहः "वृङ् संभक्तौ" धातोः संज्ञायाम् भृतॄवृजीत्यादिना खच् । अत्र श्लेषोपमा । वसन्ततिलकं वृत्तम् ॥ ३० ॥

सूर्यास्तमयं वर्णयन्नाह कृत्वेति । प्रबुद्धानि विकसितानि कमलानि यत्र एवम्भूतां सकलां समस्तां त्रिलोकीं जगतीतलं कृत्वा जगति कमलानि विकासयित्वेति भावः । असौ अरविन्दबन्धुः सूर्यः अम्भोनिधेः समुद्रस्य गर्भम् अन्तरं विशति प्रविशति; हेतूत्प्रेक्षामुपन्यस्यति-अन्तरिति । क्षीराब्धौ प्रसुप्तस्य हरेः विष्णोः नाभौ यत्सरोजं कमलं तद्बोधे विकासने कौतूहली उत्सुक इव । लोकत्रयसरोजोद्घाटनं कृत्वा हरिनाभिकमलमुद्बोधयितुमिव समुद्रं प्रविष्ट इति भावः । वसन्ततिलकं वृत्तम् ॥ ३१ ॥

गगनेति । गगनस्याभोगो विस्तारः ईषन्मुकुलितो रागः सन्ध्यासमयोचितो यत्र स तथाभूतः अस्तीति शेषः ॥

लक्ष्मणोक्तिं समर्थयमानमाह-प्राचीमिति। बन्धकीनां पुंश्चलीनाम्। पुंश्चली धर्षिणी बन्धक्यसती इत्यमरः । बान्धवे कार्यसाधकत्वात् सहायभूते घनतिमिरचये निविडान्धकारपटले प्राचीं दिशमालम्बमाने सति । सन्ध्यायां प्रथमं प्राचीदिगेव अन्धकारेण व्याप्ता भवतीति ध्येयम् । पुनः स्वैरिणीनां पुंश्चलीनां वैरिणि प्रकाशकत्वादभिसरणविघ्नभूते शशिकरनिकरे चन्द्रिकापटले प्रतीचीं दिशं सम्प्राप्ते सति । दिशामन्तरालं मध्यभागमूर्ध्वाकाशमिति यावत् कर्तृ । अर्धे पूर्वार्धे श्यामोपलमिव कृष्णपाषाणमिव अन्धकारमयत्वात् अर्धे पश्चिमार्धे स्फटिकमिव चन्द्रिकोज्ज्वलितत्वात् । एवम्भूतं सत् कालिन्द्याः जह्नुकन्यायाश्च मिलती अमले स्वच्छे ये जले तयोर्यौ स्यन्दौ प्रवाहौ तयोः यः सन्दोहः संघातः "सन्दोहविसरव्रजाः स्तोमौघनिकरव्रातवारसंघातसञ्चयाः" इत्यमरः । तस्य मैत्रीं सादृश्यं विधत्ते भजते । अन्धकारितोज्ज्वलदिग्विभागयोः मिलनस्थानं गङ्गायमुनयोः मिलनस्थानमिवाभातीति भावः । क्वचित्प्रभा चान्द्रमसीत्याद्यारभ्य "पश्यानवद्याङ्गि विभाति गङ्गा भिन्नप्रवाहा यमुनातरङ्गैः" इति रघुवंशे । स्रग्धरा वृत्तम् ॥ ३३ ॥

चन्द्रोदयं वर्णयन्नाह-एतत्कोकेति । एतत् दृश्यमानं मुग्धं सुन्दरं सुधांशोः चन्द्रस्य वपुः विजयते उत्कर्षेण वर्तत इत्यभिसन्धिः । तदेव वपुर्विशेषयन्नाह-कोकेत्यादिना । कोककुटुम्बिनीजनस्य कमलिनीमण्डलस्य मनःशल्यं सरोजसङ्कोचकत्वाद्दुःखमूलम् । पुनः चकोराङ्गनानां चञ्चूकोटी एव यौ कपाटौ तयोः (सूर्यप्रभावात्) घटितयोः सम्मीलितयोः सतोः उद्घाटिका (चन्द्रोदये चकोराश्चञ्चूनुद्घाटयन्तीति सुप्रसिद्धम्) कुञ्चिका उद्घाटनयन्त्रम् । पुनः

Digitized by Google

दग्धस्य (हरनेत्रवह्निना) स्मरतरोः स्मर एव तरुर्वृक्षस्तस्य नवाङ्कुरः (कामोद्दीपकत्वाच्चन्द्रोदयस्य) पुनः आर्द्रागसां स्फुटापराधनायकानाम् प्रेयस्याः दयितायाः यो मानस्तद्रूपो य उद्दामः स्वच्छन्दोन्मत्तो गजस्तस्य अङ्कुशो निवारकः (उद्दीपनस्वभावत्वेन चन्द्रिकाया माननिवारकत्वात्)। अत्र रूपकोत्प्रेक्षयोः सङ्करः। शार्दूलविक्रीडितं वृत्तम् ॥ ३४ ॥

चन्द्रोदयं वर्णयन्नाह—कल्लोलेति। जगतो मण्डनं भूषणं इन्दुखण्डं केषां जनानाम् अन्तस्तोषं हृदयाह्लादं न किसलयति अङ्कुरयति जनयतीति यावत्, अपि तु सर्वेषां किसलयत्येवेति प्रश्नकाक्वा व्यज्यते। इन्दुखण्डं वर्णयन्नाह—कल्लोलेत्यादिना। कल्लोलेन तरङ्गवेगेन क्षिप्तः पङ्को (श्यामाङ्करूपो) यस्मिन् तत्तथाभूतम् (त्रिपुरहरस्य शिवस्य शिरसि या स्वःस्रवन्ती स्वर्णदी गङ्गा तस्यां तदधिकरणकं) मृणालं बिसतन्तुः। गङ्गातरङ्गोत्क्षिप्तपङ्कस्पृष्टतत्रत्यमृणालमिव साङ्कचन्द्रबिम्बमिति भावः। पुनः कर्पूरस्य यः क्षोदः चूर्णः "क्षोदश्चूर्णे" इत्यमरः तस्य जालं समूहः (स्वच्छत्वाच्छैत्याच्च साम्यम्) कुसुमशरवध्वाः रत्याः यः सीधुभृङ्गारः मद्यपानपात्रं तस्य नालं (टोंटीति प्रसिद्धम्)। (मद्यसंस्पर्शात् कामिजनोन्मादकत्वं कामवधूसम्बन्धात्कामोद्दीपकत्वं च)। कथम्भूतस्येन्दोरित्यपेक्षायामाह—दुग्धेत्यादि। दुग्धाब्धिबन्धोः क्षीरोदजातस्य, पुनः गगनमेव यत् कमलिनीपत्रं तत्र तद्गतः पानीयबिन्दुरिव जलकणिकेव स्थितस्य। अत्र रूपकोत्प्रेक्षयोः सङ्करः। स्रग्धरा वृत्तम् ॥ ३५ ॥

अलमिति। कामोद्दीपकत्वाद्वर्णनानां रामस्यालमुक्तिः सायन्तनेति। सायङ्कालीनदेवतापूजनोचितपुष्पोपहारेणेत्यर्थः ॥

इति श्रौतस्मार्ताचारपरायणमैथिलश्रोत्रियकुलावतंसोपाध्यायोपनामकश्रीतीर्थनाथशर्मतनूजजगन्नाथविरचितायां प्रसन्नराघवटीकायां भावबोधिन्यां द्वितीयाङ्कव्याख्या ॥

Digitized by Google

प्रसन्नराघवटीकायाम्

भावबोधिन्याम्

तृतीयाङ्कव्याख्या

(४४) वितस्तिः परिमाणविशेषो द्वादशाङ्गुलपरिमितः ॥

मांसस्तवकेनेति । मांसपिण्डेनेत्यर्थः । **मतिशून्येति** मूर्ख इत्यर्थः । उपधानगेन्दुक इति आश्रयभूत इत्यर्थः ।

(४५) **कोपिष्यतीति** । अन्तः पुरचारिणां सौभाग्यमन्यथा सम्भाव्येत्यर्थः । **प्राघुणिकस्येति** । अतिथेरित्यर्थः । **परिपालयन्निति** । प्रतीक्षमाण इत्यर्थः ।

अक्षिमीलनैरिति । योगोचिताभ्यासैरित्यर्थः । **कर्पटपेटकैरिति** । कर्पटस्य जीर्णवस्त्रस्य पेटकैः मञ्जुषाभिः । अप्रयोजकैरिति यावत् । **क्षपणक इवेति** । यथा क्षपणका नग्नशीलत्वात् कर्पटानि नाऽऽददति तथैवेते भावः ।

(४६) **वक्रेति** । मांसपिण्डादिभिर्वक्रेति तनुपक्षे । सूक्ष्मतत्त्वदर्शिनीति मतिपक्षे । **तीव्रमिति** । कुटिलमित्यर्थः । **ऋजुमतेरिति** । निष्कपटस्य । ब्राह्मणवेषधारी कश्चिद् धूर्तक्षत्रियः कपटेन राज्यमपहर्तुमागतः, तमयं निष्कपटो राजा न बुध्यते इति भावः ।

अयमिति । विश्वामित्रः । **अलीकेति** । मिथ्याजनश्रुतौ ।

(४७) **बालिशेति** । मूर्खेत्यर्थः । "मूर्खवैधेयबालिशाः" इत्यमरः । **शुद्धाशय** इति अशङ्कनीयपवित्रचरित्र इत्यर्थः । **अलीकेति** । विश्वामित्रम्प्रति कपटेनायं राज्यमपहर्तुमागत इति मिथ्यापवादस्य उपन्यासेनेत्यर्थः । सम्बन्धिजन इति भाव्यङ्कवृत्तपूर्वकम् ।

(४८) **ताटङ्किनेति** । ताटङ्किना बाल्योचितकर्णभूषणवता, झटिति सत्वरमेव ताडिता निहता ताटका येन स तेन पद्मवत् रमणीये सुन्दरे विलोचने नेत्रे यस्य स तेन, क्रोडाशिखण्डकधरेण काकपक्षधरेण, सलक्ष्मणेन लक्ष्मणसहितेन । एवम्भूतेन रामेण सार्कं सह

Digitized by Google

अयं कुशिकसूनुः विश्वामित्रः इति आगच्छति । वसन्ततिलकं वृत्तम् ॥ १५ ॥

कर्णेति । कर्णानन्ददायि वृत्तम् । सम्भाव्यमानरामकर्तृकहरचापारोपणरूपमित्यर्थः ॥

प्रवेशक इति । प्रवेशकलक्षणमुक्तं दशरूपके—"तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजितः । प्रवेशोऽङ्कद्वयस्यान्तः शेषार्थस्योपसूचकः" इति । अत्र तद्वदिति विष्कम्भकवदिति वृत्तवर्तिष्यमाणकथाप्रदर्शकत्वं परामृशति । अत्र प्रवेशके ताटकावधविश्वामित्रागमनरूपवृत्तकथायास्तथा च धनुर्भङ्गविवाहादिरूपवर्तिष्यमाणकथाया वामनककुब्जकरूपनीचपात्राभ्यां सूचनमित्यवधेयम् ।

(४९) सूर्योदयं वर्णयन्नाह—एतत्तर्कयेति । भासां निधिः ज्योतिराकरः सूर्यः एतत् अये विद्योतते भाति । उदयप्रयोजनवर्णनव्याजेन स्वकार्याण्याह—चक्रवाकेत्यादिना । चक्रवाकानां तत्पक्षिमिथुनानां हृदयाश्वासाय संयोजकत्वादाह्लादनाय । पुनः तारागणानां ग्रासाय तिरोधानाय । पुनः स्फुरत् यदिन्दुमण्डलं तस्य परिह्रासाय ग्लापनाय । पुनः दिक्कान्तानां दिग्रूपनायिकानां कुचकुम्भे कुङ्कुमरसन्यासाय स्वकिरणरागेण रञ्जनायेति यावत् । पुनः पङ्केरुहाणां कमलानां उल्लासाय विकासनाय । पुनः स्फुटस्य वैरिणः शत्रोः विकसितस्य कैरववनस्य कुमुदसमूहस्य त्रासाय सङ्कोचनाय । एतत्कार्यसमूहसम्पादनाय अयं विद्योतते इति तर्कयेत्यभिसन्धिः । धनुर्भङ्गात्पूर्वक्षणे वर्णनमेतद्भाविवृत्तसूचकम् । तद्यथा चक्रवाकोऽत्र जनकपुरवासिगणाः, तारागणाः क्षुद्रराजगणाः, स्फुरदिन्दुमण्डलम् प्रकृष्टराजमण्डलम्, दिक्कान्ता सीता, पङ्केरुहो जनकदशरथपरिजनः, कैरववनं राक्षसगणाः, सूर्यश्च रामचन्द्र एव । रामचन्द्रकुलबीजभूतदिवाकरस्य वर्णनं समुचितमेव विशिष्टकार्यारम्भे । उत्प्रेक्षारूपकयोरत्र सङ्करः । शार्दूलविक्रीडितं वृत्तम् ॥ २ ॥

स्ववंशबीजं दिवाकरं नमस्कुर्वन्नाह—लालयन्तमिति । ज्योतिषां पतिं सूर्यं महयामि पूजयामि । किम्भूतमित्याह—लालयन्तमित्यादिना । अरविन्दवनानि कमलपुञ्जानि लालयन्तं विलासयन्तम् (लड विलासे, डलयोरभेदः) । पुनः भुवनानि लोकान् अभितः समन्तात् क्षालयन्तं स्वभासा भासयन्तम् । पुनः कोककुलानि चक्रवाकमिथुनानि "कोकश्चक्रश्चक्रवाकः" इत्यमरः पालयन्तं रक्षयन्तम् मिथुनस्य संयोगं कारयन्तमिति यावत् । स्वागता वृत्तम् ॥ ३ ॥

सूर्योदयजन्यपद्मविकासं वर्णयन्नाह—यावन्नीरनिधेरिति । प्रभातसमयः प्रभातकालः नीरनिधेः समुद्रात् लोकत्रय्या माणिक्यं

Digitized by Google

लोकत्रयरत्नभूतं रविबिम्बम् आदित्यमण्डलम् अम्बरमाकाशमेव या वणिग्वीथीपथः पण्यभूमिः तस्यां यावत् न्यस्यति पण्यद्रव्यत्वेन स्थापयति, तावदस्य पण्यभूतस्य वस्तुनः उचितं मूल्यं कर्तुं पद्माकरेण पद्मवत्सरसा अथ च पद्मसंख्यापरिमितधनवता । लब्धः प्राप्तो विकासः उल्लासो येनैवंभूतो यत् पङ्कजं स एव करस्तस्मिन्, अथ च लब्धविकाशपङ्कजवत् कमलवत् कमनीयो यः करो हस्तः तस्मिन् न्यस्ता लक्ष्मीः शोभा, अथ च धनं मूल्यभूतं, पुरः अग्रे स्थाप्यते न्यस्यते । सूर्योदयमात्र एव कमलकुलविकासो जात इति भावः । अत्र रूपकोत्प्रेक्षयोः सङ्करः । शार्दूलविक्रीडितं वृत्तम् ॥ ४ ॥

वृत्तमुत्तरमिति । "रामभद्रं जनकः तनूजया सम्भावयिष्यति" इति प्रश्नस्येति भावः । लक्ष्मणोक्तौ प्रभातसमयो विश्वामित्रः, रविबिम्बं रामचन्द्रः, पद्माकरो जनकः लक्ष्मीश्च जानकीत्येवं रूपेण "यावत् विश्वामित्रो रामचन्द्रमानयति तावदेव अस्मै जनकेन जानकी समर्पितेति" अन्तर्गर्भितं भावमुक्त्वैव विश्वामित्रस्योक्तिः वृत्तमुत्तरमिति । देवताधिष्ठितानीति । तथ्यान्येवेत्यर्थः । मुग्धेति । मुग्धस्य बालकस्य वचनानि ।

बहुनरेति । बहवो नराः मनुष्याः, करिणो गजाः, तुरङ्गमाः अश्वाः, एतैस्तरङ्गिता सङ्कुलाऽपि प्रशान्ता अथ च पावनो पावयित्री । इति कथम् । नन्विहेति । महायोगियाज्ञवल्क्येन जनकेनाधिष्ठितेयं राजधानीति युज्यत एव सर्वथाऽस्याः पावनत्वमिति भावः ।
(५०) याज्ञवल्क्यमहिमानं वर्णयन्नाह–पादोपजीवनादिति । भानोः सूर्यस्य पादोपजीवनात् चरणसेवनात् (पक्षे किरणस्पर्शात्) प्रबोधं ज्ञानं (पक्षे विकासम्) उपलभ्य यो याज्ञवल्क्यः योगीश्वरख्यातेः योगीश्वर इति नाम्नः सद्म आश्रयोऽभूत्, यथा पद्मं श्रियो लक्ष्म्याः आश्रयो भवति तथैवेति भावः । अत्र श्लेषोपमा ॥ ७ ॥

नगरसंस्करणाय राजपुरुषाणामाज्ञा–पयोभिरिति । नगरपथाः रथ्या राजसरणिः अङ्गणभुवः प्राङ्गणभूमयश्च । बहलाः विपुलाः विलसन्तश्च कुङ्कुमरसाः येषु तैः एवम्भूतैः पयोभिः जलैः सिच्यन्ताम् । परिमलेन सुगन्धेन मिलन्तो लोलाश्च मधुकराः येषु तैः तथाभूतैः कीर्यन्तां प्रक्षिप्यन्ताम् । अविरलं घनं यथा स्यात्तथा लसन्तो मौक्तिकगणाः येषु ते तथाभूतैः चतुष्कैः मार्गस्थविश्रममण्डपैः पूर्यन्ताम् । काभिरेतत् सर्वं क्रियतामित्यपेक्षायामाह–पौरस्त्रीभिः मुदा हर्षेण सिच्यन्तामित्यादि । शिखरिणी वृत्तम् ॥ ६ ॥

रभसेति । रभसस्य हर्षस्य अतिशयः । "रभसो हर्षवेगयोः" इति विश्वः ॥

जनकं वर्णयन्नाह–अङ्कैरिति । यत्र यस्मिन् जनके सज्जिरहैः

"शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः ज्योतिषामयनं चैव वेदाङ्गानि षडेवतु" इत्येवमुक्तैः अङ्गीकृता स्वायत्तीकृता त्रयी वेदत्रयम् ("स्त्रियामृक् सामयजुषी इति वेदास्त्रयस्त्रयी" इत्यमरः)। दीव्यति शोभत इति सर्वत्र सम्बध्यते। पुनः सप्तभिरङ्गैः "स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च। राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपिच" इत्यत्रममरे उक्तैः। अङ्गीकृता सती राज्यलक्ष्मीः दीव्यति शोभते। पुनः अष्टभिरङ्गैः यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिरूपैः अङ्गीकृता योगविद्या च दीव्यति शोभते। अत्र यथासंख्यमलंकारः।

(५१) **यः काञ्चनमिति।** यथाकाञ्चनमग्नौ निक्षिप्तं सत् भास्वरतरं वर्णं लभते। तथैव यो विश्वामित्रः तपोमयेऽग्नौ आत्मानं तपसा विशोध्य वर्णोत्कर्षं जात्युत्कृष्टतां क्षत्रात् ब्राह्मणत्वमिति यावत् ॥ ८ ॥

समीहितेति। समीहिताः इष्टाः याः सम्पदः श्रियो लताः तासां समुद्गमस्य उत्पत्तेः आरामः आश्रयः। अनेन मत्प्रणामेनैव अस्मत्समीहितसिद्धिर्भविष्यतीति भावः। **वसुन्धरेति।** वसुन्धराणां सुनासीरः इन्द्रः तत्सम्बुद्धौ। **सुनासीरसाधारणत्वमिति।** इन्द्रसाम्योपन्यासो मयि न्यूनतासूचक एवेत्यर्थः। **तदीयमपीति।** इन्द्रपदादप्युत्कृष्टतरां पदवीं प्राप्तोऽहमधुना। तदेव समर्थयमानआह— **गाधिनन्दनेति।** हे गाधिनन्दन विश्वामित्र नन्दनजन्मा नन्दनवनवर्ती हरिचन्दनशाखी देवतरुः। तस्य इन्द्रस्य न तथा सुखहेतुः यथा अधुना मम भवच्चरणकमलयुगलप्रणामः सुखहेतुरित्यभिसन्धिः। अतोऽहमधुना इन्द्रादपि उत्कृष्टतरत्वं प्राप्त इत्यर्थः। स्वागता वृत्तम् ॥ ६ ॥

प्रणयेति। प्रणयस्य प्रीतेः अतिशयः आधिक्यम् ॥ **सहजेति।** सहजं यत् प्रमोदसुखं ब्रह्मानन्दः। तस्य अम्बुधौ समुद्रे निसर्गानन्दमनुभवन्नपि त्वम् अस्मत्समागमजनितान् सुखशीकरान् सुखबिन्दून् बहु मन्यसे इति अहो आश्चर्यम्। अम्बुधौ निमग्नः शीकरान् वाञ्छसीति विरोधाभासः ॥ **राज्यरागेति।** राज्यस्य रागः अनुरागः वैराग्याभावो, हर्षविरोधीति यावत्, (पक्षे रञ्जनद्रव्यम्) तेन उपरक्तः स्पृष्टः चेत एव चन्द्रमाः येषां ते तेषां तथाभूतानाम्। अस्माकं कुतस्त्यः (कुतो भवः) सहजानन्द एव या चन्द्रिका तस्याः उद्भेदः उद्गमः ॥ यथा राहूपरक्ते चन्द्रे न चन्द्रिकोद्गमः तथा राज्यानुरागरक्ते हृदये कुतः आनन्दोद्गम इति भावः ॥ जनकं स्तुवन्नाह **ज्याघात इति।** यूयं निमेः कुलमेव यत् कुमुदं तस्य आनन्दाय आह्लादनाय चन्द्राः नरेन्द्रा इत्यभिसन्धिः, किंवि-

सांख्यैः प्रकृतिपुरुषविवेकान्मोक्ष इति वदद्भिः प्रकृतिरपि तदर्थं ज्ञेयेत्युक्तम् । न च ज्ञेयत्वेन प्रकृतेऽव्यक्तमुच्यते, अव्यक्तशब्दमात्रश्रवणात् । तस्मादपि नाव्यक्तं प्रधानम् ॥

वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥ १ । ४ । ५ ॥

अत्राह सांख्यो "ज्ञेयत्वावचना"दित्यसङ्गतम्, अव्यक्तशब्दवाच्यस्यैवोत्तरत्र ज्ञेयत्ववचनात् । "अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यदनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते" इति । अशब्दमित्यादिषु प्रत्येकं नित्यमिति सम्बध्यते । नित्यं सर्वदा । निचाय्य ज्ञात्वा । यादृशं शब्दादिहीनं प्रधानं तादृशमेवेदं वाक्यं ज्ञेयत्वेन वदतीति चेन्न । प्राज्ञो हि परमात्मा निचाय्यत्वेन निर्दिष्टः, न प्रधानम् । कस्मात् । प्रकरणात्, "पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः" "एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते"इत्यादिनाऽऽत्मन एव प्रकरणात् ॥

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ १ । ४ । ६ ॥

किञ्च न प्रधानमव्यक्तशब्दवाच्यं ज्ञेयं वा, यस्मात्त्रयाणामेवाग्निजीवपरमात्मनामेवैवं पूर्वोत्तरवाक्यपर्यालोचनया वक्तव्यत्वेनोपन्यासः । तद्विषय एव प्रश्नो ऽपि दृश्यते कठवल्लीग्रन्थे, नान्यस्य । तत्र "स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्य"मित्यग्निविषयः प्रश्नः । "येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीय" इति जीवप्रश्नः । "अन्यत्र धर्मादन्यत्राधर्माद-

Digitized by Google

न्यत्रास्मात्कृताकृतादन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वदे''ति परमात्मपरः । ''लोकादिमग्निं तमुवाच तस्मै या इष्टका यावतीर्वा यथा वे''त्यग्निविषयमुत्तरम् । ''हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनं यथा च मरणं प्राप्यात्मा भवति गौतम योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः स्थाणुमन्ये नु संयन्ति यथाकर्म यथाश्रुत''मिति जीवस्योत्तरम् । ''न जायते म्रियते वा विपश्चि''दित्यादि परमात्मनः प्रतिवचनम् । न ह्येवं प्रधानस्य प्रश्नोत्तरे दृश्येते, येनाव्यक्तशब्दवाच्यत्वं ज्ञेयत्वं वा स्यात् । श्रुत्यर्थस्तु । हे मृत्यो स मदर्थं दत्तवरस्त्वं स्वर्ग्यं स्वर्गहेतुमग्निमध्येषि सदा स्मरसि तेन त्वं तद्विषयां विद्यां वदेत्यर्थः । जीवपरमात्मप्रश्नौ पूर्वं व्याख्यातौ । लोकादिं लोकहेतुं विराड्रूपत्वोपास्यत्वात् । लोकादिं तमग्निमुक्तवान्नचिकेतसे । याः स्वरूपतो यादृशीर्यावतीः संख्यातः । यथा वाऽग्निश्चीयते तत्सर्वमुवाचेति सम्बन्धः । हन्तेदानीं गुह्यं गोप्यं चिरन्तनं ब्रह्म प्रवक्ष्यामीत्युपक्रम्य जीवमपि ब्रवीति ''यथे''ति । आत्मा जीवो मरणं प्राप्य यथा भवति तथा वक्ष्यामीति योजना । कथं भवतीत्यत आह ''योनि''मिति । मृतानां पुनर्विचित्रजन्मापत्तौ निमित्तमाह ''यथे''ति । यद्यप्यस्मिन्कठवल्लीग्रन्थे जीवपरमात्मनोः पृथक्प्रश्नौ न स्तः, ''वरान्वृणीष्वे''ति मृत्युना प्रेरितेन नचिकेतसा पितृसौमनस्याग्निविद्याऽऽत्मविद्यात्मकवरत्रयमेव पृष्टमिति ''वराणामेष वरस्तृतीय'' इति लिङ्गान्निश्चितत्वात्, तथाऽपि जीवपरयोः कल्पितभेदापेक्षया त्रयाणामित्युक्तं सूत्रकारैः । वस्तुतस्तु ''येयं प्रेत''इत्यादिना पृष्टस्यैवात्मनोऽ''न्यत्र धर्मा''दित्यादिना धर्मविशेषपुरस्कारेणानुकर्ष

इत्येक एव प्रश्नः । भेदस्य कल्पितत्वं वाक्यपर्यालोचनयाऽवगतम् । तथा हि "यदेवेह तदमुत्र यदमुत्र तदन्विह मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यती"ति जीवप्राज्ञभेददृष्टिमपवदति । इह देहे यच्चैतन्यं तदेवामुत्रादित्यादावसंसारि ब्रह्म । यच्चामुत्र तदेवेह देहेऽनुप्रविष्टमित्यन्योन्यैक्यमित्यर्थः । अभेदं द्रढयितुं भेदं निन्दति "मृत्यो" रिति । यः कश्चिन्मूढ इह ब्रह्मात्मनि नानेव मिथ्याभेदं पश्यति वस्तुतोऽहं भिन्न इति स्मरणान्मरणं पुनः पुनः प्राप्नोति न सुखभागित्यर्थः । तथा जीवप्रश्नानन्तर "मन्यं वरं नचिकेतो वृणीष्वे"त्यारभ्य मृत्युना तैस्तैः कामैः प्रलोभ्यमानोऽपि नचिकेता यदा न चचाल तदैनं मुमुक्षुं मत्वा "विद्याऽभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवो लोलुपन्ते"ति प्रशस्य प्रश्नमपि तदीयं प्रशंसन्नुवाच "तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणमध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाती"ति, तेनापि जीवप्राज्ञयोरभेद एवेति गम्यते । यद्युभयोर्भेदस्तदा जीवप्रश्नानन्तरं प्रशंसा विफलैव स्यात् । श्रुत्यर्थस्तु । त्वा त्वां बहवोऽपि कामा नालोलुपन्त श्रेयोविच्छेदं न कृतवन्तस्ततो विद्यार्थिनं त्वां मन्येऽहमिति । जीवप्रश्नस्य परमात्मवाक्येनोत्तरमाह "तं दुर्दर्श" मिति । न ह्यत्र भेदमिथ्यात्वे विवादो, यतो जीवप्रश्ने परमात्मानं प्रतिपादयति । उभयोर्भेदे तात्विके उन्मत्तप्रलापो भवेदित्येवमादीनि वाक्यानि भेदमिथ्यात्वे बोध्यानि ॥

महद्वच्च ॥ १ । ४ । ७ ॥

किञ्च । यथा "बुद्धेरात्मा महान्परः" "वेदाहमेतं पुरुषं महान्त"मित्यादौ वेदे श्रुतो महच्छब्दो बुद्ध्या-

न्यद्वितीयतत्त्ववाची नाङ्गीक्रियते सांख्यैः, तथा वैदिका-व्यक्तशब्दो नाप्रकृतप्रधानवाची । तस्मात्प्रकृतशरीरपरमेवाव्यक्तपदमित्यशब्दत्वं प्रधानस्येति सिद्धम् ॥

चमसवदविशेषात् ॥ १ । ४ । ८ ॥

पूर्वमव्यक्तशब्दमात्रप्रत्यभिज्ञानेन प्रधानस्यार्थतोऽप्रत्यभिज्ञानादव्यक्तपदावाच्यत्वेऽपि त्रिगुणत्वादिनाऽजामन्त्रेऽर्थतः प्रत्यभिज्ञानादजापदं प्रधानपरमस्त्विति प्रत्युदाहरणसङ्गत्याऽस्यारम्भः । अध्यायपादसङ्गतिफलानि पूर्ववद्बोध्यानि । श्वेताश्वतरोपनिषदि श्रूयते, "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः"-इति । तत्र संशयः, किमजाशब्देन प्रधानमुच्यते, उत तेजोऽबन्नात्मिका छान्दोग्ये सिद्धाऽवान्तरप्रकृतिरिति । तत्र न जायत इत्यजा । सांख्यसिद्धा प्रकृतिरेवाजा सत्त्वरजस्तमोगुणात्मकत्वाल्लोहितशुक्लकृष्णा च भवति । किं चैकोऽजः पुरुषो जुषमाणः सेवमानः कार्यकारणसंघाताभिमानीति यावत् । स तामनुशेते तामजां भ्रमेणात्मत्वेनावगम्य तत्कार्यबुद्धिनिष्ठसुखदुःखादिकमनुभवत्यहं सुखी दुःखीति । अन्यस्तु विवेकी भुक्तभोगां कृतभोगां विवेकज्ञानाज्जहाति त्यक्त्वा मुच्यत इति । जीवभेदप्रतिपादनादजा प्रधानमिति नाशब्दं प्रधानमिति प्राप्ते ब्रूमः । न प्रधानस्यासाधारण्येनात्र प्रत्यायकमस्ति, न जायत इत्यजेत्यन्यत्रापि योजयितुं शक्यत्वात् । लोहितादिशब्दाश्च रूपविशेषेषु रूढा न रजआदौ । यथाकथंचिन्नयनमन्यत्रापि तुल्यम् । साधारणस्थल इदमेतत्पदवाच्यमिति निर्धारणाभावे दृष्टान्तश्चमसवदिति । यथा "ऽर्वाग्बिल-

श्चमस ऊर्ध्वबुध्न" इत्यस्मिन्मन्त्रे ऽयं चमस इत्यवधारणं न सम्भवति कथंचिदर्वाग्बिलत्वादेरन्यत्राप्यविशेषात्, एवमजामन्त्रेऽप्यजात्वादेरविशेषान्न प्रधाननिर्णय इत्यशब्दं प्रधानमित्यर्थः ॥

न"न्विदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्न" इति वाक्यशेषाच्छिरश्चमस इति निर्णयो भवति । इह त्वजामन्त्रे केयमजा प्रतिपत्तव्येत्याशङ्क्य सजातीयश्रुत्यन्तरात्तेजोऽबन्नलक्षणाऽजा प्रतिपत्तव्येत्यहृदयवाचामिति न्यायेनाह ।

ज्योतिरुपक्रमा तु तथा ह्यधीयत एके ॥ १ । ४ । ६ ॥

ज्योतिस्तेज उपक्रम आदौ यस्यास्तेजोऽबन्नलक्षणायाः सा ज्योतिरुपक्रमा । "तु", अवधारणे । सैवेहाजा निर्धारणीया न प्रधानम् । कस्मात् । तथा ह्यधीयत एके । हि यस्मादेके छन्दोगास्तेजोऽबन्नात्मिकाया भौतिककार्यप्रकृतेस्तथा लोहितादिरूपतामधीयत आमनन्ति "यदग्नेर्लोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्ये"ति । तथा च लोहितादिशब्दसाम्यात्तान्येव तेजोऽबन्नानीह प्रत्यभिज्ञायन्ते । यद्वाऽत्रैव श्वेताश्वतरोपनिषदि पूर्वापरपर्यालोचनायामनिर्वाच्यमायाया जगत्कारणत्वप्रतीतेस्तस्या अजाशब्देन ग्रहणम् । तथा हि "किं कारणं ब्रह्मे"त्युपक्रम्य "ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढा"मिति वाक्योपक्रम ईश्वरशक्तेर्मायाख्याया जगद्धेतुत्वं गम्यते । वाक्यशेषेऽपि "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वर"मिति "यो

योनिं योनिमधितिष्ठत्येक"इति च तस्या एवावगतिर्न स्वतन्त्रप्रधानस्येति । श्रुत्यर्थस्तु । ब्रह्मणः शुद्धत्वान्न जगद्धेतुत्वमिति श्रुतिः । ब्रह्मवादिनः प्रति शङ्कते "किं कारण"मिति । यज्जगत्कारणं तत्किं ब्रह्म वाऽन्यद्वेत्यर्थः । यद्वा जगदुत्पत्तौ किमुपकरणवद्ब्रह्मेत्यर्थः । ते पृष्टा ब्रह्मवादिनोऽनया रीत्या विमृश्य ध्यानाख्येन योगेनानुगताः परमात्मानमनुप्रविष्टाः सन्तस्तस्यैव देवस्यात्मभूतामैक्येनाध्यस्तां मायाशक्तिं गुणत्रयवर्तीं त्रिगुणात्मकस्य जगतो निर्माणे सहकारिणीमपश्यन्निति योजना । प्रधाने मायाशब्दं वारयति "मायिन"मिति । अविद्याशक्तिर्योनिः । तस्या एकत्वेऽपि कार्यभेदेन भेदाद्वीप्सा । तदुक्तं सुरेश्वराचार्यैः "स्वतस्त्वविद्या भेदोऽत्र मनागपि न विद्यत"इति । अधितिष्ठति प्रेरयति । न हि परमत ईश्वरस्य तदधिष्ठातृत्वं संमतमिति रहस्यम् ॥

नन्वजाशब्दो न तावत्तेजोऽबन्नात्मिकायां प्रकृतौ रूढः । छागादाविवाजात्वजात्याधारत्वाभावान्नापि यौगिकः, जनिमत्त्वात्तेजोऽबन्नानामित्यत आह ।

कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥ १।४।१० ॥

"च" शब्दः शङ्कानिवृत्त्यर्थः । तेजोऽबन्नात्मिकायां प्रकृतौ नाजाशब्दस्यानुपपत्तिः । कुतः । कल्पनोपदेशात् । यथा लोके प्रसिद्धामजां भुक्तभोगामेकस्त्यजत्यन्यस्तामनुवर्तत एवं त्यागभोगयोः कार्यकारणसंघातानुपादानभूतायास्तेजोऽबन्नात्मिकायाः प्रकृतेः साम्यद्योतनार्थं कल्पनयाऽजात्वस्योपदेशात् । यथा मधुभिन्नस्यादित्यस्या "सौ वा आदित्यो देवम"ध्विति मधुत्वोपदेशः । यथा वा धेनुभिन्नाया वाचो धेनुत्वोपदेशः । एवमजाभिन्नायाः

प्रकृतेरजात्वोपदेशे न कश्चिद्विरोधः। यदुक्तं जीवभेदोऽस्मिन्मन्त्रे प्रतिपाद्यत इति तन्न, लोकसिद्धभेदानुवादेन बन्धमोक्षव्यवस्थापरत्वादस्य मन्त्रस्य, "एको देवः सर्वभूतेषु गूढ" इत्यादिनाऽऽत्मैक्यावगमात्। तस्मान्नात्र प्रधानस्यावकाश इत्यशब्दं प्रधानमिति सिद्धम् ॥

न संख्योपसङ्ग्रहादपि नानाभावादतिरेकाच्च ॥ १ । ४ । ११ ॥

पूर्वमाध्यात्मिकाधिकारे प्रसिद्धच्छागीग्रहणायोगादजा तेजआदिकेत्युक्तम्। तथा "यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठित" इति मन्त्रे पञ्चजनशब्देन प्रसिद्धमनुष्यग्रहणायोगादवयवव्युत्पत्त्या सांख्याभिमतपञ्चविंशतितत्त्वानां ग्रहणमस्त्विति दृष्टान्तसङ्गत्याऽस्यारम्भः। फलं पूर्ववद्द्रष्टव्यम्। बृहदारण्यके षष्ठाध्याये श्रूयते "तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृत" मित्यनन्तरं "यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितस्तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतं प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुस्ते निचिक्युर्ब्रह्म पुराणमग्र्य" मिति। परमार्थतोऽस्यार्थः। ज्योतिषां सूर्यादीनां ज्योतिर्भासकं तद्ब्रह्म देवा उपासत आयुष्ट्वेनामृतत्वेन च। तेनोपासनेनायुष्मन्तो जाता इति पूर्ववाक्यार्थः। सूर्यादिज्योतिरेकं पूर्वोक्तं "प्राणस्य प्राण" मित्यादिवाक्यशेषगताश्चत्वारः प्राणादयश्चेति मिलित्वा पञ्चजनाः पञ्च। पञ्चजनशब्दोऽवयवार्थमनपेक्ष्य पुरुषमात्रं वक्ति लोके। अत एव "स्युः पुमांसः पञ्चजना" इत्यमरो जगाद। प्रकृते च पुरुषग्रहणे वाक्यस्य निरतात्पर्यापत्त्या

तत्सम्बन्धिप्राणादयो गृह्यन्ते पञ्चजनशब्देन । ते कती-त्याकांक्षायां "पञ्चे"ति संख्यापूरणम् । तथा च पञ्च-पञ्चजना आकाशश्चाविद्याख्यो यस्मिन्प्रतिष्ठितस्तमेव निष्प्रपञ्चब्रह्मात्मकममृतमात्मानं मन्य इति मन्त्रदृशा याज्ञवल्क्येनोक्ते जनकः पप्रच्छ "बहिरेव त्वं किं विद्वान्म-न्तव्यादन्योमर्त्य"इति। नेत्याह। विद्वानमृत इति। अस्मी-ति शेषः । अविद्यया कल्पितं मर्त्यत्वमिति भावः । प्राणा-दीनां जीवनादिप्रदं त्वंपदलक्ष्यं ये विदुस्ते तस्य स्वरूपं पुराणं चिरन्तनमग्रे कार्यदशायामप्यलुप्तत्वेन भवमग्र्यं ब्रह्म निचिक्युर्निश्चयेन ज्ञातवन्त इति । तत्र किं पञ्चज-नशब्देन मूलप्रकृत्यादीनि पञ्चविंशतितत्त्वान्युच्यन्त उत वाक्यशेषगताः प्राणादय इति संशये तत्त्वानीति प्राप्तम् । तथा हि "मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः" ॥ इति संगृहीतानि पञ्चविंशतितत्त्वानि वर्तन्ते। पञ्चपञ्चजना इति पञ्चानां जनानामादिमपञ्चपदेन पञ्चत्वोक्तौ पञ्चविं-शतिजनाः सम्पद्यन्ते । ते जनाः कतीत्याकांक्षायां सांख्य-स्मृतिगृहीतानि पञ्चविंशतितत्त्वानि सम्बध्यन्त इति ना-शब्दं प्रधानमिति । स्मृत्यर्थस्तु । मूलप्रकृतिः प्रधानमवि-कृतिरनादित्वात् । महदहङ्कारौ पञ्चभूतानि सूक्ष्माणि पञ्चतन्मात्रसंज्ञानि च सप्त महदाद्याः प्रकृतयो विकृतयश्च। तत्त्वान्तरोपादानत्वं प्रकृतित्वम् । अस्ति हि महतो बुद्ध्या-ख्यस्याहङ्कारतत्त्वं प्रत्युपादानत्वम् । प्रधानापेक्षया विकृ-तित्वम् । एवं पूर्वापेक्षयाऽहङ्कारादीनां विकृतित्वं द्रष्टव्यम् । प्रकृतित्वं चाहङ्कारस्य पञ्चतन्मात्राणामेकादशेन्द्रियाणां चोपादानत्वात् । पञ्चतन्मात्राणां चाकाशादिमहाभूतप्र-

Digitized by Google

कृतित्वम् । षोडशकस्य षोडशसंख्यावच्छिन्नस्यैकादशे-
न्द्रियपञ्चमहाभूतसमुदायस्य विकारत्वमेव न प्रकृतित्वम् ।
पुरुषस्तु कूटस्थ इत्यत्राभिधीयते । अस्मिन्मन्त्रे श्रूयमाणया
पञ्चविंशतिसंख्यया स्मृतिप्रसिद्धानां पञ्चविंशतितत्त्वा-
नामुपसङ्ग्रहात्प्रधानस्य शब्दवत्त्वमित्यपि न । कुतः ।
नानाभावात् । अस्मिन्मन्त्रे सर्वनाम्ना ऽऽकाशशब्देन चा-
त्माकाशयोः पृथक् श्रूयमाणत्वात्तौ विहाय गुणात्रयो
महदादयो द्वाविंशतिः सम्भूय पञ्चविंशतिसंख्येया वक्त-
व्याः । तथा च घ्राणरसनचक्षुःश्रोत्रत्वक्षु यथा कर्मेन्द्रि-
यव्यावृत्तं साधारणं कर्मज्ञानेन्द्रियत्वं, तद्वत्पञ्चानां पञ्च-
कानामेकपञ्चकपर्याप्तान्यपञ्चकव्यावृत्तधर्मवत्त्वाभावेन ना-
नाभावात्पञ्चपञ्चेन पञ्चानां पञ्चकानां ग्रहणमिति प्रति-
पादनमशक्यसमर्थनम् । लोके हि गोपञ्चकं ब्राह्मणपञ्चक-
मिति पञ्चकद्वयमिति वक्तुमुचितमेकपञ्चकपर्याप्तान्यप-
ञ्चकव्यावृत्तगोत्वादिधर्मसत्त्वादित्यर्थः । नानात्वेऽपि कथं
चित्पञ्चविंशतिसंख्याप्रतिपादकत्वाङ्गीकारे बाधकान्तर-
माह, "अतिरेका"च्चेति । न ह्यस्मिन्मन्त्रे पञ्चविंशति-
संख्यैव श्रूयते । किं त्वतिरिक्तात्माकाशावपि श्रूयेते ।
तथा च तयोः पञ्चविंशतितत्त्वातिरिक्तत्वात्सप्तविंशति-
तत्त्वप्राप्त्यावपसिद्धान्तापातः । न च गुणत्रित्वविवक्षया
पञ्चविंशतिसंख्यापूरणान्न तत्त्वातिरेक इति वाच्यं, तथा
सत्यात्माकाशयोः पृथक्कथनवैयर्थ्यात् । कथं चिद्भोग्यजा-
तापेक्षयाऽऽत्मनः पृथक्त्वेन कथनस्य सार्थत्वेऽप्याकाशस्य
पृथक्कथनं निष्फलमेवेति भावः । वस्तुतोऽत्र पञ्चविंशतिसं-
ख्याप्रतीतिरेव नास्तो"त्यपि"शब्देन सूचयति, पञ्चजनश-
ब्दस्यैकत्वेन योगमनपेक्ष्य पुरुषेषु रूढत्वात्, ते कनीत्याकां-

ख्यायां पञ्च यसंख्याऽन्वयात् । अन्यथा पञ्चजना इत्यत्र पदभेदाङ्गीकारे प्रधानजनान्प्रति गुणत्वेनान्वितस्य पञ्चत्वस्याप्यपञ्चत्वेनान्वयायोगो बाधकः, गुणयोः परस्परान्वयादर्शनात् । उभयोः पञ्चत्वयोः प्रधानजनान्वयसम्भवेऽपि जनेषु दशत्वसंख्याप्रतीतिरेव न पञ्चविंशतिसंख्याप्रतीतिरिति न शब्दवत्प्रधानम् ॥

ननु ते पञ्चत्वसंख्याकाः पञ्चजनाः क इति स्वरूपप्रश्नस्योत्तरमाह ।

प्राणादयो वाक्यशेषात् ॥ १ । ४ । १२ ॥

माध्यन्दिनशाखायां पञ्चजनमन्त्रानन्तरमन्त्रे प्राणचक्षुःश्रोत्रान्नमनांसि श्रूयमाणानि पञ्चजनशब्देनोच्यन्ते । कस्मात् । वाक्यशेषा“त्प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमुतान्नस्यान्नं मनसो ये मनो विदु”रिति वाक्यशेषस्थत्वादित्यर्थः ॥

ननु माध्यन्दिनानां प्राणादिष्वन्नस्याम्नानाद्भवतु पञ्चसंख्या, काण्वानां त्वनाम्नानात्कथं पञ्चसंख्येत्यत आह ।

ज्योतिषैकेषामसत्यन्ने ॥ १ । ४ । १३ ॥

एकेषां काण्वानामसत्यन्ने “तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृत”मिति पूर्ववाक्यस्थज्योतिषा पञ्चत्वं पूरणीयमित्यर्थः । तस्मादशब्दं प्रधानमिति सिद्धम् ॥

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ १ । ४ । १४ ॥

पूर्वाधिकरणत्रयेण प्रधानस्याशब्दत्वप्रतिपादनेन जगत्कारणत्वलक्षणं ब्रह्मण्येवेति नातिव्याप्तमित्युक्त्या कारणविषयाणां वेदान्तानां ब्रह्मणि समन्वय उक्तः । स न

सम्भवति, तेषां वेदान्तानां परस्परविरुद्धार्थप्रतिपादकत्वेन स्वार्थनिश्चायकत्वाभावादनुमानसिद्धप्रधानलक्षकत्व उक्तसमन्वयासिद्धेरित्याशङ्का नरासार्थमिदमारभ्यते न चाविरोधार्थमधिकरणं नेह सङ्गतमिति वाच्यं, समन्वयतो वाक्यार्थज्ञाने स्मृत्यादिमानान्तरविरोधशङ्कानिरासस्यार्थत्वात्, इह तु कारणविषयवाक्यानामेव मिथो विरोधान्न समन्वयो ब्रह्मणीत्याशङ्क्य तन्निरासेनैव समन्वयस्य साध्यत्वादध्यायसङ्गतिसिद्धेः । असत्पदस्य बाह्याभ्युपेतासत्परत्वनिराकरणेन समन्वयस्थापनात्पादसङ्गतिर्बोध्या । पूर्वं पञ्चत्वसंख्यापूरणमन्नेन ज्योतिषा वेति विकल्पस्याविरोधेऽपि प्रकृते सिद्धे कारणात्मकवस्तुनि विकल्पायोगाद्विरोधे सत्यप्रामाण्यं वाक्यानामिति तन्निरासाय प्रधानस्य कारणत्वमिति प्रत्युदाहरणलक्षणावान्तरसङ्गतिः । पूर्वोत्तरपक्षयोः समन्वयासिद्धिस्तत्सिद्धिः फलमिति विवेकः । अत्र जगत्कारणवादिवाक्यानि ब्रह्मणि मानं न वेति विशये नेति प्राप्तम् । कस्मात् । परस्परविरोधदर्शनात् । तथा हि । क्वचि"दात्मन आकाशः सम्भूत" इत्याकाशपूर्विका सृष्टिः श्रूयते, क्वचिच्च "तत्तेजोऽसृजते"ति तेज आदिका, क्वचित्तु "स प्राणमसृजते"ति प्राणादिका क्वचिदक्रमैव सृष्टिः श्रूयते "स इमाँल्लोकानसृजताम्भोमरीचीर्मरमाप" इति । स ईक्षिता परमात्मा । लोकानेवाहा"म्भ"इति । अम्मयशरीरप्रचुरः स्वर्गलोकोऽम्भःशब्दार्थः । रश्मिप्रधानोऽन्तरिक्षलोको मरीचिः । मरणप्रधानोऽयं लोको मरः । अब्बहुलः पाताललोक आप इति विवेकः । एवं सृष्टौ विगाने तत्कारणत्वलक्षितब्रह्मणि विगानम् । साक्षादपि जग-

स्कारणे विगानं दृश्यते । "असद्वा इदमग्र आसीत्ततो वै सदजायते"त्यसतः कारणत्वं क्वचिदवगम्यते । एव "मसदेवेदमग्र आसीत्तत्सदासीत्तत्समभव"दिति । वस्तुतोऽयमर्थः । इदं जगदग्रे प्रागवस्थायामसदिवाव्यक्तमासीत् । ततोऽनभिव्यक्तनामरूपादव्यक्तात्कारणादभिव्यक्तनामरूपं जगज्जातम् । अव्यक्तमेव व्यक्तं भवतीति यावत् । तत्कारणं यदात्मना समभवत्तत्सदर्थक्रियोन्मुखमासीदिति । क्वचित्तु "यद्वैक आहुरसदेवेदमग्र आसी" दित्यसद्वादमुपन्यस्य कथमसतः सज्जायेतेति तन्निरस्य सतः कारणत्वमाह "सदेव सोम्येदमग्र आसी"दिति । क्वचित्स्वकर्तृकैव सृष्टिः श्रूयते "तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियते"ति । तदिदं जगत्तर्हि तदा प्रागवस्थायामव्याकृतं कारणमासीत् । तत्कल्पितशब्दात्मनाऽर्थात्मना च व्याक्रियत व्यक्तमभवदित्यर्थः । एवं परस्परविरोधान्न ब्रह्मणि समन्वयो वाक्यानाम्, किं त्वनुमानादिसिद्धप्रधानलक्षणत्वमिति प्राप्ते ब्रूमः । कार्यविषयं विगानमक्रमादिप्रयुक्तं "न वियदश्रुते"रित्यादिना परिहरिष्यत्याचार्यः । अत्र तु कारणविषयं विगानं परिहरति । "च" शब्द"स्तु"शब्दसमानार्थः शङ्कानिरासं वक्ति । ब्रह्मणः कारणत्वे विरोधो नास्ति । कुतः । यथाव्यपदिष्टोक्तेः । आकाशादिषु यथाभूत ईश्वरः कारणत्वेन व्यपदिष्ट एकस्मिन्वेदान्ते तथाभूतस्यैवापरवेदान्तेऽप्युक्तेरित्यर्थः ॥

न च क्वचिदसतः क्वचित्सतः क्वचित्स्वभावादुत्पत्तिश्रवणाद्विरोध इति वाच्यमित्याह सूत्रकारः ।

समाकर्षात् ॥ १ । ४ । १५ ॥

Digitized by Google

"असन्नेव सभवत्यसद्ब्रह्मेति वेद चे"दित्यसद्वादमपोद्य, "अस्ति ब्रह्मेति चेद्वेदे"ति सदात्मानं निर्धार्य, "सोऽकामयते"ति सतः सकाशात्सृष्टिमुक्त्वा, "तत्सत्यमित्याचक्षत" इति सदात्मानमुपसंहृत्य, "तदप्येष श्लोको भवती"ति प्रकृते सदात्मनि श्लोकमुदाहरति, "असद्वा इदमग्र आसी"दिति । तथा चासच्छब्देन सत एव समाकर्षान्नासतः कारणत्वशङ्केत्यर्थः । यद्यस्मिन्श्लोके निरात्मकमसदुच्येत, तदाऽन्यसमाकर्षणेनान्यस्योदाहरणादप्रकृतासंबद्धः श्लोक आपद्येत । एव "मसदेवेदमग्र आसी"दित्यत्रापि "तत्सदासी"दिति समाकर्षादनभिव्यक्तनामरूपमसच्छब्दं ब्रह्मैव । एवं "तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियते"त्यत्रापि "स एष इह प्रविष्ट आनखाग्रेभ्य" इति प्रकृतपरामर्शिना "स" इत्यनेनात्मनः समाकर्षणान्न स्वभावादेव जगदुत्पत्तिः । व्याक्रियतेति कर्मण एव कर्तृत्वबोधकलकारो, लूयते केदारः स्वयमेवेतिवत् । सत्यपि पृथक्कर्तरि न विरुध्यते । यद्वा कर्मण्येवायं लकारो गम्यते ग्राम इत्यादिवद्द्रष्टव्यः । एवं ब्रह्मणः कारणत्वे न कश्चिद्विरोधः । नापि सृष्टिविरोधात्तत्कारणे ब्रह्मणि विरोधः, सृष्टिवाक्यानां निष्प्रपञ्चब्रह्मपरत्वेन सृष्टौ तात्पर्याभावात् । श्रुतिरपि निष्फलसृष्टेः फलवद्ब्रह्मप्रतिपत्त्यर्थत्वं दर्शयति । "अन्नेन सोम्य शुङ्गेनापो मूलमन्विच्छाद्भिः सोम्य शुङ्गेन तेजोमूलमन्विच्छ तेजसा सोम्यशुङ्गेन सन्मूलमन्विच्छे"ति । शुङ्गं कार्यं तन्मूलं ब्रह्म । तस्मान्न केनापि विगानमिति जगत्कारणवाक्यानां ब्रह्मणि समन्वयः सिद्धः ॥

जगद्वाचित्वात् ॥ १ । ४ । १६ ॥

एवं हि गार्ग्याख्यर्षिणा बालाकिनाऽजातशत्रुनामकस्य राज्ञः संवादः श्रूयते कौषीतकीब्राह्मणे । बालाकिरजातशत्रुणा ब्रह्मज्ञेन ब्रह्मणि संवादितुं "ब्रह्म ते ब्रवाणी"त्युपक्रम्य, आदित्यादिपुरुषाञ्जीवानुक्त्वा तूष्णीं बभूव । तमजातशत्रुर्मृषावादितयाऽपोह्य शिष्यभूताय गार्ग्याय ब्रह्मोपदेशार्थमिदमाह "यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वै तत्कर्म स वै वेदितव्य"इति । अस्यार्थः । हे बालाके त्वया ये पुरुषा आदित्यादिगता ब्रह्मत्वेनोक्तास्तेषां पुरुषाणां कर्ता । न केवलं जगदेकदेशपुरुषकर्ताऽपि तु सर्वस्यैव जगत इत्याह "यस्ये"ति । कर्मपदं जगद्वाचि । एवं सामान्यविशेषाभ्यां जगत्कर्ता ततो निष्कृष्टो ज्ञेय इत्याह "स"इति । एवमस्य सङ्गतिः । पूर्वं सच्छब्दात्तदेकवाक्यस्थासच्छब्दो नीतः । इह तु बालाकिवाक्यस्थब्रह्मशब्दादजातशत्रुवाक्यस्थकर्मशब्दो न शक्यते तदनुगुणतया नेतुं वाक्यभेदादिति प्रत्युदाहरणम् । यद्वा वाक्यभेदेऽपि यथोत्तरसच्छब्दात्प्राचीनासच्छब्दो नीतस्तथोत्तरकर्मशब्दात्तदनुगुणतया ब्रह्मशब्दनयनमिति दृष्टान्तसङ्गतिः । उक्तवाक्यसमन्वयासिद्धिस्तत्सिद्धिः पूर्वोत्तरपक्षयोः फलं बोध्यम् । एवं स्थिते संशयः किमत्र पुरुषाणां कर्ता वेदितव्यः प्राण उत जीव आहोस्वित्परमात्मेति । प्राण इति तावत्प्राप्तम् । कुतः । यस्य वै तत्कर्मेति चलनात्मकस्य कर्मणो वाय्वात्मकप्राणस्यैव सम्भवाद्वाक्यशेषे चाप्यस्मिन्प्राण एवैकधा भवतीति प्राणशब्दश्रवणात् । जीवो वा, तल्लिङ्गस्यापि वाक्यशेषे दर्शनात् । "तद्यथा श्रेष्ठी स्वैर्भुङ्क्ते यथा वा स्वाः श्रेष्ठिनं भुञ्जन्त्येवमेवैष प्रज्ञात्मा तैरात्मभिर्भुङ्क्त एवमेवैत आ-

त्मानं भुञ्जन्ती''ति । अयमर्थः । श्रेष्ठी प्रधानः पुरुषः स्वैर्भृत्यैरुपकरणैर्भुङ्क्ते । भृत्या अप्यशनाच्छादनादिना प्रधानमुपजीवन्ति । एवं जीवोऽप्यादित्यादिभिः प्रकाशादिना भोगोपकरणैर्भुङ्क्ते । भृत्यवदादित्यादयोऽपि देवा जीवं हविर्ग्रहणादिनोपजीवन्तीति । प्राणभृत्त्वाच्च जीवस्यैव भोग उपपन्नः । तस्माज्जीवमुख्यप्राणान्यतरसमन्वितमिदं वाक्यमिति प्राप्ते ब्रूमः । अत्र वेदितव्यः पुरुषाणां कर्ता परमात्मैव । तथा हि ब्रह्म ते ब्रवाणीत्युपक्रम्य बालाकिनाऽऽदित्याद्यमुख्यात्मसूक्तेषु सत्सु तममुख्यात्मवादितयाऽपोद्याजातशत्रुणा वेदितव्यतयोपदिष्टः पुरुषः कर्ता जीवो मुख्यप्राणो वा न हि भवितुमर्हति, तथात्वे गार्ग्यापेक्षयाऽजातशत्रोरविशेषप्रसङ्गात् । पुरुषकर्तृत्वं च परमात्मनोऽन्यत्राञ्जसा न सम्भवत्येव । न च कर्मशब्दानुपपत्तिः, क्रियत इति व्युत्पत्त्या कर्मशब्दस्य जगद्वाचित्वात् । प्रत्यक्षाद्युपस्थितं जगदेतदिति सर्वनाम्ना परामृशति । न च जगदन्तर्भूतपुरुषकर्तृत्वं पृथङ्न वक्तव्यमिति युक्तं, गार्ग्येण ब्रह्मत्वेनोक्तपुरुषाणामब्रह्मत्वद्योतनाय गोबलीवर्दन्यायेन पृथगुक्तिसम्भवादिति ॥

जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम् ॥ १ । ४ । १७ ॥

ननु जीवलिङ्गान्मुख्यप्राणलिङ्गाच्च न ब्रह्मपरत्वावधारणमिति चेत्तद्व्याख्यातं प्रतर्दनाधिकरणे । "उपासात्रैविध्यादाश्रितत्वादिह तद्योगा"दित्यत्राविरोधतया जीवमुख्यप्राणलिङ्गं ब्रह्मपरं व्याख्यातमित्यर्थः । जीवप्राणपरत्वेऽभ्युपगम्यमाने ब्रह्मपरत्वस्याप्यवश्यकत्वाद्वाक्यत्रैविध्यं स्यादित्येष दोषस्तत्रोक्तः प्रकृतेऽपि समान इति

भावः । प्रतर्दनविचारे कर्मपदस्याविचारादगतार्थता द्रष्टव्या ॥

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥ १ । ४ । १८ ॥

जैमिनिराचार्योऽस्मिन्प्रकरणे जीवपरामर्शमन्यार्थं ब्रह्मप्रतिपत्त्यर्थं यतो मन्यतेऽतो ब्रह्मपरमेवेदं वाक्यम् । कुतो मन्यते । प्रश्नव्याख्यानाभ्याम् । आत्मजिज्ञासु बालाकिमादायाजातशत्रुः सुप्तपुरुषसमीपं गत्वा "हे सोमराज"न्निति सुप्तमाहूयाह्वानशब्दाश्रवणात्प्राणादीनामभोक्तृत्वं प्रतिपाद्य यष्टिघातोत्थापनेन प्राणादिव्यतिरिक्ते जीवे प्रतिबोधिते पुनर्जीवातिरिक्ताधिकरणभवनापादानविषयान्प्रश्नान्स्वयमेव चकार "क्वैष एतद्बालाके पुरुषोऽशयिष्ट क्व वा एतदभूत्कुत एतदागा"दिति । अयमर्थः । भो बालाके शयनमेतद्यथा तथैतत्पुरुषः कस्मिन्नधिकरणे स्वापे शयनं कृतवानित्यधिकरणप्रश्नार्थः । एतद्भवनमेकीभावो यथा स्यात्तथा काश्रये सुप्तोऽभूदिति भवनायतनप्रश्नार्थः । शयनभवनयोराधारं पृष्ट्वोत्थानावस्थायामागमनापादानं पृच्छति "कुत" इति । एतदागमनं यथा स्यात्तथा कस्मादुद्बोधावस्थायामागादुत्थानं कृतवानित्यर्थः । एतत्प्रश्नोत्तरदानासमर्थं बालाकिं मत्वा स्वयमेवोत्तरमाह "यथा सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन्प्राण एवैकधा भवती"त्यादिना । शयनभवनयोराधार उत्थानापादानं च प्राणशब्दवाच्यः परमात्मैवेत्युत्तरार्थः । तस्माद्यस्मिञ्जीवस्य भोक्तुः शयनभवने यस्माच्चोत्थानमेकीभावभ्रंशरूपं सोऽत्र परमात्मा वेदितव्यतयोपदिष्टः पुरुष-

भूतानां ज्ञानं क्षणक्रमसाक्षात्कारेणैवेति बोध्यम् एतेन स्थूलदृष्टान्तेन तुल्यजातिलक्षणदेशस्य परमाणुसामान्यस्यान्योन्यविवेकप्रत्यय ईश्वरस्य । योगिनश्च प्रकृत्यादिप्रेरणमभीप्सोः क्षणतत्क्रमानुभवाद्बोध्यः तथा हि पूर्वयोः परमाणुदेशतत्साहित्यसंपादकक्षणयोः साक्षात्करणात् अयं पूर्वदेशस्य अयमुत्तर इति विवेकः यत उत्तरस्य पूर्वदेशानुपपन्नोत्तरस्य स्वदेशप्राप्तिभिन्ना तयोः साहित्यसंपादकक्षणभेदात् येऽपि वैशेषिका मुक्तात्मनां प्रलये परमाणूनां चानन्यजातिलक्षणदेशानामन्योन्यं विभाजकान्तरासम्भवेन तत्कालिकत्वेनान्त्यो विशेषनामाकश्चनभेदकोयोगिग्राह्यपदार्थः स एवेदानीं परमाणूनामन्यताप्रत्ययं करोतीति वदन्ति । तन्मतेऽपि संस्थानरूपमूर्तिव्यवधानजातिलक्षणदेशयोगिबुद्धिगम्य क्षणभेदोऽन्यत्वहेतुरस्त्येवेति समानं तत्र संस्थानाद्भेदः प्रविद्ध एव संस्थानमवयवसंनिवेशः व्यवधिर्यथा कुशपुष्करद्वीपयोर्देशस्वरूपयोः अत एवोक्तं वार्षगण्येन मूर्तिव्यवधिजात्यादिभ्यो भेदेनातिरेकेण विशेषस्याभावात् मूलेषु नित्यद्रव्येषु पृथक् विशेषपदार्थो नास्तीति अस्य मते वृद्धावस्थायां ये मूर्त्यादयः स्थितास्त एव मुक्त्यवस्थायामपियोगिभिर्गृह्यमाणा मुक्तानामन्योन्यं भेदव्यवहारजनकाः । एवं परमाणवादीनामपि प्रलये भेदव्यवहारः स्वगतसूक्ष्मकार्यभेदादुक्त क्षणभेदाच्चेति मन्तव्यम् । मूलस्य प्रधानस्य तूक्तभेदहेत्वभावाद्भेदोनास्त्येव तदुक्तं कृतार्थं प्रतिनष्टमप्यनष्टमिति ।

इदानीं विवेकजज्ञानस्य मोक्षोपयोगमाह ।

तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानम् ॥ ५३ ॥

इति हेतो यतो विवेकजज्ञानं सर्वविषयादिरूपं अतः सर्वच दोषसाक्षात्कारेणोत्तरवैराग्यद्वारा संसारतारकमित्यर्थः तारकं लौकि-

कसामर्थ्यं विनैव सत्वपुरुषान्यता संयमेन यथा तत्क्रमसंयमेन बोद्धोधितं यथार्थज्ञानसामर्थ्यप्रतिभातद्वत्त्वं प्रतिभोत्यत्वं चानोपदेशिकत्वात् । तच्च सर्वविषयं न किंचिदविषयं । सर्वथाविषयं सर्वैः प्रकारैरतीतानागतादिरूपैः स्वगतसर्वविशेषैः सर्वविषयकं ईदृशं च न शाब्दं । तस्य सामान्यमात्रविषयकत्वात् परिच्छिन्नविषयकत्वाच्च अक्रमं । एकक्षणे बुद्धिवृत्त्युपारूढसर्वविषयं । एवं प्रकारेण विवेकजज्ञानं पूर्णं अस्यैवांशो योगप्रदीपो मधुमती भूमिः । यस्यां स्थान्युपनिमन्त्रणं साहिविवेकजज्ञानविषयैकदेशप्रकाशकत्वादंशः तत आरभ्यास्य पूर्तिपर्यन्तं यत्किञ्चिन्मध्ये ते सर्वे ऽस्यैवांशाः सवितर्कादिरूपाः परिणामत्रयसंयमादिरूपाश्च संप्रज्ञातयोगभूमिका योगवह्निकणत्वेनात्यल्पतया योगप्रदीपत्वेन नोक्ताः । अत एव विवेकजज्ञानस्य सूर्यतुल्यत्वमन्यत्रोक्तम् ।

नन्वेवं सति किमेतादृशज्ञानानन्तरमेवमोक्ष उत तद्विनापीति संशये उत्तरमाह ।

सत्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति ॥ ५४ ॥

. प्राप्तविवेकजज्ञानस्याप्राप्तविवेकजज्ञानस्य वेत्यादिः । एवंचेतरसिद्ध्यनपेक्षा सुतरांकैवल्ये इति बोध्यम् बुद्धिसत्वस्य पुरुषेण सह यदाशुद्धिसाम्यन्तन्देव मोक्षो नतूक्तसिध्यपेक्षेत्यर्थः यदा हि निर्धूतरजस्तमोमलं बुद्धिसत्वं पुरुषस्यान्यताप्रत्यये विवेकख्यातिमात्रे ऽधिकारः कर्तव्यताबुद्धिर्यस्य तादृशं । दग्धानि अनागतक्लेशरूपाणि विपाकाख्यसंसारबीजानि यत्र तादृशं भवति ॥ तदा पुरुषस्य शुध्या सारूप्यं प्राप्तमिव भवति ॥ बुद्धेर्दुःखात्मकत्वे नात्यन्तशुद्धेः कदाप्यभावात् किमंशेन तद्धि साम्यमिति चेच्छृणु ॥ बुद्धिधर्मत्वात्पुरुषे उपचरितस्य प्रत्ययाविशेषाख्यभोगस्याभावः पुरुषस्य शुद्धिर्बुद्धे-

रपिजीवन्मुक्तिदशायां विवेकित्वेन तादृशभोगाभावेन शुद्धिसाम्यात् साक्षितामात्ररूपभोगव्यावृत्तये उपचरितेत्युक्तंप्रत्ययाविशेषरूपो हि भोगस्तस्य अविवेकस्योपाधिधर्मत्वात्। एवं च यथा साक्षी निरभिमान एवं चित्तस्य निरभिमानत्वं मोक्षहेतुर्नैश्वर्यादिकमिति फलितं अस्यां च शुद्धिसाम्यावस्थायां जातायां प्रारब्धप्रतिबन्धनिवृत्त्यनन्तरं कैवल्यं भवति ईश्वरानीश्वरसाधारण्येन पूर्वोक्तसंयमानां तत्तत्सिद्धिकामनया ऽनुष्ठानात्प्राप्तज्ञानक्रियाशक्तिमानचेश्वरस्तादृशैश्वर्ये कामनाभावात्तदलाभेऽपि तैः प्राप्तविवेकज्ञानस्यानीश्वरस्य वा इतरस्य चोत्पन्नात्मज्ञानस्य दग्धक्लेशबीजस्य मुक्त्यर्थं ज्ञानान्तरे काचिदपेक्षास्ति न चैवं किमर्थं सिद्धीनां कथनं समाधिजस्य क्रियाशक्तिरूपाणिमाद्यैश्वर्यस्य सार्वज्ञस्य च वैराग्यरूपसत्त्वशुद्धिद्वारा मोक्षार्थत्वेन कथनात् परमार्थतस्तु सत्त्वपुरुषान्यताज्ञानादेवाज्ञाननिवृत्त्या कैवल्यम्। तथा हि अज्ञाने निवृत्ते उत्तरक्लेशनिवृत्तौ तदभावात्कर्मविपाभावः कैवल्यं च चरिताधिकाराणां गुणानामस्यामवस्थायां पुरुषं प्रति कादृश्यत्वेनानुपस्थानं तदा हि पुरुषः सुखदुःखमोहात्मकगुणाद्यदर्शनेन चित्तज्योतिर्वियोगात्स्वरूपमात्रज्योतिर्दुःखादिप्रतिबिम्बरूपमलरहितः सन् केवले ईश्वरे ऽविभागं प्राप्नोति इति शिव। इति सांख्यप्रवचनपातञ्जलसूत्रवृत्तौ विभूतिपादस्तृतीयः ॥ ३ ॥

Digitized by Google

पातञ्जलसूत्रवृत्तौ

इदानीं समाधिसिद्धेरुत्कर्षं दर्शयितुं पञ्चप्रकारां सिद्धिमाह ।

जन्मौषधिमन्त्रतपः समाधिजाः सिद्धयः ॥ १ ॥

तत्रैहिकेन कर्मणा देशादिदेहान्तरजन्ममात्रेण भवन्ती अणि-मादिसिद्धिर्जन्मजा असुरादिभवनेषु रसायनादिजा कायवज्रसारत्वा-दिसिद्धिरौषधिजा मन्त्रजपादिभिर्या ऽणिमाद्याकाशगमनादिसिद्धिः सा मन्त्रजा ॥ तपसा संकल्पसिद्धिस्तपोजन्या सा समाधिजा व्याख्याता ।

अथ निर्माणकायनिर्माणेन्द्रिययोरुत्पत्तिप्रकारमाह ।

जात्यन्तरपरिणामः प्रकृत्यापूरात् ॥ २ ॥

अन्यजातिपरिणतानां कायेन्द्रियाणां पूर्वपरिणामापाये उत्त-रपरिणामोपजनिस्तत्कायेन्द्रियप्रकृतिभूतानामवयवानामापूरादनुप्र-वेशाद्भवति । लोके वल्मीकादीनां क्षुद्रपरिणामापाये तदुत्तरमहाप-रिणामोत्पत्तेर्भूतप्रकृतीनामनुप्रवेशेन दृष्टत्वात् अतो योगिनामपि देहेन्द्रिययोः परिणामान्तरकाले धर्मो निमित्तापेक्षाः कायेन्द्रियप्रकृ-तय आपूरणेन स्वं स्वं जातीयं विकारमुपकुर्वन्ति तत्र कायप्रकृतिः पञ्चभूतानि इन्द्रियप्रकृतिश्चाहंकारः दृष्टश्च लोके तृणराशिनिक्षि-प्तस्य वह्निकणस्य यथादेव प्रकृत्या पूरेण गगनव्यापीपरिणामः । एव-मेववामनादीनां त्रिभुवनव्यापित्वे कृष्णेन चार्जुनादिभ्यो विश्वरूप-प्रदर्शनं च प्रकृत्या पूरेण तद्भिन्नवत् यथाभक्तुरेवेति बोध्यम् । एवं शरीरस्य तारुण्यवार्धक्यादिकमपि एवमणिमादिकं प्रकृत्यपगमादितिबोध्यम् । अगस्त्यादीनां समुद्रपानं च तोयादिप्रकृत्यपगमेनेति बोध्यम् । अथ

आत्यन्तरशब्देन योगिनां गजतुरगादिविभवं कायव्यूहादिकं च ग्राह्यम् । स एकधा भवति । त्रिधा भवति पञ्चधा शतं च दश चैकस्य सहस्राणि च विंशति रितिकायव्यूहे श्रुतिः ।

ननु योगजधर्मैर्बलात्प्रकृत्याकर्षे प्रकृतिस्वातन्त्र्यसिद्धान्त-हानिरत आह ।

निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत् ॥ ३ ॥

धर्मादिरूपं निमित्तकारणं न प्रकृतीनां प्रेरकं परतन्त्रेण कार्येण स्वतन्त्रस्य कारणस्याप्रवर्त्तनात् । ननु प्रकृते स्वातन्त्र्ये धर्मादिकं व्यर्थमित्यत आह वरणेत्यादि । यथा क्षेत्रिकोद्भिः पूर्णा-त्केदारात् समंनिम्नं निम्नतरं वा केदारान्तरन्ताभिरद्भिः विप्ला-वयिषुर्नापः पाणिनाऽपकर्षति किन्तु आवरणान्त्वासांभिनत्ति आलवालाख्यं तस्मिंश्च स्वयमेवापः केदारान्तरं गच्छन्ति । तथा धर्मेण प्रकृतीनामावरणोऽधर्मे भिन्ने स्वयमेव प्रकृतयः स्व स्व सजातीयं विकारं विकारप्रकृतीनां परिणामान्तरार्थं व्याप्नुवन्ति एवं क्रियावद्वारम्भकसंयोगोऽपि प्रकृतेः स्वत एव भवति तथा हि यथा स एवक्षेत्रिकस्तस्मिन्नेव केदारे नोदकान् भौमान्वा रसान्धान्यमूलान्यनु-प्रवेशयितुं नसमर्थः किं तर्हि मुद्गगवेधुकश्यामाकादींस्ततोऽपकर्षति अपकृष्टेषु तेषु स्वयमेव रसान्धान्यमूलान्यनुप्रविशन्ति तथा धर्मो निवृत्तिमात्रे कारणमधर्मस्य । शुद्ध्यशुद्ध्योरत्यन्तविरोधात् न तु प्रकृतिप्रवृत्तौ संयोगविशेषे वा धर्मो हेतुः । एवं चाधर्मादि प्रति-बन्धनिवृत्तिद्वारेणैव धर्मादिः परिणामकारणम् । यथा संस्कार एव स्मृतिहेतुः सदृशादृष्टचिन्तादयस्त्वनुगता एव संस्कारस्योद्बोधक-मात्राः उद्बोधश्च तमोदोषरूपावरणभङ्गः तथा प्रकृतिरेव जग-

त्कारणं कालकर्मेश्वरादयस्तु प्रकृतेः कार्यजननशक्त्युद्बोधकाः तत्र धर्माधर्मौ स्व विरुद्धाधर्मधर्मरूपावरणभङ्गेनोद्बोधकौ। ईश्वरस्तु साम्य-परिणामादिरूपाखिलावरणभङ्गेनोद्बोधकः । कालादयस्तु । धर्माद्यु-द्बोधकतया दण्डादयस्तु कार्यान्तराभिव्यक्तिप्रतिबन्धकतयेत्यूह्यम् । एतदेव निमित्तकारणत्वं अव्यभिचारात् संयोगस्यासमवायिकारण-त्वमिष्यत एव द्वारत्वात् न तेन प्रकृतेः स्वातन्त्र्यहानिरितिबोध्यम्। तत्र धर्मस्याधर्मापसारणद्वाराकायेन्द्रियपरिणामनिमित्तत्वं । यथा नन्दीश्वरे स हि नन्दिनामामनुष्यो धर्मातिशयवशान्नन्दीश्वरो जातः एवं बलवानधर्मो ऽपि धर्मापसारणेन तन्निमित्तं यथा नहुषाजगर-स्येति दिक् ।

यदा योगी बहून्कामान्निर्मिमीते तदा किं तेनिर्मातृमनोमात्रे-णैश्वर्यव्यवहारभाज उत तदतिरिक्तप्रातिस्विकमनोभाजस्तत्राह ।

निर्माणचित्तान्यस्मितामात्रात् ॥ ४ ॥

स्व संकल्पेन निर्मितचित्तानि निर्माणचित्तानि निर्मितदेह समसंख्यानि भवन्ति ॥ चैत्रमैत्रादिशरीरेषु एकैकासाधारणचित्तान्वि-तत्वदर्शनात् तानि चाहंकाराख्यास्मितामात्रात् । चित्तशब्दोऽत्र मनो-मात्रवाची । योगिनो मनस्तु संकल्पमात्रेण निमित्तकारणन्तेषां । एवं बुध्यहंकारौ अपि स्व प्रकृतिप्रधानबुध्यापूराद्भवन्तीति बोध्यं युक्तिसाम्यात् ततस्तानि सर्वाणि शरीराणि सचित्तानि भवन्ति । ननु व्यापकस्य निर्मातृचित्तेनैव कायव्यूहेषु वृत्तिसम्भवेनानेकतत्कल्पना-व्यर्थेति चेत् न समाधिभोगयोर्नानाज्ञानयोश्चैकदैकस्मिंश्चित्ते विरो-धेन तद्भेदसिद्धेः यदा तु योगी जीवभेदानेव स्वदेहान्निर्मितेषु देहेषु यो जयति तदा वश्यमन्तःकरणभेदापेक्षणाच्च । तस्माच्च मनसोभेदा-ज्जायन्ते चेतएवहि । एकधा स द्विधा चैव त्रिधाच बहुधा पुनः योगो-

श्वरः शरीराणि करोति विकरोति च प्राप्नुमाद्विषयान्केश्चिदुग्रन्तपश्चरेत् संहरेच्च पुनस्तानि सूर्यो रश्मिगणानिवेति स्मृतेः । कदाचित्तु योगिना-मेकान्तःकरणेनैव नानादेहेषु व्यवहारोऽपि स्वतन्त्रेच्छस्य नियन्तुमशक्यत्वात् न चैवमात्मनानात्वकल्पना व्यर्था चित्तभेदे-नैव ज्ञानाज्ञानाद्युपपत्तेरिति वाच्यं । बन्धमोक्षव्यवस्थानुरोधेन तत्सिद्धेरिति दिक् ।

तत्र विशेषमाह ।

प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषाम् ॥ ५ ॥

तेषां बहूनां चित्तानां कथमेकचित्ताभिप्रायानुसारिणी प्रवृत्तिः स्यादिति योगी पूर्वसिद्धं यच्चित्तं तदेव सर्वचित्तानां प्रयोजकं निर्मि-मीते नियामकं करोति एवं च तदभिप्रायेण तेषां प्रवृत्तिः ऐश्वर्यनि-र्वाहार्थमनेकचित्तेष्वन्तर्यामिविधया पूर्वसिद्धं चित्तं स्थापयित्वा तत्र प्रवृत्तिभेदं संपादयतीति भावः एतेनैकाभिप्रायानुरोधः स्वपरप्रति-सन्धानं चोपपादितं एतेन विषयवादीनामंशावतारा अपि व्याख्याताः तेष्वात्मन एकत्वेऽपि अंशांशिभावव्यवहार उपाधीनामंशांशिभावे-नौपाधिका इति दिक् ।

अथोक्तपञ्चविधसिद्धियुक्तचित्तानां मध्ये मुक्तियोग्यं चित्तमाह ।

तत्र ध्यानजमनाशयम् ॥ ६ ॥

तेषु यत् ध्यानजं ध्यानसंस्कृतं निर्माणयोग्यं चित्तं तदेवाना-शयं क्लेशकर्मवासनाद्युपाश्रयरहितं योगेनैव ज्ञानोत्पत्त्या वासनोच्छेदो न मन्त्रादिभिरित्यर्थः इतरेषां तु कर्माशयोऽस्त्येव ।

चित्तविधकर्मवत्त्वादित्याह ।

कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम् ॥ ७ ॥

योगिनो निष्पन्नयोगस्य कर्मकायादिव्यापारो ऽशुक्लाकृष्णः पुण्यपापाहेतुत्वात् । इतरेषामयोगिनां जन्मादिसिद्धानां त्रिविधं शुक्लं कृष्णं शुक्लकृष्णं चेति । तत्र कृष्णं तमोवर्धकतया दुःखफलदं यथा दुरात्मनां शुक्लं सत्त्ववर्धकत्वात्सुखफलदं यथा तपः स्वाध्यायध्यानवतामसंन्यासिनामपि तस्य हि केवलेमनस्यायत्तत्वेनाबहिःसाधनाधीनतया परापीडयैवोत्पत्तेः शुक्लं कृष्णं शुक्लकृष्णं चेति । तत्र कृष्णं तमोवर्धकतया दुःखफलदं यथा दुरात्मनां शुक्लं सत्त्ववर्धकत्वात्सुखफलन्द यथा तपः स्वाध्यायध्यानवतामसंन्यासिनामपि तस्य हि केवले मनस्यायत्तत्वेनाबहिःसाधनाधीनतया परापीडयैवोत्पत्तेः शुक्लकृष्णं रजोवर्धकत्वात्सुखदुःखफलदं । यथा कामिनां । तस्य देहेन्द्रियमनोभ्यो बहिर्योनिसाधनातिततत्साध्यतयापरपीडानुग्रहोभयद्वारकत्वात् बहिः साधनसंपादने हि अन्ततोपरिहार्योपिपीलिकादीनां पीडाभवत्येवेति बहिःसाधनसाध्यं सर्ववेदोक्तमपि कृष्णसङ्कीर्णमेव अनुग्रहस्य तत्र देवादीनां प्रसिद्ध एव अशुक्ला कृष्णं यथा सन्यासिनामभिमानफलत्यागिनां क्षीणक्लेशानां चरमदेहानां न तु सन्यासाश्रमिमात्राणां अविद्यादिक्लेशसत्त्वे तेषामपि धर्माधर्मोदयात् । क्लेशक्षये च गृहिणामप्यशुक्लां कृष्णत्वात् । योगिभिः फलस्याहंकरोमीत्यभिमानस्य च त्यागात् । विहितं हि कामनायां सत्यामेव फलं ददाति विहितं निषिद्धं चेत्युभयमपि उपादानाख्याभिमाने सत्येवफलदं अत्राशुक्लाकृष्णानां सुखदुःखफलस्यैव प्रतिषेधेन सत्त्वशुद्धिफलकत्वमस्त्येव । न च ज्ञानेनैव तेषां सत्त्वशुध्याख्यः पापक्षयो भविष्यति । कर्मणामपि ज्ञानाङ्गतया सत्त्वशुद्धिहेतुत्वात् आत्मरतिः क्रियावानेषब्रह्मविदां वरिष्ठ इति श्रुतेः, योगिनः कर्मकुर्व्वन्ति सङ्गं त्यक्त्वात्मशुद्धये इति स्मृतेश्च, । अन्यथा वसिष्ठादीनां कर्मा-

Digitized by Google

नुष्ठानानुपपत्तिः न च लोकसंग्रहार्थं तेषां कर्मलोकसंग्रहस्य स्वतो ऽपुरुषार्थतया कैवल्यहेतुसत्त्वशुद्धिद्वारैव तत्त्वस्यौचित्यादिति दिक् ।

नन्वयोगिनां कर्मसत्त्वेपि वासनानभिव्यक्त्यामोक्षो स्त्वित्यत आह ।

ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम् ॥८॥

ततस्त्रिविधात्कर्मणो वासनानामभिव्यक्तिर्भवत्येव । नन्वेवं मानुष्यप्रापककर्मणां पश्वादिभोगवासनाभिव्यक्तौ तृणभोजने ऽपि प्रवृत्तिः स्यादतस्तद्विपाकानुगुणानामिति । यज्जातीयस्य कर्मणो यो विपाकस्तदनुगुणानामेवाभिव्यक्तिरित्यर्थः नहि दैवं कर्मफलोन्मुखं तिर्यग्मनुष्यवासनाभिव्यक्तिनिमित्तं सम्भवति किन्तु दैवानुगुणवासनाभिव्यक्ति निमित्तमेवेति नारकतिर्यग्मनुष्ये चायं समानश्चर्यो विचार इति दिक् ।

चतुर्जन्मादिव्यवहितवासनाभिव्यक्तिं कर्मफलान्यथानुपपत्याह ।

जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोरेकरूपत्वात् ॥ ९ ॥

जात्यादिभिर्व्यवहितानामपि वासनानामानन्तर्यमव्यवहितवत्कार्य्यकारित्वं भवति ॥ अन्यथा कर्म्मफलानुपपत्तेः स्मृतिसंस्कारयोरेकरूपत्वादेकाकारत्वादित्यर्थः ॥ तथा हि वृषदंशविपाकारम्भः स्वव्यञ्जकेनाञ्जनेन कालादिनाभिव्यक्तो वर्त्तमानावस्थो भवति न तु पूर्वदेहत्यागमात्रेण झटित्येवेति नियमः स यदा जातिशतेन वा दूरदेशतया वा कल्पशतेन वा व्यवहितस्वव्यञ्जकं प्राप्योदियात् तदा शीघ्रं पूर्वप्राप्तवृषदंशविपाकजनितसंस्काररूपवासनागृहीत्वैव व्यक्तो भवति व्यवहितानामपि वासनानां सदृशं कर्म

Digitized by Google

व्यञ्जकमभिव्यक्तौ निमित्तं प्रकृतेरेवोपादानत्वादित्यानन्तर्यमेवार्थः तत् सादृश्यं चैकजातीयफलकत्वेन प्रमाणमाह स्मृतिसंस्कारयोरेकरूपत्वात् । न चाव्यवहिते मनुष्यजन्मन्येव वृषदंशवासनाः सन्तु अनुभवैः स्व समानाकारसंस्काराणामेव जननात् । न चैवं मनुष्यवासनयेव वृषदंशविपाकोऽस्तु । संस्काराणां कर्माशयानुरूपाणामेवापेक्षणात् । न च मनुष्यसंस्कारादेव वृषदंशविपाकनिर्वाहकस्मृतिरस्तु । स्मृतिसंस्कारयोः समानरूपत्वात् । तस्मात् जात्यादि व्यवहितसंस्कारेभ्यः स्मृतिः न चैवमेकविपाककाले स्मृत्युत्पादनेन पूर्वसंस्कारनाशात्कथं पुनस्तज्जातीयं विपाकान्तरं इदानीन्तनस्मृतिभिः पुनः संस्कारोत्पत्तेः एवमेते स्मृतिहेतुसंस्काराः कर्माशयोद्बोधादुज्जृम्भन्ते अतो व्यवहितानां निमित्तनैमित्तिकभावानुच्छेदादानन्तर्यमेवेति सिद्धम् ।

ननु सकलजन्मार्थं वासनास्वीकारेऽनवस्था स्यादत आह ।

तासामनादित्वं चाशिषो नित्यत्वात् ॥ १० ॥

तासां वासनानामनादित्वं प्रवाहरूपेणमानभूवंभूयासमित्याशिषो नित्यत्वात् प्रतिजन्मनियतत्वात् । यद्यप्याशीर्नित्यतया तद्धेतुवासनानामनादित्वं सिध्यति न तु भोगहेतुवासनानां तथाऽपि तथानवस्थायाः प्रामाणिकत्वेनादोषत्वेन दृष्टान्तेनान्यासमप्यनादित्वमनुमेयम् । न चाग्न्यौष्ण्यादिवदियमाशीश्चैतन्यस्य स्वाभाविक्येवास्तु । जातमात्रस्यानुमानाद्यसमर्थस्यात्र जन्मन्यननुभूतमरणादिधर्मकस्य द्वेषतदनुषक्ततत्कारणमरणादिदुःखस्मरणाभ्यामेव जायमानस्य यथोक्ताशीरूपस्य त्रासस्य पूर्वजन्मानुभूतमरणादिदुःखवासनां विना ऽनुपपत्तेः । न च स्वाभाविकः सः खड्गदर्शनादिनिमित्तसापेक्षत्वात् अन्यदाऽभावात् । न हि स्वाभाविकं निमित्तसापेक्षं स हि दृश्यमानखड्गादेर्दुःखहेतुभावानुमानात् तच्च तज्जातीयादनुभूतदुःख

स्मरणे सति तज्जातीयतयाऽस्यापितत्वमनुमिनोति तस्मात्प्राग्भवीयोऽनुभवः सिध्यति । बालकस्य दृश्यमानः कम्पो भयात् वैदृशकम्पत्वात् मत्कम्पवत् भयञ्च द्वेषदुःखस्मृतिदुःखनिमित्तकं भयत्वात् मद्भयवत् स्मृतिश्च पूर्वानुभवनिबन्धना साम्प्रतिकानुभवाभावविशिष्टस्मृतित्वादित्यनुमानेन तत्सिद्धिः तस्मादनादिवासनानुविद्धमिदं चित्तं विपाकोन्मुखकर्मवशात् काश्चिदेव वासना गृहीत्वा पुरुषस्य भोगायोपावर्त्तते । ननु वासनानामनादित्वं चित्तस्य नित्यत्वे सर्वशरीरेष्वेकत्वे च स्यात् तत्तु न पुंप्रकृत्यतिरिक्तस्य कार्यत्वाभ्युपगमात् । अणुमहच्छरीरभेदेन तत्तत्परिमाणचित्तस्यापि भेदाच्चेति चेत् अत्र सांख्याः प्रतिपुरुषं सर्वशरीरसाधारणमेकैकमेव चित्तं किं तु घटप्रासादरूपस्वल्पमहदाश्रयभेदेन प्रदीपवत्स्वल्पमहच्छरीरभेदेन संकोचविकासशालितया स्वल्पमहत् परिमाणं च न तु विभु । तथा सत्यणुत्वासंभवेनान्तराप्रलये लयस्यानुपपत्तेः । एवं चाणुतुल्यसूक्ष्मावस्थायां प्रकृतेः सत्त्वरूपांशतां प्राप्नोतीति न प्रकृतिपुरुषातिरिक्तस्यानित्यताहानिः तथा संसारः संसरणं इहलोकपरलोकसंचारश्चोपपद्यते सक्रियत्वात् विभुत्वे चैतदुभयं न घटत इति वदन्ति । एतच्छास्त्राचार्यास्तु आचार्यः स्वयंभूरिति मिश्राः विभ्वेव चित्तं प्रतिनियतपुरुषभोग्यत्वात् । पुरुषभेदेनानन्तं च । चित्ताकाशं चिदाकाशमाकाशं च तृतीयकं द्वाभ्यां शून्यतमं विद्धि चिदाकाशं वरानने । इति स्मृतेः यथा चाकाशस्य विभोरपि घटाद्युपाधिकं गमनं तथास्यापि वृत्त्युपाधिकं तत् । विभूनामेव जीवचित्तानां मलिनदर्पणवदविद्याकामकर्मावृतप्रकाशशक्तीनां बाह्यसत्त्वान्तरोपष्टम्भात् ज्ञानादिहेतुरेकादशेन्द्रियपञ्चप्राणरूपः परिमाणविशेषः प्रदीपशिखावदद्रव्यपो जायते सावृत्तिस्तावृत्तयश्च संकोचवि-

काशशालिन्यः स्वल्पमहच्छरीरभेदेन संकोचविकासशीला भवन्ति प्राकृतलयपर्यन्तं चावतिष्ठन्ते । तदुपाधिकं च गमनागमनं तद्वृत्तिजन्यवृत्तीनां घटपटाद्याकाराणां ज्ञानादिशब्दवाच्यता एवं च चित्तं कार्याकार्यरूपेण द्विविधमाकाशवत् योगिनां युगपत्सर्ववस्तुज्ञानदर्शनाच्चास्य विभुत्वं । अन्यथा संनिकर्षाभावात् कथं गृह्येत योगजधर्मस्यापि प्रत्यासत्तित्वकल्पने गौरवात् तस्माद्योगजधर्मेण तम आख्यप्रतिबन्धकनिवृत्तिमात्रं कार्यं । योगिनोऽपि प्रत्यक्षं संयोगादिप्रत्यासत्त्यैव अनन्तवासनाधारत्वाच्च विभुत्वं । अत एव वासनानां देशव्यवधानमाचार्येणोक्तं ग्रन्थिवच्च वासनानां स्थितिर्भाष्ये उक्ता । सर्वथाणुत्वे तु युगपत्पञ्चेन्द्रियवृत्त्यनुपपत्तिः युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमित्यनेन च सदासर्वज्ञत्वाभाव एवमनआख्यकरणे लिङ्गत्वेनोक्तः न त्वेकदा इन्द्रियद्वयवृत्त्यभावः हेत्वसिद्धेरिति बोध्यम् ननु वृत्तीनां संकोचविकासयोः किंकारणमिति चेत् शृणु । धर्माधर्मरूपं निमित्तकारणं तयोः अनादित्वाच्च नान्योन्याश्रयः न चैवं शारीरादिधर्मे स्तुतिदानादिभिरेव ज्ञानसंभवे योगो व्यर्थः बाह्याध्यात्मिकभेदेन निमित्तद्वैविध्यात् । तत्र बाह्यं शरीरादिसाधनापेक्षं स्तुतिदानाभिवादनादिनिन्दापरस्वादानादीनि च । आध्यात्मिकं चित्तमात्राधीनं श्रद्धावीर्यस्मृतिसमाधिप्रज्ञारूपं तद्विपरीतमश्रद्धादि च तदुक्तं । ये चेतमैत्र्यादयोध्यायिनामपलसाध्यत्वेनविहारास्ते बाह्यसाधनानपेक्षस्वभावत्वेन निष्पापं प्रकृष्टं धर्ममुपादयन्तीति तयोराध्यात्मिकं बलवत् । ज्ञानवैराग्यरूपतया सर्वातिशायित्वात् । चित्तबलं विना दण्डकारण्यं कः शारीरेण कर्मणा शून्यं कुर्यात् समुद्रमगस्त्यश्चापिबेत् दण्डकराजक्रोधेन दण्डकदेशं सप्तदिनवृष्ट्या जनशून्यं कृतवान् कश्चि-

योगी । एवं च योगजधर्मवत् बाह्यधर्मो न तथा चित्तविकासकारीति न तद्वैयर्थ्यमिति बोध्यम् ।

इदानीं मोक्षोपपत्तये नाद्यसंख्यानामपि वासनानामत्यन्तोच्छेदमाह ।

हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः ॥ ११ ॥

तत्र हेतुरुच्यते धर्मात्सुखं अधर्माद्दुःखं सुखाद्रागो दुःखात् द्वेषः ततः प्रयत्नस्तेन प्रयत्नेन मनसा वाचा कायेन वा चेष्टमानः परमनुगृह्णाति उपहन्ति वा ततः पुनर्धर्माधर्मौ सुखदुःखे रागद्वेषौ इति षडरं धर्माधर्मसुखदुःखरागद्वेषरूपारषट्कसहितं प्रवृत्तमिदमविद्याख्यदण्डप्रेरणेन भ्रामितं संसारचक्रं ज्ञानकर्मवासनाहेतुः यथा कुलालचक्रस्य दण्डेन प्रेरणे वेगाख्यः संस्कारो भवति ततस्तं विनापि किञ्चित्कालं स्वयमेव भ्रमति तद्वदेव भ्रामितं संसारचक्रं वासनाहेतुः । अस्य च प्रतिक्षणमावर्तमानस्याविद्यानेत्रीभ्रामिका सैव सर्वक्लेशानां मूलकारणं अविद्याक्षये च कर्मणां सत्त्वेपि चक्रभ्रमणेपि न वासनोदय इत्येवमविद्यारूपो वासनाया हेतुः फलं तु यं पुरुषार्थमुद्दिश्य धर्माद्युत्पन्नं तदेव वासनानामपि फलं कर्मवासनयोरन्योन्यसहकारित्वात् । ननु फलेन सह कथंकारणस्य नियमरूपः संग्रहः फलाभावेपि कारणस्य सत्त्वादिति चेन्न अपूर्वस्यासतो जन्माभावात् । एवं च सत्कार्यवादस्वीकारेणानागतावस्थफलेन तत्संभवः आश्रयस्तु वासनानां साधिकारं पुरुषार्थवन्मनः प्रलये वासनासत्त्वानुरोधेन तदाश्रयमनसो नित्यत्वमभिप्रेत्य साधिकारमित्युक्तं । अधिकारसमाप्तौ तु मनसो लयेन क्वनिराश्रया वासनास्तिष्ठेरन् मनोऽपचितं आलम्बनं तु यदभिमुखीभूतं वस्तु यां वासनां व्यनक्ति तस्यास्तदालम्बनं मोक्षकाले

तु कामिनीरूपादीनां रागवासनाऽव्यञ्जकत्वान्नालम्बनत्वं एवमेतैर्हेतुफलाश्रयालम्बनैः संगृहीता व्याप्ताः सर्वा वासना अत एषामभावेऽत्यन्तोच्छेदे विदेहमुक्तिसमये तदाश्रयाणां तन्नियतानां वासनानामभावोऽत्यन्तोच्छेद इति तासामनादित्वेऽपि मोक्षसंभव इत्यर्थः।

ननु सत्कार्यवादात्कथं वासनानामत्यन्तोच्छेदोऽत आह।

अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणाम्॥ १२॥

स्यादयं दोषो यदि स्वरूपापायस्तासामुच्येत किन्त्वत्यन्तातीततामात्रमुच्यते यतोऽतीनागतं वस्तु स्वरूपतोऽस्ति। ननु विरुद्धधर्माणां कथमेकदा सत्ता तत्राह अध्वभेदादिति भिन्नाध्वकत्वादविरोध इत्यर्थः वर्तमानलक्षणानामेव विरोध एकदेतिभावः। तयोः स्वरूपानपाये किं प्रमाणमिति चेत् शृणु भविष्यदभिव्यक्तिकमनागतं अनुभूताभिव्यक्तिकमतीतं अनुभूयमानाभिव्यक्तिकं वर्तमानं त्रयमप्येतत्स्वरूपं सत् यतो योगिनां प्रत्यक्षज्ञानस्य विषयः यदि चेतत्स्वरूपतो न स्यात् नेदं निर्विषयं ज्ञानमुदयत्स्यत्। शशशृङ्गादीनां ज्ञानादर्शनात् न च शुक्तिरजतादि वद्बुद्धिपरिणामविशेष एवयोगजधर्मादिजन्योऽतीतादिस्थले साक्षिज्ञानविषयोऽस्त्विति चेन्न। योगिना पूर्वानुभूतातीतादेः कालान्तरेऽपि प्रत्यभिज्ञायमानत्वात् वर्तमानवस्तूनामप्येवं बुद्धिमात्रताप्रसङ्गाच्च। अस्मदादीनां तु सौक्ष्म्यादनुपलम्भ उपपन्नः घटोऽतीत इति प्रतीति वन्नास्तीति प्रत्ययोप्यतीततादिविषयकः। किं च यदि भोगसाधनस्यापवर्गसाधनस्य वा कर्मणः फलमुत्पत्स्यमानं निरुपाख्यमसत् तदा तेन निमित्तेन तदुद्देशेन कुशलस्य योगिनोऽनुष्ठानं न स्यात् अनागतं साक्षात् कृत्ययोगी तद्वर्तमानत्वापद्यते। यथार्जुनः कालात्मके कृष्णशरीरे भाविनं भीष्मादिमृत्युं दृष्ट्वा युद्धे प्रवृत्तः न चैवं कारणव्यापारो विफलः सत

एव फलस्य वर्तमानीकरणे व्यापारात् दृष्टं च तिलेषु विद्यमानस्यैव तैलस्य तैलिकव्यापारेणाभिव्यक्तिमात्रं नापूर्वोत्पादने कारणव्यापारः शिलायामंकुरोत्पादनेऽपि तदापत्तेः न चैवं कारणस्यापि नित्यत्वादतीतकारणादपि कार्याभिव्यक्तिः स्यात् । वर्तमानस्यैव कारणस्य कार्याभिव्यक्तिहेतुत्वात् । न त्वपूर्वोत्पादने हेतुत्वं शशशृङ्गादेरप्युत्पत्त्यापत्तेः उत्पत्तेः प्राक् द्वयोरपि परमते तुल्यत्वात् धर्मी चानेकधर्मस्वभावः तस्य च ते धर्मा अध्वभेदेन प्रत्यवस्थिताः न च विरोधः । अभिव्यक्तिरूपेण विशेषेणैव धर्माणां विरोधो न स्वरूपत इत्यभ्युपगमात् न हि यथा वर्तमानमभिव्यक्तिमापन्नं द्रव्यतः स्वक्रियाकारित्वे नास्ति एवमतीतमनागतं च वर्तते किं तर्हि स्वेनैव भाविव्यक्तिकेन रूपेणानागतमस्ति अतीतं चानुभूताभिव्यक्तिकेन स्वरूपेणास्ति वर्तमाने एवत्वध्वनिस्वरूपव्यक्तिरिति अतीतानागतयोरध्वनोस्तस्या अभावः न चैवमेकाध्वसमयेऽपराध्वाभावात्तत्र सत्कार्यहानिः एकस्य चाध्वनोऽभिव्यक्तिसमयेद्वावध्वानौ धर्मिसमन्वागतौ भवत एवेति नाभूत्वाभावस्त्रयाणामध्वनामित्यदोषात् एतच्चोपपादितं प्राक् ।

अथ सदसत्त्वैधर्म्येण कार्यकारणयोर्विवेकं सम्यक् ज्ञानविषयमाह ।

ते व्यक्तसूक्ष्मा गुणात्मानः ॥ १३ ॥

तेऽमी अध्वानो धर्मा वर्तमानाव्यक्तस्वरूपाः अतीतानागताः सूक्ष्मात्मानः षडविशेषरूपाः सर्वमिदं महदादिघटपटान्तं धर्मजातं गुणानां संनिवेशविशेषमात्रं परमार्थतस्तु गुणात्मान एव ते धर्माः ॥ गुणरूपेणैवेषां सत्वं न तु स्वरूपेणेत्यर्थः ॥ तदुक्तम् गुणानां परमं रूपं न दृष्टिपथमृच्छति । यत्तु दृष्टिपथं प्राप्तं तन्मायेव सुतुच्छक-

मिति। परमं पारमार्थिकं नित्यमिति यावत्। मायेव लौकिकमा-यावत् क्षणभङ्गुरं। अतः सुतुच्छकमत्यन्ततुच्छमत्यसारं। स्थिरांशाभावात्। अत्र सुशब्देन परिणामितया गुणानामपि तुच्छत्वं सूचितं तेषामपि परिणामितया कूटस्थनित्यापेक्षया तुच्छत्वात् गुणकार्यं तु ततोपि तुच्छम् यद्यपि मायाशब्दो मिथ्यावस्तूनां कारणेमुख्यः मायान्तु प्रकृतिं विद्यादिति श्रुतेः, विश्वस्य बीजं परमाचिमायेति स्मृतेश्च, मायात्वं च मृषाविकारेण व्यामोहकत्वं। तच्च प्रकृतावेव मुख्यं तथाऽपि कार्यकारणाभेदात्कार्येपि मायाशब्द उक्तः दैवीह्येषा गुणमयी मममायादुरत्ययेत्यादिवत्।

नतु सर्वविकाराणामनेकगुणरूपत्वे कथमेकं शब्दतन्मात्रमेकं चक्षुरित्यादयो व्यवहारा इत्यत आह।

परिणामैकत्वाद्वस्तु तत्त्वम् ॥ १४ ॥

परमार्थतो नानात्वेपि व्यावहारिकेण परिणामरूपेण परिणामस्यैकत्वाद्वस्तूनां गुणानामेकत्वव्यवहार इत्यर्थः दृष्टोहि बहूनामप्येकः परिणामो यथाक्रमानिचिप्तानां गवाश्वमहिषमातङ्गानामेकोलवणत्वजातीयः परिणामः वर्तितैलानलानां च प्रदीप इति तथा हि प्रख्याक्रियास्थितिशीलानां गुणानां ग्रहणात्मकानां सात्त्विकान्तः-करणरूपेकरूपेण परिणतानां बाह्यकारणाभावेन श्रोत्रेन्द्रियमेकः परिणामः एवमन्यान्यपि ज्ञानेन्द्रियाण्येकः परिणामः तथाग्राह्यात्मकानां तामसान्तःकरणरूपेण परिणतानां शब्दतन्मात्रादिरूप एकः परिणामः स शब्दःशब्दतन्मात्ररूपं द्रव्यं विषयो नाम अतःदेशादिश्रोत्रेन्द्रियविषयश्चेति एवं राजसान्तःकरणरूपेण परिणतानां गुणानामेकः परिणामो घ्राणादीन्द्रियं। तेषामेव शब्दतन्मात्रादीनां मूर्त्याकाठिन्येन सजातीयानि द्रव्याणामेकः परिणामः पृथिवीपरमा-

संस्कृतपुस्तकानां सूचीपत्रम् । मूल्य

श्रीभाष्यस्य प्रथमाध्यायस्य प्रथमपादः मुद्रककाशिकासंवलितः पं॰श्रीराममिश्र-
शास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः .. .. ७।)

श्रीभाष्यस्य प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा .. ६)

श्रीभाष्यस्य तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा .. १=)

वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः .. .. २।)

सेतुपूर्त्तः प्रथमो बिन्दुः सत्सम्प्रदायाचार्यपं॰स्वामिश्रीराममिश्रशास्त्रि-
प्रणीतो निर्विशेषाद्वैतनिराकरणपरः .. .. १॥=)

सेतुपूर्त्तिसहितो वेदार्थसंग्रहः .. .. ३॥।)

शास्त्रदीपिका .. .. ६।)

सङ्कर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टच-
न्द्रिकोपेतम्, पं॰स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् । १।)

काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजप॰दामोदर-
शास्त्रिणा संशोधिता पूर्वार्द्धरूपा .. .. ५॥।)

तथा उत्तरार्द्धम् .. .. ८॥।)

माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण
श्रीसायणाचार्येण विरचिता .. .. ७॥)

काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता ६॥)

श्रीसिद्धान्तार्णवतरणिः .. .. ६)

दिग्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता .. .. ॥=)

जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीमुतरामेश्वरसूरिविरचिता .. ५॥)

लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, शेषशार्ङ्गधराचार्यविरचितया न्याय-
मुक्तावल्याख्यया टीकया सहिता .. .. ॥।)

सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना
विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम् ॥।)

तत्त्वमुक्ताकलापः-सर्वार्थसिद्धियुतः, बोधायनीयार्थसिद्धान्तानुसारी विशिष्टाद्वै-
तब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्किक-
केसरिणा सर्वतन्त्रस्वतन्त्राधिपेन श्रीवेङ्कटनाथदेशिकेन प्रणीतः ५॥=)

वेदान्तसिद्धान्तमुक्तावली, श्रार्थर्वेनिस्साहबकृताङ्गलभाषानुवादयुता .. १॥।)

काव्यप्रकाशस्य वङ्गलण्डीयभाषानुवादः .. .. २॥)

अथर्ववेदसंहिताया वङ्गलण्डीयभाषानुवादः .. .. १२)

आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्य-
काराणां परमगुरुणा श्रीयामुनाचार्यस्वामिना प्रणीतम् .. .. ॥।)

तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्गोवर्धनविरचितया न्यायप्रदी-
पाख्यटीकया सहिता .. .. १॥।)

Digitized by Google

CONTENTS

BRAHMAMRITAVARSHINI, Translated by S. V... ramanan, B. A., B. L., High Court, Triplica... Madras 385-401

PÁTANJALA SÛTRA VRITTI OF NÁGESH BHUTT, Ed. by Pandit Taraktirtha P. Jewa Nath Misra, Professor Sanskrit College, Benares 417-487

BIDHIVIVEKA of MANDANA MISRA with commentary Nyayakanika by Wachaspatti Misra, edited by P. Ram Shastri Tailang, Professor Sanskrit College, Benares 433

MEMANSA NYAYAPRAKASH by Apodeva, edited by P. Ganganath Jha, M. A., Professor of Sanskrit Muir Central College, Allahabad 449

BHÂVABODHINÎ TÎKÁ of Jaideva's Prasannaraghava Natak, edited by Pandit Ganganath Jha, M. A. Professor of Sanskrit Muir Central College, Allahabad 455

Digitized by Google

IX 60

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

No. 9] September 1905. [Vol. XXVII.

BENARES:

PRINTED AND PUBLISHED BY THE PROPRIETORS,

E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1905.

Copyright on each article reserved.

Price Rs. 9 per annum.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
पत्ररश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
शिवमीमांसा, अप्पय्यदीक्षितकृता पं· श्रीरामशास्त्रिणा संशोधिता	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधित	।=)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१)
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतबालन्टैनाचार्य्येणाङ्गलदेशीयभाषायामनूदिता ..	४)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	≡)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्य्येणाङ्गलदेशीयभाषायामनूदितम्	४)
मानवधर्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद	४)
शाश्वतधर्मदीपिका, ...	१)
अमरकोशः सटीकः	४)
योगवार्त्तिकम्	३॥=)
श्रौतपदार्थनिर्वचनम्	३)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीकामकोल्लूरशास्त्रि-संशोधिता	५)
काव्यप्रदीपः, पं· रामशास्त्रिभागवताचार्येण परिशोधितः	२॥)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	१)
खण्डनखण्डखाद्यं सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीविभूषितम्	५)

कर्ता । अपि चैवमेके वाजसनेयिनो बालाक्यजातशत्रुसं-
वाद एवं स्पष्टं विज्ञानमयं जीवं तद्व्यतिरिक्तं परमात्मान-
मामनन्ति । "य एष विज्ञानमयः पुरुषः क्वैष तदाऽभूत्कुत
एतदागा"दिति प्रश्ने "य एषोऽन्तर्हृदय आकाशस्तस्मिं-
ञ्छेत" इत्युत्तरे चाकाशः परमात्मेति दहराधिकरणे नि-
र्णीतम् । तस्मात्पुरुषकर्तरि वेदितव्ये परमात्मनि कौषीतकी-
ब्राह्मणवाक्यं समन्वितमिति सिद्धम् ॥

वाक्यान्वयात् ॥ १ । ४ । १९ ॥

पूर्वं ब्रह्मोपक्रमसामर्थ्याद्ब्रह्मपरत्वमुक्तम् । तर्हि तद्व-
देव मैत्रेयीब्राह्मणवाक्यस्य जीवोपक्रमसामर्थ्याज्जीव-
परत्वमस्त्विति दृष्टान्तसङ्गतिः । फलं पूर्ववत् । बृहदार-
ण्यके श्रूयते "स होवाच न वा अरे पत्युः कामाय पतिः
प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवती"त्युप-
क्रम्य पतिजायापुत्रपशुवित्तादिप्रपञ्चस्यात्मार्थत्वेन प्रिय-
त्वमुक्त्वा ऽनन्यार्थतया निरुपाधिप्रियत्वेनानतिशयानन्दा-
त्मनो ज्ञातव्यतामाह याज्ञवल्क्यः, "आत्मा वा अरे द्रष्टव्यः
श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा
दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदित"मिति ।
अत्र संशयः किं जीवोऽत्र द्रष्टव्यत्वादिरूपेणोपदिश्यते किं
वा परमात्मेति । तत्र जीव इति प्राप्तम् । कुतः । पतिजा-
यादिभोग्यजातवतो भोक्तुरुपक्रमात्, मध्येऽपी"दं महद्भू-
तमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय
तान्येवानुविनश्यति न प्रेत्य संज्ञाऽस्ती"ति प्रकृतस्य द्रष्ट-
व्यस्य भूतेभ्यः समुत्थानं जीवस्वरूपेण वदन्, जीवस्य द्रष्ट-
व्यत्वं दर्शयति । श्रुत्यर्थस्तु । इदं प्रत्यग्रूपं महदनवच्छिन्नं
भूतं सत्यमनन्तं नित्यमपारं सर्वगतं विज्ञानघनो ज्ञानैक-

त्मनः । आत्यन्तरासंमिश्रार्थत्वमेवकारार्थः । स चैतेभ्यः कार्यकारणाकारेण परिणतेभ्योऽविद्याभूतेभ्यः साम्येनोत्थाय जीवत्वमनुभूय तान्येव भूतानि ज्ञानाद्विनश्यन्ति सन्त्यनु पश्चाद्विनश्यति जीवत्वं त्यजति । न हि तस्यागानन्तरमस्य रूपादिविशेषज्ञानमस्ति । तस्माज्जीव इति प्राप्ते ब्रूमः । परमात्मैवात्र द्रष्टव्यतयोपदिष्ट आत्मा । कुतः । वाक्यान्वयात् । उपक्रमादिपर्यालोचनया वाक्यस्य ब्रह्मण्येवान्वयादित्यर्थः । तथा हि, "अमृतत्वस्य तु नाशास्ति वित्तेने"ति वित्तसाध्येन कर्मणा मोक्षं प्रत्याशा नास्तीति याज्ञवल्क्यादुपश्रुत्य मैत्रेयी मोक्षमाशासाना तत्साधनं पृच्छति "येनाहं नामृतास्यां किमहं तेन कुर्यां यदेव भगवान्वेत्थ तदेव मे ब्रूही"ति । यदमृतत्वसाधनं त्वं वेत्थ तदेव मे ब्रूहीत्यर्थः । एवं पृष्टो याज्ञवल्क्य इदमात्मज्ञानमुपदिशति, "आत्मा वा अरे द्रष्टव्य" इत्यादिना । न हि जीवज्ञानान्मोक्ष इति कश्चिदभ्युपैति । अतो द्रष्टव्यः परमात्मा । तथाऽऽ"त्मनो वा अरे दर्शनेने"ति यदात्मज्ञानात्सर्वज्ञानं प्रतिज्ञातं तद्दुन्दुभ्यादिदृष्टान्तैः साधयन्नस्य परमात्मत्वं गमयति । "स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुया"दित्यादिना दुन्दुभिशङ्खवीणाशब्दा दृष्टान्तत्वेनोक्ताः । तस्यायमर्थः । दुन्दुभिशङ्खवीणापदैस्तज्जन्यसामान्यशब्दा लक्ष्यन्ते । तथा च, यथा दुन्दुभ्यादिशब्दसामान्याद्दुन्दुभ्यादिशब्दविशेषा भेदेनागृह्यमाणाः शुक्तिग्रहग्राह्यरजतवत्प्रकल्पितास्तद्ग्रहणे गृहीता भवन्ति, तथा चिद्रूपस्फुरणं विना स्थितिकाले स्फुरणशून्यं जगत्तत्र कल्पितं तद्ग्रहणेन गृहीतं भवतीति, ततो नातिरिच्यत इति । तथा, "एतावदरे खल्वमृतत्व"मित्युपसंहारदर्शनाच्चात्र द्रष्टव्य आत्मा परमात्मैव ॥

ननु पतिजायादिभोग्यजातेन लिङ्गेन जीवोपक्रमः प्रतीयते स कथमित्यत आह ।

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ १ । ४ । २० ॥

जीवब्रह्मणोर्हि कार्यकारणयोर्भेदाभेदौ वर्तेते, अत्यन्तभेद एकविज्ञानप्रतिज्ञाविरोधप्रसङ्गात् । तथा च तत्प्रतिज्ञासिद्धेरिदमभेदांशमादाय जीवोपक्रमणं लिङ्गमित्याश्मरथ्य आचार्यो मन्यते ॥

जीवस्य कार्यत्वमभेदसमानसत्ताकभेदवत्त्वं चासहमानः समाधानान्तरमाह

उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ॥ १ । ४ । २१ ॥

संसारदशायामत्यन्तभिन्नस्य जीवस्य ब्रह्मात्मत्वसाक्षात्कारात्कार्यकारणसंघातादुत्क्रमिष्यत एवंभावात्परमात्मनैकीभावाद्भविष्यदभेदमादाय जीवोपक्रम इत्यौडुलोमिराचार्यो मन्यते ॥

नन्विदमप्यसङ्गतं, सत्यकार्यकारणसंघातवतः संसारिणोऽत्यन्तभिन्नस्य मुक्तिदशायामभेदायोगादित्यरुच्या परमं समाधानमाह

अवस्थितेरिति काशकृत्स्नः ॥ १ । ४ । २२ ॥

ब्रह्मण एवाविद्याकल्पितभेदेन जीवरूपेणावस्थितेर्जीवोपक्रमाविरोधं काशकृत्स्न आचार्यः श्रुतितात्पर्यज्ञो मन्यते । अत एव विज्ञानात्मभावेन ब्रह्मणो भूतेभ्यः समुत्थानं जीवलिङ्गत्वेन प्रागुपन्यस्तं न विरुध्यतेऽभेदादेव । तस्माद्द्रष्टव्ये परे ब्रह्मणि मैत्रेयीब्राह्मणवाक्यं समन्वितमिति सिद्धम् ॥

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ १।४।२३ ॥

"जन्माद्यस्य यत" इति सूत्रे यद्ब्रह्मणो जगत्कारणत्वमुक्तं तदत्र विचार्यते । यद्यपि जन्मादिनयानन्तर्यमेतस्य युक्तं, तथाऽपि निर्णीततात्पर्यैर्वेदान्तैर्निमित्तत्वमात्रसाधकानुमितेर्विरोधोक्तिः सुकरेति समन्वयावसाने लिखितमिदमधिकरणमिति बोध्यम् । न च जन्माद्यधिकरणवैयर्थ्यं, निर्विषयकसमन्वयसाधनासम्भवेन जगत्कारणात्मकविषयमात्रस्य तत्रोक्तत्वात् । उपादानत्वं त्वेतदधिकरणसिद्धं तत्रोक्तमिति न कश्चिद्दोषः । जन्मादिनयस्याध्यायादिसङ्गतत्वादस्यापि तद्विचारात्मकस्यास्त्यध्यायादिसङ्गतिः । पूर्वपक्ष एकविज्ञानात्सर्वविज्ञानप्रतिज्ञागौणत्वं, सिद्धान्ते तन्मुख्यत्वमिति फलभेदः । अत्र संशयः किं ब्रह्मणि जगन्निमित्तत्वमात्रमुतोपादानत्वमपीति । तत्र "तदैक्षत बहु स्यां प्रजायेये" त्यादिना सर्वत्रेक्षापूर्वककर्तृत्वश्रवणात्कुलालवन्निमित्तत्वमात्रमिति प्राप्ते ब्रूमः । प्रकृतिश्च ब्रह्म । चकारान्निमित्तमपि । कुतः । प्रतिज्ञादृष्टान्तानुपरोधात् । प्रतिज्ञादृष्टान्तयोः सामञ्जस्यादित्यर्थः । प्रतिज्ञा हि "येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञात" मिति । अस्यां च प्रतिज्ञायामात्मज्ञानेन सर्वविज्ञानमुच्यमानमात्मन उपादानत्वं गमयति, निमित्तत्वे तदसंभवात् । न हि कुलाले ज्ञाते घटादिकं ज्ञातमिति शक्यते वक्तुम् । उपादानत्वे तु तयोरुपादानोपादेययोरव्यतिरेकाद्युक्तं तज्ज्ञानेन तज्ज्ञानम् । दृष्टान्तोऽपि "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्य" मित्युपादानविषय एव दृश्यते । विकारो हि वागालम्बनमात्रं वस्तुतो

ऽसन्निति यावत् । तदेव साधयति "नामधेय"मिति । अन्यशेषत्वं निषेधति "मृत्तिके"ति । निमित्तत्वमपि प्रतिज्ञादृष्टान्तानुपरोधादेव बोध्यं, निमित्तत्वोपादानाभेदे प्रतिज्ञादृष्टान्तयोरसामञ्जस्यात् । तथा बृहदारण्यकेऽपि प्रतिज्ञादृष्टान्तौ दृश्येते, "आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदित"मिति प्रतिज्ञाय "स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीत" इति दृष्टान्तः । घटाद्यधिष्ठानतयाऽनुगतो यः प्रकाशः स उपादानमित्यत्र दृष्टान्तो यथा तथोच्यते । बाह्यान्दुन्दुभिशब्दसामान्यबहिर्भूतान्दुन्दुभेस्तच्छब्दसामान्यस्येत्यर्थः । तथा च हन्यमानदुन्दुभिजन्यस्य शब्दसामान्यस्य ग्रहणमन्तरेण कश्चित्पुमान्दुन्दुभिशब्दसामान्यबहिर्भूताञ्छब्दविशेषान्ग्रहणाय ग्रहीतुं न शक्नुयादिति व्यतिरेकः । अन्वयोऽपि । दुन्दुभिशब्दसामान्यस्य ग्रहणेन दुन्दुभ्याघातसंज्ञको विशेषशब्दो गृहीतो भवति, दुन्दुभ्याघातस्य वीररसाभिव्यञ्जकस्य विशेषशब्दस्य ग्रहणात्तदवान्तरशब्दविशेषो गृहीतो भवतीत्यर्थः ॥

अभिध्योपदेशाच्च ॥ १ । ४ । २४ ॥

इतश्चात्मनः कर्तृत्वप्रकृतित्वे । कुतः । अभिध्योपदेशाद्ध्यानोपदेशादित्यर्थः । "सोऽकामयते"ति ध्यानोपदेशात्कर्तृत्वं, "बहुस्या"मिति ध्यानोपदेशात्प्रकृतित्वमिति ॥

साक्षाच्चोभयाम्नानात् ॥ १ । ४ । २५ ॥

प्रकृतित्वे हेत्वन्तरमिदम् । "सर्वाणि ह वा इमानि

भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्ती" त्याकाशशब्देन साक्षाद्ब्रह्म गृहीत्वा जगदुत्पत्तिप्रलययोरु-भयोराम्नानाद्ब्रह्म प्रकृतिरित्यर्थः । यस्मिन्नुत्पत्तिप्रलयौ यस्य कार्यस्य तत्कार्यं प्रति तदुपादानं, यथा घटस्य मृदिति व्याप्तेरिति भावः ॥

आत्मकृतेः परिणामात् ॥ १ । ४ । २६ ॥

लोके हि कृतिमान्कर्ता कृतिविषयो मृदादिरुपादा-नमिति व्यवस्था । प्रकृते चात्मनः कृतिमत्त्वं कृतिविषयत्वं च श्रूयते "तदात्मानं स्वयमकुरुते"ति । आत्मानमिति द्वितीयया कृतिविषयत्वं, स्वयमित्यनेन कृतिमत्त्वम् तथा च ब्रह्म निमित्तमुपादानं च । कुतः । आत्मकृतेः । आत्मसम्बन्धिनी कृतिरात्मकृतिः । सम्बन्धो विषयवि-षयिभाव आधाराधेयभावश्च । ततो हेतोरित्यर्थः । नन्वा-त्मनः कर्तृत्वेन पूर्वसिद्धस्य कथं कृतिकर्मत्वमत आह "परिणामा"दिति । परिणामो विवर्तः । सिद्धस्यापि विवर्तात्मना साध्यत्वात्कर्मत्वोपपत्तिरित्यर्थः । यद्वा "परिणामा"दिति पृथक्सूत्रम् । इतश्च प्रकृतिर्ब्रह्म । कुतः । परिणामात्, "सच्चात्यच्चाभव"दित्यादिना परिणामसामा-नाधिकरण्येनात्मनः श्रवणादित्यर्थः । मृद्घट इति प्रकृति-विकारयोः सामानाधिकरण्यं दृष्टमिति भावः ॥

योनिश्च हि गीयते ॥ १ । ४ । २७ ॥

"यद्भूतयोनिं परिपश्यन्ति धीराः कर्तारमीशं पुरुषं ब्रह्मयोनि"मिति प्रकृतिवाचकयोनिशब्देनात्मा यतो गीयतेऽतश्च प्रकृतिर्ब्रह्मेत्यर्थः। तस्माद्ब्रह्मणः प्रकृतित्वं कर्तृत्वं चेति सिद्धम् ॥

Digitized by Google

एतेन सर्वे व्याख्याता व्याख्याताः ॥ १ । ४ । २८ ॥

एतावता ग्रन्थे "नेक्षतेर्नाशब्द"मित्यादिनाऽशब्दत्वादिभिर्हेतुभिः प्रधानकारणवादो निराकृतः, न पुनरणुस्वभावासत्कारणवादाः । तेषामपि कारणत्वबोधकश्रुतयो दृश्यन्ते । तथा हि छान्दोग्ये श्वेतकेतुं प्रत्युद्दालकः सूक्ष्मवस्तुनि स्थूलस्यान्तर्भावं प्रतिपिपादयिषुराह "न्यग्रोधफलमद आहरेतीदं भगव इति भिन्धीति भिन्नं भगव इति किमत्र पश्यसीत्यण्व्य इवेमा धाना भगव इत्यासामङ्गैकां भिन्धीति भिन्ना भगव इति किमत्र पश्यसीति न किञ्चन भगव इति तं होवाच यं वै सोम्यैतमणिमानं न निभालयस एतस्य वै किल सोम्यैषोऽणिम्न एवं महान्न्यग्रोधस्तिष्ठती"ति जगतः प्रागवस्थायां दृष्टान्तः श्रूयते । तत्र "नकिञ्चनाणु"शब्दयोः श्रवणाच्छून्यस्वभावाणुकारणवादा दार्ष्टान्तिकत्वेन प्रतीयन्ते । तथा, "असदेवेदमग्र आसीत्तन्नामरूपाभ्यां व्याक्रियते"त्यादावसत्स्वभाववादौ प्रतीयेते । तासां श्रुतीनां तेषु वादेषु तात्पर्यमस्ति न वेति संशये, अस्तीति प्राप्तेऽतिदिशत्येतेने"ति । एतेन प्रधानकारणवादनिराकरणे ये हेतवोऽशब्दत्वाचेतनत्वैकविज्ञानप्रतिज्ञाऽनुपपत्त्यादयस्तेषामण्वादिपक्षेऽपि साम्येन सर्वेऽण्वादिकारणवादा निराकृतत्वेन व्याख्याताः । न च "नकिञ्चना"दिशब्दविरोधः, तस्यानभिव्यक्तनामरूपपरत्वेनाविरोधात् । सूक्ष्मत्वाच्चात्मन्यणुशब्दो गौणः । स्वभाववादस्तु पूर्वं समाहितः । अभ्यासोऽध्यायपरिसमाप्तिं द्योतयति । तस्माज्जगत्कारणे सर्वज्ञे जिज्ञास्ये वेदान्तानां समन्वयो नान्यत्रेति सिद्धम् ॥

समन्वये स्पष्टलिङ्गमस्पष्टत्वेऽप्युपास्यगम् ।

ज्ञेयगं पदमात्रं च चिन्त्यं पादेष्वनुक्रमात् ॥

॥ हरिः ओं तत्सत् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्मुकुन्दगोविन्दश्रीचरणशिष्यश्रीरामकिङ्करवर्यकृतौ ब्रह्मामृतवर्षिण्यां प्रथमाध्यायस्य चतुर्थः पादः ॥

॥ प्रथमाध्यायः समाप्तः ॥

Digitized by Google

॥ श्रीगणेशायनमः ॥

अतिदेशाधिकरणे प्रधानवदशब्दत्वं परमाण्वादीनामपीत्युक्तम् । सम्प्रति प्रधानस्य वैदिकशब्दत्वाभावेऽपि स्मृतिरूपशब्दवत्त्वमाशङ्क्य परिहरति ।

स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥ २ । १ । १ ।

प्रथमेऽध्याये सर्वज्ञे सर्वशक्तौ जगज्जन्मादिकारणे सर्वेषां वेदान्तानां समन्वयः प्रतिपादितः । अशब्दत्वादिहेतुभिः प्रधानादिकारणवादाश्च निराकृताः । इदानीं द्वितीयाध्याये प्रथमपादे सांख्यादिस्मृतितर्काभ्यां स्वपक्षे विरोधः परिह्रियते । द्वितीयपादे सांख्यादिमतानां दुष्टत्वं प्रतिपाद्यते । तृतीयपाद आद्यभागेन पञ्चमहाभूतश्रुतीनां परस्परविरोधः परिह्रियते, द्वितीयभागेन जीवश्रुतीनाम् । चतुर्थपादे लिङ्गशरीरश्रुतीनां विरोधपरिहार इत्येतदर्थमयमध्याय आरभ्यते । तदुक्तम् ।

द्वितीये स्मृतितर्काभ्यामविरोधोऽन्यदुष्टता ।
भूतभोक्तृश्रुतेर्लिङ्गश्रुतेरप्यविरुद्धता ॥

इति । उक्तसमन्वयस्य स्मृत्यादिविरोधे तन्निरसनमनेन क्रियत इत्यनयोरध्याययोर्विषयविषयिभावः सम्बन्धः । निर्विषयकविरोधपरिहारायोगाद्विषयभूत समन्वयस्यादौ विचारः कृतः । विषयिभूतविरोधपरिहार इदानीं क्रियत इति युक्तमेतस्याध्यायस्य पूर्वाध्यायानन्तर्यम । श्रौतसमन्वयेऽपि विरोधपरिहारपरत्वादस्य पादस्य श्रुत्यध्यायसङ्गतिः । सर्वत्र पूर्वोत्तरपक्षयोर्विरोधाविरोधौ फलमिति विवेकः । तत्र प्रथमं स्मृतिविरोधपरिहारः । अत्र

संशयः, उक्तसमन्वयः किं सांख्यादिस्मृत्या विरुध्यते न वेति । विरुध्यत इति प्राप्तम् । कुतः । सर्वज्ञकपिलादिप्रणीतत्वेन प्रामाण्यात् । श्रुतिरपि कपिलमुनिमप्रतिहतज्ञानं दर्शयति, "ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्ये"दिति । यस्तावदग्रे सर्गादौ जायमानं कपिलनामानमृषिं स्थितिकाले च प्रसूतं भूतभविष्यद्वर्तमानविषयकज्ञानैर्बिभर्ति पुष्णाति तमीश्वरं पश्येदिति योजना । तस्मान्न ब्रह्मणि कारणे समन्वयः, महर्षिप्रणीतप्रधानकारणवादिस्मृतीनामनवकाशदोषप्रसङ्गात् । न च जगत्कारणे सिद्धे वस्तुनि विकल्पो युज्यते । तस्मात्प्रधानानुगुणतया श्रुतयो नेया इति "चेदि"त्यन्तसूत्रावयवार्थः । परिहरति "ने"ति । कुतः । अन्यस्मृत्यनवकाशदोषप्रसङ्गात् । तथा हि चेतनं प्रकृत्य "तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमे"ति स्मृतिरव्याकृतनामरूपप्रपञ्चस्य ब्रह्मजन्यत्वमाह । तथा भगवद्गीतासु "अहं सर्वस्य जगतः प्रभवः प्रलयस्तथे"ति चेतनकारणत्वं स्मर्यते । तथा च प्रधानकारणवाद एतत्स्मृतीनामनवकाशो दोषः प्रसज्येत । अतः स्मृतिद्वयविरोधे श्रुत्यविरुद्धा स्मृतिः प्रमाणमित्यप्रामाण्यसांख्यस्मृत्या न विरोधः । श्रुतिश्चैतदन्यकपिलविषया, कपिलैक्ये प्रमाणाभावादिति ॥

इतश्च सांख्यस्मृतेरनवकाशो न दोष इत्याह ।

इतरेषां चानुपलब्धेः ॥ २ । १ । २ ॥

सांख्यस्मृतिप्रसिद्धानां प्रधानादितरेषां महदहङ्कारादीनां तत्त्वानां लोके वेदे चानुपलब्धेश्च सांख्यस्मृतेरप्रामाण्यं न दोषः । तथा च तदेकदेशप्रधानस्मृतेरप्यप्रामाण्यमिति भावः ॥

एतेन योगः प्रत्युक्तः ॥ २ । १ । ३ ॥

अतिदेशत्वान्न पृथक्सङ्गत्याद्यपेक्षा । योगास्तावत्सेश्वरा इत्येतावान्कपिलमताद्विशेषः । प्रधानादिप्रक्रिया समैव । तथा च कपिलमतनिरासेनैव पातञ्जलमतं निरस्तं भवतीत्यर्थः । न चातिदेशवैयर्थ्यं, ज्ञानसाधनत्वेन श्रुतिसिद्धयोगप्रतिपादकत्वेन प्रामाण्याशङ्कायामतिदेशसार्थक्यात् । तर्ह्यप्रामाण्ये कथं तस्माद्योगप्रमेति चेदुच्यते । तात्पर्यविषयभूतार्थेऽप्रामाण्यं हि शास्त्रस्याप्रामाण्यमावहति, यथा कपिलस्मृतेः । न हि योगस्मृतेः प्रधानादौ तात्पर्यं येनाप्रामाण्यं भवेत्, किं तु योग एव । स चाबाधितः, श्रुतिसिद्धत्वात् । किञ्चिदालम्ब्य योगः प्रतिपादनीय इति परप्रसिद्धप्रधानादिकमालम्बनत्वेन गृहीतम् । तत्रापि प्रामाण्याशङ्कायामतिदेश इत्यविरोधः । एवं यदंशे सांख्यस्मृतेरविरोधस्तदंशे प्रामाण्यमित्यधिकरणद्वयस्य तात्पर्यम् । योगस्य कथं श्रौतत्वमिति चेत्सद्दयामः । श्वेताश्वतरोपनिषदि "त्रिरुन्नतं स्थाप्य समं शरीर"मित्यादिना योगप्रपञ्चः कृतः । त्रीणि कायग्रीवशिरांस्युन्नतानि यस्मिंस्तच्छरीरं समं संस्थाप्य युञ्जीतेति योजना । तथा काठकेऽपि "तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणा"मिति "विद्यामेतां योगविधिं च कृत्स्न"मितीन्द्रियाणां स्थिरामैकाग्र्यलक्षणां धारणां योगविदो योगं मन्यन्ते । यथोक्तमैकाग्र्यमेव परमं तप इति वक्तु"मिति" शब्दः । एतां ब्रह्मविद्यां योगप्रकारं च सर्वं मृत्योस्सकाशान्नचिकेता लब्ध्वा ब्रह्म प्राप्तोऽभूदित्यर्थः ॥

न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥ २।१।४ ॥

स्मृतिविरोधः परिहृतः । इदानीं न्यायविरोधः

परिच्छिद्यते । यद्यपि सापेक्षतर्केण निरपेक्षश्रुतिसमन्वयस्य न विरोधस्तथाऽपि साक्षात्कारस्य मोक्षसाधनत्वेन प्राधान्यात्तदङ्गस्य दृष्टान्तानुसारेणार्थसमर्पकत्वेनापरोक्षार्थविषयकत्वात्प्रधानसाक्षात्कारस्य विषयतोऽन्तरङ्गं तर्कः, शब्दस्तु परोक्षार्थैकबोधनस्वभावो बहिरङ्गमिति बलवत्तर्केण विरुध्यत इत्याक्षेपो युक्तः । पूर्वं वेदविरुद्धस्मृतेर्मूलाभावादप्रामाण्यमुक्तम् । तर्हि तर्कस्य व्याप्तिपक्षधर्मतयोर्मूलत्वेन लोकसिद्धत्वात्तेन विरोध इति प्रत्युदाहरणसङ्गत्याऽयमाक्षेपः । आकाशादिकं न चेतनप्रकृतिकं द्रव्यत्वाद्घटवदिति तर्केण समन्वयो विरुध्यते न वेति सन्देहे, विरुध्यत इत्याह "न विलक्षणत्वा"दिति । जगच्चेतनप्रकृतिकमिति यदुक्तं तन्न । कुतः । विलक्षणत्वादस्य जगतश्चेतनाद्विलक्षणत्वात् । चेतनं ब्रह्म शुद्धम्, जगदचेतनं परिच्छिन्नमशुद्धमिति विलक्षणम् । यद्यद्विलक्षणं न तत्तत्प्रकृतिकं, यथा तन्तुविलक्षणो घटो न तन्तुप्रकृतिक इति । ननु ब्रह्मजगतोर्वैलक्षण्यं कुत इत्यत आह "तथात्वं च शब्दा"दिति । तथात्वं वैलक्षण्यं "विज्ञानं चाविज्ञानं चे"त्यादित्यादिश्रुतितोऽवगतमित्यर्थः । तत्र श्रुताऽविज्ञानशब्देन जडमुच्यते ॥

ननु ब्रह्मवज्जगदपि चेतनं श्रूयते "ते हेमे प्राणा अहं श्रेयसे विवदमानाः," "मृदब्रवीत्," "आपोऽब्रुवन्", "ते ह वाचमूचुस्त्वं न उद्गाये"त्यादिश्रुतिभिरित्यत आह ।

अभिमानिव्यपदेशस्तु विशेषानुगति-भ्याम् ॥ २ । १ । ५ ॥

उक्तशङ्कानिरासार्थं "तु"शब्दः । उक्तश्रुतिभिर्न जगतश्चेतनत्वं प्रत्येतव्यं, यतो मृदाद्यभिमानिनीनां देवतानां

तत्र व्यपदेशो भवति, न मृदादिमात्रस्य । इदं कुतः । विशेषानुगतिभ्याम् । कौषीतकीब्राह्मण "एता ह वै देवता अहंश्रेयसे विवदमाना" इति, बृहदारण्यके प्राणसंवादे श्रुतप्राणानां देवताशब्देन विशेषितत्वान्न प्राणा इन्द्रियाणि किं तु तदधिष्ठानदेवता इति नेन्द्रियादिजगतश्चेतनत्वम् । "अग्निर्वाग्भूत्वा मुखं प्राविश" दित्यादिमन्त्रार्थवादादिषु सर्वत्र तदभिमानिदेवतानामनुगतेः श्रवणाच्च न चेतनं जगत् । "ते ह वाचमूचु" रि यत्रापि ते ह देवा वागभिमानिनीं देवतामूचुः । किमिति । त्वं न उद्गायेति । भोगमस्मभ्यं संपादयेत्यर्थो बोध्यः । तस्मादचेतनस्य जगतो वैलक्षण्यान्न चेतनप्रकृतिकत्वमिति प्राप्ते राद्धान्तसूत्रम् ॥

दृश्यते तु ॥ २ । १ । ६ ॥

पूर्वपक्षनिरासार्थं "स्तु" शब्दः । यदुक्तं चेतनविलक्षणं जगन्न तत्प्रकृतिकमिति तन्न, चेतनात्पुरुषात्तद्विलक्षणानां नखलोमादीनामचेतनानामचेतनाच्च गोमयाच्चेतनवृश्चिकस्योत्पत्तिर्यतो दृश्यतेऽत इत्यर्थः । प्रकृतिविकारयोरत्यन्तसादृश्ये प्रकृतिविकारभावानुपपत्त्या यत्किञ्चित्सादृश्यं वाच्यम । तच्च प्रकृतेऽपि जगति स्फुरणादनुवृत्त्या समानमिति भावः । किञ्च ब्रह्मण्युपनिषद्व्यतिरिक्ततर्कादेः प्रमाणस्य प्रवेशाभावान्न तेन विरोधः समन्वयस्य । तथा च श्रुतिः "नैषा तर्केण मतिरापनेया प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठे" ति "को अद्धा वेद क इह प्रवोचत्तदियं विसृष्टिर्यत आबभूवे" ति । ब्रह्मविषया मतिरेषा तर्केण नापनेया न प्रापणीयेत्यर्थः । यद्वैषा कुतर्केण नापनेया निरस्या न भवति । किं त्वन्येनैवाचार्येण वेदविदा प्रोक्ता सती सुज्ञानाय फलावसायिसाक्षात्काराय भवति हे प्रेष्ठ

Digitized by Google

प्रियतमेति नचिकेतसं प्रति मृत्योर्वचनम् । क इह ब्रह्मव्यवहारभूमावद्धा साक्षाद्वेद को वा तत्प्रवोचत्प्रावोचदित्यर्थः । छान्दसो दीर्घलोपः । यत आत्मनः सकाशादियं विविधा सृष्टिर्बभूव स एव स्वरूपं वेद नान्य इति मन्त्रप्रतीकयोरर्थः ॥

असदिति चेन्न प्रतिषेधमात्रत्वात् ॥ २ । १ । ७ ॥

ननु चेतनस्य नामादिहीनस्याचेतननामादिमज्जगद्धेतुत्व उत्पत्तेः पूर्वं जगदसदेव स्यादिति चेन्न । कुतः । प्रतिषेधमात्रत्वादसत्स्यादिति योऽयं प्रतिषेधस्तत्प्रतिषेधमात्रं न तु तस्य प्रतिषेध्यमस्तीत्यर्थः । अयं भावः । न हि कार्यसत्ता कारणाद्भिद्यते, किं तु कारणमेव । स्थितिदशायामपि जगत्सत्ता ब्रह्मैव । तथा च ब्रह्मैव जगतः सत्त्वमुत्पत्तेः पूर्वमप्यविशिष्टमिति नासज्जगदिति ॥

आक्षिपति ।

अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥ २ । १ । ८ ॥

ननु शुद्धादिगुणकं ब्रह्म जगदुपादानमित्यसमञ्जसम् । कुतः । अपीतौ तद्वत्प्रसङ्गात् । अपीतौ प्रलयसमये जाड्याशुद्ध्यादिगुणकं जगद्ब्रह्मणि लीयमानं स्वनिष्ठजाड्यादिभिर्धर्मैर्ब्रह्म दूषयेत् । यथा शाकादौ लीयमानं हिङ्ग्वादिकं स्वनिष्ठगन्धादिभिः शाकादिकं दूषयति तद्वत् । तथा च तद्वत्कार्यवत्कारणस्यापि ब्रह्मणोऽशुद्ध्यादि प्रसज्येतेत्याक्षेपसूत्रार्थः । परिहरति ।

न तु दृष्टान्तभावात् ॥ २ । १ । ९ ।

"तु" रेवार्थः । पूर्वोक्तमसमञ्जसं नास्त्येवेत्यर्थः । कुतः ।

दृष्टान्तभावात् । कार्यं कारणे लीयमानं स्वधर्मेण कारणं न दूषयतीत्यस्मिन्नर्थे शतशो दृष्टान्तानां सत्त्वादित्यर्थः । यथा घटशरावादिकं कार्यं मृदि लीयमानं मृदं स्वनिष्ठधर्मैर्न दूषयति, यथा वा स्वप्नप्रपञ्चो न स्वप्नधर्मैः कारणमात्मानं दूषयति, तथा मायिकं जगदुत्पत्तिस्थितिलयाख्यावस्थात्रयसाक्षिणं परमात्मानं न जगत्स्वनिष्ठजाड्यादिभिर्धर्मैर्दूषयेत् । परमात्मनोऽवस्थात्रयासंबन्धे वृद्धसम्मतिरपि ।

"अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥"

इति । माययाऽऽवृतस्वरूपो जीवो यदाऽऽचार्यप्रतिपादनावस्थायां स्वरूपज्ञानभाग्भवति तदाऽद्वैतं बुध्यत इति योजना । "अज"मित्युत्पत्त्यवस्थायाः सम्बन्धाभाव उक्तः, "अनिद्र"मिति लयावस्थायाः, "अस्वप्न"मिति स्थित्यवस्थाया इति भेदः । किं च कार्यस्य कारणात्मकत्वेऽपि न कारणं कार्यात्मकमिति न कार्यधर्मदूषणं कारणस्येति समञ्जसं वेदान्तशास्त्रमिति ॥

स्वपक्षदोषाच्च ॥ २ । १ । १० ॥

ये दोषा विलक्षणत्वात्प्रकृतिविकारभावानुपपत्तिरुक्ताः प्रागजगतोऽसत्त्वप्रसङ्गोऽपीतौ तद्वत्प्रसङ्ग इति सांख्येनोद्भाविताास्ते सांख्यपक्षेऽपि समानाः, शब्दादिहीनप्रधानसकाशाच्छब्दादिमतो विलक्षणस्य जगत उत्पत्त्यङ्गीकारादित्यर्थः । वस्तुतः प्रपञ्चसत्यत्ववादिनः सांख्यस्यैवैते दोषा न ममानिर्वचनीयवादिन इति भावः ॥

तर्काप्रतिष्ठानादप्यन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः ॥ २ । १ । ११ ॥

Digitized by Google

केवलस्य तर्कस्याप्रतिष्ठानादप्यप्रतिष्ठितत्वाच्च न तेन समन्वयविरोधाशङ्केत्यर्थः । एकेन तार्किकेण यत्नेनानुमितोऽप्यर्थोऽन्येन श्रेष्ठतरेणान्यथा नीयते । एवमन्येन श्रेष्ठतमेनान्यथानयनमिति तर्कस्याप्रतिष्ठानं बोध्यम् । ननु तर्कमात्रस्याप्रतिष्ठितत्वे धूमज्ञानानन्तरं वह्न्यर्थिप्रवृत्त्यनुपपत्तिः, वाक्यार्थसन्देहे तर्केणानिर्णयप्रसङ्गश्च । किञ्च "तर्काप्रतिष्ठाना"दित्ययमपि तर्कोऽप्रतिष्ठित एवेति न तेन परमतनिराकरणं स्यात् । तस्मात्कस्य चित्तर्कस्याप्रतिष्ठितत्वेऽपि कस्यचित्प्रतिष्ठितत्वसम्भवात्तेन समन्वयविरोधाशङ्का युक्तेत्याक्षिप "त्यन्यथाऽनुमेयमिति चे"दित्यन्तेन । अप्रतिष्ठिततर्कादन्येन प्रकारेण प्रतिष्ठिततर्केण समन्वयविरोधादिकमनुमेयमिति शङ्कार्थः । तर्कस्य कचित्प्रतिष्ठितत्वमङ्गीकृत्य समाधत्त "एवमपी"ति । अन्यत्र तर्कस्य प्रतिष्ठितत्वेऽपि प्रकृते लिङ्गादिहीने ब्रह्मणि वेदनिरपेक्षस्य तर्कस्याप्रतिष्ठितत्वदोषादनिर्मोक्षप्रसङ्ग एवेति समाधानार्थः । यद्वा महतां कपिलकणादादीनां परस्परविप्रतिपन्नैरागमनिरपेक्षैस्तर्कैस्तत्त्वनिर्णयाभावादनिर्मोक्षप्रसङ्ग इत्यर्थः । तस्मादागमविरोधी तर्कोऽप्रमाणमिति न तेन विरोध इति सिद्धम् ॥

एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥२।१।१२॥

अतिदेशत्वान्न पृथक्सङ्गत्याद्यपेक्षा । ब्रह्म न जगदुपादानं विभुत्वाद्व्योमवदित्यनेन वैशेषिकाद्यनुमानेन ब्रह्मकारणबोधकः समन्वयो विरुध्यते न वेति सन्देहे, विरुध्यत इति प्राप्तम् । कुतः । अनुमानेन बाधितत्वात् । तस्मादणवादय एवोपादानमिति प्राप्तेऽतिदिशति । एतेन मन्वादिभिः शिष्टैः केन चित्सत्कार्यवादाद्यंशेन परिगृहीतप्रधानकार-

पसंहारः । तथा हि । यदि तावत्पुत्रादीप्सितं तत्रोपेय-
नित्यता विहन्येत । तदिच्छाया अनित्यत्वात् । तत्र याव-
ज्जीवमित्यनर्थकम् । नाप्यधिकारिविशेषणतयार्थवत् ।
अर्थसिद्धेः ।

अथ, मतं सर्वेषां सर्वदा सर्वमीहितं फलं भविष्यत्यु-
पात्तदुरितनिर्हरणम् । भवेदेवं नित्यता, फलवशेन न
शब्दात् । तथा हि । फलस्य नित्यसमीहितत्वात्तद्वशेना-
ऽवश्यकर्त्तव्यता वास्तवी । शब्दस्तु नित्यसमीहितोपाय-
प्रतीतिमात्रोपलक्षणः । तत्राऽसति शब्दव्यापारे ततो निर्हे-

ताया इति, स च सुगम एव । यदि च समीहितसाधनता ततो
यथाशक्ति चाङ्गोपसंहारः कथमिति चेत्यनुकृष्यते । तदभावे न
नित्यतेत्यर्थः । ननु समीहितसाधनत्वनित्यत्वयोः को विरोध ?
इत्यत आह—तथा हि । यदि तावत्पुत्रादीप्सितं तत्रोपेयनित्यता
विहन्येत । कुतः ? तदिच्छाया अनित्यत्वात् । भवतु अनित्यत्वं
को दोष ? इत्यत आह—तत्राऽनित्यत्वे सति यावज्जीवमित्यन-
र्थकम् । नाप्यधिकारिविशेषणतया ऽर्थवत् । अर्थसिद्धेर्यावत्पदस्यान-
र्थक्यं स्थितमेव । यावज्जीवनमात्रस्याप्यधिकृतविशेषणत्वं न संभ-
वति, व्यवच्छेद्याऽभावात् । न ह्यजीवतो ऽधिकारप्रसक्तिस्तेनार्थ-
सिद्धेरनर्थकत्वमित्यर्थः ।

अथ मतं, सर्वेषां सर्वदा सर्वमीहितं फलं भविष्यति उपात्त-
दुरितनिबर्हणं, ततश्च नित्यसमीहितसाधनत्वान्नित्यत्वमुपपत्स्यत
इति । निराचष्टे—भवेदेवं नित्यता । किं तु फलवशेन, न तु शब्दात् ।
स्फुटयति—तथा हि । फलस्य नित्यसमीहितत्वात्तद्वशेनाऽवश्यकर्त-
व्यता[1] वास्तवी । शब्दस्तु समीहितो[2]पायप्रतीतिमात्रोपलक्षणः । ननु
नित्यतया नः प्रयोजनं, सा च फलतो ऽपि लब्धेति कृतं शब्दने-

१ कर्तव्यफल इति २ पु॰ पा॰। २ समीहितोपायो विधर्वाक्यर्थिति मू॰ पु॰ पा॰।

त्यर्थकृच्छ्रादिवत्सर्वाङ्गोपसंहाराप्रसङ्गो, ऽन्यथा फलाऽभावात् । शाब्दे हि नित्यत्वे परिपूर्णाङ्गं सर्वदा चेत्यसंभवाद्यथा शक्नुयादित्युपपद्यते[1] । इतरथा ऽङ्गाम्नानस्याऽविकल्प्यत्वाद्यो यदेति विश्वजिदादिवत्स्यात् । न हि सर्वेषां समीहितोपायो विश्वजिति पङ्ग्वादयो ऽधिकारिणः । नानुषङ्गिकमीप्सितं, प्रमाणाऽभावात् । अर्थापत्तेरक्रियायां प्रत्यवायेनापि चयात् । स्मृतिवाक्यशेषं त्यत आह—सत्याऽपति शब्दव्यापारे नित्यतायामेनेति हेतुस्त्रैकृच्छ्रादिवत्सर्वाङ्गोपसंहारप्रसङ्गः । कुतः ? अन्यथा ऽनुपसंहारे सर्वेषामङ्गानां प्रायश्चित्तवदेव फलाऽभावात् । न चैष शाब्देऽपि नित्यत्वे प्रसङ्ग इत्याह—शाब्दे हि नित्यत्वे परिपूर्णाङ्गं सर्वदा चेत्यसंभवात् शाब्देनैवाऽवश्यकर्तव्यताऽभिधायिना सर्वाङ्गोपसंहृतावसत्यामनुपपद्यमानेन यथा शक्नुयादित्युपपद्यते । अथ वास्तवेनापि नित्यत्वेन किमिति नोपपद्यते ? इत्याह—इतरथा तु वास्तवे नित्यत्वे नित्यवदङ्गाऽम्नानस्याऽविकल्प्यत्वाद्यो यदेति विश्वजिदादिवदुपलभ्येत ।

दृष्टान्तं विवृणोति—न हि सर्वेषां समीहितोपाये विश्वजिति पङ्ग्वादयो ऽधिकारिणः । पङ्ग्वादय इत्यसमाधेयाङ्गवैकल्यं सूचयति । इदमत्राकूतम् । शाब्दमङ्गाम्नानं शाब्देनैव नित्यत्वेन शक्यं व्यवस्थापयितुं, न वास्तवेन, तस्य प्रमेयत्वादङ्गाम्नानस्य च प्रमाणत्वात्प्रमाणतन्त्रत्वात्प्रमेयव्यवस्थितेः । ननु 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेते'ति यावज्जीवोपबन्धान्नित्यकर्तव्यताप्रतिपादनपरं शास्त्रं, ततश्च नित्यकर्तव्यता शाब्दी भविष्यतीति तत्पराच्च शास्त्रादानुषङ्गिकं सर्वदा सर्वजनसमीहितं दुरितक्षयलक्षणं भवतोच्यत इत्यत आह—नानुषङ्गिकमीप्सितं, प्रमाणाऽभावात् । न खलूपात्तदुरितनिबर्हणकाम इति यावज्जीववाक्यशेषमधीयते । नाप्यर्थापत्तिः । कुतः ? अर्थापत्तेरक्रियायां प्रत्यवायेनापि क्षयात् ।

१ उपलभ्यते. मू. पु. पा. ।

520

षाभ्यां च तत्कल्पनाया एव युक्तत्वात् । स्मृतितश्च पुनस्तदर्थावगमात् । प्रतिषिद्धस्य च नियोगतोऽकर्त्तव्यस्य क्रियायामिव नियोगतः कर्त्तव्यस्याऽक्रियायां प्रत्यवायो युक्तः । तथा नियोगोपपत्तेः । प्रत्यवायभयात् ईप्सि-

नन्वेवमुभयथाऽप्युपपत्तेः कस्य कल्पनौचित्य?मित्यत आह—स्मृतिवाक्यशेषाभ्यां च तत्कल्पनाया एवाऽकरणे प्रत्यवायकल्पनाया एव युक्तत्वात् । तत्र स्मृतिः 'अकुर्वन्विहितं कर्मे'त्यादिका । वाक्यशेषोऽपि 'यो ह वै दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वाऽतिपादयेत्स स्वर्गाल्लोकाच्च्यवते' इति । तथा हि । यावज्जीवोपबन्धयोर्दर्शपूर्णमासयोः किमुपात्तदुरितक्षयः कल्पनामुताऽकरणे प्रत्यवायप्राप्ति?रिति संदेहे 'यो ह वै' इति वाक्यशेषात्स्मृतेश्चाऽकरणे प्रत्यवाय इति निर्णयः । अपि च लौकिक्या अपि स्मृतेस्तदर्थोऽवगमात् । तथा हि । यदवश्यकर्त्तव्यमिति लोके विधीयते यच्च निषिध्यते यथा ग्रामान्तराऽऽनीतानां राजाश्वादीनां नीराजनादि, भुजगाङ्गुलिदानादि वा तदकरणे । तत्करणे च प्रत्यवायो भवतीति प्रतिपद्यन्ते लौकिकाः । तदेवमनादिलौकिकस्मृतिदृढिमलब्धव्युत्पत्तिरित्यवश्यकर्त्तव्यताऽकरणे प्रत्यवायकल्पनाबीजं न पुनरुपात्तदुरितनिर्हरणकल्पनाया इत्याह—स्मृतेश्च पुनस्तदर्थाऽवगमात्प्रतिषिद्धस्य नियोगतोऽकर्त्तव्यस्य क्रियायामिव नियोगतः कर्त्तव्यस्याऽक्रियायां प्रत्यवायो युक्तः । न चात्र न संशयो येन वाक्यशेषादिभ्यो निर्णय इत्याह—तथा नियोगोपपत्तेस्तदकरणे प्रत्यवायकल्पनायामेव नियोगस्याऽवश्यंभावस्य कर्त्तव्यताया उपपत्तेः । कुतः? अकरणे प्रत्यवायभयादीप्सितोपायत्वेनाऽवश्यंभावः प्रवृत्तेरित्याह—ईप्सितोपायेष्विच्छया प्रवृत्तेरिच्छायाश्चाऽनवश्यंभावादिति

तोपायेष्विच्छया प्रवृत्तेः । तथा च यादृशी प्रवृत्तिर्न तादृश्यभ्युदयाय । नित्येप्सितोपायनित्यत्वफलवत्त्वयथाशक्त्यनुष्ठेयत्वानां चासङ्गतेरकरणे प्रत्यवायकल्पना । तस्मान्नित्येप्सितोपायानि न नित्यानि । प्रवृत्तिश्च तेष्वकरणे प्रत्यवायकल्पनात् । दुःखात्मकत्वाच्च कर्म्मणः आनुषङ्गिकात्कार्य्यविरोधिनः पाप्मनः क्षयादिति । भावनायाश्च भावः । ननु नेप्सितोपायतामात्रमपि तु नित्येप्सितोपायत्वं, ततो ह्यवाऽवश्यंभावनियमः प्रवृत्तेस्तद्धेतोः इत्यत आह–तथा च यादृश प्रवृत्तिर्न तादृश्यभ्युदयाय । तथा हि । नितान्तसमीहितेष्वपि कदाचिदालस्यादुदासते तदर्थिनस्तदुपायेषु, न त्वक्रियमाणे प्रत्यवाय हेताविति सर्वजनीनमेतदित्यर्थः । परपक्षे विरोधमादर्शयति–नित्येप्सितोपायनित्यत्वफलवत्त्वयथाशक्त्यनुष्ठेयत्वानां च का सङ्गतिः ? विरुद्धं खल्वेतन्नित्येप्सितोपायनित्यत्वं फलवत्त्वं यथाशक्त्यनुष्ठेयत्वं चेति । तथा हि । सदातनाङ्गसाकल्यवता हि साधननित्यता, सा यथाशक्त्यनुष्ठेयत्वेन कतिपयाङ्गवैकल्येन विरुध्यते । तथा तदेव फलवत्त्वेन नित्येप्सितोपायनित्यत्वं विरुध्यते । तथा हि । ईप्सितप्राप्ताविच्छा निवर्त्तते । न निवर्त्तते चेत् न नूनं तदीप्सितम् । इच्छानिवृत्तौ च न नित्यमीप्सितं, सोयं फलवत्त्वेप्सितत्वयोर्विरोधाद्विरोधः । तस्माच्छब्दावगतनित्यत्वनिर्वाहायाऽकरणे च प्रत्यवायकल्पनैव ज्यायसी । उपसंहरति–तस्मान्नित्येप्सितोपायतया न नित्यानि कर्माणि । प्रवृत्तिस्तु तेष्वकरणे प्रत्यवायात् । ननु नित्येषु केषु चिदुपात्तदुरितक्षयोऽपि फलं श्रूयत इत्यत आह–दुःखात्मकत्वाच्च कर्मणस्तदानुषङ्गिकात् कार्यविरोधिनः पाप्मनः क्षयात्प्रवृत्तिर्न तच्छाब्दं फलं कर्मण्येव स्वभावतो दुःखात्मनि विधीयमाने दुःखविरोधित्वात्पाप्मनस्तत्क्षयस्य हविर्विकारादिवदानुषङ्गिकत्वादित्यर्थः ।

यदि नित्यानां कर्मणां नाऽभिमतसाधनत्वं किं तु तान्येव कर्त्तव्यतया चोद्यन्ते तदा तेषां करणवाचिनी तृतीया दर्शपूर्णमा-

साध्यत्वात् अग्निहोत्रमितिवन्निर्देशार्थत्वाद्विपरिणत्यापि संभवात्तृतीयानिर्देशाऽविरोधः । वार्त्तमेतत् । तथा हि ।

नित्यं नित्येहितोपाये यावज्जीवमिति श्रुतेः[१] ।
अङ्गान्यतो यथाशक्ति न वा सर्वाणि चाऽन्यथा ॥

न तावदिष्टसाधनत्वे ऽपि नित्यत्वविहतिः । नित्येष्टस्यैव साध्यत्वकल्पनात् दुरितनिर्हरणस्य । सुखे तद्धेतौ वा कदा चिन्माध्यस्थ्यमेवेति दुःखतद्धेतुभ्यां तु सर्वदोद्विजमानस्य तन्निवृत्तौ सर्वदाकामः, हितमपि च प्रेप्सतसाध्या मित्यनुपपन्नेत्याशङ्क्याह—भावनायाश्च साध्यत्वात् । अयमर्थः । यद्यपि यजेरिष्टं प्रति साधनता । यद्यपि च प्रत्यवायप्रागभावो न साध्यस्तथापि भावनैव साध्या भविष्यति । यद्यपि भावनाव्याप्यतया तां प्रति कर्मत्वान्न करणत्वं यजेस्तथापि फलपदे यथा भावनाव्याप्यस्य साधनावच्छेदकतया करणभावस्तथेहापि भविष्यतीति ।

परिहारान्तरमाह—अग्निहोत्रमितिवन्निर्देशार्थत्वाद्विपरिणत्यापि संभवात्तृतीयानिर्देशाऽविरोधः । अयमर्थः । यथा ‘ऽग्निहोत्रं जुहुयात्स्वर्गकाम’ इत्यग्निहोत्रमिति तृतीयार्थे द्वितीया तथा दर्शपूर्णमासाभ्यामिति तृतीया द्वितीयार्थे भविष्यति । निर्देशार्थत्वादिति । निर्दिश्यत इति निर्देशः कर्मरूपार्थस्तदर्थत्वाद्विपरिणामस्तृतीयाया इत्यर्थः । परिहरति—वार्त्तमेतत् । तथा हि ।

नित्यं नित्येहितोपाये यावज्जीवमिति श्रुतेः ।
अङ्गान्यतो यथाशक्ति न वा सर्वाणि चाऽन्यथा ॥

न तावदिष्टसाधनत्वे नित्यत्वविहतिः, नित्येष्टस्यैव साध्यत्वकल्पनाद् दुरितनिर्हरणस्य विश्वजिदादिभ्यो वैलक्षण्यम् । प्रवृत्तेरवश्यंभावायाह—सुखे तद्धेतौ वा कदा चिन्माध्यस्थ्यमित्यालस्यादिभ्यो दुःखतद्धेतुभ्यां तु सर्वदोद्विजमानस्य तन्निवृत्तौ सर्वदा कामः ।

---

१ श्रुतिः—द्रु॰ पु॰ पा॰ ।

Digitized by Google

स्तस्य प्रतिबन्धक्षये समीहा ऽस्त्येव । तस्मादिष्टनिबन्धनः पाप्मनः क्षयः सदा समीहितः । नित्यानां कर्म्मणां फलनित्यत्वादेव यावज्जीवमिति शब्दावगतादिति न नित्यत्वविरोधः । अनित्ये हि साध्ये सा विहन्येत । यथाशक्त्युपसंहारश्च नित्यत्वादेवाऽहीनाङ्गस्य नित्यं क्रियासंभवात् । न चेदं वास्तवं नित्यत्वं, न हि फलवादिनो यावज्जीवशब्दमामनन्ति[1] फलविशेषशब्दं वा ऽधीयते, किं तु यावज्जीवश्रुतेरवगतनित्यत्वास्तत एवाऽर्थापत्त्या फलभेदप्रयोगभेदौ कदा चिदुन्नयन्ति । अनित्ये साध्ये परिपूर्णाङ्गे

ननु हितकामनासमये नाऽभावस्तीति कथं सर्वदे? त्यत आह—हितमपि च प्रेप्सतस्तस्येष्टस्य प्रतिबन्धक्षये प्रतिबध्यते ऽनेनेति दुरितं प्रतिबन्धस्तस्य क्षये समीहा ऽस्त्येव । तस्मान्नित्येष्विष्टोपायत्वफलवत्त्वयोरविरोध इत्याह—तस्मादिष्टनिबन्धनः पाप्मनः क्षयः सर्वदा समीहितः । नित्यानां कर्मणां फलनित्यत्वादेव यावज्जीवमिति शब्दाऽवगतादिति न नित्यताविरोधः । यदनुपपत्त्या यत्कल्प्यते न तेन तदेव बाध्यत इत्यर्थः । न च तस्य स्वभाव एव कर्मणो नित्यताविरोधीति व्यतिरेकमुखेन दर्शयति—अनित्ये साध्ये सा विहन्येत । इदं नित्यं समीहितम् । यथाशक्त्यनुष्ठेयत्वस्याऽविरोधमाह—यथाशक्त्युपसंहारश्च नित्यत्वादेव । कुतः ? अहीनाङ्गस्य नित्यं क्रियासंभवो यतः । न चेदं वास्तवं नित्यत्वं येन प्रमेयं सदङ्गविधिं न व्यवस्थापयेत्, अपि तु शाब्दमेव । कुतः ? न हि फलवादिनो यावज्जीवशब्दं नामनन्ति, फलविशेषशब्दमेव वा ऽधीयते । यतः शब्दावगतान्नित्यत्वान्नैवंविधं फलं कल्पयेरन् । किं तु यावज्जीवश्रुतेरवगतनित्यत्वात्तत एवार्थापत्त्या फलभेदप्रयोगभेदावुन्नयन्ति । अर्थापत्तिं दर्शयति—अनित्ये साध्ये परिपूर्णाङ्गे च

१ स्वर्गादि॰ मू पु॰ ।

च प्रयोगे यावज्जीवशब्दाधिगतनित्यकर्त्तव्यताऽनुपपत्तिः । न हि कदा चिदीप्सितोपायात्मिकायां कर्त्तव्यतायां परिपूर्णाङ्गसाधनात्मिकायां च यावज्जीवशब्दोऽन्वेति । नित्यत्वाच्च कल्पितः फलभेदो न तदेव बाधते । कथं तर्हि नित्येप्सितोपायत्वान्नित्यत्वमुक्तं ? शब्दाऽवगतस्यैव तस्याऽविघातः शब्दसामर्थ्यलभ्येनैव तेनोक्तो यथाशक्ति प्रयोगेण तन्त्रेण च । तत एवाऽनयोर्मानान्तरं मृग्यम् । कथं

प्रयोगे यावज्जीवशब्दावगतनित्यकर्त्तव्यताऽनुपपत्तिः न हि कदा चिदीप्सितोपायात्मिकायां कर्त्तव्यतायां परिपूर्णाङ्गसाधनात्मको यावज्जीवशब्दोऽन्वेति । नित्यत्वाच्च कल्पितः फलभेदो न तदेव बाधते अपि तु तदधीनाऽऽत्मलाभत्वात्तदनुगुणात्मलाभत्वात्तदनुगुणात्मतया व्यवतिष्ठते । यदि शब्दावगम्यमेव नित्यत्वं कथं तर्हि नित्येप्सितोपायत्वान्नित्यत्वमुक्तम् ? परिहरति—शब्दाऽवगतस्यैव यावज्जीवमिति शब्दावगतस्यैव कर्मनित्यत्वस्याऽविघातः शब्दसामर्थ्यलभ्येनैव तेन नित्यसमीहितोपायत्वेनोक्तो यथाशक्ति प्रयोगेण तन्त्रेण च ।

प्रसङ्गात् किं चिदाह—तत एव यतो यावज्जीवश्रुतिविशिष्टया लिङा नित्येप्सितमिह फलं कल्पितं तत उभयोरपि काम्यनित्ययोः कर्मणोः कामनाकृतप्रवृत्तित्वेनाऽगृह्यमाणविशेषतया साधारणतया तन्त्रमनुष्ठानमस्मदभिमतं सिध्यति ।

मीमांसकैकदेशिनस्तु काम्ये क्रियमाणे प्रवृत्तौ नियोगात् कामनाया बलीयस्त्वान्नित्यस्यैकदेशकालकर्तृकतया प्रासङ्गिकीं सिद्धिं मन्यन्ते । तदिदमसाम्प्रतम् । यदि हि नैसर्गिकी कामनिबन्धना प्रवृत्तिर्नियोगनिबन्धनायाः प्रवृत्तेर्बलीयसी स्यात् ततो भवन्मतेन प्रत्यक्षधनव्ययपराङ्मुखा नित्यनैमित्तिकेषु प्रवर्तयन्त्यपि नियोगे

चेदं नित्यत्वं कर्म्मणो यदि नित्यसमीहितसाधनत्व? मिति नित्याऽनुष्ठानादेतदकरणे प्रत्यवायान्नित्यक्रिया शब्दादेव। नैतत्। शब्दादेव चेदस्य कर्त्तव्यता किमर्थमकरणे प्रत्यवायकल्पना? शब्दादेव प्रवृत्तिसिद्धेः। न च शब्दः कारक-

न प्रवर्त्तेरन्। तथा निषिद्धेभ्यो हिंसादिभ्यो न निवर्त्तेरन्निति नित्यनैमित्तिकनिषेधगोचराः खलु विधयो दत्तजलाञ्जलयः प्रसज्येरन्। स्यादेतत्। केवला कामना विधेर्दुर्बला, विध्यनुगृहीता तु बलीयसी नाऽनुग्रहार्थो भवेत्। न हि नित्यनैमित्तिकेषु विधिना प्रवृत्तो कर्त्तव्यतायां कामनायाः कश्चिदुपयोगः। नापि दृष्टार्थेषु काम्येषु तदा विधेरुपयोगः। तस्मान्न काम्ये ऽनुष्ठीयमाने प्रासङ्गिकत्वं नित्यस्य। तस्मादस्मन्मतावलम्बनेन तन्त्रतैव रमणीयेति।

क्वचित् पाठः न तु तत एवेति। अस्यार्थः न तु नित्यसमीहितोपायत्वाद्यथाशक्तिप्रयोगाच्च नित्यत्वकल्पना, किं तु श्रुतादेव नित्यत्वादेतदुभयमिति। अन्यथेति यथार्थो स्यादिति। तयोश्च नित्यसमीहितोपायत्वं यथाशक्त्यनुष्ठानयोर्मानान्तरं मृग्यम्। यदि पुनर्यावज्जीवश्रुतिप्रतिपन्ननित्यत्वोपपादनार्थे नित्यसमीहितफलकल्पनायामपि वास्तवी नित्यता न शाब्दीति मन्येत तत्राह—कथं चेदं वास्तवं नित्यत्वं कर्मणो यदि नित्यसमीहितसाधनत्वमिति। नित्याऽनुष्ठानात्परस्याप्येतत्तुल्यमित्याह—अकरणे प्रत्यवायादितरस्याप्यनुष्ठानमिति तुल्यम्। शब्दपूर्वकत्वेन तत्कल्पनायामङ्गीक्रियमाणायां नाऽशब्दनित्यत्वमुभयोः परस्याऽऽत्मनश्च। पर आह—नाऽकरणे प्रत्यवायादस्मन्मते नित्यक्रिया किं तु शब्दादेव। परिहरति—नैतत्। शब्दादेव चेदवश्यकर्त्तव्यता किमर्थमकरणे प्रत्यवायकल्पना? शब्दादेव प्रवृत्तिसिद्धेः। ननु शब्द एव स्वरूपेण प्रवर्त्तयिष्यति मा च भूदकरणे प्रत्यवाय इत्याशङ्क्याह—न

त्वेन प्रवृत्तिहेतुरित्युक्तम् । ज्ञापकत्वे चाकरणे प्रत्यवायज्ञापनान्नित्यमनुष्ठापयतीति वास्तवमेव स्यात् । तस्मादव्यवस्थितविधितत्त्वानामीदृशा नानाविधाः समुल्लासाः । कृच्छ्रविश्वजितोस्तु सदा सर्वस्य समीहितसाधनयोरपि सर्वस्य सर्वदेति शब्दस्याऽभावात्सर्वाङ्गप्रयोगः । ननु फलवत्त्वे शक्त्यनुसार एव न संभवति, वैगुण्यात्फलाभावप्रसङ्गात् । किमिदं वैगुण्यं ? चोदनार्थत्वहानिः, न तर्हि वैगुण्यं, यावज्जीविके यथाशक्त्यङ्गोपेते ऽपि चोदनार्थत्वात् । अचोदनार्थत्वे वा शक्तेरफलत्वे ऽपि सर्वाङ्गोपसंहारो,

च शब्दः कारकत्वेन प्रवृत्तिहेतुरित्युक्तम् । ज्ञापकत्वे चाऽकरणे प्रत्यवायज्ञापनान्नित्यमनुष्ठापयतीति वास्तवमेव नित्यत्वं स्यात् । उपसंहरति—तस्मादव्यवस्थितविधितत्त्वानामीदृशा नानाविधाः समुल्लासाः ।

यत्तु विश्वजिदादिवदित्युक्तं, तत्र वैधर्म्यमाह—कृच्छ्रविश्वजितोस्तु सदा सर्वस्य समीहितसाधनयोरपि सर्वस्य सर्वदेति शब्दस्याऽभावात्सर्वाङ्गप्रयोगः । चोदयति—ननु फलवत्त्वे शक्त्यनुसार एव न संभवति, वैगुण्याद्धेतोः फलाऽभावप्रसङ्गात् । साधनाद्धि फलेनोत्पत्तव्यम्, । अङ्गसाकल्यवच्च साधनं नाङ्गवैकल्ये सति तत्त्वे व्यवस्थातुमर्हतीत्यर्थः । परिहरति—किमिदं वैगुण्यम् । ? यद्युच्येत चोदनार्थत्वस्य हानिस्तत्राह—न तर्हि वैगुण्यम् । कुतः ? यावज्जीविके यथाशक्त्यङ्गोपेते ऽपि चोदनार्थत्वात् । यावज्जीवशब्दस्यैव महिमा यत्कतिपयाऽङ्गविकलमपि साधनं फलाय कल्पते इत्यर्थः । न चेदेवं परमते ऽपि तुल्यः प्रसङ्ग इत्याह—अचोदनार्थत्वे वा शक्तेरफलत्वे ऽपि सर्वाङ्गोपसंहारः । कुतः ? यावज्जीवशब्दाऽनादरे यो यद्देत्युपबन्धात्साङ्गस्याऽफलस्यापि चोदनार्थत्वा-

ऽन्यथा चोदनार्थनिर्वृत्त्यभावाच्चेति । तदा क्रियाव्यतिरिक्तसाध्याभावान्नाङ्गापेक्षा । अनङ्गत्वमेव प्राप्तं, कर्मणो विज्ञातोपायत्वात् । क्रिया ऽपि विधेयरूपेण ज्ञातस्वभावा चोदनार्थनिर्वृत्तये अपेक्षते ऽङ्गानीति चेत्, सर्वाङ्गोपसंहारप्रसङ्गः । अथाऽऽख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणीति यावज्जीवश्रुतेः शक्तिश्चोदनार्थः । फलवादिनो न सा दण्डवारिता । किं चेदं रूपं[1] चोदनायाः । यदि दर्शपूर्णमासस्तत्किञ्चिदङ्गवैकल्ये चोदनार्थनिर्वृत्त्यभावात् । यद्युच्येत तदा क्रियाव्यतिरिक्तसाध्याऽभावान्नाङ्गापेक्षा साध्याऽभावसूचनपरश्च यावज्जीवशब्द इति । दूषयति—अनङ्गत्वमेव तर्हि युक्तं कर्मणः । कुतः ? विज्ञातोपायत्वात् । शङ्कते—क्रियापि विधेयरूपेणाऽज्ञातस्वभावा चोदनार्थनिर्वृत्तये ऽपेक्षते ऽङ्गानीति चेत् । यद्यपि क्रियास्वरूपं लौकिकं लौकिकोपायसाध्यं च, तथापि चोदनागम्येन रूपेणालौकिकत्वात् साङ्गस्य चोदनार्थत्वादङ्गानामप्यनुष्ठानं युक्तमित्यर्थः । निराचष्टे—सर्वाङ्गोपसंहारप्रसङ्गः । आशङ्क्य साम्यमाह—अथाऽऽख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणीति यावज्जीवश्रुतेः शक्तिश्चोदनायाः । फलवादिनोपि सा न दण्डेन वारिता । अपि च किं चेदं रूपं चोदनार्थः, कर्मस्वरूपं हि देवतोद्देशेन पुरोडाशत्यागात्मकं, तच्च मानान्तरात्समधिगम्यमिति न चोदनार्थस्तत्र प्रमाणमिति भावः ।

ननु भवतु कर्मस्वरूपं मानान्तरवेद्यं यत्पुनरेतस्याष्टसु कपालेषु संस्कृतपुरोडाशद्रव्यत्वमग्निदेवतात्वं च तद् 'आग्नेयोऽष्टाकपाल' इत्येतस्मादुत्पत्तिवाक्यादन्यतो ऽशक्यावगममिति । न चोत्पत्तिवाक्याऽवगतविविधविशेषणे कर्मणि न्यूनातिरेककरणाय प्रमाणान्तरं प्रभवति, तत्करणे तत्स्वरूपग्रहणप्रसङ्गादन्यतस्तदविज्ञानादित्याशयवानाशङ्कते—यदि दर्शपूर्णमासवंशकम् । निराकरोति—तदुत्प-

१ किं चेदं रूपम् मू॰ पु॰ पा॰ ।

संज्ञकं तदुत्पत्तिवाक्याऽवगतमित्यनौत्पत्तिकानामभावः । अथान्यत्र तच्छ्रेयःसाधनत्वात् । यथोक्तम् । 'श्रेयःसाधनता ह्येषां नित्यं वेदात्प्रतीयते' इति । 'तस्याऽयमभ्युपाय इति हि तेषामुपदेश' इति च । नाऽप्यकरणे प्रत्यवायहेतुता, असतो हेतुत्वाऽनुपपत्तेः ।

त्तिवाक्याऽवगतमित्यनौत्पत्तिकानामभावः प्रसज्येत । यन्मात्रमेव हि द्रव्यदेवतादिकमङ्गमुत्पत्तिवाक्याऽवगतं तावतो ऽप्यङ्गहानत्वात्तद्धाने कर्मस्वरूपहानप्रसङ्गात् । मा भूदपरित्यागः, अन्यानि यानि पुनरङ्गान्युत्पत्तिकर्मसंबन्धीनि सन्निपत्योपकारकाण्यवघातादीन्यारादुपकारकाणि च प्रयाजादीन्यनौत्पत्तिकान्याग्नेयाद्युत्पत्त्यसंबन्धीनि तेषामभावप्रसङ्गः । न खलु तेषां प्रहाणे कर्मस्वरूपं निरपेक्षोत्पत्तिवाक्यावगतं विद्यते । अथाऽन्यत्र तच्छ्रेयःसाधनत्वात् । यथोक्तं 'श्रेयःसाधनता ह्येषां नित्यं वेदात्प्रतीयते' 'तस्यायमभ्युपाय इति हि तेषामुपदेश' इति च ।

यत्पुनरुक्तं यावज्जीवोपधानाल्लिङ्गाऽवश्यकर्तव्यता कर्मणोऽवगम्यते । लोकश्च तदवश्यकर्तव्यमवगच्छति यदकरणे प्रत्यवायो भवति, भयाद्धि यादृशी प्रवृत्तिर्न तादृशी लोभात्, तदकरणनिमित्तप्रत्यवायमेव कल्पयिष्यामो न पुनरुपात्तदुरितक्षयलक्षणं फलम् । तथा सत्यकुर्वन्विहितं कर्मेत्यादिभूयांसि वचांसि धर्मशास्त्रकाराणां वाक्यशेषश्च 'यो ह वै'त्युपपत्स्यते इत्यत आह—नाप्यकरणे प्रत्यवायहेतुता । असतो हेतुत्वाऽनुपपत्तेः । अयमर्थः । सत्यं करणेनाऽकरणं निवर्तते । किमिति पुनस्तन्निवर्तनीयम् । प्रत्यवायहेतुत्वादिति चेत् । तदसत् । कुतः ? असतो हेतुत्वाऽनुपपत्तेः । न च करणेन भावरूपेण प्रत्यवायाऽभावः प्रागभावरूपः शक्योपजनः । ननु च नित्याऽकरणे तत्काले ऽन्यान्येव कर्माणि कानिचिदन्ततो निमेषादीन्यपि तानि प्रत्यवायं जनयन्ति । नित्यक्रि-

तुल्ये च साध्यत्वे नाऽनुपपत्तिः प्रयाजादीनाम् । यायां तु सन्त्यपि तानि न जनयन्तीत्येवं किमिति न कल्प्यते ? न शक्यं कल्पयितुम् । तथा हि । यावज्जीवं जुहुयादिति होमाऽनुरक्तायां भावनायां पुरुषं प्रवर्त्तयतीति प्रवर्तना, सा चाऽन्वयव्यतिरेकाभ्यामपेक्षितोपायतैव प्रवृत्तिविषयस्य निवर्तना वा ऽनर्थसाधनता निवृत्तिविषयस्य । तद्यत्र प्रवर्त्तयति यतश्च निवर्त्तयति तस्यैव हितोपायत्वमहितोपायत्वं च प्रतिपादयति । न पुनरन्यस्य नित्यसमये क्रियमाणस्य कर्मणः प्रत्यवायहेतुतामवगमयितुमुत्सहते । श्रुतिसंभवे लक्षणाश्रयणाऽयोगात् ।

यच्चोक्तं भयात् प्रवृत्तिर्ध्रुवभाविनी न तथा लोभादिति । सत्यमेतत् । वाङ्मनःशरीरचेष्टाभिर्दशविधाभिर्निषिद्धत्वेन विवेकिना परिह्रियमाणाभिरपि दैवाद्बुद्धिमानिशमुपगताभिराधीयमानात्पाप्मनो विविधदुःसहदुःखबीजाद्बिभ्यतस्तत्प्रशमनक्षमसमीहितसाधने ऽपि ध्रुवप्रवृत्तयो भवन्त्येव । न च क्वचित्समीहितसाधनता, क्वचिदपरामृष्टेष्टसाधनत्वं लिङर्थ इति युक्तम् । ऐकात्म्ये संभवत्यव्याप्यत्वादर्थवैचित्र्यस्याऽव्यवस्थाप्रसङ्गात् । न च स्मृतिविरोधः । समीहितसाधनत्वे ऽपि नित्यानां यदा न तानि क्रियन्ते तदा दुरितान्यक्षीणानि प्रायश्चित्तान्तरेण क्षेप्स्यन्त इति नाऽनुपपत्तिः । वाक्यशेषोपि सन्देहे ऽपेक्षितो निर्णयहेतुतां प्रतिपद्यते । अपेक्षितोपायत्वे विश्वावुपात्तदुरितक्षयप्रत्यवायाऽभावस्याऽसन्देहान्नित्यानां न वाक्यशेषापेक्षा ऽस्तीति अर्थवादमात्रं वाक्यशेष इति कृतं विस्तरेण ।

किं चाऽस्मिन्मते तुल्ये च साध्यत्वे प्रयाजादीनां दर्शपूर्णमासयोश्च तृतीयाया अपि द्वितीयार्थे व्याख्यानाद्भावनायां वा कथंचित्करणभावेनोपपादनात्प्रयाजादीनामङ्गत्वाऽनुपपत्तिः । विनियोजकप्रमाणाभावात् । कर्त्तव्यस्य हीतिकर्त्तव्यताकाङ्क्षस्य वचनं प्रकरणमाचक्षते । तदिह दर्शपूर्णमासयोर्नित्ययोर्नैष्फल्येन प्रयाजादीनां

Digitized by Google

न हि स्वरूपे कार्ये वा ऽनुपयोग्यङ्गम् । प्रयुक्तेरप्येवंविधस्याऽभावात् । न च दुःखत्वात्कर्मण आनुषङ्गिकात्पापक्षयात्प्रवृत्तिरशास्त्रीयत्वे तप्तशिलारोहणादिवत् । पापकृतत्वे च पुरुषकारवैयर्थ्यात् । अतत्कृतत्वे वा नाशाऽभावात् । शास्त्रीयेण तूपायेन विपाचने न दोषः ।

च यावद्दर्शपूर्णमासौ कर्तव्यतया प्रयाजादीन् नापेक्षेते तावत्प्रयाजादयोऽपि किमिति दर्शपूर्णमासौ अपेक्षन्ते ? इति न प्रकरणं विनियोजकं भवितुमर्हति । न च प्रकरणव्यतिरिक्तमेषां प्रयोजकं प्रमाणान्तरं प्रतिपाद्यते प्रज्ञायते वा । न च द्वारकार्याभावे ऽङ्गता युक्ता । तस्यास्तद्व्याप्यत्वेन तन्निवृत्तौ निवृत्तेरित्याह—न हि स्वरूपे कार्ये वा ऽनुपयोग्यङ्गम् ।

ननु मा भूदविनियोजकं, प्रकरणादिप्रयुक्तिरेव तु विधेराक्षेपाऽपरनाम्ना लिङ्गसंख्यादीनामिव प्रयाजादीनामङ्गत्वं गमयिष्यतीत्यत आह—प्रयुक्तेरप्येवंविधस्याऽभावादेवंविधस्येति दर्शपूर्णमासाभ्यां साध्यत्वेन तुल्यस्यापि नियुक्तस्य न प्रयुक्तिरुपादानं संभवति विनियोगाऽनुसारित्वादुपादानस्य । अत एव 'नोद्यन्तमादित्यमीक्षेत' 'सुवर्णं भार्य'मित्येवमादयो विनियोगाऽभावात् क्रतुविधिना ऽनाक्षिप्यमाणाः क्रत्वर्था न भवन्ति । न च दुःखत्वात्कर्मण आनुषङ्गिकात् पापक्षयात्प्रवृत्तिः अशास्त्रीयत्वे तप्तशिलारोहणादिवत् । अपि च तस्य नित्यक्रियाजन्मनो दुःखस्याऽऽरब्धपापकृतत्वे विधानमनर्थकं, नित्यानां कर्मणां प्रारम्भणीयपापपरिपाकादेवोत्पादात्पुरुषकारवैयर्थ्यात् । अतत्कृतत्वे वा नाशाभावात्स्वफलविरोधित्वात्पापस्य । ननु यद्यकृतेन विधिना नाश्यते पाप्मा कथं तर्हि त्वन्मते ऽपि नित्यात्कर्मणो विनश्यतीत्यत आह—शास्त्रीयेण तूपायेन विपाचने न दोषः प्रायश्चित्तैरिव । पाचनं फलजननाऽभिमुखीभाव, स्तस्यैकान्तिकी निवृत्तिर्विपाचनं चिरंभावार्थः । शास्त्रगम्यो ऽयमर्थो न पर्य-

यदि तर्हि फलवत्यपि न सर्वाङ्गोपसंहारः काम्ये ऽपि तथा स्यात् । यावज्जीवश्रुतेरितरत्रैवमिति चेत् । इहापि स्वर्गकामश्रुतेरस्तु । यथैव यावज्जीवमशक्यमहीनाङ्गं तथा सर्वेण स्वर्गकामेन तत्र यथा यदा यावन्ति शक्नोति तदा तावतामुपसंहारः, तथा यो यावन्ति शक्नोति स तावन्त्युपसंहरिष्यति । अङ्गविधिविरोधाद्धि स्वर्गकामश्रुतिरर्थिमात्रविषया विशेषमनुरुध्यते[1] शक्त्यपेक्षायां त्वङ्गविध्यविरोधे नित्यवन्न विशेषानुरोधहेतुः ।

नुयोगमर्हति, नग्नशिलारोहणादि तु न शास्त्रयुक्तिगोचर इति भावः ।

अत्र चोदयति—यदि तर्हि फलवत्यपि न सर्वाङ्गोपसंहारः, काम्ये ऽपि तथा स्यात् । चोदक एवाऽऽशङ्क्य परिहरति—यावज्जीवश्रुतेरितरत्र नित्ये एव न सर्वाङ्गोपसंहार इति चेत् । इहापि स्वर्गकामश्रुतेरस्तु । एकग्रन्थेनाह—यथैव यावज्जीवमशक्यमहीनाङ्गं तथा सर्वेण स्वर्गकामेन यत्र यथा नित्ये यदा यावन्ति शक्नोति तदा तावतामुपसंहारः तथा काम्ये ऽपि यो यावन्ति शक्नोति स तावन्त्युपसंहरिष्यति ।

स्यादेतत् । अङ्गानां नित्यवद्विधानात् व्यवस्थायां च तदनुपपत्तेरर्थिमात्रमधिकृत्य विधेरुपपत्तिः । अर्थिश्रुतिस्तु सर्वाङ्गोपसंहारसमर्थविषयत्वेनाप्युपपन्ना । न ह्यसौ न स्वर्गकामस्तस्मात्काम्येषु यो यदेत्येव युक्तमित्यत आह—अङ्गविधिविरोधाद्धि स्वर्गकामश्रुतिरर्थिमात्रविषयाऽपि विशेषमनुरुध्यते । शक्त्यपेक्षायां त्वङ्गविध्यविरोधे च नित्यवन्न विशेषाऽनुरोधहेतुरस्ति तस्याः । अस्यार्थः । सति विरोधेऽङ्गविधिभिः स्वर्गकामश्रुतिरविशेषप्रवृत्ता विशिष्टविषया व्याख्येया, नित्यवत्तु यो यावन्ति शक्नोतीति शक्त्यपेक्षायामङ्गविधीनामविरोधेन स्वर्गकामश्रुतेः प्रस्थितायाः संकोचो न्याय्यः । अथोच्येत, विषयसंकोचलक्षणास्तावदुपरोधोऽङ्गविधीनां स्वर्गकामश्रुतेश्च

१ अवरुध्यते. मु. पु. पा. ।

Digitized by Google

अथ मतम्—अनुरोधे स्वर्गकामश्रुतेरङ्गविधय एवोपरुध्येरन् अविशेषप्रवृत्ता यथाशक्ति व्यवस्थायाम् । नित्येऽपि तुल्यम् । यावज्जीवश्रुतेरनन्यगतित्वात् । तत्रैवंकामश्रुतिस्तु सर्वाङ्गोपसंहारसमर्थेऽप्युपपन्नैव । तत्राऽविरोधात् कांस्यभोजिन्यायेन तदनुरोधेनाङ्गवृत्तिः । सत्यमविरो-

तुल्यस्तथाङ्गविधीनां बहुत्वात्तदनुरोधेन वरं स्वर्गकामश्रुतिरेकोऽवरुध्यतामिति ।

शङ्कते—अथ मतमनुपरोधे स्वर्गकामश्रुतेरङ्गविधय उपरुध्येरन्नविशेषप्रवृत्ता यथाशक्तिव्यवस्थायामिति । परिहरति—नित्येऽपि तुल्यमिति । तत्राप्येकैव यावज्जीवश्रुतिरङ्गविधयश्च बहव इति भावः । स्यादेतत् । यदि नित्ये यदा यावन्त्यङ्गानीति शक्त्यपेक्षा नाश्रीयेत ततो यावज्जीवश्रुतिरत्यन्तं बाध्येत । न ह्यस्ति संभवो यावज्जीवं यजेत सर्वाङ्गोपसंहारेणेति । अस्ति तु संभवः स्वर्गकामो यजेत सर्वाङ्गोपसंहारेणेति । न हि सर्वाङ्गोपसंहारसमर्थस्य स्वर्गकामस्य स्वर्गकामपदमवाचकमित्याह—यावज्जीवश्रुतेरनन्यगतित्वात् । तत्रैवंकामश्रुतिस्तु सर्वाङ्गोपसंहारसमर्थेऽप्युपपन्नैवेति ।

नन्वस्तु समर्थोऽपि स्वर्गकामस्तथापि तत्पदमनियतश्रुति सत् कथमप्रधानैरङ्गविधिभिर्नियम्यते? इत्याशङ्क्याह—तत्राऽविरोधात् कांस्यभोजिन्यायेन तदनुरोधेनाङ्गविधिवृत्तिरिति । अयमर्थः । कामिपदं हि कामोपाधिना प्रतिपुरुषवृत्त्यङ्गविधिविरोधेन समर्थे नियम्यमानमपि न विरुध्येत कांस्यभोजिन्यायेन । तद्यथोपाध्यायः प्रधानो नित्यं ताम्रपात्रभोजी शिष्यस्त्वप्रधानः कांस्यपात्र एव भुङ्क्ते, तत्र प्रवृत्तिलाघवादेकस्मिन्पात्रे उपादातव्ये यदि प्रधानोपाध्यायाऽनुरोधात्त्वत्कं पित्पात्रमुपादीयेत शिष्यस्य भोजनं न संपद्येत । कांस्यपात्रे तूपादीयमाने नाऽनियतपात्रभोजनमुपाध्यायस्य भोजनविरोधः ।

Digitized by Google

धेनदर्शितस्तु स्वर्गकामश्रुतेर्विषयसंकोचलक्षणो विरोधः । तत्राऽप्रधानविरोधे प्रधानाऽनुरोधः श्रेयान्, लोकवत् । यथा हि ब्राह्मणान्भोजय नानाविधोपकरणेनाऽन्नेनेति यथाशक्त्युपकरणव्यवस्थानोपकरणाऽनुरोधेन ब्राह्मणनियमः ।

तेनाऽविरोधे प्रधानमपि गुणाऽनुरोधान्नियम्यत एवेति तदनुरोधेनेति अङ्गविध्यविरोधेऽङ्गविधिवृत्तिरिति । तदेतद् दूषयति-सत्यमविरोधो दर्शितस्तु स्वर्गकामश्रुतेर्विषयसंकोचलक्षणो विरोध इति । नायं कांस्यपात्रभोजिन्यायस्य विषयः । तथा हि । तत्राऽनियतपात्रभोजनोऽप्युपाध्यायो न सहसैव सर्वेषु पात्रेषु भुङ्क्ते येन नियतपात्रभोजिना शिष्येण विरुध्येत, कामश्रुतिस्तु कामसंबन्धमात्रलब्धवृत्तिः सकृदेव समर्थमसमर्थं वा ऽर्थिमात्रमुपस्थापयन्ती समर्थेऽर्थेति व्यवस्थाप्यमाना कथं नाङ्गविधिभिरुपरुध्येतेति ।

ननु भवतु विरोधस्तथापि भूयस्त्वादङ्गविषयो बलीयसो बाधिष्यन्त इत्याशङ्क्याह—तत्राङ्गप्रधानविरोधे प्रधानाऽनुरोधः श्रेयान् लोकवदिति । सर्वथा साम्ये हि भूयस्त्वं बलीयस्त्वे हेतुः, इह कामश्रुतिरेकापि प्राधान्याद् भूयसोऽप्यप्रधानतया ऽङ्गविधीन् व्यवस्थापयितुमर्हत्येवेत्यर्थः ।

लोकवदिति दृष्टान्तं व्याचष्टे—यथा ब्राह्मणान् भोजयाऽनेन नानाविधोपकरणेनाऽन्नेनेति यथा ब्राह्मणशक्त्युपकरणव्यवस्थानोपकरणाऽनुरोधेन ब्राह्मणनियमः । यदा तु कामश्रुतेरसंकोचो नाङ्गविधीनां यो यावन्त्यङ्गानि समर्थ उपहर्तुं स तावद्भिरुपेतं प्रधानं निवर्तयतीति व्यवस्थापना तदा प्रधानविधिरङ्गानि कानिचित्कदाचिदपेक्षते कदाचिन्नेति नैकान्ततोऽङ्गविध्यपेक्षो भवति, यथा 'केशश्मश्रु वपते न वे'ति विधिप्रतिषेधसामर्थ्यलब्धजन्मनि विकल्पाऽवगमे सति नैकान्ततः प्रधानविधिरङ्गं वपनमपेक्षते किं त्वपेक्षतापि

णवादनिराकरणप्रकारेण शिष्टापरिग्रहाः शिष्टैः केन चिद-प्यंशेनापरिगृहीता अणवादिकारणवादा व्याख्याता निरस्ता द्रष्टव्या इत्यर्थः । तर्कस्य वेदबाधितत्वादिति भावः ॥

भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॥ २ । १ । १३ ॥

अद्वितीयब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयः प्रत्यक्षादिना विरुध्यते न वेति सन्देहे, ब्रह्मणि तर्कस्याप्रतिष्ठितत्वेऽपि जगद्भेदे तस्य प्रतिष्ठितत्वाद्विरुध्यत एवेति प्रत्युदाहरणेनायमाक्षेपो "भोक्त्रापत्तेरविभागश्चे"दिति । अद्वितीयब्रह्मणो जगदुपादानत्वे भोक्तृभोग्यप्रपञ्चस्य सर्वस्य ब्रह्मानन्यत्वेन भोग्यशब्दादेर्भोक्त्रात्मकत्वापत्तेर्भोक्तुर्वा भोग्यात्मकत्वापत्तेः प्रत्यक्षसिद्धः परस्परविभागो न स्यादिति प्रत्यक्षविरोधः समन्वयस्य, भोक्तृभोग्य प्रपञ्चो नाद्वितीयोपादानकः परस्परभिन्नत्वाद्व्यतिरेकेण ब्रह्मवदित्यादितर्कविरोधश्च । विपक्षे हेतूच्छित्तिर्बाधिकेति शङ्कार्थः । समाधत्ते "स्याल्लोकवदिति । एकब्रह्मोपादानकत्वेऽपि भोक्तृभोग्यप्रपञ्चस्य परस्परं विभागः स्याल्लोकवत् । यथामृदात्मनाऽभिन्नानां घटशरावादीनां परस्परभेदोऽस्ति, यथा वैकरज्जूपादानकानां दण्डसर्पादीनां परस्परं भेदः, तद्वदित्यर्थः । कल्पितभेदसत्त्वान्न प्रत्यक्षविरोधः । दण्डादौ व्यभिचारान्नतर्कः प्रमाणमिति गन्तव्यम् ॥

ननु ब्रह्माभेदं जगतोऽङ्गीकृत्य लोकदृष्टान्तेन विरोधः परिहृतः । तस्य ब्रह्मभेद एव कुतो न स्यादित्याशङ्क्य जगतोऽनिर्वचनीयत्वान्न ब्रह्मातिरेकेण सत्तेत्याह ।

तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ २ । १ । १४ ॥

पूर्वं परिणामवादमालम्ब्यापाततः "स्याल्लोकव"दिति समाधानमुक्तम् । इदानीं विवर्तवादमालम्ब्य परमं

Digitized by Google

समाधानमुच्यत इत्येकफलकत्वसङ्गतिः । सन्देहः पूर्ववत् । तस्माद्ब्रह्मणः प्रपञ्चस्यानन्यत्वं पृथक्सत्ताराहित्यम् । कुतः । आरम्भणशब्दादिभ्यः । एकविज्ञानात्सर्वविज्ञानप्रतिज्ञासिद्ध्यर्थं दृष्टान्त उपन्यस्तः, "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्य"मिति । तत्र मृत्पिण्डे ज्ञाते कथं घटादिज्ञानमित्याशङ्क्य विकारो घटादिर्वागालम्बनमात्रं यतो नामधेयं विकारो न तु नामातिरेकेण विकारोऽस्तीत्युक्त्वा मृत्तिकामात्रमेव विकारस्य पारमार्थिकं स्वरूपमिति तस्मिञ्ज्ञाते वस्तुतो घटादिर्ज्ञातो भवतीत्युक्त्वा, विकारो मिथ्या कारणं सत्यमित्ययमर्थो दृष्टान्तवाक्ये सिद्धः । तथा दार्ष्टान्तिकेऽपि ब्रह्मव्यतिरेकेण प्रपञ्चसत्ता नास्तीति तदनन्यत्वम् । सूत्रस्थादिशब्देन "ब्रह्मैवेदं सर्व"मित्यादि तदनन्यत्वप्रतिपादकं गृह्यते ॥

तदनन्यत्वे हेत्वन्तरमाह ।

भावे चोपलब्धेः ॥ २ । १ । १५ ॥

भावपदं कारणसत्त्ववाचकं तदुपलब्ध्युपलक्षणार्थम् । एवमुपलब्धिपदं कार्योपलब्धिवाचकं कार्यसत्त्वोपलक्षणार्थम् । तथा चायं प्रयोगः । विकारः कारणादनन्यः कारणसत्त्वोपलम्भानुविधायिसत्त्वोपलम्भवत्त्वात् । यो यस्माद्भिन्नो न स तत्सत्त्वोपलम्भानुविधायिसत्त्वोपलम्भवान्, यथा घटात्पट इति । हेतावुपलम्भपदद्वयत्यागे वह्निसत्त्वानुविधायिधूमे व्यभिचारः स्यात् । तद्वारणाय तद्ग्रहणम् । सत्त्वपदद्वयत्यागे यथा श्रुतसूत्रे चालोकसत्त्वोपलम्भानुविधायिज्ञानवति रूपे व्यभिचारः । अतस्तदर्थं तद्-

ग्रहणमिति । यद्वा "भावाच्चोपलब्धे"रिति सूत्रम् । न केवलं श्रुत्या कार्यकारणयोरनन्यत्वं, किं तु प्रत्यक्षोपलब्धे-र्भावाच्चानन्यत्वमित्यर्थः । नहि तन्तुव्यतिरेकेण पटो नाम कश्चिदुपलभ्यते, किं तु संयोगविशेषावच्छिन्नास्तन्तव एव पटव्यवहारविषयाः प्रत्यक्षमुपलभ्यन्ते । अतो ऽनन्यत्वं विकारस्य ॥

सत्त्वाच्चापरस्य ॥ २ । १ । १६ ॥

अपरस्य कार्यस्योत्पत्तेः प्राक्कारणानन्यत्वेन सत्त्वा-त्सत्त्वश्रवणादुत्पत्त्यनन्तरमप्यनन्यत्वं सिद्धमित्यर्थः । "ब्रह्म वा इदमग्र आसी"दित्यादौ प्रपञ्चोपस्थापक "इदं" पदस्य ब्रह्मसामानाधिकरण्यात्तदनन्यत्वं द्रष्टव्यम् । अन्यथा ब्रह्मात्मना पूर्वं प्रपञ्चस्यासत्त्वे तत उत्पत्त्यनुपपत्तिः । न हि सिकतात्मनाऽविद्यमानं तैलं ताभ्यो जायतइति ॥

असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्य-शेषात् ॥ २ । १ । १७ ॥

नन्व "सद्वा इदमग्र आसी"दित्यादिना प्रागुत्पत्ते-रसत्त्वव्यपदेशान्न कार्यस्य कारणात्मना पूर्वं सत्त्वमिति चेन्न । न ह्यत्यन्तासत्त्वाभिप्रायेणायमसत्त्वव्यपदेशः, किं तु व्याकृतस्वरूपधर्मापेक्षयाऽव्याकृतत्वं धर्मान्तरम् । तेन धर्मान्तरेणायमसत्त्वव्यपदेशः । कुतः । वाक्यशेषात् । "तत्सदासी"दिति वाक्यशेषः पूर्वमत्यन्तासतो ग्रहणे बाध्येत । "असदेवेद"मित्यत्रा सत्त्वं किं तुच्छं किं वा सदेवानभिव्यक्तनामरूपमिति सन्देहे ऽनभिव्यक्तनामरू-पम सच्छब्दितमिति निश्चीयते । आसीदित्यतीतकालस-म्बन्धोक्तेर्न शून्यमिति । तस्माद्व्याकृतं सदित्युच्यते ऽव्या-

कृतं चासदिति सिद्धं कारणानन्यत्वं कार्यस्य ॥

युक्तेः शब्दान्तराच्च ॥ २ । १ । १८ ॥

कारणानन्यत्वमुत्पत्तेः प्राक्सत्त्वं चेति शेषः । युक्तिरेवम् । घटो जायत इति प्रतीत्या घटस्य तावदुत्पत्तिकर्तृत्वं प्रतिभाति । न ह्युत्पत्तेः प्रागत्यन्तं घटस्यासत्त्वे तत्कर्तृत्वं युक्तम् । तस्मात्कारणात्मना सत्त्व एव घट उत्पत्तिकर्ता । किं च मृदात्मना पूर्वं घटस्यासत्त्वे मृदेव घटार्थिना नोपादीयेत । असत्त्वाविशेषाद्यत्किंचिदेवोपादीयेतेत्येवमाद्या युक्तिरूह्या । पूर्वसूत्रोदाहृतासच्छब्दाच्छब्दान्तरं "सदेव सोम्येदमग्रआसी"दित्यादौ विद्यमानः सच्छब्दः । तस्मादपि कारणादनन्यत्वं पूर्वमुत्पत्तेः सत्त्वं चेत्यर्थः ॥

युक्तेरित्येतत्प्रपञ्चयति ।

पटवच्च ॥ २ । १ । १९ ॥

ननु मृद्घटौ भिन्नौ विलक्षणप्रतीतिविषयत्वाद्घटपटवदित्युक्ते तस्य हेतोर्व्यभिचारमाह "पटवच्चे"ति । यथा संवेष्टितप्रसारितपटस्य विलक्षणप्रतीतिविषयत्वेऽपि न भेदः, एवं मृद्घटयोरित्यर्थः ॥

न विलक्षणकार्यकारित्वमपि हेतुर्व्यभिचारादित्याह ।

यथा च प्राणादि ॥ २ । १ । २० ॥

यथा प्राणायामादिना निरुद्धः प्राणापानादिर्जीवनमात्रं कार्यं निर्वर्तयत्यनिरुद्धस्त्वाकुञ्चनप्रसारणादिकं कार्यं करोति, नैतावता तस्य प्राणस्य भेदोऽस्ति । तस्मात्कार्यकारणयोरनन्यत्वं सिद्धम् । तदनन्यत्वाच्चैकविज्ञानात्सर्वविज्ञानप्रतिज्ञा सिद्धा भवति ॥

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥ २ । १ । २१ ॥

पूर्वं कार्यस्य कारणादनन्यत्वमेकविज्ञानप्रतिज्ञासिद्ध्ये समर्थितम् । तर्हि तेनैव न्यायेन जीवब्रह्मणोरप्यभेदाज्जीवधर्मा हिताकरणादयो ब्रह्मणि प्रसज्येरन्नित्याक्षेपात्सङ्गतिः । जीवाभिन्नं ब्रह्म जगदुपादानमिति ब्रुवन्समन्वयो विषयः । स किं "यदि तादृग्ब्रह्म जगज्जनयेत्तर्हि स्वानिष्टं जनये"दिति तर्केण विरुध्यते नवेति सन्देहे पूर्वपक्षमाहे"तरव्यपदेशा"दिति । इतरस्य जीवस्य "तत्त्वमसी"त्यादिना ब्रह्मत्वव्यपदेशादितरस्य ब्रह्मणो वा "ऽनेन जीवेनाऽऽत्मनाऽनुप्रविश्ये"त्यादिना शारीरत्वव्यपदेशाद्ब्रह्मणः स्रष्टृत्वे जीवस्यैव स्रष्टृत्वं स्यात् । तथा च हिताकरणादिदोषप्रसक्तिर्ब्रह्मणः । नञ्व्यत्यासेनाहितजरामरणादिबहुविधानर्थकरणरूपदोषस्य प्रसक्तिरित्यर्थः । आदिपदेन जीवस्य जगदादिकं मया सृष्टमिति ज्ञानं स्यात्तत्संहर्तृत्वं च स्यादित्यादिदोषा गृह्यन्ते । तस्माज्जीवाभिन्नब्रह्मणो नानिष्टप्रपञ्चजनकत्वमभ्रान्तचेतनत्वादिति न चेतनोपादानकं जगदित्याक्षेपसूत्रार्थः ॥

समाधत्ते ।

अधिकं तु भेदनिर्देशात् ॥ २ । १ । २२ ॥

तुः पूर्वपक्षव्यावृत्त्यर्थः । यतः शारीरादधिकमन्यत्सर्वज्ञं सर्वशक्ति ब्रह्म जगदुपादानं स्रष्टृचेति ब्रूमः । अतो न हिताकरणादिदोषप्रसक्तिः । कुतः । भेदनिर्देशात् । "आत्मा वा अरे द्रष्टव्यः," "सता सोम्य तदा सम्पन्नो भवती"त्यादिना कल्पितभेदस्य व्यपदेशादित्यर्थः । न हि

Digitized by Google

ब्रह्मणो नित्यमुक्तस्य हितमहितं वा किञ्चिदस्तीति न हिताकरणादिदोषप्रसक्तिः । कल्पितभेदमादायैव सर्वेषां कार्योपपत्तिरिति तात्पर्यम् ॥

नन्वेकरूपस्य ब्रह्मणो जगत्कारणत्वे कार्यवैचित्र्यं न स्यादिति दोषं दृष्टान्तेन परिहरति ।

अश्मादिवच्च तदनुपपत्तिः ॥ २ । १ । २३ ।

यथा लोके एकपृथिवीजन्यानामश्मनां वज्रवैडूर्येन्द्रनीलपद्मरागादिभेदेन वैचित्र्यमेवं ब्रह्मकार्याणां स्वरूपवैचित्र्यं युज्यते । नन्वेकब्रह्माश्रितकार्येषु कथं धर्मवैचित्र्यं कथं वाऽर्थक्रियावैचित्र्यमित्याद्याशङ्कानिरासार्थं "आदिवच्चे"त्युक्तम् । तस्यार्थः । यथैकपृथिव्याश्रितानां बीजानां बहुविधं पत्रपुष्पफलगन्धरसादिवैचित्र्यं, यथैकस्यान्नस्य केशनखादिविचित्रार्थक्रियाकारित्वं तद्वत्सर्वमुपपद्यत इति । तदनुपपत्तिरुक्तदोषानुपपत्तिरित्यर्थः ॥

उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ॥ २ । १ । २४ ॥

असहायाद्ब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयो विषयः । स किं "ब्रह्म नोपादानं कर्तृ वाऽसहायत्वात्संमतव"दिति न्यायेन विरुध्यते न वेति सन्देहे, पूर्वमौपाधिकजीवभेदाद्धिताकरणादिदोषो नास्तीत्युक्तम् । सम्प्रत्युपाधितोऽपि विभक्तब्रह्मणः प्रेरणादिकं नास्ति ब्रह्मनानात्वाभावादिति प्रत्युदाहरणेनाक्षिप्य समाधत्त "उपसंहारे"ति । लोके कुलालस्य कर्तुर्दण्डचक्राद्युपसंहारदर्शनान्मृदो वोपादानस्य स्वभिन्नकुलालादिसाहाय्यदर्शनात्तदुभयविलक्षणस्य ब्रह्मणो न जगत्कर्तृत्वमुपादानत्वं वा सम्भवतीति चेदिति

साङ्कार्थः । समाधत्ते "क्षीरवद्धी"ति । हि शब्दो हेत्वर्थः । यथा लोके क्षीरं बाह्यसाधनान्यनपेक्ष्य दध्याकारेण परिणमते तद्वद्ब्रह्मापीत्यर्थः । न चौष्ण्यसापेक्षत्वं क्षीरस्यास्तीति वाच्यमौष्ण्यस्य दधिभावे त्वरामात्रनिमित्तत्वादिति । श्रुतिरन्यसहायस्य ब्रह्मणः कार्यकारित्वं दर्शयति "न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चे"ति ॥

ननु चेतनत्वे सत्यसहायत्वं हेतुः । अतो न क्षीरे व्यभिचार इत्याशङ्क्य चेतनदृष्टान्तेन तस्य व्यभिचारमाह ।

देवादिवदपि लोके ॥ २ । १ । २५ ॥

लोक्यतेऽनेनेति लोकः शब्दो मन्त्रार्थवादेतिहासादिः । तस्मिन्यथा देवाः पितर ऋषय इत्येवमादयश्चेतनाः स्वतस्सिद्धसामर्थ्याः साधनान्तरं बाह्यमनपेक्ष्य सङ्कल्पमात्रेणैव नानाविधकार्यकर्तार उपलभ्यन्ते, तद्वद्ब्रह्मापीत्यर्थः । अयं भावः । कुलालस्तावद्बाह्यमान्तरं च सङ्कल्पादिकमपेक्ष्य कार्यकर्ता भवति, देवादयस्त्वान्तरसङ्कल्पमात्रमपेक्ष्य कार्येषु समर्थाः । तथा च यथैकस्य कार्यजनने सामर्थ्यं तथैवान्यस्येति नियमाभावाद्दृष्टान्तेन प्रत्यवस्थानमिति॥

निरवयवाद्ब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयः सावयवस्यैव नानाकारेण परिणाम इति न्यायेन विरुध्यते न वेति क्षीरादिदृष्टान्तकथनेन ब्रह्मणः परिणामित्वभ्रमोत्पत्त्या सन्देहे कार्यकारणभावसङ्गत्या पूर्वपक्षयति ।

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥ २ । १ । २६ ॥

पूर्वाधिकरणस्य भ्रमोत्पादकत्वेन कारणत्वमेतस्य कार्यत्वमिति बोध्यम् । ननु ब्रह्म निरवयवं वा परिणमते, उत सावयवं वा । आद्ये कृत्स्नस्य ब्रह्मणः कार्याकारेण परिणामप्रसक्तिः । ततश्च कार्यातिरिक्तं ब्रह्म न स्यात् । दृष्टान्तत्वश्रुतिविरोधश्च, कार्यस्य प्रत्यक्षत्वात् । द्वितीये कृत्स्नप्रसक्तिर्नास्त्येकांशपरिणामे ऽप्यपरांशस्थितिसम्भवात् । तथासति "निष्कल"मित्यादिनिरवयत्वशब्दकोपः । उभयस्मिन्पक्षेऽप्यनित्यत्वप्रसङ्ग इति ब्रह्मणः परिणामित्वभ्रममूलकः पूर्वपक्षः ॥

सिद्धान्तयति ।

श्रुतेस्तु शब्दमूलत्वात् ॥ २ । १ । २७ ॥

"तु" शब्दोपनिरासं ब्रूते न तावत्कृत्स्नप्रसक्तिरिति । कुतः । श्रुतेः । यथा जगदुपादानत्वं ब्रह्मणः श्रूयत एवं कार्यव्यतिरेकेण ब्रह्मणः सत्त्वं श्रूयत "एतावानस्य महिमे"त्यादौ । तथा च श्रुत्यैव विवर्तवादः स्फुटीकृतः । न हि परिणामवादे कार्यव्यतिरेकेण सत्त्वं सम्भवति । तस्मात्कार्यातिरेकेण ब्रह्मणो ऽवस्थानश्रुतेर्नोक्तदोष इत्यर्थः । ननु श्रुतिर्वा कथं कार्यातिरेकेण ब्रह्मणः सत्त्वं बोधयेदुक्तयुक्तिबाधितत्वादित्यत आह "शब्दे"ति । ब्रह्मणः शब्दैकप्रमाणकत्वाद्यथाशब्दं कार्योपादानत्वं तदतिरेकेण सत्त्वं चाविरुद्धमित्यर्थः ॥

जगतो ब्रह्मविवर्तत्वेन स्वप्नप्रपञ्चवन्मायिकत्वात्तदुपादानत्वे ऽपि ब्रह्मणो न कृत्स्नप्रसक्त्यादिदोषः स्वप्नसाक्षिवदित्याह ।

आत्मनि चैवं विचित्राश्च हि ॥ २ । १ । २८ ॥

एवं ब्रह्मणीव हि यस्माद्धेतोरेकस्मिन्नात्मनि स्वप्नदृशि

निरवयवे विचित्राः सृष्टयः श्रूयन्ते "न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान्पथः सृजत" इत्यादौ । स्वप्ने रथादीनामभावे कथं तदुपलब्धिरित्याशङ्कोक्तं श्रुता "यथे"त्यादि। सूत्रे "च"शब्देन मायविदृष्टान्तं समुच्चिनोति । यथा लोके मायाविनिस्वरूपानुपमर्दनेनैव हस्त्यश्वरथादिविचित्राः सृष्टयो दृश्यन्ते तथा ब्रह्मण्यपि विविधसृष्टिरित्यर्थः ॥

"यश्चोभयोः समो दोष" इति न्यायेन कृत्स्नप्रसक्त्यादीनामनुद्भाव्यत्वं दर्शयति ।

स्वपक्षदोषाच्च ॥ २ । १ । २९ ॥

सांख्यादयोऽपि निरवयवं प्रधानं जगत्परिणामीत्यङ्गीचक्रुः । तथा च कृत्स्नप्रसक्त्यादिदोषाः सर्वे समानाः । अणुवादिनोऽपि परमाणुद्वयसंयोगेन द्व्यणुकादिसृष्टिमङ्गीचक्रुः । स संयोगः किं व्याप्यवृत्तिरव्याप्यवृत्तिर्वा । आद्ये दृष्टविरोधः कार्यप्रथिमानुपपत्तिश्च । द्वितीये सावयवत्वं विनाऽव्याप्यवृत्तिसंयोगानुपपत्तिर्निरवयवत्वव्याकोप इत्यादयो दोषाः समानाः । ब्रह्मवादे ते दोषा न सन्ति च । तस्मादत्यन्तमुपपन्नः परमात्मकारणवादः ॥

एकस्यापि ब्रह्मणो विचित्रकार्यशक्तिमत्त्वमुक्तम् । तत्समर्थयति ।

सर्वोपेता च तद्दर्शनात् ॥ २ । १ । ३० ॥

मायाशक्तिमतो ब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयो-"ऽशरीरस्य न माये"ति न्यायेन विरुध्यते न वेति सन्देहे, पूर्वोक्तशक्तिमत्त्वविषयकशङ्कानिरासेन तत्समर्थनात्मकत्वाद्विषयविषयिभावसङ्गत्या विरुध्यत इति पूर्वपक्षे राद्धान्तः । सर्वोपेता सर्वशक्तियुक्ता परादेवता । कुतः ।

तद्दर्शनात् । तस्याः सर्वशक्तियोगस्य श्रुतौ दर्शनादित्यर्थः । "सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्त" इत्यादि श्रुतिर्द्रष्टव्या ॥

विकरणत्वान्नेति चेत्तदुक्तम् ॥ २ । १ । ३१ ॥

सर्वशक्तियुक्तानामपि देवादीनां चक्षुरादिकरणवतामेव विचित्रकार्यकर्तृत्वमवगम्यते । "अचक्षुष्कमश्रोत्र"मित्यादिना ब्रह्मणो विकरणत्वावगमान्न कर्तृत्वमिति चेत्, यदत्रोत्तरं वक्तव्यं तत्पूर्वमेव "न विलक्षणत्वात्" "देवादिवदपि लोके" इत्यादावुक्तम् । श्रुत्यैकसमधिगम्यत्वान्न तर्केण विरोधाशङ्का । यथैकस्य तथैवान्यस्येति नियमाभावादित्यादिकमित्यर्थः ॥

ब्रह्मणो जगत्कर्तृत्वं हेत्वन्तरेणाक्षिपति ।

न प्रयोजनवत्त्वात् ॥ २ । १ । ३२ ॥

अवाप्तसकलकामाद्ब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयो "अत्र विना फलेन न सृजत्यभ्रान्तचेतनत्वात्सम्मतव"दिति न्यायेन विरुध्यते न वेति सन्देहे पूर्वोक्तकर्तृत्वाक्षेपसङ्गत्या पूर्वपक्षः । ब्रह्मणो जगत्कर्तृत्वं न सम्भवति नित्यतृप्तत्वेन प्रयोजनाभिसन्धिरहितत्वात्प्रवृत्तेः प्रयोजनवत्त्वावागमादिति ॥

तत्र राद्धान्तः ।

लोकवत्तु लीलाकैवल्यम् ॥ २ । १ । ३३ ॥

"तु" रुक्तशङ्कानिरासकः । यथा लोके राजतदमात्यादीनां फलं विनैव केवललीलारूपाः प्रवृत्तयो दृश्यन्ते, यथा वोच्छ्वासादयः स्वभावादेवोत्पद्यन्त एवं ब्रह्मणोऽपि विचित्रकार्यरचना लीलाकैवल्यं केवललीलामात्रं न फल-

सापेक्षम् । कथंचिद्राजादीनां लीलायां फलसम्भवेऽपि नित्यतृप्तस्य ब्रह्मणो लीलामात्रमेतदित्यभिप्रायः ॥

विधान्तरेण ब्रह्मणः कारणत्वमाक्षिप्य समाधत्ते ।

वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ॥ २ । १ । ३४ ॥

निरवद्याद्ब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयो "यो विषमसृष्टिकर्ता स सावद्य" इति न्यायेन विरुध्यते नवेति विशये पूर्वं मायामय्या लीलया यत्स्रष्टृत्वमुक्तं तस्याक्षेपात्सङ्गतिसिद्धौ पूर्वपक्षः । ब्रह्म किं प्राणिकर्मसापेक्षं जगत्कर्तृ, निरपेक्षं वा । नाद्योऽनीश्वरत्वप्रसङ्गात् । द्वितीये वैषम्यनैर्घृण्ये प्रसज्येयाताम् । कांश्चित्तिर्यगादीनत्यन्त दुःखिन उत्पादयति कांश्चिन्मनुष्यादीन्सुखदुःखसाधारणान्कांश्चिद्देवादीनत्यन्तसुखिन इति वैषम्यम् । सर्वसंहर्तृत्वाच्च नैर्घृण्यम् । ततश्च सावद्यत्वं प्रसज्येत । तस्मान्निरवद्यस्येश्वरस्य न जगत्कर्तृत्वमिति शङ्कायां निरासमाह । वैषम्यनैर्घृण्ये न स्याताम् । कस्मात् । सापेक्षत्वात्प्राणिकर्मसापेक्षत्वात् । कर्मानपेक्षत्वे हि वैषम्यादिः स्यान्न सापेक्षत्व इत्यर्थः । न च सापेक्षत्वेऽनीश्वरत्वं, भृत्यादिसेवानुसारेण फलदातू राज्ञोऽराजत्वादर्शनात् । ईश्वरस्तु पर्जन्यवद्द्रष्टव्यः । यथा तत्तद्बीजे सत्यपि न पर्जन्यं विनाऽङ्कुरोत्पत्तिस्तद्वदिति । कर्मणैवोपपत्तौ किमर्थमीश्वरः स्वीकर्तव्य इति चोद्यं श्रुत्या पराकृतमित्यादिभाष्ये द्रष्टव्यम् । नन्वीश्वरस्य कर्मसापेक्षत्वं कुत इत्यत आह "तथा हि दर्शयति" । श्रुतिः स्मृतिश्चेत्यर्थः । "एष ह्येव साधुकर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवासा-

Digitized by Google

धुकर्म कारयति तं यमधोनिनीषत" इति "पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन कर्मणे"त्याद्या श्रुतिः । यमुन्निनीषत ऊर्ध्वं नेतुमिच्छतीश्वरस्तं साधु कर्म कारयति पूर्वजन्मकृतसुकृतवशादिति योजना । पुण्यः सुखी । पापो दुःखी । स्मृतिश्च ।

"ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" ।

इत्याद्या द्रष्टव्या ॥

न कर्माविभागादिति चेन्नानादित्वात् ॥ २ । १ । ३५ ॥

"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीय"मित्यादिना सृष्टेः प्रागविभागावधारणान्न तदानीं कर्मास्तीत्यतः कर्मापेक्षया विषमा सृष्टिरित्यसङ्गतमिति चेन्न । अनादित्वात्संसारस्य बीजाङ्कुरवद्धेतुहेतुमद्भावोपपत्तेरित्यर्थः । पूर्वसृष्टौ सम्पादितधर्माधर्मप्रपञ्चस्यात्यन्तिकनाशाभावात्तदपेक्षयोत्तरसृष्टौ न किञ्चिद्बाधकमिति भावः ॥

ननु संसारस्यानादित्वं कुत इत्यत आह ।

उपपद्यते चाप्युपलभ्यते च ॥ २ । १ । ३६ ॥

संसारस्यानादित्वमुपपद्यते च । अन्यथाऽकस्मादेव सृष्ट्यङ्गीकारे मुक्तस्यापि पुनर्जन्मप्रसङ्गात्पूर्वसृष्टिसादृश्यानुपपत्तेश्च । श्रुतिस्मृत्योः संसारस्यानादित्वमुपलभ्यते च । "अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी"ति प्राणधारणनिमित्तेन जीवशब्देन सृष्ट्यादौ शरीरमभिलपन्प्राणधारणादिसंसारस्यानादित्वं दर्शयति । "धाता यथापूर्वमकल्पय"दित्याद्या श्रुतिरपि पूर्वकल्पसद्भावं दर्शयति । स्मृतिरपि संसारस्यानादित्वमाह ।

Digitized by Google

"न रूपमस्येह तथोपलभ्यते
नान्तो न चादिर्न च सम्प्रतिष्ठा" ।

इति । स्मृत्यर्थस्तु । अस्य संसारवृक्षस्य कल्पितस्य रूपं पारमार्थिकं स्वरूपं ब्रह्म । तथा घटादिवदिह प्राकृतैर्व्यवहारभूमौ नोपलभ्यते । न चान्तोऽवधिरस्य संसारस्य विना ब्रह्मविद्यामुपलभ्यते । नाप्यादिरनिर्वचनीयत्वादेव । नाऽपि सम्प्रतिष्ठा मध्यमिति ॥

इदानीं परपक्षप्रतिषेधप्रधानं पादमारब्धुकामः स्वपक्षे निर्दुष्टतामुपसंहरति ।

सर्वधर्मोपपत्तेश्च ॥ २ । १ । ३७ ।

पूर्वाधिकरणे कर्मवशादीश्वरस्य विषमसृष्टिहेतुत्वमुक्तम् । तदस्तु विषमसृष्टिप्रयोजककर्मणः सत्त्वात् । तद्वदुपादानत्वप्रयोजकसगुणत्वस्याभावान्नोपादानत्वमिति प्रत्युदाहरणेनास्यारम्भः । निर्गुणब्रह्मणो जगत्सर्गं वदन्समन्वयो "यन्निर्गुणं तन्नोपादानं यथा गन्ध" इति न्यायेन विरुध्यते न वेति सन्देहे विरुध्यत इति प्राप्ते ब्रूमः "सर्वधर्मोपपत्तेश्चे"ति । सर्वे जगत्कारणत्वसर्वज्ञत्वादयः कारणधर्मा ये विद्यन्ते तेषां पूर्वोक्तप्रकारेण ब्रह्मण्युपपत्तेर्ब्रह्मैव जगत्कारणमित्यौपनिषदशास्त्रं निर्दोषमित्यर्थः । अयं भावः । यन्निर्गुणं तन्नोपादानमिति व्याप्तौ किं परिणामित्वाभावो व्यापक उत विवर्तोपादानत्वाभावः । नाद्य इष्टत्वात् । न द्वितीय आरोपितानित्यत्वोपादाने ज्ञानजात्यादौ व्यभिचारात् । तस्मान्निर्गुणत्वे ब्रह्मणो विवर्तजगदुपादानत्वमविरुद्धमिति । तस्मान्न कथमपि समन्वयस्य विरोध इति सिद्धम् ॥

॥ इति द्वितीयाध्यायस्य प्रथमः पादः ॥

इयता प्रबन्धेन मुमुक्षूणां सम्यग्ज्ञानोत्पत्तये वाक्यानां समन्वयः प्रतिपादितः । तस्मिन्समन्वये परपरिकल्पितदूषणनिरासेन स्वपक्षः स्थापितः । इदानीं मुमुक्षूणामद्वैतश्रद्धे निर्विचिकित्सप्रवृत्तिसिद्धये परमतदूषणप्रधानः पाद आरभ्यते ।

रचनाऽनुपपत्तेश्च नानुमानम् ॥ २ । २ । १ ॥

सांख्यमतस्य शिष्टपरिगृहीतत्वेनाभ्यर्हितत्वात्तदादौ निराक्रियते । पूर्वं "ईक्षतेर्नाशब्द"मित्यादिना प्रधानपरत्वेन वेदान्तानां व्याख्यानं निरस्तम् । इह तु प्रधानसाधकवेदनिरपेक्षयुक्तीनामाभासत्वमुच्यत इति न पौनरुक्त्यम् । अत्र सांख्यादिमतनिरासेन समन्वयस्य तन्मतविरोधनिरासद्वारा दृढीकरणादस्य पादस्य श्रुत्यध्यायसङ्गती बोध्ये । समन्वयविरोधनिरासेन स्वपक्षस्थापनपरप्रथमपादेनास्य पादस्योपजीव्योपजीवकभावः सङ्गतिः । स्वपक्षस्थापनं विना परमतनिरासायोगात्स्वसिद्धान्तज्ञानहेतुत्वद्वारा पूर्वपादस्योपजीव्यत्वं बोध्यम् । परमतयुक्तिनिरासपरत्वादेव सर्वेषामधिकरणानां पादसङ्गतिः । "सर्वधर्मोपपत्तेश्च"इत्यनेन ब्रह्मणि कारणधर्माणामुपपत्तिरित्युक्तम् । तेषां प्रधान एवोपपत्तिः किं न स्यादित्याक्षेपस्यात्रनिरासादनयोरधिकरणयोराक्षेपलक्षणावान्तरसङ्गतिः । फलं तु पादसमाप्तिपर्यन्तं परमतयुक्तिविरोधाविरोधाभ्यां समन्वयासिद्धिस्तत्सिद्धिरिति विवेकः । तत्र प्रधानमचेतनं जगदुपादानमिति सांख्यसिद्धान्तो विषयः, सन्दिह्यमानस्यैवाधिकरणविषयत्वात् । स च सिद्धान्तः सन्दिह्यते किं प्रमाणमूलो भ्रान्तिमूलो वेति । तत्र प्रमाण-

मूल एवेति युक्तम् । तथा हि बाह्याध्यात्मिकं जगत्सुखदुःखमोहात्मकसामान्योपादानकं भवितुमर्हति, तदन्वितत्वात्, यद्यदन्वितं तत्तदुपादानकं, यथा मृदन्वितं घटादिकं मृदुपादानकमिति । तथा च यदेव सुखदुःखमोहात्मकं किञ्चित्सिद्धं तदेव सत्त्वरजस्तमोगुणात्मकं प्रधानमिति प्रामाणिकः सांख्यसिद्धान्त इति प्राप्ते ब्रूमः । उक्तानुमानसिद्धं प्रधानं न जगदुपादानम् । कुतः । रचनानुपपत्तेः । चेतनाप्रेरितात्स्रष्टव्यज्ञानशून्यात्प्रधानादनेकविधविचित्रजगद्रचनानुपपत्तेरित्यर्थः । लोके विचित्रप्रासादादिरचनायां बुद्धिकुशलशिल्प्यादिकार्यत्वदर्शनादिति भावः । सूत्रे "च" शब्देन हेतोः स्वरूपासिद्धिं समुच्चिनोति । सुखादीनामान्तरत्वप्रतीतेस्तदन्वितत्वं जगतोऽसिद्धम् । तस्मादप्रामाणिकः सांख्यसिद्धान्त इति ॥

प्रवृत्तेश्च ॥ २ । २ । २ ॥

साम्यावस्थाऽऽपन्ना गुणा हि प्रधानं । साम्यावस्थायां च न किञ्चित्कार्यं जायते, किं तु साम्यावस्थाप्रच्यवेन गुणानामङ्गाङ्गिभावे जाते कार्यस्योदय इति प्रक्रिया । सा न युक्ता । लोकेऽचेतनरथादिप्रवृत्तेश्चेतनाधीनत्वदर्शनात्प्रधानस्य साम्यावस्थाप्रच्युतिरूपप्रवृत्तेश्चेतनप्रेरणं विनाऽनुपपत्तेरित्यर्थः ॥

पयोऽम्बुवच्चेत्तत्रापि ॥ २ । २ । ३ ॥

नन्वचेतनस्य स्वयं प्रवृत्तिरपि दृश्यते । यथा क्षीरं वत्सविवृद्धये स्वयमेव प्रवर्तते, यथा वा जलं स्वयमेव स्यन्दते, तथा पयोऽम्बुवत्प्रधानं स्वयमेव प्रवर्तेत इति चेन्न, यतस्तत्रापि परमात्मा प्रेरकः श्रूयते "योऽप्सु तिष्ठन्"नित्या-

दिना । तथा च पक्षत्वान्न व्यभिचारः पयोऽम्बुनोरिति भावः ॥

व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥ २ । २ । ४ ॥

अपि च न स्वतन्त्रं प्रधानं जगदुपादानम् । कुतः । व्यतिरेकानवस्थितेः, स्वतन्त्रस्य तस्य कारणत्वे सर्वदा कार्यप्रसक्तौ कदाचिदपि कार्यव्यतिरेकस्यावस्थित्यभावप्रसङ्गादित्यर्थः । तदपि कुतः । अनपेक्षत्वात् । स्वतन्त्रस्य प्रधानस्य चेतनादिसहकार्यन्तरानपेक्षत्वाभ्युपगमादित्यर्थः ॥

अन्यत्राभावाच्च न तृणादिवत् ॥ २ । २ । ५ ॥

ननु तृणोदकादिकं निमित्तान्तरनिरपेक्षमेव क्षीराकारेण परिणमते । तद्वत्प्रधानमपीति चेन्न । कुतः । अन्यत्राभावाद्धेन्वादेरन्यत्र बलीवर्दादौ तृणादेः क्षीरभावस्याभावादित्यर्थः । तथा च धेन्वादिसापेक्षमेव तृणादिकं क्षीरीभवति । निरपेक्षत्वे बलीवर्दादावपि क्षीरीभावप्रसङ्ग इत्यर्थः ॥

अभ्युपगमेऽप्यर्थाभावात् ॥ २ । २ । ६ ॥

प्रधानस्य स्वतः प्रवृत्त्यभ्युपगमे पुरुषार्थस्याप्यपेक्षाऽभावप्रसङ्गादिति भावः । न चेष्टापत्तिः प्रधानमचेतनं चेतनस्य पुरुषार्थं साधयितुमेव प्रवर्तत इति, स्वाभ्युपगमविरोधादिति भावः । यद्वाऽर्थाभावात्प्रयोजनाभावादित्यर्थः । तथा हि न तावत्प्रधानप्रवृत्तिः पुरुषस्य भोगार्था, भोग्यानामानन्त्यादनिर्मोक्षप्रसङ्गात् । नाप्यपवर्गार्था, भोगाभावप्रसङ्गात्प्रधानस्याप्रवृत्तिप्रसङ्गाच्च, पुरुषस्य स्वरूपेणावस्थितिलक्षणस्य मोक्षस्य प्रधानाप्रवृत्त्यैवसिद्धेः । तस्मात्प्रयोजनाभावान्न प्रधानस्य जगद्धेतुत्वम् ॥

श्रीः

श्रियै नमः ।

श्रीधराय नमः ।

पूर्वाचार्यपरम्पराभ्यो नमः ।

श्रीमते रामानुजाय नमः ।

ईशा वास्योपनिषत् ।

विशिष्टाद्वैतसिद्धान्तानुयायिव्याख्योपेता ।

विश्वं व्याप्यं धार्य्यं तेन विचित्राश्च शक्तयो यस्य ।
श्रीरङ्गेशं तमृषिं तनुवाक्चित्तैरुपास्महे पुरुषम् ॥ १ ॥
सर्वेशानः सर्वभूतान्तरात्मा दोषानर्हः सर्वविद्यैकवेद्यः ।
कर्माराध्यस्साध्यभक्त्यैकलभ्यः श्रीमान् व्यक्तो वाजिनां संहितान्ते ॥ २ ॥
यस्याचार्य्यैः कृतं भाष्यं गम्भीरं विदुषां मुदे ।
बालामोदाय तद्भावो यथाभाष्यं प्रकाश्यते ॥ ३ ॥
ईशावास्यानुवाकोऽयं वाजिनां संहितान्तगः ।
शिष्याय गुरुणा यस्मिन् ब्रह्मविद्योपदिश्यते ॥ ४ ॥
कर्मणां संहितोक्तानां विनियोगपृथक्त्वतः ।
विद्याङ्गताऽस्ति तद्व्यक्त्यै निबन्धोऽस्य तदन्ततः ॥ ५ ॥

ईशा वास्यमिदं सर्वमित्येषोऽनुवाकोऽष्टादशमन्त्रात्मकः, एते च मन्त्राः पुरुषसूक्तोदितपरमपुरुषतत्स्वरूपतदुपासनप्रपदनतत्प्राप्तिरूपतत्त्वोपायपुरुषार्थानां संग्रहेण सम्यक् प्रतिपादकत्वात् कर्मसु कल्पसूत्रकृता कात्यायनेन विनियुक्तत्वाच्चोपनिषत्सारभूताः । भगवद्गीतादिभिश्चैतेषां मन्त्राणामुपबृंहणं तत्रतत्र परस्तात् प्रदर्शयिष्यते । नन्वेवं ब्रह्मकाण्डे

बृहदारण्यक एवैषां पाठः स्यात् । न संहितायां, प्रयोजनाभावादिति चेन्न । एतेषु सारभूतानां पञ्चषमन्त्राणां बृहदारण्यकेऽपि पाठदर्शनात् ।

तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति ।
यज्ञेन दानेन तपसाऽनाशकेन ॥
विद्याञ्चाविद्याञ्च यस्तद्वेदोभयꣳ सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥

इत्यविद्याख्यस्य कर्मविशेषस्य ब्रह्मविद्यायां विनियुक्तत्वात् संहितायामुदाहृतं कर्मजातं विद्याया अप्यङ्गमिति विशदीकरणार्थमेषां संहितान्ते पाठोपपत्तेश्च । अतः कर्मसु विनियुक्तत्वात्पूर्वोक्तसत्त्वोपाय-प्रयोजनप्रतिपादनपरत्वाच्चोपनिषद एवैते मन्त्रा इति सिद्धम् ॥

ईशा वास्यमिदꣳ सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् ॥१॥

तत्र तावदाचार्यः प्रथमं रजस्तमःप्रचुरदेहेन्द्रियादिविशिष्टत्वात् 'ईश्वरोऽहमहम्भोगी'त्यादिश्रीभगवद्गीतोक्तप्रक्रियया स्वतन्त्रोऽहं, देवता-न्तरपरतन्त्रोऽहमिति च भ्राम्यतस्तत्त्वबुभुत्सया चोपसन्नस्य शिष्यस्य स्वत-न्त्रात्मभ्रमादिनिवृत्त्यर्थं चिदचिदात्मकस्य कृत्स्नस्य प्रपञ्चस्य परमपुरुषाय-त्तस्वरूपस्थितिप्रवृत्तित्वमुपदिशति । ईशा वास्यमिति । इदम्-अचिन्त्य-विविधविचित्ररचनया ब्रह्मादिस्तम्बपर्य्यन्तं चेतनमिश्रितया च प्रत्यक्षा-दिप्रमाणसिद्धमित्यर्थः । सर्वम्-ईश्वरव्यतिरिक्तं भोग्यभोक्तृरूपं सर्वम् । ईशेति तृतीयैकवचनान्तम् । सर्वनियन्त्रेत्यर्थः । सङ्कोचे मानाभावात् । महापुरुषेणेति यावत् । योऽसावसौ पुरुष इत्यनुवादिश्रमाणत्वात् । स एव हि सर्वस्येष्टे । तथा च श्रुत्यन्तरं 'पतिं विश्वस्यात्मेश्वर'मिति । तेन वास्यं निवासनीयम् । व्याप्यमिति भावः । अनन्याधारत्वात् परस्य ब्रह्मणः । यद्वा सर्वाधारे स्वस्मिन्नेव स्वेन वसनीयम् । सर्वं प्रतिष्ठाप-नीयमित्यर्थः । स्मर्यते हि—

सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः ।
ततः स वासुदेवेति विद्वद्भिः परिपठ्यते ॥ इति ।

जगत्यामुर्व्याम् । इदं लोकान्तराणामप्युपलक्षणम् । जगत्—अन्यथात्वङ्गच्छत् । तत्राचिदंशस्य भोग्यत्वाय स्वरूपविकाररूपमन्यथात्वम्, चिदंशस्य तु भोक्तृत्वाय सङ्कोचविकासादिलक्षणस्वभावविकाररूपमन्यथात्वमिति भेदोऽनुसन्धेयः । ईशेनाव्याप्यं किञ्चिदपि नास्तीति दृढयितुं* यत्किञ्चेति जगद्विशेष्यते । जगत्यादिषु लोकेषु यत्किञ्चिद् भोक्तृभोग्यरूपं जगद्वर्तते तदिदं सर्वम् ईशा वासुदेवेन वास्यं—व्याप्यं धार्यं चेत्यर्थः ।

इन्द्रियाणि मनो बुद्धिस्सत्त्वं तेजो बलं धृतिः ।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ॥

इत्याद्युपबृंहणसहस्रमिहानुसन्धेयम् ।

पृथगात्मानं प्रेरितारं च मत्वा, ज्ञाज्ञौ द्वावजावीशनीशौ ।

छान्दसो ह्रस्वः । ईशानीशावित्यर्थः । 'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामानि' इत्यादिषु प्रसिद्धो जीवेश्वरयोरीशेशितव्यत्वादिलक्षणोऽत्यन्तभेदोऽप्यत्र सिद्धः । ननु रूढिर्योगमपहरतीति न्यायादीशोऽत्र रुद्रः स्यात् । मैवम्, 'एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे द्यावापृथिवी न नक्षत्राणि नाग्निर्न सूर्यो न चन्द्रमाः स न एकाकी न रमेत' इत्यादिषु 'अनपहतपाप्मा वा अहमस्मि नामानि मे धेहि' इत्यादिषु च भगवत्कार्यत्वेन कर्मवश्यत्वेन च सम्प्रतिपन्ने रुद्रे सर्वव्यापित्वसर्वाधारत्वादेरन्वयासम्भवेन विरुद्धार्थविषयतयैवेह रूढेर्भग्नत्वात् । एवं च जगत्कारणवादिवाक्यगताकाशप्राणादिशब्दन्यायेन—'अजः सर्वेश्वरः सिद्ध' इत्यनवच्छिन्नैश्वर्यतया प्रसिद्धे सर्वेश्वरे यौगिक एवायमीट्शब्दः प्रत्येतव्य इति सिद्धम् । एवं मुमुक्षोरीश्वरपारतन्त्र्यबोधमुत्पाद्य वैराग्यभूषितां वृत्तिमुपदिशति । तेन त्यक्तेन भुञ्जीथाः । तेन—जगता । भोग्यताभ्रमविषयेणेति भावः । त्यक्तेन अल्पत्वास्थिरत्वदुःखमूलत्वदुःखमिश्रत्वदुःखोदर्कत्वदेहात्माभिमानमूलत्वस्वाभाविकब्रह्मानन्दानुभवविरुद्धत्वरूपा ये विषयदोषाः सप्त तन्निरूपणपूर्वकं परित्यक्तेनोपलक्षितः सन् भुञ्जीथाः । भगवदुपासनोपयुक्तदेहस्य धारणमात्रोपयिकमन्नपानादिकं

* दर्शयितुमिति पा. ।

यागदानहोमार्चनाद्युपयोगपरिजनपरिच्छदादिकं च भोग्यवर्गं भुञ्जीथा इत्यर्थः । यद्वा दोषसप्तकनिरूपणात् त्यक्तेन भोग्याभासेनोपलक्षितः सन् भुञ्जीथाः-सर्वावासत्वेन प्रकरणे प्राप्तं प्रकृतमुक्तदोषप्रतिभटं निरतिशय-भोग्यं वक्ष्यमाणोपायमुखेन भुञ्जीथा इति योज्यम् । तत्र-भोक्ता भोग्यं प्रेरितारं च मत्वा, द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति, । समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महि-मानमिति वीतशोकः महिमानम् इति-प्राप्नोतीत्यर्थः । छान्दसो गुणा-भावः । तदेति प्रतिनिर्देशोऽध्याहार्य्यः, यदा अन्यमीशमस्य महिमानं च पश्यति तदा वीतशोको भवतीत्यन्वयो वा । मागृधः कस्यस्विद्धनम् । कस्यापि वन्धोरवन्धोर्वा धनं मागृधः माभिकाङ्क्षः गृधु अभिकाङ्क्षायामिति धातुः । आह च यमः किङ्करं प्रति-

हरति परधनं निहन्ति जन्तून्वदति तथाऽनृतनिष्ठुराणि यश्च ।
न सहति परसम्पदं विनिन्दां कलुषमतिः कुरुते सतामसाधुः ॥
परमसुहृदि बान्धवे कलत्रे सुततनयापितृमातृभृत्यवर्गे ।
शठमतिरुपयातियोऽर्थतृष्णां पुरुषपशुर्न स वासुदेवभक्तः ॥ इति,

भगवद्गीतासु च-न काङ्क्षे विजयं कृष्णेत्यादि । इदं च धना-शाप्रहाणं परमात्मव्यतिरिक्तकृत्स्नविषयवैराग्योपलक्षणं, स्मरन्ति हि-

परमात्मनि यो रक्तो विरक्तोऽपरमात्मनीति ॥ १ ॥

कुर्व्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥२॥

एवं विरक्तस्य विदुषः फलसङ्गकर्तृत्वादित्यागयुक्तो ब्रह्मविद्या-ङ्गभूतः कर्मयोगो यावज्जीवमनुष्ठेय इत्याह कुर्वन्नेवेति । शतं समाः शतं संवत्सरान् । प्रायिकवादोऽयम् । कर्माणि नित्यनैमित्तकानि कुर्वन्नेव इह लोके जिजीविषेत् जीवितुमिच्छेत् ब्रह्मविदोऽपि यावद्विद्यापूर्ति-जीवितुमिच्छा भवतीति प्राप्तत्वात् शतायुर्वै पुरुष इति श्रुतेः यावज्जी-

वमित्यर्थः । शतसङ्ख्याकान् वत्सरान् जीवेदित्यनूद्य कर्माणि कुर्वीतैवेति
विधिः सङ्कल्पयितव्यः यावज्ज्ञानयोगाधिकारं कर्मयोगः कर्तव्य इति
भावः । कर्मयोगो नाम ह्येवमेवापरे यज्ञमित्यादिना विकल्पविहितेषु कर्म-
योगावान्तरभेदेषु एकं यथारुच्यङ्गितया स्वीकृत्यान्यानि नित्यनैमित्तिकानि
तदङ्गतयोपसंहृत्य असाङ्गकर्मानुष्ठानविशेषः न कदाचिदपि विद्याङ्गं
कर्म परित्यजेदित्येवकाराभिप्रायः । स्वयीश्वरपरतन्त्रात्मस्वरूपज्ञानतया
तदाज्ञापरिपालनरूपकर्मानुष्ठाने अधिकारपूर्त्तिमतीति भावः । एवम्-
एवमेवानुष्ठेयानीत्यर्थः । उक्तमर्थं व्यतिरेकेण दृढीकरोति नान्यथेतोऽस्ती-
ति, इतः कर्मानुष्ठानात् अन्यथा-प्रकारान्तरमननुष्ठानं नास्तीत्यर्थः ।
नान्यः पन्थास्तत्तोषकारणमिति स्मृतेः । ननु ब्रह्मविदोऽपि कर्मानुष्ठाना-
ऽवश्यम्भावे बन्धः स्यादित्यत्राह । न कर्म लिप्यते नरे । इति, विद्याविरुद्धेषु
कर्मफलेषु न रमत इति नरः, । प्रस्तुतब्रह्मविदि नरे विद्याङ्गतया क्रिय-
माणः कर्मयोगो न लिप्यते न स्वर्गादिहेतुर्भवति । अपि तु ज्ञानयोगद्वारा
वा साक्षाद्वा प्रथमं परिशुद्धजीवात्मविषययोगमुत्पाद्य पश्चाद्भक्तियोगाङ्ग-
भूतं प्रत्यगात्मसाक्षात्कारमेवोत्पादयतीति भावः । यत्तु कुर्वन्नेवेह कर्मा-
णीत्ययं विधिरविद्वद्विषय एव न तु ब्रह्मविद्विषय इति, तस्य विधिनिषेध-
शास्त्रवश्यत्वाभावात् । तस्य हि ब्रह्मज्ञानाग्निनाऽधिकारः प्रनष्ट इति
शाङ्करव्याख्यानं तत्प्रकरणविरुद्धम् ।

विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥

इत्युपरितनविध्यन्तरविरुद्धं चेति न वेदविदो बहुमन्यन्ते ॥ २ ॥

असुर्य्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये केचात्महनो जनाः ॥३॥

एवं मन्त्रद्वयेन तत्त्वत्रयस्वरूपं विद्याङ्गकर्मानुष्ठानस्वरूपं च यथा-
वदुपदिष्टम् । इदानीं ये केचनासुरप्रकृतयो यथोपदेशं तत्त्वत्रयमविदि-
त्वाऽन्यथा जानन्ति कामक्रोधलोभाद्यन्विताः सन्तः शास्त्रविधिमुत्सृज्य

यज्ञादि कर्म कुर्वन्ति, निषिद्धानि चाचरन्ति ते सर्वे स्वात्मघातिनस्तेषां निरयपातोऽवश्यम्भावीत्युपदिशत्याचार्य्यः असुर्या इति, असुराणां स्वभूता असुर्य्याः । असुरस्वभावभूता वा । असुरप्रकृतीनामेवानुभाव्याः । अन्येषां देवप्रकृतीनामनुभवितुमशक्या इत्यर्थः, अतिभीषणा इति यावत् । नामेति प्रसिद्धौ, अतिभीषणा नरकसंज्ञितास्ते लोकाः सन्तीति सर्वशास्त्रप्रसिद्ध-मिति भावः । पुनस्तान् विशिनष्टि अन्धेन तमसाऽऽवृता इति । अन्धेना-तिगाढेन तमसा अन्धकारेण आवृता व्याप्ताः तानतिभीषणानालोकसङ्क-रहितांश्च लोकानिति भावः । येके च देवजातीया मनुष्यजातीया वा तत्रापि ब्राह्मणा वा क्षत्रियादयो वा आत्महनः असदेव स भवति असद्-ब्रह्मेति वेद चेदित्याम्नातामसत्कल्पतां स्वात्मानं नयन्तः ब्रह्मज्ञानवि-हीनाः काम्यकर्मादिनिष्ठा इत्यर्थः । तथा च बृहदारण्यके—

अनन्दा नाम ते लोका अन्धेन तमसाऽऽवृताः ।
तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोऽबुधा जनाः ॥ इति,

देहपातमुखेन पातकवर्गस्य चोपलक्षणमिदं पातकिनश्च ये जनाः, जनिमन्तः संसरन्त इत्यर्थः । स्वात्मघातिनस्ते सर्वे प्रेत्य तदातनदेहादु-त्क्रम्याभिगच्छन्ति अभितो गच्छन्ति सर्वानपि पृथिव्यन्तरिक्षस्वर्गरौरवा-दिसंज्ञितान्नरकान्निरन्तरं गच्छन्तीति भावः ॥ ३ ॥

अनेजदेकं मनसो जवीयो
नैत*द्देवा आप्नुवन्पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठ-
त्तस्मिन्नपो मातरिश्वा दधाति ॥ ४ ॥

एवं तृतीयेन मन्त्रेण विद्यायां शीघ्रप्रति†पत्तिसिद्ध्यर्थम् अवि-दुषामनर्थ उक्तः । अथाचार्य्यः सर्वावासत्वेन प्रस्तुतस्य परस्य ब्रह्म-णोऽनन्तविचित्रशक्तियोगं विरुद्धवदभिलापेन व्यञ्जयन्नुपदिशति । अने-जदिति । अनेजत्—एजृ कम्पने अकम्पमानम् एकं प्रधानतमं शास्त्र-

* नैनद्देवाः । इति पा० । † प्रवृत्तिसिद्ध्यर्थमिति पा० ।

विदुषां स्वाधीनत्वम् । समानाधिकत्वसमानद्वितीयरहितमिति वा । न तत्समश्चाभ्यधिकश्च दृश्यते इतिश्रुतेः परमसाम्यमापन्ना अपि मुक्ता ब्रह्माधीना एवेति भावः । मनसो जवीयः—वेगवतो मनसो ऽपि जवीयः—वेगवत्तरं मनुष्यातिक्रान्तमपि देशं क्षणमात्रात् मनः सङ्कल्पेन गच्छति चेत् ततः पूर्वमेव तत्र गच्छतीति भावः । निष्कम्पं वेगवत्तरं चेति विरोधप्रतीतिः । परिहारस्तु विभुत्वाद्वस्तुतोऽनेजत् तत एव मनसोऽप्यगोचरदेशे सर्वदैव वृत्तेर्मनसो जवीय इत्युपचर्य्यते इति । किञ्च देवा ब्रह्मरुद्रादयोऽपि पूर्वमर्षत् प्रागेव सर्वान् देशान् प्राप्नुवदित्यर्थः, एतत्प्रस्तुतं सर्वाधारं परं ब्रह्म नाप्नुवन् एतावन्तं कालं न लेभिरे इति भावः । पूर्वमेव प्राप्तं न लेभिरे इति च विरोधप्रतिभानं विभुतया प्राप्तमपि कर्मसङ्कुचितज्ञानाः चेतना आचार्य्योपदेशं विना स्वबुद्ध्या नाप्नुवन्निति परिहारः । यथोक्तं छान्दोग्ये तद्यथा ।

हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्य्यु-
परि सञ्चरन्तो न विन्देयुरेवमेवेमाः ।
सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्म-
लोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः ॥ इति,

अपि च तद्धावतोऽन्यानत्येति तिष्ठत् यः पृथिव्यां तिष्ठन् य आत्मनि तिष्ठन् यः सर्वेषु भूतेषु तिष्ठन्नित्यादिक्रमेण सर्वत्र तिष्ठदेव तद्ब्रह्म धावतोऽन्यान् गरुडादीनत्यत्येति तिष्ठतः पुरुषस्य धावदतिक्रमणं न घटत इति विरोधप्रतिभानं जविनो यावद्यावद्धावन्ति तावतस्तावतः परस्तादपि वर्त्तते इति तात्पर्यादविरोधः । यथोच्यते ।

वर्षायुतशतैर्वापि पक्षिराडिव सम्पतन् ।
नैवान्तं कारणस्येयाद् यद्यपि स्यान्मनोजवः । इति, ॥

अन्यदपि किञ्चिदाश्चर्यमित्याह तस्मिन्नपो मातरिश्वा दधाति, तस्मिन् वासुदेवे अवस्थितो मातरिश्वा अप इत्युपलक्षणं पायःपयोधरदहनग्रहतारकादिकं बिभर्त्तीत्यर्थः, धारणानुगुणकाठिन्यरहितोऽपि वायुः पायः प्रभृतिकं बिभर्त्तीत्युक्तं सर्वाधारभूतेन सर्वेश्वरेण विधृतो वायुस्तच्छ-

तथैवं बिभर्तीत्यभिप्रायः, एष सेतुर्विधरण एषां लोकानामसंभेदाय, एतस्य वाक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः ।

द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ।
वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥

इत्यादिषु प्रसिद्धमेतत् ॥ ४ ॥

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥५॥

अथेदानीमाचार्य्यः स्वोपदिष्टं विचित्रशक्तित्वमैश्वर्यादार्थं मुखान्तरेण पुनरनुशास्ति तदेजतीति भूयोभूयःप्रवचनं श्रवणं च कर्तव्यमिति च पुनरनुशासनस्याभिप्रायः । तथा च शास्त्रं परीक्ष्य लोकान्कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन, तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं, तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय, येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यामिति तत्त्वतः अज्ञानसंशयविपर्ययनिरासो यथा भवति तथा प्रोवाच प्रकर्षेण ब्रूयात् पुनःपुनरुपदिशेदित्यर्थः । अत एव तद्विद्धि प्रणिपातेनेत्यादिना भगवतोपदिष्टस्यार्थस्य वैशद्याय तत्त्वदर्शिसकाशात् प्रणिपातादिपुरस्सरं पुनःश्रवणं विहितम् उपदिष्टा च पुनरनुगीतेत्याहुराचार्य्याः । तदेजति । तत्सर्वं व्याप्तं परं ब्रह्म एजति एजतीव कम्पत इव जवीय एवेति यावत् । तदु तदेव नैजति वस्तुतस्तु न कम्पते तद्दूरे च तदेवान्तिके च वर्तते आसुरदैवप्रकृतिकपुरुषभेदापेक्षया विभोरेव दूरान्तिकवर्तित्वव्यपदेशः । आह च भगवान् शौनकः-

पराङ्मुखानां गोविन्दे विषयासक्तचेतसाम् ।
तेषां तत्परमं ब्रह्म दूराद्दूरतरे स्थितम् ॥
तन्मयत्वेन गोविन्दे ये नरा न्यस्तचेतसः ।
विषयत्यागिनस्तेषां विज्ञेयं च तदन्तिके ॥ इति, ।

इदमप्येकं वैचित्र्यमित्याह तत् सर्वव्याप्तं परं ब्रह्म अस्य सर्वस्य विविधविचित्ररूपतया प्रमाणप्रसिद्धस्य सर्वस्य वस्तुनोऽन्तर्भवति तदेव पुनस्तदानीमेव सर्वस्य बहिरपि भवतीत्यर्थः । अन्येषां तु गृहान्तर्वर्तिपुरुषाणां तदानीमेव न बहिःष्ठत्वं सम्भवति बहिर्वर्तिनां च नान्तर्वर्तित्वमितीह वैचित्र्यमिति भावः । यद्यप्यणुषु नान्तर्वर्तिता सम्भवति तथाऽप्यप्रतिघातादविभक्तदेशतया वर्तित्वमात्रेणाणुष्वन्तर्वर्तित्वोक्तिः । एवं बहिर्व्याप्तिरप्यविभुद्रव्यापेक्षयैव न तु विभुद्रव्यापेक्षयापीति द्रष्टव्यं, तदिदं वैचित्र्यं तैत्तिरीयकेऽप्युक्तम्—'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' इति ॥ ५ ॥

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥ ६ ॥

एवं सर्वस्य ब्रह्मात्मकत्वमुक्तम् । अथ सर्वं जगद्ब्रह्मात्मकमित्यनुसन्दधानस्यैहिकं प्रयोजनमाह यस्तु सर्वाणीति, यः—तत्त्वज्ञानी अस्याधिकारिणो माहात्म्यविशेषज्ञापनाय तु-शब्दः सर्वाणि भूतानि ब्रह्मादिस्थावरान्तानि आत्मन्येव परमात्मन्येव अनुस्यूतानि पश्यति विशदं निध्यायतीत्यर्थः । पृथिव्यादिभिर्ध्रियमाणमपि तन्मुखेन परमात्मन्येव स्थितमित्येवकाराभिप्रायः । किञ्च सर्वभूतेषु चात्मानं परमात्मानं यः पश्यतीति इदं व्याप्तिमात्रपरं परमपुरुषस्यानन्याधारत्वादिति भावः । यच्छब्दस्य स इति प्रतिनिर्देशोऽध्याहार्यः सः—उक्ततत्त्वज्ञानी । ततस्तेषु—सप्तम्यर्थे तसिः, ब्रह्मात्मकतया दृष्टेषु सर्वेषु भूतेष्वित्यर्थः, न विजुगुप्सते कुतश्चिदपि न बीभत्सते स्वात्मविभूतिन्यायात् क्वचिदपि निन्दां न करोतीति भावः ॥ ६ ॥

यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ ७ ॥

एवं वैयधिकरण्येनोक्तं सर्वस्य ब्रह्मात्मकत्वं सामानाधिकरण्येनापि द्रढयंस्तथाऽनुध्यानस्य सद्यः शोकमोहनिवर्तकत्वमाह । यस्मिन्

सर्वाणीति । प्रणिधानसमये विजानत ईशा वास्यमित्यारभ्य ततो न विजुगुप्सत इत्यन्तेनोपदिष्टं स्वतन्त्रपरतन्त्रवस्तुभेदं यथोपदेशं विविच्य जानत इत्यर्थः । नन्वेवमत्यन्तभेदाभ्युपगमे सर्वाणि भूतान्यात्मैवाभूदिति सामानाधिकरण्यं भज्येतेत्याशङ्कानिरासाय यस्य पृथिवी शरीरम् इत्यादिघटकश्रुतिसिद्धं सम्बन्धविशेषमाह । एकत्वमनुपश्यतः इति, आकृतिव्यक्त्योरिव गुणगुणिनोरिव चात्यन्तभिन्नयोरेव जगद्ब्रह्मणोरैकत्वं विभागानर्हसम्बन्धविशेषं पश्यतः विशदतममनुध्यायत इत्यर्थः । रामसुग्रीवयोरैक्यं देव्येवं समजायत इत्यादिष्विवेहापि एकशब्दस्य सम्बन्धविशेष एवार्थो विवक्षितुं युक्त इति भावः । एवं च सत्याह सर्वाणि भूतान्यात्मैवाभूदिति परात्मैव सर्वभूतशरीरकः प्रतीतोऽभूदित्यर्थः—तत्र तदा प्रणिधानसमये को मोहः स्वतन्त्रात्मभ्रमादिलक्षणो मोहो न सम्भवति । कः शोकः परमात्मविभूतितयाऽवगते सर्वस्मिन् निर्ममत्वसिद्ध्या पुत्रमरणराज्यहरणादावपि न कश्चिच्छोकः स्यादित्यर्थः । यथाऽऽह ।

अनन्तं बत वित्तं मे यस्य मे नास्ति किञ्चन ।

मिथिलायां प्रदीप्तायां न मे किञ्चन दह्यते ॥ इति, ।

अत्र केचित्सर्वाणि भूतानि आत्मैवाभूदिति बाधार्थे सामानाधिकरण्यं तथा चात्मैव सर्वाणि भूतानि आत्मव्यतिरिक्तानि सर्वाणि न सन्तीत्यर्थः, यथा चोरः स्थाणुरिति स्थाणुरेवायं न चोर इति हि तस्यार्थः, तथेहापीत्याहुः । अन्ये तु नरपतिरेव सर्वे लोका इतिवदौपचारिकमिदं सामानाधिकरण्यं, नरपत्यधीनाः सर्वे जना इति हि तत्र निर्वाहः, तद्वदिहापि परमात्माधीनानि सर्वाणि भूतानीति भाव इति वर्णयन्ति । अपरे तु घटशरावादयः सर्वे मृत्पिण्डा एवेतिवज्जगद्ब्रह्मणोरेकद्रव्यत्वं परिकल्प्यैवेदं सामानाधिकरण्यं निर्वाह्यमित्याचक्षते । सिद्धान्तस्तु देवोऽहं मनुष्योऽहमित्यादिवत् शरीरात्मभावसम्बन्धेनैव जगद्ब्रह्मणोः सामानाधिकरण्यनिर्वाहे सम्भवति सति बाधोपचारस्वरूपैक्यपक्षा वैदिकैर्हेयकार्या इति ॥ ७ ॥

स पर्य्यगाच्छुक्रमकायमव्रण-
मस्नाविरꣳ शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान्
व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥ ८ ॥

पुनरप्येनमीशेशितव्यतत्त्ववेदिनं वेदितव्येश्वरस्वरूपशोधनेन च विशिंषन् ध्यानयोगादिकमप्युपदिशति स पर्येगादिति । सः-सर्वभूतान्तरात्मभूतब्रह्मदर्शी पर्य्यगात् पर्यगच्छत् प्राप्नुयादित्यर्थः । ब्रह्मविदाप्नोति परमिति न्यायात् । यद्वा समाधिलब्धेनानुभवेन प्राप्तवानिति सिद्धानुवादः यत्र ब्रह्म समश्नुत इतिवत् । शुक्रम्-अवदातं स्वप्रकाशरूपमित्यर्थः । अकायम्-सर्वशरीरकमपि कर्मकृतहेयशरीररहितमित्यर्थः । न तस्य प्राकृती मूर्तिर्मांसमेदोऽस्थिसम्भवेति हेयशरीरस्येशान्यत्र प्रतिषेधदर्शनात् । न तु दिव्यमङ्गलविग्रहरहितमित्यर्थः । यत्ते रूपं कल्याणतमं तत्ते पश्यामि, य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते, आदित्यवर्णं तमसः परस्तादित्याद्युपनिषत्प्रसिद्धस्याप्राकृतदिव्यविग्रहस्येह निषेधायोगादिति भावः । अव्रणम्-कर्मजन्यशरीराभावादेवाक्षतम् । अस्नाविरम्-स्नायुः सिरा यस्मिन् विद्यते तत् स्नाविरं स्नाविरं न भवत्यस्नाविरम् । शुद्धम्-अनाघ्रातात्रानादिदोषगन्धम् अशनायादिषडूर्मिरहितं वा । अपापविद्धम् अज्ञानादेः कार्यभूतैः कारणभूतैश्च पुण्यपापरूपकर्मभिर्नालीढमित्यर्थः । न शोको न सुकृतं न दुष्कृतम् इत्यारभ्य सर्वे पाप्मानोऽतो निवर्तन्त इति पापशब्देनोपसंहारदर्शनात् स्वर्गादिहेतुभूतपुण्यविशेषस्यापीह पापशब्देन संग्रहणमिति भावः । एवमशेषहेयप्रत्यनीकं परमात्मानं स विद्वान् पर्य्यगादिति पूर्वेण सम्बन्धः । एवंरूपः परमात्मा प्राप्यः प्रापकः उपायश्च यस्य तं ब्रह्मविदं विशिनष्टि कविः-व्यासादिवत् परमपुरुषतत्स्वरूपतद्विभूतितत्कल्याणगुणादिप्रकाशकप्रबन्धविशेषाणां निर्मातेत्यर्थः । अथवा कविः-क्रान्तदर्शी योगाभ्यासविधुरमनसा दुर्दर्शे परिशुद्धजीवात्मस्वरूपे प्रतिविशदाविच्छिन्नधारास्मृतिरूपज्ञानयोगनिष्ठ इत्यर्थः । कर्मयोगस्तु

कुर्वन्नेवेह कर्माणीति श्लोकेन पुरस्तादेवोक्तः । अथ ज्ञानयोगसाध्यं प्रत्यगात्मसाक्षात्कारहेतुभूतं जीवात्मयोगमाह मनीषीति । मनस ईशित्री बुद्धिर्मनीषा, तद्वान् मनीषी सौन्दर्यसौशील्यादिभगवद्गुणानां स्मृत्यभ्यासेनान्यविषयवैराग्येण च निगृहीतान्तःकरण इत्यर्थः । तथा च गीयते ।

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन च कौन्तेय ! वैराग्येण च गृह्यते ॥ इति ।

निरतिशयसुखरूपस्वात्मसाक्षात्काराय स्वात्मनि मनःप्रणिधानक्रियारूपयोगाभ्यासपर इति भावः । परिभूः—कामक्रोधलोभादीनरातीन् परिभवतीति परिभूः, अनेन विरोधिनिवृत्तिरूपयोगाङ्गसेवनमुक्तम् । योगाभ्यासफलमाह स्वयंभूः—अन्यनिरपेक्षसत्ताकः । नित्यनिरतिशयसुखरूपतया स्वात्मदर्शीति यावत् । याथातथ्यतोऽर्थान् व्यदधात् । यथावद्विविच्य अर्थान् प्रणवार्थान् तस्य वाचकः प्रणवस्तज्जपस्तदर्थभावनमिति सूत्रोक्तान् व्यदधात्—हृदयेन धृतवानित्यर्थः । अर्थान्—मोक्षतदुपाय—तद्विरोधिप्रभृतीन् सर्वान् पदार्थान् शाश्वतीभ्यः समाभ्यः, यावद्ब्रह्मप्राप्तीत्यर्थः । याथातथ्यतः, यथावद् व्यदधात्, विविच्य हृदयेन धृतवान् । सर्वप्रत्यूहशमनार्थमिति भावः । अथवा शुक्रमित्यादिद्वितीयान्तपदजातं परिशुद्धजीवपरत्वमपि स परमात्मा पर्यगात् परितो व्याप्य स्थित इति प्रथमान्तपदजातं परमात्मपरं योजनीयं तथाहि कविः स्वतः सर्वदर्शी श्रीपञ्चरात्रादिप्रणेतेति वा । मनीषी मनःप्रभृतीनां जीवकरणानां नियन्ता । परितो भवतीति परिभूः । सर्वव्यापी स्वयमेव भवति उद्भवतीति स्वयंभूः बहुधा विजायत इत्यादिप्रसिद्धावतारशालीत्यर्थः । अत्र कविरित्यादिना कल्याणगुणविधानात् छान्दोग्ये एष आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपास इति हेयगुणान् प्रतिषिध्य सत्यकामः सत्यसङ्कल्प इति कल्याणगुणविधानाच्च निर्गुणं निरञ्जनमित्यादिसामान्यनिषेधस्य हेयगुणनिषेधपरत्वं सुगमम् । याथातथ्यतः इत्यादि । अर्थान् कार्यपदार्थान् शाश्वतीभ्यः समाभ्यः यावद्विलयमव-

स्यातुं याथातथ्यत इति यथावत् व्यदधात्—विविच्योत्पादितवान् न पुनरैन्द्रजालिकवत् केवलं प्रकाशितवानिति भावः ॥ ८ ॥

अन्धं तमः प्रविशन्ति ये ऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायांᳫंरताः ॥ ९ ॥

एवं विचित्रशक्तिकपरमात्मविषयां कर्मयोगाद्यङ्गिकां विद्यामुपदिश्यानन्तरं त्रिभिः श्लोकैः केवलकर्मावलम्बिनः केवलविद्यावलम्बिनश्च पुरुषान् विनिन्दन् वर्णाश्रमधर्मानुगृहीतया विद्ययैव निःश्रेयसावाप्तिमाह अन्धं तमः प्रविशन्तीति । बृहदारण्यके चायं मन्त्रः पठितः । ये भोगैश्वर्यप्रसक्ताः अविद्यां विद्यान्यां क्रियां केवलं कर्मेत्यर्थः, विद्याविधुरं कर्मेति यावत् अविद्याकर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यत इति स्मृतेः । उपासते एकान्तमनसो ऽनुतिष्ठन्ति अन्धं तमः अतिगाढं तमः अज्ञानमित्यर्थः, त्रिवर्गाभिषङ्गाचान्तरीयं नारकम् अन्धं तमो वा । अधीयते चाथर्वणिकाः प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म एतच्छ्रेयोऽभिनन्दन्ति मूढा जरामृत्यू ते पुनरेवापियन्तीति । य उ विद्यायां रताः उकार उत्तरपदेनान्वेतव्यः ये स्वाधिकारोचितकर्मपरित्यागेन विद्यायामेव रताः ते ततः कर्ममात्रनिष्ठप्राप्यान्धतमसाद् भूय इव तमः तदधिकमज्ञानं प्रविशन्ति इव-शब्दः तमस इयत्ताया दुर्ग्रहत्वं द्योतयति ॥९॥

अन्यदेवाहुर्विद्यया अन्यदाहुरविद्यया ।
इति शुश्रुम धीराणां येनस्तद्विचचक्षिरे ॥ १० ॥

किं तर्हि मोक्षसाधनमित्यत्राह अन्यदेवाहुरिति, विद्ययेति, पञ्चम्यर्थे तृतीया यथाश्रुते अन्यशब्दानन्वयात् अन्यदेवाहुः सम्भवादिति वक्ष्यमाणानुसाराच्च । तथा विद्यायाः कर्मरहितविद्यातः अन्यन्मोक्षसाधनमित्याहुरुपनिषद इति शेषः । अविद्ययेति पूर्ववत्पञ्चम्यर्थे तृतीया, विद्यातः ब्रह्मज्ञानविधुरकर्मणश्चान्यदेव मोक्षसाधनमित्याहुरुपनिषद इति भावः । पूर्वपूर्वसम्प्रदायसिद्धोऽयमर्थोऽस्माकमित्याह इति शुश्रुम इति, ये पूर्वाचार्याः नः प्रणिपाताद्भिः सम्यगुपसन्नानामस्माकं तन्मो-

ससाधनं व्याचचक्षिरे विविच्योपादिशन्, तेषां धीराणां धीमताम् । पञ्चम्यर्थे षष्ठी । तेभ्यो धीरेभ्य इति योजनीयम् । मटस्य शृणोतीतिवत् । मटाच्छृणोतीत्यर्थः । इति शुश्रुम वयंप्रकारमश्रौष्म । ननु परोक्ष एवार्थे लिड्विधानात् शुश्रुमेति लिडुत्तमपुरुषो न घटत इति चेत् मैवं, ब्रह्मविद्याया दुरवगाहत्वेन निःशेषग्रहणमस्माभिर्न कृतमित्यभिप्रायकत्वादुत्तमपुरुषस्येत्याहुः ॥ १० ॥

विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।

अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥ ११ ॥

अन्यदिति सामान्येनोक्तं मोक्षसाधनं विवृणोति । विद्यां चाविद्यां चेति । कुर्वन्नेवेह कर्माणीति श्लोके कर्मयोगस्य प्रत्यगात्मदर्शनद्वारा परभक्त्युत्पादकत्वमुक्तम् इह तूत्पन्नभक्तियोगेन विदुषा पूर्वोक्तकर्मयोगवेषं परित्यज्याहरहरनुष्ठीयमानानां नित्यनैमित्तिककर्मणां कल्मषनिबर्हणद्वारा भक्तियोगोपचायकत्वमुच्यते । सहशब्दस्वारस्यात् अतो न पुनरुक्तता, यः—यथावस्थितविद्योपदेशवान् विद्यां—ब्रह्मोपासनरूपाम् । अविद्याम्—तदङ्गभूतकर्म्मात्मिकां चाविद्याम् एतदुभयं सह वेद अङ्गाङ्गिभावेन च सहानुष्ठेयं वेदेत्यर्थः । अत्राविद्याशब्दः स्वविषयविषयकाज्ञानवाचशब्दवत्तदन्यवृत्त्या विद्याङ्गकर्म्मविषय इति भावः । अविद्यया विद्याङ्गतया चोदितेन कर्मणा मृत्युम्—विद्योत्पत्तिप्रतिबन्धकभूतं पुण्यपापरूपं प्राक्तनं कर्म तीर्त्वा निरवशेषमुल्लङ्घ्य विद्यया परमात्मोपासनरूपया अमृतमश्नुते मोक्षं प्राप्नोतीत्यर्थः । तीर्त्वेत्यत्रोणार्यविरोधितत्वमुच्यते अमृतमश्नुत इति उपेयब्रह्मप्राप्तिविरोधिभूतेभ्यः सर्वपापेभ्यो मोक्ष इति भेदः । एवं च सति—

इयाज सोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः ।
ब्रह्मविद्यामधिष्ठाय तर्त्तुं मृत्युमविद्यया ॥

ज्ञानव्यपाश्रयः ज्ञाननिष्ठः ब्रह्मज्ञानवान् स जनकोऽपि ब्रह्मविद्यां निदिध्यासनरूपाम् अधिष्ठाय फलत्वेनाश्रित्येत्यर्थः भक्तियोगो-

त्यत्तिं कामयमान इति यावत् । मृत्युम्-भक्त्युत्पत्तिविरोधिप्राचीनं कर्म्मजातम् अविद्यया अनभिसंहितफलेन विद्याङ्गकर्मणा तर्त्तुम्-अपोहितुं सुबहून् यज्ञान् ज्योतिष्टोमादिकान् इयाज अकरोदित्यर्थः । पाकस्य-वतीतिवत् तथा च कषायपक्तिः कर्म्माणि ज्ञानं तु परमा गतिः । भगव-दाराधनरूपाणि अनभिसंहितस्वर्गादिफलानि कर्माणि कषायस्य, उभय-विधपापस्य तज्जन्यरागद्वेषादेश्च पक्तिः-विनाशकारणानि । ज्ञानं तु परमा गतिः-परमगतिसाधनमित्यर्थः । उभयत्रापि कारणे कार्य्योपचारः

कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्त्तते ।
तथा विद्या च विप्रस्य निश्श्रेयसकरावुभौ ।
तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुते ॥
इत्यादीन्युपबृंहणशतानि सुसङ्गतानि भवेयुः ।

अन्धं तमः प्रविशन्ति येऽसंभूतिमुपासते ।
ततो भूय इव ते तमो य उ संभूत्यांरताः ॥ १२ ॥

एवं समाधिनिष्पत्तेरनभिसंहितफलनित्यनैमित्तिककर्मसाध्यत्वमुप-दिश्यानन्तरं त्रिभिः श्लोकैर्निषिद्धनिवृत्तिरूपयोगाङ्गसाध्यत्वमाह । तत्र प्रथमं पूर्ववदेकैकमात्रनिष्ठान् विनिन्दति । अन्धं तमः प्रविशन्तीति । एतमितः प्रेत्याभिसम्भवितास्मि, ब्रह्मलोकमभिसम्भवानीत्यादिषु प्राप्ति-रूपानुभूतिः संभूतिशब्देनोक्ता इह तु समाधिरूपा सा संभूतिशब्देनोच्यते असंभूतिशब्दस्तु समाधिरूपसंभूत्यन्यां समाध्यङ्गभूतां निषिद्धनिवृत्तिमाह संभूतिं च विनाशं चेत्युत्तरत्र विनाशशब्देनासंभूतेरनुवादानात् । तथा च ये विद्याधिकारिणः असंभूतिमेव मानदम्भहिंसास्तेयादीनां योगविरुद्धानां निवृत्तिमेवोपासते निवृत्तिमात्रनिष्ठा इत्यर्थः । ते अन्धं तमः प्रविश-न्तीति पूर्ववदर्थः । ये पुनःसमाधिरूपसंभूत्यामेव रताः ते ततो भूय इव बहुतरमिव तमः प्रविशन्तीत्यर्थः ॥ १२ ॥

अन्यदेवाहुस्सम्भवादन्यदाहुरसम्भवात् ।
इति शुश्रुम धीराणां ये नस्तद्व्याचचक्षिरे ॥ १३ ॥

Digitized by Google

किं तर्हि मोक्षसाधनमित्यत्राह अन्यदेवाहुरिति, सम्भवात्—संभूतेः, असम्भवादसंभूतेरित्यर्थः । केवलात्सम्भवादसम्भवाच्च अन्यदेव मोक्षसाधनमित्युपनिषद आहुरिति इतरः पूर्ववत् स्पष्टमवशिष्टम् ॥ १३ ॥

सम्भूतिं च विनाशं च यस्तद्वेदोभयꣳसह ।
विनाशेन मृत्युं तीर्त्वा सम्भूत्या ऽमृतमश्नुते ॥ १४ ॥

अन्यदित्युक्तं विवृणोति । संभूतिं चेति । सम्भूतिं च समाधिरूपब्रह्मानुभूतिं च विनाशं च मानदम्भहिंसास्तेयबहिर्मुखेन्द्रियवृत्तिविशेषरूपा ये योगविरोधिनः तेषां विनाशं वर्जनं चेत्येतदुभयं यो विद्वानङ्गाङ्गिभावेन सह वेद स विद्वान् विनाशेन निषेध्यमाणेनेति शेषः । विरोधिनिवृत्तिरूपयोगाङ्गसेवनेनेत्यर्थः । मृत्युं समाधिविरोधिपापं तीर्त्वा—अपाकृत्य निष्क्रियासंभूत्या अमृतमश्नुते प्राप्तिरूपां संभूतिमेवाश्नुत इति भावः । अयमेव दम्भादिविनाशो बृहदारण्यके तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेदिति बाल्यशब्देन विद्याङ्गतया विहितः । अत्र संभूतिविनाशशब्दाभ्यां सृष्टिप्रलयविवक्षया कार्य्यहिरण्यगर्भस्याव्याकृतप्रधानस्य चोपासनं विधीयत इति शाङ्करव्याख्यानमनुपपन्नं तथा सति मृत्युतरणामृतत्वप्राप्तिरूपफलवचनानौचित्यादिति ॥ १४ ॥

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ १५ ॥

एवमाचार्य्यः साङ्गां भगवद्भक्तिमुपदिश्याथ तन्निष्ठस्यानुसन्धेयमन्त्रद्वयमुपदिशति तत्र प्रथमेन मन्त्रेण पूषन्शब्दविवक्षितं भगवन्तं प्रति प्रस्तुतां समाधिप्रतिबन्धकनिवृत्तिं प्रार्थयते हिरण्मयेनेति, हे पूषन्—आदित्यान्तर्यामिन्, य आदित्ये तिष्ठन्नित्यारभ्य य आदित्यमन्तरो यमयतीति शतपथश्रुतेः शास्त्रदृष्ट्या तूपदेशो वामदेववत् इत्यादिन्यायाच्च । यद्वा पूषापितपोषणस्वभावेत्यर्थः । सावादप्यविरोधं जैमिनिरिति च सूचितत्वात् सत्यस्य, सत्यशब्देनात्र प्रकृत्यादिवत्स्वरूपविकाररहितजीवात्मोच्यते सत्यं चानृतं च सत्यमभवदित्यादिषु जीवेऽपि सत्यशब्दप्रयोगात् । तस्य मुखं

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्य
श्रीभाष्यस्य प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं॰श्रीराममिश्रशास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः	७।)
श्रीभाष्यस्य प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा	६)
श्रीभाष्यस्य तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा	३=)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः	३।)
वेदपूर्त्तिः प्रथमो बिन्दुः सत्सम्प्रदायाचार्यपं॰स्वामिश्रीराममिश्रशास्त्रिप्रणीतो निर्विशेषाद्वैतनिराकरणपरः	१॥=)
वेदपूर्त्तिसहितो वेदार्थसंग्रहः	३॥।)
शास्त्रदीपिका	६।)
सङ्कर्ष-काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टचन्द्रिकोपेतम्, पं॰स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् ।	१।)
काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजप॰दामोदरशास्त्रिणा संशोधिता पूर्वार्द्धरूपा	५॥।)
तथा उत्तरार्द्धम्	८॥।)
माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता	७॥)
काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता	६॥)
श्रौतिकल्पार्णवतरणिः	६)
दिग्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता	॥=)
जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता	१॥)
लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, शेषशार्ङ्गधराचार्यविरचितया न्यायमुक्तावल्याख्यया टीकया सहिता	॥।)
सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम्	॥।)
तत्त्वमुक्ताकलापः–सर्वार्थसिद्धियुतः, बौधायनीयार्थसिद्धान्तानुसारी विशिष्टाद्वैतब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्किककेसरिणा सर्वतन्त्रस्वतन्त्रधिषणेन श्रीमद्वेङ्कटनाथदेशिकेन प्रणीतः	५॥=)
वेदान्तसिद्धान्तमुक्तावली, आर्थर्वीनिस्साहबकृताङ्गलभाषानुवादयुता	१॥।)
काव्यप्रकाशस्य इङ्गलण्डीयभाषानुवादः	३॥)
अथर्ववेदसंहिताया इङ्गलण्डीयभाषानुवादः	१२)
आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्यकाराणां परमगुरुणा श्रीयामुनाचार्यस्वामिना प्रणीतम्	॥।)
तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्विश्वकर्मविरचितया न्यायप्रदीपाख्यटीकया सहिता	१॥।

Digitized by Google

CONTENTS.

Page.

BRAHMAMṚITAVARSHINI, Translated by S. Venkataramana, B. A., B. L., High Court, Triplicane, Madras ... ... 503-535.

BIDHIVIVEKA of MANDANA MISRA with commentary Nyayakanika by Wachaspatti Misra, edited by P. Ram Shastri Tailang, Professor Sanskrit College, Benares 519

ĪSHĀ VÁSYOPANISHAT, edited by Swami Rama Mishra Shastri, Late Professor, Sanskrit College, Benares 551.

Digitized by Google

HARVARD COLLEGE LIBRARY
OCT 1 1906

काशीविद्यासुधानिधिः

THE PANDIT

A MONTHLY PUBLICATION

OF THE

BENARES COLLEGE,

DEVOTED TO

SANSKRIT LITERATURE.

NEW SERIES.

Nos. 10, 11 & 12.] Oct. Nov. & Dec. 1905. [Vol. XXVII.

BENARES:
PRINTED AND PUBLISHED BY THE PROPRIETORS,
E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS.

1905.

Copyright on each article reserved.

Price Rs. 9 per annum.

Digitized by Google

श्रीगणेशाय नमः ।

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः ।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः ।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

संस्कृतपुस्तकानां सूचीपत्रम् ।

	मूल्यम्
चित्रमीमांसा, अप्पयदीक्षितकृता तै॰ श्रीरामशास्त्रिणा संशोधिता	१)
तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, श्रीगङ्गाधरशास्त्रिणा संशोधित	।=)॥
गणकतरङ्गिणी, श्रीसुधाकरद्विवेदिनिर्मिता	१॥)
बालरामायणं नाम नाटकम्, श्रीराजशेखरप्रणीतम्	१॥)
प्रसन्नराघवं नाम नाटकं, श्रीजयदेवकविप्रणीतम्	१॥)
लघुकौमुदी	१)
लघुकौमुदी, श्रीयुतडाक्तरबालण्टैनाचार्य्येणाङ्गलदेशीयभाषायामनूदिता ..	१)
श्रीयुतपण्डितवरबालशास्त्रिणो जीवनवृत्तान्तः, श्रीगङ्गाधरशास्त्रिणा निरूपितः	४)
वैशेषिकसूत्रम्, श्रीयुतगाफ़ाचार्य्येणाङ्गलदेशीयभाषायामनूदितम्	≡)
मानवधर्मप्रकाशः, मनुस्मृति का हिन्दीभाषा में अनुवाद, ...	४)
शाश्वतधर्मदीपिका, ...	४)
अमरकोशः सटीकः	१)
योगवार्त्तिकम्	४)
षोडशपदार्थनिर्वचनम्	३॥=)
वाक्यार्थचन्द्रिका, परिभाषेन्दुशेखरस्य व्याख्या श्रीकामकोल्लूकशास्त्रि-संशोधिता	३)
काव्यप्रदीपः, पं॰ रामशास्त्रिभागवताचार्येण परिशोधितः	४)
वेदान्तसिद्धान्तादर्शः, श्रीमन्मोहनलालवेदान्ताचार्येण प्रणीतः	३॥)
खण्डनखण्डखाद्यं सटीकम् श्रीमन्मोहनलालवेदान्ताचार्यकृतटिप्पणीसहितम्	१)
	५)

Digitized by Google

श्लिष्टाः यूयमित्यपेक्षायामाह—ज्याघात इत्यादिना । येषां करतलं कार्मुकस्य धनुषः ज्याघातः शिञ्जिनीनादः भवति । कण्ठम् ओंकारनादो योगाभ्यासाद्भूतः भवतीति अत्राप्यनुषज्यते । अवनितले जगन्मण्डले प्रतापाख्यं तेजः उज्ज्वलप्रतापरूपमेव तेजो भाति । अन्तर्हृदये च आत्मीयज्योतिः ब्राह्मन्तेजो भातीत्यनुषज्यते । सिंहासनश्रीः राज्यासनशोभा राज्यं वक्ति व्यनक्ति, पद्मासनश्रीः योगाभ्यासाङ्गप्रधानासनशोभा परमं परां काष्ठां प्राप्तं शमं शान्तिं वक्ति ॥ राज्यस्य योगस्य च लक्षणानि युगपदेव युष्मासु उपलभ्यन्ते । अतो राजर्षयो यूयं राज्यानुरञ्जिता अपि ब्रह्मानन्दसन्दोहानुभाविन इति भावः । स्रग्धरा वृत्तम् ॥ १० ॥

कौशिकोक्तिमनुमोदयन्नाह—वाराङ्गनेति । एते राजान एव हंसाः (संन्यासिवाचिहंसशब्दप्रयोगेण जनकस्य विरक्त्यतिशयः सूचितः) वाराङ्गनानां करैः तरङ्गिताः उत्क्षिप्ताः ये चामराः तेषामेव या ऊर्मयः तरङ्गाः तेषु संस्पर्शीनि यानि श्वेतातपत्राणि शुक्लच्छत्राणि तान्येव शतपत्राणि कमलानि यस्मिन् तत् तस्मिन् एवम्भूते राज्यमेव यत् सरः सरोवरः तस्मिन् क्रीडन्ति विहरन्ति । राज्योचितसुखान्यनुभवन्तीति भावः ॥ अथ च धीराः धृतिमन्तः । योगीन्द्रो याज्ञवल्क्य एव चन्द्रो मार्गप्रदर्शकः तेन तत्प्रसादेन सुगमे सुबोधे पथि योगमार्गे । स्वस्य आत्मनो ब्रह्मानन्दस्य रसः आस्वादो यस्मिन् कर्मणि तद्यथा स्यात्तथा सञ्चरन्ति । योगानन्दमनुभवन्तीति भावः ॥ वसन्ततिलकं वृत्तम् ॥ रूपकमलङ्कारः ॥ ११ ॥

चित्रीयत इति । विचित्रभावं विस्मयं गतोऽहमित्यर्थः ।

लक्ष्मणं प्रतिबोधयन्नाह राम—छत्रच्छायेति, अमी भूभुजः जनकसदृशाः राजानः किमप्यनिर्वचनीयं ज्योतिः पारमात्मिकं शीलयन्ति अभ्यस्यन्ति । तदेव ज्योतिर्निरूपयति—यदित्यादिना । यत् ज्योतिः छत्राणां राज्योचितातपत्राणां छाया न तिरयति तिरोदधाति । अथ च दृप्यन् मत्तो यो गन्धद्विपः मदगजः तस्य मदसलिलमेव या मषी कृष्णद्रव्यविशेषः तस्याः यः पङ्कः स एव नाम यस्य स तथाभूतः कलङ्कः, राज्यश्रीजनितमदमत्ततेति यावत्, यत् ज्योतिः स्प्रष्टुं मलिनीकर्तुं न ईष्टे पारयति । पुनः लीलया सविलासं लोलः चञ्चलो यः चामराणां समीरो वायुः यत् ज्योतिः न शमयति शान्तीकरोति । योगानन्दविरोधीन्यपि राज्यलिङ्गानि अमीषाम् अन्तर्ज्योतिर्न म्लापयन्तीति विशेषोक्त्या जनकस्य प्रभातिशयः सूचितः । मन्दाक्रान्ता वृत्तम् ॥ १२ ॥

सकलेति । सकलानां कुवलयानां (हंसपक्षे कमलानां, राजपक्षे कुः पृथिवी तस्या वलयस्य मण्डलस्य 'उत्तंसः प्रधानं भूषणम् ॥

अस्मदिति । अस्मत्पूर्वपुरुषेषु चक्रवर्तिष्विति यावत् । ग्रामटिका क्षुद्रग्रामः ।

Digitized by Google

(५३) उक्तस्तुतिं द्रढयन्नाह—अवनिमिति । अवनिपालाः अन्ये राजानः संघशो बहुशः अवनिं पृथिवीं पालयन्ताम् । अनादरोक्तिरियम् । अवनिपतियशस्तु यथार्थपृथिवीपत्याख्या तु त्वां विना त्वदृते अपरस्य अन्यस्य राज्ञो नैव । युज्यत इति शेषः ॥ तदेव जानकीवार्ताप्रस्तावेच्छया द्रढयति—यदिति । यत् यस्मात्कारणात् । हे जनक । कनकगौरीं तनूजां प्रसूता सती भूः पृथिवी जगति अखिले संसारे भवन्तमेव अद्वितीयगुणतया दुहितृमन्तं वितेने कृतवती । पृथिवीप्रसूतया कन्यया त्वं दुहितृमान्, अतः त्वमेव पृथिव्याः यथार्थपतिरिति भावः । मालिनी वृत्तम् ॥ १३ ॥

कौशिकस्य महिमानं वर्णयन्नाह नूतनेति । नूतनानां भुवनानां निर्माणे सृष्ट्यां निपुणस्य दक्षस्य भगवतः इयम् अभिनववचनचातुरी प्रतिक्षणोचितवचनविन्यासः कियती नाम, न किमपि इति भावः । त्रिशङ्कुपातक्रुद्धेन विश्वामित्रेण सृष्ट्यन्तरं प्रारब्धम् इत्यादि पौराणिकी कथाऽत्रानुसन्धेया ॥ शलाकीकृत्येति । स खलु भवान् ख्यातकीर्तिः यस्य भवतः असमकोपेन अरुणा रक्ता रुचिः कान्तिः यस्याः सा तां एकीभूतां त्वां दृशं नेत्रं शलाकीकृत्य चित्रलेखनीरूपेण धृत्वा गगनतलमेव भित्तिः चित्राश्रयीभूता तस्यां सुरश्रेणीचित्रं रचयतः । प्रथमरचितम् अन्येभ्यः प्रागेव निर्मितम् सुधांशोः भानोश्च बिम्बयुगलं चन्द्रसूर्य्यमण्डलद्वयं सुधायाः स्वच्छलिखनद्रव्यस्य लाक्षायाश्च रक्तद्रव्यस्य यौ सान्द्रद्रवौ घनद्रवीभूतौ ताभ्यां भरितं पूरितं पात्रद्वयम् अभूत् । नूतनजगच्चित्रकारस्य विश्वामित्रस्य कोपारुणनेत्रं लेखनी, गगनतलं भित्तिः, सृष्टिविषयभूताः अभिनवसुरगणाः चित्रणीयपदार्थाः, चन्द्रमण्डलं स्वच्छरञ्जनद्रव्यपूर्णपात्रं, सूर्य्यमण्डलं च रक्तद्रव्यपूर्णपात्रं इति रूपकम् । शिखरिणी वृत्तम् ॥ १४ ॥

जनकोक्तिमनुमोदयन्नाह—त्रिशङ्कोरिति । त्रिशङ्कोः तन्नाम्नो राज्ञः स्वर्लोकादवनितले भूमण्डले पातं रचयितुं कोपाद्विकसितं पदाब्जं पादाहतिव्यापारे यस्य स तथाभूते सुनासीरे इन्द्रे सति विकसितः प्रफुल्लितः । पुनः भक्त्या मुकुलिते कराब्जे प्रणतौ यस्य स तथाभूते सुरस्तोमे देवगणे सति मुकुलितः सङ्कुचितो, निवृत्त इति यावत् ॥ कथमसौ विकसितो मुकुलितश्चेत्यपेक्षायामाह—यदीय इति । यदीयो यस्य विश्वामित्रस्य नव्यमभिनवं यत् त्रिदशनगरं देवपुरं तस्य आरम्भे नूतननिर्माणे रभसः उत्साहः ॥ इन्द्रपादतलाहते त्रिशङ्कौ क्रुद्धो विश्वामित्रो देवनगरं निर्मातुमुत्साहितो भूत्वा पुनर्भीतेन सुरगणेन प्रणतेन अभिनन्दितः सन् तस्माद्विरराम ॥ शिखरिणी वृत्तम् ॥ १५ ॥

प्रतापितेति । प्रतापितं भीत्या प्रकाशेन च भुवनत्रयं येन तत्तथाभूतम् । कौशिकस्य महिमानं लक्षणाय प्रकटयन्नाह—रोषेति ।

Digitized by Google

रोषेण चाण्डालीभूतत्रिशङ्कुस्वर्गारोहणात् क्रोधेन अभिभूतो यः पुरुहूतः इन्द्रः तस्य पदेन चरणेन अभिभूतं आहतं त्रिशङ्कुं दृष्ट्वा कोपेन विपाटला रक्ता भ्रोः शोभा यस्याः सा तथाभूता । पुनः आकुड्मलीकृतानि प्रणामार्थे मुकुलितानि कराम्बुजानि देवगणकरकमलानि तेषां राजिभिः पंक्तिभिः प्रतिबिम्बिताभिः रम्या सुशोभना । एवम्भूता यस्य दृष्टिः अमरैः देवैः उपासिता पूजिताऽभूत् । उपमानमुपन्यस्यति—सन्ध्येवेति । सन्ध्याऽपि अस्तमितसूर्यावशिष्टकिरणभासा रक्ता सूर्यास्तमयेन च मुकुलितैः कमलैः रम्या भवति । किं च सर्वे जनाः कृताञ्जलय एव सन्ध्योपासनं कुर्वन्तीत्यनुसन्धेयम् ॥ वसन्ततिलकं वृत्तम् ॥ १६ ॥

(५४) रत्नगर्भेति । रत्नगर्भा पृथिवी ; रत्नगर्भागर्भादेव कन्यारत्नस्योत्पत्तिरुचिता ॥

अलङ्करिष्यत इति । कन्यारत्नेनालङ्कृतं मां जामातृरत्नमलंकरिष्यत इति भावः । भवत्प्रसादादिति स्वाभीप्सितरामचन्द्रवरणसूचकम् ॥

रामचन्द्रं दृष्ट्वा जनकः पृच्छति—सकलेति । सकलानां जनानां विलोकनस्य दर्शनस्य यः उत्सवः उल्लासः तस्य अयनम् आश्रयः, समस्तजनतादर्शनोल्लाससरणिरिति यावत्, अयनमित्यत्र नित्यनपुंसकत्वाच्च लिङ्गव्यत्यासः । अयं पुरः अग्रे कुमारः कतरः । यः हरितमणिमयूखःमरकतमणिकान्तिरिव हारिणः सुन्दरस्य कल्पतरोः प्ररोहस्य अङ्कुरस्य लीलां शोभां कलयति भजते । मरकतमणिकान्तिहारिकल्पतरोरपि नवाङ्कुरमेव रामसदृशमित्यहो सुकुमारता बालकस्येति भावः ॥ पुष्पिताग्रा वृत्तम् ॥ १७ ॥

लक्ष्मणं परामृशति नीलनीरजेति । नीलनीरजदलवत् नीलकमलवत् उज्ज्वला कान्तिः यस्य स तस्य तथाभूतस्य रामचन्द्रस्येति यावत्, अन्तिके समीपे काञ्चनवत् गौरः लक्ष्मणः स्फुरति । उपमानमुपन्यस्यति—लोचनस्येति । सुदृशः सुलोचनायाः लोचनस्य नीलिमप्रधानस्य, अन्तिके इत्यनुषज्यते, श्रवणान्ते सन्निविष्टः चम्पकगुच्छ इव ॥ स्वागता वृत्तम् ॥ १८ ॥

कर्णामृतमिति । भाविवात्सल्यसूचकम् ॥ रामलक्ष्मणयोः सादृश्यं विभाव्याह—एतयोरिति । उदाररूपयोः रूपातिशयशालिनोः, पुनः उल्लसन्तौ सहजस्य स्वाभाविकस्य सौहृदस्य स्नेहस्य श्रीः ययोः तौ तयोः तथाभूतयोः, अव्यक्तपरस्परस्नेहशालिनोरिति यावत्, एतयोः कुमारयोः कामपि स्वजनतां परस्परसम्बन्धित्वं विभावये तर्कयामि । कयोरिव । कौस्तुभामृतमयूखयोरिव समुद्राज्जातयोः कौस्तुभमणिचन्द्रयोरिव ॥ रथोद्धता वृत्तम् ॥ १९ ॥

Digitized by Google

शतानन्दोक्तिं समर्थयमान आह—पतयोरिति । प्रकृत्या स्वभावेनैव रम्यं रूपं ययोस्तौ तयोः उत्कण्ठितस्यादि पूर्ववत् । एवम्भूतयोरेतयोः कुमारयोः आन्तरः आन्तरिकः बाह्यसादृश्यातिरिक्त इति यावत्, सविधः सम्बन्धः । प्रत्यगात्मपरमात्मनोरिव जीवात्मपरमात्मनोः परब्रह्मभूतयोः सम्बन्ध इव प्रतिभाति ॥ योगिराजमुखे समुचितमेवैवंविधमुपमानम् । रथोद्धता वृत्तम् ॥ २७ ॥

(५५) योगीश्वरशिष्येति । जनकसम्बोधनम् । ईदृशेषु गभीरेषु गहनेषु सामान्यजनदुरधिगमेषु । अभिनवाः नूतनाः अननुभूतपूर्वाः ये उदन्ताः वार्ताः प्रत्यगात्मपरमात्मसादृश्यवन्नारायणतदंशावतारभूतयोः रामलक्ष्मणयोः सादृश्यमित्यर्थं रूपाः ते एव पीयूषममृतं तस्य वेशन्तेषु सरस्सु भवत एव योगिनो मनो निमज्जति एवं विधगूढविषयाणि निरूपयसीति भावः । अनयोः रामलक्ष्मणयोः स्वजनभावे सम्बन्धित्वे वयं साक्षिणः । वयं तु केवलं जानीमो यदिमौ भ्रातराविति भावः ॥

रामलक्ष्मणौ वर्णयन्नाह—तनुश्रियेति । तनोः शरीरस्य श्रिया कान्त्या निर्जिते विजिते अधरीकृते चम्पकोत्पले (चम्पको लक्ष्मणेन नीलोत्पलं रामेणेत्येव क्रमः सर्वत्र) याभ्यां तौ तथाभूतौ । पुनः सुवर्णोत्पलस्य नीलोत्पलस्य च कोशवत् कुड्मलान्तरवत् कोमलौ स्निग्धौ कमनीयौ पुनः दृशां नेत्राणामुत्सवदाने उल्लासने दक्षिणौ चतुरौ ॥ सुलक्षणौ सकलशुभलक्षणसम्पन्नौ । इमौ लक्ष्मणलक्ष्मणाग्रजौ । लक्ष्मणरामचन्द्रावित्यहो साश्चर्यहर्षे । अत्र व्यतिरेकोपमानुप्रासाख्यानां सङ्करः । वंशस्थवृत्तम् ॥ २१ ॥

रामस्यामानुषेयत्वं विभाव्याह—यथाऽहमिति । निःसीमोऽपारो यो हर्षः तेन सुभगो रम्यो भोगः आस्वादः साक्षात्कारो यस्य स तस्मिन् तथाभूते । यद्वा निस्सीमः उत्सवः ऐश्वर्यं तस्य भोगः आस्वादो यस्मिन् स तस्मिन्, सदानन्दमये इति यावत् एवम्भूते चेतःप्रणयिनि चिन्मये । पुनः भवकथापथातीते सांसारिकवार्ताऽनिर्वचनीये परमे पुंसि परब्रह्मणि अहं यथा रमे आनन्दं लभे । समाधाविति भावः । तथैव दलतः प्रफुल्लस्य कमलस्य स्वच्छस्य नीलोत्पलस्य दलस्य पत्रस्य च उदरो गर्भस्तद्वत् श्यामे अस्मिन् बाले रामे रामाभिधे नयनपदवीं दृष्टिसरणिमागतवति अहं रमे इत्यभिसन्धिः ॥ अनेन रामस्य परमपुरुषांशत्वं व्यज्यते ॥ शिखरिणीवृत्तम् ॥ २३ ॥

न खल्विति । प्रश्नरूपः काकुः । सकलसामान्यजननयनाह्लादकोऽपि चन्द्रः शिवशिरोवर्तिनः चन्द्रस्यैव अन्यद्रूपम् ॥ यथा सकललोचनानन्दकारस्य आकाशगतस्य चन्द्रस्य हरशिरःशेखरीभूतचन्द्रात् न कश्चिद्भेदः तथैवात्रापि सकललोकप्रत्यक्षस्य रामचन्द्रस्य

Digitized by Google

योगिजनानुभवनीयपरमपुरुषात्र कोऽपि भेद इत्याशयः ॥ कः पुनरिति । यस्येमौ पुत्रौ स सर्वेषां पुत्रवतां वरिष्ठ इत्यतः कथय कोऽसौ धन्यो यस्येमौ पुत्राविति भावः ॥

जनकप्रश्नोत्तरं वक्तुकामः दशरथं स्तुवन् तस्य कीर्तिं वर्णयति-किमिति ॥ यस्य दशरथस्य कीर्तयः दिशिदिशि त्रिदिवौकसां देवानां कान्ताभिः स्त्रीभिः जातकुतूहलाभिः उत्सुकाभिः सानन्दं यथा स्यात्तथा आलोकिताः सन्त्यः क्रीडन्ति प्रस्फुरन्ति । कुतूहलस्य कारणमाह-किमित्यादिभिः । एताः कीर्तयः किं शीतांशोः चन्द्रस्य मरीचयः किरणाः? अथवा सुराश्रोतस्विन्याः स्वर्गङ्गायाः गङ्गायाः वीचयो लहर्यः किम्? किं वा केतकस्य पुष्पविशेषस्य सूचयोऽग्रभागाः? अथवा चन्द्रोपलानां चन्द्रकान्तमणीनां चयः समूहः किम्? कीर्तेः । धवलत्वात् तस्यां सकलस्वच्छवस्तुसन्देहः ॥ संशयोऽत्रालङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥ २३ ॥

सकलेति । सकलैर्गुणैरवदातः शुद्धः । "अवदातः सितो गौरः" इत्यमरः ॥

अपिनामेति । तातप्रतापवर्णनश्रवणोत्कण्ठां व्यनक्ति पुनर्दशरथप्रतापं वर्णयन्नाह-दस्येत्यादि ॥ यस्य दशरथस्य उद्यन् यो भुजदण्डः तस्य चण्डिम्ना उद्धतत्वेन वलत् उल्लसत् तत् कोदण्डं धनुस्तस्य लीलायितैः चेष्टितैः निष्पीते नाशिते दनुजेन्द्राणां दानवराणां याः चन्द्रवदनाः रमण्यः । तासां भ्रूवल्लरीणां भ्रूलतानां विभ्रमे । दनुजेन्द्रनिधनात् तद्रमणीनां वैधव्येन भ्रूविलासे विनाशिते सतीत्यर्थः । आखण्डलीयमिन्द्रस्य वपुः शरीरम् । पौलोम्याः शच्याः कराङ्कुराणां नखाग्राणां व्यतिकरात् संस्पर्शादेव केवलं अक्षविपाटनक्षतमयीं रुधिराप्लावितां लक्ष्मीं शोभामालम्बते । इन्द्रस्य वपुः केवलं शच्या नखैः क्षतं न पुनर्दानवास्त्रैरिति हृदयम् । शार्दूलविक्रीडितं वृत्तम् ॥ २४ ॥

प्रश्नोत्तरमुपसंहरति तस्येति । पद्मवनबान्धवस्य सूर्यस्य वंशे ये उत्तंसाः शिरोरत्नभूता मांसला विशाला महामणयः प्रख्यातनृपतयस्तेषां मौलिः प्रधानभूतः तस्य, रविकुलमौलिमाणिक्यस्येति यावत् । एवम्भूतस्य दशरथस्य इमौ पुरोवर्तिनौ । कायकान्त्या शरीरभासा परिभूतो निर्जितो मनोजः कामो याभ्यां तौ तथाभूतौ कुमारौ ॥ स्वागता वृत्तम् ॥ २५ ॥

दशरथप्रतापं वर्णयन्नाह-यद्बाह्विति । यस्य दशरथस्य बाहू धनुर्मौर्व्याः समाकर्षणेन जातो यः किणः कठोरीभूतमांसग्रन्थिः तस्य श्यामिकां कालिमानम् वहतः दधाते । कामिव । पराक्रमेण हृतां प्रत्यर्थिनां वैरिणां याः सीमन्तिन्यः रमण्यः तासां चक्षुषां कज्जलस्य

कालिकां श्यामतामिव। निहतेषु शत्रुषु तत्स्त्रीभिर्नित्यः कज्जलं नैव परिदधते तदेव च कज्जलं धानुगर्तकिणरूपेणावस्थितमित्युत्प्रेक्षा। अद्य च यस्य दोष्णा बाहुना तत्सम्बन्धेन दुर्मदं उद्धतं कर्म यस्य तत् कार्मुकं तस्य गुणस्य शिञ्जिन्याः ये प्रोत्तालाः उद्धताः कोलाहलाः टङ्काराः तैः वैरिस्त्रीणां कलमेखलानां रणत्काञ्चीनां कलकलाः शिञ्जितानि पीताः निगीर्णा इव अस्तं गताः निराकृताः। निपातिते वैरिषु तत्स्त्रियः मेखलां परित्यक्तवत्यः। तेषामेव रणितानि दशरथधनुर्मौर्वीटङ्काररूपेण प्रतिभान्तीत्युत्प्रेक्षा। शार्दूलविक्रीडितं वृत्तम् ॥ २६ ॥

पुनर्दशरथप्रतापं वर्णयन्नाह यस्येन्द्रारीति। इन्द्रारेः दानवस्य यो जयः तस्य तज्जन्यया श्रिया शोभया सह मौर्वीलतां धनुर्ज्यां अधिरोप्याकृष्य, आततज्य एव यस्य धनुषि सर्वे दानवाः पराजिता इति भावः। भूवलयेन पृथ्वीमण्डलेन साकं सह चापवलयं बिभर्ति इति दोर्मण्डले बाहौ। आखण्डलः इन्द्रः पौलोमीकुचकुम्भस्य सीमनि प्रान्तभागे नवमविरचितं नखाङ्कं रहः एकान्ते पश्यन् चेतसि मनस्येव केवलं, न तु करे, कोदण्डं धत्ते। शत्रुनिराकरणभारे दशरथहस्तयोः अर्पिते सति निःशङ्कं शच्या सह विहरन् इन्द्रः तस्याः कुचयोर्धनुराकारं नखाङ्कं दृष्ट्वा सादृश्यात् स्मरत्येव केवलं धनुः न कदापि करे धत्ते प्रयोजनाभावादित्याशयः ॥ सहोक्तिश्चालङ्कारः। शार्दूलविक्रीडितं वृत्तम् ॥ २७ ॥

रामलक्ष्मणौ परामृशन्नाह—तपनकुलेति। तपनकुलस्य सूर्यवंशस्य याः शिरःकिरीटकोटयः मुकुटश्रेणयः। तासु स्फुरत् पदकोत्पलकुड्मलम् चरणकमलमुकुलं तस्य तद्रूपस्य रविकुलमौलिभूषणस्य दशरथनृपतेः इमौ तनूजौ तनयौ मृगाङ्कप्रतिमे चन्द्रसदृशे सुरेखे कमनीयाभोगे च मुखाम्बुजे ययोः तौ तथाभूतौ किमिमौ दशरथतनूजौ इति प्रश्नः ॥ पुष्पिताग्रा वृत्तम् ॥ २८ ॥

द्वे अपीति। द्वे अपि दृशौ नेत्रे तनयावलोकनेन तनयद्वयावलोकनाकुलिते इत्यभिसन्धिः ॥

द्विशाविति। पार्श्वद्वयमित्यर्थः। चतुरो दशरथतनयानाधिकृत्य विश्वामित्रोक्तिः ननु द्विशा इति ॥

चरुभागानामिति। ऋष्यशृङ्गकृतयज्ञनिष्पादितचरुभागजनिता इत्यर्थः।

भवतोरिति। महात्मान एव महात्मनां प्रभावं गुणं च जानन्तीत्याशयः। 'गुणी गुणं वेत्ति न वेत्ति निर्गुणः' इत्यादि।

(५८) महिमेति। महिम्नः आभोगो विस्तारः तत्र। "कासारः सरसी सरः" इत्यमरः। दशरथो महिम्ना सागरसमः। अहं तु सामा-

न्यदर एव। अतो नैव शक्यते मया दशरथमहिमविस्तृतिं परिशीलयितुमित्याशयः॥ शोभन्त इति । अधरीकृता नीचीकृताः आत्मनो महिमा यासु ताः तथाभूताः सत्यविधुराः अनृता अपि । विनयमधुराणां विनीतानां वाचः शोभन्त इत्यभिसन्धिः ॥ तत्त्वतो दशरथमहिम्नो जनकमहिमा न लघीयान् । किन्तु विनयोक्तिषु आनृत्यं न दोषायेति भावः ॥

निजमनोरथःस्वरूपं कुर्वन् जनकोक्तिमन्यथा समर्थयते—जज्ञिवानिति । इन्दुमिव सुन्दरमूर्तिं रामं स राजा दशरथो जज्ञिवान् उत्पादितवान् । त्वं पुनः । लोकलोचनविगाहने शीलं यस्याः सा ताम् अवलोकनीयस्वरूपां सीतां कुमुदिनीमिव । उत्पादितवानित्यनुवर्तते । सागराच्चन्द्रस्य सरसः कुमुदिन्याश्च जन्म । अतः स सागरः त्वं च सर इति समुचितमेवेति हृदयम्। कुमुदिनीचन्द्रवत् च सीतारामचन्द्रयोः सम्बन्ध उचित इति सूचितं मुनिना । तथा चात्रगतं लक्षणेन । स्वागता वृत्तम् ॥ २६ ॥

अपवार्येति । यथाऽन्यो न शृणोति तथेत्यर्थः। संविधानमिति । वृत्तान्त इत्यर्थः ।

भङ्ग्येति । वक्रोक्त्येत्यर्थः ॥ किमपीति । सीतारामचन्द्रविवाहरूपमित्यर्थः । रभसवशंवदेनेति । “रभसो वेगहर्षयोः” इति विश्वः। रभसस्य वशंवदेन परवशेन। हर्षातिरेकपरवशवर्तिनेत्यर्थः । विस्मृतमिति । असम्भावनीयं मङ्गलं यतः सम्भावयति । नैवानमनीयं धनू रामेण अतिबालेन तत्कृतोऽस्य जानकीकरग्रहसम्भावनेति हृदयम् ॥ वक्रकमनीयेनेति । वक्रो भङ्ग्युक्तः कमनीयः सकलजनहृदयंगमाभिलाषसूचकत्वात् ॥

उद्भावयतीति । मम स्मारयतीत्यर्थः ॥ भवत्विति । समीहितमेव तवः इति भावः ।

(५६) मुग्धइवेति । अनभिज्ञ इवेत्यर्थः । दुग्धमुखमिति । अतिबालकमित्यर्थः ॥ धनुर्महिमानं वर्णयन्नाह—एतदिति । एतत् आलापविषयभूतं तत् प्रख्यातं तुहिनगिरिमयं हिमालयनिर्मितं कार्मुकं धनुः। यत्र यस्मिन् । दर्वीकराणां सर्पाणां पतिः वासुकिः मौर्वी ज्या जज्ञे यात इति सर्वत्र सम्बध्यते। उदधिसुतायाः लक्ष्म्याः नायको विष्णुः सायको बाणो जज्ञे। एवम्भूतमेतत् धनुः इन्दुमौलेः शिवस्य दोर्दण्डैः बाहुभिः नतम् आततज्यमपि कार्मुकाणां मध्ये उन्नतं उत्कृष्टं शैवमपि धनुः । त्रिपुरासुररमणीनां बाष्पाम्भोवृष्टये अश्रुजनने ऐन्द्रमेवासीत् । यथोन्नतमैन्द्रं धनुः जलवृष्टिं जनयति तथैवोन्नतं शिवस्य धनुः त्रिपुरासुररमणीनामश्रुवर्षणं चकारेति भावः। नतमप्युन्नतं शैवमप्यैन्द्रमित्यत्र विरोधाभासः । स्रग्धरा वृत्तम् ॥ ३० ॥

Digitized by Google

हरधनुर्माहात्म्यं वर्णयन्नाह–सेवायातेति । सेवायै आयाताः ये समस्ताः खेचराः देवाः तेषां करक्रोडाभिः चलन्त्यो याश्चामरश्रेणयः ताभ्यो निःसृतो यो मारुतः तस्य पानेन पीनो यो ज्याभूतः मौर्वीभूतः पन्नगवरो वासुकिः । तमाकर्षति यः तेन पशुपतिना पुरवैरिणा शिवेन । यदीयैः कार्मुकसम्बन्धिभिः गाढं दृढं यथा कुञ्चनमाननं तेन जृम्भमाणाः उत्पद्यमानाः ये तुहिनस्पन्दाः हिमप्रवाहाः तैः । श्रमः त्यक्तः । तदिदं शैलेन्द्रसारं हिमालयसारभूतं धनुरिति अहं जानामीत्यभिसन्धिः । कार्मुकस्य तुहिनगिरिमयत्वात् तदानमनात्तुहिनप्रवाह उचित एव । पवनपानस्थूलज्यारज्ज्वाकर्षणेन यः श्रमो जातः स तुहिनप्रवाहस्य अतिशीतलत्वाच्छान्त इति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ३२ ॥

रामचन्द्रवीर्यं जनकम्प्रति बोधयन्नाह–मारीचेति । मारीचस्य मारो मारणं तस्यां चतुरम् । पुनः सुबाहोः अपचारणं सुबाहुनिवारकम् पुनः ताटकाताडनं ताटकाघातकं धनुः लक्ष्मणकरं न्यस्यताम् । अत सुबाहुमारीचताटकानिराकरणोऽयं बालको न सामान्यबालकतया लघु मन्तव्य इति हृदयम् ॥ ३३ ॥

असम्भावनीयमिति । अतिकिशोरकतदाकर्णराक्षसनिराकरणं निर्वर्ण्य रामचन्द्रकृतशरासनारोपणपुरस्सरजानकीकरग्रहणमसम्भावनीयमनोऽभिलाषं कथं वृथा उद्भावयसि जनकेति ॥

रामचन्द्रस्य पराक्रमं वर्णयन्नाह–प्राप्येति । इतः मत्सकाशात् क्रमात् यथोचितक्रमेण चापनिगमान् धनुर्वेदान् प्राप्य सम्यगधीत्य अभ्यस्य पुनः विशिखैः बाणैः निशाचरान् राक्षसान् सम्प्रताड्य । अस्मदीयमखस्य यज्ञस्य या रक्षणक्रिया तस्यां या दक्षता निपुणता सैव गुरुदक्षिणीकृता । गुरुदक्षिणारूपेण मम यज्ञरक्षणं कृतं रामचन्द्रेणेति भावः । रथोद्धता वृत्तम् ॥ ३४ ॥

(६०) धनुरुद्यमनासम्भवं प्रदर्शयन्नाह–मारीचमुख्येति । मारीच एव मुख्यो येषां ते तथाभूताः ये निशाचराः तेषां यच्चक्रं समूहः तस्य चूडायाः शिरोभूषणस्य चन्द्रस्य या मरीचयो रश्मयः ताभिः चुम्बितं पादपीठं यस्य स तथाभूतः । शशाङ्कमुकुटस्य शिवस्य योऽचलः पर्वतः कैलासः । तस्य चालने उत्तोलकोऽपि, रावणोऽपीति यावत्, अत्र अस्मिन् धनुषि विफलो बाहुबले अवलेपो गर्वो यस्य स तथाभूतः । अभवत् । न शक्तो रावणोऽपि धनुश्चालयितुम् । अतो मारीचमात्रदमने रामेणातीवाशोभीति हृदयम् ॥ वसन्ततिलकं वृत्तम् ॥ ३५ ॥

अत एवेति । समुचित एव कुण्ठीकृतदशकण्ठे दशकण्ठदमनस्य प्रयास इति हृदयम् ॥

कुमुदिनीति । कुमुदिनीकान्तकलाकिरीटः शिवः तत्कार्मुकस्य पदारोपणं तत्र प्रवीणतया ॥

रामं प्रति विश्वामित्रस्योक्तिं परामृशति—यस्येति । यस्य विश्वामित्रस्य तपःश्रीः तपःप्रभावः सकले जगति निस्तमिस्रा अविकला ज्योतिष्मती, स्वच्छेति यावत्, ख्याता । एवम्भूतः एष गाधेः तनूजो विश्वामित्रः मिथ्या अपूरणीया उत्कण्ठा आशा यस्य स तथाभूतः कथं स्यात् । न कदापीति भावः । अपरं च रामो बालः शिशुः । चन्द्रमौलेः शिवस्य कार्मुकं धनुश्च किमपि अनिर्वचनीयं यथा स्यात्तथा गहनम् । अतः कथं स तदारोपयिष्यतीति । उभयपक्षस्य प्राबल्यात् बालरामकृतधनुरारोपणासम्भावनीयत्वं कौशिकोत्कण्ठासूचिततत्सम्भावनीयत्वं च विभाव्य मे चित्तवृत्तिः मुहुः दोलारोहं कलयति । उभयपक्षाश्रितत्वाच्चञ्चला भवतीति भावः । 'इत्येकपक्षाश्रयविक्लवत्वादासीत्स दोलाचलचित्तवृत्तिः' इति रघुवंशे । मन्दाक्रान्ता वृत्तम् ॥ ३६ ॥

रतिरिवेति । मे नन्दिनी पुत्री सीता रतिरिव कामवधूरिव [illegible] । अयं पुरोवर्ती कुमारो रामः कुसुमशर इव कामदेव इव रूपस्य सौन्दर्यस्य सारः, एकमात्राश्रय इति यावत् । एवं सति यदि इदं धनुः अस्य हस्तं प्राप्य कुसुममयमिव कामधनुरिव लघु स्यात् तर्हि सम्प्रदायः रतेः कामदेवपत्नीत्वं कामदेवस्य च कुसुममयचापधारित्वमित्येवं रूपः सम्भूतः पालितः भवेदिति शेषः । मालिनी वृत्तम् ॥ ३७ ॥

अनुवर्तस्वेति । धनुरानयनाय आनमनाय च राममाज्ञापयेत्यर्थः ॥

(६१) **सुमतिरिति** । धनुरारोपणपणाद्विरमेत्यर्थः ।

सन्देशप्रेषकरूपेण परशुद्वारा परशुरामं वर्णयति **पीत्वेति** । हे वैदेह स जामदग्न्यपरशुः त्वामेतदाभाषते इत्यभिसन्धिः । कः स इत्यपेक्षायामाह—**पीत्वेत्यादि** । यः परशुः क्ष्मापालनारीदृशां सकलनृपतिरमणीनेत्राणां कालिमानं कज्जलमखिलं निःशेषं पीत्वा । तासां पतीन् निहत्य ताः विधवाः कृत्वा कज्जलमपसार्येत्यर्थः । पुनः स्फीतं यश एव योऽट्टहासः उच्चैर्हसनं तस्य महसा कान्त्या लोकत्रयं शुभ्रतां स्वच्छतां नीत्वा । अद्यापि चरितानां शिवचरित्राणां ये एकदेशाः केचिदंशाः पुरस्त्रीकज्जलापसरणाट्टहासस्वच्छीकरणरूपाः तेषां विभवैः अनुकारैः चण्डीशं शिवं सेवते । स एवंविधः परशुरिति सम्बन्धः । नरपतिरमणीकज्जलापसारणेन यशोधवलीकरणेन च शिवस्य चरितैकदेशमनुकुर्वाणः तं सेवते इति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ३८ ॥

गर्वाङ्कुरस्येति । पतद्गर्वांशमिव गम्यते यत्सन्देशेऽपि काचिदुद्धतता वर्तत इत्यर्थः । किं तत् यदाभाषत इति पूर्वेण सम्बन्धः ॥

सन्देशं विवृणोति **कस्मैचिदिति** । कस्मैचित् नरपतिशिशवे ।

Digitized by Google

धनुरारोपणपरीक्षामकृत्वैवेत्यर्थः । कन्यां देहि । ततश्च मत्प्रसादेन दीर्घमायुर्लभस्व । पुनः पुरमथनस्य शिवस्य धनुषः यत् कर्षणमाकर्षणं तस्य आलापः कथैव यत् पापं तस्मात् नः अप्रियात् व्यापारात् विरम । धनुरारोपणवार्त्तामेव मा कार्षीरित्यर्थः । नो चेत्, अन्यथा, मम धनुःकर्षणालापरूपस्य कलुषस्य पापस्य यो मलोपङ्कः कज्जललेपः । तस्य संक्षालनायां क्षालनक्रियायां मम परशोर्यत् विस्तारि धारायाः उज्ज्वलं तस्मिन् बहलो यः पयःपूरः जलप्रवाहः तस्मिन् गो दुरावगाहः अवगाहनं स एवान्यः पूर्वोक्तादन्यादृशः उपायोऽस्तु । यदि त्वं मास्मद्वचनप्रतिपालनं करिष्यसि तदा परशुधारानिपात एव तव पापस्य शमनोपाय इत्यर्थः । स्रग्धरा वृत्तम् ॥ ३९ ॥

जनकस्य प्रतिसन्देशः त्वं मित्रमिति । हे जामदग्न्यरामो त्वं मम मित्रम् । नित्यनपुंसकत्वाच्च लिङ्गपरिवृत्तिः । तेन तत एव कारणात् एतद् वक्ष्यमाणं त्वमाभाष्यसे सन्दिश्यसे । यत् किल सम्प्रति अधुनैव यथाप्रतिश्रुतं धनुरारोपणपुरस्सरम् इयं कन्या मया दीयते । तेन तस्मात् कारणात् स्वयमेव एत्य आगत्य भवता । धूर्जटेः शिवस्य धनुषो धौरेयो वहनशीलो यो दोषो बाहू ताभ्यां सम्पत् शोभा यशो यस्य स तस्य एवम्भूतस्य मम जामातुः पुरतः अग्रे चिराय चिरकालपर्यन्तं धाराजलं त्यज्यताम् । तस्यारामायेति ध्वनिः ॥ धूर्जटीत्यादिः हेतुगर्भं विशेषणं हरधनुर्भञ्जकस्य परशुरामसमाख्यत्वात् ॥ शार्दूलविक्रीडितं वृत्तम् ॥ ४० ॥

आङ्गिरसेति । हे आङ्गिरस शतानन्द इदं तावदारब्धमेव ज्ञाम हास्येन निजकोपानलकणिकास्फालनमित्यर्थः । अतिगम्भीरेति । अतिगम्भीरः अतीवदुरवगाहो यो भुजसारकासारः बाहुबलसरोवरः तस्य ये कैरवाः तेषामारामः आपगः । अनेन विशेषणेन स्फुलिङ्गनिवारकत्वं सूचितम् ॥

परःसहस्रा इति । सहस्रात् परा इत्यर्थः । श्रीकण्ठेति । अमी दृश्यमानाः नानादिगन्तजगतीपतयः नानादेशराजानः श्रीकण्ठस्य कार्मुकेण निरस्तो भुजावलेपः भुजबलदर्पो येषां ते तथाभूताः सन्तः मम अभ्यर्थनां प्रार्थनाम् अभिवर्तमानाः पालयन्तः कार्णिकदृशानि किर्याञ्चनपर्यन्तं नरेन्द्रपुत्रां उचितातिथिसत्कारं गृह्णन्ति स्वीकुर्वन्तः तिष्ठन्तीत्यर्थः । वसन्ततिलकं वृत्तम् ॥ ४१ ॥

(६३) तदेषामेवेति । अनादरे षष्ठी । पूरयेति । चापारोपणेनेत्यर्थः ।

अपरिशीलितेति । अपरिशीलिता अपर्यालोचिताः सन्निवेशाः गृहदेशविभागाः यस्य स तस्य तथाभूतस्य प्रत्यन्तरीभूयतां सहायरूपेण उपसर्पतां भवानित्यर्थः ॥ करेति । करे कलिता न्यस्ता कमलमाला स्वयंवराभःणहरोत्रमाला यस्याः सा तस्याः ।

रामचन्द्रेति। रामचन्द्रस्य यशः तस्य या पताका तस्याः केतुदण्डेन। एवम्भूतेन हरचापदण्डेन विभाति उन्नतमेव किम्। विधुदुन्नतहरचापदण्डं यशःपताकाकेतुदण्ड एवेति भावः।

चापभञ्जनं वर्णयन्नाह-राघवेणेति। त्रिशुनाऽपि अतिबाल्यत्रस्तेनापि राघवेण लीलया हेलया अनायासेनैव नमितः आरोपितो हरचापः। यस्य गुणघोषः ज्याघातनिस्वनः (अथ च कीर्तिघोषः) अम्बरे ऽपि गमितः सन् दूरमुल्लसति। न केवलं भूमण्डलमपि तु अम्बरतलमपि व्याप्तं ज्याघोषेण रामचन्द्रयशोवर्णनघोषरूपेणेति भावः॥ स्वागता वृत्तम्॥ ४२॥

कोऽपिकोऽत्रिमनुमोदयन्नाह-पूर्णा इति। पुरारेः शिवस्य चापस्य कपटेन छलस्य गिरिराजस्य (तुहिनगिरिमयत्वात् काकूक्तिः) या गूढाः अनेकगुहाः कन्दराः। तासां गभीरकुहरस्फाराः गुहान्तर्गतविवराः तेषु प्रतिध्वानिभिः। पुनः मौर्वीभूतः यो भुजङ्गराजः शेषः तस्य वदनदेशेभ्यः सहस्रवदनेभ्यो विसर्पन्ति निर्गच्छन्ति यानि वर्णानि तैः प्रारब्धा या आर्यस्य रामचन्द्रस्य यशःप्रशस्तिः कीर्तिवर्णनं तत्सदृशमिव भासमानैरित्यर्थः। एवम्भूतैः ज्याघातघोषैः दिशः पूर्णाः व्याप्ताः। शार्दूलविक्रीडितं वृत्तम्॥ ४३॥

(६४) एतैरिति। एतैः श्रूयमाणैः श्रीकण्ठकोदण्डस्य धनुषः त्रुटन्तीया मौर्वी तद्भवैः तदुद्भूतैः रवैः शब्दैः द्वारीभूतैः मम प्रतिज्ञया साकं मम मनोरथः अभिलाषोऽपि पूर्णः॥ न केवलं दिश एव पूर्णाः अपि तु मम प्रतिज्ञा मनोरथश्च पूर्णा इत्यर्थः। सहोक्तिरलङ्कारः॥ ४४॥

समप्रीक्षियत इति। परस्परालोकनेन। धनुःखण्डसदृशभ्रूयुगलमेलनेनेति यावत्॥ स्पष्टीकृतमेतदपिमवलोके॥ प्रतीहार्योक्तिमनुमोदयन्नाह-करकिसलयेति। करकिसलयस्य या लीला तया चारु कमनीयं यथा स्यात्तथा दशरथतनयेन रामेण स्वैरं यथेच्छम् अनायासेन ऐशम् आकृष्यमाणे हरचापे। रसेन सरसो रमणीयः अत एव विकासी प्रफुल्लः। पुनः कुवलयदलदामवत् सरोजमालावत् श्यामा कान्तिः शोभा यस्य स एवम्भूतः कटाक्षः सीतयापुष्कलः पुष्कलीकृतः। समपीकृत इति यावत्॥ मालिनी वृत्तम्॥ ४५॥

धनुष्टङ्कारं वर्णयन्नाह-भिन्दन्निति। कृष्यमाणं यत् त्रिपुरहरस्य शिवस्य धनुः तस्य भङ्गात् भवति उत्पद्यते यः स तथाभूतः टङ्कारः आविरस्ति प्रकटीभवति। किं कुर्वन्नित्यपेक्षायामाह भिन्दन्नित्यादिना। मुरारेः क्षीरोदधिप्रसुप्तस्य विष्णोः निद्रां भिन्दन् शब्दस्य तीव्रत्वेनेत्यर्थः। सकलभुजभृतां सकलनृपाणां शौर्यदर्पं वीर्यगर्वं स्तम्भयन् अनन्यथासिद्धत्वाद्धनुषः। पुनः दिक्कुम्भिनां दिग्गजानां यानि कर्णाञ्चलानि तेषां चलनकलां इतस्ततश्चलनशीलतां छिन्दन् परि-

चरन् । उत्कटघोषश्रवणचकितत्वाद्दिग्गजानाम् । पुनः कूर्मराजं धराधारभूतं कम्पयन् शङ्खाघातस्योत्कटत्वात् । किम्भूतष्टाङ्कार इत्यपेक्षायामाह आर्येत्यादिना । आर्यस्य रामचन्द्रस्य श्लाघया प्रशंसया गभीरः पूर्णः । अथ च प्रलयकालीनो यो जलधरः तस्य यद् ध्वानं शब्दः तस्य धिक्कारे न्यक्कारणे धीरः योग्यः । स्रग्धरा वृत्तम् ॥ ४७ ॥

(६५) त्रैलोक्यमिति । भग्नचन्द्रशेखरधनुष्टणत्कारः उद्गच्छतीत्यभिसम्बन्धः । किम्भूतष्टणत्कार इत्यपेक्षायामाह-त्रैलोक्यमित्यादिना । त्रैलोक्यं संगयन् व्यामुञ्चन् । पुनः गिरिगभीरगुहासु पूर्वं सुप्तस्य पश्चात् जाग्रतः सिंहस्य स्फारं विकटमुन्मीलन् यः कण्ठः तस्य स्तनितस्य शब्दस्य प्रतिरवोद्गारेण आपूर्यमाणं व्याप्तं यत् तस्मिन् एवम्भूते भज्यमाने विदीर्यमाणे ब्रह्माण्डे । बहुविकटो यः कटत्कारः शब्दः तस्य प्राग्भारेण विस्तारेण भीमो भयङ्करः । अनेनोक्तविकटशब्दाढ्य धकतरविकल्पं धनुष्टङ्कारस्य सूचितम् ॥ ४८ ॥

रामचन्द्रशोभां नृपान्तरचित्तवृत्तीश्च वर्णयन्नाह-क्रीडेति । क्रीडया अनायासेन भग्नं भगाङ्कमौलेः चन्द्रचूडस्य शिवधनुः येन स तं तथाभूतम् । पुनः सीतार्पितां कमलस्रजं सरोजमालां वक्षसा हृदयेन बिभ्राणं दधानम् । पुनः शृङ्गारवीरश्रियोः रत्युत्साहयोः निजयशस् एकमात्रावलम्बनम् । पुनः व्रीडावशात् (अतिविनीतत्वात्) लज्जया अवाञ्चितम् ईषत् नमितं मुखं यस्य स तं तथाभूतं रामं पश्यतां भूमिभुजां नृपाणां चेतः चित्तम् (कर्तृ) । क्रोधः (निजपरिभवनाश्रवतिजः) विषादः (आनन्दलाभजनितः) विस्मयः (बालकवीर्यातिशयदर्शनजन्यः) मुत् हर्षः (योग्यायोग्यसम्बन्धदर्शनोत्थ) इति क्रोधविषादविस्मयमुदः, तासां विविधाः विचित्राः ऊर्मयः तरङ्गाः ताः समालिङ्गति । उक्तभावचतुष्टयमयं भवतीति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ १९ ॥

चिक्रीडेति । धनुर्भञ्जनं कृत्वेत्यर्थः । प्रसीदेति । योग्यजामातृलाभादिति भावः । ज्यावल्लीमिति । ललिताङ्गुलीकिसलयैः शुभगाब्जपत्रसदृशाङ्गुलीभिः ज्यावल्लीं धनुर्मौर्वीम् आ कर्णात् कर्णपर्यन्तम् आकर्षतः रघुशिशोः रामचन्द्रस्य भ्रूः भङ्गुरतां वक्रतां न गता (अनायासेनाकर्षणात्) । तथापि धूर्जटेः शिवस्य धनुः भग्नं खण्डितमभूत् । अथ च रामचन्द्रस्य कण्ठे अहङ्कारतरङ्गितः धनुर्भञ्जनजनितगर्वसूचकः ध्वनिः शब्दो नाभूत् । अपि तु दीर्घतः त्रुट्यतो धनुषः टङ्कारः तारतरलः तारेण उच्चध्वनिना उत्कटः सन् जगत् शब्दाद्वितीयं शब्द एव अद्वितीयं यत्र तत् तथाभूतं, ध्वनिमयमिति यावत्, चकार ॥ शार्दूलविक्रीडितं वृत्तम् । भ्रूः भङ्गुरतां न गता इति धनुस्तु भग्नम्, कण्ठे ध्वनिर्नाभूत् जगत्तु शब्दाद्वितीयमभूदिति विरोधाभासः ॥ ५० ॥

Digitized by Google

अतिभूमिमिति । उत्कर्षकोटिमित्यर्थः । धनुषः आनमनमात्रमेव जनकस्येप्सितमासीत् न पुनर्भञ्जनमित्यवगम्यते । अत एव च विच्छेद इति शतानन्दोक्तिः सङ्गच्छते ॥

(६६) अनायासेन धनुर्भञ्जननिवारणस्य अवसराभावं वर्णयति—**यावदिति** । कन्दुकलाञ्छनाञ्चितकरः बालोचितकन्दुकक्रीडापरिचितः । शोणाब्जनालाकृतिः रक्तकमलसदृशः । पुनः कौशल्यया अर्पितः मङ्गलपरिसरः बालोचितरक्षाविशेषः यस्मिन् स तथाभूतः । वत्सस्य रामस्य दोःकन्दलः बाहुदण्डः यावत् किञ्चित् ईषदेव चञ्चति धनुराकर्षणे चलति । तावदेव तत्क्षणमेव दलन् त्रुट्यन् यः चण्डीशचापः हरधनुः तस्मात् उच्छलन् उद्गच्छन् यः शब्दः स एव य एकार्णवः अद्वितीयः समुद्रः तस्मिन् जगत्त्रयं मग्नम् । धनुर्भञ्जनशब्देन जगत्त्रयं व्याप्तम् । निवारणस्यावसरो नैवासीदित्याशयः । शार्दूलविक्रीडितं वृत्तम् ॥ ५२ ॥

सद्य इति । विघट्टमानेन संघट्टिताविति विरोधाभासः । तत्परिहारस्तु अनयोर्विवाहः संवृत्तो हरचापभञ्जनेनैवेति ॥ ५३ ॥

तदूर्मिलेति । जानकीरामभद्रयोर्विवाहः संवृत्त एव । अतो मात्रावश्यकता मुनेरनुमतेः । लक्ष्मणस्यैव विवाहविषये तस्याभ्यर्थनीयेति भावः ॥

भरतशत्रुघ्नयोर्विवाहं सूचयन्नाह **पाणीनिति** । जनककन्यानां पाणीन् पीडयद्भिः अनुजैः सर्वैस्त्रिभिः सह मे रामभद्रः सीतायाः पाणिपीडनमिच्छति । सहैव सर्वेषां भ्रातॄणां विवाहो भवत्विति हृदयम् ॥ ५४ ॥

अधिशेखरमिति । मौलिकुसुममिव साह्लादं गृहीता मया भवदनुज्ञेति भावः । **समीहितमिति** । दशरथतनयविवाहरूपमित्यर्थः ॥

इति श्रौतस्मार्ताचारपरायणमैथिलश्रोत्रियकुलावतं-
सोपाध्यायोपनामकश्रीतीर्थनाथशर्मतनूजजगन्ना-
थविरचितायां प्रसन्नराघवटीकायां भाव-
बोधिन्यां तृतीयाङ्कव्याख्या ॥ ३ ॥

Digitized by Google

प्रसन्नराघवटीकायाम्

भावबोधिन्याम्

चतुर्थोऽङ्कः

(६७) ध्रुवेति । ध्रुवालक्षणमुक्तं राजशेखरेण "प्रथयति पात्रविशेषान् सामाजिकजनमनांसि रञ्जयति. अनुसन्धत्ते च रसान् नाट्यविधाने ध्रुवा गीतिः ॥" इति । मणिमये त । जनकनरेन्द्रस्य मण्डपे मणिमयो मङ्गलदीपो ज्वलति । यस्मिन् मङ्गलदीपे मणिमयत्वात् चण्डानिलोऽपि प्रचण्डवेगोऽपि वायुः विफलागमो भवति निर्वापयितुं नैव शक्नोति । चण्डानिलशब्दोऽत्र परशुरामागमनसूचकम् "प्रथयति पात्रविशेषान्" इति लक्षणोक्त्यनुसारेण । तदागमनस्य च परिणामनिष्फलत्वं सूचितं विफलागमपदेन ॥ अत्रातिशयविशेषोक्त्योः सङ्करः ॥ १ ॥

जामदग्न्यं वर्णयन्नाह—कुर्वन्निति । कोपात् हरचापारोपणापमानजन्यक्रोधात् उदञ्चद्भिः प्रोल्लसद्भिः । रविकिरणसटाः सूर्यकिरणजालं तद्वत् पाटलैः ईषद्रक्तैः । दृष्टिपातैः । कुठारम् अद्यापि कृतैकविंशतिवारनिःशेषनाशेऽपि क्षत्राणां नृपाणां कण्ठात् च्युता या रुधिरसरित् तया सिक्ता धारा यस्य एवम्भूतं कुर्वन् । अद्य च पुनरपि पूर्ववदेव भुवनोत्पातमासूचयद्भिः तीव्रैः निःश्वासपातैः तद्द्वारा गर्जन्ती आस्फालने शब्दायमाना मौर्वी यस्य स तथाभूतः चापो यस्य स त्रिभुवनविजयी जामदग्न्यः परशुरामः समेति आयाति । अतो हे क्षत्रियाः एतस्य लोचनपथाद् अपसरतेति सम्बन्धः । पाटलदृष्टिप्रतिबिम्बेन कुठारस्य रक्तत्वम् । ततश्च रुधिरानुलिप्ततानुमानम्, तीव्रनिःश्वासपातशब्देन च मौर्वीगर्जनानुमानमिति भावः । उत्प्रेक्षाऽलङ्कारः । स्रग्धरा वृत्तम् ॥ २ ॥

परशुं विलोकयन् सरभसमाह—सकलेति । सकलानां नृपाणां याः कठोराः कठिनाः कण्ठपीठ्यः ताभ्यो बहलमधिकं यथा स्यात् तथा गलन् च्युतो यो रुधिरौघः शोणितप्रवाहः तेन क्षालिता धारा यस्य स तथाभूतोऽयं जमदग्निनन्दनस्य मम परशुः तत् तस्मात्कारणात् हरचापारोपणप्रतिज्ञापराधात् इदं जगत् अजनकं जनकविहीनं विधत्ते विधास्यति । अतिसामीप्यादवश्यं भवित्वाच्च भविष्यदर्थे लट् । समस्तनृपसमूहं निहत्य जनकं पश्चान्निपातयामि । अथवा

Digitized by Google

क्षत्रियवंशतिरस्कारपटिष्ठो मे परशुरद्य जनकं निपातयिष्यतीति भावः ॥ पुष्पिताग्रा वृत्तम् ॥ ३ ॥

(६८) पुनः स्वविक्रमं वर्णयन्नाह–उदित इति । अर्जुनस्य कार्तवीर्यस्य भुजा एव वनम् तस्मिन् उदितः उत्पन्नः पुनः तुङ्गेषु दर्पोद्धतेषु नृपतिवंशेषु क्षत्रियकुलेषु ज्वलितः । एवम्भूतः त्वं हे कोपानल निमित्तमेव जनकवंश एव यः क्रमलक्काणः तं स्पृशसि किम् । न युक्तमेतत् तव प्राचीनपराक्रमस्येति भावः । वंशेषूज्ज्वलितस्य अधःस्थितकमलस्पर्शो नातीव उचित इति हृदयम् । रूपकमलङ्कारः । आर्याप्रभेदः ॥ ४ ॥

पुनर्निजश्लाघ्यतां विभाव्याह–अलमिति । अस्मिन् जनककुले उपेक्षया अवहेलया अलम् । अयं जनकः मनोरथेन यथेष्टम् उपनीतः प्राप्तो यो जामाता तस्य भुजबलेन यः अवलेपो दर्पः तेन दुर्ललितः दुर्विनीतः । जनकस्य प्रतिसन्देशं स्मरति–तथाहीति ॥ दुरवलेप इति । दुष्टगर्व इत्यर्थः ॥

स्वनिष्पादितकार्तवीर्यनिधनं वर्णयन्नाह–यस्योग्रदिति । यस्य परशोः उग्रात् प्रोच्छलत् यत् घोरधाराज्वलं तीक्ष्णधाराप्रान्तं तेन दलितम् अत एव गलत् रुधिरप्लावितं यत् बाहुशाखासहस्रं तस्मात् प्रोद्गच्छन्ती या रक्तधारा शोणितौघः तस्य निवहेन र्जितं नवोन्मीलदर्कस्य नवोदितसूर्यस्य अंशुजालं येन एवम्भूतः क्ष्मापालः पृथिवीपतिः कार्तवीर्यः सुरपुरसुदृशां स्वर्नारीणां । पुष्पितो योऽशोकशाखी अशोकवृक्षः तस्य भ्रान्तिं दत्त्वाऽपि (बाहुबाहुल्यात् शाखित्वं रुधिरप्लावितत्वाच्च पुष्पितत्वम्) । निजपुरसुदृशां स्वपुरनारीणां चित्ते शोकशाखी शोकमूलं बभूव । निजमरणेन तासां मनसि शल्यमर्पितवानिति भावः । अशोकभ्रान्तिं दत्त्वा शोकशाखी बभूवेति विरोधाभासः । स्रग्धरा वृत्तम् ॥ ५ ॥

पुनः परशुं वर्णयन्नाह–येनेति । येन भुजमण्डलेन नर्मदायाः अम्बुनिवहो जलप्रवाहः अबध्यत । संख्ये युद्धे च लङ्केश्वरो रावणश्च येन भुजमण्डलेन अबध्यत बद्धः । तत् अर्जुनस्य कार्तवीर्यस्य भुजा एव ये शाखोरुहाः वृक्षाः तेषां मण्डलं यस्मिन् कुठारे निरमज्जत् शान्तोऽभूत् । पुनः यस्य कुठारस्य केलयः चरितानि क्षत्रस्त्रीणां नयनाम्बुपूरमिषतः अश्रुप्रवाहच्छलेन खेलन्ति । तादृगयं मे परशुः अधुना धाराजलं मुञ्चति । जनकस्य प्रतिसन्देशं प्रत्ययमाक्षेपः । शार्दूलविक्रीडितं वृत्तम् ॥ ६ ॥

सहर्षमिति । तापस्रायणेनोक्तौ निवृत्तेत्यस्य 'चापारोपणप्रतिज्ञायाः उपरतो जनकः' इत्यर्थो गृहीतो जामदग्न्येन । अत एवास्य हर्षः ॥

एवं चाऽङ्गविधीनामपि नाऽत्यन्तसापेक्षत्वम् । ततः काम्येष्वपि यथा शक्नुयादित्येवास्तु, न यो यदा शक्नुयादिति, अवैलक्षण्यात् । नैतत्सारम् । एकप्रयोगविधिवैरूप्यप्रसङ्गा-

तथेते सर्वे ऽपि कामविधयो ऽङ्गानीति सिद्धं भवतीत्याह—एवं चाऽङ्गविधीनामपि नात्यन्तसापेक्षतेति । एवं च सर्वेषामेव नित्यकाम्यविधीनामवैरूप्यं स्यादित्याह—ततः काम्येष्वपि यथा शक्नुयादित्येवास्तु, न यो यदा शक्नुयादिति, अवैलक्षण्यात् ।

तदेतद् दूषयति—नैतत्सारम् । एकप्रयोगविधिवैरूप्यप्रसङ्गादिति । अयमर्थः । सकृत्प्रवृत्ता खल्वियं कामश्रुतिरर्थिमात्रविषया यदि सर्वानेवाऽविशेषेणार्थिनो ऽन्धादीन् विकलाऽवयवांश्चोपस्थापयेत्तदा स्वर्गकामोपहितमर्यादो ऽयं प्रयोगवचनो नयनवन्तं स्वर्गकामं प्रत्याज्यावेक्षणं विदधाति अन्धं च स्वर्गकामं प्रति स एव तदेव न विदधातीति वैरूप्यं प्रसज्येत । न ह्यन्धादिपदान्यर्थिपदेन सह समभिव्याहृतानि, येन व्यवस्था स्यात् । ननु नैकशः प्रयोगवचनाङ्गे प्रवर्तते येन तस्य वैरूप्यं स्यात् किं त्वेकफलसंबन्धानर्थानेकप्रधानोपकार[1]संबन्धांश्चैकस्य कर्तुरेकव्यापारतामापादयति, तथा च न प्रयोगविधिरङ्गानि प्रापयति किं तर्हि प्राप्तान्यङ्गान्यभिसमीक्ष्योपसंहरति एकप्रयोगमापादयतीति यावत् । तेन यथा श्रुत्यादिप्रापितान्यङ्गानि तदनुसारेणैव प्रयोगवचनेनोपसंह्रियन्ते तथा ऽऽख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणीति स्रुवाऽऽज्यावदानवत्कर्तृसामर्थ्यस्यापि प्रापकत्वादन्धस्वर्गकामकर्तृसामर्थ्याऽनुसारेणाऽऽज्यावेक्षणमात्रवर्जितमङ्गजातमुपसंहरिष्यति । चक्षुष्मन्तं तु प्रति तत्सहितमिति को विरोधः ? यदि चक्षुष्मन्तमेव प्रत्युपसंहरेत् नोपसंहरेन्न ततो भवेत्प्रयोगविधिवैरूप्यलक्षणो विरोध इत्याशङ्क्याह—अनेकप्रयोगकल्पनाप्रसङ्गादिति । मा प्रापद्विरोधलक्षणं वैरूप्यं सम-

१ प्रकारोपकार । १. पु. पा. ।

दनेकप्रयोगकल्पनाप्रसङ्गात् । केवलपदार्थव्यवहाराभावा-
द्विशेषश्रुतेरविरोधाच्च । स एव प्रयोगविधिस्तस्यैवाऽङ्गस्य
प्रयोगं तमेव प्रतिविदधाति न विदधातीति[1] स्यात् । कल्प-
योऽसमर्थाऽविसमन्वयव्यवस्थापनया । तत्तदङ्गोपादानपरित्यागेनाऽऽपा-
दितप्रयोगभेदरूपं तु प्रयोगवैरूप्यं कल्पनागौरवापादकं प्रयोगवचनः
प्रतिपद्यत एवेत्यर्थः ।

ननु च प्रामाणिकं कल्पनागौरवमपि न दोषमावहति । अस्ति चाऽत्र प्रमाणं स्वर्गकामश्रुतेरसङ्कोचः सामान्येन प्रवृत्तायाः । ऐकरूप्ये तु प्रयोगस्य सङ्कोचे विरोधः स्यादित्याशङ्क्याह—केवलपदार्थव्यवहाराऽभावाद्विशेषश्रुतेरविरोधाच्च । अयमर्थः । प्रत्यायनाय पदान्युच्चारयन्ति प्रेक्षावन्तः, स एव च तैरर्थो बोधयितव्यो यो बुभुत्सितः परैः, स्तमेव च परे बुभुत्सन्ते यो व्यवहाराङ्गं, न चाऽविशिष्टपदार्थसाध्यो ऽस्ति कश्चिद्व्यवहार, स्तेन यद्यपि पदात्पदार्थमात्रमवगम्यते तथापि तन्मात्रं न व्यवहाराङ्गमित्यपर्यवस्यत् पदार्थान्तरं विशेषमपेक्षमाणं यत्पदान्तरेण योग्यमुपनीयते पदार्थान्तरं तदवच्छेदमनुमन्यतेतरां प्रयोगे, न तु प्रति[2]क्षेपकरणमन्यथा वाक्यार्थप्रत्ययाऽभावात्तदुच्छिन्नपदसङ्कथमत्यन्तं मूकं जगत्प्रसज्येत । तदिह स्वर्गकामश्रुतिरपि लोकाऽनुसारेण स्वार्थमात्रे पर्यवस्यन्ती पदान्तरेण वाक्यान्तरेण वा योग्येन य एव विशेषः कश्चिदुपनीयते तमनुमन्यमाना न सङ्कोचेन दूयते । न हि तथा सर्वाङ्गोपसंहारसामर्थ्यविशेषणो ऽर्थिनि लभ्यमाने न लब्धः स्वार्थः कामिपदसम्बन्धोपहितसीम्नस्तस्यापि तत्त्वादित्यप्रामाणिकत्वात् कल्पनागौरवं दोषायेति ।

एकप्रयोगविधिवैरूप्यप्रसङ्गादित्युक्तं, तद्विस्पष्टयति—एवं हि स एव प्रयोगविधिस्तस्यैवाङ्गस्य प्रयोगं तमेव प्रति विदधाति न विद-

१ तमेव प्रतिविदधातीति॰ मू॰ पु॰ पा॰ ।
२ प्रागेव तु प्रति २ पु॰ पा॰ ।

नागौरवं च, सामर्थ्यभेदेन प्रयोगभेदात् । पदस्य च पदान्तरसम्बन्धे विशेषपरत्वं सर्वत्रगमिति न कदाचिदन्यायकल्पना । नित्ये ऽपि तर्ह्येवमेवास्तु जीवन्यदा शक्नुयात् । यावदित्यनुपपन्नमिति चेत् । अनियतनिमित्तेषु कथम् ? अपि च सातत्येन होमप्रसङ्गः । अथ कालविशेषोपादाना-

धातीति स्यादिति । अनेककल्पनाप्रसङ्गादिति स्फुटयति—कल्पनागौरवं चाऽङ्गसामर्थ्यभेदेन प्रयोगभेदादिति ।

केवलपदार्थव्यवहाराऽभावाद्विशेषश्रुतेरविरोधादिति प्रकृतं तत्स्पष्टयति—पदस्य च पदान्तरसम्बन्धे विशेषपरत्वं सर्वत्रगमिति न कदाचिदन्यायकल्पनेति । ननु यदि पदस्य पदान्तरसम्बन्धे विशेषपरत्वमविरुद्धमिति स्वर्गकामपदं समर्थविषयमिति यो यदेति सम्बन्धः, हन्त तर्हि जीवनमपि सामर्थ्येनाऽवच्छिन्नं नित्ये ऽपि यो यदेत्युपबन्धमावेदयिष्यतीत्याह—नित्ये ऽपि तर्ह्येवमेवाऽस्तु जीवन्यदा शक्नुयादिति ।

शङ्कते—यावदित्यनुपपन्नमिति चेत् । अयमभिसन्धिः । एकैकत्र चेतने कामनानिवेशादेकस्मिन्नपि समर्थे स्वर्गकामश्रुतेः समवेतार्थत्वान्न विरोधः, इह तु यावच्छब्दस्य जीवनकालव्याप्त्यर्थत्वात् यदाशब्दस्य कालैकदेशव्यवस्थापकत्वाद्व्याप्तिविरुद्धत्वादस्ति नास्तीतिवदसङ्गतिरिति । परिहरति—अनियतनिमित्तेषु कथमिति । नाऽयमेकान्तो, यावच्छब्दाऽननुबन्धेषु नैमित्तिकेषु ग्रहोपरागादिस्नानेषु यदा शक्नुयादित्युपबन्धो नोपपन्न इत्यर्थः ।

इदानीं यावच्छब्दोपबन्धेपि यदा शक्नुयादिति सम्बन्धयितुं प्रसङ्गमापादयति—अपि च सातत्येन होमप्रसङ्गः । यावज्जीवेत्पदं च जीवनावच्छिन्नकालव्यापनार्थमिति यावदयं प्राणिति तावदनेन होतव्यमित्यनपेक्षिते प्रातःसायंनियमे निरन्तरमेव जगतः सर्वोपि

ऽनुरोधान्न तथा । हन्ताऽङ्गविध्यनुविधायिन्यपि यावज्जीवश्रुतिः सामर्थ्यं संबन्धमन्वेतीत्यङ्गविध्यनुरोधाद्यदेति स्यात् ।

अथ मतं—जीवन्नपि साङ्ग एव कर्म्मण्यधिक्रियते नाङ्गशून्यं विधान,मधिकृतस्य तु प्रयोगो यावदधिकारं नाङ्गाऽनुरोधेन निवर्त्तते । यथासम्भवं तु अधिकारायत्तत्वा-
पानाहारव्यवहारो विपद्येतेति । अथ कालविशेषोपादानाऽनुरोधान्न तथा, तथाह—हन्त कालविशेषोपादानवत्सर्वाङ्गविध्यनुविधायिन्यपि यावज्जीवश्रुतिः सामर्थ्यं सम्बन्धमन्वेतीत्यङ्गविध्यनुरोधाद्यदेति स्यात् । अयमर्थः । यथा सायंप्रातःसमयविधिसामर्थ्यात्सायंप्रातः समयाऽवच्छिन्नमेव जीवनं यावदित्युपबध्यते तथा सर्वाङ्गविधिसामर्थ्यात्तदेकवाक्यतया सर्वाङ्गोपसंहारसामर्थ्यसमयावच्छिन्नमेव जीवनं यावदित्युपमन्स्यन्ते । ततश्च नित्ये ऽपि काम्यवदेव यदा शक्नुयादित्युपबन्धविद्भिरिति ।

अथ मतं जीवन्नपि साङ्गएव कर्मण्यधिक्रियते, नाङ्गशून्यं विधानं, साङ्गस्यैव तस्य करणभावेनाऽवगमात् । ननु तथापि काम्यान्नित्यस्य को विशेष ? इत्याशङ्क्याह—अधिकृतस्य तु प्रयोगो यावदधिकारं नाङ्गानुरोधेन निवर्त्तते । अयमभिसन्धिः । यद्यप्यङ्गविध्येकवाक्यताबलान्निखिलाङ्गोपसंहारसमर्थस्य जीवतोऽधिकारो विधेरवगतस्तथापि सामर्थ्यमालोच्य पुरुषः प्रवृत्तो ऽनन्तरं तु यदि कश्चित्प्रमादतः कतिपयाङ्गकरणाऽसमर्थः समर्थश्चेतराणि सर्वाण्येव कर्तुं तत्र किमेषो ऽसमर्थः कतिपयेष्वङ्गमिति सर्वेष्वेव ततः प्रयोगादुपरमताम् ? अथ यथाप्यसमर्थस्तदङ्गसहितमप्यधिकारप्रतीतिसामर्थ्यादनुतिष्ठतु ? आहो स्विदशक्यकतिपयाङ्गवर्जितमितराङ्गग्रामसहितं प्रधानमप्ययुङ्क्ता ? मिति यथासम्भवं त्वधिकारायत्तत्वात्तस्येति । अथ-

त्तस्य । न च काम्ये ऽपि प्रसङ्गः । कार्यनिष्ठत्वात्कामाधिकारस्य[1] प्रयोगनिष्ठत्वाच्च नैमित्तिकस्य । साधनापेक्षत्वात् मर्थः । सत्यप्यधिकारप्रत्यये शक्यकरणाऽनुपपत्तेः सर्वथोपरमे चाधिकाराऽङ्गविरोधादधिकाराऽतिक्रमप्रसङ्गेनाऽन्तिमपक्षपरिग्रहः । अशक्याङ्गवर्जितेतराङ्गसहितप्रधानानुष्ठानं खल्वधिकारानुरोधादयं प्रयोगविधिरवलम्बते इति ।

ननु काम्येप्येतत्सर्वं समानमित्याशङ्क्याह—न च काम्ये ऽपि प्रसङ्गः, कार्यनिष्ठत्वात्कामाऽधिकारस्य प्रयोगनिष्ठत्वाच्च नैमित्तकस्य । अयमभिप्रायः । काम्ये हि स्वर्गकामो यजेतेति साध्यस्वर्गविशिष्टो नियोज्यस्तदेव कार्यं प्रतिपद्यते यत्स्वविशेषणाऽनुकूलं, साध्यस्यैव सतो विशेषणत्वात्, तदननुकूलत्वे तु कार्यस्य, न तत्र स्वर्गकामो नियोज्यः स्यात्कार्यं च कृत्यवच्छिन्ने नाप्रतीयमानायां कृतौ शक्यनिरूपणम् । न ह्यनवगतविशेषणो विशिष्टमवगच्छति । कृतिव्याप्यं हि प्रधानं कार्यमुच्यते । प्राधान्यं च तदुद्देशेन कृतेः प्रवृत्तिः । कृतिश्चैवंविधेषु वाक्येषु चेतनव्यापारः प्रयत्नशब्दवेदनीय एवाऽऽस्थेयः । चेतनो हि नियोज्यस्तदेव कार्यं प्रतिपद्यते यत्र कार्ये तिरश्चीनमात्मानमवगच्छेत् । न चाऽन्यव्यापारव्याप्ये तथा ऽवगन्तुमर्हति । प्रयत्नश्च प्रत्ययवन्न विषयमन्तरेण शक्यो निरूपयितुं, विषयश्च तस्य प्रायेण भावार्थः । तदालम्बनस्यैव प्रयत्नस्याऽपूर्वाभिधानकार्योद्देशेन प्रवृत्तेः । न खलु लोके ऽप्यलब्धपाकरूपभावार्थविषयः पक्तुः प्रयत्न ओदनोद्देशेन प्रवर्तितुमर्हतीति । ततश्च कृतिमन्तरेण कार्यस्याऽनिरूपणात् कृतेश्च भावार्थं विना ऽप्रतीतेः कृतिप्रणाडिकया कार्यस्य भवति भावार्थो विषय, स्तद्बन्धनत्वात् । षिञ् बन्धने इत्यस्माद्विषयपदव्युत्पत्तेः । तदेवं कामोपायस्य कार्यस्य विषयभावमुपगच्छन् भावार्थो नाऽनुपायः पारयति गन्तु[1]मित्युपायतामेव पुरोधाय विषयता ऽवगम्यते भावार्थस्य काम्येषु । उपायता

१ मेतुम् १ पु॰ पा॰ ।

च निखिलाङ्गसंपादितोपकारतया नाऽन्यथा, मिलितानां च सर्वेषामङ्गभावः। प्रत्येकं तद्भावे ऽष्टविधदोषनिदानविकल्पाऽऽपत्तेः। तथाऽऽगन्तुके ऽप्यक्रियमाणे समस्ताऽङ्गजन्यस्य करणोपायस्या[1]सम्पत्तेरुपायत्वाऽभावाद् विषयिणो ऽधिकारस्याऽप्रतीतेर्न तद्बलेन हीनाङ्गं काम्यं कर्म संपादयति, अपि तु सर्वोपसंहाराय घटते। समर्थस्तु क्वचित्प्रयोगादेव निवर्तते। नित्ये तु नायं प्रकारः संभवी। न हि तत्र साध्यविशिष्टो नियोज्यो, येनाऽनुपायं कार्यं कार्यतया नावगच्छेत्। तेनाऽन्यतःसिद्धनिमित्तावच्छिन्नो नियोज्यः कृतेः प्रवर्तिकया भावार्थमात्रविषयमेव तावत्प्रथमं कार्यमवगच्छति। प्रतिपन्नविषयकार्यस्तु कृत्युपहितस्वरूपत्वात्कार्यस्य कृतेश्च क्रियात्वेन करणनान्तरीयकत्वात्कार्यं प्रति करणमपेक्षमाणः संनिधानाद्विषयीभूतस्य भावार्थस्य करणतां प्रतिपद्यते। न च कृतिनिर्वृत्तस्य भावार्थस्य कथं तामेव कृतिं प्रति करणत्वमिति वक्तव्यम्। तदवच्छिन्नायास्तदपूर्वविशेषस्य कृतिभावाल्लोके तथा प्रतीतेः। यथा छेत्तुरुद्यमननिपातनलक्षणया क्रियया व्याप्यमानमपि वृश्चनं तामेव प्रति साधनं भवति, वृश्चनविषययोरुद्यमननिपातनयोश्छिदारूपत्वप्रतिलम्भात्। न हि लोष्टसमाश्रये उद्यमननिपातने अनाहितद्वैधीभावे छिदेति निरूपयन्ति। तेन यद्यपि भावार्थो व्याप्यते कृत्या तथाप्यपूर्वोऽर्थप्रवृत्तयेति तां प्रति न भावार्थः कर्म, किं तु करणम्, अपूर्वं तु प्रधानं कर्म, तदुद्देशेन कृतेः प्रवृत्तत्वात्। तदेवं नित्ये ऽपि विषयभूतस्य भावार्थस्य पश्चात्करणत्वप्रतीतेरवगतसाङ्गप्रधानकरणत्वस्तदनुष्ठानसमर्थः प्रवृत्तः कुतश्चिन्निमित्ताद्यदि किं चिदुपहन्तुं न पारयति तथाप्यधिकारप्रतीतेः प्रतीत्यनुबन्धीभूतभावार्थमात्रविषयाऽवगमनोपायान्नोपरन्तुमर्हति, किं तु किं चिदङ्गहीनं प्रयोगमनुतिष्ठति। तदिदं प्रयोगनिष्ठत्वं कार्यनिष्ठत्वप्रतिपत्तयोपन्यस्तम्।

१ करणोपकारस्य। २ पु० पा०।

588

कार्य्यस्य, यावदङ्गं च साधनभावाऽवगतेः सर्वाङ्गोपसंहारेणैव कार्य्यसिद्धेः । ननु उभयत्राप्यधिकार एव कर्त्तव्यः । सत्यम् । एकत्र निमित्तपर्य्यन्तो ऽपरत्र फलपर्य्यन्तः । तत्र

यदि कामाऽधिकारस्य कार्यनिष्ठत्वं ततः किं भवती ? त्यत आह—साध्यमाऽपेक्षत्वात्कार्यस्य, यावदङ्गं च साधनभावाऽवगतेः सर्वाङ्गोपसंहारेणैव कार्यसिद्धेर्न काम्ये प्रसङ्गः । ननूभयत्रापि काम्ये नैमित्तिके चाऽधिकार एव कर्त्तव्यः । नियोगस्यैव कार्यस्य विधिप्रत्ययादवगतेस्तस्यैव प्रधानत्वात् । तत्कर्त्तव्यतायाश्चाऽनुष्ठानमन्तरेणाऽनुपपत्तेरनुष्ठानस्य च पुंसः कर्तृतामन्तरेणाऽसम्भवात् कर्तृतायाश्चाऽधिकारिणां कर्मणि स्वामितामन्तरेणाऽसिद्धेरधिकारितायाश्च नियोज्यतां प्रधानीभूतकार्ये नियोगं प्रत्यात्मनस्तदधीनभावबोद्धृतां विना ऽपर्यवसानात् नियोज्यो ऽपेक्षितः । स चाऽविशिष्टो न शक्यः प्रतिपत्तुमिति तद्विशेषणाकाङ्क्षायां क्व चित्सिद्धमेव विशेषणं जीवनादि स्वीकरोति, क्व चित्तु कामादिपदाऽऽपादितसाध्यभावं स्वर्गादि । न च नियोगविशेषणस्य साध्यता नियोगस्य साध्यत्वमुपहन्ति, नियोगसाध्यत्वनिमित्तत्वान्नियोज्यविशेषणसाध्यत्वस्य । 'न च निमित्तं विधिरपबाधत' इति न्यायात् । तेनोभयत्र नित्ये काम्ये च नियोगस्यैव कर्त्तव्यत्वात्कार्यनिष्ठत्वादित्यविशेष इत्यर्थः ।

समाधत्ते—सत्यमेकत्र निमित्तपर्यन्तो ऽपरत्र फलपर्यन्तः । अयमर्थः । निमित्तपर्यन्ताऽधिकारात्[1] निमित्तस्य चाऽसाध्यत्वात् निमित्तवान्नान्योपायतया कार्यमवबुध्यते, किं तर्हि भावार्थविषयमेव[2] । तस्यां च दशायां प्रतिपत्त्यनुबन्धितया भावार्थः प्रतीयमानत्वादनुरञ्जकत्वेनैव परमवतिष्ठते नोपायतया । ततश्च नैमित्तिकाऽधिकारस्य भावार्थमात्रविषयता न तूपायीभूतभावार्थविषयता । ततश्च यावद्भावार्थस्वरूपभावित्वादधिकाराऽवगतेस्तन्मात्रेण च निमित्तस्य नि-

१ निमित्तवतो ऽधिकारात् । ३ पु॰ पा॰ । २ विषयं स्वनिष्ठमेव । ३ पु॰ पा॰ ।

Digitized by Google

निमित्तपर्य्यन्ते निमित्तवतोऽधिकृतस्याऽप्रयुञ्जानस्याऽधिकाराऽतिक्रान्तिरिति यथासंभवं प्रयोगः । फलपर्य्यन्ते त्वङ्गवैकल्ये फलाऽनुपपत्तिः । फलकामिता ऽधिकारहेतुर्निवर्त्तते इत्यधिकाराऽभावान्नाधिकाराऽतिक्रान्तिदोष मित्ततापर्यवसानान्निमित्तपर्यन्त इत्युक्तम् । कामाधिकारे तु कामोपायस्यैव कार्यस्य प्रधानस्याऽङ्गतेः फलपर्यन्त इत्युक्तम् । यद्येवं ततः किं सिध्यतीत्यत आह—तत्र निमित्तपर्यन्ते निमित्तवतः सर्वाङ्गोपसंहारसमर्थस्य प्रवृत्तस्य दैवात्किञ्चिदङ्गमुपसंहर्तुमपारयतोऽपि भावार्थमात्रविषयत्वान्नियोगस्य तस्य च किञ्चिदङ्गहानादप्रच्युते[1]रधिकृतस्याऽप्रयुञ्जानस्य प्रयोगमननुतिष्ठतो ऽधिकाराऽतिक्रान्तिरिति यथासम्भवं प्रयोगः । फलपर्यन्ते त्वधिकारे ऽङ्गवैकल्ये सति न साधनत्वं, साङ्गस्य साधनभावात् असाधनात्फलाऽनुत्पत्तेरुत्पत्तौ वा ऽतिप्रसङ्गात् फलकामिता निवर्तते ।

ननु न प्रत्यात्मवेदनीया फलकामिता ऽङ्गहानौ न निवर्तेत-इति शक्यं वक्तुमित्याशङ्क्याह—अधिकारहेतुरिति । अयमर्थः । फलकामिता खलूक्तेन मार्गेण करणीभूतस्य भावार्थस्याऽधिकारविषयभावमापादयन्त्यधिकारहेतुः । सा चाऽङ्गवैगुण्ये सति केवलस्य भावार्थस्योपायभावात् विषयाऽभावे[2]न विषयिणो ऽधिकारस्यापि निवृत्तेः सत्यपि नाधिकारहेतुतया ऽस्तीति फलकामिता निवर्तत-इत्युच्यते इति । तस्मादधिकाराऽभावान्नाऽधिकाराऽतिक्रान्तिदोष इति न यथा कथं चित्प्रयोगः ।

ननु यदि नैमित्तिकेष्वङ्गवैगुण्येष्वधिकाराऽनपगमो भावार्थमात्रविषयत्वाऽनपायात्[3] तथा सति यावज्जीवमग्निहोत्रं जुहुयादिति सायंप्रातःकालयोरनङ्गत्वेन तदभावे ऽप्यधिकारस्याऽनपेतत्वान्मध्यन्दिनादिकाले ऽप्यजुहुदधिकारमतिक्रामेदिति निरन्तरमेव

१ अप्रसिद्धेः । पु० पा० । २ विषयस्याभावेन । पु० पा० ।
३ विषयस्याऽनपायात् । पु० पा० ।

५९०
590
Digitized by Google

इति न[1] यथा कथंचित्प्रयोगः । एवं न सातत्येन प्रयोगो नाऽर्थोऽवरुद्धेषु यथाशक्ति चोपसंहारो नित्येषु न काम्येष्विति सर्वं चतुरस्रम् ।

होमप्रसङ्ग इत्याशङ्क्याह—एवं सति न सातत्येन होमप्रसङ्गः । इदमत्राकूतम् । यद्यपि नैमित्तिकेषु प्रथमं भावार्थमात्रमेव विषयस्तथाऽपि कार्यस्य कृत्युपहितत्वेन करणाऽपेक्षायां भावार्थः पश्चात्करणं भवति । लब्धकरणत्वस्य चाऽङ्गापेक्षायामङ्गान्युपतिष्ठन्ते, तेन साङ्गोपसंहारं[2] प्रति स्वाभाविकसामर्थ्यशालिन एव पश्चादधिकाराऽवगमाद्प्रतिसमाधेयाऽन्धत्वादिदोषाणामपेक्षमाणाद्भवति अत्र्यार्षेयाणां च त्र्यार्षेयचरणवत्स्वनभ्याहितानां चाऽऽहवनीयादिभाजि मध्यन्दिनसमयवर्त्तिनां च पुंसां सायंप्रातःसमयाऽङ्गसङ्गिनि नाऽधिकारः कर्मणि, यथाविहितकर्मोपसंहारं प्रति निजसामर्थ्याऽभावात् । येषां पुनराजानिकं[3]मस्ति सामर्थ्यं यथा दरिद्राणां प्रतिसमाधेयबाधिर्यादीनां च तेषां सत्यपि दरिद्रत्वे सत्यपि च बाधिर्यादावस्त्येव धनसाधने श्रवणादिसाधने च कर्मण्यधिकार इति तदकरणे भवत्यधिकाराऽतिक्रमो नित्येषु, न तु काम्येषु । स्वाभाविकसामर्थ्ये सत्यपि तदानीन्तनेन प्रतिसमाधेयेनाप्यसामर्थ्येनाङ्गवैकल्ये सति साधनत्वाऽपायेन साधनीभूतभावार्थविषयस्याऽधिकारस्य निवृत्तेः । ननु विशेषणेषु भवतु भावार्थमात्रमेव विषयः कार्यस्य, तथाऽपि तस्यामपि कार्यत्वेन करणाऽधीनोत्पत्तित्वात् प्रतिसमाधेयेनाप्यसामर्थ्येनाङ्गाऽननुष्ठाने सति तद्विकल्पादनुत्पत्तेः कथमनपायोऽधिकारस्य नापायस्तस्य यावद्विषयं प्रत्यभिज्ञानाद्विषयस्य भावार्थस्य कतिपयाङ्गवैगुण्येऽप्यनपेतत्वान्निजस्य च सर्वाङ्गोपसंहारसामर्थ्यस्य च तदनपायेऽनपेतोऽधिकारस्तदानीन्तनमागन्तुकं कतिपयाङ्गाऽनुष्ठानसामर्थ्यमवलोक्य यावदुपसंहरणीयाङ्गसंपादनामेवात्मनोऽवगमयति । न

१ नेति नास्ति मू॰ पु॰ । २ सर्वाङ्गोपसंहारम् । पु॰ पा॰ । ३ स्वाभाविकम् । पु॰ पा॰ ।

Digitized by Google

नेदं चतुरस्रम् । इदमङ्ग[1] भवान्व्याचष्टां किं शक्त्यपेक्षो ऽधिकारो यथाधिकारं च प्रयोगः, आहो स्विच्छक्त्यपेक्षो ऽधिकारो, ऽधिकृतस्य तु यथाशक्ति प्रयोगः? पूर्वस्मिन्कल्पेऽस्ति सम्भवो ऽधिकाराऽवगतिरननुष्ठानं चेति । तस्मादधिकाराऽवगतिसामर्थ्यात्तस्यां दशायां यथाशक्त्युपसंह्रियमाणाङ्गाऽऽधेयोपकारतामेवाऽन्यथानुपपत्तेः स्वकरणस्य कार्यमवलम्बते । सो ऽयमङ्गवैकल्याद्दोषः शास्त्रार्थे इत्युच्यते । औत्सर्गिकी तु सकलाङ्गग्रामसंपादनीयकरणोपकारितैव नित्याऽधिकारस्येति सर्वाङ्गोपसंहारो मुख्यः शास्त्रार्थः । तस्मात्सूक्तं न सातत्येन प्रयोगो नाऽर्थाविरुद्धेषु कालेष्विति । नापि तस्यैव होमस्याऽऽहाराद्यविरुद्धेषु कालेषु यथा सततहोमो न सततं सायमादिकालमपेक्षते, किं तर्हि अर्थाऽविरुद्धकालाऽवलम्बन,मन्यथा संततत्वाऽभावप्रसङ्गात्, सायतएवैतत्सततं होतव्यं न तत्सायमादिसमयाऽपेक्षमिति, तथेह होमे सायमादिसमयविधानात्तस्य च मध्यन्दिनादिसमये ऽवश्यमनुपसंहार्यत्वात् । तस्मान्न सातत्येन होमो यथाशक्ति चोपसंहारो नित्येषु न काम्येष्विति सर्वं चतुरस्रम् ।

तदेकदेशिमतं दूषयितुं विकल्पयति—नेदं चतुरस्रम् । इदमङ्ग भवान् व्याचष्टां किं शक्त्यपेक्षो ऽधिकारो यथाधिकारं च प्रयोगः, आहो यच्छक्त्यपेक्षो ऽधिकारो ऽधिकृतस्य तु यथाशक्ति प्रयोगते? इति । अयमर्थः । अङ्गोपदेशसामर्थ्यादश्रुतमपि सर्वाङ्गोपसंहारनियमसामर्थ्यमनुपादेयत्वादधिकारविशेषणतामापद्यत इति तदपेक्षो ऽयमधिकारो भवति । यथाधिकारं च प्रयोग इत्येकः कल्पः । अपरस्तु यावज्जीवश्रुतिमात्राऽपेक्षो ऽधिकारो नाङ्गोपसंहारसामर्थ्यमपेक्षते, तस्याऽश्रुतत्वादिति । तत्र प्रथमं कल्पं शक्त्यपेक्षो ऽधिकार इति

१ अच. सू. पु. पा. ।

५६२
592

ल्पे यथैव कालविशेषयुक्ते कर्म्मणि तत्कालजीविनोऽधिकृताऽन्यस्य तद्विशिष्टकर्म्मोपसंहाराऽसामर्थ्यात् । अन्यथा ऽन्यदापि अकुर्वतो ऽधिकाराऽतिक्रान्तिः । पश्चिमे तु नाङ्गशक्तिरधिकारं विशिनष्टीति सातत्यप्रसङ्गः । न ब्रूमो ऽङ्गशक्तिरधिकारं विशिनष्टीति, किं त्वङ्गशक्त्यपेक्ष एवाऽधिकार इति । तादृशस्यैव तु कस्य चिदङ्ग-दृष्टान्तद्वयेनोपपाद्य दूषयति—यथैव कालविशेषयुक्ते कर्मणि 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेते'त्येवमादौ तत्कालजीवनाधिकृतादन्यस्याऽतत्कालजीवस्य तत्कालविशिष्टकर्मोपसंहारसामर्थ्याऽभावात् । अवश्यं च तदास्थेयमित्याह—अन्यथा ऽन्यदापि पञ्चम्यादावपि अकुर्वतो ऽधिकाराऽतिक्रान्तिः स्यात् । यथा राजसूये राजत्वमन्यस्य संपादयितुमशक्तेरधिकारं विशिनष्टि । न जातु ब्राह्मणवैश्यौ राजत्वमात्मनः संपादयितुमर्हतो, येन राजसूये राजकर्तृके ऽधिक्रियेयाताम् । तथा ऽङ्गादेशाऽपेक्षत्वादधिकारस्य तत्सामर्थ्यविशिष्टजीवनमधिकारकारणमिति । भवत्वेवं तथापि को दोष ? इत्यत आह—कुतः प्रथमे कल्पे तादृशस्याङ्गोपसंहाराऽसमर्थस्याऽधिकाराऽतिक्रान्तिः ।

द्वितीयं कल्पं शक्त्यपेक्षो ऽधिकार इति दूषयति—पश्चिमे तु नाङ्गशक्तिरधिकारं विशिनष्टीति सातत्यप्रसङ्गः । अस्यार्थः । यदा हि शक्त्यपेक्षो ऽधिकारस्तदा जीवनमात्रस्य शक्तत्वात्तन्मात्रमेवाऽधिकारिविशेषणमिति होमादिसातत्यप्रसङ्गः । किं च काम्ये चाङ्गहानादनुष्ठाने ऽधिकाराऽतिक्रमः स्यात् । किं च पङ्ग्वादेश्चाऽधिकारप्रसङ्गो, न ह्यसौ न स्वर्गकामो न चाऽजीवनवान् ।

अथैकदेशी गूढाऽभिप्रायः प्रथमं पक्षमाश्रित्याह—न ब्रूमो ऽङ्गशक्तिरधिकारं विशिनष्टीति, किं त्वङ्गशक्त्यपेक्ष एवाऽधिकार इति । किमिति तर्ह्यङ्गवैकल्ये नैमित्तिकं प्रयुज्यते ? इत्याशङ्क्याह । तादृशस्यैव ह्यधिकारिणः कस्य चिदङ्गस्याऽसम्भवे ऽपि न प्रयोगो निव-

स्याऽसंभवे न प्रयोगो निवर्त्ततइति । वैगुण्याच्चापि फले ऽधिकारहेतुरेव नास्तीत्युक्तम् ।

कोऽयमसंभवः ? तदुपसंहारासामर्थ्यं, न तर्ह्यधिकृतस्तद्विशेषणत्वात्तस्य । अथाऽनुपसंहारो, ऽनङ्गत्वमेव । कादाचित्कमसामर्थ्यमसंभवो न तेनाऽधिकारात्पर्य्युदासो द्रव्यात्मनइति सामर्थ्यस्याऽधिकारिविशेषणस्य भावार्थमात्रस्याऽधिकारिविषयस्य च तदानीमपि नैमित्तिकेषु भावादित्यर्थः ।

काम्ये तर्हि हीनाङ्गे प्रयुज्यमाने समर्थस्याऽधिकाराऽतिक्रान्तिः प्रसज्येतेत्याशङ्क्याह—वैगुण्याच्चापि फले ऽधिकारहेतुरेव नास्तीत्युक्तम् । अयमर्थः । वैगुण्ये सत्यविद्यमानफलत्वं काम्ये करणत्वमिति यावत् । करणीभूतस्य भावार्थस्य विषयत्वं वैगुण्ये चाऽकरणत्वे विषयत्वाऽभावा[1]दधिकाराऽवगमविलय इति नाऽननुष्ठाने ऽधिकाराऽतिक्रान्तिरित्युक्तं कार्यनिष्ठत्वात्काम्यस्येत्यनेन । तदेतद्विकल्प्य दूषयति— कोऽयमसम्भवो यदि तदुपसंहाराऽसामर्थ्यं न तर्ह्यधिकृतः, तद्विशेषणत्वात्तस्य । अयमर्थः । यद्यङ्गोपसंहाराऽसामर्थ्यमङ्गस्याऽसम्भवस्तत्कारणत्वेनोपचारादुच्यते, तदा सामर्थ्यस्याधिकारिविशेषणस्याऽसम्भवादनधिकृतः किमिति नैमित्तिकमङ्गविकलं प्रयुञ्जीत । अथाऽनुपसंहारो, ऽनङ्गत्वमेव[2] । अथ समर्थो ऽपि नोपसंहरति किंचिदङ्गमनुपसंहार एवाऽङ्गस्याऽभाव उच्यते तदा न नूनमेतदङ्गं, न ह्यस्ति सम्भवो यद्विद्वान् समर्थः किञ्चिदङ्गमपहाय प्रधानं प्रयुङ्क्त इति सेयमुभयतस्पाशा रज्जुः ।

साम्प्रतमेकदेशी स्वाऽभिप्रायमाविष्करोति—कादाचित्कमसामर्थ्यमसम्भवो न तेनाऽधिकारात्पर्युदासो द्रव्याप्रतिसमाधेयाऽङ्गवैकल्यश्च । इदमत्राकूतम् । द्वये खल्विह पुमांसो व्यवस्थिताः । केचिदसमर्थाः केचित्तु तिरोहितसामर्थ्याः । तत्र ये तावदसमर्था अन्धपङ्ग्वादयः शूद्रादयश्च तेषामनधिकार एव, सामर्थ्यस्याऽधि-

१ विषयाभावात् पु पा० । २ अनङ्गमेव ३ पु० पा० ।

प्रतिसमाधेयाङ्गवैकल्यवत् । सत्यं, न शूद्रवदेकान्ततो न

कृतविशेषणस्याऽभावात् । येऽपि समर्थाः कुतश्चिन्निमित्तादभिभूत-सामर्थ्यास्तेषामधिकृतविशेषणस्य सामर्थ्यस्य सद्भावात्को ऽधिकार-विलयहेतुः ? न खल्वभिभूतसामर्थ्या भवत्यसमर्थः । न च कार्य-व्यवसेयत्वात्सामर्थ्यस्य कार्येऽभावे तदप्रमाणमिति वाच्यम् । प्रती-तचरसामर्थ्यस्य कार्यकारिणः पश्चादकरणे पुनश्च करणे किं साम-र्थ्यविनाशोत्पादौ, आहो स्वित्तिरोभावाऽऽविर्भावौ ? विति विशये परैव कल्पना ज्यायसी, लाघवात्,न पूर्वा । तदा हि सामर्थ्यरूप-धर्मकल्पनायां गौरवप्रसङ्गः । ततश्च सामर्थ्यस्याऽधिकृतविशेषणस्य विद्यमानत्वादुपक्रमे प्रयोगस्य साध्वेव चाऽधिकृत इति यथाशक्ति नैमित्तिकमारभेत समापयेच्चेति । अत्र निदर्शनमाह—द्रव्याऽप्रतिस-धेयाङ्गवैकल्यवत् ।

तद् दूषयति—सत्यं न शूद्रवदेकान्ततो न त्वस्याऽधिकारहेतु-विगमे ऽधिकारो न निवर्तते । अयमत्राऽभिसन्धिः । इदमत्र भवान् व्याचष्टां यदेतत्सामर्थ्यमधिकृतविशेषणमुच्यते तत् किं साक्षात्साम-र्थ्यस्य मुनेराहो स्विदङ्गोपदेशवचनात् ? तत्र तावत्प्रथमः कल्पो ऽनु-पलब्धिनिराकृत एव । द्वितीये तु कल्पे ऽङ्गोपदेशसामर्थ्याद्यथा-विनियोगमधिकारव्यवस्थितेरयमधिकारावधिः साङ्गस्य प्रधानस्याऽनु-ष्ठानमाक्षिपन् कर्तारमन्तरेण तदनुपपत्तेः कर्तारमाक्षिपति । न चाऽसामर्थ्यस्य कर्तृत्वं कारकविशेषस्य तद्भावाच्छक्तिमतश्च कारक-त्वात् । क्रियानिमित्तं हि कारकं, निमित्तं च नाम तदुच्यते यस्मिन् सति नैमित्तिकं भवत्येवेत्युपरिष्टाद्वक्ष्यते । न च द्रव्यस्वरूपमात्रे सति क्रिया भवत्येव । तस्माच्छक्तिमद्रूपकारकत्वाऽध्यवसानम् । यथा न द्रव्यमात्रं कारकं तथा न शक्तिमदपि । अभिभूतशक्तेरपि

त्वधिकारहेतुविगमे ऽधिकारो न निवर्त्तते वीतायामिव फलेच्छायां कामिनः । अन्यथा ऽधिकृतस्य समर्थस्य स्वर्गशक्तिमतः क्रियाया अनुपजननात् । ततश्चोद्भूतशक्तेरेव सहकारिसमवधानशालिनः कर्तृत्वं कारकत्वं चेति रमणीयम् । न चाऽधिकारमन्तरेण कर्तृत्वं न च नियोज्यमन्तरेणाऽधिकार इति तदाऽभिभूतसामर्थ्यो कर्तृताप्रच्युतिभया नियोज्यताऽवस्थामुपगतमनुपादेयं हि नियोज्यविशेषणतामनुभवति । यथा चाऽसमर्थवदभिभूतसामर्थ्यो ऽप्यनियोज्यो नाऽधिकृतश्च । यदुक्तं 'न त्वस्याऽधिकारहेतुत्वविगमे ऽधिकारो न निवर्तत' इति । न सामर्थ्यमात्रमनुष्ठानाऽनुपयोगि सदप्यधिकारमनुवर्तयति, किं तर्हि यदनुष्ठानहेतुतद्रूपविशिष्टम्, तस्यैवाऽधिकारहेतुत्वात् । तच्चोद्गतमधिकारो ऽपि निवर्त्तयत्येवेति न कस्य चिदङ्गस्योपसंहारसामर्थ्ये तिरोभावे ऽप्यप्रयुक्तस्य नैमित्तिकाऽधिकाराऽतिक्रान्तिरित्यर्थः । अपि च जातेष्टौ भवतां संवलिताऽधिकारपक्षे जन्मवतः पुत्रस्येन्द्रियादिकामस्य पितुरधिकारादितरकाम्यवत्करणीभूतस्यैव भावार्थस्य विषयभावात्तन्मात्रविषयत्वे काम्यत्वाऽनुपपत्तेर्नैमित्तिकस्य च करणीभूतभावार्थविषयत्वे ऽप्यविरोधात् यथाशक्तिप्रयोगाऽनुपपत्तिरित्यास्तां तावत् ।

अथोच्येत अधिकाराऽवगमः प्रवृत्तिहेतुत्वात्प्रवृत्तेः पूर्वमुपयुज्यते, न प्रवृत्तावुपजातायां, न जातूपजनितकुम्भः कुम्भकारः कुम्भकरणाय घटते । तदुद्भूतसाङ्गप्रधानकरणसामर्थ्यो ऽधिकृतः सन्यदि कुतश्चित्प्रमादतो ऽङ्गैकदेशे न स्वसामर्थ्यमुत्पादयति तथापि तदा ऽनधिकृतो न विरन्तुमर्हतीत्यत आह—वीतायामिव फलेच्छायां कामिनः । इदमप्याकूतम् । अस्ति हि किं चिन्निमित्तकारणमपि यदुपजनितकार्यं निवर्तमानं कार्यमपि निवर्त्तयति । यथा ऽपेक्षाबुद्धिर्द्वित्वसंख्यानिमित्तमुत्पादितद्वित्वा निवर्त्तमाना द्वित्वमपि निवर्तयति । समवायस्य समवायिकारणेषु सर्वत्र प्रायेणेयमेव गतिः ।

कामस्य कादाचित्काङ्गशक्तिवैकल्ये फलाऽनुत्पत्तावप्यधिकृतादिहापि स्वर्गकामः प्रवृत्तो ऽप्युपरतकामो नाऽधिकारी केवलं शिष्टविगर्हणाभिया ऽनधिकृतो ऽपि कर्म समापयति । तथा निमित्तवानपि तिरोहितसामर्थ्यो ऽसन्ननधिकारीत्यकुर्वन्नाऽधिकारमतिक्रामेत् । शिष्टगर्हणभयात्तु समापनं काम्ये ऽपि समानमिति न नैमित्तिकस्य विरोधायाऽलमिति ।

यदि च समर्थस्य प्रवृत्तस्य पश्चात्सामर्थ्याऽभिभवेन प्रवृत्त्युपरमे ऽधिकाराऽतिक्रान्तिर्नैमित्तिके काम्ये ऽपि[1] प्रसज्येतेत्याह—अन्यथा ऽधिकृतस्य समर्थस्य स्वर्गकामस्य कादाचित्काऽङ्गवैकल्ये[2] फलाऽनुत्पत्तावधिकाराऽतिक्रान्तिः स्यात् । ये पुनराहुः । एकाङ्गवैकल्ये ऽपि प्रयोगस्य प्रत्यभिज्ञानात्प्रवृत्तस्यापि नाऽधिकारविगमो, न खलु भग्नशृङ्गो गौरिति । तान् प्रति काम्ये ऽपि समानमित्युत्तरम् । प्रसिद्धतरत्वाच्च तदुपेक्ष्य दूषणान्तरमाह—अप्राप्तकालं चाऽकुर्वतो ऽधिकाराऽतिक्रान्तिः स्यादिति चेनाऽनुषज्यते । अप्राप्तकालं च पञ्चम्यामिष्टिप्रयोगमकुर्वतो ऽधिकाराऽतिक्रान्तिर्भवेदित्यर्थः । अथापि स्यात् किमित्येवमप्राप्तकालमननुतिष्ठन्नाऽधिकारमतिक्रामति । न हि निमित्तानन्तरमेव नैमित्तिकं कर्तव्यमिति प्रमाणमस्ति, किं तर्हि निमित्ते सतीति सत्तामात्रमवगम्यते । शास्त्रान्मीमांसकैर्वा व्यवस्थापितमिदं हि जातेष्टौ । एवं हि श्रूयते । 'वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते' इति । तत्र संशयः किं पुत्रजन्माऽनन्तरमेव निर्वपणीय,मुत कृते जातकर्मणीति । किं प्राप्तम् । पुत्रजन्माऽनन्तरमिति । कुतः ? जातइति निमित्तश्रुतेः । सत्यस्मिन्नक्रियायां तद्विरोधप्रसङ्गादिति प्राप्ते उच्यते । कृते जातकर्मणीति । कुतः ? इष्टिभावनायामस्यां भाव्याकाङ्क्षायामर्थवादतो बहवः खल्विह भावेन सम्बन्धुं

१ नैमित्तिकस्य काम्ये ऽपि· २ पु· पा· । २ अङ्गशक्तिवैकल्ये २ पु· पा· ।

597

Digitized by Google

काराऽतिक्रान्तिः स्यात् असमाप्तकालं चाऽऽकुर्वतः ।

अथाऽधिकृतोऽपि जातपुत्रवत्कालशौचे कालमुपसंहृत्य कुर्वन्नाऽधिकारमतिक्रामति निमित्तानन्तर्यस्याऽशमर्थास्तेजस्वितेन्द्रियावित्वादयः पुत्रगामिनः श्रूयन्ते । तत्तेषामेव रात्रिसत्रन्यायेन फलत्वकल्पना । यदि च जातमात्र एव कुमारे इष्टिरियं निरूप्येत ततोऽकृतजातकर्मणः स्तन्यदाननिषेधादिष्टिक्रियायां च कालयोगात् कुमारविपत्तिप्रसङ्गात्तदुपविधानार्थमिष्टिरनर्थिका स्यादिति न जातमात्र इति निरूपितम् ।

तथेदमपरं चिन्त्यते । अवगतमेतन्नाऽकृते जातकर्मणीति । इदमिदानीं सन्दिह्यते किं जातकर्माऽनन्तरमेव निर्वप्तव्या,माहोस्विदूर्ध्वं दशरात्रादिति । कुमारमरणभयात्कारणाज्जन्माऽऽनन्तर्यमतिक्रान्तम् । कृते तु जातकर्मणि पुत्रजन्मनो निमित्तस्य संनिधानादिति क्रमकारणाऽभावाज्जातकर्माऽनन्तरमेवेति प्राप्ते ब्रूमः । शुचिना कर्म कर्तव्यमिति शौचस्याप्यधिकारकारणत्वादानन्तर्यस्य च जातकर्मण्येव बाधितत्वात् सति भावमात्रतया निमित्तभावाऽवलम्बनाद्दशरात्रस्य परस्तादपि तदुपपत्तेरतीते दशरात्र इति सिद्धान्तः ।

पुनश्चिन्त्यते दशरात्राऽनन्तरमियमिष्टिः, उताऽमावास्यादिकालप्रतीक्षेति । तत्राऽत्यन्तव्यवधाने सति निमित्तस्य निमित्तभावः श्रुत एकान्ततो बाधितः स्यादिति दशरात्राऽनन्तरमेवेति प्राप्तेऽभिधीयते । कालप्रतीक्षेति । तदवच्छिन्नस्य निमित्तस्य निमित्तभावान्न जात्वतिक्रान्ते दशरात्रे दर्शपूर्णमासकालावच्छिन्नसद्भावो जातपुत्रो जातपुत्रतामतिवर्तते । तदेवं जातेष्टिन्यायेन निमित्तानन्तर्यस्याऽशक्यत्वात् पञ्चम्यामिष्टिमप्रयुञ्जानोऽपि नाऽधिकारमतिपततीत्याह— यथाऽधिकृतो जातपुत्र इव कालशौचे कालं च शौचं च निमित्ते पुत्रजन्मन्युपसंहृत्य यथा जातपुत्रो दशरात्रस्य परस्तादमावास्यायां पौर्णमास्यां वा जातेष्टिं कुर्वन्नाऽतिपतत्यधिकारं तथा जीवनवानपि

१ संग्रह० मू० पु० पा० ।

पुरुषाश्मवदिति चेत्तथाऽपि ॥ २ । २ । ७ ॥

ननु पुरुष एव प्रधानप्रवर्तकः । स तु स्वयमप्रवर्तमानः कथं परं प्रवर्तयेदिति चेत् "पुरुषाश्मव"दिति ब्रूमः । लोके यथा पङ्गुः पुरुषः स्वयमप्रवर्तमानोऽन्धं प्रवृत्तिशक्तिमन्तं प्रवर्तयति, यथा वाऽयस्कान्तोऽश्मसन्निधिमात्रेणायः प्रवर्तयति, एवं पुरुषः प्रवर्तक इति चेन्न । यतस्तथाऽपि दोषाणामनिर्मोक्षः । तथा हि प्रधानस्य पुरुषप्रेर्यत्वे प्रधानं स्वतन्त्रमिति स्वाभ्युपगमविरोधः । पुरुषस्य प्रवर्तकत्वेऽकर्तृत्वहानिः, स्वस्य व्यापारं विना प्रवर्तकत्वायोगात्, पङ्गोरपि वाग्व्यापारस्य सत्त्वात् । अयस्कान्तस्य स्वनित्यसन्निधिरेव व्यापारः । प्रधानपुरुषसन्निधेर्नित्यत्वेन व्यापारत्वायोगः । नित्यस्यापि व्यापारत्वे प्रधानप्रवृत्त्यविच्छेदप्रसङ्ग इत्यादयो दोषा द्रष्टव्याः । ब्रह्मणस्त्वाविद्यकं प्रवर्तकत्वमिति न कौटस्थ्यहानिः ॥

अङ्गित्वानुपपत्तेश्च ॥ २ । २ । ८ ॥

अपि च गुणत्रयसाम्यावस्थारूपा प्रकृतिः, साम्यावस्थाप्रच्युत्या गुणानामङ्गाङ्गिभावे महदाद्युत्पत्तिरिति वदता साङ्ख्येनेदं वक्तव्यम् । प्रकृतिः किं कूटस्था, उत विकारिणी । आद्ये परस्परानपेक्षाणां गुणानां साम्यावस्थाप्रच्युत्याऽङ्गाङ्गिभावानुपपत्तेः कार्यानुदयप्रसङ्गः । प्रच्युत्यङ्गीकारे स्वरूपहान्यापत्तिः । द्वितीये किं स्वतः प्रच्युतिः, उतान्यतः । नाद्यः सदाकार्यप्रसङ्गात् । न द्वितीयः पुरुषस्योदासीनत्वादभ्युपगमहानेश्च । अतः प्रच्युत्यभावेनाङ्गाङ्गिभावानुपपत्तेः कार्याभावप्रसङ्ग इत्यर्थः ॥

अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् ॥ २ । २ । ९ ॥

नन्वनपेक्षस्वभावाः कूटस्थाश्च गुणा मानुमीयन्ते-ऽस्माभिः, किं त्वन्यथा प्रकारान्तरेणैव यथा कार्योत्पत्ति-सम्भवस्तथाऽनुमीयन्ते कार्यानुमेयत्वात्प्रधानस्येत्युक्ताङ्गाङ्गि-भावसम्भवात्कार्योत्पादः सम्भवतीति चेन्न । ज्ञशक्तिवि-योगाद्गुणानां ज्ञानशक्तिरहितत्वादित्यर्थः । अयं भावः । अचेतनानां गुणानां साम्यावस्थाप्रच्युत्यादियोग्यत्वेऽपि प्रच्युतेर्निर्निमित्तत्वासम्भवात्किञ्चिन्निमित्तं वक्तव्यम् । तथा चान्यस्य निमित्तस्यासम्भवेन स्वतो वैषम्ये सदा वैषम्यं स्यात्स्वतोऽप्यवैषम्ये सदा साम्यप्रसङ्ग इत्युक्ताङ्गाङ्गि-त्वानुपपत्तिस्तदवस्थेति कार्यानुत्पादोऽपि तदवस्थ इति ॥

विप्रतिषेधाच्चासमञ्जसम् ॥ २ । २ । १० ॥

सांख्या हि क्वचिन्महतः पञ्चतन्मात्रसर्गं वदन्ति क्वचिदहङ्कारात् । क्वचिदेकादशेन्द्रियाणि क्वचिद्दशेन्द्रि-याणि त्वगिन्द्रियेऽन्तर्भाव्य सप्तेन्द्रियाणीति स्थापयन्ति । तथा च परस्परविप्रतिषेधादसमञ्जसं सांख्यमतमित्यर्थः । तस्मात्सांख्यमतस्य भ्रान्तिमूलत्वात्तदीययुक्तिविरोधस्स-मन्वयस्य नास्तीति सिद्धम् ॥

ननु प्रपञ्चस्य ब्रह्मोपादानकत्वे ब्रह्मचैतन्यं स्यात्का-रणगुणस्य कार्येऽवश्यंभावादित्याशङ्क्येमं नियमं तदीय-प्रक्रियया व्यभिचारयति ।

महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ २। २। ११ ॥

प्रपञ्चस्य प्रधाननिष्ठाशब्दत्वादिगुणानन्वयात्प्रधाना-नुपादानकत्ववद्ब्रह्मगुणचेतनत्वानन्वयाद्ब्रह्मोपादानकत्वं न स्यादिति दृष्टान्तसङ्गत्याऽस्यारम्भः । यद्यपि स्वपक्षदो-षनिरासात्मकस्यास्याधिकरणस्य नात्र सम्बन्धः किं तु

Digitized by Google

स्मृतिपाद एव, तथाऽप्युक्तावान्तरसङ्गतिलोभादिहलि-
खितमिति मन्तव्यम् । अत्र चेतनाद्ब्रह्मणो जगत्सर्गं ब्रुव-
न्समन्वयो विषयः । स किं "कारणगुणाः कार्ये स्वसमा-
नजातीयगुणारम्भका" इति न्यायेन विरुध्यते न वेति
सन्देहे विरुध्यत इति प्राप्ते व्यभिचारान्न विरोध इति
राद्धान्तः । सूत्रे "वा" शब्द "आ"र्थोऽनुक्ताणुसमुच्चयं
ब्रूते । तथा च ह्रस्वपरिमण्डलाभ्यां द्व्यणुकपरमाणुभ्यां
महद्दीर्घाणुवच्चेतनाद्ब्रह्मणोऽचेतनं जगद्भवतीति योजना ।
वैशेषिका हि ह्रस्वादणोश्च द्व्यणुकान्महद्दीर्घं च त्र्यणुकं
जायते, द्व्यणुकगतह्रस्वत्वाणुत्वे तु त्र्यणुके स्वसमानजा-
तीयह्रस्वत्वाणुत्वे नारभेते, किं तु द्व्यणुकगतत्रित्वसंख्या
त्र्यणुके महत्त्वादिकमारभत इति वदन्ति । एवं परिमण्ड-
लात्परमाणोरणु द्व्यणुकं जायते, परमाणुगतपारिमाण्डल्यं
तु द्व्यणुके पारिमाण्डल्यं न जनयति, किं तु परमाणुगत-
द्वित्वसंख्या द्व्यणुकेऽणुत्वादिकमारभत इति प्रक्रियां दर्श-
यन्ति । एवं दर्शयतां वैशेषिकाणां कारणगुणाः कार्ये
स्वसमानगुणारम्भका इति नियमाभावं वदतां कथं लज्जा
न भवेत् व्यभिचारस्य स्फुटत्वादिति तात्पर्यम् । "एतेन
शिष्टापरिग्रहा अपि व्याख्याता" इत्यस्यायं प्रपञ्च इति न
पौनरुक्त्यं शङ्कनीयमिति ॥

इदानीं प्रकृतं परमतनिरासमुपक्रमते ।

उभयथाऽपि न कर्मातस्तदभावः ॥ २ । २ । १२ ॥

प्रासङ्गिकाव्यवहितेनास्य सङ्गतिर्नापेक्षितेति व्यव-
हितेनोच्यते । ननु प्रधानस्य चेतनानधिष्ठितत्वात्कारण-
त्वाभावे तर्हि चेतनाधिष्ठिताः परमाणवः कारणं जगत
इति प्रत्युदाहरणेनास्यारम्भः । अत्र परमाणुप्रक्रियया

Digitized by Google

जगदुत्पत्तिरिति वैशेषिकसिद्धान्तो विषयः। स किं मानमूलो भ्रान्तिमूलो वेति विशये, मानमूल इति प्राप्ते ब्रूमः। वैशेषिकाः खलु कर्मणा सृष्टेः पूर्वं निश्चलयोः परमाण्वोः संयोगे द्व्यणुकाद्युत्पत्तिरिति वदन्ति । तस्य कर्मणः किञ्चिन्निमित्तमभ्युपगम्यते वा न वा। आद्ये कर्मनिमित्तत्वेन प्रसिद्धं जीवप्रयत्नाभिघातादिकमङ्गीकर्तव्यम्। न हि तत्सम्भवति, सृष्ट्युत्तरकालीनत्वात्तस्य । द्वितीये कर्मानुपपत्तिः। अत उभयथाऽपि न कर्म। अतः कर्माभावात्तदभावो द्व्यणुकादिक्रमेण सृष्ट्युत्पादाभाव इत्यर्थः। यद्वा जीवादृष्टवशादाद्यं कर्म परमाणुष्विति तत्सिद्धान्तः। तथा च तदृदृष्टं किं जीवनिष्ठं वा परमाणुनिष्ठं वा। उभयथाऽपि न कर्म, अदृष्टस्याचेतनस्य कर्माभिमुख्यायोगात्, तथात्वे सर्वदा सृष्टिप्रसङ्गात् । न च जीवोऽदृष्टस्य प्रेरकः, तदानीं तस्य ज्ञानवत्त्वाभावात् । न च वैशेषिकाभिमत ईश्वरः प्रेरक इति वक्ष्यते । अतः सर्गाभाव इत्यर्थः। यद्वा, परमाण्वोः संयोगोत्पत्तौ सृष्टिः, विभागोत्पत्तौ च प्रलयः, तयोश्च संयोगविभागयोः कर्मैव हेतुरिति तत्सिद्धान्तः। तथा च, संयोगहेतुः कर्म नास्तीत्युक्तम्। एवं विभागहेतुकं कर्म नास्ति, निमित्तस्यादृष्टस्य नोदनादेरसम्भवात्। अदृष्टं च भोगार्थमेव न प्रलयार्थमित्युभयथाऽपि न कर्म। अतः संयोगविभागहेतुकर्माभावात्तदभावस्तयोः सृष्टिप्रलययोरभाव इत्यर्थः । तस्मादनुपपन्नः परमाणुकारणवादः ॥

समवायाभ्युपगमाच्च साम्यादनवस्थितेः॥२।२।१३॥

तदभाव इत्यनुषङ्गः। तस्य परमाणुकारणवादस्यासम्भव इत्यर्थः। कुतः। परमाणुद्व्यणुकयोः समवायाभ्यु-

Digitized by Google

पगमात् । अभ्युपगमे को दोषस्तत्राह "साम्यादनवस्थिते"रिति । यथा द्व्यणुकं परमाणुभ्यामत्यन्तं भिन्नं सत् समवायमपेक्षते, एवं समवायोऽपि समवायिभ्यामत्यन्तं भिन्नः सन्नन्येन समवायेन समवायिभ्यां सम्बध्येत भिन्नत्वसाम्यादसम्बद्धस्य सम्बद्धत्वादर्शनात् । तथा च तस्यापि भिन्नत्वसाम्यात्समवायान्तरमित्यनवस्था स्यादित्यर्थः । स्वरूपस्य सम्बन्धत्वे समवायलोपप्रसङ्ग इति बोध्यम् । तथा च समवायासिद्धौ समवेतद्व्यणुकादिसृष्ट्यसिद्धिः स्यादिति भावः ॥

नित्यमेव च भावात् ॥ २ । २ । १४ ॥

परमाणूनां प्रवृत्तिस्वभावत्वे प्रवृत्तेर्नित्यमेव भावात्प्रलयाभावप्रसङ्गः । निवृत्तिस्वभावत्वे निवृत्तेर्नित्यमेव भावात्सृष्ट्यभावप्रसङ्ग इत्यर्थः ॥

रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॥ २ । २ । १५ ॥

चतुर्विधाः परमाणवो रूपस्पर्शादिमन्तो नित्या अणवश्चेति वैशेषिकसिद्धान्तः । स नोपपद्यते । तथा हि, परमाणवोऽनित्याः स्थूलाश्च भवितुमर्हन्ति, रूपादिमत्त्वात्पटादिवत् । पटो हि रूपादिमत्त्वात्स्वकारणतन्त्वपेक्षया स्थूलोऽनित्यश्च । तद्वज्जगत्कारणस्यापि रूपादिमत्त्वेऽनित्यत्वप्रसक्तौ स्वकारणापेक्षया स्थूलत्वं स्यादिति न जगत्कारणस्य रूपादिमत्त्वमिति तात्पर्यम् । सूत्रार्थस्तु । भवन्मते जगत्कारणस्य रूपादिमत्त्वादणुत्वनित्यत्वविपर्ययः, स्थूलत्वमनित्यत्वं च प्रसज्येत, लोके रूपादिमतः पटादेस्तथा दर्शनादिति ॥

उभयथा च दोषात् ॥ २ । २ । १६ ॥

Digitized by Google

रूपरसगन्धस्पर्शात्मिका पृथिवी स्थूला दृश्यते, रूपरसस्पर्शात्मिका आपः सूक्ष्माः, रूपस्पर्शात्मकं तेजः सूक्ष्मतरं, स्पर्शात्मको वायुः सूक्ष्मतम इत्यनुभवागमसिद्धा प्रक्रिया । तत्र पृथिव्यादिचतुःपरमाणवोऽप्युपचितापचितगुणात्मकाः कल्प्यन्ते, न वा । आद्येऽणुत्वव्याघातः, उपचितापचितगुणात्मकपृथिव्यादेः स्वरूपोपचयापचयदर्शनात् । गुणानां द्रव्यादतिरिक्तत्वेऽपि तादृशगुणवत्त्वेन पृथिव्यादीनामुपचयादिदर्शनादणुत्वव्याघात एव । न हि गुणगुणिनोर्भेदः सम्भवति, भेदे गवाश्ववद्गुणगुणिभावानुपपत्तेः । द्वितीये तत्कार्यपृथिव्यादिषु रूपाद्यनुपलम्भप्रसङ्गः । इत्युभयथाऽपि दोषादनुपपन्नः परमाणुकारणवादः ॥

अपरिग्रहाच्चात्यन्तमनपेक्षा ॥ २ । २ । १७ ॥

प्रधानवादो हि सत्कार्यत्वाद्यंशेन मन्वादिभिः शिष्टैः परिगृहीतः । परमाणुकारणवादस्तु केन चिदप्यंशेन कैश्चिदपि शिष्टैर्न परिगृहीत इति शिष्टापरिगृहीतत्वाच्चात्यन्तमनपेक्षा परमाणुकारणवादे कर्तव्या वेदविद्भिरित्यर्थः ॥ सूत्रे "च"शब्देन वैशेषिकाभिमतषट्पदार्थासम्भवः सूचितः । स चासम्भवः प्रतिपादितो भगवता भाष्यकृता । तस्माद्भ्रान्त्येकमूलवैशेषिकादिमतेन न समन्वयस्य विरोध इति सिद्धम् ॥

समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॥ २ । २ । १८ ॥

वैशेषिकास्तावत्परिणामभेदेन देहादेराशुतरविनाशित्वाङ्गीकारादात्मनः स्थायित्वाङ्गीकाराच्चार्धवैनाशिकाः, सर्वक्षणिकवादिनस्तु पूर्णवैनाशिका इत्यर्धवैनाशिकवैशे-

षिकमतनिराकरणानन्तरं पूर्णवैनाशिकमतं बुद्धिस्थमि-
दानीं निराक्रियत इत्यवान्तरसङ्गतिर्द्रष्टव्या । तत्र ताव-
द्बुद्धमुनिनाऽऽगम उपदिष्टः । स चागमो वैभाषिक सौत्रा-
न्तिक विज्ञानवादिसर्वशून्यवाद्याख्यचतुर्विधशिष्यप्रतिप-
त्तिवैचित्र्याच्चतुर्विधो भवति । तत्र वैभाषिकसौत्रान्ति-
कयोर्ज्ञानं तदतिरिक्तपदार्थाश्च सर्वे क्षणिकाः सत्यभूताः
सन्ति । इयान्परं भेदः । वैभाषिकस्य घटादिपदार्थाः प्रत्य-
क्षाः, सौत्रान्तिकस्य तु ज्ञाने घटाद्याकार उत्पन्ने तेनाका-
रेण प्रत्यक्षेणाप्रत्यक्षघटादयोऽनुमीयन्त इति । तत्रादौ
वैभाषिकसौत्रान्तिकयोर्बाह्यास्तित्वाविशेषात्तयोर्मतमेकी
कृत्य, तन्मतं प्रमाणमूलं भ्रान्तिमूलं वेति सन्देहे
प्रमाणमूलमिति प्राप्तम् । तथा हि पृथिव्यप्तेजोवायवश्च-
त्वारि भूतानि चतुर्विधपरमाणुपुञ्जस्वरूपाणि । एवं भौ-
तिकानि रूपादिविषयेन्द्रियाणि परमाणुपुञ्जस्वरूपाणि ।
न हि परमाणुसमूहव्यतिरेकेणावयवीभूतं किञ्चित्कार्यम-
स्तीति । परमाणुहेतुक एव पृथिव्यादिसमुदायो बाह्यः ।
आध्यात्मिकश्च समुदायः स्कन्धहेतुकः । तथा हि रूपवि-
ज्ञानवेदनासंज्ञासंस्काराः पञ्चैते स्कन्धाः । तत्र रूपस्कन्धः
सविषयेन्द्रियाणि । विषयाणां रूपादीनामाध्यात्मिकत्व-
माध्यात्मिकेन्द्रियसम्बन्धाद्द्रष्टव्यम् । अहमित्यालयवि-
ज्ञानप्रवाहो विज्ञानस्कन्धः । सुखादिप्रत्ययो वेदनास्कन्धः ।
गौरश्व इत्यादिशब्दादिविशिष्टवस्तुविषयकसविकल्पकप्र-
त्ययः संज्ञास्कन्धः । रागद्वेषमोहधर्माधर्माः संस्कारस्कन्धः ।
तत्र विज्ञानस्कन्धश्चित्तमित्यात्मेति च गीयते । इतरे
स्कन्धाश्चैत्ताः । एतेषां चित्तचैत्तानां स्कन्धानां समुदायः
सर्वव्यवहारास्पदम् । आध्यात्मिकश्च समुदायः स्कन्धहे-
तुकः । इति सर्वक्षणिकत्ववादिनोर्वैभाषिकसौत्रान्ति-

कयोर्मतम् । तन्निराकरोति "समुदाय उभयहेतुकेऽपि तदप्राप्ति"रिति । उभयहेतुकेऽपि समुदाये परमाणुहेतुके बाह्यसमुदाये स्कन्धहेतुक आध्यात्मिकसमुदाये च तदप्राप्तिस्तस्य समुदायस्याप्राप्तिरित्यर्थः । अचेतनानां परमाणूनां स्कन्धानां च स्वतः समुदायायोगादन्यस्य च स्थिरस्य चेतनस्य समुदायकर्तुरनभ्युपगमादिति सूत्रवाक्यशेषः ॥

इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् ॥ २ । २ । १९ ॥

ननु संहन्तुश्चेतनस्याभावेऽपि सङ्घात उपपद्यते । तथा ह्यविद्यासंस्कारो विज्ञानं नामरूपं षडायतनं स्पर्शो वेदनेत्येवंजातीयकानामविद्यादीनामितरेतरप्रत्ययत्वादितरेतरकारणत्वाद्घटीयन्त्रवदनिशमावर्तमानेष्वप्यविद्यादिष्वर्थादाक्षिप्तो निमित्तमात्रतः सङ्घात उपपद्यत इति शङ्कार्थः । कार्यं प्रत्ययते जनकत्वेन गच्छतीति व्युत्पत्त्या प्रत्ययशब्दः कारणवाचकः । अविद्यादीनामयमर्थः । क्षणिकेषु स्थिरत्वनित्यत्वभ्रान्तिरविद्या । सा च विषयेषु रागाद्यात्मकसंस्कारहेतुः । स च संस्कारो गर्भस्थस्याद्यं विज्ञानं जनयति । तस्माच्चालयविज्ञानात्पृथिव्यादिचतुष्टयं शरीरस्य समुदायस्य कारणभूतं जायते । तदेव नामाश्रयत्वान्नामेत्युच्यते । तच्च नाम सितासितादिरूपं तच्छरीरं जनयति । गर्भभूतस्य देहस्य कललबुद्बुदाद्यवस्था नामरूपशब्दार्थ इति पर्यवसन्नम् । पृथिव्यादिचतुष्टयं नामरूपं च शरीरं विज्ञानधातुश्चेति षडायतनानि यस्येन्द्रियजातस्य तत् षडायतनम् । नामरूपेन्द्रियाणां मिथः सम्बन्धः स्पर्शः । ततः सुखादिका वेदना । ततः पुनरविद्यादय

Digitized by Google

इति । निराकरोति "ने"ति । कुतः । उत्पत्तिमात्रनिमित्तत्वात् । अयमर्थः । द्विविधो हि कार्योत्पादस्तवाभिमतः, हेत्वधीनः कारणसमुदायाधीनश्चेति । तत्र हेत्वधीनो यथा बीजादङ्कुरोऽङ्कुरात्पत्रं पत्रात्काण्डमित्यादौ । कारणसमुदायाधीनो यथा पृथिव्यप्तेजोवाय्वाकाशकालविशेषाणां मेलने सति तेभ्य उपकृताद्बीजादङ्कुरो जायते । एवमाध्यात्मिककार्योत्पादोऽपि पूर्ववद्द्विविधः । तत्राद्यो हेत्वधीनः कार्योत्पादोऽविद्यादीनाम् । द्वितीयस्तु पृथिव्यप्तेजोवाय्वाकाशकालालयविज्ञानानां समुदायात्कार्योत्पाद इति । कार्येऽङ्कुरादौ काठिन्यस्नेहपाकादीनां दर्शनात्पृथिव्यादीनां कारणत्वमूह्यते । उभयविधेऽपि कार्योत्पादे न चेतनापेक्षेत्यत आद्यमङ्गीकृत्य द्वितीयकार्योत्पादं हेतुसमुदायाधीनं दूषय "त्युत्पत्ती"ति । अविद्यादीनामितरेतरकारणत्वेऽप्युत्पत्तिमात्रे निमित्तत्वान्न हेतुसङ्घाताधीनः कार्योत्पादः सम्भवति, संहन्तुः स्थिरस्य चेतनस्यानङ्गीकारादित्यर्थः ॥

सर्वक्षणिकत्ववादिनां हेत्वधीनोऽपि कार्योत्पादो न सम्भवतीत्याह ।

उत्तरोत्पादे च पूर्वनिरोधात् ॥ २ । २ । २० ॥

कार्यकाले च विद्यमानस्यैव मृदादेः कारणत्वं दृश्यते, न तु नष्टस्य । भवन्मते तूत्तरस्य कार्यक्षणस्योत्पादे पूर्वस्य कारणक्षणस्य निरोधान्नाशाङ्गीकारान्न हेत्वधीनोऽपि कार्योत्पादः सम्भवतीत्यर्थः ॥

ननु निर्हेतुक एव कार्योत्पादोऽस्तु, तथा च नोक्तदोष इत्याशङ्क्याह ।

असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥२।२।२१॥

असति हेतौ कार्योत्पत्त्यङ्गीकारे, पूर्वज्ञानचक्षुरालोकविषयेषु चतुर्षु हेतुषु सत्सु कार्यं नीलादिज्ञानं जायत इत्यस्याः प्रतिज्ञाया उपरोधः स्यात् । अन्यथा कार्यं सहेतुकमङ्गीकृत्य कार्यपर्यन्तं हेतोः स्थित्यङ्गीकारे, हेतुफलयोर्यौगपद्यमेकस्मिन्काले स्थितिः स्यादित्यर्थः । तथा च क्षणिकत्वप्रतिज्ञाहानिरिति भावः ॥

प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॥ २ । २ । २२ ॥

वैनाशिकाः खलु बुद्धिपूर्वकनाशो भावानामबुद्धिपूर्वकनाश आकाशं चेति त्रयमप्यवस्तु सन्निरुपाख्यं निर्हेतुकं तुच्छमिति वदन्ति । तत्राकाशस्य निरुपाख्यत्वमुत्तरसूत्रे निरसिष्यते । अत्र तु बुद्धिपूर्वकनाशाबुद्धिपूर्वकनाशरूपनिरोधद्वयं निराक्रियते । प्रतीपा प्रतिकूला सन्तं घटमसन्तं करोमीत्येवमाकारिका संख्या बुद्धिः प्रतिसंख्या । तत्पूर्वको निरोधो नाशः प्रतिसंख्यानिरोधः । अतत्पूर्वको नाशोऽप्रतिसंख्यानिरोधः । तयोर्निरोधयोः सन्तानिषु सन्ताने वाऽप्राप्तिरसम्भव इत्यर्थः । कुतः । अविच्छेदात् । न तावन्निरोधद्वयस्य सन्तानगोचरत्वं, सन्तानस्याविच्छेदात् । सन्तानविच्छेदो हि चरमसन्तानिविच्छेदाद्वक्तव्यः । स न युक्तः । चरमसन्तानिनः कार्यान्तरजनकत्वे सन्तानस्याविच्छेद एव । अजनकत्वे चरमसन्तानिनोऽर्थक्रियाकारित्वरूपसत्त्वाभावेनात्यन्तासत्त्वात्पूर्वसन्तानिनां सर्वेषां शून्यतापरिशेषापत्तिरर्थक्रियाया असम्भवात् । नापि सन्तानिप्रतियोगिकत्वं निरोधद्वयस्य, सन्तानिनां घटादीनां क्षणिकत्वेन बुद्धिपूर्वकनाशायोगात् । नाप्यबुद्धिपूर्वकसमूलनाशस्त्वदभ्युपगतः सम्भ-

वति, मूलस्य मृदादेः प्रत्यभिज्ञायमानत्वात् । तस्मान्निरोधद्वयस्यानुपपत्तिः ॥

उभयथा च दोषात् ॥ २ । २ । २३ ॥

स्थिरत्वादिभ्रान्तिरूपाविद्यायाः किं सम्यग्ज्ञानान्निनाश उत स्वतो वा । नाद्यो, निर्हेतुकनाशाभ्युपगमहानिप्रसङ्गात् । द्वितीये सम्यग्ज्ञानोपदेशानर्थक्यम् । इत्युभयथाऽपि दोषादसङ्गतं सौगतमतमित्यर्थः ॥

आकाशस्य निरुपाख्यत्वं दूषयति ।

आकाशे चाविशेषात् ॥ २ । २ । २४ ॥

"आत्मन आकाशः सम्भूत" इति श्रुत्या शब्दगुणकत्वेन चाकाशेऽपि पृथिव्यादिवद्वस्तुत्वप्रतिपत्तेरविशेषान्न निरुपाख्यत्वमित्यर्थः ॥

आत्मनः क्षणिकत्वं दूषयति ।

अनुस्मृतेश्च ॥ २ । २ । २५ ॥

अनुभवमन्वनन्तरमुत्पद्यमाना स्मृतिरनुस्मृतिः । तद्बलादात्मनोऽनुभवितुर्न क्षणिकत्वमित्यर्थः । अन्यानुभूतेऽन्यस्य स्मरणायोगादिति भावः ॥

नासतो दृष्टत्वात् ॥ २ । २ । २६ ॥

क्षणिकात्कार्योत्पत्तिमिच्छताऽर्थादभावान्निरुपाख्यादेव कार्योत्पत्तिरङ्गीकृतेति प्रतिभाति, पूर्वक्षणनाशं विना कार्यक्षणोत्पत्तेरयोगात् । स चाभावाद्भावोत्पत्तिः स्वग्रन्थे दर्शिता च । तथा चासतोऽभावान्निःस्वरूपात्कार्योत्पत्तिर्न युक्ता । कुतः । अदृष्टत्वात् । निरुपाख्यात्खरविषाणादेः कार्योत्पत्तेरदृष्टत्वादित्यर्थः । दृष्टत्वादिति वा पदच्छेदः । सत एव मृदादेः कार्योत्पत्तेर्दृष्टत्वादित्यर्थः ॥

Digitized by Google

उदासीनानामपि चैवं सिद्धिः ॥ २ । २ । २७ ॥

किं च । एवमभावाद्भावोत्पत्त्यङ्गीकारे, उदासीनानां तत्तत्कार्यसाधनेषु कृष्यादिष्वप्रवर्तमानानां स्वगृहे तूष्णीमुपविष्टानामपि पुंसां स्वस्वाभिमतस्य कार्यस्य सिद्धिः स्यादित्यर्थः । तस्माद्भ्रान्त्येकमूलेन वैभाषिकसौत्रान्तिकयोर्बाह्यार्थवादिनोर्मतेन न समन्वयस्य विरोध इति सिद्धम् ॥

नाभाव उपलब्धेः ॥ २ । २ । २८ ॥

एवं क्षणिकबाह्यार्थवादनिराकरणं कृतम् । तन्निराकरणमुपजीव्य क्षणिकविज्ञानमात्रसत्यत्ववादी प्रत्यवतिष्ठत इत्यनयोरस्त्युपजीव्योपजीवकभावः सङ्गतिः । विज्ञानवादिनो बौद्धस्य योऽयं सिद्धान्तो, विज्ञानातिरिक्तस्य बाह्यपदार्थस्याभाव इति, सोऽस्याधिकरणस्य विषयः । स किं मानमूलो भ्रान्तिमूलो वेति सन्देहे मानमूल इति प्राप्तम् । तथा हि नीलादिविज्ञानस्य स्वरूपतः सर्वार्थान्प्रत्यविशिष्टत्वाद्बाह्यार्थवादिनाऽपि तस्य नीलादिज्ञानत्वसिद्धये नीलाद्याकारत्वमङ्गीकरणीयम् । तथा च तेनैवाकारेण सर्वव्यवहारोपपत्तौ किं बाह्येन नीलादिना वन्ध्यापुत्रायमानेन । तथा च स्वप्रकाशनीलादिविज्ञानस्य क्षणिकत्वात्साकारत्वाच्च स्थायिनिराकारविज्ञानाद्ब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयो न सिध्यतीति प्राप्ते ब्रूमः । विज्ञानव्यतिरिक्तानामभावो न सम्भवति । कुतः । उपलब्धेः । विज्ञानातिरिक्तानामर्थानां "घटः पट" इत्याद्यनुभवसिद्धत्वादित्यर्थः । न च विज्ञानाकारेणानुभवस्यान्यथासिद्धिः, बाह्यार्थं विना तत्सारूप्यात्मकाकारस्य ज्ञानेऽप्यसिद्धेः । एवं च प्रतीयमानो बाह्यार्थ एवेति न ज्ञानस्य

साकारत्वम् । नापि क्षणिकत्वं, मानाभावात् । अनुमानस्य पक्षाद्यनेकज्ञानसाध्यतया स्थायिनमनुमानान्तरं विनाऽनुदयादिति स्थायिनिराकरणब्रह्मणि समन्वयो न विरुध्यत इति ॥

ननु, जाग्रदवस्थायामनुत्पन्नाः सर्वे प्रत्यया निरालम्बनाः,प्रत्ययत्वात्, स्वप्नगन्धर्वनगरमायाविनिर्मितमायादिवत्, इत्याशङ्क्य दृष्टान्ते बाधितविषयत्वमुपाधिरित्याह ।

वैधर्म्याच्च न स्वप्नादिवत् ॥ २ । २ । २९ ॥

स्वप्नादिप्रत्ययस्य जाग्रत्प्रत्ययस्य चान्योन्यं बाधितविषयत्वाबाधितविषयत्वरूपवैधर्म्यान्न स्वप्नादिदृष्टान्तेन निरालम्बनत्वं जाग्रत्प्रत्ययस्येत्यर्थः । "च" शब्देन दृष्टान्ते साध्यवैकल्यं सूचयति, स्वप्नादावपि प्रातिभासिकविषयाणां सत्त्वादिति ॥

किञ्च बाह्यार्थानामभावे घटज्ञानं पटज्ञानमित्यादिवैचित्र्यं ज्ञाने न स्यात् । न च पूर्वपूर्वानादिविचित्रवासनावशाद्वैचित्र्यं स्यादिति वाच्यं, बाह्यार्थाभावे वासनानामभावादित्याह ।

न भावोऽनुपलब्धेः ॥ २ । २ । ३० ॥

वासनानां न भावो न सम्भव इत्यर्थः । कस्मात् । अनुपलब्धेः । त्वत्पक्षे बाह्यार्थानामनुपलब्धेरित्यर्थः । वासनानां बाह्यार्थानुभवव्याप्यत्वाद्व्यापकाभावे व्याप्याभाव इति, बाह्यार्थानुभवस्य वासनां प्रति कारणत्वात्कारणाभावे कार्याभाव इति वा तात्पर्यम् । किञ्च वासनानां संस्काराभिधानानां त्वत्पक्ष आश्रयासम्भवादनुपपत्तिः ॥

नन्वहमित्यालयप्रत्यय एवाश्रय इत्यत आह ।

क्षणिकत्वाच्च ॥ २ । २ । ३१ ॥

Digitized by Google

आलयविज्ञानस्य क्षणिकत्वान्नीकाराद्याश्रयत्वम्, संस्काराश्रयत्वे वा न क्षणिकत्वम्, संस्कारसमानकालीनस्य वा संस्कारकालेऽसतो वाऽऽश्रयत्वायोगादिति भावः ॥

सर्वथाऽनुपपत्तेश्च ॥ २ । २ । ३२ ॥

पश्यनातिष्ठनेत्याद्यपशब्दप्रयोगाद्ग्रन्थतोऽनुपपन्नमिदं वेदबाह्यानां मतम् । उक्तप्रकारेणार्थतोऽप्यनुपपन्नम् । इति सर्वथाऽनुपपत्तेर्नादरणीयं श्रेयोऽर्थिभिः सौगतमतमित्यर्थः । दर्शनमिति वक्तव्ये पश्यनेत्यपशब्दः । स्थानमिति वक्तव्ये तिष्ठनेत्यपशब्दः । दृशेस्तिष्ठतेश्च धातोः शिति प्रत्यये पश्यतिष्ठावादेशौ भवतः, न युट्प्रत्यये तस्याशित्त्वादिति बोध्यम् । ननु बाह्यार्थवादस्य केवलविज्ञानमात्रवादस्य चोक्तरीत्याऽसम्भवाच्छून्यं निस्स्वरूपमेव प्रपञ्चतत्त्वं किं न स्यादिति शङ्कायां पुनः "नाभाव उपलब्धे"रित्यादीनि सूत्राणि शून्यमतनिरासपरत्वेन योज्यन्ते, प्रपञ्चशून्यत्वस्य सर्वप्रमाणबाधितत्वेन तन्निरासाय पृथक्प्रयत्नानपेक्षणात् । तथा हि ज्ञानार्थयोरभावः प्रमाणैरुपलब्धेरित्यर्थः । "वैधर्म्याच्चे"ति सूत्रं पूर्ववद्व्याख्येयम् । प्रपञ्चस्य बाध्यत्वे बाधाधिष्ठानं सत्यं किञ्चिद्वक्तव्यं, निरधिष्ठानबाधायोगात् । तस्य बाधाधिष्ठानस्य स्वमते न भावो न सत्त्वं प्रमाणतस्तदनुपलब्धेरिति "न भावोऽनुपलब्धे"रिति सूत्रार्थः । "क्षणिकत्वाच्चे"ति सूत्रे विभक्तेः पूर्व"मुपदेशे"त्यध्याहारः । तथा च कतिपयपदार्थानङ्गीकृत्य तेषां क्षणिकत्वोपदेशाच्छून्योपदेशाच्च व्याहतार्थबोधकः सुगत इत्यर्थः । अन्यत्पूर्वं कृतव्याख्यानम् । तस्माद्भ्रान्त्यैकशरणसौगतमतेन न समन्वयस्य विरोध इति सिद्धम् ॥

नैकस्मिन्नसम्भवात् ॥ २ । २ । ३३ ॥

एवं मुक्तकच्छानां बौद्धानां मते निरस्ते विवसनानां जैनानां मतं बुद्धिस्थं बुद्धिसन्निधिलक्षणसङ्गत्या निराक्रियते । तत्र संशयः, किं दिगम्बरमतं मानमूलं भ्रान्तिमूलं वेति । मानमूलमिति प्राप्तम् । तथा हि, स्यादस्ति, स्यान्नास्ति, स्यादस्ति नास्ति च, स्यादवक्तव्यः, स्यादस्ति चावक्तव्यः, स्यान्नास्ति चावक्तव्यः, स्यादस्ति नास्तिचावक्तव्यश्चेत्येवं रूपं सप्तभङ्गनयमस्तित्वनास्तित्वादिविरुद्धधर्मद्वयमादाय सर्वेषु पदार्थेषु योजयन्तो विवसनाः पदार्थमात्रस्यानेकरूपत्वमाचक्षते, उपादानादिव्यवहारसिद्धये । अन्यथा वस्तुन एकरूपत्वे सर्वात्मनाऽस्तित्वं नास्तित्वं वा वक्तव्यमिति प्राप्यात्मनाऽपि सत्त्वाद्वस्तुप्राप्त्यर्थमुपादानादिव्यवहारो न स्यात् । अतः केनचिद्धटादिरूपेणास्ति, केनचित्प्राप्यादिरूपेण नास्तीत्यनेकरूपत्वमेव वस्तुनः । सप्तभङ्गनयो नाम सप्तस्वस्तित्वादिषु वस्तुन्येकत्र विरोधो भङ्गस्तत्र यो नयोयुक्तिः स इत्यर्थः । स्यादस्तीत्यादेरयमर्थः । स्यात्पदं "कथं चि"दर्थकं वस्तुनोऽस्तित्वविवक्षायामाद्यो भङ्गः । असत्त्वविवक्षायां द्वितीयो भङ्गः । क्रमेणोभयवाञ्छायां तृतीयो भङ्गः । युगपदुभयवाञ्छायामस्तित्वनास्तित्वयोर्युगपद्वाचा वक्तुमशक्यत्वादवक्तव्यं वस्तुन इति चतुर्थो भङ्गः । आद्यचतुर्थयोर्भङ्गयोः क्रमेण वाञ्छायां पञ्चमो भङ्गः । द्वितीयचतुर्थयोर्विवक्षायां षष्ठो भङ्गः । आद्यद्वितीयचतुर्थानां वाञ्छायां सप्तमो भङ्गः । एवमेकत्वानेकत्वनित्यत्वानित्यत्वादिविरुद्धधर्मद्वयमादायोक्तनयो योजनीयः । तस्माद्वस्तुमात्रस्य सत्त्वमसत्त्वं चेत्येवमादिविरुद्धानेकधर्मवत्त्वमे-

वेत्येकरूपब्रह्मसमन्वयो न सिध्यतीति प्राप्ते ब्रूमः "नैकस्मिन्नसम्भवा"दिति । एकस्मिन्परमार्थरूपे वस्तुनि विरुद्धधर्माणामसम्भवात्, वस्तुनोऽनेकरूपत्वं नास्तीत्यर्थः । यदस्ति तदस्त्येव, न नास्ति । यन्नित्यं तन्नित्यमेव नानित्यम् । यथा प्रत्यगात्मा वस्तुभूत एवं प्रपञ्चस्यापि तन्मते वस्तुभूतत्वान्नानेकरूपत्वसम्भवः । अस्मन्मते तु प्रपञ्चो न सन्, नाप्यसन्, किं त्वनिर्वचनीय एव । तेन सर्वव्यवहारसम्भव इति भावः ॥

एतेषामार्हतानां देहपरिमाण एवात्मेति मतं दूषयति ।

एवं चात्माकात्स्न्र्यम् ॥ २ । २ । ३४ ॥

यथैकत्र विरुद्धधर्मासम्भवो दोषस्तेषामार्हतानां मते, एवमात्मनोऽकात्स्न्र्यं परिच्छिन्नत्वं दोषान्तरं स्याज्जीवस्य देहपरिणामत्वाङ्गीकारादित्यर्थः । तथा च परिच्छिन्नत्वादात्मनो घटादिवदनित्यत्वं स्यादिति भावः । किं चात्मनो देहपरिमाणत्वे मनुष्यात्मनः कर्मवशाद्गजशरीरे कृत्स्ने प्रवेशो न स्यात्, पुत्तिकाशरीरे वा कृत्स्नस्यात्मनः प्रवेशो न स्यात् ॥

ननु जीवस्य सावयवत्वाङ्गीकारात्पर्यायेण गजादिशरीरप्राप्तौ केचिदवयवा आगच्छन्ति, सूक्ष्मपुत्तिकाशरीरप्राप्तौ च केचिदपगच्छन्तीति न मनुष्यात्मनः स्थूलसूक्ष्मशरीरप्राप्तौ विरोध इत्याशङ्क्य निराकरोति ।

न च पर्यायादप्यविरोधो विकारादिभ्यः ॥ २ । २ । ३५ ॥

पर्यायादप्यवयवगमनागमनाभ्यामपि तत्तत्स्थूलसूक्ष्मशरीरपरिमाणत्वस्यात्मन्यविरोध इति न चेत्यर्थः ।

ब्दार्थत्वात् । कालसंपत्तावप्यन्याङ्गसंपत्तिमपेक्ष्य कुर्व-स्तथा स्यात् । अथाङ्गभूतकालावच्छिन्नमेव जीवनमधि-कारहेतुः, अन्याङ्गेष्वपि तुल्यम् । अपि च परिपूर्णाङ्गो ऽधिकृतः किमङ्गविकलं प्रयुङ्क्ते? असंभवादिति चेन्न । कल्पनात्रयोपप्लुतेः[1] । तथा हि । कर्म्मपर्य्यन्तापेक्षित्वाद्वा

निमित्ते जीवने दर्शपूर्णमासकालमुपसंहृत्य कुर्वन्नाऽधिकारमतिक्रा-मति, निमित्तानन्तर्यस्याऽशब्दार्थत्वात् । अत्रोत्तरम्—कालसंपत्ताव-न्याङ्गसंपत्तिमपेक्ष्य कुर्वंस्तथा स्यात् । नाऽधिकारमतिक्रामेदित्यर्थः ।

अथाङ्गमपि कालो निमित्तमवच्छिन्दन्नङ्गतामुपयाति, नाऽन-वच्छिन्दन्निति निमित्ते कालोपसंहारो नाङ्गोपसंहार इत्याह—अथा-ऽङ्गभूतकालावच्छिन्नमेव जीवनमधिकारहेतुः । अत्रोत्तरम्—अन्याङ्गे-ष्वपि तुल्यम् । मा नाम भूवन्नङ्गानि साक्षान्निमित्तावच्छेदकानि, अङ्गोपदेशबलसमासादितनिर्णयं तु सर्वाङ्गोपसंहारसामर्थ्यमुद्भूतं नि-मित्तमवच्छेत्तुं पारयतीति तुल्यता ऽङ्गान्तराणां कालेनेत्यभिप्रायः ।

एवं तावदितराङ्गविरहवच्चोदितकालविरहे ऽप्यनुष्ठानप्रसङ्ग-मापाद्य सम्प्रति किञ्चिदङ्गवैगुण्येपि प्रयोगप्रत्यभिज्ञानं यदुक्तं तदपि दूषयन्नाह—अपि च परिपूर्णाङ्गोऽधिकृतः किमङ्गविकलं प्रयुङ्क्ते? विधि-गम्यो ऽयमर्थो नाच प्रमाणान्तरं क्रमते । विधिना च यावदङ्गग्राम-सहितः प्रयोगो ऽवबोधितस्तत्राऽङ्गतुषत्यागे ऽपि तत्प्रयोगत्वमनव-बोधितं विधिना । पुरुषस्य प्रतिभामात्रं न प्रामाणिकमिति भावः ।

अत्र शङ्कते—असम्भवादिति चेत् । शङ्कां निराकर्तुमसम्भ-वशब्दार्थं विकल्पयति—न । कल्पनात्रयपरिप्लुतेः । तिस्रः खल्विह कल्पनाः परिप्लवन्ते । परिप्लुतिरुपपत्तिः । सह चैकयान्येन स्वाऽनु-गुणां तावत्कल्पनामादितो दर्शयति—तथा हि । कर्मपर्यन्तापेक्षित्वाद्वा

[1] कल्पनात्रयोपपत्तेः· मू· पु· पा· ।

नियोगस्याऽधिकारानिर्वृत्तेरप्रयोगो, ऽधिकारवशाद्वा यथासंभव,मधिकाङ्गोपदेशाऽनुरोधाद्वा । यदा तादृशस्य संभवः तत्रोभयाऽनुग्रहादानन्तर्य्यस्याऽशब्दार्थत्वाज्जातपुत्रेष्टिव-

नियोगस्याऽधिकाराऽनिर्वृत्तेरप्रयोगः । विनियोगोपादानाऽवगतशेषभावं पदार्थोऽवगमे शब्दाभिहितं च तत्क्रममनङ्गमप्यपेक्षमाणः स्वोत्पत्तौ नियोगो यावज्जीविको नाऽङ्गहानावुत्पत्तुमर्हतीति । सर्वथैव प्रयोगाऽभावो ऽसंभवशब्दार्थ इति चोदकाऽनुगुणां कल्पनामाह—अधिकारवशाद्वा यथासम्भवम् । अयमर्थः । यद्यप्ययं परिपूर्णाङ्गो ऽप्यधिकृतस्तथापि तदधिकारप्रतीतिसामर्थ्यात्तत्प्रवृत्तौ हीनाङ्गमपि समापयति । क्व चिदङ्गकरणे सामर्थ्याऽभावे संपूर्णाङ्गप्रयोगकरणादिति । सो ऽयमसम्भवः । कल्पनां तृतीयामाह—अधिकाङ्गोपदेशाऽनुरोधाद्वा यदा तादृशस्य सम्भवः अधिकं तत्कालशक्याङ्गापेक्षया यदशक्यमङ्गं तदुच्यते । यदा साङ्गमुपसंहर्तुं शक्यते तदा तस्य सम्भवः ।

तत्राऽनन्तराऽभिहितां तावत्कल्पनामुपपादयति—तत्रोभयाऽनुग्रहादानन्तर्यस्याऽशब्दार्थत्वाज्जातेष्टिवद्यदेति युक्तम् । अस्यार्थः । अधिकारप्रतीतेरधिकाङ्गोपदेशस्य चाऽनुग्रहाद्यदेति युक्तम् । नन्वेवं निमित्ताऽनन्तरमकरणान्निमित्तत्वव्याहतिरित्याशङ्क्याह——आनन्तर्यस्याऽशब्दार्थत्वाज्जातपुत्रेष्टिवदिति । व्याकृतमेतद्युक्तम् । ननु यथासम्भवमङ्गानुष्ठानं तथा काम्यनैमित्तिकयोरविशेष इति दूषणम् । यदि पुनरङ्गोपसंहारसामर्थ्यस्याऽनुपादेयतया कालवदधिकाराविच्छेदकत्वान्नाङ्गवैगुण्ये कालाऽभाव इव क्रिया, न चाऽवैगुण्यं यावज्जीवं कस्य चिदपि सम्भवति । ततश्च यावज्जीवसर्वाङ्गसमवेतं प्रयोक्तव्यमित्ययमर्थो विरुद्धत्वान्न सम्भवति । ततो ऽशक्यार्थविधानात् ज्वरहरतक्षकचूडारत्नालङ्कारोपदेशवदप्रामाणिकत्वं शास्त्रस्येति सर्व-

Digitized by Google

यदेति युक्तम् । अङ्ग¹शक्तया वा कालवदधिकारावच्छे-
दादप्रयोगः । न चैक एव विधिस्तेषामेव प्रयोजकश्चाऽप्र-
योजकश्च । अपि च किमर्थं विकलाङ्गे प्रवर्त्तते? अधि-
कारनिर्वृत्तयइति ब्रूमः । किमधिकारनिर्वृत्तिर्नाङ्गापेक्षा
फलनिर्वृत्तिरिव? यद्येवमनङ्गत्वमेव । सापेक्षा चेद्यथाश-
क्तेवाऽप्रयोग इत्याह—अङ्गशक्तया च कालवदधिकारावच्छेदादप्र-
योगः । ननु यावज्जीवमुपदेशसामर्थ्यात्किमिति विगुणः प्रयोगो ऽपि
न कल्पते? इत्याशङ्क्याह—न चैक एव विधिस्तेषामेव प्रयोजक-
श्चाऽप्रयोजकश्च । एवं हि स एवैकोऽपि विधिरन्यान्येनाऽङ्गान्याक्षि-
पति प्रतिक्षिपति चेति व्याहतमापद्यते । तस्मादात्यन्तिक एव प्रयो
गाऽसम्भवो ऽसम्भववादिना ऽभिहितः । सो ऽयमात्मीय एव बाणो
भवन्तं प्रहरतीत्यागतमित्यर्थः ।

एवं तावद्यावदधिकारप्रधानं निखिलाङ्गग्रामसहितं प्रयोज्य-
तया ऽवगतं तावदेव प्रयोक्तव्यम् । न चाऽन्यूनप्रयोगस्तु प्राप्तिम
इत्युक्तम् । सम्प्रति न्यूनप्रयोगस्य निष्प्रयोजनवत्तामपि प्रतिपाद-
यति—अपि च किमर्थं विकलाङ्गे प्रवर्त्तते । प्रेक्षावतां हि प्रवृत्तिः
प्रयोजनवत्ताव्याप्ता प्रयोजनवत्ताभावे न भवति, शिंशपात्वमिव
तरुत्वाऽभावइत्यर्थः ।

अत्रैकदेशी प्रयोजनमाह—अधिकाराऽनिर्वृत्तये इति ब्रूमः ।
एतदुक्तं भवति । यमर्थमधिकृत्य प्रवर्त्तते तत्प्रयोजनं प्रयुज्यते ऽने-
नेति व्युत्पत्त्या, कार्यं चाऽधिकृत्य लोकः प्रवर्त्तते, कार्यं चाऽधि-
कार,स्तदयं विकलाङ्गे ऽपि कर्मणि कार्यनिर्वृत्तये प्रवर्त्तते इति ।
तदेतद् दूषयति—किमधिकारनिर्वृत्तिर्नाङ्गापेक्षा, फलनिर्वृत्तिरिव । ननु
मा भूदधिकारनिर्वृत्तिरङ्गापेक्षा, को दोष? इत्याशङ्क्याह—यद्येवमन-
ङ्गत्वमेवाङ्गैर्विनापि करणोपकारस्य कार्यसिद्धेरिति भावः । सापेक्षा

१ अङ्ग० मू० पु० ।

क्त्यङ्गसाध्यैवेति वैकल्ये वृथा चेष्टा स्यात्। अथ यथाशक्त्यङ्गसाध्येति। न कार्यनिष्ठता विशेषायालम्। अपि चाऽधिकारात्फलनिर्वृत्तिः, तत्र यथाशक्त्यङ्गोपेते ऽधिकृतस्य तादृशादेवाऽधिकारनिर्वृत्तिमुखेन तन्निमित्तमिव।

चेद्यथाम्नाताङ्गसाध्यैवेति वैकल्ये वृथा चेष्टा स्यात्। शङ्कते—अथ यथाशक्त्यङ्गसाध्येति। निराकरोति—न कार्यनिष्ठता विशेषायाऽलम्। एतदुक्तं भवति। कार्यनिष्ठतायां सत्यां काम्ये ऽप्युकरणीभूतभावार्थस्य विषयत्वात्सकलाङ्गग्रामजनितोपकारस्य च भावार्थस्य करणभावादेकाङ्गवैकल्ये च तदनुपपत्तेर्विषयाऽभावादधिकारप्रविलयः। नैमित्तिकेषु तु भावार्थमात्रस्य विषयभावाद्वैकल्ये ऽपि च विषयभावोपपत्तेरप्रलीनो ऽधिकार इति काम्यनैमित्तिकयोर्यो विशेषः स नोपपद्यते। यथाशक्त्यङ्गसाध्ये ऽधिकारे ऽधिकारश्चेदङ्गविकलादपि प्रधानाद्भवति नूनमङ्गहीनमपि करणमकरणादनुपपत्तेः। करणं चेत्कथमविषयो, विषयश्चेत्कथमनधिकारः, अनधिकारश्चेत्कथं काम्यनित्ययोर्विशेष? इति। यद्युच्येत नैमित्तिके भावार्थमात्रस्य विषयभावादङ्गवैकल्ये ऽपि तदस्तीत्यनपेतो ऽधिकारः स्वसिद्ध्यर्थं यथाशक्त्यङ्गजनितोपकारमेव स्वकारणमाक्षिपति अङ्गबाधायामिवाऽबाधिताङ्गमात्राहितोपकारमिति। तदसत्। अधिकारप्रविलयात्। न हि विषयमात्रमयमधिकारस्य व्यवस्थापनायाऽपेक्षते, अपि त्वधिकारिविशेषणमपि। आविर्भूतसर्वाङ्गकरणसामर्थ्यश्चाधिकारी नाङ्गसामर्थ्याऽभिभवे ऽधिकारवानित्युक्तमित्युपरम्यते।

एवं पुरुषप्रवृत्तिं पर्यनुयुज्याऽधिकारोत्पत्तिं प्रति पर्यनुयोगमाह—अपि चाऽधिकारात् फलनिर्वृत्तिः काम्ये ऽपि कर्मणीति भवन्मते सिद्धम्। अस्तु वा को दोष? इत्याशङ्क्याह—तत्र यथाशक्त्यङ्गोपेते ऽधिकृतस्य तादृशादेव यथाशक्त्यङ्गोपेतादेवाधिकारनिर्वृत्तिमुखेन तत्फलं संपद्यते। अत्रैव दृष्टान्तमाह—निमित्तमिव। यथा निमित्तं

अथ न तादृशे ? अधिकारनिर्वृत्तिरपि न स्यात् । परिपूर्णाङ्गे ऽधिकृतस्य विकलाङ्गप्रयोगे कर्म्मान्तरप्रयोगइव अङ्गप्रधानभेदो ऽप्यत्राऽनुपकारको ऽधिकारविधिविषय-

विकलाङ्गमपि नैमित्तिकं प्रयोजयेदधिकारनिर्वृत्तिमुखेन निमित्तभावेन संपाद्यते तथा फलमपीत्यर्थः । अथ न तादृशे ऽङ्गहीने काम्ये ऽधिकारः । एवं तर्हि काम्यवन्नैमित्तिके विकलाङ्गे ऽनधिकारनिर्वृत्तिरपि न स्यात् । यतः परिपूर्णाङ्गाऽधिकृतस्य विकलाङ्गप्रयोगे कर्मान्तरप्रयोगइव । यथैव खल्वग्निहोत्रे ऽधिकृतश्चैत्यवन्दनां कुर्वन्नाऽधिकारं संपादयति एवं साङ्गे तस्मिन्नधिकृतो ऽङ्गहीनं निर्वर्तयन्न कृताधिकार इत्यर्थः ।

स्यादेतत् । अग्निहोत्रे ऽधिकृतस्चैत्यं वन्दमानो नाऽधिकारं संपादयति । अधिकारविषयकरणस्य होमस्याऽननुष्ठानात् । अङ्गत्युत्तराङ्गहीनमप्यधिकारविषयसंपत्तेस्तथाभूतस्यैव होमस्याऽधिकारोपकरणभावाऽऽसंपादधिकारं संपादयतीत्ययमङ्गप्रधानयोर्विशेषो यत्प्रधानाऽभावे नाऽधिकारो भवति अङ्गाभावे च सति प्रधानं भवतीत्याशङ्क्याह—अङ्गप्रधानभेदो ऽप्यत्राऽनुपकारकः । कुत ? इत्याह—अधिकारविधिविषयत्वेनाऽभेदात् । यद्यपि नियोगस्य भावार्थ एव प्रतिपत्त्यनुबन्धित्वाद्विषयस्तथापि साङ्गप्रधाने प्रयोजकत्वादङ्गानां प्रधानस्य च नियोगस्य विषयत्वेनाऽभेद उक्तः । यदि पुनरेतद्वयादधिकारनियोगस्याऽङ्गेषु प्रयोजकत्वं नाऽऽस्थीयेत ततो भेदे चाऽप्रधानस्य प्रयोज्यत्वेनाऽङ्गानां चाऽप्रयोज्यत्वेन विषयत्वाऽविषयत्वलक्षणे ऽङ्गीक्रियमाणे ऽनङ्गत्वप्रसङ्गः । येन येन विना ऽयं कार्यस्वभावो ऽधिकारो नोत्पद्यते ततदात्मोपपत्तिनान्तरीयकत्वादाक्षिपति, नाक्षिपति चेदङ्गानि तर्हि तैरपि नोत्पद्येत, ततश्चाऽनङ्गत्वप्रसङ्ग इति भावः ।

रूपेणाऽभेदात् । भेदे चाऽनङ्गत्वप्रसङ्गः । अङ्गप्रधानभावस्य चासंप्रधार्यत्वात् ।

किं चाऽस्यैकदेशिनो मते ऽङ्गप्रधानभावस्य चासंप्रधार्यत्वाद-नुपकारक इति सम्बन्धः । इदमत्राऽऽकूतम् । कार्यरूपमपूर्वं प्रत्ययार्थः । कार्यं च कृतिं पुरुषप्रयत्नं प्रति यदुद्देश्यं प्रधानं, तच्च यथा 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते'त्येतस्मिन्प्रतीयते तथा समिदादिवाक्येष्वपीति कार्यान्तरविषयकारणानां समिदादीनामधिकारं प्रत्य[1]दर्थ्याऽनुपपत्तेः कार्यस्य च समिदादिविषयस्य "कार्यमेव हि तत्र स्याद्यदन्यार्थ"मिति न्यायादधिकारकार्यं प्रति तादर्थ्याऽभावादङ्गप्रधानभावाऽनुपपत्तिः ।

स्यान्मतं, न हि कार्यमित्येव नाऽन्यार्थमपि तु यदनुष्ठेयम् । अनुष्ठेयं तदुच्यते यत्पुरुषेण ममेदं कार्यमिति निरपेक्षं कार्यमवगम्यते । परमाऽपूर्वं च तत्र जातु तस्याऽन्यार्थप्रवृत्तेः कृतिव्याप्यताप्रतीतिः । अन्यस्य[2] प्रधानस्याऽनवगमात् । ननु फलमीप्सितमवगम्यते न प्रथमतः प्रतीतेन कार्येण नियोज्यं विना पर्यवस्यता विशिष्टनियोज्याऽपेक्षिणा स्वर्गकाम इति नियोज्यविशेषणतया गृहीतात्र फलप्रतिपादनपरं तत्पदं तदेव तु निरपेक्षं कार्यमवगतं साध्यस्वर्गविशिष्टेन नाऽनुत्पादयत्स्वर्गमुत्पद्यत इति स्वर्गोपायतामनुत इति निरपेक्षमपरकार्याऽपगमे सति फलाऽवगतिर्न पुनः फलाऽवगतौ सत्यां कार्याऽवगतिः । यतः साऽपेक्षत्वेन परमाऽपूर्वमनुष्ठेयं स्यात् । तदेव तु निरपेक्षं प्रयोजनं सत्परमाऽपूर्वमभिदधाति लिङ् स्वसन्निधिसमाम्नानैः स्वयं प्रयोजनीभूतैरवघातादिभिः समिदादिभिश्च प्रयोजनिभिरन्वितमभिधत्ते इति । तदिदं ग्राहकग्रहणमभिधीयते । तदेवं साऽधिकारविधिसन्निधिसमाम्नातेषु समिदादिविधिषु तदुपगृहीतविषये[3]षु ततः परमाऽपूर्वलक्षणकार्यप्रत्यभिज्ञा-

१ अधिकारनियोगं प्रति० २ पु० पा० । २ अन्यथा० २ पु० पा० ।
३ उपगृहीतविधिविषयेषु० २ पु० पा० ।

620

नात्र द्रागित्येव कार्यान्तरबुद्धिरुदयमासादयति । पश्चात्तु कथमपि समिदादयः क्रियारूपतया विशरारवः परस्परमसंभवन्तः प्रोक्षणादिवदपूर्वसाधनीभूतद्रव्यसंस्कारादिद्वारेणाऽपूर्वविषयाऽननुप्रवेशिनः परमाऽपूर्वेण ग्रहीष्यन्ते इति प्रसिद्धतरैदमर्थ्यानामवान्तराऽपूर्वं कार्यं समिदादीनामवकल्प्यमानं समिदादिगताऽऽख्याताऽभिधेयमपि परमाऽपूर्वपारतन्त्र्येणाऽभिधीयमानत्वात्कार्यमप्यननुष्ठेयमित्युपपन्नोऽङ्गभावः कार्यविषयाणामपि समिदादीनाम् ।

अत्रोच्यते । अधिकारवाक्येषु तावदमी लिङादयो निरपेक्षकार्याऽभिधानविदितशक्तयो न समिदादिवाक्येष्वन्यनिष्ठं कार्यमभिधातुमीशते । यदि परमवहन्त्यादिवत्क्रमाधिकाराऽपूर्वस्यैते ऽनुवादा, उताऽपूर्वान्तराऽभिध्यायिन ? इति पदान्तरमवशिष्यते न पुनर्लिङाद्यभिधेयस्य स्वप्रधानस्य कार्यस्य प्राधान्यपरित्यागो युक्तः । ननूक्तमधिकारसमाम्नाताः खल्वमी समिदादयस्तेनैवाऽधिकारविधिनाऽभिधानतं एवाऽऽपादितैदमर्थ्या न स्वनिष्ठकार्यविषयतां प्रतिपत्तुमर्हन्ति, प्रकृताऽपूर्वैदमर्थ्यविरोधात् । न चाऽवहन्त्यादिवत्प्रकृताऽपूर्वविषयाऽनुप्रवेशिनः, ततश्च नाऽनुवादाः । न च स्वनिष्ठकार्याऽभिधायीनि तत्पदानीत्यभिधेयशून्यतया प्रमत्तगीतानि प्रसज्येरन्निति वरं प्राधान्यमात्रत्यागेन कार्याऽभिधायित्वमस्तीति ।

सत्यमुक्तम् । अयुक्तं तु तत् । न हि साऽधिकारो विधिः संनिधिसमाम्नातमात्रमेव गृह्णातिमात्रं ही(?) ज्योतिष्टोमविधिर्द्वादशोपसत्ताम्, अपि तु यद्ग्रहणार्हम् । न च स्वनिष्ठकार्यविषयाः समिदादयो ग्रहणमर्हन्ति । ननु ग्राहकविरोधात्प्राधान्यं समिदादिविषयस्य नियोगस्य नास्ति । अथ प्राधान्यप्रतीतिविरोधाद्ग्राहक एव किमिति न परिह्रियते? तत्र श्रुतिमात्रादेव नियोगप्राधान्यप्रतीतेर्निरपेक्षत्वाद्वाक्यान्तराऽऽलोचनया ग्राहकगृहीतेः साऽपेक्षतया प्राधा-

सत्यपि चोदनार्थाऽनिर्वृत्तेर्वृथा चेष्टाप्रसङ्ग इत्युक्तम् ।

कश्चायमधिकारो यस्य निर्वृत्तिः? नियोगश्चेत् न निर्वृत्तिर्विचारिता । नियोज्यता चेत् सापि नियोगादेव निर्वृत्ता । स्वामिता चेत् न तत्कृतं[1] किं चिदभुञ्जानः स्वामी, इत्युभावप्यधिकारौ कार्य्यनिष्ठौ स्याताम् ।

न्यप्रतीतेर्बलीयस्त्वेन रात्रिसत्रादिवत्स्वतन्त्राऽधिकारकल्पनायां सत्यां नाऽङ्गभावः प्रयाजादीनां प्रधानप्रभावश्च दर्शपूर्णमासादीनामुपपद्येत इति सुष्ठूक्तमङ्गप्रधानभावस्य चार्थप्राप्यत्वादिति ।

अभ्युपेत्याङ्गप्रधानभावं दूषणान्तरमाह—सत्यङ्गप्रधानभावे नैमित्तिकस्याऽनङ्गत्वे ऽस्य प्रयोगे चोदनार्थाऽनिर्वृत्तेर्वृथा चेष्टाप्रसङ्ग इत्युक्तम् । किं चाऽयमधिकारो विचारं न सहते यस्य निर्वृत्तिरङ्गविकले ऽपि नैमित्तिकस्य प्रयोगे त्वयोच्यत इत्याह—कश्चाऽयमधिकारो यस्य निर्वृत्तिः? त्वयोच्यत इति शेषः । एकदेशी स्वपरिभाषयाऽऽह—नियोगश्चेत् । दूषयति—तन्निर्वृत्तिर्विचारिता । उक्तं हि "नियोगस्य नकार्यते"त्यत्र 'विषयः कार्यो न नियोगो नियोज्यस्य नियोक्तृत्वप्रसङ्गा'दिति । भाषान्तरेणाऽऽह—नियोज्यता चेत् । परिहरति—सापि नियोगादेव निर्वृत्ता भावार्थविषयं नियोगमवबुद्ध्यमान एवायमधिगतनियोज्यभावो न तदधिगमायाऽनुष्ठानं यावद्गच्छेदिति । व्यर्थीकृतपरिभाषो लौकिकमधिकारपदस्यार्थमाह—स्वामिता चेत् । ईश्वरवचनो ह्ययमधिकृतशब्दो लोके प्रसिद्ध इति भावः । एतद्दूषयति—न तत्कृतं किं चिदभुञ्जानः स्वामी, एवं हि नैमित्तिकं कर्म संभवति पुरुषस्य स्वामिनः, यदि तत्कर्म तस्योपकारे वर्तेत । द्वयी चेयमुपकारजातिर्हितप्राप्तिरहितनिवृत्तिश्च । न च हिताऽहितप्राप्तिपरिहाराऽनुयायि त्वन्मते नैमित्तिकं कर्म कल्पते । यदुच्यते नैमित्तिकादन्यपूर्वपुरुषगुणो जायते, जायतां नाम न पुनरयमधि-

[1] तत्र कृतम्· मू· पु· ।

622

Digitized by Google

तस्मान्न कार्य्यनिष्ठत्वप्रयोगनिष्ठत्वाभ्यां काम्यनैमित्तिकाऽधिकारयोर्भेदः शक्यः समाधातुमित्यन्यथा समाधेयः ।

तदुच्यते-

जीवनादेर्न्निमित्तस्य साम्यात्कालो विशेषकः ।
निमित्तार्थस्तत्र जाते कर्म्मणोऽवश्यकार्य्यता ॥

कार:[1] स्वयमसुखरूपत्वादतद्धेतुत्वाच्च । यदि त्वेतद्भयान्नैमित्तिकस्यापि पुरुषोपकारकत्वमङ्गीक्रियेत तत उभावप्यधिकारौ[2] कार्यनिष्ठौ स्याताम् । इतिशब्दस्तस्मादर्थे । प्रकृतमुपसंहरति—तस्मान्न कार्यनिष्ठत्वप्रयोगनिष्ठत्वाभ्यां काम्यनैमित्तिकाधिकारयोर्भेद: शक्याऽध्यवसान:[3] ।

स्वमतपातनिकां करोति—तस्मादन्यथा समाधेय: । तदुच्यते ।
जीवनादेर्नैमित्तस्य साम्यात्कालो विशेषक: ॥
निमित्तार्थस्तत्र जाते कर्मणोऽवश्यकार्यता ।

यदि श्रुतिमात्राऽपेक्षोऽधिकारो भवेत् ततोऽन्धशूद्रादीनां काम्ये नैमित्तिके चाऽविशेषेण प्रसज्येत, चैवर्णिकानां चाऽग्निहोत्रं सततमकुर्वतामधिकाराऽतिक्रान्ति: स्यात् । न त्वस्माकं श्रुत्यपेक्षोऽधिकार: किं त्वङ्गोपदेशाऽनुरोधेन शक्त्यपेक्ष: । तथा चाऽशक्तानामन्धशूद्रादीनां चैवर्णिकानां च मध्यन्दिने सायमादिसमयमुपसंहर्तुमसमर्थानां नाऽधिकार: । नन्वेवं काम्यनैमित्तिकेष्वप्यङ्गोपदेशाऽनुरोधेन यदेत्युपपद्येत ।

तत्रोच्यते । इदं तावदत्र भवान् पृष्टो व्याचष्टां, यदेतत्काम्ये सर्वाङ्गोपसंहारसमर्थोऽधिकारीति, तत्किं स्वर्गकामवत्साक्षाच्छब्दाऽवगत,मुताङ्गोपदेशाऽनुरोधात्? तत्र न तावत्स्वर्गकामपदमिव सर्वाङ्गोपसंहारसमर्थपदमधीयते[4] समाम्नातार: । अथाङ्गोपदेशाऽनुरोधादसमर्थं प्रति तदुपदेशाऽनुपपत्ते: । आख्यातानामर्थं ब्रुवतां

[1] उपकार:-२ पु॰ पा॰ । [2] उपकारौ-२ पु॰ पा॰ ।
[3] अध्यवसाय: २ पु॰ पा॰ । [4] सामर्थ्यमधीयते २ पु॰ पा॰ ।

६२३
623

Digitized by Google

शक्तिः सहकारिणीति । यथा 'स्रुवेणाऽवद्यती'त्यश्रुतमपि द्रव्यादि यच्छब्दस्यतदत्युपबन्धात्सम्बध्यते एवमश्रुतमपि सर्वाङ्गोपसंहारसामर्थ्यमनुपादेयं सदधिकृतविशेषणतया सम्भन्त्स्यते । युक्तं चाम्ये तच सर्वाङ्गोपसंहारसामर्थ्यविषयाया अर्थापत्तेः परिपन्थ्यभावे नाऽप्रत्यूहमुपपत्तेः अर्थिपदस्य च समर्थेऽपि सम्भवादविरोधात् । न खलु समर्थः स्वर्गकामो न स्वर्गकाम इत्युक्तम् । इह तु निमित्तश्रुतिविरोधः । तथा हि । 'यावज्जीवं जुहुया'दिति यावदुपसंबद्धं जीवनं कर्तव्यतायां निमित्तम् । तदेव च मुख्यं निमित्तम् । यस्मिन् सति नैमित्तिकं भवत्येव भाक्तमितरदित्युपरिष्टादुपपादयिष्यते । तेन जीवने सति कर्तव्यमेव न न कर्तव्यमिति प्रतीतेर्निमित्ते[1] सम्बन्धाऽवश्यकर्तव्यताऽऽपत्तिः, निमित्तवदङ्गोपदेशाऽनुरोधात् । तदुपसंहारसामर्थ्यविशेष उद्भवसमाधो ध्यातः प्रतीयते । स चाऽनित्य इति तन्नान्तरीयकत्वादवश्यकर्तव्यता ऽऽपतति । न चास्ति कश्चिदपि पुरुषधौरेयस्तथापि[2] विधौ दैवसंपन्नो यो यावज्जीवं सायंप्रातरप्रत्यूहमविकलाङ्गमग्निहोत्रमपि प्रयोक्तुं समर्थः । अन्तरायाणां व्याधितोद्रप्रमादादीनामवश्यम्भावनियमात् । तत्सहभुवां च दुःखदौर्मनस्यादीनाम् । तदनयोर्निमित्तोपदेशसर्वाङ्गोपसंहारसामर्थ्ययोर्विरोधान्निमित्तस्य च श्रौतत्वेन तदनुगुणं सामर्थ्यमुपवर्णनीयम् । नन्वङ्गान्यपि श्रुतान्येव किमतस्तान्यपि नित्यवच्छ्रुतानीति बहूनां श्रुतीनामनुरोधेन वरमेका निमित्तश्रुतिः 'त्यजेदेकं कुलस्याऽर्थे' इतिवत्परित्यज्यताम् । तत्किमियं निमित्तश्रुतिस्तपस्विनी प्रमत्तगीतमेव अपि तु मुख्यं परित्यज्य गौणं निमित्तभावं यस्मिन्सत्येव नाऽसतीत्येवंभूतमवलम्बते ?

अत्रोच्यते । न तावत्साक्षादङ्गश्रुतयो निमित्तश्रुतिविरोधिन्यः । न हि तस्य तस्याङ्गस्य क्रिया निमित्ते सति न सम्भवति । ननु

१ यन्नैमित्तिकं २ पु० पा० । २ सुधापि २ पु० पा० ।

Digitized by Google

नित्यवच्छ्रुतानि न चाङ्गानीति विरोधः । सत्यं नित्यवच्छ्रुतानि न त्वङ्गविधयः प्रधानविधिनिरपेक्षा अङ्गानुष्ठानं प्रयोक्तुमीशते । तथा ह्यङ्गभावनाभाव्याऽऽकाङ्क्षा स्ववाक्ये भाव्यमपश्यन्ती विध्यापादितत्वेन चाऽपुरुषार्थाद्व्याख्यार्थात्प्रच्याविता पुरुषार्थात्मकं भाव्यमपेक्षते, प्रधानभावना च निमित्तवत्यवश्यकर्तव्यतागोचरा लब्धनित्यसमीहितसाध्यतत्साधना स्वसाधनोपकारहेतुमपेक्षते । तदियमङ्गभावना करणोपकारलक्षणं भाव्यमासाद्य प्रधानभावना च करणोपकारं प्राप्य निर्वृणुतः । ततश्च प्रधानविध्याकाङ्क्षितोपकारसाधनेष्वङ्गेषु प्रधानाऽधिकृताऽधिकारप्राप्तिलब्धानुष्ठाने ऽप्यप्रधानानुरोधेन निवृत्तिर्व्यवस्थापनीया । तद्विरोधे तु तदधिकृताऽधिकारभावेनाऽनुष्ठानाऽनुपपत्तेरङ्गविधीनां तत्त्वं हीयेत । न च निमित्तसम्बन्धादवश्यकर्तव्यं प्रधानं कादाचित्केनाङ्गसाकल्येन सम्बन्धार्हं, नित्याऽनित्यसम्बन्धविरोधात् । ननु प्रधानमपि कथं निमित्तेन संभन्त्स्यते ? न ह्यग्निहोत्रमङ्गहीनमपि यावज्जीवं शक्यसंपादम् । अन्तरायाणामपि संभवात् । यद्युच्येत विधिसामर्थ्यादनुष्ठात्रा निपुणेन भवितव्यम् । तदङ्गसाकल्ये ऽपि तुल्यम् । मैवम् । यस्य हि निमित्तसम्बन्धस्तदवश्यकर्तव्यं, स च प्रधानस्येति तदेव तथा । तत्र च स्वरूपेणाऽन्याऽसत्त्वादनुष्ठातुर्नैपुण्यमपि सम्भवति न त्वङ्गेषु निमित्तश्रुतिः । यतस्तेषामप्यवश्यकर्तव्यता स्यात् । प्रधानसम्बन्धात्तेषामप्यवश्यम्भाव इति चेत्, नाऽवश्यकर्तव्यतोपहितमर्यादेन प्रधानविधिना वास्तवमङ्गसाकल्यस्यावश्यम्भावमननुरुध्यमानेन यदा[1] यावन्त्यङ्गानीत्युपबन्धात् । तदेवं निमित्तश्रुतिः प्रधानवाक्यस्था प्रथममेव स्वविषयं प्रधानेन सहैकलोलीभावमुपनयन्ती भूयसीरप्यङ्गश्रुतीः स्वाऽनुगुणतया व्यवस्थापयन्ती नेताभिर्जघन्यवृत्तितामापाद्यते । न चैवमितराङ्गवैकल्यवत्कालापगमे ऽपि प्रधानप्रयोगसम्भवान्न तस्य हि गुणत्वे ऽपि

१ मनुरुध्यमानत्वाच्च न यदा २ पु० पा० ।

Digitized by Google

यस्तावद्यथोक्ताय प्रयोगायैकान्ततो ऽसमर्थः स दूर-पर्य्युदस्त एवाऽधिकारात् । न त्वसौ[1] तादृशे नियोज्यतया प्रत्येतुं पार्य्यते । तेन शक्त्यङ्गोपदेशापेक्ष्य समर्थस्य तावदधिकारप्रतीतिः । सा चेयमधिकारप्रतीतिर्नैति पर्य्यवसिता । अनित्यत्वात्सामर्थ्यस्य । अन्यथा ऽधिकृतस्य सनिमित्ताऽनुप्रवेशो ऽपि वक्ष्यते । न चान्धशूद्रादीनामधिकारः । यतो 'यावज्जीवमग्निहोत्रं जुहुयात्' इति भावनालब्धसाध्यतत्साधना[2] कथमिति स्वकरणोपकारजनकाकाङ्क्षा अङ्गोपदेशैर्निराकाङ्क्षीक्रियते । तच सर्वाङ्गोपदेशानुरोधादसमर्थस्याऽनुष्ठानाऽसम्भवात् समर्थस्यापि चाऽनुभूततद्भावस्य तदनुपपत्तेः सर्वाङ्गोपेतप्रधानाऽनुष्ठानगोचरसामर्थ्याद्भूतिरधिकारी काम्यवदिति सामर्थ्ये तदुद्भूतिश्चाऽधिकृतविशेषणतया ऽवगम्यते । तच निमित्तश्रुतिविरोध इति तद्विरोधायाऽवश्याऽवहेये ऽन्यतरस्याऽनुद्भवमात्रं हीयतां नाङ्गसामर्थ्य,मुभयहानिप्रसङ्गादिति नाऽन्धशूद्रादीनामधिकारो नापि शक्यप्रतिकारव्याधीनामनधिकारो नैमित्तिक इति सिद्धम् ।

तदिदमाह—यस्तावत् यथोक्ताय प्रयोगायैकान्ततो ऽसमर्थः शूद्रपङ्ग्वादिः स दूरपर्युदस्त एवाधिकारात्[3] । कुत? इत्याह—न त्वसौ तादृशो[4] नियोज्यतया प्रत्येतुं पार्यते । तेन शक्त्यङ्गोपदेशापेक्ष्य समर्थस्य तावदधिकारप्रतीतिस्तावदिति । स्फोटयति—सा चेयमधिकारप्रतिपत्तिर्नैमित्तिके नेति पर्यवसिता अनित्यत्वात्सामर्थ्यस्याऽनैमित्तिकस्य चाऽवश्यकार्यत्वात् अवश्यमनवश्यम्भावयोश्च विप्रतिषेधादिति भावः । ननु भवतु सर्वाङ्गोपसंहारसामर्थ्यमनित्यं तथापि तेनैवाऽधिकारप्रतिपत्तिः पर्यवस्यतु, समर्थस्त्वधिकृतः कुतश्चित्प्रतिबन्धात्किञ्चिदङ्गमुपसंहर्तुं तदानीमशक्तो ऽपि यथाकथं चित्प्रयोक्ष्यत इत्येतन्निराकर्तुमाह—अन्यथा ऽधिकृतस्य सर्वाङ्गोपसंहाराभावे सति

१ न त्वसौ· मू पु· । २ साध्यसाधना. २ पु· पा· ।
३ अधिकारो २ पु. पा. । ४ न चासौ तादृशो २ पु· ।

Digitized by Google

वाङ्गोपसंहाराऽभावे नाऽनुष्ठानं यथासंभवम् अन्यथाऽ ऽन्यादृशेऽधिकारात्तादृशप्रयोगस्याऽशास्त्रीयत्वान्नानुष्ठान, मनधिकारात्। अतः पुनरपि शक्त्यपेक्षा ऽधिकारप्रतिपत्ति-पर्य्यवसानाय। शक्तिर्हि प्रमाणैकदेश इत्युक्तम्। न प्रयो-गनिश्चयाय, अनन्यप्रमाणकत्वात्तस्य। सा कालतो ऽङ्गतो

नाऽनुष्ठानं यथासम्भवमन्यथेति। यद्येतावत्यधिकारप्रत्ययः पर्यवस्ये-दित्यर्थः। कस्मादित्याह—अन्यादृशे ऽधिकारात्सर्वाङ्गोपपन्ने तत्स-मर्थस्याऽधिकारात् तादृशप्रयोगस्य न्यूनाङ्गस्य प्रयोगस्याऽशास्त्रीय-त्वान्नानुष्ठानं, न्यूनाङ्गस्याऽनधिकारात्।

एतदुक्तं भवति। अधिकारप्रतीत्या सह प्रवृत्तेः संप्रतिपत्तौ सत्यां शास्त्रीयत्व, मिह त्वङ्गसाकल्यवैकल्यलक्षणे विरुद्धधर्मसंसर्गाद्वि-षयभेदे ऽपि प्रतिपत्तौ सत्यां प्रातिभत्वं प्रयोगस्येत्युपसंहरति—अतः पुनरपि शक्त्यपेक्षा ऽधिकारप्रतीतिपर्यवसानाय। शक्त्यपेक्षेति या ऽसाव-ङ्गोपदेशासामर्थ्यलब्धा ऽशक्तिश्रुतिस्तस्या यदेत्युपबन्धस्य नित्यश्रुति-विरोधादुपबन्धान्तरापेक्षोपबन्धावशक्तिरिति शक्त्यपेक्षेत्युक्तम्। शक्त्या च विषयेण विषयिणीं शक्तिश्रुतिं लक्षयति। यथा धूमादग्निः प्रतीयते इति धूमेन धूमज्ञानलक्षणा। अथ कस्मादधिकारप्रतिपत्तिपर्यवसा-नाय शक्तिश्रुतिरपेक्ष्यते। यावतोपबन्धविशेषशून्यायामधिकारप्रति-पत्तौ पर्यवसितायां पश्चाद्यथाशक्ति प्रयोगं शक्तिरेव निश्चाययिष्यती-त्यत आह—शक्तिः शक्तिश्रुतिः प्रमाणैकदेशश्चोदनैकदेश इत्युक्तमा-चार्यैः। तथा च तदन्तर्भावेनैवाऽधिकारप्रतीतिपर्यवसानमित्यर्थः। यदि तु न चोदनैकदेशः स्यात्प्रमेयमात्रं शक्तिर्न प्रयोगनिश्चयाय कल्पेतेति शेषः। इदमेव कृतम्। तत्त्वनिश्चयो हि प्रमाणस्य, कार्य-प्रमेया च शक्तिरिति कारणविरुद्धोपलब्ध्या प्रयोगनिश्चयो निवर्त्त-तइति। अथ शक्तिज्ञानमेव प्रमाणं सत्प्रयोगं निश्चाययेत्। किं

वाऽऽश्रीयेत। तत्राङ्गतः संश्रये शब्दाऽवगतानामङ्गान्तराणां हानाच्छब्दविरोधः। कालतस्तु कालान्तराणामशब्दार्थत्वान्न कश्चिद्विरोधः। स चाऽयमविरोधो निर्निमित्ते ऽधिकारे इदमनेनेदृशेनेत्येतावन्मात्रस्य शब्दार्थत्वात्। सनिमित्ते तु निमित्तश्रुतिविरोधः। संप्राप्ते च तस्मिन्कार्य्यस्य चोदनैकदेशत्वेन शक्तिश्रुते? रित्याह—अनन्यप्रमाणकत्वात्तस्य प्रयोगस्य न[1] शक्तिज्ञानं प्रमाणमिति।

संप्रति पूर्वपक्षी यस्मिन्सत्येव नाऽसतीति नित्यवदङ्गोपदेशाऽनुरोधान्निमित्तभावं मन्यमानो विमृशति—सा च शक्तिः कालतो वा ऽङ्गतो वा ऽऽश्रीयते कालाद्वेति। सर्वाङ्गोपसंहारसामर्थ्यमपेक्ष्य यदा शक्नुयादिति यावत्। एवं विमृश्याङ्गत इति प्रतिपक्षनिराकरणपूर्वकं कालादिति पक्षमवधारयति—तत्राङ्गतः संश्रये शब्दाऽवगतानामङ्गान्तराणां हानाच्छब्दविरोधः। कालतस्तु कालान्तराणामशब्दार्थत्वान्न विरोधः। नित्यवदङ्गानामुपदेशादन्यतमत्यागे तद्विरोधः। यदेत्युपबन्धे तु कालान्तराणामनुपदिष्टत्वान्नोपदेशविरोध इति काम्ये नैमित्तिके च यदेत्येव युक्तम्।

परिहरति—स चाऽयमविरोधो निर्निमित्ते ऽधिकारे[2]। कुतः? इदं भाव्यमनेन करणेनेदृशेनेतिकर्तव्यताविशेषवतेत्येतावन्मात्रस्य शब्दार्थत्वान्नावश्यकर्तव्यता प्रतीयत इत्यर्थः। सनिमित्ते तु निमित्तश्रुतिविरोधः कस्मात्सम्प्राप्ते च तस्मिन्न कार्यस्य तन्निमित्तत्वव्याघातात्सम्प्राप्त इति प्रकृतिप्रत्ययाभ्यामनुपादेयतां निमित्ततां च कथयति। चशब्दो ऽप्यर्थे विरोधद्योतनः। सति भवत्येव न भवतीति निमित्तार्थो न भवदुक्त इति वक्ष्यते। न चाङ्गविधिविरोध इति प्रपञ्चितम् इति भावः[3]।

---

१ अनन्योपायकत्वात्तस्योपायस्य न० २ पु० पा०।
२ अधिकारः २ पु० पा०।　३ विरोध इति भावः २ पु० पा०।

६२८
623

तन्निमित्तत्वव्याघातात् । इतरत्रापि स्वर्गकामश्रुतिविरोध इति चेत् । उक्तम् । न च पुरुषविशेषनिर्देशोऽत्र विवक्षितः, साध्यत्वात् । न च सातत्येन प्रयोगः[1] । निमित्ते कालविशेषवतः कर्त्तव्यताऽवगमात् । कालविशे-

पार्श्वस्थः सिद्धान्तिनं पर्यनुयुङ्क्ते—इतरत्रापि स्वर्गकामश्रुतिविरोध इति चेत् । समर्थमसमर्थं वाऽर्थिमात्रं प्रत्यसङ्कुचितवृत्तिरर्थिश्रुतिः समर्थं प्रति नियम्यमाना पीड्यत इत्यर्थः । समाधत्ते—उक्तमिति । केवलपदार्थव्यवहाराऽभावादित्यादिना प्राक् । अर्थिपदस्य चाऽधिकारिवचनतामभ्युपेत्येदमुक्तम् । परमार्थतस्तु नेदमधिकारिप्रतिपादनपरमपि तु भावनाकाङ्क्षितभाव्यविशेषपरम् । अर्थात्त्वधिकारिप्रतिपत्तिरित्युपरिष्टादिहैव वक्ष्यते । उक्तं च भावनाविवेके, ततो "ऽधिकारिपदाऽभावात्कुतस्तद्विरोधिते"ति इति दर्शयति—न च पुरुषनिर्देशो ऽत्र विवक्षितः, साध्यपरत्वात् ।

एवमुक्तां कारिकामुक्त्वा कारिकार्थपातनिकां करोति च किंचित्—न च सातत्येन प्रयोगः । अत्रैव शङ्कते—यदि निमित्तश्रुतिवशादङ्गहीनमपि यथाशक्ति प्रयुज्येत ततः कालस्यापि सायमादेरङ्गत्वेन विधानात्तदभावे मध्यन्दिनादौ जीवनस्य निमित्तस्य विद्यमानत्वादग्निहोत्रप्रयोगप्रसङ्गः । सायमाद्यङ्गापगमेन वा[2] तदा तदप्रयोगे[3] ऽङ्गान्तराभावेऽप्यप्रयोग इति काम्यवद्यदेवेत्येवं प्राप्तमिति । तदनेन निराक्रियते—न च सातत्येन प्रयोग इति । निमित्ते कालविशेषवतः कर्त्तव्यतावगमात् । एतदुक्तं भवति । प्रयोगाङ्गमप्ययं कालोऽनुपादेयत्वादङ्गोपसंहारसामर्थ्यमिव नियोज्यं विशिनष्टि । तेन तदभावान्मध्यन्दिनादौ नाऽधिकारे विष्णुक्रमणादिसामर्थ्याऽभावादिव पङ्ग्वादीनामिति । नन्वङ्गतया कालः श्रूयते नाधिकृतवि-

१ प्रसङ्गः—मू· पु· पा· ।
२ सायमाद्यनभ्युपगमेन वा. २ पु· पा· । ३ तदा प्रयोगे १ पु. पा ।

629

षेण तस्याऽर्थाद्विशेषणात्। तस्या निमित्ताऽनुप्रवेशित्वात्। तदुक्तं "न कालो गुणो निमित्तं ह्येत"दिति। न गुण एवेत्यर्थः। न स्वङ्गान्तराण्येवम्, असाम्याद्वचनव्यक्तिभेदात्।

शेषणतया। तथा हि। अप्रवृत्तप्रवर्तनात्मको विधिः प्रवर्त्यपुरुषविशेषमधिगतसाङ्गप्रधानतया, तत्कथं तद्गतो ऽधिकारावगम? इत्यत आह—कालविशेषेण तस्यार्थाद्विशेषणात्। यद्यप्यङ्गत्वेन श्रूयते कालस्तथाप्यधिकृतविशेषणम्। तथा ह्यप्रवर्तप्रवर्तनात्मको विधिः प्रवर्त्यपुरुषमधिगतसाङ्गप्रधानविषयो ऽनुपादेयवस्त्ववच्छिन्नं प्रवर्त्यपुरुषविशेषं कल्पयितुमुद्यतः तस्य विषयं चाऽनुपादेयत्वविधेयत्वलक्षणयोः प्राप्त्यप्राप्तिभ्यां विरोधाद्विशेषणतया स्वीकर्तुमसमर्थो। यथाविनियोगमधिकारावगमाच्च तन्नान्तरीयकसाङ्गप्रधानोपसंहारसामर्थ्यमनुरुध्यमानो ऽनुपादेयाङ्गसामर्थ्ये च निमित्तं चाङ्गमपि प्रवर्त्यपुरुषविशेषणतया गृह्णाति। न च कालस्येतराङ्गवामवत्स्वक्रियोपसंहारसामर्थ्यमपि सम्भवति कार्याङ्गत्वात्सामर्थ्यस्य कार्यस्योपसंहारलक्षणस्य तदनुपादेयाऽनुपपत्तेः। काले हि कर्म क्रियते न कर्मणा कालः। तस्मात्कालविशेषेणाङ्गेनापि सता विधिः प्रवर्त्यपुरुषविशेषाऽपेक्षायामर्थात्तद्विशेषणात्तद्गतः कर्तव्यताऽवगमः। ततश्च न सातत्येन प्रयोग इति। कुत? इत्यत आह—तस्यापि निमित्ताऽनुप्रवेशित्वान्निमित्तसम्बन्धादित्यर्थः। निमित्तसम्बन्धश्चैकं नियोज्याऽवच्छेदलक्षणो यथा सामान्यगुणयोरेकव्यक्तिसमवायः सम्बन्धो गोः शुक्ल इति सामानाधिकरण्यहेतुः। आचार्यस्यापि तत्रभवत एतदभिमतमित्याह—तदुक्तं 'न कालो गुणो निमित्तं ह्येत'दिति। ननु प्रयोगाङ्गं काल इति स्वतन्त्रसिद्धान्तभङ्गः प्रसक्त इत्याशङ्क्याचष्टे—न गुण एवेत्यर्थः। निमित्तत्वं च निमित्तसम्बन्धाद् भाक्तं न पुनस्तत्त्वमेव, तत्कल्पनायां प्रमाणाऽभावात्। ननु यद्यङ्गमपि कालो निमित्ताऽनु-

श्रीगणेशाय नमः ।

पदार्थरत्नमाला ।

उपासनालम्पटमानसाना-
माशानुरूपार्पणलब्धभावः ।
नीलाद्रिमूर्द्ध्नि प्रथितप्रभावः
पायादपायादरविन्दनाभः ॥

षोडशानां पदार्थानां ज्ञानोन्मूलितविभ्रमैः ।
यत्साक्षात्क्रियते चारु तन्मे धाम प्रसीदतु ॥

अथ किं पदार्थत्वम् । यदजन्यज्ञानविषयत्वमिति चेत् किं तद्विषयत्वं ज्ञानस्वरूपमेव तत् । इच्छाप्रयत्नयोः समानाधिकरणं ज्ञानमेव विषयत्वमित्याचार्याः । ज्ञानेच्छाप्रयत्नसंस्काराणां स्वरूपं तत् । न तु विषयस्वरूपमपि अतीतानागतयोरभावात्, गौरवात्, आकाशादेर्वृत्तिमत्त्वापत्तेश्चेति तु नवीनाः । पदार्थान्तरमित्येकदेशिनः ।

तच्च द्विविधम् । तथा च टीका द्विविधो विषयभावः प्रतिपत्त्यनुबन्धितया प्रतिपाद्यमानतया च । तत्राद्यः फलस्य, उत्तरस्तु प्रमाणस्येति विवेक इति । निरुक्तं चैतदुभयस्वरूपमपि तत्रैव । यद्यपि लिङ्गज्ञानं लिङ्गविषयकमेव तदनुबन्धस्य तस्य मानसप्रत्यक्षगोचरत्वात्, लिङ्गरूपमन्तरेण तदनिरूपणात् तथापि लिङ्गिविषयकप्रतिपत्तिजनकत्वाद्भवति लिङ्गिविषयकमपीति ।

द्वितीयस्तु प्रकारो व्यापारानुबन्धितया व्यवहृत आचार्यैः । तत्र च व्यापारपदं ज्ञानात्मकफलपरमेव ततश्च प्रतिपत्तिनिरूपकत्वं प्रतिपत्त्यनुबन्धित्वं स्वजन्यप्रतिपत्तिनिरूपकत्वं व्यापारानुबन्धित्वं प्रमाणविषयत्वमिति निष्कर्षः ।

अथ के तदाश्रयाः ।

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानि ।

Digitized by Google

तत्र प्रमायाः करणं प्रमाणम् । तद्वति तत्प्रकारको भ्रमभिन्नो वानुभवः प्रमा । तदभाववति तत्प्रकारकं ज्ञानं भ्रमः । अनुभवत्वं तु जातिः स्मृत्यन्यज्ञानं वा ।

ननु तद्वतीति सप्तम्यर्थो विशेष्यत्वं किं तत्, किं च प्रकारत्वम् । उच्यते भासमानवैशिष्ट्यानुयोगित्वं विशेष्यत्वं, वैशिष्ट्यं संबन्धः, प्रतियोगित्ववदनुयोगित्वं स्वरूपसंबन्धविशेषः । प्रकारत्वं तु भासमानवैशिष्ट्यप्रतियोगित्वम् । विशेष्यत्वं प्रकारत्वं च स्वरूपसंबन्धविशेष इति तु तत्त्वम् ।

अथ किं कारणत्वं, व्यापारवत्त्वमिति बहवः । फलायोगव्यवच्छिन्नसंबन्धित्वं तत्त्वम् । तच्च फलाव्यवहितपूर्ववर्तिव्यापारवत्त्वं पर्यवसितमतो न परश्वादावव्याप्तिः । एतेनैव सामग्र्यामतिव्याप्तिरपि परास्ता, तस्या निर्व्यापारत्वात् । तथाहि प्रागभावेतरकादाचित्कयावत्कारणप्रागभावानाधारः कार्यप्रागभावाधारः क्षण एव सामग्री । न चैकक्षणावच्छिन्नानि यावन्ति कारणानि, यागादेश्चिरातीतत्वेन स्वर्गादिसामग्र्यामतिव्याप्तेरित्याकरे व्यक्तम् । क्षणश्च न जनकः कार्याधिकरणीभूतस्य तस्य कार्यपूर्ववर्तित्वात्, पूर्ववर्तिनश्च कार्यानधिकरणत्वात्, अधिकरणीभूतानामेव कालोपाधीनां हेतुत्वात्, तस्मात्सामग्रीजन्यं कार्यमित्यस्य नानुकूलं किञ्चिदस्तीति सिद्धं निर्व्यापारत्वम् ।

आकरे सप्तधा तमेवार्थो वर्णितो यथा व्यापारवतः फलाव्यभिचारित्वं, कर्तृव्यापार्यत्वं, कार्याव्यवहितप्राक्कालवृत्तिव्यापारवत्त्वं, कारकान्तरेभ्यश्चरमव्यापारवत्त्वं, कारकान्तरेऽचरितार्थस्य हेतुत्वं, व्यापारजनकव्यापारकत्वं, क्रियायोगव्यवच्छिन्नकारकत्वम् । कारकपदोपादानादीश्वरस्य न स्वज्ञानं प्रति करणत्वम् । एतेषु च सप्तस्वेवोपाधिषु तृतीयायाः शक्तिर्विनिगमकाभावादित्यखादिवचनार्थत्वम् ।

केचित्तु करणत्वमुपाधिसामान्यं कर्मत्वादिवत् । द्विविधं हि सामान्यम् । जातिरुपाधिश्च समवेतं जातिरसमवेतमुपाधिस्तदेव च द्वितीयादीनां शक्यमिति वदन्ति ।

ननु व्यापारत्वं तज्जन्यत्वे सति तज्जन्यजनकत्वम् । तत्र किं जनकत्वमिति चेत् ? अनन्यथासिद्धनियतपूर्ववर्तित्वं, तज्जातीयत्वं, वा तत्त्वम् । घटजनकताया अवच्छेदके दण्डत्वादावनवच्छेदके च दण्डरूपादावति-

व्याप्तिवारणाय अनन्यथासिद्धेति । तदुभयं च यमादाय यस्यान्वयव्यतिरेकौ शक्यग्रहौ स तेनान्यथा इत्यनेन यद्भावेव यस्यान्वयव्यतिरेकावित्यनेन चान्यथासिद्धम् । रासभादावतिव्याप्तिवारणाय नियतेति । व्याप्यार्थे व्यापकार्थकं वा । अवश्यक्लृप्तसामग्रीत एव कार्यसम्भवे तत्सहभूतत्वमन्यथासिद्धत्वमित्यन्यथासिद्धिप्रवेशेऽपि यथा नोत्तरदलवैयर्थ्यं तन्मणिपरीक्षायामनुसन्धेयम् । जनकत्वं शक्त्याख्यं पदार्थान्तरमिति मीमांसकादयः । भेदे सति व्यापकत्वमेव कारणत्वमिति प्रज्ञाकरः ।

स्वरूपसम्बन्धविशेष इति के चित् ।
अखण्डोपाधिविशेष इति तु तत्त्वम् ॥

तदाश्रयश्च त्रिविधः । समवाय्यसमवायिनिमित्तभेदेन ।

यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम् । यथा कपालं घटस्य । समवायिकारणप्रत्यासन्नमसमवायिकारणम् । यथा घटस्य कपालद्वयसंयोगः । तद्रूपस्य च कपालरूपम् । प्रत्यासत्तिर्द्वयी कार्यैकार्थसमवायः कारणैकार्थसमवायश्च । सा यथासंख्यमुदाहरणद्वये । समवाय्यसमवायिभिन्नकारणं निमित्तम् । यथा घटादेर्दण्डघटप्रागभावादिः ।

विनश्यदवस्थं न समवायिकारणम् । कार्यकाले विनश्यति तस्मिन् कार्यस्यावृत्तेः । असमवायिकारणमपि अविनश्यदवस्थमेव । अन्यथा कर्मणोत्तरसंयोगमुत्पाद्य विभागोऽप्युत्पाद्येत । प्रतिबन्धकाभावोऽप्यविनश्यदवस्थ एव निमित्तम् । अन्यथा प्रतिबध्यप्रतिबन्धकयोरेकदोत्पादापत्तेरिति तु मणिकृतः ।

द्वयमिदं क्वाचित्कमेव आत्ममनःसंयोगेन विनश्यदवस्थेनापि जनने बाधकाभावात् । पचतया विनश्यदवस्थयाप्यनुमितेः प्रागभावस्य विनश्यदवस्थस्यैव हेतुत्वाच्च ।

कारणत्वं पुनर्द्विविधम् । फलोपधानं योग्यता च । योग्यतापि द्विविधा । सहकारियोग्यता स्वरूपयोग्यता च । स्वरूपयोग्यतापि द्विविधा । अवच्छेदिका सहकारिविरहप्रयुक्तकार्याभाववत्ता चेति । आद्यानङ्गीकारे शिलाशकलात्सहकारिमतोऽपि कार्यापत्तिः ।

नन्तु कः समवायः । अयुतसिद्धयोः सम्बन्धः समवायः । कौ

Digitized by Google

पुनरयुतसिद्धौ अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति । सर्वं च भावकार्यं कारणत्रयजन्यम् ।

ननु घटरूपे व्यभिचारः । तथा हि तत्र न घटः समवायिकारणं रूपपूर्वावृत्तित्वात् । न हि नीरूपे घटे मानमस्ति । नापि कपालं तथा । तथा सति कार्यस्य समवायिकारणमात्रसमवेतत्वेन घटस्य नीरूपतापत्ता-वचाक्षुषतापातात् । बहिरिन्द्रियजन्यप्रत्यक्षप्रयोजकाभावात् । तत्र हि उद्भूतरूपवत्त्वं तन्त्रमित्येके । महत्त्वसमानाधिकरणं तत्तथा । रूपादिप्रत्यक्षे महत्त्वसमानाधिकरणोद्भूतत्वमेवेति तु सिद्धान्तः । तदुभयसमानाधिकरणमुद्भूतस्पर्शवत्त्वं तन्त्रमित्युपायज्ञतः । महत्त्वे सति रूपवत्त्वं तथा । न च वैचक्षुषत्वाचक्षुषतापत्तिः । वक्ष्यमाणविशेषसामग्रीविरहादिति तु वयमिति चेन्न । घटस्य चाक्षुषद्रव्यतया रूपवत्तासिद्धावनन्यथानुपपत्त्या आद्यक्षणे नीरूपो घटो जायत इति कल्पिते भवति पूर्वभावितया स एव कारणं समवायि चेति । जन्यमात्रं प्रति आत्मकालदिगदृष्टानि प्रागभावश्च निमित्तानि ।

ननु कार्यमुत्पद्यत इत्युक्तं तत्र कासावुत्पत्तिः । आद्यक्षणसंबन्ध इति चेत् । ननु आद्यक्षणः कः । उच्यते । स्वक्षणध्वंसानधिकरणः स्वक्षणः सः । स्वक्षणावृत्तिप्रागभावप्रतियोगी स्वक्षणो वा । स्ववृत्तिपदार्थप्रागभावानाधारत्वे सति प्रागभावाधारः समयः क्षणः । महाप्रलयातिव्याप्तिवारणाय विशेष्यम् ।

एषा च प्रमा चतुर्विधा । प्रत्यक्षानुमित्युपमितिशाब्दभेदेन । करणमपि तासां चतुर्विधम् । न तु चार्वाकस्येव प्रत्यक्षमात्रम् । न वा सौगतवैशेषिकयोरिव प्रत्यक्षानुमाने एव । न वा सांख्यानामिव प्रत्यक्षानुमानशब्दा एव । न वा प्राभाकराणामिव चतुष्प्रमाणातिरिक्ता अर्थापत्तिरपि । न वा भाट्टानामिव अनुपलब्धिसहितानि षट्प्रमाणानि । फलानां भेदात् । अर्थापत्तेर्व्यतिरेक्यनुमानरूपत्वात् । अनुपलब्धेरभाव-ग्रहकारणत्वेऽपि करणत्वाभावात्, इन्द्रियस्यैव करणत्वात् ।

ननु करणानां स्वरूपं लक्षणं चोच्यताम् । उच्यते । प्रत्यक्षमिन्द्रियादि । अनुमानं लिङ्गपरामर्श इति वार्त्तिकम् । परामृश्यमाणं लिङ्गमित्याचार्याः । व्याप्तिज्ञानमिति मणिकृतः । उपमानं सादृश्यानुभवः सदृश-

Digitized by Google

ज्ञानं वा । शब्दः पदज्ञानम् । व्यापारस्तु प्रत्यक्षस्य संयोगादिः । अनुमानस्य परामर्शः । उपमानस्य सादृश्यस्मृतिः । शब्दस्य पदार्थस्मृतिरिति । लक्षणं तु प्रत्यक्षकरणत्वादिकम् ।

ननु किं प्रत्यक्षत्वम् । यदाश्रयकारणतया चक्षुरादेर्यद्विषयतया च घटादेरपि प्रत्यक्षव्यवहारः । किं चानुमितित्वादिकमिति चेत् ? । अस्तु प्रत्यक्षत्वादिकं तत्तज्ज्ञानवृत्तिर्जातिः, यद्वा इन्द्रियत्वेन इन्द्रियजन्यं ज्ञानं प्रत्यक्षम् । व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यवृत्त्यनुभवत्वापरजातिमत्यनुमितिः । वाक्यार्थसामानाधिकरण्यज्ञानजन्यप्रवृत्तिनिमित्तपरिच्छेदवृत्त्यनुभवत्वापरजातिमत्युपमितिः । पदज्ञानकरणकज्ञानवृत्तितावृत्तजातिमच्छाब्दम् ।

इन्द्रियत्वं च स्मृत्यजनकज्ञानहेतुमनःसंयोगाश्रयत्वम् । व्याप्तिः साध्यसामानाधिकरण्यावच्छेदकरूपवत्त्वम् । अवच्छेदकत्वमिहानतिरिक्तवृत्तिलघुधर्मत्वम् । अनौपाधिकः संबन्धो व्याप्तिरिति टीकाकृतः । तादात्म्यतदुत्पत्त्यन्यतरनियतोऽविनाभावः सेति बौद्धाः । यदाहुः ।

कार्यकारणभावाद्वा स्वभावाद्वा नियामकात् ।
अविनाभावनियमो दर्शनान्न न दर्शनादिति ॥
नियमो निश्चय इत्युपायकृद्व्याख्यानम् ।

सिसाधयिषाविरहसहकृतसाधकमानाभावः, प्रतिबन्धकसाध्यसिध्यभावो वा पक्षता । तदाश्रयधर्मत्वं पक्षधर्मता । सादृश्यं तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् । पदार्थान्तरमिति तु प्राभाकराः । संकेतवत्पदं, तच्च किंचिदनेकाक्षरं यथा घटादिपदम् । किंचित्त्वेकाक्षरं, यथा हरिशिवादिवाचकम उ इत्यादिकम् । पदं च चतुर्विधमित्याचार्याः । तद्यथा किञ्चिन्नैमित्तिकं यथा घटादिपदम् । निमित्तमिह प्रवृत्तिनिमित्तम् । तच्च वाच्यं सद्वाच्यवृत्तित्वे सति वाच्योपस्थापकं जातिरूपमिह विवक्षितम् । तत्पुरस्कृत्य प्रवृत्तं नैमित्तिकमुच्यते । किंचिन्निमित्तसंकोचवत् । यथा स्वर्गादि पदम्, उपस्थितस्य सुखत्वस्य प्रवृत्तिनिमित्तस्य ।

यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं यत्तत्सुखं स्वःपदास्पदम् ॥

इत्यर्थवादेन संकोचनात् । किंचिदौपाधिकम् । यथा पाचका-

Digitized by Google

विषयं जातिभिन्नोऽनेकवृत्तिधर्म इहोपाधिः । स च पाकानुगतज्ञाना-
दियोगजन्यत्वपुरस्कारेण प्रवर्त्तत इत्यौपाधिकमुच्यते । किं नित्यादिभाविकम् ।
निमित्तोपाधिरहितेऽतीन्द्रिये यद्वर्त्तते । यथा आकाशादिपदम् । किं
चिच्छाङ्क्याहिकम् ! यथा चैत्रादिपदम् । संकेतविषयस्य व्यक्तिविशे-
षस्य प्रत्यक्षेणोपस्थितिः शङ्क्याहिका तया प्रवर्त्तत इति शाङ्क्याहिकम् ।
यौगिकं रूढं यौगिकरूढं योगरूढमित्येवं चतुर्द्धा विभागस्तु ते विभक्त्यन्ताः
पदमित्यक्षपादसूत्रानुसारेण । तानि च दण्डीघटमण्डपपङ्कजप्रभृतीनि ।

तत्र प्रत्यक्षं तावत् प्रथमतो द्विविधम् । अलौकिकं लौकिकं च ।
आद्यं पुनर्द्विविधम् । अजन्यं जन्यं च । आद्यमीश्वरीयम् । अन्त्यं सामान्य-
लक्षणयोगजधर्मज्ञानलक्षणप्रत्यासत्तिजन्यतया त्रिविधम् । तत्राद्यं घट इति
प्रत्यक्षं भूतभाविवर्त्तमानयावद्घटविषयकमाद्यम् । तद्धि घटत्वेन ज्ञायमा-
नेन प्रत्यासत्त्या जन्यते । यथा वा प्रमेयमिति प्रत्यक्षं यावत्प्रमेयविषयकम् ।

प्राञ्चस्तु न सामान्यं प्रत्यासत्तिः । वर्त्तमानगतसंनिकर्षेणैवाती-
तानागतादिभाने गौरवेण यावद्विषयेन्द्रियसंनिकर्षस्याकारणत्वात् । न
चैवं पटादेरपि असंनिकृष्टत्वाविशेषे घटप्रत्यक्षविषयतापत्तिः । तत्र हि
प्रकारीभूतसामान्याश्रयत्वं नियामकमित्यतिप्रसङ्गभञ्जकमित्याहुः ।

योगिनां यावत्पदार्थगोचरं प्रत्यक्षं द्वितीयम् । तद्धि योगजधर्मेण
प्रत्यासत्त्या जन्यते । तृतीयं परमाणुमहं जानामि इति परमाण्वंशे प्रत्यक्षम् ।
कविकाव्यादिमूलभूतसंसर्गज्ञानं च । तद्धि ज्ञानलक्षणेन संनिकर्षेण जन्यते ।
तच्च जन्यसविकल्पकमेव प्रत्यासत्तिः । ईश्वरज्ञाननिर्विकल्पकयोरप्रत्यासत्ति-
त्वात् । इदं च मनस एव प्रत्यासत्तिरित्येके । बहिरिन्द्रियस्यापि । किं
तु तस्य न विशेष्यसंनिकर्षो यन्निमीलितनयनस्यापि चक्षुरादिचाक्षुषता-
पत्तेरिति तु सिद्धान्तः । विशेष्यसंनिकर्ष एवायम् । विशेषणसंनिकर्ष-
स्याहेतुत्वात् । तथा च टीकायां तत्तायां न इन्द्रियसंनिकर्षापेक्षेति
स्पष्टम् । न चोक्तदोषः । लौकिकसंनिकर्षजन्य एव बहिरिन्द्रियस्यायं संनि-
कर्ष इत्यभ्युपगमात् । अत एव घटाभावसंनिकृष्टस्य चक्षुषः घटांशेऽपि
ज्ञानस्य प्रत्यासत्तित्वमिति तु पश्यामः ।

लौकिकमपि द्विविधं निर्विकल्पकं सविकल्पकं च । वैशिष्ट्यान
वगाहिज्ञानं निर्विकल्पकम् । तच्चास्त्येवेति प्राभाकराः । तदेव प्रत्यक्ष-

परमार्थसद्व्यक्तिस्वलक्षणसमुच्छिन्नं तत् । तस्य निरस्तसमस्तार्थक्रियेणाननुगतेन सामान्यादिना विशिष्टव्यक्तेः सामान्यादिमात्रस्य वा अलीकस्य विषयतया विषयान्यत्वात् । किं तु मानसो भ्रान्त्यात्मकः प्रत्यय इति बौद्धाः ।

वैशिष्ट्यावगाहि सविकल्पकम् । तच्च नामजातिगुणक्रियाद्रव्यात्मकविशेषणवैशिष्ट्यविषयतया पञ्चविधम् । यथा डित्थोऽयं गौरयं शुक्लोऽयं गच्छत्ययं कमण्डलुमानयमिति । निर्विकल्पकत्वसविकल्पकत्वे जातिविशेषौ । न च प्रत्यक्षानुभवत्वाभ्यां साङ्कर्यम् । तारत्वादिवत् नानात्वादिति । तथा च टीका । इह द्वयी प्रत्यक्षजातिः सविकल्पिका निर्विकल्पिका चेति संप्रदायः ।

जन्यप्रत्यक्षमात्रे सन्निकर्षो हेतुः । स च लौकिक एव भाष्यवार्त्तिकटीकानिबन्धेष्वलौकिकस्यानभिधानात् । प्रत्युत सन्निकर्षस्तु षोढा भिद्यत इत्येव वार्त्तिकम् । उपायावपि सामान्यलक्षणां ज्ञानलक्षणां च प्रत्यक्षलक्षणसूत्रे विशेषणतायामन्तर्भाव्य शब्दलक्षणसूत्रे योगजधर्मो मनःसंयुक्तात्मनि विशेषणमित्युक्तमिति प्राचां सिद्धान्तः ।

मणिकृन्मते तु स सन्निकर्षो द्विविधो लौकिकोऽलौकिकश्चेति । तत्राद्यः षड्विधः । संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः-समवायः, समवेतसमवायः, विशेषणता चेति । यथासंख्यं घटतद्रूपरूपत्वशब्दशब्दत्वेषु पञ्च । षष्ठस्तु द्विविधः । इन्द्रियविशेषणता इन्द्रियसम्बद्धविशेषणता च । आद्यः शब्दाभावे, तदतीन्द्रियत्ववादिमते तु समवाये । द्वितीयोऽपि पञ्चविधः । इन्द्रियसंयुक्तविशेषणता, इन्द्रियसंयुक्तसमवेतविशेषणता, इन्द्रियसंयुक्तसमवेतसमवेतविशेषणता, इन्द्रियसमवेतविशेषणता, 'इन्द्रियसमवेतसमवेतविशेषणता, चेति 'यथासंख्यं भूतलतद्गतरूपरूपत्वशब्दशब्दत्ववृत्तिघटाभावादौ ।

एकदेशिनस्तु संयोगो विशेषणता वेति द्वय्येव प्रत्यासत्तिरित्याहुः । युक्तं चैतदेव समवायस्य प्रत्यासत्तित्वे योजनान्तरितस्यापि शब्दस्य संयुक्तसमवायस्य तत्त्वे वायुचक्षुःसंयोगादितोऽपि पटादिरूपप्रत्यक्षतापत्तेः । समवायस्याविशिष्टत्वात् ।

प्राभाकरास्तु गुणादौ जातिमनिच्छन्तः संयुक्तसमवेतसमवायं

समवेतसमवायं च न मन्यन्ते । तन्न युक्तम् । तथाऽपि गुणनिष्ठत्वादृश्यवृत्त्यर्थं तदावश्यकत्वात् । साधितं च रूपत्वादिसामान्यं टीकायाम् । नीलत्वमधुरत्वशब्दत्वादिसामान्यं च निबन्धे ।

भट्टास्तु ' शब्दो वर्णात्मकः संयोगेन । ध्वनिस्तु संयुक्तसमवायेनासन्निकृष्टः अतीन्द्रिय एव वा । अभावोऽतीन्द्रिय अनुपलब्ध एवेति समवायः समवेतसमवायश्च न प्रत्यासत्तिः । किं तु संयुक्तसमवेतसमवायस्तु प्रत्यासत्तिरङ्गीकार्या, रूपत्वादिनिष्ठतया वस्तुत्वजातिग्रहायेत्यतश्चत्वार एव सन्निकर्षा इत्याहुः ।

अलौकिकस्त्रिविधः । स च उक्त एव । परिमाणादिग्रहे चतुष्टय सन्निकर्षोऽपि हेतुः । तेन न दूरस्थवस्तुनः परिमाणादिग्रहः । स च इन्द्रियेण अर्थस्य इन्द्रियावयवैरर्थावयवानामिन्द्रियावयवेनार्थस्यार्थावयवानामिन्द्रियावयवेनेति टीका ।

वस्तुतस्तु परिमाणादिग्रहो भवत्येव तस्य द्रव्यग्रहणयोग्यतान्तर्भूतयोग्यताकस्य फलोपधानेऽप्यतिरिक्तानपेक्षणात् । चन्द्रमण्डलादिमहत्त्वस्यानुभवे विवादाभावात् । परन्तु तद्गतमहत्त्वावान्तरजातिविशेषा एव न गृह्यन्ते इति तद्ग्रह एव तस्य हेतुत्वमिति । द्रव्यप्रत्यक्षमात्रे संयोगः । संयुक्तसमवायेन प्रत्यक्षे संयुक्तसमवायः । एवमन्यत्रापि विशिष्टप्रत्यक्षे विशेषणज्ञानमपि हेतुः । जन्यविशिष्टज्ञानमात्रस्य विशेषणज्ञानहेतुत्वात् ।

प्रभाकरनैयायिकैकदेशिनौ तु विशेषणज्ञानस्य विशिष्टज्ञानहेतुतां नानुमन्येते । तथा निश्चयाभावात्मकग्राह्याभावसाक्षात्काराभावोऽपि, विशिष्टज्ञानमात्रं प्रति समानप्रकारकग्राह्याभावनिश्चयवत् प्रत्यक्षे तादृशसाक्षात्कारस्य प्रतिबन्धकत्वात् । द्रव्यविशिष्टप्रत्यक्षे प्रतिसंधानविशेषोऽपि हेतुः । यदाहुः ।

विशेषणं विशेष्यं च संबन्धं लौकिकीं स्थितिम् ।
गृहीत्वा सङ्कलय्यैतत्तथा प्रत्येति नान्यथा ॥
इतिटीकाकारचरणाः ।

दण्डीपुरुष इत्यादिविशिष्टवैशिष्ट्यप्रत्यक्षे तु विशेषणतावच्छेदकप्रकारकं ज्ञानमपि ।

नव्यास्तु विशिष्टवैशिष्ट्यज्ञानत्वं न जन्यतावच्छेदकं दण्डत्वविशिष्टज्ञान दण्डविशिष्टज्ञानसामग्र्योः समाजादेवोपपत्तेर्नीलघटत्ववदित्याहुः ।

भावविशेष्यकचाक्षुषे विषयालोकसंयोगः, चक्षुरालोकयोश्च स्वरूपं हेतुः । तथा विषयस्योद्भूतरूपं च । कारणतावच्छेदकस्यापि तस्य द्रव्यचाक्षुषं प्रति विषयविधया हेतुत्वाविरोधात् । महत्त्वमनेकद्रव्यवत्त्वं चेति वार्त्तिकगुणपदार्थप्रवेशानुसारी पन्थाः । लाघवान्महत्त्वमेव तथेति तु तत्त्वम् । तेजोविषयके तस्मिन्नभिभवाभावोऽपि । अतस्तैजसमभिभूतं मध्यन्दिनोल्कादिकं न गृह्यते । अनभिभूतं च गृह्यत एव, यथा मार्त्तण्डमण्डलम् । त्रसरेणोः प्रत्यक्षे वातायनादिगतालोकसंयोगोऽपि हेतुः । अत एव सर्वत्र न गृह्यते । उद्भूतत्वे सति महत्त्वसमानाधिकरणत्वात् । तस्य रसोऽपि गृह्यते परं तु न विविच्य ।

केचित्तु तस्य रसो न गृह्यत एवेत्याहुः ।

त्वाचप्रत्यक्षे उद्भूतस्पर्शोऽपि हेतुः । अत एव प्रभायाः न त्वचा ग्रहः । वायोरपि न त्वचा ग्रहः । उद्भूतरूपविरहात् । तेन उष्मादयोऽपि व्याख्याताः ।

मीमांसकास्तु त्वाचप्रत्यक्षे रूपस्य तन्त्रत्वमनिच्छन्तो बहिरिन्द्रियजद्रव्यप्रत्यक्षत्वस्य कार्य्यतावच्छेदकत्वमेव नास्ति मानाभावात् । भावे वा तदवच्छिन्नं प्रति जन्यमहत्त्वेन महत्त्वेन बहिर्द्रव्यत्वेन शक्तिविशेषवत्त्वेन वा जनकत्वमिति मन्वानाः पवनादेरपि प्रत्यक्षतामाचक्षते । मानसे लौकिके द्रव्यप्रत्यक्षे तु ज्ञानादिकमपि हेतुः । अतो न सुषुप्तावात्मनः प्रत्यक्षोदयः ।

भ्रमसंशयोत्तरप्रत्यक्षे तु विशेषदर्शनमपि हेतुः । अयं स्थाणुरिति भ्रमोत्तरमयं स्थाणुः पुरुषो वेति संशयोत्तरं च पुरुषत्वव्याप्यकरचरणादिमानयमिति विशेषदर्शने सत्येवायं पुरुष इति प्रत्यक्षोदयात् । न विशिष्टज्ञानं हेतुरनुमितिसामग्र्या बलवत्त्वात् ततोऽनुमितिरेवोत्पद्यते । किं तु व्याप्यत्वज्ञानसामग्रीकालीनं करादिज्ञानमेवेति निबन्धानुसारिणः ।

कारणता तु भ्रमोत्तरप्रत्यक्षे भ्रमविरोधिदर्शनत्वेन दोषाभावकालीनदर्शनत्वेन वा । अतः सत्यपि शुक्लत्वव्याप्यशंखवानयमिति विशेषदर्शने

पीतः शङ्ख इति भ्रमः। साक्षात्कारिभ्रमे तु साक्षात्कारिविशेषदर्शनमेव विरोधि। अत एव सूर्योदयेन प्राचीमनुमिन्वतोऽपि दिङ्मोह इति तु नवीनाः।

संशयोत्तरप्रत्यक्षे तु संशयविरोधित्वेन निश्चयसामग्रीत्वेन वा। अत एवान्धकारवति गेहे घटसंदेहवतो विनापि व्याप्यदर्शनमालोकसंयोगतो घटप्रत्यक्षमिति। सोऽयमित्यादिप्रत्यभिज्ञायां संस्कारोऽपि कारणम्। सन्निकर्षस्तु तत्तांशे संयुक्तविशेषणता, मा भूद्दर्शनस्य पूर्ववर्त्तिता इन्द्रियागोचर इति। टीका तु तत्तांशे सन्निकर्षानभ्युपगमेऽपि न काचित्क्षतिः। न हि यावत्प्रत्येतव्येन्द्रियसन्निकर्षः जन्यत्वं प्रत्यक्षलक्षणम्। अपि त्विन्द्रियार्थसंनिकर्षजन्यत्वमित्येतत्परेत्याचार्याः। न च विशेषणता यदि तत्तैव तदा सन्निकर्षस्य असत्त्वमेव पर्यवसितमिति वाच्यम्। अतीतसमयसम्बन्धात्मिकायास्तत्तायाः सन्निकर्षो विशेषणता, सा च विशेष्यीभूतघटादिस्वरूपात्मिकेत्युपायकृता व्याख्यातत्वात्।

स्मृतिरेव प्रत्यभिज्ञाहेतुः। संस्कारस्तु तयाऽन्यथासिद्ध इति साम्प्रदायिकाः। प्रामाण्यं स्वत एव ज्ञायते उत्पद्यते चेति मीमांसकाः परत एव उत्पद्यते ज्ञायते चेति अस्मिन् सिद्धान्तः। जन्यप्रमामात्रसाधारणप्रमागुण इत्येके। विशेष्यसम्बद्धविशेषणज्ञानं गुण इत्यपरे। विशेषणज्ञानमात्रं गुणः। प्रत्यक्षादिप्रमाणसहितविशेषणसहितस्यैव तस्य कार्याजनकत्वाच्चातिप्रसङ्ग इति तु वयम्। स्थूलावयविप्रत्यक्षादिप्रमायां भूयोऽवयवेन्द्रियसन्निकर्षो गुणः। जन्यप्रत्यक्षप्रमामात्रे विशेषणविशेष्ययोरिन्द्रियसन्निकर्षो गुण इति तु बहवः। अदृष्टविशेषस्तत्रेति रत्नकोशकृतः। भ्रमविरोधिसन्निकर्षो गुण इति तु वयम्।

इति प्रत्यक्षनिरूपणम्।

अनुमानमपि त्रिविधम्। केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात्। तत्र केवलान्वयिसाध्यकं केवलान्वयि। यथा शब्दादिकं पक्षयित्वा प्रमेयत्वादौ साध्ये। वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम्। व्यतिरेकसहचारमात्रगृहीतव्याप्तिबलेन यदनुमानं तद्व्यतिरेकि। तदुदाहरणप्रयोगस्तु साध्याभाववन्तमुद्दिश्य साधनाभावप्रदर्शनेन कार्यः। न त्वन्वयिवत् साधनवन्तमुद्दिश्य साध्यप्रदर्शनेन।

Digitized by Google

यदाहुर्भट्टपादाः ।

व्याप्यव्यापकभावो हि भावयोर्यादृगीष्यते ।
तयोरभावयोस्तस्माद्विपरीतः प्रतीयते इति ॥

तत्त एवं भवति पृथिवी गन्धवत् यन्न गन्धवत् न सा पृथिवी यथा जलम् । अत्र या पृथिवी सा गन्धवतीत्यत्र दृष्टान्ताभावात् । पृथिवीमात्रस्य पक्षत्वेन साध्यनिश्चयस्य पृथिव्यामभावात् । अन्यत्र साध्यस्यासत्त्वात् । यत्र तूभयसहचारेण व्याप्तिग्रहादनुमानं तदन्वयव्यतिरेकि । यथा पर्वतो वन्हिमान् धूमात् यो यो धूमवान् स स वन्हिमान् । यथा महानसं यो न वह्निमान् नासौ धूमवान् यथा जलह्रद इति । अत्रान्वयव्यतिरेकव्याप्त्योः सहोपस्थितावेवानुमानम् । अन्यथा विभागभङ्गापत्तेरिति केचित् ।

अन्ये तु व्यतिरेकव्यभिचारशङ्कायामेव तदुपयोगः । प्रत्येकमेव सामर्थ्यकल्पनात् । विभागस्तु सपक्षसहचारविपक्षव्यभिचाराज्ञानपूर्वकत्वाभिप्रायेण । तथाचात्रापि प्रायोऽन्वयमुख एव प्रयोगः । अन्यथा अधिकनिग्रहस्थानापत्तेरित्याहुः ।

दिङ्नागस्तु । "अनुमेयेऽथ तत्तुल्ये सद्भावोऽसति नास्तिता" इत्येवं रूपत्रयसंपन्नमन्वयव्यतिरेक्येव लिङ्गमाह ।

· अनुमितिमात्रे लिङ्गज्ञानं करणमिति बहवः । ज्ञानमात्रं करणमित्यस्मद्गुरवः । बाधसत्प्रतिपक्षाभावोऽपि । अबाधितत्वासत्प्रतिपक्षितत्वज्ञानं तयोस्तूपायहृत्तः । व्यभिचाराज्ञानाद्यभावो लिङ्गपरामर्शमुत्पाद्य प्रयोजक एव । व्यभिचाराज्ञानाभावो हेतुरेवेत्यपरे ।

कुठारप्रहारं चिकीर्षुराह—हे रामेति। कामरिपोः शिवस्य यत्कार्मुकं तस्य मर्मघातेन भञ्जनेन सञ्जातमुत्पन्नं पातकं पापं यस्य स तत्सम्बुद्धौ। हे राम। सीतायाः यः करग्रहव्यतिकरः पाणिपीडनसम्बन्धः तस्य प्रतिकूलबन्धुः विरोधी अयं निष्करुणः कठोरधारः कुठारः ते कण्ठं पुरा प्राप्ति (निकटागामिके पुरेत्यमरः) विशतु॥ वसन्ततिलकं वृत्तम्॥ २३॥

प्रवीर इति। सञ्जातवीरभाव इत्यर्थः॥

हार इति। हारो विवाहोचितः, अथवा तीक्ष्णधारः तव कुठारः कण्ठे विशतु. सधवोचितं कज्जलमथ वा विधवोचितं जलमश्रु स्त्रीणां नेत्राण्यधिवसतु. नेत्राणीत्यत्रोपान्वध्याङ् वस इत्यनेन द्वितीया. अथ च सुखं साह्लादं यथा स्यात्तथा ध्रुवं विवाहोत्तरकालद्वयमथवा प्रेतभर्तुर्यमराजस्य मुखं पश्यामः। यद्वा तद्वा भवतुप्रसीदतु वा भवान् प्रहरतु वा. वयं क्षत्रियाः ब्राह्मणेषु भवादृशेषु कदाऽपि प्रवीराः युद्धाय बद्धपरिकरा न भविष्याम इत्यर्थः। मन्दाक्रान्ता वृत्तम्॥ २३॥

प्रणतिपात्रमिति। प्रणाममात्रयोग्यं शान्तप्रकृतिमित्यर्थः.

जानीष इति। रणभुवि यस्य दीर्घस्य दोष्णः बाह्वोः कन्दलद्वयेन आस्कन्दितौ निराकृतौ बाहू यस्य स तेन तथाभूतेन. अत एव मन्दमोजो वीर्यतेजो यस्य स तेन स्कन्देन. मम वक्त्रानुसारात् मुखसंख्यानुसारेण भुजसम्पदं द्वादशभुजानित्यर्थः. कथं न अस्राक्षीत् सृष्टवान् ब्रह्मा इति अस्मात्कारणात् क्रुद्धेन सता. अङ्कुरकरन्यस्तं विधातुर्ब्रह्मणः शिरः पञ्चमम्. उद्धृतं सक्रोधं यथा स्यात्तथा ऐक्षि अदृश्यत। यदि मे बहवो भुजाः स्युः तदा परशुरामेण न पराजितः स्यामिति क्रोधकारणं स्कन्दस्य। कृतापराधस्य ब्रह्मणः पञ्चमं शिरः शिवेन अपसारितमिति पुराणेष्वनुसन्धेयम्। यस्य दोःकन्दलेनैवं कृतं तं जामदग्न्यं न जानीषे किं यदेवं प्रलपसि यद्ब्राह्मणेषु वयं न प्रवीरा इति–इत्यभिसन्धिः। शार्दूलविक्रीडितं वृत्तम्॥ २४॥

तृणायेति। मन्यकर्मण्यनादरे विभाषाऽप्राणिष्विति चतुर्थी॥

(७५) संग्रामेति। संग्राम एव तुला। संग्रामेणैव निर्णयो भविष्यति यदस्मद्विषये ब्राह्मणक्षत्रियजात्योर्मध्ये का वीर्यवत्तरेति भावः॥

भो ब्रह्मन्निति। भवता समं सह नः संग्रामवार्त्तापि समरचर्चापि न घटते न सम्यक् भाति. न शोभत इति यावत्॥ यस्मात् वयं सर्वे हीनं न्यूनं बलम् येषां ते तथाभूताः स्मः॥ यूयं पुनः बलवतां मूर्धनि शिरसि स्थिताः। मुख्या इति यावत्॥ रामोक्तिं सहासं समर्थयमानेन लक्ष्मणेनोत्तरार्द्धम् पूरितम्॥ उर्वीभुजां नृपाणाम्।

Digitized by Google

क्षत्रियाणामिति यावत् । एकगुणं एकः ज्यामात्रमेव गुणो यस्मिन् तत् शरासनमेव मुख्यत्वं बलम् ॥ भवतां तु यज्ञोपवीतरूपं नवगुणं बलम् । यज्ञोपवीते प्रतिसूत्रस्य नवसूत्ररचितत्वात् ॥ भवतां ब्रह्मबलमेव केवलं न शस्त्रबलमिति हृदयम् ॥ शार्दूलविक्रीडितं वृत्तम् ॥ ७५ ॥

दुर्विनयेति अविनीतवचनचातुर्य्येणेत्यर्थः ॥

परशुरामो निजमेव दोषं मन्यमान आह दारैरिति ॥ निर्मुक्तकुचांशुकैः भाविभर्तृवधावसरे विगलितांचलाभिः दारैः स्त्रीभिः परिवृतं रक्षितं एषां लक्ष्मणादीनामिदानींतननृपाणां प्राचीनपूर्वपुरुषं वपुः यदसौ मम कुठारस्तको न अहिंसीत् अवधीत् तस्यैव कुठारानुक्रोशस्य एतत् उज्जृम्भितं फलम् ॥ किं तदित्यपेक्षायामाह यदिति ॥ यत् उक्तानां नार्य्य एव कवचं रक्षोपायो येषां ते तेषां नृपाणां अन्वयस्य वंशस्य प्रणयिनां तदुत्पन्नजातानां क्षत्रियाधमानां लक्ष्मणसदृशानां इमाःलक्ष्मणोक्तिरूपाः दुर्वाचो मम श्रवणयोः प्रविशन्ति ॥ अतः क्षत्रगोत्रे क्षत्रियवंशे या मया प्राक् कृपा प्रदर्शिता तां कृपां धिक् ॥ शार्दूलविक्रीडितं वृत्तम् ॥

क्षीरेति । अतिबालक इत्यर्थः । विषकण्ठ इति । दुर्वाच्यवाचकत्वात् ॥ शितिकण्ठेति । शितिकण्ठस्य शिवस्य शिष्येण भवता विशेषतः क्षन्तव्यम् ॥ शिवो विषकण्ठः तवगुरुः । अहमपि त्वद्वचनात् विषकण्ठः । अतस्तव गुरुरहं प्रणतिपात्रं न क्रोधपात्रमिति हृदयम् ॥ अन्याभिसन्धानेनेति । विषयान्तरार्पितमेव भवद्गुरोः स्मरणमित्यर्थः ।

स्वोक्तिमन्यथा प्रदर्शयन्नाह-किरीटेति । बाले नवीने प्रालेयं हिमं रोचिर्यस्य स तस्मिन् चन्द्रे । "प्रालेयं हिमिका चाथ हिमानी हिमसंहतिः" इत्यमरः । किरीटम् अधिरूढेऽपि शितिकण्ठस्य शिवस्य चित्ते कोपाङ्कुरः क्रोधोद्गमः पदं धत्ते किम् । भवद्गुरुरेवं क्षमाशीलो यच्छिरःस्थायिनेपि बालचन्द्राय नैव कुप्यति अतश्च तच्छिष्यस्य तव मयि बालके न युक्तः कोप इत्येव ममाशय आसीदिति भावः ॥

(७६) अन्तेवासीति । अन्ते समीपे वस्तुं शीलं यस्य सः । शिष्य इत्यर्थः ॥ ७७ ॥

वागिति । वाचां परिपाटीषु पाटवं चातुर्यमित्यर्थः । यथिशोक्तिं शीघ्रमेव यथावसरम् अन्यथयसीति तात्पर्यम् ॥ प्रकृतीति । प्रकृत्या स्वभावतः कठोरः कठिनशीलः ॥

स्वपरशुप्रभावं वर्णयति क्रीडेति । क्रीडया हेलया विनिर्मितः, सुदुर्मदो दुर्धर्षो दोष्णां विलासो येषां ते तथाभूतानां राजकानां नृपाणां वधो येन स तस्य मम परशवधस्य शीलं न वेत्सि किमिति पूर्वेण सम्बन्धः । येन परशुना कीलालेन शोणितेन (शोणितेऽम्भसि

कीलालमित्यमरः) रक्तवर्णेन, कीकसेन अस्थ्ना श्वेतवर्णेन (कीकसं कुल्यमस्थि चेत्यमरः) कचेन केशेन कृष्णवर्णेन च द्विधाऽपि प्रकारद्वयेन पृथिवी त्रिवर्णा वर्णत्रयसहिता विदधे ॥ सकलक्षत्रियनाशेन ब्राह्मणवैश्यशूद्रात्मवर्णत्रयमयी पृथिवीत्येकः प्रकारः । रक्तवर्णशोणितश्वेतास्थिकृष्णकेशैर्व्याप्ता सती रक्तश्वेतकृष्णात्मकवर्णत्रयव्याप्तेत्यपरः प्रकारः ॥ वसन्ततिलकं वृत्तम् ॥ २८ ॥

शीलमिति । स्वभावः । अपरिशीलितम् अपरिचितमित्यर्थः ॥ कुठारस्वभावं वर्णयन्नाह—यत्र क्रामतीति । यत्र यस्मिन् कुठारे संगराङ्गणभुवं रणभूमिं क्रामति प्राप्ते सति । दुर्वारं दुर्निवारं यद्धाराज्वलं तेन लुणणाः क्षताः ये क्षत्रकिशोराणां क्षत्रियबालकानां कण्ठाः तेषां तेभ्यः परिस्रुतैः रुधिरैः भूः पृथिवी नीरेणुका शोणिताप्लुतत्वात् धूलिरहिता अभूत् । पुनः । तादृशवीराणां प्रख्यातवीर्यक्षत्रियनृपाणां यः स्वयंवरः । तत्पराः तदुन्मुखाः याः स्वर्लोककन्याः तासां करेषु यानि क्रीडापुष्कराणि क्रीडाकमलानि तेषां दाम्नां मालानां रेणुभिः परागैः द्यौः स्वर्गएव रेणुभिरुत्कटा व्यस्ता व्याप्ता अभूत् । रणमृतवीरपुरुषाः स्वर्गकन्याभिर्वृता भवन्तीति शास्त्रे प्रसिद्धम् । पृथिवी नीरेणुका द्यौश्च रेणूत्कटेति व्यत्यासे तात्पर्यम् । रेणुभिः रेणूत्कटेति पुनरुक्तवदाभासः । शार्दूलविक्रीडितं वृत्तम् ॥ २९ ॥

एतत्सत्यमिति । परशुरामोक्तवीरेणुकापदं तज्जननीमरणपरं गृहीतं लक्ष्मणेन ।

(७७) पद्मासनमिति । योगाभ्यासोचितमित्यर्थः । भवान् योगाभ्यास एव निपुणो न पुनः शस्त्रव्यापारे इति हृदयम् । तमेवार्थं प्रतिपादयन्नाह—युष्माकमिति । क्षत्रियेषु मोक्षियाणां योगाभ्यासरतानां युष्माकं सुघटितानि बहूनि च न्यस्तानि यानि पद्मासनानि पद्मकोशानि तेषां माला येषु ते तथाभूताः कण्ठाः पद्माक्षमालापूर्णा एव भवतां कण्ठा इति भावः । अत एव समिति समरे युष्माकमुत्कण्ठा साहसं मिथ्यैवेति किं साहसं करोषीत्यर्थः । वल्गन् अग्र च करतले चलन् यो निस्त्रिंशः खड्गः तस्य धारया धौतः अरातीनां शत्रूणां मदो दर्पः एव या मषी कज्जलं तस्याः पङ्कपूरो यैः ते तथाभूताः प्रवीराः शूराः अन्ये । भवन्त्य इति शेषः । अत्र श्लेषाश्रितं रूपकम् । मन्दाक्रान्ता वृत्तम् ३०

क्षत्रियेति । क्षत्रियाश्चैव स्फुलिङ्गा अग्निकणासदृशा वीरबालकाविति यावत् ॥

शमधनेति । शमः शान्तिरेव धनं तेन समृद्धस्य अतिशान्तस्येत्यर्थः । शमेति । शमात् दुर्गतः च्युतः अशान्त इति यावत् ॥

गौतमाद्वेति । गौतमः क्रोधपरवशः शक्रदूषितामहल्यां शशापेति कथां शतानन्दकुलकलङ्करूपामाक्षिपति । व्यक्तं तु गौतमशक्रयोः

Digitized by Google

क्रोधमेवाविष्करोषि । **क्षत्त्रियापुंसेति** । परुषवचने भार्गवकुलं कलङ्कयसि अधिक्षिपसि । **तपस्तुङ्गमिति** । तपसा तुङ्गमुन्नतमित्यर्थः ।

कुलपांसनेति । निजकुलकलङ्क इत्यर्थः । पांसुलायाः स्वैरिण्याः अहल्यायाः पुत्र । "स्वैरिणी पांसुला च स्यात्" इत्यमरः ॥

भार्गवं शान्त्यभिमुखीकुर्वन्नाह—**तपःशान्तमिति** । चेतः चित्तं तपसा शान्तम् । स्फाटिकमणिमालायाश्च परिकरो ग्रहणम् । कुण्डी भिक्षाकपालम् । दण्डो वैणवो ब्राह्मणोचितः । उटजे कुट्यां य आवासो वासः तस्मिन्चिरतिः निरन्तरवसतिरित्यर्थः । वः मुनीनामेतत् समुचितम् । न पुनः उदग्रमुद्धतं वचनम् वक्त्रभ्रूभङ्गः क्रोधजन्यः शरधनुषी परशुर्वा । उचित इति शेषः । शिखरिणी वृत्तम् ॥ ३१ ॥

(७८) उक्तमेवार्थं दृढयन्नाह **क्वेति** । क्व एकत्र ते अशुभः क्रूरः परशुः क्व अन्यत्र पवित्रं गोत्रं कुलम् । क्व इदमुग्रं क्रूरं धनुः । क्व च निर्मलं निष्कलुषं शीलम् स्वभावः । घने घोरे समरे रणे कराला भयंकरी नाराचस्य हेला क्रीडा क्व । क्व च कुशकिसलयानां लीला यस्यां सा तथाभूता पर्णशाला ॥ विषमोऽत्रालङ्कारः । मालिनीवृत्तम् ॥ ३२ ॥

स्वपौरुषं वर्णयन्नाह—**क्षुण्णेति** । क्षुण्णा ये क्षत्त्राणां क्षत्त्रियाणां कठोरकण्ठाः तेभ्यो विगलन्ती या कीलालधारासरित् शोणितौघा नदी तस्यां निर्वृतः सम्पादितः अभिषवः अभिषेको यस्य स तस्य ॥ अथ च कृत्तानि छिन्नानि यानि शिरांसि तेषां केशान् कुशान् कुर्वतः ॥ एवंभूतस्य यस्य मम पितृगणः रक्तजलांजलीन् शोणिताञ्जलीन् गृह्णन् सन्तोषेण स्ववैरनिर्यातनजन्येन जुगुप्सया शोणितदर्शनजन्यया घृणया करुणया नृपमरणजन्यया त्रासेन बहुमतकदर्शनोत्थेन हासेन सन्तोषजन्येन विस्मितः ॥ स एवाहमिति पूर्वेण सम्बन्धः ॥ शार्दूलविक्रीडितं वृत्तम् ॥ ३३ ॥

स्वकृतं वर्णयित्वा कर्तव्यं वर्णयन्नाह—**कृत्वेति** । पूर्वं समिति समरे उर्वीपतीनां विशसनं हिंसनं त्रिःसप्तकृत्वः (कृत्वसुच्प्रत्ययः) एकविंशतिधा कृत्वा पुनरपि अद्य दुर्म्मदानां दर्पोद्धतानां नृपाणां सप्तकृत्वः कदनं कृत्वा प्रतिसमराहृतैः समरे निपातितैः क्ष्मापतीनां नृपाणां उत्तमांगैः शिरोभिः कापालीं नरकपालमयीम् अक्षमालां निर्म्माय रचयित्वा झटिति शीघ्रमेव भगवतो भैरवस्य अर्प्पयामि समर्पयिष्यामि । सामीप्यार्थे भविष्यति लट् ॥ भैरवस्येत्यत्र संप्रदानस्य शेषत्वेन विवक्षायां षष्ठी ॥ स्रग्धरा वृत्तम् ।

स्वक्रोधाङ्कुरं सूचयन् पुनर्भार्गवं प्रसादयन्नाह—**प्रसीदेति** । त्वं रोषात् क्रोधात् विरम शान्तो भव अथ च प्रसीद ॥ मे गिरं मम परां मदुक्तिं चेतसि कुरु विचारय ॥ चिरं बहुकालेन आयासैः यत्नैः बहुभिर्वारैः एकविंशतिवारैः यत् जितम् अर्ज्जितम् अभूत्

तदेवम्भूतं यशोवृत्तमेव कीर्तिप्रख्यातिरेव यद्वित्तं धनं तत् अस्मिन् वारे मया सह युद्धे कितव इव द्यूतकार इव विक्षोभेण मनश्चाञ्चल्येन तरलं चञ्चलं यथा स्यात्तथा मुधा व्यर्थं मा हारय हे भृगुतिलक ॥ मया सह युद्धे अवश्यं भावी ते पराजय इति हृदयम् । शिखरिणी वृत्तम् ॥ ३५ ॥

किं नामेति । वाचां यो डम्बरः उद्धतव्यवहारः तस्मिन् पण्डितेषु युष्मासु प्रचुरा बह्वीः वाणीः किं नाम किमर्थं प्रयुञ्जे । सर्वेपि यूयं संहताः एकीत्रभूताः सन्तः माद्बाणान् रिपुप्राणहरान् सहध्वम् । न मम वचनविन्यासेन किमपि प्रयोजनम् । अधुना युद्धमेव कृत्वा युष्मान् निपातयामीति भावः ॥ इन्द्रवज्रा वृत्तम् ॥ ३६ ॥

(७६) स्वोपरि सर्वदोषभारमारोपयन्नाह—**हरशरासनेत्यादि** । हरशरासनस्य आरोपणेन उपनीता प्राप्ता या जानकीकरकिशलयेन लीलया निहिता कमलमालिका तस्यां मिलत् यत् अलिपटलं भ्रमरसमूहः तस्य कोलाहलेन संगीतं यश एव परिमलः सुगंधो यस्मिन् एवम्भूतेन वक्षःस्थलेन ॥ नाऽन्यस्य अपराधः अतोऽहमेव सहिष्ये तव बाणान् इति भावः ॥

कौशिकमाक्षिपन्नाह—**ईशेति** । ईशेन शिवेन त्यक्तः अकार्यकरत्वात् प्रक्षिप्तो यः पुराणो जीर्णः चापः तस्य दलनेन खण्डनेन प्रोद्भूता उत्पन्ना या गर्वोद्धतिः तया व्यपः विक्षिप्तचित्त त्वम् असि ॥ अत एव मां प्रत्यभिमुखीभवसीति भावः ॥ परन्तु मे मम शरान् सोढुं न शक्तः सन् तव गुरुः विश्वामित्रोऽपि कतरः भीतः स्यात् । अतः तुष्टात् तपसा प्रसन्नात् इष्टवरप्रदात् भगवतः पद्मासनात् ब्रह्मणः सकाशात् सादरं यथा स्यात्तथा मम नाराचस्य भयादेव ब्राह्मीं ब्राह्मणसम्बन्धिनीं तनुं शरीरं याचितवान् । किलेति सम्भावनायाम् । यद्यहं क्षत्रियः स्यां तदा भार्गवेण हतः स्यामिति भीत एव ब्राह्मणत्वमयाचतेति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ३७ ॥

गुरुनिन्दामसहमानः क्रुद्धो रामो भार्गवोक्ते तथ्यतां शङ्कमानः प्रश्नरूपेण तमेव श्लोकं ईशेत्यादि पुनः पठति पदव्यत्यासेन युष्मत्पदस्थाने अस्मत्पदम् अस्मत्पदस्थाने च युष्मत्पदं प्रयुञ्जान इत्यर्थः॥३८॥

स्वपौरुषं प्रकटयन्नाह—**तत्कोदण्डमिति** । तत् कुलिशवत् कठिनं कोदण्डं मया यदि भग्नम् भग्नमेव, तेन किम् । ततश्च तव हृदि भुग्नं कुटिलं शल्यं दुःखशल्यमपि महत् प्रचुरं मग्नं कीलितम्, तेनापि किम् । मम नास्ति भीतिरित्यर्थः । त्रीणि अक्षीणि नेत्राणि यस्य स त्र्यक्षः तत्सम्बन्धि शैवमिति यावत्, यदि वा नारायणीयं वैष्णवं वा धनुर्भवतु ॥ उभयमपि मम दुर्मदो वीर्योद्धतो दोर्विलासः बाहुचेष्टितं किमपि न गणयति ॥ भग्नंभग्नमिति द्विरुक्तिः परशुरामामर्षजननाय ॥ द्वितीयपादे 'भुग्नम्' इत्येव पाठः सम्यक् । मन्दाक्रान्ता वृत्तम् ॥ ३९ ॥

Digitized by Google

(८०) चण्डधाम्ना इति । सूर्य्येण, प्रकाण्डवीर्य्यस्येति यावत् । खद्योत इवेति । अल्पज्योतिः स्वल्पवीर्य्य इति यावत् । भूयोऽपीति । क्रोधातिरेकेण पुनःपुनरुक्तिः । स्मारितोऽस्मीति । वक्ष्यमाण-वृत्तविशेषमिति शेषः ॥

तदेव वृत्तं पर्य्यायेणाह—कराघातादिति । विष्णोः कराघातात् तरला चञ्चला या वनमाला तस्याः परिमलाय भ्रमन्तो ये भ्रमराः तेषां ध्वानेन गुञ्जितेन द्विगुणितो विकाशः शब्दविकाशो यस्य स तथाभूतः । अथ च सुररिपूणां दैत्यानां विष्णुना हतानां यो वधूवर्गः तस्य रुदितध्वनिरेव ये स्वाध्याया वेदाः तेषां प्रणवः प्रारम्भोङ्कार इव ॥ यस्य ज्याघोषः शिञ्जिनीटाङ्कारः समजनि प्रादुरभूत् । तदिदं मत्करगतं कार्मुकम् वैष्णवं धनुरिति भावः । शिखरिणी वृत्तम् ॥ ४० ॥

करेति । रामोक्तिः प्रश्नरूपा । शार्ङ्गिणो विष्णोः करपङ्कजस्य करकमलस्य क्रोडे येन कार्मुकेण क्रीडितं तदेतत् किमित्यर्थः । जामदग्न्येनोत्तरितम्—अर्थकमिति । गृहाण कार्मुकमिति शेषः । विगृहाण मया सह विग्रहं समरं कुरु । वाष्पायमाणेति । वाष्पायमाणो मद्भयेन शोकाश्रुपूर्णनयनो यो भवद्बन्धुजनः तेन बन्धुरां संकीर्णां वसुन्धरां भूमिम् अतिक्रम्य परित्यज्य समरक्षमां युद्धयोग्यां समां भूमिम् अवतराव । रङ्गभूमौ साक्षाद्युद्धं नाट्याचार्य्येण प्रतिषिद्धमिति अतोऽन्यत्र गमनम् ।

रामचन्द्रकृतवैष्णवधनुरानमनं पर्य्यायेणाह—मा शाम्भवमिति । शाम्भवं शैवं धनुरिव दृढमपि वैष्णवं धनुः भङ्गप्रसङ्गं मा प्रयातु खण्डशो भग्नं मा भवतु इति एतन्मनसि कृत्वा मन्दं यथा स्यात्तथा चलन्तौ भुजौ यस्य स तेन आर्य्येण रामचन्द्रेण दृढमपि गरुडध्वजस्य विष्णोः कार्मुकं सहेलम् अनायासेन चक्रीकृतम् । आनमितम् इति अहो आश्चर्य्यमेतत् । वसन्ततिलकं वृत्तम् ॥ ४२ ॥

(८१) अमोघो मम बाणो निष्फलो मा भूदित्याशयेन भार्गवमतमनुरुन्धानेन रामचन्द्रेण कृतं स्वर्गद्वारनिरोधं पर्य्यायेणाह—नेपथ्ये कश्चित्खेचरगणः उद्भिन्न इति । चापचक्रात् कोदण्डमण्डलात् उद्भिन्नो निर्गतः अयं रामस्य बाणः । अमरपरिहृतं भयार्त्तैः त्यक्तं यद्व्योमरन्ध्रं तदवगाही । पुनः भार्गवस्य त्रिदशपुरगतिच्छेदकृत् तस्य स्वर्गद्वारनिरोधकः । पुनः सुरस्त्रीकरकमलात् गलत् यत् पुष्पसौरभ्यं तस्मिन् लुभ्यन्त्यो लोलुपाः याः भृङ्ग्यः भ्रमर्य्यः तासां याः सङ्गीतभङ्ग्यः हुङ्कृतिरवाः ताभिः परिचलितं प्रख्यापितं यशो यस्य स तथाभूतः । एवम्भूतो बाणः हंसीभूतः सन् हंस इव आचरन् स्वर्गपर्यङ्कम् एति गच्छति । स्वर्गपर्यन्तं तस्य कीर्त्तिरिति भावः । स्रग्धरा वृत्तम् ॥ ४३ ॥

विजितो जामदग्न्य आह—त्रिलोकीति । अनेन रामेण उदयता त्रिलोकी समस्तं लोकत्रयं कोकीव चक्रवाकीव मुदं हर्षं लभते ।

Digitized by Google

पुनः मुनिजनमन एव यत् पङ्कजवनं तत् विकाशं प्रफुल्लताम् आधत्ते। अये कुवलयदलश्यामलतनुरयं बालः कः । जगद्योनिः जगन्मूलभूतं यज्ज्योतिः ब्रह्मज्योतिः रघुवंशमूलसूर्य्यज्योतिर्वा परिणतरूपताम् आप्तम् । इदं कथं ब्रह्मज्योतिरेव किं बालकरूपेण परिणतम् इत्याशयः । शिखरिणी वृत्तम् ।। ४४ ।।

विष्णवंशत्वं रामस्य शङ्कमान आह—आपूरणायेति । पुरवैरिशरासनस्य शिवधनुषः आपूरणाय यो विष्णुः पूर्वं त्रिपुरदहनकाले लीलया बाणात्मना परिणतः स एव पुराणः सनातनः पुरुषः विष्णुः तस्यैव शैवधनुषः आरोपणाय बालात्मना रामरूपेण परिणत इति शङ्के । यः आपूरणाय अभूत् सोऽयमारोपणाय जातः यश्च बाणात्मना परिणतः सोऽयं बालात्मना परिणत इति भावः । वसन्ततिलकं वृत्तम् ।। ४५ ।।

सलज्जमिति । विजेतुर्लज्जाऽतिशयः शोभाकरी ।।

कमलेति । कमलबन्धुः कमलवत्सुन्दरं विलोचनं यस्य स तत्सम्बुद्धौ हे कमलकमनीयलोचनेत्यर्थः । अथवा कमलबन्धू कमलसुहृदौ सूर्य्याचन्द्रमसौ विलोचने नेत्रे यस्य स तत्सम्बुद्धौ हे रविचन्द्रनेत्रशालिन् विष्णो । त्वया स्वमहिम्नः उद्गमनैः प्रकटनैः अधरीकृतौ निराकृतौ यो नरः सोऽहं त्रिदशकोटीनां देवसहस्राणां किरीटमणीन् किं न अधरीकुरुते तिरस्करोति । अपि तु तिरस्करोत्येवेत्यर्थः । पुराणपुरुषेण पराजितोपि जनः सकलदेवगणान् तिरस्करोत्येवेत्यर्थः ।। ४६ ।।

(८२) दुर्विनयेति । दुर्विनयो भवत्तिरस्कारकारणभूत एव पङ्कस्तेन मलिनीकृतम् आत्मानं भवच्चरणनखकिरणानां या तरङ्गिणी नदी तस्याः जलेन क्षालयामि अपसारयामि । भवच्चरणयोः प्रणमामीति भावः ।।

भार्गवं स्तुवन्नाह—चण्डमिति । तिग्मरोचिषः सूर्य्यस्य महः कान्तिः चण्डमेव सर्वदा सर्वत्रोष्णमेव । शीतरोचिषः चन्द्रस्य महः सौम्यमेव नितान्तं रमणीयमेव । किन्तु तावकं त्वदीयं महत् विशालं महः चण्डं च सौम्यं च वीर्य्याद्भुतं शान्तं चेति अतः कौतुकावहं तन्नौमि प्रणमामि । व्यतिरेकोलङ्कारः । स्वागता वृत्तम् ।। ४७ ।।

पुनरुक्तिरिति । सकलकल्याणभाजनस्य तव किमपरमवशिष्टं यदाशास्महे । सर्वमाशंसनं त्वद्वृत्तिकल्याणानुवादमात्रत्वात् पुनरुक्तिरेवेति भावः ।।

आशिषं प्रयुञ्जान आह—यशःपूरमिति । यशःपूरं कीर्तिव्रातं दूरं तनु विस्तीर्णं कुरु । विस्तारार्थकतनुधातोर्लोटि रूपम् । सुतनुनेत्रोत्पलवन्या ललनागणनयनकमलवनस्य या तमस्तन्द्रा अयशन्यो-

Digitized by Google

न्धकारः तस्य चण्डातप तचिस्सारकस्त्वं शरदां सहस्राणि सहस्रवर्षपर्य्यन्तं तप उज्ज्वलो भव । इयं त्रिजगती जगत्त्रयं युष्मच्छरेण शमिता यो लङ्केश्वरः तस्य शिरोभिः श्रितः आश्रितः उत्सङ्गो भूतलरूपो यस्याः सा एवम्भूता । अथ च नन्दन्तः असाधारणरिपुवधात् हर्षिताः सुराः नराः भुजङ्गाश्च स्वर्भूपातालवासिनो यस्यां सा । एवम्भूता आस्ताम् । इति सम्बन्धः । शिखरिणी वृत्तम् ॥ ४८ ॥

इति श्रौतस्मार्ताचारपरायणमैथिलश्रोत्रियकुलावतंसोपाध्यायोपनामकश्रीतीर्थनाथशर्मतनूजगङ्गानाथविरचितायां प्रसन्नराघवटीकायां भावबोधिन्यां चतुर्थोऽङ्कः समाप्तः

॥ ४ ॥

अथ

प्रसन्नराघवनाटकटीकायाम्

भावबोधिन्याम्

पञ्चमोऽङ्कः ।

(८३) दुर्मनायस इति । खिन्नमना भवामीत्यर्थः ।

उपपन्नमिति । अनयोः सम्बन्धो युज्यत इत्यर्थः । उभयोरपि कालिन्दीसुग्रीवयोः सूर्यतनयत्वात् ।

दुष्टवलीमुखेनेति । दुष्टवानरेणेत्यर्थः ।

कतिपयेति । कतिपये स्वल्पसंख्यकाः परिवाराः अनुचराः यस्य सः ।

वैरकारणमनुसन्धत्ते-एकेति । एकस्य आमिषस्य भोज्यवस्तुनः अभिलाष आकाङ्क्षा । वैरमेव यो महातरुर्वृक्षः तस्य बीजं कारणम् । वालिसुग्रीवयोः अस्त्येव एकराज्यरूपामिषाभिलाष इत्यर्थः ।

(८४) गृहीततपस्याविति । तपस्विवेषधरत्वाद्रामलक्ष्मणाविति भावः ।

अज्ञातरामनिर्वासनवृत्तान्तायाः गङ्गायाः उक्तिः—तदित्यादि । एवमेवमिति । रामचन्द्रवननिर्वासनवृत्तान्तजातम् ।

रामवनवासवृत्तेऽविश्वासं कुर्वन्त्याह—आवर्तेति । आवर्तपर्याकुलत्वं सुप्रसिद्धमेव कालिन्द्याः । आवर्तभ्रतैः भ्रमितं हृदयम् (अन्तर्जलम्) यस्याः सा तथाभूता । किमप्यलीकमतथ्यम् अनुभूतवती । चञ्चलहृदयत्वादित्यर्थः । संविधानेति । संविधानस्य रचनायाः वैदग्ध्यं चातुर्यम् ।

(८५) निरूपयाव इति । सकलवृत्तान्तजातमिति शेषः ।

अवितथेति । अवितथं सत्यं मङ्गलं कल्याणं यस्याः सा तथाभूता भवेत्यर्थः ।

प्रतीपमिति । विपरीतम् । 'वामौ वल्गुप्रतीपौ' इत्यमरः ।

लज्जेति । लज्जैव यो पङ्कः तस्मिं निमज्जनमित्यर्थः ।

स्वलज्जासन्तापकारणीभूतं वृत्तान्तं सूचयन्त्याह—बहुलगलितैरिति । बहुलमधिकतरं यथा स्यात्तथा गलितैः निसृतैः सन्तापेन

Digitized by Google

शोकेनोष्णैः । पुनः तटान्ते विलुठितुं प्रसर्तुं शीलं येषां तानि तैः । दशरथपुरीपौरस्त्रीणाम् अयोध्यापुरनारीणां विलोचनवारिभिः अश्रुप्रवाहैः उपचयवतीं जलवृद्ध्या वृद्धिं गताम् ॥ अथ च स्वसन्तापेन शोकेन उष्णां निजां तनूं दधती अहं लज्जां वहामि । स्वसन्तापात् पौरस्त्रीसन्तापमधिकं ज्ञात्वा यतस्तासां नयनजलैः मत्तः उष्णतरत्वम् । लज्जां वहामि च स्वशोकेनापि संतप्ता सती । अथवा अहो मे स्वल्पता यत्पौरस्त्रीनयनवारिभिरपि मे उपचयः इति लज्जाकारणम् । अहो मे भाग्यं यदेवंविधनरेन्द्रपरिपालितां पुरीमनुवहामि इति लज्जात्यागकारणम् । यद्वा स्वभावेन शीतलाहं शीतत्वाल्लज्जायाः शैत्येन लज्जां वहामि पुनः उष्णाश्रुभिः लज्जाशैत्यं त्यजामि चेत्यर्थः । हरिणी वृत्तम् ॥ १ ॥

एवमेवमिति । दशरथमरणवृत्तान्तम् । अशुभवृत्तान्तस्य स्पष्टेन कथनं प्रतिषिद्धं नाट्याचार्यैः । अतः सकलमशुभजातं संवृतमेव वर्ण्यते । इन्दुमती अजपत्नी दशरथमाता । आखण्डलस्येन्द्रस्य ।

निजतनयेति । निजतनयात् निर्विशेषा समाना या प्रीतिः तया परिपालितः सकललोको येन सः । **अस्यैवेति** । रामभद्रैकजीवितस्यास्येत्यर्थः । विलक्षितं कार्यम् । एतत् दशरथस्य मरणम् । यतो रामभद्र एव तस्यैकं जीवितमत एव तस्य वनगमनेन दशरथस्य मरणमिति भावः । **एतैरिति** । भवत्योक्तैरेवेत्यर्थः । यत एवंविधगुणशाल्ययमत एव सर्वथाऽत्र चामुत्र च तस्य सर्वं शुभमेवेति भावः ।

(८६) **रामभद्रेति** । रामभद्रस्य छत्रस्य राज्यप्रतिपालनस्य छायया सुखेन । दशरथमरणशोकं रामचन्द्रराज्यप्रतिपालनेनापनोदयाम इति भावः ।

रामचन्द्रनिर्वासनं सूचयन्त्याह—**न खल्विति** । अप्रोक्षितः अनिस्सारितः सलिलसेको जलागमो यस्य सः । इति रामचन्द्रे प्रजापालक-तापनोदनकारणे नास्माकं तादृशस्सन्तापो भवेदित्यर्थः ।

दावानलेति । दशरथमरणमवलक्ष्यापामिति भावः । कुठारं रामविषयकानिष्टवृत्तरूपम् ।

न ज्ञातुमिति । स्वजनः स्वजने स्वकुटुम्बे जातं विपत्पातं विपदागमनं न ज्ञातुं अनुशोचयितुं नापि अनुज्ञातुम् अनुमन्तुं नापि ईक्षितुं द्रष्टुं नापि उपेक्षितुं तिरस्कर्तुं समीहते वाञ्छति ॥ अस्मिन् विषये सकलेतिकर्तव्यताविमूढा वयमित्याशयः ॥ २ ॥

इदमेवेति । नरेन्द्राणां नृपाणाम् । न अर्गला निरोधो यत्र तथाभूतं स्वर्गद्वारं स्वर्गसाधनम् । इदमेव यत् आत्मनः प्रतिज्ञा प्रजावत् परिपाल्यते । प्रतिज्ञापालनं प्रजापालनं च एतावदेव स्वर्गसाधनं नृपाणामित्याशयः ॥ ३ ॥

Digitized by Google

अकल्याणेति । अकल्याणस्य अनिष्टस्य सूची प्रथमोऽभेद इत्यर्थः । **चरममिति** । अन्तिमफलमित्यर्थः ।

कैकेय्युक्तिमाह—**त्वयेति** । त्वया पूर्वं देवासुरसंग्रामसमये यद्-द्वयं देयं वरम् अभिहितं प्रतिज्ञातं तत् इदं वरद्वयं अधुना देहि । प्रथमं तावत् कौशल्येयः कौशल्यापुत्रो रामचन्द्रो वने विशतु गच्छतु द्वितीयं च भरतो युवराजोऽस्तु इति ।

(८७) इदं कैकेय्याः वचनं अधिगम्य ज्ञात्वा आकुना दुःखिता मतिर्यस्य स तस्य विकलमनसः पितुर्दशरथस्य पादौ चरणौ नत्वा नमस्कृत्य मुदितहृदयः पितुः प्रतिज्ञापालनेन हृष्टचित्तः असौ रामः वनम् अभ्यगात् गतवान् । शिखरिणी वृत्तम् ॥ ४ ॥

मृगेति । एतान् वर्जयित्वा । यत् एते सर्वे अवलोकयन्त्येव रामचन्द्रमुखमिति भावः ।

प्रोषितवतीति । रजनिकरे चन्द्रे प्रोषितवति अस्तं गते सति बन्धुतया सुहृद्भावतया कैरवाण्येव केवलं न म्लायन्ति म्लानिं गच्छन्ति । किं तु भुवनान्येव समस्तजगतीतलमेव सहसा हठात् तमसि अन्धकारे मज्जन्ति । कैरवेण सह साम्यमत्र रघुकुलकुटुम्बस्य । आर्याप्रभेदः ॥ ५ ॥

अतो जानसीति । यथा चन्द्रिकाप्रसादौ न कदापि चन्द्रमसः सकाशं परिहरतः तथा जानकीलक्ष्मणावपि सततं रामपार्श्ववर्तिनौ तेनैव सह वनं गताविति भावः । **अम्बा इति** । मे अम्बाः मातृः शुश्रूषमाणा सेवमाना त्वं कतिचित् चतुर्दश शरदः वत्सरान् नय गमय । **स्वजनेति** । स्वजनकरैः स्वसखीगणहस्तैः उपनीतः यः शीतशीकरस्य शीतलजलस्य आसारः सेकः तेन सिक्तापि न बुद्धा संज्ञां नैव लब्धवतीत्यर्थः ।

(८८) **वनजेति** । वने जले जातं कमलं तद्वदक्षिणी यस्याः सा तत्सम्बुद्धौ सह एव मया सार्द्धमेव वनं समागच्छ वा इति पूर्वार्द्धेन सम्बन्धः । रामवचनामृतेन प्रबुद्धेति यमुनोक्तेन सम्बन्धः । **गमयेति** । हे वत्सलक्ष्मण विलोचने निमील्य सकलजनकृतदोषानगणयित्वा । अत एव निमेषसमाः अत्यल्पसमय इव कतिचित् चतुर्दश समाः वर्षाणि गमय । अथ च शीलेन सौहार्देन सुशीतलं सुखकरं पुनः शुभे कल्याणे धर्मे रतं तत्परं भरतं मामिव परिशीलय आनीहि सेवस्वेति । यावत् । शुभरतं भरतमित्यनुप्रासः । द्रुतविलम्बितं वृत्तम् ।

लक्ष्मणप्रतिवचनमाह **त्वयेति द्वयेन** । त्वया सह मे चत्वारि युगान्यपि यामाः चतुरः प्रहरा एव सुखमयत्वात् । त्वया विना पुनः चतुर्दशसमाः अपि चतुर्दशमन्वन्तराण्येव दुःखबहुलत्वात् । अपि च

त्वयेति । त्वया समेतस्य मम कल्पा अपि समासमाः समया वर्षेण समाः तुल्याः । भवता विप्रयुक्तस्य पुनर्मे क्षणोपि कल्पकल्पः कल्पतुल्यप्राय एव । ईषदूनार्थे कल्पप्रत्ययः ॥ ६ ॥

सीतामित्यर्द्धोक्त इति रक्षेति हृदयगतम् । सीतारक्षणाय लक्ष्मण एव समर्थः त्वं तावत् लक्ष्मणमेव रक्षेत्याह—इहेति । हे वत्स रामभद्र इह अस्मिन् मुग्धमुखे अपरिणतवयःशीले कमनीयवदने च लक्ष्मणे दक्षिणः कल्याणदृष्टिः भव यस्य लक्ष्मणस्य राज्योपभोगेभ्योपि त्वं सहजप्रियः । सकलराज्योपभोगं विहाय यः केवलं तव प्रीत्या त्वया सह वनवासदुःखान्यनुभवितुं गच्छति । तस्यैवंविधभक्तिशालिनो लक्ष्मणस्य सर्वथा रक्षा कर्त्तव्या त्वयेति भावः । निजेति । प्राणप्रिय इत्यर्थः । सर्वे जनाः स्वप्राणरक्षापरा भवन्ति लक्ष्मणश्च मम प्राणप्रियः । अतोऽस्य रक्षार्थं नाहं शिक्षणीय इति भावः । सहजेति । कृततपस्विवेषस्यापसारितनिखिलाभूषणस्येति भावः ।

हस्तावलम्बेति । हे राम सीतायाः याः मांगल्यसम्पदः सौभाग्यकल्याणश्रियः तासां हस्तावलम्बदानाय आश्रयणार्थं इदम् अंगुलीयकं मा विमुञ्च त्यज । एतन्मात्रमाभूषणं धारय । अनेन सीतायाः कल्याणं भवितेति । अनेनाग्राम्यङ्गुलीयकद्वारा सीतोपलब्ध्यादिकं सूचितम् ॥ १० ॥

निकाममिति । निकाममतिशयं प्रमुदितमुखाम्भोरुहरुचेः तातात्ज्ञापालनजन्यानन्दप्रफुल्लमुखपङ्कजस्य रामस्य जटा एव या वल्लीः लताः ताः मल्लीमुकुलसदृशैः शुक्लपुष्पविशेषकलिकासदृशैः वाष्पपृषतैः अश्रुवर्षैः निषिञ्चन् सन् सौमित्रिः कथमपि यदा वितेने सम्पादितवान् तदा एतज्जगदपि समस्तं करुणामयं जातम् । शिखरिणी वृत्तम् । विपरीतमिति । सीतयैव शिक्षिताः पुरकुलस्त्रियः सतीचरितमित्याशयः ॥ १२ ॥

(९०) गहनेति । गहनविपिने निविडकानने यो वासः तस्मिन्नुत्कण्ठया सम्प्रयातं गच्छन्तं प्रियतमं रामं तत्क्षणमेव अनुयान्त्या राजपुत्र्या सीतया चरणकमलयोः गुञ्जन्ति शब्दायमानानि यानि मञ्जुमंजीराणि तेषां शब्दैः बान्धवाः साधु वृत्तं सतीचरितं संकटेष्वपि पत्यनुसरणादिकं स्फुटतरं स्पष्टं यथा स्यात्तथा उपदिष्टाः शिक्षिताः । न पुनः सीता तैः शिक्षितेति । अनेन सीता सहर्षं गतवतीत्यपि सूचितम् । मञ्जीरशब्दा एवोपदेशवचनानीत्युत्प्रेक्षा । मालिनीवृत्तम् ॥ १३ ॥

पुरः कान्तमिति । पुरः अग्रे विपिनं यान्तं गच्छन्तं कान्तं रामं सरभसं शीघ्रं यथा स्यात्तथा अनुयान्त्याः अनुगच्छन्त्याः सीतायाः किसलयनिभौ पल्लवसदृशौ तौ प्रख्यातसौकुमार्यौ चरणौ वीक्ष्य दृष्ट्वा बन्धुजननयनैः मुहुः शीताः जानकीप्रियतमानुसरणोरूपसती-

एवं शक्तिरप्यतिरिच्यते। तृणारणिमण्यादिस्थले जातित्रयकल्पनामपेक्ष्य तत्तत्सम्बन्धानामेकशक्तिमत्त्वेन कारणत्वकल्पनाया एव लघु-

अतिरिक्तस्वत्ववादिनामपि तथाविधव्यवहारोपपत्तये अतिरिक्तस्वत्वत्वाङ्गीकारस्यावश्यकतया मन्मतेप्यतिरिक्ततन्मात्राभ्युपगमेनानुगतव्यवहारसम्भवाच्च। अतिरिक्तस्वत्ववादिमते स्वत्वत्वं नातिरिच्यते इति तु नाशङ्कनीयम् अधिकरणभेदेन स्वत्वभेदाङ्गीकारस्यावश्यकत्वात्। अन्यथा एकद्रव्यविक्रयादिना सर्वत्र स्वत्वनाशप्रसङ्गादिति वदन्ति। तद्धेयम् प्रागभावे मानाभावेन तथा वक्तुमशक्यत्वात्॥

वह्नित्वावच्छिन्नं प्रति तृणारणिमण्यादीनां न तृणत्वादिना हेतुत्वं व्यभिचारात्(१) किंतु तत्सम्बन्धेनैकामतिरिक्तशक्तिमभ्युपेत्य एकशक्तिमत्त्वेनैव तत्र तेषां सम्बन्धानां हेतुत्वमिति मीमांसकमतमवलम्ब्याह। **एवमिति। शक्तिरपीति।** वह्निजनकतावच्छेदकत्वेन तृणादिसम्बन्धेष्वतिरिक्तशक्तिरभ्युपेयते इत्यर्थः। ननु तृणादिजन्यतावच्छेदकत्वेन वह्निनिष्ठजातित्रयं स्वीकृत्य तथाविधजातित्रयावच्छिन्नं प्रति तृणादीनां तृणत्वादिना हेतुतात्रयकल्पनेनैवोपपत्तौ किमतिरिक्तशक्तिकल्पनेनेत्याशङ्कां निरसितुमाह। **तृणादिस्थल इत्यादि।** तथा च तादृशजातित्रयमभ्युपेत्य कार्यकारणभावत्रयाभ्युपगमे गौरवात् तदपेक्षयैकामतिरिक्तामभ्युपेत्यैकशक्तिमत्त्वेन तत्रैककार्य-

(१) गौरवात्-पा॰ ३ पु॰।

त्वेन न्याय्यत्वात्। सम्बन्धत्रितयनिष्ठैकजात्यङ्गी-
कारे च नोदनत्वादिना जातिसङ्करप्रसङ्गः। यदि
चान्वयव्यतिरेकाभ्यां तृणादेरपि कारणत्वमि-
ष्यते तदा तेषामप्येकशक्तिमत्त्वेन तदस्तु तथापि
जातित्रयकल्पनामपेक्ष्य शक्तिद्वयकल्पनैव लाघ-
वेन ज्यायसीति। तेष्वपि चैकजात्यङ्गीकारे
मणित्वादिना सङ्करप्रसङ्गः॥

कारणभावकल्पने लाघवस्यातिस्फुटत्वादिति भावः। ननु
यादृशसम्बन्धत्रयेष्वेकां शक्तिं कल्पयित्वा तत्र तादृश-
जातिमत्त्वेनैकहेतुताकल्पनोपपत्तौ लाघवाभावादतिरि-
क्तशक्तिकल्पनमनर्थकमित्यत आह। सम्बन्धत्रितये-
त्यादि। जातिसङ्करप्रसङ्ग इति। नोदनत्वाभाव-
वति तादृशी जातिरभिघाताख्यतादृशसंयोगे तादृशवै-
जात्याभाववति रथादिनोदनाख्यसंयोगे नोदनत्वजातिः।
एकत्र तादृशनोदनाख्यसंयोगे च तादृशजातिद्वयसमावेश
इति साङ्कर्यमिति तेषु जात्यङ्गीकारोऽशक्य इति भावः।
यदि चेति। वस्तुतस्तथाविधान्वयव्यतिरेकानुविधाने
मानाभाव इति भावः। तेषामपीति। तृणादीनामपी-
त्यर्थः। मणित्वादिनेति। आदिना तेजस्त्वादिपरिग्रहः।
सङ्करस्तु स्पष्टतया नोपपादित इति। अत्रेदमवधेयम्। तृणा-
दिसम्बन्धानामेकशक्तिमत्त्वेन तत्र हेतुत्वे फूत्काराभावद-
शायां वह्नित्वावच्छिन्नापत्तिः। न च फूत्कारादीनामपि

पदजन्यधर्मिकोटिद्वयतदुभयविरोधि-

सहकारित्वकल्पनाज्ञानुपपत्तिरिति वाच्यम् । तथाप्यरणि-सम्बन्धसत्त्वे फूत्कारसत्त्वे मन्थनाद्यसत्त्वे वह्नित्वावच्छि-न्नोत्पत्त्यापत्तेः । तादृशजातित्रयमभ्युपेत्य प्रत्येकं तादृश-जातित्रयावच्छिन्नं प्रति प्रत्येकतृणादीनां तृणत्वादिना हेतुताश्रयकल्पने तु नैवानुपपत्तिः । तृणत्वावच्छिन्नेन फल-जनने एव फूत्कारस्य सहकारित्वाभ्युपगमात् । न च फूत्कारादिसम्बन्धानामप्येकशक्तिमत्त्वेनैव तत्र हेतुत्वे अ-रणिसम्बन्धकालीनफूत्कारादिसम्बन्धे तादृशशक्त्यनभ्युप-गमेन न तदवच्छिन्नस्य सहकारित्वाभ्युपगमे उपदर्शिता-पत्तिरिति वाच्यम् । तथा सति तृणादिसम्बन्धानामेकश-क्तिमत्त्वेन हेतुत्वे मानाभावः । तृणादिसम्बन्धाभावका-लीनफूत्कारादिसम्बन्धेन तादृशशक्त्यनभ्युपगमात् तेनैवा-पत्तिवारणसम्भवात् । यदि च विनिगमनाविरहेण तादृ-शोभयरूपेण हेतुत्वमिति विभाव्यते तदा तृणादिसम्ब-न्धकालीनवायुसंयोगादीनामप्येकशक्तिमत्त्वे नहेतुतामा-दाय विनिगमनाविरहो दुर्वार इति । तस्माज्जातित्रयम-भ्युपेत्य तथाविधकार्यकारणभावकल्पनमेव निराबाधस-रणिमादधातीति सारम् ॥

शब्दो नित्यो नवेत्यादिविप्रतिपत्तिवाक्येभ्यः शब्दा-दिधर्मिण उपस्थितिः नित्यत्वनित्यत्वाभावकोटिद्वयोप-स्थितिश्च तदनन्तरं विरोधभासकसामग्रीसहकृतेभ्यस्तदु-पनायकज्ञानेभ्यः शब्दो नित्यो न वेत्यादिमानससंशयः न तु तत्र शाब्दात्मकः संशयो जायते परोक्षज्ञानं निश्चय एवेति सिद्धान्तविरोधात् । एवं च संशयप्रयोजकं वाक्य-विप्रतिपत्तिरिति प्राञ्चः । तन्मतं दूषयति । पद-जन्येत्यादि । तथाविधविप्रतिपत्तिवाक्यस्यात् शब्दादि

पदाच्छब्दादिरूपधर्म्युपस्थितिस्तद्घटकीभूतनित्यादिपदनञ्पदाभ्यां नित्यत्वनित्यत्वाभावादिरूपकोटिद्वयोपस्थितिस्तद्घटकीभूतवाकाराद्विरोधोपस्थितिस्तदनन्तरं संशयात्मकयोग्यताज्ञानसहिताच्छब्दो नित्यो न वेत्यादिवाक्यात् प्रथमत एव शब्दो नित्यो न वेति शाब्दसंशय इति पदजन्येत्यारभ्य संशय इत्यन्तग्रन्थस्यार्थः। ननु संशये तदधिकरणावृत्तित्वरूपविरोधो न प्रकारस्तथासति तदभावव्याप्यवत्ताज्ञानरूपसंशयप्रतिबन्धकस्य कार्यकाले सत्त्वात् संशयस्य दुर्घटत्वापत्तेः किं तु संशये विरोधः संसर्गविधया भासते तस्य तु पूर्वमुपस्थितिर्नापेक्षितेति विरोधज्ञानस्य संशयहेतुत्वोत्कीर्तनमसङ्गतमेवेति चेन्न। तद्वत्ताबुद्धिं प्रति तदभावव्याप्यवत्ताज्ञानस्य प्रतिबन्धकत्वमेकं तदभावव्याप्तिप्रकारतानिरूपिततद्धर्मावच्छिन्नविशेष्यताशालिनिर्णयविशिष्टतद्धर्मावच्छिन्नकारताशालिनिर्णयत्वेन पुरुषत्वव्याप्यकरादिमांश्चायमिति ज्ञानद्वयादपि पुरुषत्वसन्देहनिवृत्तेः। अपरं च तदभावव्याप्त्यतिरिक्तनिष्ठप्रकारत्वानिरूपितप्रकारताशालिनिर्णयत्वेन पुरुषत्वव्याप्यवानयमिति ज्ञानादपि पुरुषत्वसन्देहनिवृत्तेः। एवं च संशये कोट्यंशे विरोधकोटितावच्छेदकयोरेकत्र द्वयमितिरीत्या भानोपगमात्। तस्योपदर्शितप्रतिबन्धकतावच्छेदकद्वयान्यतरानाक्रान्तत्वेनोक्तानुपपत्तेरभावादिति दिक्। तथा च परोक्षज्ञानं निश्चयात्मकमेवेति जीर्णसिद्धान्तो युक्त्यभावादश्रद्धेयः। अन्यथोभयकोटिविषयकशाब्दसामग्रीकाले संशयाकारशाब्दबोधवारणायैककोटिविषयक-

ज्ञानसंशयात्मकयोग्यताज्ञानसहितात् शब्दा-
दाहत्यैव संशयः। समानानेकेत्यादिसूत्रं प्रमाण-

शाब्दबुद्धिं प्रति अपरकोटिविषयकशाब्दसामग्र्याः प्रतिब-न्धकत्वकल्पने गौरवापत्तिरिति भावः । वस्तुगत्या तथा-विधसिद्धान्तोपि नास्तीत्येतदर्थं संशयात्मकशाब्दबोधे महर्षेः संवादमाह(१)। **समानानेकेत्यादि**। समानानेक-धर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातो विशे-षापेक्षो विमर्षः संशय इति सूत्रे संशयहेतुत्वेन विप्रतिप-त्तिवाक्यस्योल्लेखं कुर्वतो महर्षेरपि संशयात्मकं शाब्दज्ञान-मभिमतमिति समुदित(सूत्रे संशयहेतु) ग्रन्थार्थः(२)। सूत्रार्थस्तु समानोऽनेकेषां तत्कोटितदभावकोटिमतां यो धर्मस्तदुपपत्तेर्धर्मिणि तद्वत्ताज्ञानाद्विप्रतिपत्तेर्विरुद्धकोटि-द्वयप्रतिपादकाच्छब्दो नित्यो नवेत्यादिवाक्यादुपलब्धि-रनुपलब्धिश्च तत्कोटेः तथा च या तत्कोटेरुपलब्धिर्या च नञ्व्यत्यासेन तदभावकोटेरुपलब्धिस्तयोर्याऽव्यवस्था-ऽव्यवस्थापकोऽनिश्चायक इति यावत् तस्मात् सपक्षवि-पक्षव्यावृत्तधर्मवत्ताज्ञानरूपासाधारणधर्मवद्धर्मिज्ञानादि-त्यर्थः । विशिष्यते व्यावर्त्यते विशेषदर्शनविषयो यस्मात् स विशेषो विशेषादर्शनं तस्यापेक्ष इत्यर्थः। एतावता कार-णमुक्त्वा लक्षणमाह । **विमर्ष इति** । एकधर्मिकवि-रुद्धोभयप्रकारकज्ञानमित्यर्थः । भाष्यकारस्तु समानाने-कधर्मेत्यादौ समानः कोटिद्वयसहचरितधर्मः अनेकधर्मोऽ-साधारणधर्मः उपलब्ध्यनुपलब्ध्यव्यवस्था तत्कोटिज्ञा-नस्य तदभावकोटिज्ञानस्य वा सविषयकत्वानवधारणं प्रामाण्यसंशय इति यावत्। विशेषापेक्षार्थस्तु पूर्वोक्त एव।

(१) सम्मतिमाह—पा० २ पु० ।
(२) ( ) एतन्मध्यस्थो नास्ति २ पु० ।

Digitized by Google

यतो महर्षेरपि सम्मतमिदम् । एकधर्मिकनानाविरुद्धधर्मप्रकारकज्ञानत्वरूपं कोटिद्वयविरोधिज्ञानसामग्रीसमाजाधीनं च संशयत्वं नीलघटत्ववन्न कार्यतावच्छेदकम् । एवं संशयत्वशून्यज्ञानत्वरूपनिश्चयत्वमपि नीलत्वशून्य-

एतावता कारणमुखेन संशयविशेषलक्षणमुक्तं विमर्ष इत्यनेन एकधर्मिकविरुद्धोभयप्रकारकज्ञानत्वरूपं संशयसामान्यलक्षण मुक्तमित्याहुः । यथा नीलत्वावच्छिन्नसामग्रीघटत्वावच्छिन्नसामग्रीभ्यां तदुभयधर्मावच्छिन्ने जायमाने ऽर्थवशसम्पन्ना नीलघटत्वावच्छिन्नोत्पत्तिरतो नीलघटत्वं न कार्यतावच्छेदकं तथा एकधर्मिकविरुद्धतत्तदभावज्ञानसामग्री(१)भ्यां तद्धर्मिकविरुद्धतत्प्रकारकज्ञानत्वतद्धर्मिकविरुद्धतदभावप्रकारकज्ञानत्वोभयावच्छिन्ने जायमाने एकैकधर्मिकविरुद्धतत्तदभावोभयप्रकारकज्ञानत्वरूपसंशयत्वावच्छिन्नोत्पत्तिरपि अर्थवशसम्पन्ना भविष्यतीति तथाविधसंशयत्वमपि न कस्यचित्कार्यतावच्छेदकं मानाभावादित्याह एकधर्मिकेत्यादि । समानं मिलनम् । तथा च संशयत्वावच्छिन्नं प्रति धर्मिज्ञानादीनां हेतुत्वमभ्युपगच्छतां प्राचीनानां मतमनुपादेयमिति भावः । एवमिति । संशयत्ववदित्यर्थः । संशयत्वशून्यज्ञानत्वरूपेति । तद्धर्मिविशेष्यतानिरूपिततदभावप्रकारताशून्यत्वे सति तद्धर्मिविशेष्यतानिरूपिततत्प्रकारताशालिज्ञानत्व-

(१) विरुद्धोभयज्ञानसामग्री–पा॰ २ पु॰ ।

घटत्ववत्तथेति ॥

कारणत्वं च पदार्थान्तरम् । तच्च कार्यभेदा-

रूपमित्यर्थः । नीलत्वशून्यघटत्ववदिति । यथा नीलोत्पादकसामग्र्यभावदशायां घटोत्पादकसामग्रीबलात् घटत्वावच्छिन्ने जायमाने नीलत्वशून्यघटत्वावच्छिन्नस्योत्पत्तिरर्थसिद्धेति तन्न कार्यतावच्छेदकं प्रमाणाभावात् । तथा तदभावप्रकारकज्ञानोत्पादकसामग्र्यभावदशायां तत्प्रकारकज्ञानत्वावच्छिन्ने जायमाने तथाविधनिश्चयत्वावच्छिन्नोत्पत्तेरप्यर्थतो निर्वाहे तथाविधनिश्चयत्वमपि न कार्यतावच्छेदकं प्रमाणाभावादिति भावः । नन्वेवं सति स्वसामानाधिकरण्यकालिकविशेषणतोभयसम्बन्धावच्छिन्नदुरितनिष्ठप्रतियोगितावच्छेदकताकभेदवद्दुरितध्वंसत्वमपि तत्त्वज्ञानकार्यतावच्छेदकं मास्तु आर्थसमाजग्रस्तत्वादिति चेन्न । आर्थसमाजग्रस्तधर्मस्य कार्यतानवच्छेदकत्वे प्रमाणाभाव एव बीजम् । प्रकृते तु तथाविधकार्यकारणभावग्राहकतमेवेत्यादिवेदराशेर्जागरूकतया तथा वक्तुमशक्यत्वादिति ॥

ननु कारणत्वं नानन्यथासिद्धत्वे सति कार्यनियतत्वपूर्वकालवृत्तित्वम् एतद्धटत्वावच्छिन्नं प्रति देशान्तरीयरासभादेरपि हेतुत्वापत्तेः(१) । नापि कार्याव्यवहितपूर्वक्षणावच्छिन्नकार्याधिकरणवृत्तित्वविशिष्टस्याभावस्य प्रतियोगितानवच्छेदकीभूतो यो धर्मस्तद्वत्त्वं कारणत्वं विषयतासम्बन्धेनेच्छां प्रति विषयतासम्बन्धेन ज्ञानस्य हेतुत्वानुपपत्तेः । अवच्छेद्याधिकरणासम्बद्धक्षणस्याव-

(१) कारणत्वापत्तेः–पा० २ पु० ।

Digitized by Google

च्छेदकत्वाभावेन इच्छाव्यवहितपूर्वक्षणावच्छिन्नस्य विषयतासम्बन्धेनेच्छाधिकरणीभूतो योऽनागतपाकस्तद्वृत्तित्वस्याभावेऽप्रसिद्ध्या तथाविधकारणत्वस्य तत्रासम्भवात्। अथ कार्याव्यवहितपूर्वक्षणावच्छिन्नकार्यसमानाधिकरणवृत्तित्वविशिष्टस्य सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य प्रतियोगितानवच्छेदकीभूतो योऽन्यथासिद्ध्यनिरूपकीभूतो धर्मस्तद्वत्त्वम्। अन्यथासिद्ध्यनिरूपकत्वं च यद्धर्मावच्छिन्नं प्रति तद्धर्मावच्छिन्नव्यापकतावच्छेदकीभूतयद्धर्मावच्छिन्ने (व्यापकतावच्छेदकीभूतयद्धर्मावच्छिन्नेन) प्रामाणिकानां कारणत्वव्यवहारस्तत्तद्व्यक्तिभेदकूटवत्त्वं न तु प्रसिद्धान्यथासिद्धिपञ्चकानिरूपकत्वं तत् तथा सति उत्तरसंयोगं प्रति विभागस्य हेतुत्वापत्तेः। अन्यथासिद्धिपञ्चकं तु यथा। अन्यं प्रति पूर्ववर्तित्वे ज्ञाते एव यस्य यं प्रति पूर्ववर्तिताग्रहस्तस्य तं प्रति अन्यथासिद्धत्वम् यथा ज्ञानं प्रति शब्दसमवायिकारणत्वेन आकाश अन्यथा सिद्धः। एवं कारणान्तरेण सह यस्य यं प्रति पूर्ववर्तिताग्रहस्तस्य तं प्रति अन्यथासिद्धत्वम्। यथा घटं प्रति दण्डविशिष्टचक्रमन्यथासिद्धम्। एवमन्यत्र क्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तत्कार्यं प्रति तत्कारणसहभूतमन्यथासिद्धम्। यथा पाकजरूपं प्रति गन्धप्रागभावः अन्यथासिद्धः एवमगुरुव्याप्यधर्मेण यस्य यं प्रति कारणत्वं सम्भवति तस्य तं प्रति गुरुव्यापकधर्मेण अन्यथासिद्धत्वम् यथा घटं प्रति द्रव्यत्वेन दण्डो ऽन्यथासिद्धः। एवं यद्धर्मावच्छिन्नजनकतावच्छेदकीभूतो यो धर्मः सोपि तत्रान्यथासिद्धः। यथा घटत्वावच्छिन्नं प्रति दण्डत्वमन्यथासिद्धमिति। विभागत्वावच्छिन्ने निरुक्तान्यथासिद्धिमध्ये कस्याप्यसत्त्वात्। एवं प्रतिबन्धकाभावस्य तत्तद्व्यक्तित्वेन हेतुत्वापत्तेश्च। तत्तद्व्यक्तित्वविशि-

Digitized by Google

दवच्छेदकभेदाच्च भिद्यते कारणत्वत्वेनाखण्डो-

षृ प्रसिद्धान्यथासिद्धिपञ्चकाभावात् । अत एव कारणे ऽन्यथासिद्धभिन्नत्वविशेषणं त्यक्त्वा निरुक्तधर्मे तदनिरूपकत्वविशेषणदानम् । अन्यथा प्रतिबन्धकाभावस्यापि प्रतिबन्धकतावच्छेदकीभूतधर्मावच्छिन्नाभावत्वेन हेतुत्वस्य सर्वसंमतस्याभावापत्तेरिति चेन्न तावद्भेदकूटविशिष्टज्ञानस्यावश्यकतया ईदृशकारणत्वस्यासर्वज्ञापरिच्छेद्यत्वापत्तेः । न च स्वाऽव्यवहितपूर्वक्षणावच्छिन्नस्वाधिकरणवृत्तित्वविशिष्टाभावप्रतियोगितानवच्छेदकत्वविशिष्टतराद्व्यक्तिभेदकूटवत्त्वसम्बन्धेन कार्यविशिष्टो यो धर्मस्तद्वत्त्वं कारणत्वं तत्र च नोक्तदोषः सम्बन्धस्य ज्ञातस्यैव विशिष्टबुद्धिविषयत्वादिति वाच्यम् । तस्य सम्बन्धत्वसन्देहेन तथा वक्तुमशक्यत्वादित्यत आह । **कारणत्वं चेति** । **पदार्थान्तरमिति** । तथाविधनियतपूर्ववर्तित्वाद्यतिरिक्तमित्यर्थः । तस्य सर्वत्रैकत्वे दण्डनिष्ठकारणता न पटनिरूपिता दण्डत्वावच्छिन्नकारणता न चक्रत्वावच्छिन्नेत्याद्याकारकप्रतीत्यनुपपत्तिरित्यत आह । **तच्चेति** । कारणत्वं चेत्यर्थः । **अवच्छेदकभेदादिति**। कारणतावच्छेदकभेदादित्यर्थः। नन्वेवं सति कारणं कारणमित्याकारकानुगतप्रतीत्यनुपपत्तिरेवमनुगतकारणपदशक्यतावच्छेदकानुपपत्तिश्चेत्यत आह। **कारणत्वत्वेनेति**। तत्तत्कारणत्वम् । तथा च कारणत्वत्वरूपानुगतधर्ममादाय तथाविधानुगतप्रातीत्याद्युपपत्तिरिति भावः । अत्रेदं तत्त्वम्। कारणत्वं नातिरिक्तं किन्तुकारणतावच्छेदकस्वरूपम् । न चैवं सत्यभेदेऽवच्छेद्यावच्छेदकभावानुपपत्तिरिति वा-

Digitized by Google

पाधिनानुगतं च तत्तत्कारणपदशक्यतावच्छेदकम् । ग्राहकं च तस्य क्वचिदन्वयव्यतिरेकदर्शनसहकृतं प्रत्यक्षम् क्वचिदनुमानं क्वचिदागमादिकम् ॥

एतेन कार्यत्वं व्याख्यातम् ॥

कारणत्वप्रतियोगिकत्वमेव कार्यत्वमिति चेत् । कार्यत्वप्रतियोगित्वमेव कारणत्वमिति किं न रोचये । तस्मात् कार्यत्वं कारणत्वं चोभयमेवातिरिक्तं भिन्नं चेति कृतं पल्लवितेनेति ॥

च्यम् । एकरूपेण तदनभ्युपगमात् । अत्र तु कारणतात्वेनावच्छेद्यायाः कारणताया अवच्छेदकत्वस्य स्वरूपतो दण्डत्वेऽभ्युपगमे क्षतिविरहादतिरिक्तकारणत्वस्य सर्वैरङ्गीकारादिति । तस्येति । कारणत्वस्येत्यर्थः । आगमादिकमिति । वेदादिकमित्यर्थः ॥

एतेनेति । कृप्तान्तर्भावेनानिर्वाहेणेत्यर्थः(१) । व्याख्यातम् । अतिरिक्तत्वेन व्याख्यातम् ॥

शङ्कते । कारणत्वेत्यादि । किं न रोचय इति । तस्मादिति । विनिगमनाविरहादित्यर्थः । भिन्नमिति । परस्परं भिन्नमित्यर्थः ॥

(१) कृप्तान्तर्भावानिर्वाहेणेत्यर्थः–पा० २ पु० ।

संख्या च पदार्थान्तरं न तु गुणः गुणादिष्वपि तद्वत्त्वप्रत्ययात्(१)। न चासौ भ्रमः बाधकाभावात् । एकार्थसमवायप्रत्यासत्त्या तथाप्रत्यय इति चेत् । न विलक्षणाभ्यां समवायैकार्थसमवायाभ्यामविलक्षणायास्तद्वत्ताप्रतीतेरयोगात् । घटत्वादौ चैकार्थसमवायादेकत्वप्रत्ययवत् द्वित्वाद्येकार्थसमवायाद्द्वित्वादिप्रत्ययप्रसङ्गः रूपत्वादौ च न तत्सम्भवः ॥

तद्वत्त्वप्रत्ययात् । एकं रूपं द्वे रूपे इत्याकारकसंख्यावत्त्वप्रत्ययात् । तथा च संख्याया गुणत्वे रूपादिगुणे तथाप्रत्ययानुपपत्तेः । गुणे गुणानङ्गीकारादिति भावः । असाविति । रूपादौ संख्यावत्त्वप्रत्यय इत्यर्थः। बाधकाभावादिति । तथा च बाधकाभावे ऽपि भ्रमत्वाङ्गीकारे प्रतीतिबलात् पदार्थमात्रसिद्धिविलोपप्रसङ्गः। सर्वत्र प्रतीतेस्तथावक्तुमशक्यत्वादिति भावः । एकार्थेति । स्वाश्रयसमवेतत्वप्रत्यासत्त्येत्यर्थः । अविलक्षणायास्तद्वत्त्वप्रतीतेरित्यादि । अविलक्षणसम्बन्धविषयकत्वेनानुभवसिद्धायाः संख्यावत्त्वप्रतीतेरसम्भवादित्यर्थः। ननु तथाविधानुभवे मानाभाव इत्यत आह। घटत्वादौ चेति । द्वित्वादीति । घटत्वद्वयमितिप्रत्ययप्रसङ्गादित्यर्थः। तथा चैकार्थसमवायो न विशिष्टबु-

(१) तद्वत्ताप्रत्ययात्-पा० ३ पु. ।

समवायोऽपि च नैको जलादेर्गन्धादिमत्त्वप्रसङ्गात् परं तु नानैव समवायत्वं तु पुनरनुगतमखण्डोपाधिरिति ॥

वैशिष्ट्यमपि पदार्थान्तरम् । रूपादिप्रतीतिनिमित्ततया समवायस्येवाभाववत्ताप्रतीतिनिमित्ततया तस्यापि सिद्धेः । स्वरूपसम्बन्धवि-

---

द्धिनियामक इति भावः । तत्सम्भव इति । तथा च स्वाश्रयसमवेतत्वसम्बन्धेनैकत्वादिप्रत्यय सम्भव इत्यर्थः । रूपादौ एकत्वादिसंख्याया अभावेन तथाऽसम्भवादिति भावः ॥

समवायस्यैकत्वे बाधकमाह । जलादावित्यादि । पृथिव्यां गन्धसमवायस्य जलनिष्ठस्नेहसमवायस्याभिन्नतया जलादावपि गन्धसमवायसत्त्वात् तत्र गन्धवत्ताप्रतीतिर्दुर्वारैवेति भावः । न च जले गन्धनिरूपितत्वविशिष्टसमवायाभावान्न गन्धवत्ताप्रतीतिरिति वाच्यम् । विशिष्टस्यातिरिक्तत्वाभावेन जलेऽपि तत्सत्त्वात् तथाविधविशिष्टनिरूपिताधिकरणताया अतिरिक्तत्वे किमपराद्धं विभिन्नसमवायैरिति ॥

वैशिष्ट्यमपीति । विशेषणताविशेषोपीत्यर्थः । निमित्ततया । विषयतया । तस्यापि । अतिरिक्तविशेषणत्वस्यापि । ननु तादृशप्रतीतेः स्वरूपसम्बन्ध एव विषय इत्याशङ्कते । स्वरूपसम्बन्धेत्यादि । तत्तदधि-

शेष एव तथाप्रतीतिनिमित्तमिति चेन्न समवायोच्छेदप्रसङ्गात् । तत्रापि स्वरूपसम्बन्धविशेषस्य निमित्ततायाः सुवचत्वात् ॥

करणादिस्वरूपसम्बन्ध इत्यर्थः । **तथाप्रतीतिनिमित्तमिति** । अभाववत्ताप्रतीतिविषय इत्यर्थः । **तत्रापि** रूपवत्ताप्रतीतावपि । **स्वरूपसम्बन्धविशेषस्य** तत्तदधिकरणस्वरूपसम्बन्धविशेषस्य । **निमित्ततायाः** । विषयतायाः । तथा च समवायमनङ्गीकृत्य यदि घटपटादिरूपस्वरूपसम्बन्धस्य संयोगादिसम्बन्धत्वाभ्युपगमस्तदा घटपटौ मिथः संयुक्तावित्यादिप्रतीतेस्तत्तदधिकरणे सांसर्गिकविषयताभ्युपगमे गौरवम् । यदि च संयोगस्य स्वरूपसम्बन्धः संयोग एव तदा संयोगेन संयोगो वर्तते इत्यपि प्रत्ययः स्यादिति अतिरिक्तसमवाय आवश्यकः । न चातिरिक्तसमवायस्वीकारे तुल्ययुक्त्या तद्वैशिष्ट्यस्याप्यतिरिक्तस्य स्वीकारादुभयकल्पने गौरवात् तदपेक्षयातिरिक्तवैशिष्ट्याख्यस्वरूपसम्बन्ध एव संयोगादिसम्बन्धत्वाभ्युपगम उचित इति वाच्यम् । उपदर्शितयुक्त्या विनिगमनाविरहेणैकसमवायसिद्धौ पश्चात्तद्वैशिष्ट्याख्यसम्बन्धविशेषकल्पनस्य फलमुखत्वेनादोषत्वात् । वैशिष्ट्याख्यसम्बन्धस्तु वैशिष्ट्याख्यरूप एवेति नानवस्थेति यदि विभाव्यते तदा तुल्ययुक्त्याभावस्यातिरिक्तवैशिष्ट्यसम्बन्धस्वीकारोऽप्यावश्यकः । अभावस्याभावसम्बन्धत्वाभ्युपगमे ऽभावाधिकरणवृत्त्यखण्डभेदतावन्मात्रविषयकज्ञानादिकमादाय विनिगमनाविरहापत्तेः । न चाभावस्यातिरिक्तसम्बन्धस्वीकारेपि तादृशविनिगमनाविरहो दुर्वार

Digitized by Google

एतेन ज्ञानादिविषयता व्याख्याता ॥

नानुपमृद्य प्रादुर्भावादिति सूत्रम् अनुपमृद्य प्रादुर्भावादिति तदर्थः गुरूणां नये न कलञ्जं भक्षयेदिति कलञ्जभक्षणाभावविषयककार्यमित्यर्थः। एतेनैतादृशोप्यन्वयः स्थलविशेषे व्युत्पत्तिसिद्ध इति मन्तव्यम् ॥

इति वाच्यम्। क्लृप्तेनाक्लृप्तस्य विनिगमनाविरहासम्भवादिति भावः ॥

एतेन। क्लृप्तान्तर्भावासम्भवेन। व्याख्याता। अतिरिक्तत्वेन व्याख्याता। अयं भावः। विषयतायाः ज्ञानस्वरूपत्वे घटपटाविति समूहालम्बनस्य भ्रमत्वापत्तिः। तत्र तदुभयविषयतायाः एकज्ञानस्वरूपत्वेन घटत्वाद्यवच्छिन्नघटत्वाद्यभाववद्वृत्तिविषयताप्रतियोगित्वरूपभ्रमत्वसत्त्वात् विषयतायाः विषयस्वरूपत्वे तु घटभूतलसंयोगाविति समूहालम्बनतो घटवद्भूतलमिति विशिष्टबुद्धेरवैलक्षण्यापत्तेः। न च समूहालम्बनेऽधिकस्य संयोगत्वस्य भानत्वान्नतथेति वाच्यम्। तथा सति घटवद्भूतलसंयोगभ्रेतिज्ञानात् तादृशसमूहालम्बनवैलक्षण्यानिर्वाहात्। न च विशिष्टबुद्धौ सम्बन्धसम्बन्धोप्यधिको भासते इति नानुपपत्तिरिति वाच्यम्। सम्बन्धसम्बन्धमादायापि समूहालम्बनसम्भवादिति। अधिकं विषयताविचारे ऽनुसन्धेयमिति संक्षेपः ॥

Digitized by Google

अर्थानां युक्तिसिद्धानां मदुक्तानां प्रयत्नतः ।
सर्वदर्शनसिद्धान्तविरोधेनैव दर्शनम् ॥
अर्था निरुक्ताः सिद्धान्तविरोधेनैव पण्डिताः ।
विना विचारं न त्याज्या विचारयत यत्नतः ॥
सर्वशास्त्रार्थतत्त्वज्ञान् नत्वानत्वा भवादृशान् ।
इदं याचे मदुक्तानि विचारयत सादरम्[1] ॥
रीतिरेषापकृष्टापि सेविता पूर्वपण्डितैः ।
यन्निजोक्तिविचाराय याचते विदुषोपरान् ॥[2]

अर्थानामित्यादि । ननु अप्रयोजका एव त्वदर्था इत्यत आह । युक्तिसिद्धानामिति । मदुक्तानां । नान्येनोक्तानाम् । दर्शनं शास्त्रम् । भावादृशान् । पण्डितान् । एषा पूर्वश्लोकोक्ता । पूर्वपण्डितैः । वाचस्पतिमिश्रादिभिः । अपरानिति । पण्डितानित्यर्थः ॥

पदार्थखण्डनाकूतपुरुहूतपुरोहितम् ।
शिरोमणिमहं वन्दे शिरोमणिमिवाहृतम् ॥
श्रीमद्दीधितिकारकल्पितघटीकोलाहलव्याकुले
मार्गे सञ्चरणाय यन्निगदितं सिद्धान्तसिद्धेतरत् ।
दैवात् तेन भवेद्यदीह सहसा प्रौढापराधो मम
क्षन्तव्यः कृतिभिः श्रुतो यदि भवेद्यत्नानुरूपो बलिः ॥

(१) सादृतः—पा॰ १ पु॰ ।
(२) शिरोमणिकृतं रत्नं पदार्थानां हि खण्डनम् ।
विद्वज्जनैः सदा चार्यं मोक्षार्दिव्यप्रकाशकम् ॥
इत्यधिकं २ पुस्तके वर्तते ।

इति महामहोपाध्यायतार्किकशिरोमणि-श्रीरघुनाथभट्टाचार्यविरचितं पदार्थतत्त्वनि-रूपणं समाप्तम्[१] ॥

इति श्रीरघुदेवन्यायालङ्कारभट्टाचार्यविरचिता
पदार्थखण्डनव्याख्या
समाप्ता ॥

(१) पदार्थतत्त्वं समाप्तम्—पा० ४ पु० ।

स्वसावलोकनजन्यहर्षोद्भवाः तप्ताश्च सुहृद्गमनजन्यखेदोद्भवाः मुक्ता-
सदृशाः बाष्पकणिकाः समं युगपदेव मुक्ताः । शिखरिणी वृत्तम् ॥१४॥

बालेति । विदेहतनया इयं जानकी बाला अतिकिशोरवयस्का ।
भवन्तौ रामलक्ष्मणौ च तरलौ चंचलौ । दक्षिणा दिक्च रजनीचराणां
राक्षसानां चक्रेण समूहेन दुष्टा दुर्गमा । तत् तस्मात् कारणात् हे
वत्स वयं वत्सलतया त्वत्सौहार्देन इदं उदाहरामः कथयामः यत् नये
नीतौ दक्षिणा निपुण हे राम दक्षिणायां दक्षिणां दिशं मा गच्छ । अव-
श्यमेव गन्तव्ये वनं निशाचरसंकटां दक्षिणां दिशं परिवर्जयेति भावः ।
वसन्ततिलकं वृत्तम् ॥ १५ ॥

सुरमुरजेति । सुराणां देवानां ये मुरजाः भेर्यः तेषां यो
गभीरो धीरश्च नादो ध्वनिः तेन द्विगुणः द्विगुणीकृतो गुणस्य मौर्व्याः
ध्वनिर्यस्य स तस्मिन् चापे दत्तोऽर्पितो हस्तो येन स तथाभूतो राम-
चन्द्रः पुरजननयनैः कृतं सम्पादितं कुवलयदाम सरोजमालाम् । नय-
नकुवलयैरेव सम्पादितां मालामिति यावत् । दधानो जगाम । तामेव
दक्षिणामेव दिशमिति पूर्वेण सम्बन्धः । पुष्पिताग्रा वृत्तम् ॥ १६ ॥

रामावतारस्य हेतुमजानन्त्याः कालिन्द्याः उक्तिः कः पुनरिति ।

(९१) किमपीति । गूढवृत्तान्तम् रामावतरणहेतुभूतमिति भावः ।
एकस्येति । एकस्य गुणस्य भाग्यवत्त्वस्य भाजनं पात्रमित्यर्थः ।

नरेन्द्र इति । नरेन्द्रो राजा दशरथः कैकेय्या वचनपरिपाट्या
विगलितः खिन्नः सन् चण्डं मोहक्रोधयोः यः प्रसरो विस्तारः तस्य
भरयोः भारयोः अन्तरचरो मध्यवर्ती भूत्वा तृणानीव तुच्छवस्तुवत्
प्राणान् अमुञ्चत् न पुनः सुतं रामम् अमुञ्चत् । क इव । चौरयस्तः
कृपण इव मणिम् । यथा चौराभिद्रुतः कृपणो करस्थं मणिमदत्त्वैव
प्राणांस्त्यजति तथा अयमपि प्रियपुत्रपरित्यागात् प्रागेव जीवितं
जहावित्याशयः । शिखरिणी वृत्तम् ॥ १७ ॥

मातः इति । हे मातः तातः पिता क्व यात इति भरतप्रश्नः ।
सुरपतिभवनं स्वर्गमिति कैकेय्या उत्तरम् । पुनः कुतः कस्मात् कार-
णादिति प्रश्ने पुत्रशोकादित्युत्तरम् । चतुर्णां मध्ये कोऽसौ पुत्रो यस्य
शोकादेवं यातमिति प्रश्ने त्वम् अवरजतया अनुजभावेन यस्य जात
इत्युत्तरम् । त्वदग्रजो राम एव स इति भावः । अस्य मम अग्रजस्य किं यात-
मिति प्रश्ने असौ काननान्तं प्राप्त इत्युत्तरम् । किमिति कथमिति
प्रश्ने नृपगिरा दशरथाज्ञयेत्युत्तरम् । असौ नृपः तथा किं कुतो वभाषे
येन रामो वनं गत इति प्रश्ने मद्वाचा बद्धः परवशः सन् इत्युत्तरम् ।
ते तव इह अस्मिन् रामनिर्वासने किं फलमिति प्रश्ने तव मत्पुत्रस्य
धराधीशता राज्यलाभ इत्युत्तरम् । ममैव कारणान्निर्वासितो राम

Digitized by Google

इति ज्ञात्वा भरतः सशोकमाह—हा हतोऽस्मीति । स्रग्धरा वृत्तम् ॥ १८ ॥

भवसीति । सर्वविधगुणोत्तेन समुचितोऽनुजो रामस्य त्वमसीति भावः ।

(९२) राम इति । रामे वनान्तं प्राप्ते सति भरतः कथमपि येन केनोपायेन चेतनां संज्ञां प्राप्य मुनिजनश्रवणात् तदनुसारिणा ऊर्ध्वदेहक्रियाभिः श्राद्धादिभिः तातं पितरं देवेन्द्रलोकं स्वर्गलोकं नीत्वा भ्रातुः रामचन्द्रस्य शोकेन अभितप्तः खिन्नः सन् स्वजनेन अयोध्यापौरजानपदेन परिवृतः नन्दिग्रामे तिष्ठन् रघुपतेः रामचन्द्रस्य पत्युरागामी वनात्प्रत्यागमनादूर्ध्वं भावी भोगः राज्योपभोगः तस्मात् अपवर्गे निवृत्ते यथेष्टविनियोगरहितः सेवकवदयोध्यां पालयामासेति भावः । स्रग्धरा वृत्तम् ॥ १९ ॥

विघ्नानिति । एष रामो विघ्नान् नृपाज्ञापरिपालनविघ्नभूतान् इव अनुसरतः पश्चादागच्छतः पौरान् अयोध्यावासिनो विनिवार्य स्वयं सावधान इव नीतिरिव जगाम । एवं रामं सीता विभूतिरैश्वर्यमिव अनुजगाम । लक्ष्मणोऽपि तां सीतां गुणलाभ इवान्वगच्छत् । यथा विभूतिगुणलाभौ क्रमेण उत्साहितविधेयं नयमनुसरतः तथैव सीतालक्ष्मणौ राममित्युक्तम् । वसन्ततिलकं वृत्तम् ॥ २० ॥

पन्था इति । पन्थाः मार्गः सिकतिलः वालुकामयः अत एव समः वैषम्यरहितः । भूश्च मृदुशाद्वला कोमलतृणवती । इयं सरिच्च नदी वेतस्वती वेतसलतान्तरिता अत एव अतपत्रान्तमार्गा । (९३) अथ वा शिशिरा शीतप्रवाहा । न दूरे समीपवर्तिन्येवेति भावः । अग्रे च कुमुद्वती अतो रमणीया अथ च कादम्बानां पक्षिविशेषाणां कूजितैः कलम्बितो मिश्रितो हंसस्य नादो यस्यां सा एवंभूता च सरसी चकास्ति शोभते । एभिर्वचनैः रामचन्द्रादीनां प्रोत्साहनं कृतं पथिकजनैः । वसन्ततिलकं वृत्तम् ॥२१॥

तरुरयमिति । अयम् तरुः शीतला छाया यस्य सः अथ च स्रवन्ति विगलन्ति मधुरः शीकराणि बिन्दवो यस्मात् स तथा भूतश्च तरुः वृक्षः । इयं सरित् स्वल्पः गुल्मतरणयोग्यः स्वच्छश्च यः प्रवाहः तेन मनोरमा रमणीया । इदं च सरसीरुहां कमलानां वनं स्निग्धः कोमलः आमोदः परिमलो यस्य तत् । पुनः मुहुः मधुरं यथा स्यात्तथा ध्वनन्त्यो गुञ्जन्त्यो याः मधुकरवध्वो भ्रमर्यः ताभिः मुग्धो रमणीयः आभोगो मण्डलं यस्य तत्तथा भूतं च । अस्तीति सर्वत्र संबध्यते । हरिणी वृत्तम ॥ २२ ॥

अध्वेति । अध्वश्रमस्य पथिसञ्चरणजन्यखेदस्य शमनानि शान्तिकरणोत्कर्षः ।

Digitized by Google

भीतमिति । चापहस्तं रामं दृष्ट्वा भीतं हरिणं विलोक्य करुणार्द्रचित्ता सती पत्युः रामचन्द्रस्य धनुः निजेन अंशुकेन वसनाञ्चलेन विदधे आच्छादितवती । पुनः केदारसीमि क्षेत्रप्रान्तेषु सदयं प्ररोहखण्डनजन्यदुःखविषयकदयया सहितं यथा स्यात्तथा यवप्ररोहम् आदाय साधु सम्यक् प्रकारेण कर्णावतंसं कर्णभूषणं विदधे सम्पादितवती । कर्णावतंसमित्यत्र अवतंसपदस्य कर्णभूषणविशेषवाचकत्वेऽपि कर्णपदप्रयोगेण न पुनरुक्तिः शङ्कनीया । तस्य कर्णसान्निध्यसूचकत्वात् । यथोक्तं प्रकाशे "कर्णावतंसादिपदे कर्णादिध्वनिनिर्मितिः । सन्निधानादिबोधार्थ"मिति ॥ वसन्ततिलकं वृत्तम् ॥ २३ ॥

तटभुवीति । सरसीनां सरोवराणां तटभुवि तटे पुनः निम्नगानां नदीनां सैकते पुलिने प्रियस्य निजकान्तस्य परिसरं पार्श्वं क्षणमपि अपहातुं त्यक्तुं असमर्था चक्रवाकी इत्येवंरूपं वृत्तं लोलं चञ्चलं यथा स्यात्तथा पथि आलोकयन्ती पश्यन्ती जनकतनूजा जानकी स्वं स्वकीयप्रियतमसहचारजन्यम् अथ च मुदं शोकं भावि चक्रवाकवियोगसंस्मरणजन्यं प्राप्तवती । अनेनात्मनोऽपि भावि वियोगः सूचितः । मालिनी वृत्तम् ।

अनुकम्पनीयेति । अनुकम्पनीयाः दयापात्राणि वत्सलाः प्रियजनाः यस्याः सा । पथिकेति । पथिकनीत्या यथोचितपथिकव्यवहारपालनेन शीतलानि सुखावहानि वत्सानां रामभद्रादीनां शीलानि चरितानीत्यर्थः ।

(६४) पथिकनीतिं वर्णयन्त्याह–यावदिति । तपनः सूर्यो यावत्कालपर्यन्तं कष्टं तपति दक्षिणदिग्गमनावसरे पूर्वाह्णे इति भावः । तावत्कालपर्यन्तमेव प्रयाणम् अध्वगमनम् । रवेः सूर्यस्य कराले प्रचण्डे मध्याह्नकालीने अंशुजाले किरणप्रसरे प्रसरति सति विश्रामः । रवेर्बिम्बे रवे लम्बमाने सति अपराह्ण इति यावत् । पुनरपि यात्रोद्योगः प्रयाणम् । पुनः यावत्कमलिनी मीलति मुकुलिता भवति । सन्ध्यासमकाल इति यावत् । तावत् आवासबन्धः रात्रिनिवासस्थानस्थितिः । आर्य इति सर्वत्र संबध्यते । मन्दाक्रान्ता वृत्तम् ॥ २५ ॥

अनवस्थितमिति । अनियतपरिपालनोऽयंविषय इत्यर्थः ।

अपि तपतीति । चण्डचण्डैरतिप्रचण्डैः मयूखैः किरणैः तपत्यपि पतङ्गे सूर्ये पथि जानकी सन्तापम् अध्वगमनजनितं खेदं नैवाप । काव्यलिङ्गमुपन्यस्यति–अपरिचितेति । अपरिचितो निमेषोऽनवरतावलोकनात् यस्मिन् स आलोकोऽवलोकनं यस्मिन् कर्मणि तद् यथा स्यात्तथा प्रियस्य रामचन्द्रस्य कुवलयदलानां दामवत् पेयोवत्

श्यामम् बहुमानोक्षयन्ती । एवम्भूता सती जानकी नैव सन्तापमा-पेत्यभिसन्धिः । मालिनी वृत्तम् ॥ १६ ॥

प्रियतमेति । प्रियतमे रामचन्द्रे यः स्नेहः प्रेम तस्य शीलतया स्वभावेन ॥ जीविता उल्लासिता इत्यर्थः ॥

अप्युच्चण्डैरिति । उच्चण्डैः प्रचण्डैः तपनस्य सूर्यस्य किरणैः तापितायामपि पृथिव्यां कठिनवपुषां कठोरशरीरवतामन्येषां जनानां दुर्गमे दुस्सञ्चरेऽपि मार्गमोषि पथप्रदेशे । प्रियतमस्य रामचन्द्रस्य पदैः अङ्कितान् चिह्नितान् भूमिभागान् । प्रेमार्द्रेण चेतसा प्रगुणिता वृद्धिं प्रापिता धृतिः धैर्यं यस्याः सा सीता शीतशीतान् अतिशीतान् मेने । पत्या सह गमने सीतायाः कोऽपि खेदो नासीदित्याशयः । अत्र विरोधगर्भितं काव्यलिंगमलंकारः । मन्दाक्रान्ता वृत्तम् ॥ २७ ॥

(९५) देवीति । यत् त्वमपि कठोरातपतप्ततया दुर्गमासि वत्साया इत्याशयः । न खल्विति । महाभूतानां पंचानाम् अत्र तेजःपृथिव्योरिव वृत्तयः—न स्नेहस्य अनुगुणा अनुकूला प्रवृत्तिः यासां ताः तथाभूताः ॥

कान्तेनेति । श्रान्ताश्रान्ता मुहुर्मुहुरध्वश्रमखिन्ना जनकतनया कान्तेन रामचन्द्रेण किञ्चिदाकुञ्चलेन वल्कलस्य अञ्चलेन प्रान्तभागेन वीताः अपसारिताः ये श्रमजलकणाः तैः स्निग्धा मनोहरा आननश्रीः मुखलावण्यं यस्याः सा तथाभूता प्रणयेन प्रीत्या मधुरं रमणीयं यथा स्यात् तथा चक्रे । अथ च श्रान्तःश्रान्तो रामोऽपि पुनः उक्तप्रकाराऽऽननश्रीः यस्य स तथाभूतः अनया सीतया लोचनस्य अञ्चलेन प्रान्तेन कटाक्षेणेति यावत् चक्रे । तस्याः स्निग्धालोकनेनैव वीतश्रमो राम इति भावः । परिवृत्तिरलङ्कारः । मन्दाक्रान्ता वृत्तम् ॥ २८ ॥

विनिमयस्येति । विनिमयः परस्परोपकारः तस्येत्यर्थः ।

प्रत्यासन्न इति । निलये आवासस्थाने प्रत्यासन्ने समीपवर्तिनि भवति सति तूर्णं शीघ्रं यथा स्यात्तथा क्षिप्रैः कतिपयपदैः पुरस्तादग्रे सम्प्रयाता सती हस्तात् रामस्य चापमादाय यथास्थानं च निवेश्य नवकिसलयैः नवपल्लवैः श्रान्तम् अध्वगमनखिन्नं सानुजं सलक्ष्मणं कान्तं रामं वीजयन्ती सीता समुचितविधिप्रक्रियायाः कुलाङ्गनोचितसदाचारस्य वैजयन्ती पताका जाता ॥ वीजयन्ती वैजयन्ती जातेति पुनरुक्तवदाभासः । मन्दाक्रान्ता वृत्तम् ॥ २९ ॥

सरसेति । सरसमथ च पेशलं कोमलम् । प्रियं प्रति कान्तायाः व्यवहारः सरसः, समुचितव्यवहारत्वात् पेशलश्च ॥

जनकतनयेति । जनकतनयायाः हस्ते न्यस्तैः नवपल्लवैः

तत्कालजनितो यः शिशिरः शीतलः मसृणः कोमलः समीरणो वायुः समेति उद्गच्छति । (६६) अमुना अनेन वायुना अनयोः रामलक्ष्मणयोः कपोलयोः यत् स्वेदाम्बु तत् अध्वगमनश्रमजन्यं सलिलं स्वेदः तत् प्रशमं जगाम शान्तं बभूव । न तु पुनः शोकाम्बु तत् परिचारिकाकर्म-सम्पादयन्तीं सीतां दृष्ट्वा यः शोकः तज्जं पितृमरणजं च नेत्रयोः सलिलम् अश्रु प्रशमं जगामेति सम्बंधः । हरिणी वृत्तम् ॥ ३० ॥

कृत इति । स्थानेस्थाने सुमित्रापुत्रेण लक्ष्मणेन विहितः सम्पादितो वरिवस्यायाः शुश्रूषायाः परिकरो यस्य स एवंभूतः सन् रघु-पतिः रामचन्द्रः श्रमस्य शमनेन शान्त्या शीतो गतश्रमः कृतः । ‘वरिवस्या तु शुश्रूषा’ इत्यमरः । कष्टो लक्ष्मणोऽपि एतेन रामचन्द्रेण क्षणविरहात् जातेन बाष्पेण-अश्रुणा अञ्चिता सहिता या दृक् नेत्रं तया कृतालोको वीक्षितः सन् गलितः अपसारितः सकलः आयासः परिचर्य्यापरिश्रमो यस्य सः तथाभूतः शिशिरः चक्रे कृतः । परिवृत्ति-रलंकारः शिखरिणी वृत्तम् ॥ ३१ ॥

रघूणामाधिपत्यं प्रदर्शयन्नाह-एते हीति । स्वरसेन रघुमाहा-त्म्येन अवनम्रा नम्रीकृताः ये क्ष्मापालाः नृपाः तेषां मौलिषु शिरस्थि-तमुकुटेषु ज्वलन्ति देदीप्यमानानि यानि माणिक्यानि तेभ्यः स्फुरन्तो येऽंशवः किरणाः तैः मांसलं संयुक्तं यत् पदं तस्मिन् प्रेङ्खन्ति ज्वलन्ति नखज्योतींषि येषां ते तथाभूताः एते रघुकुलराजानः । दूरादुन्मुक्ताः अचिप्ताः याः चतुर्णां समुद्राणां लहर्य्यः ताभिर्विक्षिप्ताः याः शुक्तयः ताभ्यः स्खलन्त्यो याः मुक्तापंक्तयः ताभिः विनिर्मितम् एकव-लयं प्रान्तप्राकाररूपं यस्य तत्तथाभूतं भूमण्डलं भुञ्जते शासति । आचतुःसमुद्रान्तं राज्यं रघूणामिति भावः । शार्दूलविक्रीडितं वृत्तम् ॥ ३२ ॥

पुरमथनेति । पुरमथनस्य शिवस्य मौलौ शिरसि मालतीमा-लाभूतां गङ्गाम् । कलिन्दगिरिरिव यः करी गजः तस्य कपोलमदवारि-धारां कलिन्दगिरिजातां यमुनामिति भावः । करिकपोलमदधाराया अपि श्यामत्वात् यमुनायां तत्त्वारोपः गिरौ च करित्वारोपः । तदिदमिति । कस्मिंश्चिदपि दिवसे महीतेत्यादि उपक्रान्तेत्यन्तं यमुनाया वचनं स्मृतं भागीरथ्या ।

तपनसुतयेति । तपनसुतया कालिन्द्या यद्वा देव्या भागीरथ्या च चिरात् अतिविपुलैः वीचीहस्तैः तरङ्गरूपकरैः किं कृतम् न किमपीति काकुध्वनिः । यत् ललिता यो लवलीभङ्गः तद्वत्कोमलैः अङ्कुरपल्लविता सीता वनं प्रति चलिता सती पाणौ धृत्वा न निवारिता ताभ्यामि-ति । हरिणी वृत्तम् ॥ ३३ ॥

सखीति । उभावप्यावां भवत्याः समक्ष एव स्थिते तत्कथं परोक्ष-स्थजनाविव नावुपालभसे इति भावः ।

(९७) शबरेति । शबराणां वनचारिणां शरैः अर्दिताः पीडिताः ये विन्ध्यकाननवासिनः करिणो गजाः तेषां कुम्भतटीभ्यो विमुक्तो विक्षिप्तो यो मुक्ताफलानां प्रकरः समूहः तेन तारकितं चित्रितं यत् लतावितानं तदेव परिच्छदः आच्छादनं यस्याः सा तां तथाभूतां नर्म्मदां सुखदां नर्म्मदाम् । चपलेति । चपलेन चञ्चलेन कर्णाञ्चलेन परिस्खलितः संघट्टितो यो मदकरिणां मत्तगजानां कपोलः तस्मात् चलिताः ये षट्चराः तेषां समागमेन मुदिताः याः मधुकरवध्वः भ्रमर्यः ताभिः मधुरं सरसं च कुसुमकेसरं यस्मिन् तं तथाभूतं गोदावर्य्याः परिसरं तटभूमिं प्रयाताः ।

सौमित्रीति । सौमित्रिशरेण दलिता या नासिका तस्याः च्यवन् यो रुधिर एव सीधुः मद्यं तस्य आस्वादनवती । लक्ष्मणेन कर्त्तिता यस्याः नासिकेति भावः ।

करेति । करैः कलितानि करालानि कुन्तकरवालकार्मुकाणि येन तथेन । कुन्तः तीक्ष्णाग्रः शस्त्रविशेषः । करवालः खड्गः । कार्मुकं धनुः ।

नक्तंचरेन्द्रेति । नक्तंचरेन्द्रस्य राक्षसपतेः रावणस्य भगिन्याः शूर्पणखायाः सुकुमारनासायाः कोमलनासिकायाः निर्मुक्तेन रक्तलवेन शोणितबिन्दुना लिप्तः ततश्च शिता शाणिता ज्वलितोल्लसिता धारा यस्य स तथा भूतो मे कृपाणः कठिनराक्षसकण्ठजानां कठोरनिशाचरकण्ठच्युतानां कर्दमसृजां भूमौ पतनेन कर्दमोत्पादकानाम् । असृजां रुधिरमेदसां पानाय उत्कण्ठते । अत आज्ञापय मां निशाचरायोधनायेति भावः । वसन्ततिलकं वृत्तम् ॥ ३४ ॥

(६८) जानकीति । जानक्या सनाथः पूर्णो गर्भो यस्याः ताम् । अचिरादिति । निशाचरविजयस्य प्रत्यागच्छामीति शेषवाक्यम् । निजबलदर्पवर्णनं न शोभायै वीराणामित्यर्द्धोक्ते विरामः । सम्मीलित इति । युद्धे इति शेषः ।

अथाहूत इति । तादृक् यः समरजयः तस्य यः संरम्भरभसः क्रोधोद्वेगः तेन प्रसर्पन् यो गम्भीरो ध्वनिः तस्य यो गरिमा गुरुता । गाम्भीर्यमिति यावत् । तेन गर्जन्त्यः शब्दायमानाः दश दिशो यस्मिन् कर्मणि तद्यथा स्यात्तथा । सौमित्रिः लक्ष्मणो मुहूर्तात् अल्पकालानन्तरमेव आहूतः । पराभूतेन रामेण आहूतो लक्ष्मणः त्राणायेति सरम्याः शङ्का । रामं हत्वा निशाचरैः लक्ष्मणः आहूतो योधनायेति इति तस्याः द्वितीया शङ्का । तदुभयमप्यनुवदन्नाह हंसः— विपिनेत्यादिना । विपिनचराः वनवासिनो ये नक्तंचराः राक्षसाः

Digitized by Google

सेनां या चमूः सेना तस्याः या अधक्रीडा अनायासेन कुमनं तया किंचित् मुकुलिता भ्रान्ता दृट् यस्य स तेन तथाभूतेन रामस्य धनुषा सौमित्रिराहूत इति पूर्वेण सम्बन्धः । शिखरिणी वृत्तम् ॥ ३५ ॥

प्रथमेति । प्रथमं दर्शितः सूचितः तीव्रः आतपो विरहवृत्तिरूपो यस्यां सा पीयूषस्य रामजयवृत्तान्तरूपस्य वृष्टिः । तीव्रातपस्य पश्चात् वृष्टिर्भवतीति लौकिकः प्रवादः ।

अथाविरासीदिति । कुरुविन्दः पद्मरागः तद्वल्लोचने यस्य स रक्तनेत्र इति भावः । पुनः विद्रुममयं शृङ्गं यस्य सः । (६६) विभक्ताः याः मुक्ताः तन्मयं चित्रं च बहुवर्णमिश्रितं मण्डनं भूषणं यस्य सः । कृत्यभूतो मनोपहारी मनोहररूपो हिरण्मयः स्वर्णमयो हरिणः आविरासीत् व्यक्तोबभूव । वंशस्थं वृत्तम् ॥ ३६ ॥

अनर्थेति । दिव्यदृष्ट्या ज्ञातं गङ्गया । भ्रूवल्लीति । भ्रूवल्ल्या विजितो मनोजस्य कामदेवस्य चापचापो येन सः सीताया लोचनाभ्यः तं हिरण्मयं मृगम् अनुससार । अथ च चापश्रिया निजधनुःशोभया जिताः युवतीनां मनोरमाः रमणीयाः भ्रुवो येन सः । पुनः स्फुरत् विकसत् यत् असितं नीलमुत्पलं तद्वत् अभिरामः सुन्दरः कान्तो रामश्च मृगम् अनुससार । सतृष्णं तं विलोकयन्तीं सीतां दृष्ट्वा रामः तज्जिघांसया तमनुससारेत्यर्थः । स्फुरदसितोत्पलाभिराम इत्युभयत्रापि सम्बध्यते । प्रहर्षिणी वृत्तम् ॥ ३७ ॥

आसातुरेणेति । आसातुरेण भयार्त्तेन तेन मृगेण सहैव जनकात्मजायाः हृदये दूरं प्रयाति गच्छति सति सौमित्रिः लक्ष्मणः धनुः-चापपाणिः सज्जीकृतशरासनः आश्रमपदात् द्राक् शीघ्रं निर्जगाम । अथ तदनन्तरं कोऽपि भिक्षुः विवेश प्रविवेश आश्रमपदमिति शेषः । वसन्ततिलकं वृत्तम् ॥ ३८ ॥

इतोबाणमिति । इतः अत्र मुक्तकरुणो निर्दयः सन् रामो हरिणे कनकमृगे बाणं क्षिपति । इतोऽन्यत्र सौमित्रिः चापेन सहितः स्वजवं रामम् अनुसरति । इतश्च आश्रमे सीता भिक्षोः भिक्षुरूपधरस्य रावणस्य करतले भिक्षामुपनयति । एवमप्येतत् क्वापि प्रेक्षन् उड्डीयमानः सन् युगपत् आलोकयम् दृष्टवान् । गगनतलस्यैव एककालावच्छेदेनानेकस्थलीयविषयदर्शनसम्भवः । शिखरिणी वृत्तम् ॥ ३९ ॥

कनकेति । कनकहरिणस्य गात्रे यो रामकृतशरपातः तस्य अवलोकात् विमुखा विमनस्का हृदयस्य वृत्तिः यस्य स तथाभूतः सन् अहं लोचने सचिमील्य दर्शनाक्षमतया सम्मुद्य इदं रामवृत्तान्तजातं कथयितुं तव तटान्तं तूर्णं शीघ्रम् अवतीर्णः आयतवानस्मि

नेत्रनिमीलनवर्णनेनात्मनः सीतावृत्तान्ताज्ञानं समर्थितम् । मालिनी वृत्तम् ॥ ४० ॥

(१००) विहरेति । पुरतरुणीनां चरणेषु रणतां शब्दायमानानां मणिनूपुराणां कूजितेन उत्कुतुकः कौतुकतः कलमधुरझङ्कारध्वनिःशङ्कः सन् त्वम् । यस्मिन् शुचि स्वच्छं पवित्रं च पयो जलं यस्य तत् तस्मिन् रमणीये मनोहरे पुनः स्मेराणि प्रफुल्लानि नीरजानि कमलानि यस्मिन् तत् तस्मिन् तथाभूते सरसि सरोवरे विहर । आर्या वृत्तम् ॥ ४१ ॥

कातरमिति । जानक्या एकाकिनीत्वात् भयग्रस्तमित्यर्थः । शङ्कितजानकीवृत्तान्ता सङ्गतेति ध्येयम् । नूपुरोद्भेदेनेति । विहरेत्यादिपद्ये नूपुरकूजितवर्णनेनेत्यर्थः । पतिव्रतेति । पतिव्रताः याः सीमन्तिन्यः स्त्रियः तासु रत्नं सर्वोत्तमेत्यर्थः ।

अधिचरणमिति । हे चमूरुनेत्रे मृगनयने सीते मदुपरक्षितौ मधुरशिञ्जितौ अमू मणिनूपुरौ अधिचरणं चरणगतौ विधेहि कुरु । ययोरनयोः नूपुरयोः महिम्ना प्रभावेण हरिणदृशः स्त्रियः क्षणदापि दिनैकमात्रमपि वल्लभैः स्वकान्तैः सह विरहं विश्लेषं न लभन्ते न प्राप्नुवन्ति । पुष्पिताग्रा वृत्तम् ॥ ४२ ॥

निर्वृत्तेति । पूर्वं शङ्कितसीतापहरणभीतासम् । अधुना नूपुरयुनात्मनाधिगम्य किञ्चिन्निवर्त्य तच्छङ्कां स्थिरहृदयास्मीति भावः । वसिष्ठेति । वसिष्ठस्य गृहमेधिनी धर्मपत्नीत्यर्थः । कल्लोलिनीति । कल्लोलिनीनां तरङ्गिणीनां नदीनां कान्तः पतिः ।

(१०१) वृत्तान्तशेष इति । वृत्तान्तस्य हंसमुखाकृष्टस्य शेषः पश्चाद्भागीत्यर्थः ।

रामेति । रामेण उन्मुक्तः यः एक एव बाणः तेन परिणाहत हृदयं यस्य स तथाभूतः काञ्चनाङ्गो हिरण्मयः कुरङ्गो हरिणः सद्यः तत्क्षणमेव मायाबलात् सान्द्रेण घनीभूतेन रक्तेन रुधिरेण भृशं लिप्तं वक्षो यस्य स एवम्भूतो मारीचनामा निशाचरो राक्षसः भूत्वा प्रादुरभूत् । सोऽपि सीतानिकटस्थो भिक्षुः रणाच्चासौ मणिखचितानि चलन्ति च यानि कुण्डलानि तेषां श्रेणीनां या शोभा तस्या या चञ्चलस्तरङ्गाः तासु खेलन्तः प्रतिबिम्बिता ये कपोलाः तैः स्फुरितानि चित्रितानि दशशिरांसि यस्य स एवम्भूतः कुम्भकर्णाग्रजो रावणो मुक्तकपटवेषोऽभूत् । स्रग्धरा वृत्तम् ॥ ४३ ॥

रजनिचरेति । रजनिचरस्य रावणस्य कारायाणां स्पर्शसम्पाते स्पर्शरूपविपत्तौ विघ्नं रचयितुं सम्पादयितुं अनन्नुपाय अग्निपक्षाः

हस्तेन दत्तः अङ्गरागो यस्यै सा तां तथाभूताम् । उद्यत् प्रफुल्लं यत्कुवलयदलं तद्वत् शीतां अर्थाद्बहुलशीतलाङ्गीं सीताम् । पिञ्जरं कपिशं ज्योतिर्यस्य स तथाभूतः अनलपिञ्जः अग्निसमूहः अङ्गरागप्रभावजन्यः बहलं प्रभूतं यथा स्यात्तथा संवृणोति स्म आवृतवान् । शीतामित्यनेनानलपुञ्जेन सीताया अनभिघातः सूचितः । मालिनी वृत्तम् ॥ ४४ ॥

वरुणेति । वरुणदैवतमंत्रस्य चिन्तनेन जपेन आहूता आकृष्टा या नूतनवलाहका नवीनमेघमण्डलं तस्याऽञ्चलेन प्रान्तभागेन निवुलितो वेष्टितः पाणिर्यस्य स तथाभूतः सन् रावणः अस्पृशदेव स्पृष्टवानेव । सीतामिति शेषः । वारिदवेष्टितत्वादनलसहत्वं करस्य ।

(१०२) हा रामेति । हा राम हा रमण प्रिय हा जगदेकवीर इत्यादि माम् उपेक्षसे त्यजसि किम् । इत्यमनेन प्रकारेण मुहुरालपन्तीं विलपन्तीं विदेहतनयां सीताम् आदाय गृहीत्वा राक्षसपतिः नभसा शङ्कितरामदर्शन आकाशमार्गेणैव जगाम गतवान् । वसन्ततिलकं वृत्तम् ॥ ४५ ॥

मयेति । यत् किल चरणगतयोरेव नूपुरयोः सतोरपहृता जानकीति भावः ।

आः पापिन्निति । आः इति खेदे क्रोधे च । पापिन् पापकर्मनिरत रावण मे पश्यतः अस्मत्समक्ष एव मामनादृत्य गिरिशस्य शिवस्य शिरसि शायिनीं वर्त्तिनीं शीतांशुलेखामिव चन्द्रज्योत्स्नामिव त्रिभुवनवन्दनीयामिति यावत् रघुतिलकवधूं रघुवरपत्नीं सीतां चौरवृत्त्या अपहर्तुं उद्यतोऽसि । अत एषोऽहं प्रखरैस्तीक्ष्णैर्नखमुखैर्नखाग्रैः दीप्ताः प्रज्वलिताः चूडामणयो येषु तानि एवम्भूतानि ते शिरांसि छित्त्वा सुधाकाङ्क्षिणम् उरगं सर्पं गरुत्मान् गरुड इव संहरामि । अत्र सुधया सीतायाः गरुत्मता पक्षिणः सर्पेण रावणस्य साम्यम् । स्रग्धरा वृत्तम् । गरुडोरगवृत्तान्तो महाभारते आदिपर्वण्यनुसरणीयः ॥ ४६ ॥

नखैरिति । कुलिशात् वज्रादपि कठोरैः पुनः निशाचरस्य रावणस्य अङ्गानि भिन्दद्भिः छिन्दद्भिः मदीयैः जटायुषो नखैः हेमाभरणः कनकालङ्कृतो रावणस्य रथो बभञ्जे खण्डशः चक्रे । किन्तु अस्य रावणस्य जानकीलाभमनोरथो न बभञ्जे । परिसंख्यालङ्कारः । इन्द्रवज्रोपेन्द्रवज्रयोरुपजातिः ॥ ४७ ॥

(१०३) निशितेति । निशिताः तीक्ष्णाः नखाश्च जटायुषः निस्त्रिंशो रावणकरवालश्च तेषां निर्घातेन परस्परसंघातेन भैरवे भीषणे समरस्य संरम्भे । सम्भ्रमेण विमूढभावेन कातरायां रथभङ्गान्तरे रावणैककरस्थितायाम् जानक्यां सत्याम् ।

Digitized by Google

तस्या इति । किमपि । किञ्चित् क्वणात् शब्दायमानः एको नूपुरः मतिकरुणं यथा स्यात्तथा क्रन्दन् रुदन्निव सीतायाः चरणात् पृथिव्यां पपातेत्याग्रामिणा सम्बन्धः । निराशा इति । अधुना नूपुरभंशेन निःसंशयं रामचन्द्रेण विप्रयुक्ता भविष्यति वत्सा जानकीति भावः । आः आत दुष्ट तिष्ठ तिष्ठ निहतोऽसि मया इति अल्पज्जटायुरपि खड्गहतः रावणखड्गेन निहतः दूरात् पपात । वसन्ततिलकं वृत्तम् ॥ ४७ ॥

शोकेति । शोकस्य सीतापहरणवृत्तभवशजन्मस्य शोतसा वेगेनेत्यर्थः ।

प्रायइति । दुरात्मनां रावणसदृशानां सम्पदोऽपि उन्नतिरपि प्रायो बहुशो दुरन्तो दुःखमयः पर्यन्तः परिणामो येषां ते तथाभूताः भवन्ति । महात्मनां रामसदृशानां पुनः विपदोऽपि विपत्तिरपि सुखोदर्काः कल्याणपरिणामाः भवन्ति ॥ ४८ ॥

(१०४) चन्दनेति । चन्दनेन आतृराज्यलाभरूपहर्षवृत्तान्तेन चण्डातपेन सीताहरणरूपशोकवृत्तेनेत्यर्थः ।

सहेलमिति । एनं आलिम्–हैमं कनकमयं हरिणमिव सहेलम् अनायासेन हत्वा रघुपतिः कपीनां वानराणां साम्राज्ये पदातं प्रिनोतं प्रियं निजसहचरं सुग्रीवमभिषिञ्चन् सख्युः रावणमित्रस्य बालेः ध्वंसात् नाशात् पलभुजां मांसभक्षकाणां राक्षसानां नृपतिं रावणमपचक्रे अपकृतवान् । अनेन च निजकुलगरिष्ठं दिनकरस्य प्रीतस्वके । तुङ्गभद्राया ऋष्यमूकपर्वताद्वेवोत्पन्नत्वात् तत्रत्यवृत्तान्तज्ञातं तन्मुखेनैव वर्णयति कविः । शिखरिणी वृत्तम् ॥

(१०५) परिम्लानामिति । परिम्लानां खिन्नां मालामिव ललितसौरभ्यरहिताम् । मालापक्षे म्लानत्वात्सुरभिरहिताम् । सीतापक्षे ललितायाः क्रीडायाः यत् सौलभ्यं (रलयोरभेदात्) सुकरता तेन रहिताम् । रामविरहार्दित भाव । एवम्भूतां दिनमणेः सूर्यस्य वधूटीं सीतां स्थानेस्थाने विचिनुत अन्वेषयतइति स्वेनैव सुग्रीवेण उक्ता आप्ताः कुमुदादयो वानरयूथमुख्याः हनूमत्सहिताः कपिभटाः वानरावीराः दिशिदिशि नियुक्ताः । गतवन्त इति शेषः ॥ शिखरिणी वृत्तम् ।

नेदीयसीति । सरयूः नेदीयसी अयोध्यापरिसरवाहिनी । तपनोद्भवा कालिन्दी यमुना, अतः समानः कुलपतिरस्या रामेण सह । इयं गङ्गा च भागीरथी रामपूर्वजस्य भगीरथस्य दुहिता । मम समुद्रस्यापि सगरात् रामपूर्वपुरुषात् उदयो वृद्धिः । इत्येवं रूपात्सम्बन्धात् कुलसम्बन्धात् यदि रघुकुले पक्षपातः तदुचितमेव । वामपि युवयोर्गोदावरीतुङ्गभद्रयोरपि चित्तवृत्तिः किमपि कस्मादप्यनिर्वचनी-

यात् कारणात् वत्सला सदया रामविषये यत्ततो मन्ये यद्रामचन्द्रचरितमाधुरी न केवलं तत्सम्बन्धिषु, अपि तु सकलजनेषु साधारणरूपेण व्याप्नोति हृदयम् । वसन्ततिलकं वृत्तम् ॥

आकाशमार्गेण गच्छन्तं हनूमन्तं दृष्ट्वाऽऽह ।

विलासैरिति । दम्भोलेरिन्द्रवज्रस्य विलासैः चरितैः सर्वे गिरयः दलितगर्वाः निकृत्तपक्षाः कृताः । केवलमेको मैनाको मम पयसि जले मग्नः सन् सपक्षो निवसति । अतोऽयमग्रवर्ती स्फुरन्ती अमिता बृहती च या गव्यूतिः क्रोशद्वयपरिमितिः तत्परिमितो महिमा विस्तारो यस्य स तथाभूतः । गव्यूतिः स्त्री क्रोशयुगमित्यमरः । शैलः पर्वतोऽयं कः । किमयं हिमाद्रिर्हिमाचलो विन्ध्यो वा लघुतरगतिर्द्रुततरवेगः सन् मां लंघयति । नूनमयं हनूमानेव लङ्कागमनोत्क इत्यागाम्यङ्कावतरणमेतत् । सन्देहोऽलंकारः । शिखरिणी वृत्तम् ॥ ५३ ॥

इति विविधविरुदावलीविराजमानमानोन्नतभारतवर्षीय-
साम्राज्यधुरन्धरायगण्यमहाराजाधिराजमिथिलेश-
श्रीलक्ष्मीश्वरसिंहपादोपजीविनः श्रीग-
ङ्गानाथशर्मणः कृतौ प्रसन्नराघ-
वस्य व्याख्यायां भाव-
बोधिन्यां पञ्च-
माङ्कव्याख्या

Digitized by Google

अथ

प्रसन्नराघवनाटकटीकायाम्

भावबोधिन्याम्

षष्ठोऽङ्कः ।

(१०६) चन्द्रमण्डलं दृष्ट्वा विरहविषण्णहृदयो राम आह–सौमित्र इति। चण्डांशुः सूर्यः उज्जृम्भते प्रज्वलति । अतो हे सौमित्रे लक्ष्मण तरुतलं सेव्यताम् छायार्थमिति भावः । तं प्रतिबोधयन्नाह लक्ष्मणः चण्डांशोरिति । हे रघुपते निशि चण्डांशोः सूर्यस्य का कथा । न रात्रावुदयस्तस्येति भावः । अयं चन्द्र एवोन्मीलति प्रकाशते । रामः पृच्छति–वत्सेति । हे वत्स लक्ष्मण यदयं चन्द्रः तदेतत् भवता कथं विदितं ज्ञातम् । नु इति वितर्के । लक्ष्मण आह–धत्त इति । यतोऽयमाकाशे दृष्टः कुरङ्गं मृगं स्वमण्डले धत्ते । कुरङ्गाभिधानं श्रुत्वा स्मरन्नाह–क्वासीति । हा कुरङ्गनयने चन्द्रानने प्रेयसि प्रियतमे जानकि क्वासि क्व गताऽसि ॥ ससन्देहालङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥ १ ॥

चन्द्रमसमुपालभमान आह रजनिकरेति । हे रजनिकर चन्द्र कैरवाणां कुमुदानां बान्धवाः ते कराः किरणाः सकलभुवनानां समस्तलोकानां चेष्टासु क्रियासु जागरूकाः जाग्रताः । अत एव च सर्वलोकक्रियाः पश्यन्तः सन्तः जयन्ति उत्कृष्टतया वर्तन्ते । तत तस्मात् मे मम प्रेयसी सा विख्यातगुणा जानकी कुत्र वर्तते इति कथं न कथयसि । त्वं मृगस्य सहायः असि । अतो दयालुः । अथ वा किमु इति वितर्के । त्वं नक्तंचरः निशाचर एव असि । मृगसहायत्वेन ख्यातदयालुतया जानकीवार्तां मह्यं कथयितुमर्हसि, अथ वा रात्रिञ्चरतया निशाचरस्वभावस्त्वमपि निर्दयोऽसि संवृत्त इत्याशयः । मालिनी वृत्तम् ॥ २ ॥

अभिषंगेति । अभिषङ्गस्य पराभवस्य तरङ्गः उद्वेगः आर्यस्य रामचन्द्रस्य मानसं तरलीकरोति चञ्चलं करोति । येनाऽयमेवमसम्बद्धं प्रलपतीत्याशयः । चपलेति ॥ चपलेन चञ्चूपुटेन आचान्ताः आस्वादिताः शीतकरस्य चन्द्रस्य शीकराः अमृतबिन्दवो येन स तथाभूतः ।

(१०७) तन्म इति । हे मातश्चकोर विदेहतनयायाः सीतायाः वदनं मह्यं निवेद्य ज्ञापयित्वा चरितार्था कृतार्था वृत्तिर्जीवनं यस्य स तं तथाभूतं मा कुरु । यदीयस्य सीतायाः कमनीयकपोलस्य कान्तिः शशिनं तत्कपोलकान्त्यपेक्षया न्यूनकान्तिं विज्ञाय त्यक्त्वा कान्तामुखेन वधूद्वितीयेन भवता पीता । व्यतिरेकोऽलङ्कारः । वसन्ततिलकं वृत्तम् ॥ ३ ॥

शरदिति । शरदि शरत्काले कृशा क्षामोदरी ईदृशाङ्गना निशाकरस्य चन्द्रस्य किरणम् अनुकरोति स्वच्छत्वात् । एवंविधस्तरङ्गो यस्याः सा तथाभूता तरङ्गिणी नदी ।

कल्लोलिनीति । हे कल्लोलिनि तरङ्गिणि तरङ्गवत् चञ्चले नेत्रे यस्याः सा । नदीपक्षे तरङ्ग एव नेत्रं यस्याः सा । कामप्यपि त्वमिव अनुदिनं किमपि अनिर्वचनीयं कृशिमानं क्षीणताम् एति । यथा त्वं वर्षापगमेऽनुदिनं क्षीणा भवसि तथैवाधुना साप्येति भावः । किन्तु एतावत् अन्तरमस्ति । यद्भवती निसर्गेण स्वभावत एव शीता शिशिरा सीता तु पुनः कामपि मद्विरहजां तापमुद्रां वहति । वसन्ततिलकं वृत्तम् ॥ ४ ॥

अनिद्रेति । अनिद्रं प्रफुल्लं यन्नीलनलिनीवनं तस्मिन् विलीनोऽन्तरितः अलिन्याः मधुकर्य्याः नाथः मधुकर इति यावत् ।

मधुकरं पृच्छति उन्मीलदिति । उन्मीलन् विकसन् यो नयनान्तः नेत्रप्रान्तभागः तस्य कान्तिलहर्य्या शोभातिशयेन निष्पीतयोः हृतश्रीकयोः अत एव च केवलादामोदादेव सुगन्धादेव अवधारणीये अनुमेये वपुषी ययोः ते तयोः एवम्भूतयोः यस्य आननकौमुखस्य कर्णोत्पलयोः कर्णावतंसीकृतकमलकुड्मलयोः स्थितेन कान्तामुखेन भवता चणं किञ्चिदनिर्वचनीयं समुद्गुञ्जितम् । हे भ्रातः तत् उत्तरूपं कान्तं प्रियायां मुखं कुत्र तिष्ठति तत्कथय । सामान्यमलङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥ ५ ॥

अपीममिति । इमं कान्तावियोगविधुरं चक्रवाकमित्यर्थः । तादृशचक्रवाकदर्शनेन विरहदुःखोद्दीपनं रामचन्द्रस्य भवेदिति लक्ष्मणस्याशङ्का ।

योयमिति । योयं पुरोवर्त्ती बहिरेव कलितो धृतः कुङ्कुमरेणुरागो येन स अन्तस्तु सम्भृता दया यस्मिन् तदेवम्भूतं हृदयं दधानः सन् (१०८) पारेतरङ्गिणि नद्याः अपरे तीरे (पाणिनिसूत्र॰ २ । १ । १८) करुणं करुणस्वरेण रटन्तीं कूजन्तीं सहचरीं चक्रवाकीम् आलोकते पश्यति न तु सन्निधत्ते समीपं नैवागच्छति रात्रिसमयत्वात् । सोऽयं विहङ्गः क इति पूर्वेण सम्बन्धः । वसन्ततिलकं वृत्तम् ॥ ६ ॥

Digitized by Google

वल्लभेति । वल्लभायाः प्रेयस्याः विरहेण विदारितं विशीर्णं हृदयं यस्य स एवम्भूतो वराको दयापात्रं चक्रवाकः । समानेति । समानन्तुल्यं शीलं कान्तावियोगजा अवस्था यस्य सः ।

आत्मनश्चक्रवाकस्य भेदं निरूपयन्नाह-अयमिति । चन्द्रे उदयति सति सायंकाले अयं चक्रवाकः प्रियायाः सहचर्याः विप्रयोगं विश्लेषं सहति आमयति । पुनः सूर्ये तपति सति प्रातःकाले प्रियायाः सङ्गं समागममङ्गीकरोति स्वीकरोति प्राप्नोति । जनकपुत्र्या जानक्या विप्रयुक्तस्य वियुक्तस्य मम तु चन्द्रसूर्योदयानां शतमधिकमपि यातं व्यतीतम् । ततोऽपि समागमो न जातः । अतः क्व समानताऽनेकदिनविप्रयुक्तेन मया सह रात्रिमात्रवियुक्तस्य चक्रवाकस्येत्यर्थः । व्यतिरेकोऽलंकारः । मालिनी वृत्तम् ॥ ७ ॥

मुकुलितेति । सूर्यास्तमनेन मुकुलिता या कमलिनी तस्याः परिसरं समीपम् अनुसरते यः स तस्मिन् ।

निजनखेति । निजनखशिखानां लेखाभिः आलीढं क्षतं स्फुरन्नु यत्कमलं तदेव स्तन इव यस्याः सा तामेवम्भूताम् । पुनः विरला अगणना या मधुपश्रेणी तस्याः गीतं गुञ्जितं यस्यां सा ताम् ईषद्गुञ्जितद्विरेफामिति यावत् । पुनः अकरुणो निर्दयो यः शशी तस्य प्रेङ्खन्तः उल्लसन्तो ये पादाः किरणाः (पक्षे चरणाः) तेषां प्रहारेण पातेन विमूर्छितां परिम्लानां पुनः क्रान्तक्रान्ताम् अतिशयेन खिन्नां नलिनीं कमलिनीम् । अयं चलन् कलहंसको मुहुर्मुहुरीक्षतेऽवलोकयति । श्लेषाश्रितं रूपकम । हरिणी वृत्तम् ॥ ८ ॥

एवंविधानामिति । पशुपक्षिणामपि सहचरीजनेषु अनुकम्पया दयया कोमलं सकरुणं न पुनः रामस्य कोमलं चेत इति शेषः ॥

(१०९) जानकीयमिति । जानकीसम्बन्धिनो भ्रान्तिरित्यर्थः ।

इन्द्रजालमिति । नेपथ्यप्रस्तूयमानेन्द्रजालसूचकम् ।

कृतकर्णेति । कृतो कार्यस्य कौतुकामोदो येन सः । कर्णं कुतूहलं हर्षं च येन जनयति । भाविकल्पाद्यनन्तरचेष्टानुमत्यराक्रमाभिनयसूचकमेतत् ॥

मे धारयस्वीति । अहं तुभ्यमदर्शयम् निजकलामिदानीं तत्प्रत्युपकारकपेक्षया त्वमपि स्वकीयां मह्यं प्रदर्शयेति भावः ॥

असुरेति । असुराणीनां मध्ये कस्य चरित्रं सकलजनानां विलोकनाय एकं प्रधानमथ च चित्रमनेकारसम् विस्मयते यदहं तुभ्यं दर्शयिष्यामीति भावः । पुष्पिताग्रा वृत्तम् ॥ ९ ॥

प्रेक्षणीयमिति । सपदि दर्शनीयं किमपीत्यर्थः ।

Digitized by Google

(११०) देवीति। हे देवि वैदेहि त्वदीयौ यौ मणिनूपुरौ ताभ्यां विजृम्भमाणः उत्पद्यमानो यः कोलाहलः शब्दः तेन उत्तरलं सचकितं यत् हंसकुलं तेन आकुलासु परिपूर्णासु। पुनः लक्ष्मणस्य पदाम्बुजाभ्यां लाञ्छितासु चिह्नितासु। गोदावरीपुलिनभूमिषु दृष्टिं देहि ता अवलोकयेति भावः। वसन्ततिलकं वृत्तम् ॥ १० ॥

गोदावरीति। गोदावर्य्यास्तीरे यानि तपोवनानि तेषु सौमित्रिश्च सीता च ताभ्यां परिपूर्णः पार्श्वो यस्य स एवम्भूतोऽहं मुदा हर्षेण यानि दिनानि निमेषानिव अनेकं व्यतीतानि अकरवम्। सुखमयत्वात्। तान्येव मया पुनः स्मर्तानि। अतः कृतार्थीकृतोऽस्मि अनेन सुखमयदिनस्मरणेनेति भावः। इन्द्रवज्रोपेन्द्रवज्रयोरुपजातिः ॥ ११ ॥

तान्येवेति। पक्ष्मलदृशः सुदृशः सीतायाः तान्येव चिरपरिचितानि वचनामृतानि भूयोऽपि पुनरपि कर्णकूपैः चुलुकैः उत्तानकरद्वयसंयोगनिष्पन्नसविशेषविशेषैः आपिबेयम् इत्याशंसायाम्। येवंवशामतेः(?) विकचपद्मोदा हर्षोत्फुल्लवदना असौ जानकी गोदावर्याः कमलानां वीचीनां तरङ्गाणाञ्च चेष्टितानि अदर्शयत्। अनन्तरोत्कीन्त्वकालिकसीतावचनसूचकमेतत्। वसन्ततिलकं वृत्तम् ॥ १२ ॥

तव सुभगेति। हे रघुमृगाङ्क रघुकुलावतंस चन्द्रसुभग तवोपरि तरङ्गमेव सितं श्वेतं चामरम् उत्क्षिपन्ती आरोपयन्ती गोदावरी नदी स्वहस्तेन धवलकमलरूपं श्वेताब्जरूपम् आतपत्रम्। आतपात्त्रायते यत् तत् छत्रं धारयति। गोदावर्य्येव राजोचितछत्रचामरौ तुभ्यमर्पयतीत्यर्थः ॥ १३ ॥

स एवेति। गोदावरीकमलतरङ्गचेष्टितसम्बन्धीति भावः ॥

(१११) परिमितेति। परिमितेन मिताक्षरेण कमनीयः कोमलः श्लाघ्येन रमणीयश्च वाचां विलासः। पुनः सरसो रसवान् मधुरो माधुर्येण सम्पन्नो यः काकुध्वनेर्विकारविशेषः तेन स्वीकृता व्याप्ता काप्यनिर्वचनीया लेखाराजिः पङ्क्तिरिति यावत्। ध्वनिरपि विपञ्च्याः वीणायाः यः पञ्चमः स्वरविशेषः तस्य अनुवादी अनुकारी। वीणा तु वल्लकी विपञ्ची सापीत्यमरः। पुनः श्रुतिरपि कलकण्ठ्याः कोकिलायाः यः कण्ठः तेन सह संवादस्य समगुणतायाः भूमिः स्थानम्। सर्वत्र शृण्वन्त इति शेषः। मालिनी वृत्तम् ॥ १४ ॥

अदृष्टेति। न दृष्टा चन्द्रलेखा चन्द्रबिम्बं यस्मिन् स एवम्भूतः चन्द्रालोकः चन्द्रिकादर्शनम्। अदृष्टायामपि जानक्यां तस्या मधुरवचनानि शृण्वन्त इति भावः। अनन्तरं सीताप्रवेशजन्यज्योत्स्नामाश्रित्येयमुक्तिः। अतिशयोक्तिविभावनयोरङ्गाङ्गिभावः संकरः।

सन्निवेशेति। वस्तुविशेषाणां समागम इति भावः।

Digitized by Google

एकेनेति । शिथिलभुजलतया शोभते यः स तेन एकेन हस्तेन इयं अशोकशाखा आलम्बिता । अन्येन हस्तेन च दिनकरकिरणेन क्लान्ता परिम्लाना कान्तिः शोभा यस्य स एवम्भूतः कपोलः आलम्बितः । पुनः एष स्रस्तः प्रियविश्लेषेऽसंयतत्वान्मुक्तः कचभरः केशपाशः त्यक्तः पतिवियोगे अपरिधृतः काञ्चीकलापो मेखला येन स तस्मिन्नेवम्भूते नितम्बे लुलति लुठति । पुनः नेत्रोत्सङ्गे नयनप्रान्तभागे पक्ष्मलेखा बाष्पस्य प्रियवियोगजनिताश्रुणः ये स्तबकाः गुच्छाः तेषां नवकणैः नूतनोद्गताभिः कणाभिः पक्ष्मला सान्द्रा घनेति यावत् । छन्द-आलोपन्यस्तजानकीस्वरूपवर्णनमिदम् । स्रग्धरा वृत्तम् ॥ १५ ॥

आमालम्बिति । अस्या लोचनम् नेत्रं आमीलत् मुकुलितं यत् नवनीलनीरजं तस्य तुलां समताम् । आलम्बते भजति । नवमल्लिकासहचरैः नवोद्गतमल्लीपुष्पसदृशैः अङ्गैः शैथिल्यं निद्रोचितं स्वीकृतम् । मुकुलितनेत्रतया अङ्गशैथिल्येन च निद्रा सूचिता भवतीति । (११२) स्वप्नानुमानमनुमोदयन्नाह—**आलापादिति ।** आलापात् स्वप्नवचनात् स्फुरन् अधरः प्रेङ्खन् ईषच्चलन्, यः प्रवालो विद्रुमः तस्योपमां सादृश्यं कलयति भजते । आनन्दात् प्रभवः उत्पत्तिर्येषां ते तथाभूताः बाष्पकणिकाः अश्रुबिन्दवः मुक्तानां श्रियं शोभां बिभ्रति वहन्ति । शार्दूलविक्रीडितं वृत्तम् ॥ १६ ॥

हा धिगित्यादि । सीतायाः उन्निद्रायाः वचनम् ।

अन्यादृश इति । स्वप्नावगतादिति शेषः ।

यां वै इति । यां सीतां त्रिजगदबलारत्नभूतां जगत्त्रयललनाललामभूतां गर्भं दधाना सती भवती लब्धोऽर्थो यस्मिन् स तस्य भावस्तस्मात् कारणात् सीतारूपरत्नसनाथगर्भत्वात् यथार्थनामधारिणी बभूव । तामेव उत्सङ्गे स्वकीये क्रोडे भूतले इति यावत् विलुलितां मूर्छितां पतितां वीक्षमाणा सती द्राक् झटिति कथं न विदीर्णाऽसीद् भवती शोकेनेत्यर्थः । अथ वा सर्वं सहते या सा सर्वंसहा त्वमसि नाम्ना यौगिकेन । अतो नैतदाश्चर्यं यत्किल त्वमेवंविधदुःखविपत्ताविपि न विदीर्णाऽऽसीरिति भावः । मन्दाक्रान्ता वृत्तम् ॥ १७ ॥

निजामिति । द्वितीयार्धेनार्थान्तरन्यासमुपन्यस्यति **निजे इति ।** कठिनप्रकृतेः निसर्गजडस्वभावायाः क्रूराया इति यावत् निजे स्वकीयेऽप्यपत्ये कुतः करुणा दया । न कुतोऽपीत्यर्थः ॥ १८ ॥

एनमिति । अशोकवृक्षमित्यर्थः ॥ अशोकमभ्यर्थमान आह—

स्निग्धाशोकेति । हे स्निग्ध कोमलहृदय अशोकद्रुम निजसखीमेनां सीतां तूर्णं शीघ्रं उद्बोधय उज्जीवय । किं कृत्वेत्यपेक्षायामाह—**सिक्त्वेति ।** किसलयानि पत्राण्येव ये कराः हस्तास्तेभ्यः स्यन्दिना स्यन्दमानेन शीकरेण जलबिन्दुभिः पुनः पुनः सिक्त्वेत्यर्थः । आनन्दो-

Digitized by Google

णुस्थूलपृथिव्याः सूक्ष्मावस्थांशः पञ्चतन्मात्रावयवकः गुणानामणुत्वेऽपि तेषु पृथिवीत्वाद्यभावेन न पृथिव्याद्यणुव्यवहारः तेषां च परमाणूनामेकैकः परिणामः पृथिवी गौर्वृक्षः पर्वत इत्येवमादिः । एवं भूतान्तरेष्वपि स्नेहौष्ण्यप्रणामित्वावकाशदानसमनियतजलत्वतेजस्त्ववायुत्वाकाशत्वजातीयानि तन्मात्राण्युपादाय सामान्यं सजातीयानामनेकेषां धर्मभूतएकविकारारम्भ उपपादनीयः । तत्र तत्तज्जातीयारम्भकाः परमाणवो भिन्ना एव तदनुगम एव तत्र तत्तज्जातिव्यवहारभागभाक् । एवं क्रियाद्युपादानभूता अपि रजअंशाभिन्नाभिन्ना एव तदनुगमादेव तत्तत्क्रियात्वादिव्यवहारः । त एव च तत्तद्व्यक्तयः । अत एव त्यक्तभेदा व्यक्तय एव जातिरिति वदन्ति । त एव पृथिवीजलादिव्यक्तिरूपाः । एवं पृथिव्यादि विकाराणां सामान्यभूताः परमाणव एव तेषां व्यक्तिभूतानुगतत्वाच्च घटत्वादिजातिरूपा अपि ते । अत्रेदमवधेयं शब्दादीनां मूर्तिसमानजातीयानामिति भाष्योक्तेस्तन्मात्रपञ्चकेकाठिन्यस्नेहादिव्यंग्या पृथिवीत्वादिजातिरूपा व्यक्तयः सन्ति तत्र पृथिवीजातीयैः शब्दादिगन्धान्तपञ्चतन्मात्रैः पृथिव्यणव आरभ्यन्ते तेषाञ्च महापृथिव्यादिः परिणामः तस्यां पञ्चगुणोपलम्भात् । एवं जलजातीयैः शब्दादिरसपर्यन्तैश्चतुस्तन्मात्रैर्जलपरमाणवस्तेभ्यो महाजलादिः एवं तेजोजातीयैः शब्दादिरूपां तत्रितन्मात्रैस्तेजोणवस्तैर्महातेजआदिः एवं वायुजातीयाभ्यां शब्दस्पर्शतन्मात्राभ्यां वाय्वणवस्तेभ्यो महावाय्वादिः एवमाकाशजातीयाच्छब्दतन्मात्रादहङ्कारसहकृतादाकाशाणवस्तेभ्यो महाकाशादिः एवं च परमाणुगणोत्पत्त्यनन्तरं तेभ्य एवाकाशादिक्रमेण पञ्चमहाभूतोत्पत्तिरिति बोध्यम् । सर्वत्र तन्मात्रैस्तत्तद्गुणोत्पादनेऽहंकारस्य सहकारित्वं बोध्यं स्मृतिबलात् । यत्तु विज्ञानवादिनः कार्यकारणरूपं सर्वं वस्त्वसत्

चित्तकल्पितमात्रं स्वप्नवत् बाह्यवस्तुनो हि प्रातीतिकत्वेऽप्यसत्तापरमा-
र्थतो गुणा वा तत्परिणामो वा अतीतादिकं वा न किं चिदस्ति ।
यथा रथादयः स्वप्ने भान्ति नैव तु सन्ति ते ॥ तथा जाग्रदवस्थायां भूतानि
च न सन्तिवै इति स्मृतेः ॥ न निरोधो न चोत्पत्तिर्न बद्धो न च
साधकः ॥ न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थतेति श्रुतेश्च । किं च
स्वप्नादौ ज्ञानं विषयभूतार्थं विनोभयवादिसिद्धं अर्थस्यानुभवविषयत्वं
विना शशशृङ्गादिः परैरपि न स्वीक्रियते । किं च ज्ञानाभावकालेऽुभय-
वादि सिद्धोऽर्थो नास्ति अत उभसिद्धेन ज्ञानेनैव स्वप्नादिवत्सर्वव्यव-
हारोपपत्तौ ज्ञानातिरिक्तार्थकल्पने गौरवमिति बाह्यं वस्त्वपन्हवते किं
च यद्वेद्यते येन वेदनेन तत्ततो न भिद्यते यथा ज्ञानस्यात्मा वेद्यन्ते
च भूतभौतिकानीति विरुद्धव्याप्तोपलब्धिः निषेध्यभेदविरुद्धेनाभेदेन
व्याप्तं वेद्यत्वं दृश्यमानं स्वव्यापकमभेदमुपस्थापयत्तद्विरुद्धं भेदं प्रति-
क्षिपति तथाभेदेन नियतसहोपलम्भन्तत्ततो न भिद्यते यथैकस्माच्च-
न्द्रात् द्वितीयश्चन्द्रः नियतसहोपलंभश्चार्थज्ञानेनेति व्यापकविरु-
द्धोपलब्धिः निषेध्यभेदव्यापकानियमविरुद्धोऽनियमो नियममावर्त्तयं-
स्तद्व्याप्तं भेदं प्रति क्षिपति भेदप्रतीतिश्च कल्पितभेदविषया विकल्प-
रूपेवेति तन्न । तेषां स्वमाहात्म्येन संनिकर्षादिनोपस्थितं न तु
दोषादिना स्वप्नवदत्यन्तबाधादर्शनात् वस्तुस्वरूपं गृहीत्वापि अप्र-
माणविकल्पात्मकस्वमज्ञानदृष्टान्तबलेनापलपतां अद्वेयवचनत्वाभा-
वात् । तेषां ज्ञानस्य भ्रमत्वेन तद्वाक्यस्य यथार्थवाक्यार्थज्ञाना-
जन्यत्वेनाश्रद्धेयत्वात् सहोपलम्भनियमवेद्यत्वरूपौ हेतू अनैका-
न्तिकौ तथा हि । वस्तुनि स्थूलत्वं बाह्यत्वं च न ते ज्ञानगते ।
नानादेशव्यापित्वं च स्थौल्यं विच्छिन्नदेशता च बाह्यत्वं न चैक-
स्यैमौ विरुद्धधर्मौ न च विज्ञानभेदः युगपत् विज्ञानद्वयाभावात् ।

न च विकल्पः विशदप्रतिभासात् अलीकत्वे विज्ञानस्यापि तत्त्वापत्तिः वेद्यत्वेन विज्ञानाभेदात्। तस्मान्न वेद्यत्वमभेदव्याप्तं एवं सहोपलम्भनियमो भेदेऽपि घटपटयोर्दृष्टः वनमित्यादिप्रत्ययेनेति दिक् ।

इत्यपि तन्मतमयुक्तमित्याह ।

वस्तु साम्ये ऽपि चित्तभेदात्तयोर्विभक्तः पंथाः ॥ १५ ॥

एकस्यैव विषये चित्तान्तरवियोगेन चित्तान्तरालम्बनत्वदर्शनात्तयोश्चित्तार्थयोः पृथगेव पंथाः स्वरूपभेदोन्नयनवर्त्म एकानेकत्वरूपमित्यर्थः क्षणिकविज्ञानमेव परेषां चित्तमिति चित्तभेदेनैव विज्ञानभेदोऽर्थेषु सिद्ध इति भावः । तथा हि बहुचित्तावलम्बनीभूतमेकं वस्तु साधारणत्वेन प्रत्यभिज्ञया सिद्धं तच्च नैकपुरुषीयचित्तात्मकं नाप्यनेकपुरुषीयचित्तात्मकं अपि तु स्वप्रतिष्ठं चित्तातिरेकेण स्वात्मन्येव स्थितं कुतः वस्तु साम्ये चित्तभेदात्। पुरुषभेदेनैकस्मिन्नेव योषिद्वस्तुनि धर्मरूपनिमित्तात्सुखवती स्त्र्याकारवृत्तिर्भवति अधर्मरूपनिमित्ताच्च तस्यैव दुःखवती सा अविद्यानिमित्तेन तस्यैव मोहवती सा सम्यग्दर्शनेन च तस्यैव माध्यस्थ्यवतीत्यतः कस्य पुरुषस्य चित्तेन कल्पितं अभिन्नं स्यान्नैकस्यापीति नैकचित्तात्मकत्वसम्भवः या त्वया दृश्यते सैव मयापीति प्रत्यभिज्ञानाच्च। किं चान्यचित्तपरिकल्पितेनार्थेनान्यचित्तोपरागासम्भवः परस्वप्नस्य परेणाज्ञानात् । एतेनानेकचित्तपरिकल्पितत्वमपि निरस्तं बहुभिरेकस्वप्नादर्शनात् । तस्मात् ग्राह्यग्रहणरूपयोर्वस्तुज्ञानयोर्भेदेन वैधर्म्येण भिन्नयोर्विभक्त एव पंथा नानयोः संकरगन्धोऽपीति बोध्यम् । ननु चित्तातिरिक्तार्थवादिनामर्थस्य स्थिरत्वान्निरन्तरमेव कथं ज्ञानं न भवति कथं वा एक एवार्थः सुखादिभेदभिन्नासु वृत्तिषु हेतुः स्यात् । न ह्येकस्मात्कारणात्कार्यभेदो

घटत इति चेन्न । सांख्यमते सर्वस्य वस्तुनः सुखदुःखमोहात्मक-
त्रिगुणत्वेन चित्तस्य चलस्वभावत्वेन च धर्मादिनिमित्तसापेक्षत्वेन च
वस्तुसम्बन्धस्य कादाचित्कत्वेन चोक्तदोषद्वयाभावात् धर्मादिनि-
मित्तानुरूपसुखाद्यात्मकप्रत्ययं प्रति सुखाद्यात्मकत्वेनैव वस्तुने-
हेतुतया कारणतावच्छेदकभेदाच्च । केचित्तु ज्ञानाद्भिन्नोऽपि ज्ञानस-
हभूरेवार्थः भोग्यत्वात्सुखादिवत् अत्र सुखं दृष्टान्तस्तन्मतेनैव
अस्मन्मते सुखस्यापि विषये स्थिरत्वात् रागद्वेषादिकं तूभयसिद्धो
दृष्टान्तः अन्यदासत्त्वे मानाभावाद् इति तन्न । एवमनुमानेन पूर्वो-
त्तरक्षणेषु वस्तुस्वरूपस्यैवापलापेन तस्य पुरुषान्तरसाधारणत्वाना
पत्याय त्वया दृष्टं तदेवमयेति प्रत्यभिज्ञानुपपत्तेः किं च ।

न चैकचित्ततन्त्रं वस्तु तदप्रमाणकं तदा किं स्यात् ॥ १६ ॥

वृत्त्याख्यज्ञानातिरिक्तं तेषां चित्तं नास्तीति तदेवात्र चित्तं
तत्तन्त्रं तन्नियतं एवं च वस्तु एकज्ञाननियतं नेति प्रतिज्ञा । तदि-
त्यादिर्हेतुः यदि एकज्ञाननियतं चेद्वस्तु स्यात् तदा तच्चित्ते विषया-
न्तरसंचारिणि निरुद्धे वा तद्वस्तु अस्वरूपमेव तत्स्यात् तेनापरामृ-
ष्टत्वादन्यस्याविषयत्वाच्च । एवं च केनाप्यगृहीतस्वभावत्वरूपाप्रमाणकं
किं तत्स्यात् चित्तापाये कुत्रविलीयेत न कुत्रचित् । यदि चित्तकारणे
विलीयेत इत्युच्यते तदा घटादिरूपार्थानां लाघवाच्चित्ताभेदापत्तौ
विज्ञानवादिमत एव प्रवेशः यदि मृदादिषु उच्यते विनाशकारणत्वेन
दृष्टस्य मुद्गरपातादेरभावेन तद्वस्तुनाशानुपपत्तिः एवमपि नाशाङ्गी-
कारे पुनश्चित्तेन समकालमाविर्भवत्कुत उत्पद्येत । कारणत्वेन क्लृप्त-
स्याभावात् । न च तज्ज्ञानकारणमेव तत्कारणं । आशामोदकैरपि
तृप्तिप्रसङ्गात् किं चास्यार्थस्य शरीररूपस्याङ्गीयमानाः पृष्ठाद्यंशास्ते-

प्यप्रामाणिकत्वादसन्तः स्युः एवं च पृष्ठाद्यभावादुदरं प्रतीयमानमपि न सत्यतया गृह्येत । उदरस्य पृष्ठादिव्याप्यतया पृष्ठाद्यभावेनोदराभावसिद्धेः तस्मात्स्वतन्त्रोऽर्थः सर्वपुरुषसाधारणः स्वतन्त्राणि च चित्तानि प्रतिपुरुषं प्रवर्तन्ते । तयोः सम्बन्धादुपलब्धिः पुरुषस्य भोगः वियोगाच्चानुपलब्धिर्मोक्ष इति दिक् ।

इदानीं चित्तात्मनोर्विवेकप्रकारमाह ।

तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम् ॥ १७ ॥

चित्तस्य कालभेदेन ज्ञातमज्ञातं च वस्तु अर्थज्ञाने अर्थाकारताद्रूपोपरागसापेक्षत्वात् एवं च ज्ञाताज्ञातविषयत्वाच्चित्तं परिणामि न चार्थाकारतातिरिक्तं बुद्धेर्ज्ञानं किं यच तस्यापेक्षोच्यत इति वाच्यं मूतप्रकाशवत्सुषुप्त्यादिव्यावृत्तस्य सत्त्वगतप्रकाशस्य सत्त्वेन तस्यैवाकारावच्छिन्नस्य बुद्धिधर्मज्ञानत्वात् । तथा हि । अयस्कान्तमणिवद क्रिया एव विषयाः अयोवत् क्रियाशीलं चित्तं स्वमहिम्नाऽऽकृष्य स्वस्मिन्सम्बध्यस्वाकारेण तत्परिणामेनोपरञ्जयन्ति अतो येन विषयेणोपरक्तं यच्चित्तं स तस्य विषयो ज्ञातः अतो ज्ञाताज्ञातवस्तुकत्वानुपपत्त्या चित्तस्योपरागाख्यपरिणामवत्त्वं सिद्धं पुरुषाद्वैधर्म्ये एतेनार्थस्य स्वतन्त्रत्वे जडत्वान्न कदाचित्प्रकाशः स्यात् । न चेन्द्रियाद्याधेयो जडस्वभावस्यार्थस्य धर्मप्राकट्यादिः प्रकाशः तत्त्वेनीलत्वादिवत्सर्वपुरुषसाधारणत्वापत्तौ एकस्य शास्त्रार्थज्ञत्वे सर्वेषां विद्वत्त्वापत्तेः अतीतानागतयोर्वर्तमानधर्मवत्त्वासम्भवाच्चेति निरस्तम् अर्थोपरक्तचित्तप्रतिबिम्बेन चितेरर्थानुभवात् यद्यपि जडत्वाच्चित्तस्य न ज्ञानं चैतन्यस्यैव ज्ञानत्वात् । तच्च पौरुषेयमेव सत्त्वस्य प्रकाशरूपता तु पुरुषप्रतिबिम्बग्रहणक्षमनैर्मल्यमेव तथा पि तत्प्रायः पिण्डवह्निव्यवहारतो

बुद्धिसत्त्वप्रकाशोऽपि ज्ञानशब्देनोक्तः घटादयस्तु पुरुषस्य न साक्षाद्विषयाः किं तु चित्तमेव तद्विषयेऽतोन पुरुषस्य ज्ञाताज्ञातविषयत्वमित्याह—

सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामात् ॥१८॥

तत्प्रभोश्चित्तस्वामिनः पुरुषस्य विषयभूताश्चित्तवृत्तयः सदा ज्ञाताः पुरुषस्यापरिणामात् परिणामित्वे हि पुरुषस्य कदाचिदाध्यस्याश्चित्तवृत्त्यज्ञानेऽहं सुखी न वा दुःखी न वा इच्छामि न वेत्यादिसंशयः स्यात् अतो वृत्तेरज्ञातसत्ताभावात्पुरुषो परिणामी। किं च परिणामित्वे पुरुषीयज्ञानादिलक्षणधर्मस्य मोक्षेनाशापत्तौ व्यपदेशोऽस्य दारिद्र्यवन्मोक्षस्यापुरुषार्थत्वापत्तिः तथा हि यदि चित्तवत्तत्प्रभुः परिणमेत तदा तस्य पुरुषस्य विषयभूताश्चित्तवृत्तयः शब्दादिविषयवत् ज्ञाताज्ञाताः स्युः सदा ज्ञातत्वं तु मनोवृत्तीनां स्वप्रभोः पुरुषस्यापरिणामित्वमनुमापयतीति ।

ननु सर्वसम्बद्धत्वाविशेषेऽपि चित्तमेव पुरुषस्य विषय इत्यत्र किं मानमिति चेत् शृणु । अर्थाकारतैव विषयविषयिभावो न तु संयोगमात्रं अतीन्द्रियेषु संयोगसत्त्वेऽपि चित्तविषयत्वाभावात् । पुरुषे चार्थाकारताप्रतिबिम्बरूपैव स्वतोऽपरिणामित्वात् । अतः पुरुषे प्रतिबिम्बनसामर्थ्यं वृत्तिमच्चित्तस्यैव फलबलात् यथा जलादौ प्रतिबिम्बनसामर्थ्यं रूपवत्स्थूलद्रव्यस्यैव । शब्दादीनां तु चित्तारूढानामेव पुरुषेण भासनं । अर्थे विषयत्वं तु पुरुषवृत्तिप्रतिबिम्बनिष्ठतत्तदाकारतानिरूपकत्वमेव । तदेव च तत्तद्वस्तुनिष्ठं विशेष्यतादिशब्दैर्व्यवह्रियते इति । अथेदं तत्त्वं अज्ञानस्य चित्तधर्मताया तत्कार्यधर्मादिकं तत्कार्ये चेच्छासुखादिकं सर्वं चित्तस्यैव सामानाधिकरण्या-

न्यायतो लाघवात् । न नु चित्तमेव विषयवत्स्वस्यापि प्रकाशकमस्तु कृतं पुरुषेण । अग्निवत् । अग्निचित्तसाधारस्वप्रकाशत्वमखण्डोपाधिरिति बौद्धाशंकायामाह—

न तत्स्वाभासं दृश्यत्वात् ॥ १९ ॥

यथेन्द्रियाणि शब्दादयश्च दृश्यत्वान्न स्वप्रकाशानि तथा मनोपि ज्ञेयं यद्बुद्धिपरिणामितया नीलादिवदनुभवव्याप्यं न तत्स्वाभासं आत्मनि वृत्तिविरोधात् । न हि तदेव क्रिया च कारकं च न हि पाकः पच्यते छिदा वा छिद्यते पुरुषस्तु नानुभवकर्मेत्यतः स्वप्रकाश एव अपराधीनप्रकाशतेवास्य स्वयंप्रकाशता नानुभवकर्मतेतिमिश्राः । अन्ये तु चित्तं स्वगोचरवृत्त्यभावकाले न स्वप्रकाशं दृश्यत्वात् इन्द्रियशब्दादिवदिति प्रयोगः एवं च स्वगोचरवृत्त्यभावकाले चित्तभानार्थे पुरुषसिद्धिः वृत्तिभानार्थे नियमेन वृत्तिकल्पने चानवस्था । पुरुषे स्वज्ञेयतायां उक्तत्वेन तत्र व्यभिचारवारणाय काले इत्यन्तं कर्तृकर्म्मविरोधो विपक्षे बाधकस्तर्कः कर्तृकर्म्मविरोधे च स्वस्मिन् स्वसंयोगाद्यनुपपत्तिस्तर्कः । न चैवं पुरुषस्य ज्ञेयत्वे कर्तृकर्मविरोधः चेत् न प्रतिबिम्बितबुद्धिवृत्तिव्याप्यत्वरूपस्यैव ज्ञेयत्वस्य पटादिवत्तत्र सत्वात् तत्र बुद्धिवृत्त्यारूढरूपो दृश्योदर्पणारूढमुखवत् केवलस्तु द्रष्टेति प्रकारभेदान्नतद्विरोधः प्रकारभेदेपि वस्तुतः स्वप्रकाशत्वमस्त्येव । एतेनात्मादृश्य एव न पुरुषगोचरस्तु व्यवहारः स्वरूपसतैव पुरुषेण प्रकाशगोचरव्यवहारे प्रकाशानपेक्षादर्शनाद् इति चिन्त्यम् । चित्तवृत्तावप्येवं परैर्दृश्यतायाः सुवचतया चित्तातिरिक्तपुरुषसिद्ध्यनुपपत्तेः वृत्तिगोचरव्यवहारस्यापि स्वरूपसत्या वृत्त्यैव कर्तुं शक्यत्वात् । तस्मादपि सत्वरूपतया प्रकाशत्वात् । परोक्तमग्निदृष्टान्तोप्यसिद्धः यद्याग्निः पूर्वतमसा पिहितः सन्स्वाद्यात्मानं प्रकाशयतीति क्वचिद् दृष्टं

स्यात्तदा ऽग्नेः स्वप्रकाश्यत्वं पुरुषस्येव सिध्येत् तदेव तु नास्ति । यद्यपि पुरुषोऽपि प्रकाशरूप एव सर्वदा तमस्तु बुद्धिवृत्तेरेवप्रतिबन्धकं तथापि बुद्धिवृत्त्याख्यकरणाभावकाले स्वमविषयीकृत्य तदाख्याकरणकाले करोतीत्यग्नितो विशेषात् अतः प्रकाशरूपतादिसाम्येऽपि पुरुषः स्वप्रकाश्यो नाग्निः किं च प्रकाश्यत्वव्यवहारः प्रकाश्यप्रकाशसंयोगे दृष्टः न च स्वरूपमात्रे संयोगः संयोगोऽत्र प्रतिबिम्बसाधारणः सम्बन्धः अग्नेः स्वप्रकाशत्वं तु प्रकाशान्तरनैरपेक्ष्यं । अग्निदृष्टान्तेन चेदृशमेव स्वप्रकाशत्वं शास्त्रेषूच्यते चित्ताद्विवेकाय चित्तस्य हि प्रकाशः पुरुषोपाधिक एव अपरो दग्धृत्ववत् अवेद्यत्वे सत्यपरोक्षयोग्यत्वं स्वप्रकाशत्वं पुरुषे इति वेदान्तभाष्यकृतः तेषां दृष्टृत्वश्रुत्यादि, श्रुतीनां कागतिः वेदनस्य व्यवहारप्रतिसामानाधिकरण्येन हेतुत्वस्य क्लृप्तस्य कागतिरिति वदन्ति । किं च स्वाभासं चित्तमित्यस्य कस्याप्यग्राह्यमित्येवार्थः यथा स्वात्मप्रतिष्ठमाकाशमित्यस्यापरप्रतिष्ठमिति एवं च वृत्तिरूपस्वबुद्धिप्रचारस्य संवेदनात्क्रुद्धोऽहं भीतोऽहममुत्र मेरागो मुत्र मेक्रोध इति प्राणिनां व्यवहारो दृश्यते स स्वबुद्ध्यग्रहणेन स्यात् अतो बुद्धेर्ग्राह्यत्वमावश्यकं । ननूक्तप्रत्ययेऽहमिति पुरुषस्यापि भानात्तस्यापि स्वाभासत्वं न स्यादिति चेन्न अग्राह्यत्वरूपस्वाभासत्वस्य पुरुषेऽप्यनङ्गीकारात् इति दिक् ।

चित्तस्य स्वाभासतामते तन्मतमालम्ब्यैव दूषणमाह—

एकसमये चोभयानवधारणम् ॥ २० ॥

एकस्मिन्नुत्पत्तिक्षण एव स्वपरावधारणं न युक्तं पूर्वं सत एव प्रत्यक्षगोचरत्वात् स्वस्य च प्रागसत्त्वादित्यर्थः न च सोत्पत्त्यनन्तरं ग्रहणमस्तु क्षणिकवादिना या वस्तुन उत्पत्तिः सैव तस्य

क्रियाकार्यं सैव च तस्याः कर्त्रादिकारकमित्यभ्युपगमात् । तन्मते हि सर्वं वस्तु उत्पत्तिमात्रफलकं निर्हेतुकं च स्वयमेव भवति ।

ननु स्वाभासशब्देन स्वसन्तानग्राह्यत्वमुच्यते एवं च स्वरसेन विनाशस्वाभाव्येन निरुद्धं नष्टमपि चित्तं उत्तरोत्पन्नेन चित्तान्तरेण ग्राह्यमित्याशङ्कायामाह ।

चित्तान्तरदृश्ये बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसंकरश्च ॥ २१ ॥

वृत्तिरूपचित्तं वृत्तिरूपचित्तान्तरेण चेत् गृह्यते सा वृत्तिविषयावृत्तिः केन गृह्येत अन्ययेति चेदतिप्रसङ्गोऽनवस्थारूपः न च सर्वमेव चित्तं ग्रहीतव्यमिति नियमाभावान्नानवस्था एवमप्यनन्तवृत्तिगोचरानन्तवृत्तिकल्पनागौरवमेवातिप्रसङ्गः अस्माभिर्लाघवेन सकलवृत्तिगोचरैकज्ञानकल्पनात् । एतेन वैशेषिकाणामुत्तरोत्तरज्ञानेन पूर्वपूर्वज्ञानग्रहणकल्पना परास्ता । गौरवात् । स्मृतिसङ्करश्चेति बुद्धिबुद्धेरिति शेषः तथा हि यावन्तो बुद्धिबुद्धीनामनुभवास्तावंत्यः स्मृतयः स्युः विषयानुभवज्ञानज्ञानधाराजातेति विषयस्मृतिकालेपि अनन्तानां तत्र ज्ञानानां घटो मया ज्ञातो घटज्ञानं ज्ञातं तज्ज्ञानं च ज्ञातमित्येवमनन्ताकारा एकदा स्मृतिः प्राप्नोति सोयं स्मृतिसङ्कर तत्संकरे च घटो मया ज्ञात इत्येकमात्राकारस्मृत्यनुभवो न स्यात् । किं चैवं बुद्धिप्रतिसंवेदिपुरुषापलापिनां नास्तिकानां बन्धमोक्षधर्माधर्मव्यवस्थादिकं सर्वं व्याकुलमेव किं च तेषां मध्ये विज्ञानवादिनः क्षणिकविज्ञानरूपं चित्तमात्रं भोक्तृत्वेन परिकल्प्य तस्यैव मोक्षं वदन्ति । अस्तिसत्वविशेषो य एतान्सांसारिकान्पञ्चस्कन्धान्हित्वान्यान् प्रति संदधातीत्यादिना स्वग्रन्थेन मत एव स्वाभ्युपगमात्

चित्तस्थैर्यापत्त्या वदन्तीति न्यायविरुद्धास्ते पञ्चस्कन्धाश्च विज्ञान वेदनासंज्ञारूपं संस्काराख्याश्चित्तस्यैव संस्कारभेदा न तु चित्ताद्भिन्ना-स्तत्र विज्ञानविषयानुभवो वेदना दुःखसंज्ञा रूपे नामरूपे शब्दार्थावि-तियावत् संस्कारो वासना । एष्वेवान्येषामपि सुखादीनां प्रवेश इत्यखिलं वस्तु चित्तमेवेति तन्मतं तथान्ये शून्यवादिनः स्कन्धान् महावेदाख्यवैराग्याया पुनर्जन्मरूपानुत्पादाय प्रशान्तस्य जीवन्मुक्तस्य गुरोरन्तिके ब्रह्मचर्यं ब्रह्माभ्यासं साक्षात्कारपर्यन्तं करिष्याम इत्युक्त्वा शिष्यतामापन्ना नास्तिकगुरूपदेशात्सत्त्वस्याहं शब्दार्थस्य सत्तामपल-पन्ति ते शून्यवादिनो भवन्तीति ते पिन्यायविरुद्धाः स्वाभ्युपगम-विरोधात् भोक्तुः सत्त्वस्यापलापेनाहं शब्दार्थस्य मोक्षस्य ब्रह्मचर्या-दीनां चासत्त्वास्वीकारात् उद्देश्यविस्मृतेः । सांख्ययोगादयस्तु प्रकृ-ष्टवादाः प्रकृष्टानि शास्त्राणि स्वशब्देनाहं स्वमात्मेत्यादिशब्दजातेन भोक्तृतया चित्तस्य स्वामिनं पुरुषमुपगच्छन्तीति न तेषां कश्चिद्दोषः ।

ननु चित्तस्य तदाकारपरिणामेन विषयग्रहणं दृष्टं पुरुषस्य तु परिणामाभावात्कथं चित्तज्ञातृत्वमत आह ।

चित्तेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धि-संवेदनम् ॥ २२ ॥

अप्रतिसञ्चारायाः अपि चितेः स्वीयबुद्धिदर्शनं बुद्धिवृत्त्याकारापत्त्यैव भवति इत्यर्थः ज्ञातुः सञ्चारो न साक्षादेव ज्ञाने हेतुः किं त्वर्थाकारताहेतुसन्निकर्षद्वारा अन्यथा स्वप्नादौ मनःसञ्चाराभा-वेनार्थभानायोगः अतो विभुत्वेन सर्वत्र सन्निकृष्टस्यात्मनः सञ्चारो नापेक्ष्यते आपातग्रहणं च पुरुषस्य पारमार्थिकाकारप्रतिषेधाच्च यथा हि विषयासन्निकर्षकाले पि स्वप्नादौ तद्भानाख्यवृत्त्या चित्तस्य

तद्वदाकारः परिणाम इष्यते नैवं पुरुषस्य चित्तवृत्त्यभावेऽपि तद्भानं
भवति येन पुरुषेऽपि वृत्त्याकारः परिणाम इष्येत किं तु सन्निकृष्टतय
लौहित्यस्येव चित्तवृत्तेः प्रतिबिम्बनमेव लाघवादिष्यते उभयथाका-
राख्यापरिणामकल्पने गौरवात् । स्फटिकदर्पणादेः स्वप्रतिबिम्बितव-
स्तुप्रकाशकत्वस्य सिद्धत्वाच्च । एवं च वृत्तिप्रतिबिम्बनमेव वृत्त्या-
कारापत्तिः तथा हि भोक्तृशक्तिश्चितिरपरिणामिनीति असङ्गा
चतश्चित्तस्यैव न पुरुषस्य ज्ञानसम्भवः सा च वृत्तिरूपे परिणामि-
न्यर्थे प्रतिबिम्बरूपेणासञ्चारितेव सती तद्वृत्तिं चेतनवत्करोति न
चाविवेकादेवेदृशी बुद्धिवृत्तिः अविवेकस्यैव तन्मूलकत्वात् दोषान्त-
राभावात् चेतनभानार्थं च वृत्तौ तत्प्रतिबिम्बः कल्प्यते घटमहं जाना-
मीति बुध्यारूढतयैव शब्दादिवदात्मनो भानात् केवलपुरुषग्राहिका
तु इतराकाररहिताप्रतिबिम्बाविशिष्टा तद्वृत्तिः इदमेव प्रतिबिम्ब-
बुद्धेश्चिच्छायापत्तिरित्युच्यते बुद्धेरर्थाकारतावदात्माकारतेत्यप्युच्यते
तस्या वृत्तेः प्राप्तचैतन्यप्रतिबिम्बरूपाया अनुकारमात्रतया तत्प्रति-
बिम्बधारतामात्रेण चितेस्तद्वृत्तिज्ञानरूपा वृत्तिर्बुद्धितृप्तविशिष्टेवेत्यु-
च्यते मिथ्यास्तु विषयाकारबुद्धौ । चितेः प्रतिबिम्बेन तस्य प्रतिबि-
म्बस्य तदाकारत्वापत्तिर्यथा जलप्रतिबिम्बितं चन्द्रस्याचलादेरपिच-
लत्वादि एवं च विनापि चितिव्यापारं उपसंक्रान्तचित्प्रतिबिंबं चित्तं
स्वगतया क्रियया क्रियावतीमपि चितिं क्रियावतीमिवासङ्गतामपि सङ्ग-
तामिवाभासयति । स्वयं च भोग्यभावमासादयदभोक्त्रीमपि भोक्तृभा-
वमापादयति वृत्तौ चैतन्यप्रतिबिम्बमेव पुरुषस्य वृत्तिरित्याहुः तदुक्तं ।

न पातालं न विवरं गिरीणां नैवान्धकारं कुक्षयो नोद-
धीनां गुहा यस्यां निहितं ब्रह्म शाश्वतं बुद्धिवृत्तिमविशिष्टां कवयो वेद-
यन्त इति ।

अस्यार्थः यस्यां गुहायां गुह्यं शाश्वतं ब्रह्मांशांश्यभेदादात्मसामान्यं निहितं संगुप्तमित्युच्यते सा गुहा न पातालादि किं तु ब्रह्मवृत्त्यविशिष्टां बुद्धिवृत्तिमेव कवयः पण्डिता पश्यन्ति अविविक्तता च परस्परप्रतिबिम्बनेनोभयोरविविक्ताकारत्वाच्चेतनत्वाच्चातो विविच्य ग्रहणायोग्यतया वस्थितिरेवात्मनः सङ्गोपनं बुद्धाविति तात्पर्यं आदित्यपुराणेपि ।

नित्यः सर्वगतो ह्यात्मा बुद्धिसन्निधिमत्तया ।
यथा यथा भवेद्बुद्धिरात्मा तद्वदिहेष्यत इति ।

नन्वेमपि शब्दादिसंवेदनं चितेःकथं तेषामपि चितौ प्रतिबिम्बनसामर्थ्ये सर्वदा सर्वार्थभानप्रसङ्गः किं च चितेः स्वसंवेदनचित्तवत्पुरुषेप्युक्तानवस्था समाना । किं च बुद्धिपुरुषयोर्वेद्यवेतृभावो प्यनुपपन्नोऽत आह ।

द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम् ॥ २३ ॥

सर्वे ग्रहीतृग्रहणग्राह्याः पुरुषस्यार्था भोग्या यस्मिन्निति सर्वार्थ ईदृशं चित्तं यतो द्रष्टृदृश्योभयाकारं बाधकं विना सन्निकृष्टवस्त्वाकारतास्वाभाव्यस्य चितेस्सर्वसिद्धत्वात् एवं च बुद्धिसंवेदनमेव बुद्धिस्थस्य शब्दादेः पुरुषस्य च संवेदनं । यद्बुद्धिशब्दादिपुरुषोभयाकाराबुद्धवृत्तिः पुरुषे प्रतिबिम्बिताभासते इदमेव शब्दादेः पुरुषस्य च दृश्यत्वं बुद्धेर्दृश्यत्ववत् अतो न पुरुषदर्शनार्थे द्रष्ट्रन्तरापेक्षा नापि कर्तृकर्मविरोधः अन्तःकरणस्य द्वारत्वात् । तथा हि मनोमन्तव्ये नोपरक्तं तदाकारं स्वयं च स्वेन च रूपेणोपरक्तं तत्पुरुषस्य विषयत्वात् विषयिणा पुरुषेण स्वीयचैतन्यलक्षणवृत्तिर्विशिष्टेन च सम्बद्धसन्निकर्षस्य ग्रहणहेतुत्वात् बुद्धिवृत्तौ च पुरुषस्यासङ्गस्य प्रतिबि-

न्वातिरिक्तसन्निकर्षासम्भवात् घटमहं जानामीति ज्ञानानुभवात् तदेतच्चित्तमेव उभयोपरक्तं शब्दादिविषयरूपेण विषयिपुरुषरूपेण च निर्भासते साक्षिणि प्रतिबिम्बितं चेतनाचेतनरूपापन्नत्वात् । यथा स्फटिकमणिः पार्श्वद्वयस्थयोर्जवेन्द्रनीलयोः प्रतिबिम्बनात्स्वीयरूपेण सहत्रिरूप इव एवं चित्तविषयात्मनोः प्रतिबिम्बनात् ग्रहीतृग्रहणग्राह्यात्मकरूपत्रयवदिव भवति अतः सर्वार्थं चित्तमेव अन्येषां सन्निकर्षसत्त्वेऽप्याकारग्रहणसामर्थ्याभावात् अत्र स्फटिकदृष्टान्तोंऽशेन । स्वप्नाद्यनुरोधेन बुद्धेरर्थाकारपरिणामस्यैवाङ्गीकारात् । स्फटिके तु प्रतिबिम्बमात्रं तत्तद्वस्तुसन्निकर्षादिना तत्तद्रूपतामात्रांशे स्फटिकस्य दृष्टान्तता तदनेन चित्तसारूप्येण भ्रान्ताः केचित्तदेव चेतनमिति प्रतिपन्ना वैशेषिकादयो बाह्याश्च अपरे विज्ञानवादिनः चित्तस्य चेत्सर्वरूपताङ्गीकृता तद्धलं पुरुषेण बाह्यार्थेन वा अनादिवासनावशात्स्वत एव चित्तस्यानन्तपरिणामसम्भवात् । दुग्धस्य दधिरूपतावत् इति तन्न । भ्रमादिस्थले ज्ञेयार्थे चित्तमात्रताया अस्माभिरभ्युपगमेऽपि समाधिप्रज्ञायां प्रज्ञेयोऽर्थश्चित्ते प्रतिबिम्बितो योऽनुभूयते स तस्य चित्तस्यालम्बनीभूतत्वाच्चित्तादन्योऽवश्यं वाच्यः तस्य चित्ताकारमात्रत्वे प्रज्ञयैव प्रज्ञाकारः कथं गृह्येत कर्तृकर्मविरोधात् पुरुषस्यानङ्गीकारात् । एवं ज्ञानातिरिक्तार्थसिद्धौ प्रज्ञारूपस्य प्रज्ञाग्राह्यत्वाभावादेव प्रज्ञायां प्रतिबिम्बरूपेण जातोऽर्थज्ञानाकारो येन गृह्यते स पुरुष इत्यपि सिद्धं । न च स्वप्रगृहीत्येव स्वस्य रूपं प्रज्ञा गृह्णातु आकाशाग्रहणेऽपि शब्दवदिति वाच्यं शब्दवत्केवलाकाराग्रहणात् अयं घट इति ज्ञानमभूदित्यादिपेक्षणरूपादिवद्धर्मिपुरस्कारेणैवाकारानुभवात् न तत्स्वाभासमिति सूत्रेण चित्तस्य चित्तग्राह्यत्वं निराकृतं अत्र तु चित्ताकारस्य

त्वमग्राह्यत्वं निराक्रियते भाष्यकृता इति विशेषः एवं च ग्रहीतृग्रहणग्राह्यरूपं चित्तं परस्परविजातीयतया विवेचयन्ति ते सम्यग्दर्शिनस्तैरेव लब्धः पुरुषोऽन्ये भ्रान्ताः ।

इतोऽपि चित्तातिरिक्तः पुरुष इत्याह ।

तदसंख्येयवासनाचित्रमपि परार्थं संहत्यकारित्वात् ॥ २४ ॥

तच्चित्तमसंख्येयाभिर्वासनाभिश्चित्रीकृतमपि परस्य सुखादिसाक्षात्काररूपभोगविवेकसाक्षात्काररूपापवर्गार्थं न स्वार्थं संहत्यकारित्वात् गृहवत् संहत्यकारित्वमितरसाहाय्येनार्थक्रियाकारित्वं तादृशानां च पदार्थानां लोके परमार्थत्वं दृष्टं न स्वार्थत्वमपि गृहादिकमपि शयनादिकार्यमास्तरणशरीरादिसाहाय्येनैव करोतीति संहत्यकारिपुरुषस्तु नित्यचैतन्यरूपतया चैतन्यार्थेनान्यमपेक्षते अन्या चार्थक्रिया पुरुषस्य नास्तीति न संहत्यकारी चित्तं करणादिसापेक्षत्वात्तथा । यतः सुखचित्तं न चित्तस्यसुखभोगार्थं तथा तत्त्वज्ञानचित्तरूपमपवर्गचित्तमपि न चित्तस्यापवर्गार्थं भोगापवर्गयोरपि कार्यतया सार्थकत्वनियमेनानवस्थाप्रसङ्गात् यत्कार्यं तत्सार्थकमिति सर्वसंमतत्वाच्चतस्यैतदुभयमपि परार्थं पुरुषस्य भोगापवर्गौ स्वरूपचैतन्यरूपतया न कार्याविति नानवस्था पुरुषार्थत्ववादिनां पञ्चभोगेनापवर्गेण चार्थवान् स पुरुष एव परो न तु,यत्किञ्चित्स्वोत्तरोत्पन्नक्षणिकचित्तादिकं वैनायिकाभिमतं तस्य सर्वस्य संहत्यकारित्वेन परार्थत्वात् कूटस्थनित्यः पुरुषस्तु न संहत्यकारीत्युक्तमिति दिक् ।

अथ विवेकज्ञानजमाद्यं मोक्षमाह ।

विशेषदर्शिन आत्मभावभावनाविनिवृत्तिः ॥ २५ ॥

तथात्मभावना सकारणोच्यते यथा प्रावृषि तृणाङ्कुरस्योद्भेदेन तद्बीजसत्तानुमीयते तथा मोक्षमार्गश्रवणेन यस्य रोमहर्षाश्रुपातौ दृश्येते तत्रापि पुरुषे आत्मभावजिज्ञासाद्वारा ऽपवर्गजनककर्मजन्यं विशेषदर्शनबीजमस्तीत्यनुमीयते यतः तस्यैहिकसाधननिरपेक्षा स्वाभाविकी कोऽहमासं किं नरादिरूप आसं कथं वा सुखी वा दुःखी वा किं स्विदिदं वर्त्तमानमपि मे रूपं देहो वा मन आदिर्वा कथं स्विदिदं केन पापेन पुण्येन वा तिष्ठति को भविष्यामि कथं भविष्यामि इत्येवं रूपा आत्मभावभावना यथोक्तकर्मकारणिका प्रवर्तते ऐहिकप्राग्भवीयतादृशसत्कर्मशून्यस्य दोषात् पूर्वपक्षे देहाद्यात्मतायां रुचिः श्रद्धा निश्चयो भवति अतश्चित्तत्वनिर्णयेमातृमानमेयात्मकत्रिविकल्पशून्यस्य तप्तायःपिण्डवदेकीभावापन्नस्य यथोक्तप्रकारैरन्योन्यविवेकसाक्षात्काररूपविशेषदर्शनवतस्तु सा पूर्वोक्तात्मभावभावना भयशोकप्रवृत्तिनिवृत्त्याद्यनर्थहेतुर्निवर्तते इति तन्निवृत्तिरूप आद्यो मोक्षो भवति । विशेषदर्शने चित्तस्यैवैषस्वर्गनरकमोक्षादिरूपो विचित्रः परिणामो न पुरुषस्य । अविद्यायाश्चित्तधर्मत्वेनाविद्याजन्यानामेषां तत्रैवौचित्यात् । पुरुषस्त्वसत्यामपि विद्यायामविद्याशून्यत्वाच्छुद्धः पापपुण्यरहितोऽतश्चित्तधर्मजन्ममरणसुखदुःखादिभिरपरामृष्टः कालत्रयेऽप्यसम्बद्धः इति ज्ञानात्कुशलस्यास्यात्मभाव भावनानिवर्त्तते तन्निवृत्तेः स्वर्गनरकादिषु रागद्वेषादिनिवृत्तिः फलमिति दिक् ।

विशेषदर्शिनो लब्धमुत्तरमोक्षकारणं सम्प्रज्ञातयोगं चाह ।

तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तम् ॥ २६ ॥

कैवल्यप्राग्भारं कैवल्याभिमुखं तदा विशेषदर्शनावस्थायां प्राक्पदस्य चित्तं विषयाभिमुखं अज्ञानमार्गे सञ्चार्यासीत्तदा स्वर्गा-

द्विवैराग्यवशात् कैवल्याभिमुखं विवेकनिम्नं विवेकमार्गसञ्चारि भवतीत्यर्थः नोत्पन्नेन विशेषदर्शनेनैव कृतकृत्यता पूर्वसंस्कारवशादन्तरान्तरा मोहाख्यानां भवदुःखबीजवृत्तीनामनुवृत्तेरित्याह ।

तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः ॥ २७ ॥

सत्त्वपुरुषान्यताख्यातिमात्रप्रवाहारोहरूपविवेकप्रत्ययनिम्नत्ववतश्चित्तस्य तच्छिद्रेषु व्युत्थानेषु देवमनुष्यादिरूपोऽस्मि ममेति वा जानामीति न जानामीति वा अविद्यारूपाणि प्रत्यान्तराणि क्षीयमाणबीजरूपेभ्यः पूर्वसंस्कारेभ्यो भवन्तीत्यर्थः कथन्तर्हि सम्प्रज्ञातप्रवाहेणाप्यविद्यानिवृत्तिः स्यादत आह ।

हानमेषां क्लेशवदुक्तम् ॥ २८ ॥

एषां संस्काराणां हानं दाहः स्वकार्यासामर्थ्यं क्लेशानामिवोक्तं पूर्वाचार्यैः यथा स्थूलसूक्ष्मक्लेशानां तत्त्वज्ञानचित्तलयाभ्यां दाहनाशौ तथा तत्संस्काराणामपीति फलितोऽर्थः तदुक्तं यथा क्लेशदग्धबीजभावानप्ररोहसमर्था भवन्ति तथा ज्ञानकाले ज्ञानसंस्कारेण प्रतिबन्धात्संस्कारानुत्पत्तौ पूर्वसंस्काराः प्राचीनाः क्लेश संस्काराः ज्ञानाग्निदग्धबीजभावानप्रत्ययमुत्पादयन्ति । ज्ञानसंस्कारास्त्वविरुद्धत्वाच्चित्ताधिकारसमाप्तिपर्यन्तं भवन्त्येव ततश्च तेनैव सह तेषां नाशइति न सञ्चित्यन्ते इति । यद्यप्येकदा मम जन्मादिदुःखं नास्तीति ज्ञानेऽन्तरान्तरामोहेपि तद्धानार्थं वृत्तिरयुक्ता मोहस्यापि चित्तधर्मतायाः पूर्वन्निश्चितत्वात् तथापि चित्तस्य मोहवत्त्वे पुनः चित्तस्य भवदुःखोत्पत्त्या पुरुषस्य दुःखभोगः स्यादित्याशयेन ज्ञानिभिरपि चित्तस्यात्यन्तंमोहनिवृत्त्यर्थे यत्नकरणात् । भोगश्च पुरुषस्यैवेत्युक्तं ।

दनुगुणञ्चैश्वर्य्यं प्रतीयमानमपेक्षितत्वेन वाक्यार्थे समन्वीयते, देवपूजाभिधायिनो यजिधातोश्च यागाख्यकर्म्मे स्वाराध्यदेवताप्रधानं प्रतीयते । तदेवं कृत्स्नवाक्यपर्य्यालोचनया वाक्यादेव विध्यपेक्षितं सर्वमवगतमिति नापूर्वादिकं व्युत्पत्तिसमयानवगतं कर्म्मविधिष्वभिधेयतया कल्प्यतया च प्रयितव्यम् । तथा सङ्कीर्णब्राह्मणमन्त्रार्थवादमूलेषु धर्म्मशास्त्रेतिहासपुराणेषु ब्रह्मादीनान्देवासुरप्रभृतीनां देहेन्द्रियादयः स्वभावभेदाः स्थानानि भोगाः कृत्यानि चेत्येवमादयस्सुव्यक्ताः प्रतिपाद्यन्ते । अतो विग्रहादिमत्त्वाद् देवादीनामप्यधिकारोऽस्त्येव ।

विरोधः कर्म्मणीति चेत्, न, अनेकप्रतिपत्तेर्दर्शनात् ॥ २६ ॥

देवादीनां विग्रहादिमत्त्वाभ्युपगमे कर्म्मणि विरोधः प्रसज्यते, बहुषु यागेषु युगपदेकस्येन्द्रस्य विग्रहवत्त्वे “अग्निमग्न आवह, इन्द्र आगच्छ, हरिव आगच्छे”त्यादिनाऽऽहूतस्य तस्य सन्निधानानुपपत्तेः, दर्शयति चाग्न्यादीनां तत्र तत्रागमनं “कस्य वा ह देवा यज्ञमागच्छन्ति कस्य वा न, बहूनां यजमानानां यो वै देवताः पूर्वं परिगृह्णाति स एनाश्श्वोभूते यजत” इति । अतो विग्रहादिमत्त्वे कर्म्मणि विरोधः प्रसज्यत इति चेन्न, ‘अनेकप्रतिपत्तेर्दर्शनात्,’ दृश्यते हि सौभरिप्रभृतीनां शक्तिमतां युगपदनेकशरीरप्रतिपत्तिः ।

शब्द इति[1] चेत्, न, अतः प्रभवात्प्रत्यक्षानुमानाभ्याम् ॥ २७ ॥

विरोध इति वर्त्तते । मा भूत् कर्म्मणि विरोधोऽनेकशरीरप्रतिपत्तेः । शब्दे तु वैदिके विरोधः प्रसज्यते, अनित्यार्थसंयोगात् । विग्रहवत्त्वे हि सावयवत्वेनेन्द्रादेरर्थस्यानित्यत्वमनिवार्यम् । ततो देवदत्तादि[2]शब्दवदिन्द्राद्यर्थजन्मनः प्राग्विनाशादूर्द्ध्वञ्चेन्द्रादिशब्दानां वैदिकानामर्थशून्यत्वम ऽनित्यत्वं वा वेदस्य स्यादिति चेत्, तन्न, ‘अतः प्रभवात्’—अस्मा-

१ शब्दे तु इति-इति लि॰ पु॰ प्रामादिकः पाठः ।
२ देवतादीति तु लि॰ पु॰ पाठः ।

Digitized by Google

दिन्द्रादिशब्दादेव पुनःपुनरिन्द्राद्यर्थस्य प्रभवात् । एतदुक्तम्भवति—न हि देवदत्तादिशब्दवदिन्द्रादिशब्दाः वैदिका व्यक्तिविशेषमात्रे सङ्केतपूर्वकाः प्रवृत्ताः, अपि तु स्वभावत एव गवादिशब्दवदाकृतिविशेषवाचित्वेन । ततश्चैकस्यामिन्द्रव्यक्तौ विनष्टायामऽत एव वैदिकादिन्द्रशब्दान्मनसि विपरिवर्त्तमानादवगततद्वाच्यभूतेन्द्रा[1]द्यर्थाकारो धाता तदाकारमेवापरमिन्द्रं सृजति, यथा कुलालो घटशब्दान्मनसि विपरिवर्त्तमानात्तदाकारमेव घटमिति । कथमिदमवगम्यते ? 'प्रत्यक्षानुमानाभ्याम्',—श्रुतिस्मृतिभ्यामित्यर्थः । श्रुतिस्तावत् "वेदेन नामरूपे व्याकरोत् सतासती [2]प्रजापति" रिति, तथा "स भूरिति व्याहरत्[3] स भूमिमसृजत स भुव इति व्याहरत्[3]सोऽन्तरिक्षमसृजते"त्यादिः । वाचकशब्दपूर्वकन्तत्तदर्थसंस्थानं स्मरन् तत्तत्संस्थानविशिष्ट[4]न्तन्तमर्थं सृष्टवानित्यर्थः । स्मृतिरपि—

"अनादिनिधना ह्येषा वागुत्सृष्टा स्वयम्भुवा ।
आदौ वेदमयी दिव्या यतस्सर्वाः प्रसूतय[5]" इति,
"सर्वेषान्तु स नामानि कर्म्माणि च पृथक्पृथक् ।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे" इति,

संस्थाः संस्थानानि रूपाणीति यावत्, तथा—

"नाम रूपञ्च भूतानां कृत्यानां च प्रपञ्चनम् ।
वेदशब्देभ्य एवादौ देवादीनां चकार सः" इति ।

अतो देवादीनां विग्रहवत्त्वेऽपि न वैदिकशब्दानामानर्थक्यं वेदस्यादिमत्त्वं च प्रसज्यते ।

अत एव च नित्यत्वम् ॥ २८ ॥

यत एवेन्द्रवसिष्ठादिशब्दानां देवर्षिवाचिनान्तत्तदाकारवाचि-

---

१ विपरिवर्त्तमानागततद्वाच्यभूतेन्द्रेति लि॰ पु॰ पाठः ।
२ वेदेन स्वरूपेण व्याकरोत् सता सति—इति लि॰ पु॰ ।
३ व्याहरतेत्यात्मनेपदं तु लि॰ पु॰ ।
४ पूर्वकं तत्तदर्थसंस्थानविशिष्टमिति लि॰ पु॰ पाठः ।
५ नित्या यतः सर्वाः प्रवृत्तय इति तु क्वचित्पाठो भवति ।

त्वम्, तत्तच्छब्देन तत्तदर्थस्मृतिपूर्विका च तत्तदर्थसृष्टिः, तत एव "मन्त्रकृतो वृणीते, नम ऋषिभ्यो मन्त्रकृद्भ्यः, अयं सोऽग्निरिति, विश्वामित्रस्य सूक्तम्भवती"त्यादिभिर्वसिष्ठा[1]दीनां मन्त्रकृत्त्वकाण्डकृत्त्वऋषित्वादौ[2] प्रतीयमानेऽपि वेदस्य नित्यत्वमुपपद्यते । एभिरेव "मन्त्रकृतो वृणीत" इत्यादिभिर्वेदशब्दैस्तत्तत्काण्डसूक्तमन्त्रकृतामृषीणामाकृतिशक्त्यादिकं परामृश्य[3] तत्तदाकारांस्तच्छक्तियुक्तांश्च सृष्ट्वा प्रजापतिस्तानेव तत्तन्मन्त्रादिस्मरणे[4] नियुङ्क्ते, ते च प्रजापतिनाऽऽहितशक्तयस्तदनुगुणन्तपस्तप्त्वा नित्यसिद्धान् पूर्वपूर्ववसिष्ठादिदृष्टा[5]न्मन्त्रादीनऽनधीत्यैव स्वरतो वर्णतश्चास्खलितान् पश्यन्ति । अतश्च वेदानां नित्यत्वमेषाञ्च मन्त्रकृत्त्वमुपपद्यते ।

अथ स्यान्नैमित्तिकप्रलयादिष्विन्द्राद्युत्पत्तौ सत्यां वेदशब्देभ्यः पूर्वपूर्वेन्द्रादिस्मरणेन प्रजापतिना देवादिसृष्टिरुपपद्यतां नाम, प्राकृतप्रलये तु स्रष्टुः प्रजापतेर्भूताद्यहङ्कार[6]परिणामशब्दस्य च विनष्टत्वात् कथं प्रजापतेः शब्दपूर्विका सृष्टिरुपपद्यते, कथन्तरां विनष्टस्य वेदस्य नित्यत्वम् । अतो वेदनित्यत्ववादिना देवादीनां विग्रहवत्त्वाभ्युपगमे लोक[7]व्यवहारस्य प्रवाहानादिता ऽऽश्रयणीयेति, अत उत्तरं पठति-

समाननामरूपत्वाच्चावृत्तावप्यविरोधो
दर्शनात्स्मृतेश्च ॥ २६ ॥

कल्पोपसंहारे जगदुत्पत्त्यावृत्तावपि पूर्वोक्तात्समाननामरूपत्वादेव न कश्चिद्विरोधः । तथाहि, स भगवान् पुरुषोत्तमः प्रलयाऽवसानसमये पूर्व[8]संस्थानं जगत्स्मरन् 'बहु स्या'मिति सङ्कल्प्य भोग्यभोक्तृजातं स्वस्मिन्

१ इत्यादिर्वसिष्ठेति मु॰ पु॰ ।
२ काण्डर्षित्वादाविति॰ लि॰ पु॰ ।
३ सत्त्वादिपरामृश्यमिति लि॰ पु॰ ।
४ करणे-इति लि॰ पु॰ ।
५ वीर्यसिद्धान् पूर्वपूर्ववसिष्ठादिद्रष्टानिति मु॰ पु॰ पाठः ।
६ कारमिति लि॰ पु॰ ।
७ गमेऽपि लोके-इति लि॰ पु ।
८ समयपूर्व-इति लि॰ पु॰ ।

शक्तिमात्रावशेषं प्रलीनं विभज्य महदादिब्रह्माण्डं हिरण्य[1]गर्भपर्य्यन्तं यथापूर्वं सृष्ट्वा वेदांश्च पूर्वानुपूर्वी[2]विशेषसंस्थितानाऽऽविष्कृत्य हिरण्यगर्भायोपदिश्य पूर्ववदेव देवाद्याकारजगत्सर्गे तं नियुज्य स्वयमपि तदन्तरात्मतया ऽवतस्थे । अतो यथोक्तं सर्वमुपपन्नम् । एत[3]देव च वेदस्यापौरुषेयत्वं नित्यत्वञ्च, यत्पूर्वपूर्वोच्चारणक्रमजनितसंस्कारेण तमेव क्रमविशेषं[4] स्मृत्वा तेनैव क्रमेणोच्चार्य्यत्वम् । तदस्मासु सर्वेश्वरेऽपि समानम् । इयांस्तु विशेषः, संस्कारानपेक्षमेव (वं) स्वयमेवानुसन्धत्ते पुरुषोत्तमः । कुत एवं यथोक्तमवगम्यत इति चे,त्तत्राह 'दर्शनात् स्मृतेश्च' । दर्शनं तावत्,

"यो ब्रह्माणं विदधाति पूर्वं
यो वै[5] वेदांश्च प्रहिणोति तस्मा"इति ।

स्मृतिरपि मानवी—

"आसीदिदन्तमोभूत"मित्यारभ्य
"सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु वीर्यमपा[6]सृजत् ॥
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ।
तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामह"इति ।

तथा पौराणिकी[7]—

"तत्र सुप्तस्य देवस्य नाभौ पद्ममजायत ।
तस्मिन्पद्मे महाभाग वेदवेदाङ्गपारगः ॥
ब्रह्मोत्पन्नस्स तेनोक्तः प्रजाः सृज महामते ।

१ ब्रह्माण्डहिरण्येति मु० पु० ।
२ पूर्वानुपूर्वेति लि० पु० ।
३ तर्हिति लि० पु० ।
४ क्रमशेषमिति लि० पु० तु न युक्तम् ।
५ वै—इति नास्ति लि० पु० ।
६ बीजमवेति पाठान्तरम् ।
७ पौराणिकाः—इति मु० पु० ।

तथा,

"परो नारायणो देवस्तस्माज्जातश्चतुर्मुख" इति ।

तथा, "आदिसर्गमहं वक्ष्य"इत्यारभ्योच्यते—

सृष्ट्वा नारं तोयमन्तः[1] स्थितोऽहं
येन स्यान्मे नाम नारायणेति ।
कल्पेकल्पे तत्र शयामि[2] भूयः
सुप्तस्य मे नाभिजं स्याद्यथाऽब्जम् ॥
एवं भूतस्य मे देवि नाभिपद्मे चतुर्मुखः ।
उत्पन्नस्स मया प्रोक्तः प्रजाः सृज महामत" इति ।

अतो देवादीनामप्यर्थित्वसामर्थ्ययोगाद्ब्रह्मविद्यायां समधिगम-मऽधिकारोऽस्तीति सिद्धम् ॥

देवताऽधिकरणं समाप्तम् ॥ ७ ॥

अथ मध्वधिकरणम् ८ । **मध्वादिष्वसम्भवादनधिकारं जैमिनिः ॥ ३० ॥**

ब्रह्मविद्यायान्देवादीनामप्यधिकारोऽस्तीत्युक्तम् । इदमिदानीं चिन्त्यते—येषूपासनेषु देवता एवोपास्या,स्तेषु तासामधिकारोऽस्ति नेति । किं प्राप्तम् । नास्त्यधिकारस्तेषु मध्वादिष्विति जैमिनिर्मन्यते । कुतः । 'असम्भवात्' । न ह्यादित्यवस्वादिभिरुपास्या आदित्यवस्वादयो ऽन्ये सम्भवन्ति, न चादित्यवस्वादीनां सतां वस्वादित्वं[3] प्राप्यं सम्भवति, प्राप्तत्वात् । मधुविद्यायामृग्वेदादिप्रतिपाद्यकर्म्मनिष्पाद्यस्य रश्मिद्वारेण प्राप्तस्य[4] रसस्याश्रयतया लब्धमधुव्यपदेशस्याऽऽदित्यस्यांऽशानां वस्वा-दित्यादिभि[5]र्भुज्यमानानामुपास्यत्वं वस्वादित्वञ्च प्राप्यं[6] श्रूयते "असौ

---

१ मत इति लि॰ पु॰ ।
२ स्वपामि इति लि॰ पु॰
३ वस्वादित्वमिति लि॰ पु॰ अन्नाप्यत्र च भवति ।
४ द्वारेणाप्राप्तस्येति मु॰ पु॰ । ५ वस्वादिभिर्दित्ति लि॰ पु॰ ।
६ वस्वादित्वं च प्राप्यं चेति लि॰ पु॰ ।

वा आदित्यो देवमधु"इत्युपक्रम्य "तद्यत्प्रथममऽमृतन्तद्वसव उपजीवन्ती"त्युक्त्वा "स य एतदमृतं वेद वसूनामेवैको भूत्वा ऽग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यती"त्यादिना ।

ज्योतिषि भावाच्च ॥ ३१ ॥

"तं देवा ज्योतिषां ज्योतिरायुर्होपासते अमृत"मिति ज्योतिषि परस्मिन्[1] ब्रह्मण्युपासनं देवानां श्रूयते । देवमनुष्योभयसाधारणे परब्रह्मोपासने देवानामुपासकत्वकथनं देवादीनामितरोपासननिवृत्तिं द्योतयति । अत एव[2] वस्वादीनामनधिकार इति प्राप्तेऽभिधीयते--

भावन्तु बादरायणोऽस्ति हि ॥ ३२ ॥

आदित्यवस्वादीनामपि तेष्वधिकारभावं भगवान्बादरायणो मन्यते । अस्ति ह्यादित्यवस्वादीनामपि स्वावस्थब्रह्मोपासनेन वस्वादित्यत्वप्राप्तिपूर्वकब्रह्मप्रेप्सासम्भवः, इदानीं वसूनां सतामपि कल्पान्तरेऽपि वस्वादित्वप्राप्तिश्चापेक्षिता भवति । अत्र हि कार्य्यकारणोभयावस्थब्रह्मोपासनं विधीयते "असौ वा आदित्यो देवमधु"त्यारभ्य "अथ तत ऊर्द्ध्वमुदेते"त्यतः प्रागादित्यवस्वादिकार्य्यविशेषावस्थं ब्रह्मोपास्य[3]मुपदिश्यते, अथात[4] ऊर्द्ध्व उदेते[5]त्यादिनाऽऽदित्यान्तरात्मतयाऽवस्थितं कारणावस्थमेव ब्रह्मोपास्यमुप[6]दिश्यते । तदेवं कार्यकारणोभयावस्थं ब्रह्मोपासीनः कल्पान्तरे वस्वादित्वं प्राप्य तदन्ते कारणं परं ब्रह्मैवाप्नोति । "न ह वा अस्मा उदेति न निम्लोचति[7] सकृद्दिवा हैवास्य भवति

१ परस्मिन्निति लि० पु० ।

२ एव इति लि० पु०

३ ०वस्थब्रह्मोपासनमिति मु० पु० पाठः ।

४ अथ तत इति लि० पु० अत्रापि पाठः

५ उदेतीति मु० पु०

६ इत्युपेति मु० पु.

७ अस्मा उदेति न निम्लोचतीति लि० पु० ।

य एतामेवं ब्रह्मोपनिषदं वेदे"ति ब्रह्मणाया मधुविद्याया ब्रह्मोपनिषत्त्वश्रवणात् ब्रह्मप्राप्तिपर्य्यन्तवस्वादित्वफल[1]श्रवणाच्च वस्वादिभोग्यभूताऽऽदित्यांशस्य विधीयमानमुपासनन्तदवस्थस्यैव ब्रह्मण इत्यवगम्यते। अत एवंविधमुपासनमादित्यवस्वादीनामपि सम्भवति। एवं च ब्रह्मण एवोपास्यत्वात् 'तं देवा ज्योतिषां ज्योति'रित्यप्यु[2]पपद्यते। तदाह वृत्तिकारः—"अस्ति हि[3] मध्वादिषु सम्भवो ब्रह्मण एव सर्वत्र विधीयमानत्वा"दिति ॥

मध्वधिकरणं समाप्तम् ॥ ८ ॥

अथाऽपशूद्राधिकरणम् ९।

शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि ॥ ३३ ॥

ब्रह्मविद्यायां शूद्रस्याप्यधिकारोऽस्ति न वेति विचार्य्यते। किं युक्तम्। अस्तीति। कुतः[4]। अर्थित्वसामर्थ्यप्रयुक्तत्वादधिकारस्य, शूद्रस्यापि तत्सम्भवात्। यद्यप्यग्निविद्यासाध्येषु कर्म्मस्वऽनग्निविद्यत्वाच्छूद्रस्याऽनधिकारः, तथाऽपि मनोवृत्तिमात्रत्वाद् ब्रह्मोपासनस्य तत्राधिकारोऽस्त्येव। शास्त्रीयक्रियापेक्षत्वेऽप्युपासनस्य तत्तद्वर्णाश्रमोचितक्रियाया एव अपेक्षितत्वाच्छूद्रस्याऽपि स्ववर्णोचितपूर्ववर्णशुश्रूषैव क्रिया भविष्यति। "तस्माच्छूद्रो यज्ञे ऽनवक्लृप्त[5]" इत्यप्यग्निविद्यासाध्ययज्ञादिकर्म्मानधिकार एव न्यायसिद्धो ऽनूद्यते। नन्वनधीतवेदस्या ऽश्रुतवेदान्तस्य ब्रह्मस्वरूपत[6]दुपासनप्रकारानभिज्ञस्य कथं ब्रह्मोपासनं सम्भवति। उच्यते, अनधीतवेदस्याश्रुतवेदान्तवाक्यस्याऽपीतिहासपुराणश्रवणेनाऽपि ब्रह्मस्वरूपतदुपासनज्ञानं सम्भवति। अस्ति च शूद्रस्याऽपीतिहासपुराणश्रवणानुज्ञा "श्रावयेच्चतुरो वर्णान्कृत्वा ब्राह्मणमग्रत" इत्यादौ। दृश्यन्ते चेतिहासपुराणेषु विदुरादयो ब्रह्मनिष्ठाः। तथोपनिषत्स्वपि संवर्गवि-

---

१ वस्वादित्वं फलस्येति लि॰ पु॰ । २ अपिर्नास्ति मु॰ पु॰ ।
३ अस्तिन्नोति लि॰ पु॰ पाठः । ४ कुत इति मु॰ पु॰ नास्ति ।
५ नैव क्लृप्त इति लि॰ पु॰ पाठः । ६ तदिति मु॰ पु॰ नास्ति ।

द्यायां शूद्रस्यापि ब्रह्मविद्याधिकारः प्रतीयते । शुश्रूषुं हि जानश्रुतिमाचार्यो रैक्वः शूद्रेत्यामन्त्र्य तस्मै ब्रह्मविद्यामुपदिशति "आजहारेमाः शूद्र अनेनैव मुखेनालापयिष्यथा" इत्यादिना । अतः शूद्रस्याऽप्यधिकारः सम्भवतीति प्राप्त उच्यते-

न शूद्रस्याधिकारः सम्भवति । कुतः । सामर्थ्याभावात् । न हि ब्रह्मस्वरूपतदुपासनप्रकारमऽजानतस्तदङ्गभूतवेदानुवचनयज्ञादिष्वनधिकृतस्योपासनोपसंहारसामर्थ्यं सम्भवति । असमर्थस्य चार्थित्वसद्भावेऽप्यधिकारो न सम्भवति । असामर्थ्यं च वेदाध्ययनाभावात् । यथैव हि त्रैवर्णिकविषयाध्ययनविधिसिद्धस्वाध्यायसम्पाद्यज्ञानलाभेन कर्मविधयोऽज्ञाततदुपायादीनऽपरा[1]श्च स्वीकुर्वन्ति, तथा ब्रह्मोपासनविधयोऽपि अतो ऽध्ययनविधिसिद्धस्वाध्यायाधिगतज्ञानस्यैव ब्रह्मोपासनोपायत्वाच्छूद्रस्य ब्रह्मोपासनसामर्थ्यासम्भवः । इतिहासपुराणे अपि वेदोपबृंहणं कुर्वती एवोपायभावमनुभवतो, न स्वातन्त्र्येण । शूद्रस्येतिहासपुराणश्रवणानुज्ञानं पापक्षयादिफलार्थं नोपासनार्थम् । विदुरादयस्तु भवान्तराधिगतज्ञानाप्रमोषाज्ज्ञानवन्तः[2] प्रारब्धकर्मवशाच्चेदृशजन्मयोगिन[3] इति तेषां ब्रह्मनिष्ठत्वम् ।

यत्तु संवर्गविद्यायां शुश्रूषोः शूद्रेति सम्बोधनं शूद्रस्याधिकारं सूचयतीति, तत्रेत्याह-

'शुगऽस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि,'

शुश्रूषोर्जानश्रुतेः पौत्रायणस्य ब्रह्मज्ञानवैकल्येन हंसोक्ताऽनादरवाक्यश्रवणात्तदैव ब्रह्मविदो रैक्वस्य सकाशं प्रत्याद्रवणाच्छुगऽस्य सञ्जातेति हि सूच्यते, अतः स शूद्रेत्यामन्त्र्यते, न चतुर्थवर्णत्वेन । शोचतीति

१ अज्ञानतदुपायाधीनपरानिति लि० पु० पाठः, अज्ञातेत्यस्य स्थाने अज्ञानेति तु मु० पु० ऽपि भवति ।

२ भातवन्त इति लि० पु० ।

३ जन्मयोगाय इति लि० पु० ।

हि शूद्रः । "शुचेर्दश्च" इति 'र'प्रत्यये[1] धातोश्च दीर्घे चकारस्य दकारे शूद्र इति भवति । अतः शोचितृत्वमेवास्य शूद्रशब्दप्रयोगेण सूच्यते, न जातियोगः । "जानश्रुतिः किल पौत्रायणो बहुद्रव्यप्रदो बहुपाकप्रदश्च बभूव, तस्य धार्म्मिकाग्रेसरस्य धर्म्मेण प्रीतयोः कयोश्चिन्महात्मनोरस्य ब्रह्मजिज्ञासामुत्पिपादयिषतो[2]र्हंसरूपेण निशायामस्याऽविदूरे गच्छतोर-न्यतर इतरमुवाच "भो भो भल्लाक्ष भल्लाक्ष जानश्रुतेः पौत्रायणस्य सम-न्दिवा ज्योतिराऽऽततन्तन्मा प्रसाङ्क्षीस्तत्त्वा मा प्रधाक्षी"रिति । एवं जानश्रुतिप्रशंसारूपं वाक्यमुपश्रुत्यापरो हंसः प्रत्युवाच "कम्वर एन[3]मेत-त्सन्तं सयुग्वानमिव रैक्वमात्थे[4]"ति । कं सन्तमेनं जानश्रुतिं सयुग्वानं[5] रैक्वं ब्रह्मज्ञमिव गुणश्रेष्ठमेतदात्थ,[6]स ब्रह्मज्ञो रैक्व एव लोके गुणवत्तरो, महता[7] धर्म्मेण संयुक्तस्याप्यस्य जानश्रुतेरब्रह्मज्ञस्य को गुणो यद्गुणजनितं[8] तेजो रैक्वतेज इव मां दहेदित्यर्थः । एवमुक्तेन परेण 'को,ऽसौ रैक्व" इति पृष्टो लोके यत् किञ्चित्साध्वनुष्ठितङ्कर्म्म यच्च सर्वचेतनगतं[9] विज्ञा-नन्तदुभयं यदीयज्ञानकर्म्मान्तर्भूतं[10] स रैक्व इत्याह । तदेतद्धंसवाक्यं ब्रह्म-ज्ञानविधुरतया ऽऽत्मनिन्दागर्भन्तद्वत्तया च रैक्वप्रशंसारूपं जानश्रुतिरुप-श्रुत्य तत्क्षणादेव क्षत्तारं रैक्वान्वेषणाय प्रेष्य तस्मिन् विदित्वा ऽऽगते स्वयमपि रैक्वमुपसद्य गवां षट्शतं निष्कमश्वतरीरथञ्च[11] रैक्वायोपहृत्य रैक्वं प्रार्थयामास "अनु म एतां भगवो देवतां शाधि यान्देवतामुपास्स"

१ कप्रत्यय इति लि॰ पु॰ पाठः प्रामादिकः ।

२ जिज्ञासामुत्पिपादयिषतोरिति मु॰ पु॰, जिज्ञासामु व्युत्पादयिषतोरिति लि॰ पु॰ पाठः ।

३ एवमिति लि॰ पु॰ । ४ आगच्छेति लि॰ पु॰ ।

५ सयुग्वान–इति लि॰ पु॰, सयुग्वानमिति पुनः पुनर्मु॰ पु॰ च भवति ।

६ श्रेष्ठमेतदात्थ–इति लि॰ पु॰ ।

७ गुणवत्तरमहतेति लि॰ पु॰ ।

८ जातं तेजोरैक्वतेजसमादहेदिति लि॰ पु॰ ।

९ सर्वचेतनाङ्कमिति मु॰ पु॰ पाठः ।

१० यत्राप्यज्ञानान्तातमिति लि॰ पु॰ पाठः ।

११ चाश्वतरिरथं चेति लि॰ पु॰ पाठः ।

इति । त्वदुपास्यां परां देवतां मामनु[1]शाधीत्यर्थः । स च रैक्वः स्वयोगमहिमविदितलोकत्रयो जानश्रुतेर्ब्रह्मज्ञानविधुरतानिमित्ताऽनादरगर्भहंसवाक्यश्रवणेन शोकाविष्टतां तदनन्तरमेव ब्रह्मजिज्ञासयोद्योगं च विदित्वाऽस्य ब्रह्मविद्यायोग्यतामभिज्ञाय चिरकालसेवां विना ऽर्थप्रदानेन शुश्रूषमाणस्यास्य यावच्छक्तिप्रदानेन ब्रह्मविद्या प्रतिष्ठिता भवतीति मत्वा तमनुगृह्णंश्चाऽस्य शोकाविष्टतामुपदेशयोग्यताख्यापिकां[2] शूद्रशब्देना मन्त्रणेन ज्ञापयन्निदमाह "अह हारेत्वा[3] शूद्र तवैव सह गोभिरस्त्व"-ति । सह गोभिरयं रथस्तवैवास्तु, नैतावता मह्यं दत्तेन ब्रह्मजिज्ञासया शोकाविष्टस्य तव ब्रह्मविद्या प्रतिष्ठिता भवतीत्यर्थः । स च जानश्रुतिर्भूयोऽपि स्वशक्त्यनुगुणमेव गवादिकं धनं कन्यां च प्रदायोपससाद । स रैक्वः पुनरपि तस्य योग्यतामेव ख्यापयन् शूद्रशब्देनामन्त्र्याह--"आजहारेमाः शूद्रा ऽनेनैव[4] मुखेनालापयिष्यथा" इति । इमानि धनानि शक्त्यनुगुणान्याजहर्थ, अनेनैव द्वारेण चिरसेवया विनापि मां त्वमभिलषित[5]-ब्रह्मोपदेशरूपवाक्यमालापयिष्यसीत्युक्त्वा तस्मा उपदिदेश । अतः शूद्रशब्देन विद्योपदेशयोग्यताख्यापनार्थं शोक एवास्य सूचितो, न चतुर्थवर्णत्वम् ।

क्षत्रियत्वावगतेश्च[6] ॥ ३५ ॥

'बहुदायी'ति दानपतित्वेन, 'बहुपाक्य' इत्यादिना 'सर्वत एव मे ऽन्न[7] मऽत्स्यन्ती'त्यन्तेन बहुतरपक्वान्नप्रदायित्वप्रतीते,"स ह[8] संजिहान एव क्षत्तारमुवाचे"ति क्षत्तृप्रेषणात्, बहुग्रामप्रदानावगततज्जनपदाधिपत्याच्चाऽस्य जानश्रुतेः क्षत्रियत्वप्रतीतेश्च न चतुर्थवर्णत्वम् ।

---

१ ममाऽन्विति लि॰ पु॰ । २ ख्यापिका-इति लि॰ पु॰ ।
३ अपाहर त्वमिति मु॰ पु॰ पाठः, अपाहारेत्वा-इति लि॰ पु॰ ।
४ एवकारो नास्ति॰ लि॰ पु॰ ।
५ त्वदभिलषितमिति लि॰ पु, त्वभिलषितेति मु॰ पु॰ पाठः ।
६ क्षत्रियत्वगतेश्चेति लि. पु॰ ।
७ एवमेतदन्नमिति मु॰ पु पाठः लि॰ पु॰ च ।
८ हेति नास्ति लि॰ पु॰ ।

Digitized by Google

तदेवमुपक्रमगताख्यायिकायां क्षत्रियत्वप्रतीतिरुक्ता, अधुनो[1]पसंहारगताख्यायिकायामपि क्षत्रियत्वमस्य प्रतीयत इत्याह—

उत्तरत्र चैत्ररथेन लिङ्गात् ॥ ३६ ॥

अस्य जानश्रुतेरुपदिश्यमानायामस्यामेव संवर्गविद्यायामुत्तरत्र कीर्त्यमानेनाभिप्रतारिनाम्ना चैत्ररथेन क्षत्रियेणास्य क्षत्रियत्वङ्गम्यते । कथम्? । "अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं[2] परिविष्यमाणौ ब्रह्मचारी बिभिक्षे" इत्यादिना "ब्रह्मचारिन्नेदमुपास्महे" इत्यन्तेन कापेयाभिप्रतारिणोर्भिक्षमाणस्य ब्रह्मचारिणश्च संवर्गविद्यासम्बन्धित्वं प्रतीयते । तेषु चाभिप्रतारी क्षत्रिय इतरौ ब्राह्मणौ । अतोऽस्यां विद्यायां ब्राह्मणस्य तदितरेषु च क्षत्रियस्यैवान्वयो दृश्यते, न शूद्रस्य । अतोऽस्यां विद्यायामन्विनाद्रैक्वाद्ब्राह्मणादन्यस्य जानश्रुतेरपि क्षत्रियत्वमेव युक्तं, न चतुर्थवर्णत्वम् । नन्वस्मिन् प्रकरणेऽभिप्रतारिणश्चैत्ररथत्वं क्षत्रियत्वं च न श्रुतम्, तत्कथमस्याभिप्रतारिणश्चैत्ररथत्वङ्कुतो वा क्षत्रियत्वम्? तत्राह "लिङ्गादि"ति । "अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिमित्यभिप्रतारिणः कापेयसाहचर्याल्लिङ्गादस्याभिप्रतारिणः कापेयसम्बन्धः प्रतीयते । अन्यत्र च "एतेन वै चैत्ररथङ्कापेया अयाजय"न्निति कापेयसम्बन्धिनश्चैत्ररथत्वं श्रूयते, "तथा, चैत्ररथस्य क्षत्रियत्व"न्तस्माच्चैत्ररथो नामैकः क्षत्रपतिरजायते"[3]ति । अतोऽभिप्रतारिणश्चैत्ररथत्वं क्षत्रियत्वं च गम्यते ।

तदेवं न्यायविरोधिनि शूद्रस्याधिकारे लिङ्गं नोपलभ्यत इत्युक्तम्, इदानीं न्यायसिद्धः शूद्रस्याऽनधिकारः श्रुतिस्मृतिभिरनुगृह्यत इत्याह—

संस्कारपरामर्शात्तदभावाभिलापाच्च ॥ ३७ ॥

ब्रह्मविद्योपदेशप्रदेशेषूपनयनसंस्कारः परामृश्यते "उप त्वा नेष्ये, तं होपनिन्ये" इत्यादिषु । शूद्रस्य चोपनयनादिसंस्काराभावोऽभिलप्यते-

१ अधुनेति नास्ति लि· पु· ।
२ काक्षसेनिमिति लि· पु· ।
३ चैत्ररथानामैकः क्षत्रपतिर्जायते—इति लि· पु· पाठः ।

"न शूद्रे पातकं किंचिन्न च संस्कारमर्हती"ति, "चतुर्थो वर्ण एकजातिर्न च संस्कारमर्हती"त्यादिषु ।

तदभावनिर्धारणे च प्रवृत्तेः ॥ ३८ ॥

"नैतदब्राह्मणो विवक्तुमर्हति समिधं सोम्याऽऽहरे"ति शुश्रूषोर्जाबालस्य शूद्रत्वाभावनिर्धारणे सत्येव ब्रह्मविद्योपदेशप्रवृत्तेश्च न शूद्रस्याधिकारः ॥

श्रवणाऽध्ययनार्थप्रतिषेधात् ॥ ३९ ॥

शूद्रस्य वेदश्रवणतदध्ययनतदर्थानुष्ठानानि प्रतिषिध्यन्ते "पद्यु ह वा एतच्छ्मशानं यच्छूद्रस्तस्माच्छूद्रसमीपे नाध्येतव्य,न्तस्माच्छूद्रो बहुपशुरऽयज्ञीय" इति । 'बहुपशुः,' पशुसदृश इत्यर्थः । अनुपशृण्वतोऽध्ययनतदर्थज्ञानतदर्थानुष्ठानानि न सम्भवन्ति । अतस्तान्यपि प्रतिषिद्धान्येव ।

स्मृतेश्च ॥ ४० ॥

स्मर्यते च श्रवणादिनिषेधः । "अथ हास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणम् उदाहरणे जिह्वाच्छेदो धारणे शरीरभेद" इति, "न चास्योपदिशेद्धर्म्मं न चास्य व्रतमादिशे"दिति च । अतः शूद्रस्यानधिकार इति सिद्धम् ॥

ये तु निर्विशेषचिन्मात्रं ब्रह्मैव परमार्थः, अन्यत् सर्वं मिथ्याभूतम्, बन्धश्चापारमार्थिकः, स च वाक्यजन्यवस्तुयाथात्म्यज्ञानमात्रनिवर्त्यः, तन्निवृत्तिरेव मोक्ष इति वदन्ति, तैर्ब्रह्मज्ञाने शूद्रादेरनधिकारो वक्तुं न शक्यते, अनुपनीतस्यानधीतवेदस्याऽश्रुतवेदान्तवाक्यस्याऽपि यस्मात्कस्माच्चि[1]दपि निर्विशेषचिन्मात्रं ब्रह्मैव परमार्थः अन्यत्सर्वं तस्मिन्मिथ्याभूतम्परिकल्पितमिति वाक्याद्वस्तुयाथात्म्यज्ञानोत्पत्ते,स्तावतैव बन्ध-

१ चिदिति नास्ति नि· पु· ।

७३८.

Digitized by Google

निवृत्तेश्च । न च तत्त्वमस्यादिवाक्येनैव ज्ञानोत्पत्तिः कार्या, न वाक्यान्तरेणेति नियन्तुं शक्यम्, ज्ञानस्यापुरुषतन्त्रत्वात् सत्यां सामग्र्यामनिच्छतोऽपि ज्ञानोत्पत्तेः । न च वेदवाक्यादेव वस्तुयाथात्म्यज्ञाने सति बन्धनिवृत्तिर्भवतीति वक्तुं शक्यम्, येन केनापि वस्तुयाथात्म्यज्ञाने सति भ्रान्तिनिवृत्तेः । पौरुषेयादपि निर्विशेषचिन्मात्रं ब्रह्म परमार्थो[1] ऽन्यत्सर्वं मिथ्याभूतमिति वाक्याज्ज्ञानोत्पत्तेः, तावतैव भ्रमनिवृत्तेश्च । यथा पौरुषेयादप्याप्तवाक्याच्छुक्तिकारजतादिभ्रान्तिर्ब्राह्मणस्येव शूद्रादेरपि[2] निवर्त्तते, तद्वदेव शूद्रस्यापि वेदवित्सम्प्रदायाऽऽगत[3]वाक्याद्वस्तुयाथात्म्यज्ञानेन जगद्भ्रमनिवृत्तिरपि भविष्यति । "न चास्योपदिशेद्धर्मं"मित्यादिना वेदविदः शूद्रादिभ्यो न वदन्तीति च न[4] शक्यं वक्तुम्, तत्त्वमस्यादिवाक्यावगतब्रह्मात्मभावानां वेदशिरसि वर्त्तमानतया दग्धाखिलाधिकारत्वेन निषेधशास्त्र[5]किंकरत्वाभावात् । अतिक्रान्तनिषेधैर्वा कैश्चिदुक्ताद्वाक्याच्छूद्रादेर्ज्ञानमुत्पद्यत एव । न च वाच्यम्—शुक्त्यादौ रजतादिभ्रमनिवृत्तिवत् पौरुषेयवाक्यजन्यतत्त्वज्ञानसमनन्तरं शूद्रस्य जगद्भ्रमो न निवर्त्तत इति, तत्त्वमस्यादिवाक्यश्रवणसमनन्तरं ब्राह्मणस्यापि जगद्भ्रमानिवृत्तेः । निदिध्यासनेन द्वैतवासनायां निरस्तायामेव तत्त्वमस्यादिवाक्यं निवर्त्तकज्ञानमुत्पादयतीति चेत्, पौरुषेयवाक्यमपि शूद्रादेस्तथैवेति न कश्चिद्विशेषः । निदिध्यासनं हि नाम ब्रह्मात्मभावाभिधायिवाक्यं यदर्थप्रतिपादनयोग्यं तदर्थभावना, सैव[6] विपरीतवासनां निवर्त्तयतीति दृष्टार्थत्वं निदिध्यासनविधेर्ब्रूषे । वेदानुवचनादीन्यपि[7] विविदिषोत्पत्तावेवोपयुज्यन्त इति शूद्रस्यापि विविदिषायां जातायां पौरुषेयवाक्याद्विवि-

१ परमार्थ इति नास्ति लि॰ पु॰ ।
२ ब्राह्मणस्य शूद्रादेरपीति पु॰ द्वयेऽपि पाठः ।
३ श्रवगतेति मु॰ पु॰ ।
४ नेति नास्ति लि॰ पु॰ ।
५ निषेधशास्त्रस्याकिंचित्करभावादिति मु॰ पु॰ पाठः ।
६ भावनयैवेति लि॰ पु॰ ।
७ अपिकारो नास्ति लि॰ पु॰ ।

Digitized by Google

ध्यासनादिभिर्विपरीतवासनायां निरस्तायां ज्ञानमुत्पत्स्यते, तेनैवापारमार्थिको बन्धो निवर्तिष्यते । अथ वा, तर्कानुगृहीतात् प्रत्यक्षादनुमानाच्च निर्विशेषस्वप्रकाशचिन्मात्रप्रत्यग्वस्तुन्यज्ञानसाक्षित्वं तत्कृतविविधविचित्रज्ञातृज्ञेयविकल्परूपं कृत्स्नं जगच्चाध्यस्तमिति निश्चित्य एवंभूतपरिशुद्धप्रत्यग्वस्तुन्यनवरतभावनया विपरीतवासनां निरस्य तदेव प्रत्यग्वस्तु साक्षात्कृत्य शूद्रादयोऽपि विमोक्ष्यन्त इति मिथ्याभूतविचित्रैश्वर्यविविधसृष्ट्याद्यलौकिकानन्तविशेषावलम्बिना वेदान्तवाक्येन न किंचित्प्रयोजनमिह दृश्यत इति शूद्रादीनामेव ब्रह्मविद्यायामधिकारः सुशोभनः । अनेनैव न्यायेन ब्राह्मणादीनामपि ब्रह्मवेदनसिद्धेरुपनिषच्च[1] तपस्विनी दत्तजलाञ्जलिः[2] स्यात् । न च वाच्यम्—नैसर्गिकलोकव्यवहारे भ्राम्यतोऽस्य केनचिदयं लोक[3]व्यवहारो भ्रमः परमार्थस्त्वेवमिति समर्पिते[4] सत्येव प्रत्यक्षानुमानकृतबुभुत्सा जायत इति तत्समर्पिका श्रुतिरप्यास्थेये[5]ति, यतो भवभयभीतानां साङ्ख्यादय एव [प्रत्यक्षानुमानाभ्यां वस्तुनिरूपणं कुर्वन्तः प्रत्यक्षानुमानकृतबुभुत्सां जनयन्ति । बुभुत्सायां जातायां] [6]प्रत्यक्षानुमानाभ्यामेव विविक्तस्वभावाभ्यां नित्यशुद्धस्वप्रकाशाद्वितीयकूटस्थचैतन्यमेव सत्, अन्यत्सर्वं तस्मिन्नध्यस्तमिति सुविवेचम् । एवंभूते स्वप्रकाशे वस्तुनि श्रुतिसमधिगम्यविशेषान्तरं च नाभ्युपगम्यते, अध्यस्ताऽतद्रूपनिवर्तनी हि श्रुतिरपि त्वन्मते । न च सत आत्मन आनन्दरूपताज्ञानायोपनिषदास्थेया, चिद्रूपताया एव सकलेतराऽतद्रूपव्यावृत्ततया तद्रूपत्वात्[7] । यस्य तु मोक्षसाधनतया वेदान्तवाक्यैर्विहितं ज्ञानमुपासनरूपम्, तच्च परब्रह्मभूतपरमपुरुषप्रीणनम्, तच्च

१ छिद्रे सर्वोपनिषच्चेति लि पु पाठः ।
२ दत्ततिलाञ्जलिरिति लि. पु. ।
३ लौकिकेति लि. पु, ।
४ समर्पिते इति पा. लि. पु. ।
५ इत्यास्थेयेति लि. पु. ।
६ [ ] एतच्चिह्नान्तर्गतपाठो लि. पु. त्रुटितः ।
७ सकलेतरतद्रूपव्यावृत्ताया आनन्दरूपत्वादिति लि. पु. पाठः ।

Digitized by Google

शास्त्रैकसमधिगम्यम्, उपासनाशास्त्रं चोपनयनादिसंस्कारसंस्कृताधीत-स्वाध्यायजनितं ज्ञानं विवेकविमोकादिसाधनानुगृहीतमेव स्वोपायतया स्वीकरोति, एवंरूपोपासनप्रीतः पुरुषोत्तम उपासकं स्वाभाविकात्मयाथात्म्यज्ञानदानेन कर्मजनिताज्ञानं नाशयन् बन्धान्मोचयतीति यतः, तस्य यथोक्तया नीत्या[1] शूद्रादेरनधिकार उपपद्यते ॥

अपशूद्राधिकरणं समाप्तम् ९ ॥

तदेवं प्रसक्तानुप्रसक्ताऽधिकारकथामपरिसमाप्य प्रकृतस्याङ्गुष्ठप्रमितस्य भूतभव्येशितृत्वावगतपरब्रह्मभावोत्तम्भनं हेत्वन्तरमाह—

तदेव प्रमिताधिकरणम्[1] कम्पनात् ॥ ४१ ॥

"अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति"

"अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मे"त्यनयोर्वाक्ययोर्मध्ये

"यदिदं किञ्च जगत्सर्वम् प्राण एजति निस्सृतम् ।

महद्भयं वज्रमुद्यतं[2] य एतद्विदुरमृतास्ते भवन्ति ॥

भयादस्याग्निस्तपति भयात्तपति सूर्यः ।

भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चम" इति—

कृत्स्नस्य जगतोऽग्निसूर्यादीनां चास्मिन्नङ्गुष्ठमात्रे पुरुषे प्राणशब्दनिर्दिष्टे[3] स्थितानां सर्वेषां ततो निस्सृतानां तस्मात्संजातमहाभयनिमित्तमेजनं कम्पनं श्रूयते । तच्छासनातिवृत्तौ किं भविष्यतीति महतोभयाद्वज्रादिवोद्यतात्कृत्स्नं जगत्कम्पत इत्यर्थः, भयादस्याग्निस्तपतीत्यनेनैकार्थ्यात् । महद्भयं वज्रमुद्यतमिति पञ्चम्यर्थे प्रथमा । भयञ्च परस्य ब्रह्मणः स्वभावः, "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः"

"भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः ।

भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम" इति—

---

१ यथोक्तरीत्येति मु॰ पु॰ २ मुद्यन्तमिति लि. पु. ।

३ निर्दिष्टमिति लि. पु. :

परस्य ब्रह्मणः पुरुषोत्तमस्यैवंविधैश्वर्यां[1] भगतेः ।

इतश्चाङ्गुष्ठप्रमितः पुरुषोत्तमः—

ज्योतिर्दर्शनात् ॥ ४२ ॥

तयोर्द्वयो[2]रेवाङ्गुष्ठप्रमितविषययोर्वाक्ययोर्मध्ये परब्रह्मासाधारणं सर्वतेजसां छादकं सर्वतेजसां कारणभूतमनुग्राहकं ह्याङ्गुष्ठप्रमितस्य ज्योतिर्दृश्यते ।

"न तत्र सूर्यो भाति न चन्द्रतारकं

नेमा विद्युतो भान्ति कुतोऽयमग्निः ।

तमेव भान्तमनुभाति सर्वं

तस्य भासा सर्वमिदं विभाती"ति ।

अयमेव श्लोक आथर्वणे परब्रह्माधिकृत्य श्रूयते । परज्योतिष्ट्वञ्च सर्वत्र परस्य ब्रह्मणः श्रूयते, यथा "परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" "तं देवा ज्योतिषां ज्योतिरायुर्होपासते ऽमृतम्[3]" "अथ यदतः परो दिवो ज्योतिर्दीप्यत" इत्यादिषु । अतो ऽङ्गुष्ठप्रमितः परं ब्रह्म ॥

प्रमिताधिकरणं समाप्तम् ६ ॥

अथार्थान्तरत्वादिव्यपदेशाधिकरणम् १० ।

आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥ ४३ ॥

छान्दोग्ये श्रूयते—"आकाशो ह वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मे"ति । तत्र संशयः- किमयमाकाशशब्दनिर्दिष्टो मुक्तात्मोत परमात्मेति । किं युक्तम् ?[4] मुक्तात्मेति । कुतः ? "अश्व

---

१ स्यैवैश्वर्या०-इति लि· पु· ।

२ द्वयोरिति नास्ति लि· पु· ।

३ इतिशब्दोऽधिको मु· पु· ।

४ किं युक्तमिति नास्ति लि· पु· ।

त्स्वार्थो । यथा छत्रिणो गच्छन्तीत्यादौ । अत्र प्रकृत्यर्थतावच्छेदक-
स्यापि प्रकारत्वम् । अन्यथा घृतं पिबत्वित्यादौ कर्मणोऽनन्वयापत्तेः ।

वेदान्तविदस्तु जहदजहत्स्वार्थामपि लक्षणां मन्यन्ते । विशिष्ट-
वाचकपदस्य विशेषणमात्रपरत्वे लक्षणा, गौर्नित्येत्यादौ । रथो गच्छती-
त्यादौ तिङो व्यापारो लक्ष्यः । तथा घटो भवतीत्यादावपि भूधातुरु-
त्पत्तिवाचीति वार्त्तिकम् । घटशब्दो घटार्थावयवेषूपचरितस्तेषां सिद्ध-
तया कर्तृत्वमुपपाद्यमिति तु टीका । तथा च कपालं घटोत्पत्त्यनुकूल-
व्यापारवदित्यर्थः । सुब्विभक्तौ न लक्षणा । व्युत्पत्त्यनुशासनवैयर्थ्यापत्तेः ।
अनुशासनबलादेव छन्दसि सा न दोषाय ।

केचित्तु आपो दारा इत्यादौ बहुवचनस्यैकत्वे लक्षणा । व्युत्प-
त्त्यनुशासनं तु लक्षणाया निरूढत्वप्रतिपादनायेत्याहुः । वस्तुतस्तु
रूपादिगतमेव बहुत्वं तत्र तत्र परम्परया भासते । अथ वा अनन्वित-
मेव तत्र बहुत्वम् । कश्चित्तु बहुवचनमेकत्वेऽपि शक्तम् । प्रकृतिविशेष-
समभिव्याहार एव तदभिधत्त इति प्रयोगाच्छक्तिवैचित्र्यमित्याह ।

शब्दस्पर्शरूपरसगन्धपदं न गुणिलक्षकम् । रसादिभ्यश्चेति पुन-
र्मत्वर्थीयविधानात् । गौणी तु लक्षणाविशेषो यत्र सादृश्यमेव संबन्धः ।
यथा गौर्वाहिक इति । सापि वृत्त्यन्तरमिति न्यायसाम्प्रदायिका मीमां-
सकाश्च ।

मुख्यावृत्तिः शक्तिरेव । तदभाव एव लक्षणोपासनात् । यथा
गङ्गायां घोष इत्यत्र गङ्गायां घोषवासासम्भव इति मुख्यार्थान्वयबाधा-
नन्तरं तीरे लक्षणेति ।

लक्षणा बीजं तु मुख्यार्थान्वयानुपपत्तिरिति मणिकृतः । तात्प-
र्यानुपपत्तिरिति सम्प्रदायः । लाक्षणिकं पदं नानुभावकम् । लक्ष्यान्वित-
स्वार्थबोधस्तु समभिव्याहृतपदान्तरादशक्तस्याननुभावकत्वादिति सम्प्र-
दायः । नव्यास्तु लाक्षणिकं पदमप्यनुभावकमिति मन्यन्ते ।

शाब्दबोधेऽसाधुत्वनिश्चयाभावोऽपि हेतुः । न चैवमपभ्रंशादन्व-
यबोधो न स्यादिति वाच्यम् । इष्टापत्तेः । व्युत्पन्नानां तत्स्मारितसाधु-

शब्दादन्वयबोधः । पामराणां तु शक्त्यारोपसत्त्वेत्यतो नानुभवविरोधः । नन्वसाधुत्वं साधुत्वाभावः, किं तत्साधुत्वम् । उच्यते व्याकरणव्युत्पादितत्वं साधुत्वम् । यः शब्दो व्याकरणेन यत्र व्युत्पादितः स तत्र साधुः । अत एव गावीशब्दो न गवि साधुः । ग्रामे ग्रामण्यपि न साधुः । तथाप्रयोगाभावेन निषेधकस्मृत्यनुमानात् । व्याकरणत्वं तु शब्ददोषगुणादित्वत्प्रकृतिप्रत्ययविभागकल्पनापुरःसरशब्दान्वाख्यापकवाक्यत्वम् ।

प्रकृतिर्द्विधा धातुप्रातिपदिकभेदेन । भ्वादयो धातवः । शप्प्रकृतित्वं धातुत्वम् । सुप्प्रकृतित्वं प्रातिपदिकत्वम् । तदाश्रयस्तु द्विविधः । सखण्डोऽखण्डश्चेति । आद्यो दण्डीत्यादिः । अन्त्यो गवित्यादिः । अस्य च जात्याकृतिव्यक्तयः शक्याः । मीमांसकमते तु जातिरेव शक्या । व्यक्तिस्त्वाक्षेपलभ्या । वैयाकरणानां तु मीमांसकमतमर्यादवृत्तिमात्रम् । परेषां तु महासामान्यमेव शक्यमिति ।

इमावेव भेदौ यौगिकरूढाविति क्रमेण व्यवहरन्ति । योगः संबन्धस्तन्मात्रवृत्तिनिमित्तो यौगिकः । न हि इह समुदायशक्त्यात्मिका रूढिरस्ति । प्रकृत्या दण्डस्य प्रत्ययेन च संबन्धस्य संबन्धिनोपस्थितावेव विशिष्टप्रतीत्युपपत्तौ तत्कल्पकाभावात् ।

प्रातिपदिकस्य पञ्चविधत्वमपि व्यवहरन्ति । तथा च टीका यदृच्छाशब्देन नाम्ना विशिष्टोऽर्थ उच्यते । यथा डित्थ इति । जातिशब्देन जात्या विशिष्टो, यथा गौरिति । गुणशब्देन गुणेन, यथा शुक्ल इति । क्रियाशब्देन क्रियया, यथा पाचक इति । द्रव्यशब्देन द्रव्येन यथा दण्डीति ।

प्रत्ययोऽपि सुप्तिङादिभेदेन बहुविधः । तत्र द्वितीयादीनां कर्मत्वादिकं शक्यं सुब्विकाराणां च पुंस्त्वादिकं शक्यम् । परसमवेतक्रियाफलशालित्वं कर्मत्वम् । करणत्वं तूक्तमेव । प्रकृत्याश्रयत्वं कर्तृत्वम् । प्रतिग्रहव्यापृतं कारकं संप्रदानम् । विश्लेषावधिरपादानम् । अधिकरणता स्वरूपसंबन्धविशेषः ।

तिङां जनकज्ञानत्वेन यत्नः शक्य इत्याचार्याः । यत्नत्वेन यत्नः, शक्य इति तु नव्याः । अन्योत्पत्त्यनुकूलव्यापारो भावनापरनामा शक्य इति भाट्टाः । कृतिराक्षेपतो धात्वर्थलभ्या, व्यापारस्तु धात्वर्थः । लिङ-र्थस्तु वर्तमानत्वादिरिति प्राभाकराः ।

लिङ्लोट्तव्यप्रत्ययप्रभृतीनां विधिप्रत्ययानां विधिः शक्यः । स चाभिप्रायमात्रमित्येके । आप्ताभिप्राय इत्याचार्याः । प्रवर्तनाभिधाव्यापार-पर्यायः स इति भाट्टाः । कार्यमपूर्वापरपर्यायं कार्यत्वविशिष्टं च, कार्यत्वं च कृतिसाध्यत्वे सत्युद्देश्यत्वमिति प्राभाकराः । इष्टसाधनत्वं स इति टीकाकृतः । कृतिसाध्यत्वे सति बलवदनिष्टाननुबन्धित्वं स इति चिन्तामणिकृतः । कृतिसाध्यत्वं न शक्यं किं त्वाख्यातस्य शक्यया: कृतेः साध्यत्वं संसर्गमर्यादया भासते तत्सम्बन्धबोधस्तु पश्चा-त्प्रमाणान्तरेणेत्यन्ये । आख्यातार्थकृतेः प्रकृत्यर्थविशेष्यत्वनियमात् । कृतिसाध्यत्वं शक्यमेव । यदि तु विनापि शक्त्या प्रमाणान्तरलभ्यं तदा न शक्यमेवेति तु परमार्थः । इष्टसाधनत्वं च इच्छानुकूलान्वयव्यतिरेकत्व-मेवेह हेतुपञ्चम्याः प्रयोजकत्ववदेवाभिधेयम् । अतो न नित्यविध्य-व्याप्यविरोधः ।

शब्दप्रमायां तात्पर्यप्रमा गुणो योग्यताप्रमा वा तात्पर्ये च लिङ्गानि ।

संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।

इत्येवं क्वचित् । क्वचित्तु उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम् । अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये इति कथितानि । निरूपिता-न्येवं चत्वारि प्रमाणानि ।

ननु सम्भवोऽपि मानान्तरम् । कथमन्यथा सम्भवति सहस्रे शत-मिति धीः । स च प्रचुरतरसाहचर्यसंवेदनाधीना बुद्धिरिति चेन्न ।

सम्भावनेयमनुमानं वा । अत एवानिर्दिष्टप्रवर्तकमिति इहोचुरिति प्रवादपारम्पर्यमैतिह्यमित्यपि पौराणिकमतमपास्तम् । तस्यापि शब्द एवान्तर्भावात् ।

ननु सङ्केतगृहश्चेष्टातोऽप्यनुभवात्सापि मानान्तरम् । न च शब्देन चेष्टायां सङ्केतग्रहात्तच्छब्दस्मृत्युपयोगिन्येव चेष्टा लिपिवदिति वाच्यम् । तथा सत्येडमूकस्य ततो व्यवहाराभावापत्तेः । तस्य चेष्टायां व्युत्पादकाभावात् । तथा हि । न तावच्छब्दस्तथा । अश्रुतत्वात् । नाप्यनुमानं लिङ्गाभावादिति चेन्न । यद्येतद्विषया मम प्रवृत्तिरस्येष्टाभाववती तदा मामुद्दिश्यायमेतादृशीं चेष्टां करोति इत्यनुमानादेव प्रवृत्त्युपपत्तेरश्वादीनामिव ।

प्राञ्चस्तु वृद्धव्यवहारेण पदानामिव चेष्टायामपि शक्तिर्गृहीता न शक्या निराकर्तुमिति सापि समयबलेन प्रमाणम् । परं तु शब्द एवान्तर्भवति समयबलेन अनुभवसाधनं शब्द इति हि शब्दलक्षणमित्याहुः । अत्र निबन्धकृतः । कर्मत्वाद्युपस्थापकविभक्तिविरहाचान्वयबोधकत्वं सम्भवतीति । तच्चिन्त्यम् । अपभ्रंशे विभक्तिसङ्केतारोपणेव चेष्टायामपि सङ्केतारोपसम्भवात् । तस्मात्सूष्ठूक्तं चत्वारि प्रमाणानि तथा च परामर्शि सूत्रम् । प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ॥

इति प्रमाणनिरूपणम् ॥

अथ प्रमेयम् ।

तच्च द्वादशविधम् । आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गभेदेन । तत्रात्मत्ववानात्मा । प्रतिविग्रहं नाना नित्यो विभुश्च । आत्मत्वं जातिभेदः । यदि तु संसार्यात्मजातिः सुखादिसमवायितावच्छेदकतया प्रमाणसिद्धा नात्मत्वमिति मतं तदा ज्ञानवत्त्वादिकमेव विभाजकम् । स च द्विविधः । ईश्वरो जीवश्च । तत्र नित्यज्ञानेच्छाप्रयत्नवानीश्वरः । सुखदुःखाद्याश्रयो जीवः । स च स्वस्यैव प्रत्यक्षः । तत्त्वौपनिषदाः सुखरूपमाहुः । बाह्यास्तु क्षणिकविज्ञानस-

न्तानात्मकम् । वयं तु तदुभयाश्रयं सुखिनमहमात्मानं जानामीति प्रतीतिप्रमाणकमाचक्ष्महे ।

भोगायतनं शरीरम् । भोगस्तु सुखदुःखसाक्षात्कारः । आत्मविशेषगुणाकारणमनःसंयोगवदन्त्यावयविवृत्तिजातिमत्त्वं शरीरत्वमिति प्रकाशकृतः । विशेषगुणाश्च रूपादयः । यदाहुः ।

रूपं गन्धो रसः स्पर्शः स्नेहः सांसिद्धिको द्रवः ।

बुध्यादि भावनान्तश्च शब्दो वैशेषिका गुणा इति ॥

द्रव्यानारम्भकजन्यद्रव्यत्वमन्त्यावयवित्वम् । इदं च प्रथमतो द्विविधम् । योनिजमयोनिजं च । योनिजं शुक्रशोणितसंनिपातजम् । तत्तु पार्थिवमेव । तच्च द्विविधं । जरायुजमण्डजं च । आद्यं मानुषादीनाम् । अन्त्यं पक्षिसरीसृपादीनाम् । शुक्रशोणितानपेक्षमयोनिजम् । पार्थिवादिभेदेन तच्चतुर्विधमित्यविवादम् । पार्थिवं देवर्षिनारदादीनाम् । जलीयं वरुणलोके, तैजसमादित्यलोके, वायवीयं वायुलोके, इत्यभ्युपगमात् ।

उद्भिज्जं तु तरुगुल्मादिकं न न्यायनये शरीरम् । नापि चेष्टाश्रयः शरीरं वृक्षादिषु भावादभावाच्च । पाषाणमण्डूकादिष्विति टीकास्वरसात् । उपायकारसंमतं चैतत् ।

केचित्तु वृक्षादिष्विति भग्नक्षतसंविज्ञानो बहुव्रीहिरयं मृतोऽमृतो वृक्ष इत्येवं मरणजीवनादिप्रतीतिमुक्त्वा वैशेषिकादिवच्छरीरत्वमेव वर्णयन्ति । भाट्टास्तु तथा व्योमशरीरोऽपि परमात्मश्रुतो श्रुत इति व्योमादीनामपि शरीरत्वमाहुः ।

इन्द्रियं षड्विधम् । घ्राणरसनचक्षुस्त्वङ्मनःश्रोत्रभेदेन । पार्थिवमिन्द्रियं घ्राणं गन्धग्राहकम् । आप्यं रसनं रसग्राहकम् । तैजसं चक्षुः रूपग्राहकम् । तदेकस्मिन् शरीरे एकमेव । न तु प्रतिगोलकं नाना । गोलकमेव चक्षुरप्राप्यकारी चेति दिङ्नागः । यदाह ।

सान्तरग्राहकं न स्यात्प्राप्तौ ज्ञाने ऽधिकस्य च ।

अधिष्ठानाद्बहिर्नाक्षं किं चित्साद्धिप्रयोगतः ॥

सत्यप्यन्तर्बहिर्भावे न शक्तिर्विषयेक्षणे ।
यदि च स्यात्तदा पश्येदप्युन्मील्य निमीलनादिति ॥

तच्चैतद्वार्तिकेऽतिविस्तरेण दूषितम् । व्यवस्थापितं च नयनस्य प्राप्यकारित्वमिति । न च नयनस्य प्राप्यकारित्वे शाखाचन्द्रमसोस्तुल्यकालग्रहणं न स्यादिति वाच्यम् । इष्टापत्तेः । क्रमिकत्वस्यैव वार्तिके उक्तत्वात् । शक्यं च तिर्यग्भूतेन चक्षुषा शाखच्छेदे तद्द्वयोः संयोग इत्युक्त्वा यौगपद्यं चापि समर्थयितुम् । युक्ततेजसः संसर्गद्रव्यतया बाह्यालोकचक्षुर्भ्यां तावद्दूरवर्तिनयनारम्भेण यौगपद्योपपादनं तदयुक्तम् । अन्धतमसे खद्योतविद्युतोर्निविडदूरविदूरयोर्युगपदुपलम्भस्यैवमप्यसमर्थनात् । मध्ये तेजोन्तराभावात् । न हि ताभ्यामेवारम्भः परस्पराश्रयात् । आरम्भे सति व्यवहितस्य प्राप्तिः सत्यां च प्राप्तावारम्भ इति । वायवीयं त्वक् स्पर्शग्राहकम् । अन्तरिन्द्रियं मनः सुखादिग्राहकं बहिःपरतन्त्रम् । अन्यथान्धबधिराद्यभावप्रसङ्गात् । शब्दग्राहकं श्रोत्रम् । श्रोत्रवर्जं यावन्ति बहिरिन्द्रियाणि प्रत्यक्षहेतुग्राह्यजातीयगुणवन्ति । न च श्रोत्रमपि बहिरिन्द्रियतया तथास्तु । तथा चातीन्द्रियशब्दान्तरवदेव श्रोत्रं ग्राहकमिति वाच्यम् । कर्मत्वस्योपाधित्वात् । अत एव बहिरिन्द्रियाणां मनोवैधर्म्ये न सगुणत्वं श्रोत्रेऽसत्त्वादिति वार्तिकम् ।

सांख्यास्तु त्वगेव बुद्धीन्द्रियम् । सैव च विचित्रशक्तिमत्तया रूपादिसाक्षात्कारिणी । कर्मेन्द्रियाणि च वाक्पाणिपादपायूपस्थान्यप्याहुः ।

चक्षुस्त्वङ्नासैव द्रव्यविशेष्यकसाक्षात्कारकारणानि । अर्थाः नयताः शब्दस्पर्शरूपरसगन्धास्तदर्था इति सूत्रं तु विभक्तविभागपरं सामान्यविशेषविभागद्वयवाक्यमिति ।

तत्राभ्युपगमसिद्धाः सप्त । द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः । द्रव्यत्वं जातिः । गुणवत्त्वं गुणयोग्यता वा । सा च गुणात्यन्ताभावाभावः । गुणत्वमपि जातिः । कर्मभिन्नासमवायिकारणत्वं वा । संयोगविभागानपेक्षकारणत्वं कर्मत्वम् । जातिविशेषो वा । नित्यत्वे

Digitized by Google

चात्यनेकसमवेतत्वं सामान्यत्वम् । नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः । समवायस्तूक्त एव ।

द्रव्यादिषट्कात्यन्ताभाव एवाभावत्वम् । न तु भावस्यात्यन्ताभावः । भावत्वं हि षड्भावत्वावच्छिन्नसामान्याभावः संसर्गाद्यनुगतत्वदाऽन्योन्याभावयोरव्याप्तेः । अथ तादात्म्यपरम्परासंबद्धाः सन्तस्तदा तदत्यन्ताभावः । केवलाभावाधिकरणतयात्यन्तानुगततत्तद्भावव्यक्तियात्मको न पदार्थविभाजकोपाधिः । अभावत्वमखण्डोपाधिरित्यप्याहुः ।

नास्त्यभावः पदार्थान्तरम् । किं तु केवलमधिकरणम् । तस्य कालसंबन्धो वा ज्ञानं वेति प्राभाकराः । अधिकरणादभिन्नो भिन्नश्चाभाव इति भाट्टाः ।

द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि । सुवर्णमपि द्रव्यान्तरमित्येकदेशिनः । अन्धकारः शब्दश्च वर्णात्मको द्रव्यान्तरमिति भाट्टाः ।

गुणा रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वस्नेहबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारशब्दाश्चतुर्विंशतिरेव । एतेषु किं कियद्द्रव्यवृत्तयः । तदुक्तम् ।

वायोर्नवैकादश तेजसो गुणा जलक्षितिप्राणभृतां चतुर्दश ।
दिक्कालयोः पञ्च षडेव चाम्बरे महेश्वरेऽष्टौ मनसस्तथैव चेति ॥

कर्माण्युत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च, भ्रमणरेचनस्यन्दनोर्ध्वज्वलनतिर्यग्गमनानयनोन्नमनादयो गमनविशेषा एव ।

सामान्यं द्विविधं परमपरं च । परं सत्ता । अपरं द्रव्यत्वादि ।
विशेषास्त्वपरिमिताः ।

समवायस्त्वेकः प्रत्यक्षः । वैशेषिकाणां सोऽतीन्द्रियः । प्राभाकराणां नित्यानित्यभेदेन द्विविधः । पुनश्च प्रत्यक्षाप्रत्यक्षतया । तत्रातीन्द्रियसम्बन्धिकोऽतीन्द्रियः । अन्यस्तु प्रत्यक्ष इति । भट्टास्तु समवायं

विशेषांश्च मन्यन्ते । स्वीकुर्वन्ति च वैशिष्ट्यं संबन्धान्तरं शक्तिं च पदार्थान्तरम् । अस्माकं तु शक्तिः कारणतैव ।

अभावस्तु प्रथमतो द्विविधः संसर्गान्योऽन्याभावश्च । प्रतियोग्यवृत्तित्वे सति सदातनाभावभिन्नाभावत्वं संसर्गाभावत्वम् । परस्परप्रतियोगिकाभावत्वमन्योन्याभावत्वम् । आद्यस्त्रिविधः । प्रागभावो ध्वंसोऽत्यन्ताभावश्चेति । प्रतियोगिजनकोऽभावः प्रागभावः । ध्वंसप्रतियोग्यभावो वा । जन्योऽभावो ध्वंसः । सदातनः संसर्गाभावोऽप्रतियोगिवृत्तिरभावोऽत्यन्ताभावः । नीलघटात्यन्ताभावे पीतघटात्यन्ताभावोऽतिरिक्त एव । तत्रैव नीलघटात्यन्ताभावस्त्वधिकरणात्मक एव । स चात्माश्रयः प्रामाणिकत्वान्न दोषावहः । तदाहुः ।

कथं स्ववृत्तिरिष्टा चेत् यथान्यत्रेति मन्यताम् ।
प्रमाणं शरणं वृत्तौ न भिन्नाभिन्नते यत इति ॥

अन्योन्याभावे संसर्गाभावादीनां भेदोऽप्यधिकरणमेव । अत्यन्ताभावस्य प्रतियोगिनस्तत्प्रागभावध्वंसाऽभावरूपाः । एवं प्रागभावस्यापि प्रतियोग्यत्यन्ताभावादयः । तथा ध्वंसस्यापि । अन्योन्याभावस्य तु प्रतियोगितावच्छेदका एवाभावाः । तद्बुद्ध्य एव तद्बुद्धेः प्रतिबन्धकत्वात् ।

नन्वेवं विरोधाभावेनाकाशात्यन्ताभावस्याकाशमभावो न स्यादिति चेत् । सत्यमेवैतत् । साम्प्रदायिकास्तु आकाशस्याभाव इति प्रतियोगिता भासते सा चाभावाभावत्वमतो धर्मिग्राहकमानादेवाकाशस्य स्वात्यन्ताभावमावर्ततेत्याहुः ।

लीलावतीकारस्तु अभावाभावत्वविषयः प्रमास्वानुरोधेनाभावोऽतिरिक्त एव । न चानवस्था घटात्यन्ताभावप्रतियोगिकस्यात्यन्ताभावस्य घटात्यन्ताभावानतिरिक्त इत्याहुः ।

अत्यन्ताभावोऽन्योन्याभावश्च पुनः सामान्याभावविशेषाभावभेदेन द्विविधः । सामान्यावच्छिन्नप्रतियोगिताको ऽभावः सामान्याभावः ।

यथा वायो रूपात्यन्ताभावः रूपिभेदश्च । तदितरो विशेषाभावः । यथा तत्तद्घटाभावः । प्रागभावप्रध्वंसयोरपि सामान्याभावत्वं के चिदिच्छन्ति ।

संसर्गाभावः पुनर्द्विविधः । व्याप्यवृत्तिरव्याप्यवृत्तिश्च । यथा घटात्यन्ताभावः संयोगात्यन्ताभावश्च । अन्योन्याभावस्तु व्याप्यवृत्तिरेव । के चित्तु अयं वृक्षः कपिसंयोगी मूले नेति प्रतीतेस्तस्याऽव्याप्यवृत्तितामाहुः । प्रतियोगित्वमभावाभावत्वं स्वरूपसंबन्धविशेषो वा ।

पृथिवीत्वसामान्यवती पृथिवी । रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वभावनेतरसंस्कारवती । सा च त्रिविधा । शरीरेन्द्रियविषयभेदेन । विषयस्त्रिविधः । मृत्पाषाणस्थावरभेदात् । प्राकारेष्टकादयो मृद्विकारा एव । मणिवज्रादयः पाषाणविशेषा एव । वृक्षतृणगुल्मौषधिप्रभृतयः स्थावरविशेषा एव ।

अप्त्वसामान्यवत्य आपः । गन्धस्थानाभिषिक्तस्नेहसहितपूर्वोक्तगुणवत्यः । आपोऽपि पूर्ववद्विधाः । विषयस्त्विह हिमकरकादिः । करकोकाठिन्यं पार्थिवोपष्टम्भात् ।

तेजस्त्वसामान्यवत्तेजः । रसगन्धस्नेहगुरुत्वेतरसकलपूर्वोक्तगुणयोगि । तच्च पूर्ववत्त्रिविधम् । पुनश्चतुर्विधम्, उद्भूतरूपस्पर्शम्, अनुद्भूतरूपस्पर्शम्, उद्भूतरूपमनुद्भूतस्पर्शम्, अनुद्भूतरूपमुद्भूतस्पर्शम् । यथा वन्हिचक्षुःप्रभानिदाघोष्मादि ।

नन्वनुद्भूतरूपस्पर्शयोर्मानाभावः । न च तेजस्त्वादिना रूपस्पर्शयोरनुमितिरेवोद्भूतयोर्बाधादनुद्भूतौ साधयतीति वाच्यम् । तेजस्त्वादेरप्रयोजकत्वात् । उद्भूततदुभयप्रागभाववतीव तदुभयात्यन्ताभाववत्यपि वृत्तौ विरोधाभावादिति चेन्न । शुक्लभास्वरादिसमवायितायाः तेजस्त्वेनैवावच्छेदादिति दिक् ।

सुवर्णं त्वभिभूतरूपस्पर्शमेव । अन्यथा त्वक्चक्षुर्ग्राह्यतापत्तेः । तदुभयजप्रत्यक्षे तु उद्भूतरूपस्पर्शयोस्तन्त्रत्वात् । न च हेम्नोऽभिभूत-

Digitized by Google

रूपत्वेऽप्यनुद्भूतत्वे पटप्रकाशकत्वापत्तिरिति वाच्यम् । तत्रापि अभिभूत-रूपाश्रयाः प्रभाया एव प्रकाशकत्वात् । अन्यथा घटं प्राप्तस्यैव चक्षुस्तत्प्रकाशकत्वे संयोगेन पटदाहापत्तेः । न चैवं दीपादिवैफल्यम् । तस्यापत्तं नान्तरीयकत्वात् । अनुद्भूतस्पर्शमेव तदिति केचित् ।

विषयतेजोऽपि चतुर्विधम् । भौमं दिव्यमुदर्यमाकरजं चेति । भौमं पार्थिवपर्णादेरेवमादि शुष्केन्धनप्रभवम् । दिव्यमबिन्धनं सौरविद्यु-दाद्यादि । उदर्यमशितपीतस्य रसादिभावेन परिणामनिमित्तं जलपा-र्थिवोभयनिमित्तकम् । आकरजं सुवर्णादि तेजोमात्रोत्पत्तौ पवनो निमित्तमित्याचार्याः ।

वायुत्वजातिमान् वायुः । रूपरसगन्धस्नेहगुरुत्वद्रवत्ववर्जमुक्तगु-णाश्रयः । शरीरेन्द्रियविषयप्राणभेदेन चतुर्विधः । विषयो वृक्षमात्रस्पर्शा-श्रयः । शरीरान्तःसंचारी पवनः प्राणः । स चैकोऽपि प्राणादिपञ्चवि-धक्रियाकारितया प्राणापानव्यानोदानसमानेति पञ्चसंज्ञां लभते । एते च पृथिव्यादयः चत्वारो नित्या अनित्याश्च । आद्याः परमाणुलक्षणाः । अन्त्याः द्व्यणुकाद्याः । ध्वंसाप्रतियोगित्वे सति सत्त्वमेव नित्यत्वम् । ध्वंसप्रतियोगित्वमनित्यत्वम् ।

शब्दसमवायिकारणमाकाशम् । तच्चैकं नित्यं परममहच्च । तस्य गुणाः संख्यादयः पञ्च शब्दश्च । तदेव शब्दसाक्षात्कारजनका-दृष्टविशिष्टकर्णशष्कुल्यवच्छिन्नं श्रोत्रमिति न्यायाचार्याः । तदाहुः । बधिरस्य श्रोत्रवांश्चेति व्याहतमिति । कर्णशष्कुल्युपहितं नभःश्रोत्र-मिति च टीकाकाराः । एवं चेन्द्रियधर्मता बधिरादीनामुपपद्यते ।

भाट्टास्तु दिशः श्रोत्रमिति श्रुतेर्दिगेव श्रोत्रमित्याहुः ।

आकाशं नीलरूपमपि प्रत्यक्षम् । यथा [illegible] श्रोत्रमिन्द्रियत्वेनैव भौतिकत्वादिति तु काशिका ।

आलोकमण्डल एवायं प्रत्यक्षश्चेति प्रभाकरमिश्राः ।

मूर्तद्रव्याभाव एवाकाश इति बौद्धाः ॥

कालः परत्वापरत्वविशेषहेतुः । संख्यादिपञ्चगुणवान्नित्यो विभुश्च । स चैकोऽप्युपाधिभेदेन भूतभाविवर्तमानादिव्यपदेशं लभते । स्वध्वंसाधिकरणकालत्वं भूतत्वम् । स्वप्रागभावाधिकरणकालत्वं भावित्वम् । स्वावच्छिन्नः कालो वर्तमानः ।

पूर्वापरादिप्रत्ययनिमित्तं दिक् । संख्यादिपञ्चगुणवती विभुर्नित्या च । सा चैकापि तपनपरिस्पन्दात्मकोपाधिभेदेन माहेन्द्रीत्यादिदशसंज्ञां लभते । आत्मोक्त एव ।

सुखादिसाक्षात्कारकारणमिन्द्रियं मनः । यत्संयुक्तमेव चेन्द्रियं साक्षात्कारमुपधत्ते । यदाहुः । आत्मा मनसा संयुज्यते मन इन्द्रियेणेन्द्रियमर्थेनेन्द्रियाणां प्राप्यकारित्वनियमात् । न च तथापि कृप्तैः पार्थिवादिपरमाणुभिर्मनोऽन्यथासिद्धमिति वाच्यम् । सुखादिसाक्षात्कारकारणतावच्छेदकं जातेस्तत्र कल्प्ये साङ्कर्यापत्तेः । घटादेरपि पृथिवीत्ववन्मनस्त्वापत्तेश्च । तस्य गुणाः संख्यादयः पञ्च परत्वापरत्वसंस्कारश्चेति । तच्च प्रतिशरीरं नाना । परमाणु च । यौपनिषदास्तु मध्यमपरिमाणं संकोचविकासवच्च तदाचक्षते । पृथिव्यादीनामन्यतरदेव मनः । व्यतिरिक्तमेव वा किं स्वपरिमितमेव तदिति तु भाट्टाः । निरूपितानि द्रव्याणि ।

इति द्रव्यनिरूपणम् ।

चक्षुर्मात्रग्राह्यो गुणो रूपम् । तच्च शुक्लपीतनीललोहितचित्रभेदेन बहुविधं सर्वं चैतत्पृथिव्यां संभाव्यते । जले शुक्लभास्वरमेव । तेजसि च तदेव भास्वरमिति विशेषः ।

रसनग्राह्यो गुणो रसः । स च षड्विधो मधुरादिः । सर्वश्चैषः पृथिव्यां संभाव्यते । जले त्वव्यक्तमधुर एव रसः ।

घ्राणग्राह्यो गुणो गन्धः ।

स च द्विविधः सुरभिरसुरभिश्च त्वङ्मात्रग्राह्यगुणः स्पर्शः । स चतुर्विधः । उष्णशीतानुष्णाशितश्चित्रश्चेति । तत्राद्यः तेजसि द्वितीयो जले । तृतीयो द्विविधः । पाकजोऽपाकजश्चेति । तत्राद्यः पृथिव्याम् । द्वितीयः पवने । चतुर्थः परस्परविजातीयस्पर्शवदारभ्यते ।

ननु नास्ति चित्रस्पर्शः तस्मिन्नसति अवयविनि स्पर्शजनकता कथमिति चेत्। विजातीयस्पर्शद्वयारब्धविजातीयस्पर्शद्वयावच्छेदभेदेन वर्त्तमानादेव। अपि च विजातीययोरारम्भकत्वे चित्रो रसश्चित्रो गन्धश्च स्यादविशेषात्। अपि च चित्रस्पर्शं प्रति न परस्परविजातीयस्पर्शत्वेन कारणता। चित्रस्पर्शादपि तदुपपत्तेः। नापि साक्षात्परम्परासाधारणविजातीयस्पर्शारब्धस्पर्शत्वेन। द्व्यणुके तदनुत्पादापत्तेः। तत्कारणपरमाणुगतस्पर्शयोर्विरुद्धस्पर्शानारब्धत्वात्। एतेन चित्ररूपमपि व्याख्यातम्। किं च चित्ररूपस्वीकारे श्वेतेनाश्वेतेन च चतुर्गोलकेनारब्धस्य पशोश्चित्ररूपवत्त्वनियमाद्वायव्यं श्वेतमालभेतेति विधिः प्रमत्तगीतः स्यात्। अत्र ब्रूमः। नैकस्मिन् धर्मिणि स्पर्शद्वयं संभवति। समानजातीयस्पर्शवदारब्धेऽपि स्पर्शद्वयापत्तेः। तत्र प्रागभावैक्यादेकस्पर्श इति चेत्प्रकृतेऽपि दीयतां दृष्टिः। अत्र विजातीयस्पर्शकल्पनामपेक्ष्य प्रागभावभेदकल्पनमेव लघीय इति चेत्,? तस्याः फलमुखत्वात्। अपि च प्रागभावभेदः क्लृप्तः। अत्रैव कल्प्यत इति चेत् न। समवायिकारणस्यासमवायिकारणयोः स्पर्शयोरेव वा एकमात्रस्पर्शजनकत्वकल्पनयापि तदुपपत्तौ विनिगमकाभावादिति। समवायिकारणे कार्यात्यन्ताभाव एव कार्याजनक इति पक्षे रूपत्वावच्छिन्नात्यन्ताभावस्यैकत्वाच्चित्रोत्पादो दुर्वार इति दिक्।

एवं च सति चित्रौ गन्धरसावपि स्यातामिति चेत्? का नो हानिः। किं वा अवयविनि तयोरभावादेव। न ह्यत्रास्पर्शनत्वप्रसङ्ग इव तत्र रसगन्धयोरभावे किं चिद्विरुध्यति। कारणता तु स्पर्शस्य निरुक्तरूपेणैव द्व्यणुके चित्रस्पर्शो नेष्ट एवेति बौद्धाधिकारे प्रतिपादितम्। एतेन चित्ररूपं व्याख्यातम्। श्वेतमालभेतेति पशौ निवेशमलभमान आनर्थक्यात्तदङ्गेष्विति न्यायेन पश्वङ्गगत एव श्वेतो विधीयत इति।

एते रूपादयः स्पर्शान्ताः उद्भूताः। अनुद्भूताश्च चक्षुर्घ्राणादिषु यथा कथं विज्ञेयाः। के चित्तु ज्ञानेष्वनुद्भूतत्वम्। अत एव न सर्वं ज्ञानमनुव्यवसीयत इत्याहुः।

Digitized by Google

उद्भूतत्वं जातिविशेषः । न च रूपत्वादिना परापरभावानुपपत्तिः । गत्वादिव्याप्यतारत्वादिवद् रूपत्वादिव्याप्यानां तेषां नानात्वात् । शुक्लत्वादिना कारणरूपाग्निसंयोगं प्रायोव्याप्याभ्यां च जातिभ्यां पुनः साङ्कर्यमिति चेत् । तर्हि रूपवृत्त्युद्भूतत्वमपि नानैवास्तु इति संप्रदायः । उद्भूतत्वेनैवानुद्भूतमपि व्याख्यातम् ।

मणिकृतस्तु, उद्भूतत्वानुद्भूतत्वे न जाती किं तु रूपत्वादिव्याप्यजातिमत्त्वमेवोद्भूतत्वम् । तदभावोनुद्भूतत्वं प्रत्यक्षे रूपे शुक्लतरतमत्वादिजातिसत्त्वादूष्मादिरूपे शुक्लत्वादिमात्रं तद्व्याप्यजातौ मानाभावादिति प्राहुः ।

रूपादयः स्पर्शान्ताः पाकजापाकजभेदेन पुनर्द्विविधाः । तत्राद्याः पृथिव्यामेव । अपाकजेष्वनियमः । तत्रापि पृथिव्यामपाकजाः कारणगुणपूर्वका एवेति । पीलुपाकवादिनो वैशेषिकाः । वयं त्वेकस्मिन्नेव घटे आमे श्यामस्य पक्वे रक्तस्य दर्शनात्तत्रानियममाचक्ष्महे ।

मीमांसकास्तु एकैका एव हि नीलारुणादिव्यक्तय इति मन्वाना रूपादीनां पाकजत्वमपाकजत्वं चोभयमपि नेच्छन्ति ।

पाकस्तु रसवद्वृत्तितेजःसंयोगो रूपवद्वृत्तितेजःसंयोगो वा तज्जन्य उष्णस्पर्शो वा । अत एव कृष्णलेऽपि पाकः । रूपादिपरावृत्तिः पाक इति तु टीका ।

संख्यात्वसामान्यवती संख्या । एकत्वादिपरार्द्धपर्यन्ता । सा चाव्यासज्यवृत्तिव्यासज्यवृत्तिभेदेन द्विधा । तत्रैकत्वमव्यासज्यवृत्ति । द्वित्वादिकं तु व्यासज्यवृत्त्येव । यावदाश्रयनिरूप्यत्वं व्यासज्यवृत्तित्वम् । स्वरूपसंबन्धविशेषो वा । एकत्वं द्विविधं नित्यमनित्यं च । नित्ये परमाणौ नित्यम् । कार्ये घटादौ समवेतं समवायिकारणगतैकत्वासमवायिकारणजन्यमनित्यम् । द्वित्वादिकं त्वनित्यमेव । तत्र द्वित्वं स्वाश्रयगतैकत्वद्वयासमवायिकारणकं तदुभयगोचरापेक्षाबुद्धिनिमित्तकं क्व चिदपेक्षाबुद्धिनिमित्तकं क्व चिदपेक्षाबुद्धिनाशात्क्व चिच्चाश्रयनाशान्नश्यति । तथा हि एक-

Digitized by Google

त्वद्वयज्ञानमथ द्वित्वोत्पत्तिरथ द्वित्वनिर्विकल्पकम् । अथापेक्षाबुद्धिनाशः । अथ द्वित्वनाश इत्येकः प्रकारः । यदापेक्षाबुद्धेः स्वाश्रयस्यावयवविभागस्य चैकदोत्पत्तिस्ततो विभागतः संयोगस्य नाशोऽपेक्षाबुद्धेश्च द्वित्वोत्पत्तिरथ द्रव्यनाशद्वित्वबुद्धी ततोऽपेक्षाबुद्धिद्वित्वयोर्नाश इत्यपरः । एतेन त्रित्वादावुत्पत्तिनाशावपि व्याख्यातौ । विशेषस्त्वेकत्वत्रयविषयकापेक्षाबुद्धिर्द्रष्टव्या । एकत्वचतुष्टयविषया चतुष्ट्वम् । इत्येवमधिकाधिकविषया पञ्चाद्यधिकमारभत इति । इदं तु वक्ष्यते, ननु द्विक्षणस्थायित्वस्य द्वित्वनिर्विकल्पककाल एव ज्ञाननाशो युक्तः । न च तथा सति द्वित्वसामान्यप्रकारकद्वित्वविशेष्यकं प्रत्यक्षं न स्यादतस्त्रिक्षणस्थायितापि क्वचित्स्वीक्रियत इति वाच्यम् । तादृशप्रत्यक्षे मानाभावात् । द्वित्वविशिष्टप्रत्यक्षस्य निर्विकल्पकादभ्युपपत्तेः । अत्र ब्रूमः । उपादानापरोक्षज्ञानाद्या प्रवृत्तेर्विषयसंबन्धोपपत्तये ज्ञानस्य त्रिक्षणस्थायिताया अपि क्लृप्तत्वेन तादृशप्रत्यक्षापलापे उपेक्षणीयतापत्तेरिति ।

प्राभाकरास्तु द्वित्वादिकमपि नित्ये नित्यमनित्ये कारणगुणपूर्वकमाश्रयनाशनाश्यमपेक्षाबुद्धिव्यङ्ग्यमाचक्षते । तन्न सम्यक् । समानदेशानां समानेन्द्रियग्राह्याणां प्रतिनियतव्यञ्जकव्यङ्ग्यताया असम्भवेन द्वित्वप्रत्यक्षकाल एव त्रित्वादेरपि प्रत्यक्षापत्तेः । द्वित्वादेर्नित्यत्वे तु जातिता दुर्वारा ।

न च संख्यां गुणत्वेनेच्छतामत्रेष्टापादनं सम्भवति । यदि त्वेकत्वं द्वित्वादिकं च जातिरेवेति कश्चिद्ब्रूयात्तं प्रति किमुत्तरमिति चेत् । तेषां परस्परं परापरभावानुपपत्तिस्तुल्यव्यक्तिकतापत्तिश्चेत्येवेति दिक् ।

परिमाणत्वसामान्यवत् परिमाणम् । तच्चतुर्विधम् । अणु महद्ध्रस्वं दीर्घं चेति । अणुत्वं जातिविशेषस्तद्वदणु । तच्च द्विविधम् । नित्यमनित्यं चेति । आद्यं परमाणौ तदेव च पारिमाण्डल्यमित्याचक्षते । तच्च नारम्भकम् । द्वितीयं द्व्यणुके । महत्त्वमपि जातिविशेषस्तद्योगि महत् । तदपि नित्यमनित्यं चेति द्विविधम् । आद्यं गगनादौ । तदेव च परममहत्त्वं विभुत्वमिति च व्यवहरन्ति ।

भट्टास्तु परमाणुद्व्यणुकयोरभावादस्त्यणुत्वम् । गगनादौ च प्रमाणाभावादस्त्येव परममहत्त्वमिति वदन्ति । ह्रस्वत्वदीर्घत्वे अपि परिमाणत्वावान्तरजातिविशेषौ तद्वती ह्रस्वदीर्घे । तत्राद्यं अन्याणुत्वसमानाधिकरणतया द्व्यणुक एव । अन्त्यं तु अवममहत्त्वसमानाधिकरणतया त्रसरेण्वादावेव । तत्त्वाकाशादाविति यथाश्रुतपदार्थप्रवेशानुसारिणः ।

आचार्यास्तु ह्रस्वत्वदीर्घत्वे अपि नित्यानित्यभेदेन द्विविधे तत्राद्ये परमह्रस्वत्वपरमदीर्घत्वे परमाणुषु गगनादौ च यथासंख्येन । अन्त्ये तु द्व्यणुके त्र्यणुके चेत्याहुः । मतद्वयेऽपि समिदादिष्विक्षुदण्डादिकमपेक्ष्य ह्रस्वव्यवहारोऽणुव्यवहार इव भाक्त इत्यवधेयम् ।

लीलावतीकारस्तु ह्रस्वत्वदीर्घत्वे न परिमाणान्तरे किं त्वणुत्वमहत्त्वयोरेवावान्तरविशेषावित्याह ।

तत्रानित्यमणुत्वं ह्रस्वत्वं च परमाणुगतद्वित्वासमवायिकारणकतया संख्याजन्यमेव । महत्त्वदीर्घत्वे तु क्वचित्संख्यातः क्वचित्परिमाणतः क्वचित्प्रचयत इत्येवं त्रिविधे । तत्र त्रसरेणौ महत्त्वदीर्घत्वे च द्व्यणुकगतत्रित्वसंख्यायाः समकालमुत्पद्येते । तयोश्च समवाय्यसमवायिभेदेऽपि भेदः प्रागभावभेदाददृष्टभेदाद्वेत्याचार्याः ।

स्वल्पपरिमाणकारणचयारब्धं घटमपेक्ष्य महापरिमाणेन कारणद्वयेन आरब्धे घटे महत्त्वदीर्घत्वे परिमाणयोनिनी द्वितूलके तु ते प्रचयहेतुके इति ।

चतुर्विधमपि जन्यं चैतत् परिमाणमाश्रयद्वितीयक्षणोत्पन्नमाश्रयनाशादेव नश्यति । देवदत्तादिशरीरं तु बाल्ययौवनवार्धकेषु भिन्नभिन्नमेवेत्यतः परिमाणस्य नोक्तनियमभङ्गः । परे तु तत्राश्रय एक एव प्रत्यभिज्ञानादिति मन्यमानाः परिमाणान्तरोत्पादमित्याहुः ।

एवमस्मात्पृथगिति व्यवहारहेतुर्गुणः पृथक्त्वम् । इदं द्विविधम् । एकाश्रितमनेकाश्रितं च । एकपृथक्त्वं प्रथमं द्विपृथक्त्वादिकं तु द्वितीयम् । तत्रैकपृथक्त्वं नित्यवृत्ति नित्यं जन्यवृत्त्यनित्यं कारणगुणादुत्पद्यते । द्विपृथक्त्वादयस्त्वनित्या एव । एकपृथक्त्वद्व्याद्यसमवायिकारणका एव

पृथक्त्वद्वयादिगोचरापेक्षाबुद्धिनिमित्तकाः । एकपृथक्त्वमाश्रयनाशादेव नश्यति । द्विपृथक्त्वादिकं तु क्व चिदपेक्षाबुद्धिनाशात् क्व चिदाश्रयनाशात् क्व चिदुभाभ्यामिति विशेषः ।

अन्याप्राप्तिः संयोगः । अव्याप्यवृत्तिर्व्याप्याश्रयश्चायम् । लीलावतीकृतस्तु व्याप्यवृत्तिः । भाट्टास्तु एकमात्रवृत्तिर्मन्यन्ते ।

स चायं त्रिविधः । अन्यतरकर्मज उभयकर्मजः संयोगजश्चेति । तत्र स्थाणुश्येनसंयोगः प्रथमः । मल्लयोः संयोगो द्वितीयः । तृतीयस्तु कारणाकारणसंयोगहेतुकः कार्याकार्यसंयोगहेतुकः । स क्व चिदेकस्मात्क्व चिदुभयाभ्यां क्व चिद्बहुभ्यश्च भवति । तत्राद्यो हस्ततरुसंयोगजः कायतरुसंयोगः । द्वितीयो द्वाभ्यां तन्त्वाकाशसंयोगाभ्यां द्वितन्तुपटस्याकाशेन संयोगः । तृतीयो बहुभ्यस्तन्तुतुरीसंयोगेभ्य एकः पटतुरीसंयोगः । क्व चिदेकस्मात्संयोगात्संयोगद्वयमुत्पद्यते । यथा पार्थिवपरमाणुना जलपरमाणोः संयोगाज्जलद्व्यणुकेपार्थिवपरमाणुसंयोग इव पार्थिवद्व्यणुकेऽपि जलपरमाणुसंयोगः । द्व्यणुकद्वयसंयोगस्तु ताभ्यामेवोत्पन्नाभ्यामिति । क्व चित्कारणानिरूपितसंयोगादपि संयोगः । यथा यानोत्तरदेशसंयोगात्पुरुषोत्तरदेशसंयोगः । न च तत्र पुरुषकर्मणैव संयोगः पुरुषे कर्मणः प्रत्यक्षबाधात् । न च संयुक्तसंयोगमात्रम् । तदपसिद्धान्तात् । एतेन केशतरुसंयोगजः कायतरुसंयोगोऽपि व्याख्यातः ।

तथा यानपूर्वदेशविभागात् पुरुषपूर्वदेशविभागोऽपि । प्रशिथिलत्वनिबिडत्वे संयोगत्वावान्तरजाती ।

तथा सुकुमारत्वकर्कशत्वे पृथिवीमात्रवृत्तिसंयोगवृत्ती जातिभेदौ ।

वैशेषिकास्तु स्पर्शवृत्तितामाहुः । विभुनोस्तु नास्ति परस्परसंयोगः । अन्यतरकर्मादेरभावात् । मीमांसकास्तु के च न पुनरन्यतरकर्मादीनां परस्परव्यभिचारिणामकारणतया आनन्तर्यमेव संयोगकारणमिच्छन्तस्तयोरपि संयोगो जायत इत्याहुः ।

अपरे तु तयोरस्त्येव संयोगः । किं तु नित्य एवेति विशेषमाचक्षते ।

	मूल्य
श्रीभाष्यस्य प्रथमाध्यायस्य प्रथमपादः श्रुतप्रकाशिकासंवलितः पं·श्रीराममिश्रशास्त्रिप्रणीतक्वाचित्कविषमपदटिप्पणीसमेतः	७।)
श्रीभाष्यस्य प्रथमाध्यायद्वितीयपादमारभ्य द्वितीयाध्यायान्तम् तथा ..	६)
श्रीभाष्यस्य तृतीयाध्यायमारभ्य चतुर्थाध्यायान्तम् तथा ..	३≡)
वेदार्थसंग्रहो भगवद्रामानुजमुनिप्रणीतः सटीकः	२।)
सेश्वरपूर्त्तिः प्रथमो बिन्दुः सत्सम्प्रदायाचार्यपं·स्वामिश्रीराममिश्रशास्त्रिप्रणीतो निर्विशेषाद्वैतनिराकरणपरः	१॥≡)
सेश्वरपूर्त्तिसहितो वेदार्थसंग्रहः	३॥।)
शास्त्रदीपिका	६।)
सङ्कर्ष–काण्डम्, जैमिनीयषोडशाध्याय्याः शेषचतुरध्यायीस्वरूपम्, भाट्टचन्द्रिकोपेतम्, पं·स्वामिश्रीराममिश्रशास्त्रिसङ्कलितटिप्पणीसमेतम् ।	१।)
काशिकाव्याख्या पदमञ्जरी, श्रीहरदत्तमिश्रविरचिता, भारद्वाजप·दामोदरशास्त्रिणा संशोधिता पूर्वार्द्धरूपा	५॥।)
तथा उत्तरार्द्धम्	८॥।)
माधवीया धातुवृत्तिः, नामधातुवृत्तिश्च, श्रीमाधवाचार्यसोदरेण श्रीसायणाचार्येण विरचिता	७॥)
काशिका, पाणिनीयव्याकरणसूत्रवृत्तिः, पण्डितवरवामनजयादित्यविरचिता	६॥)
श्रीतिङन्तार्णवतरणिः	६)
दिग्मीमांसा, श्रीसुधाकरद्विवेदिविरचिता	॥≡)
जैमिनिसूत्रवृत्तिः सुबोधिनीनामिका, श्रीयुतरामेश्वरसूरिविरचिता ..	५॥)
लक्षणावली, न्यायाचार्यश्रीमदुदयनविरचिता, शेषशार्ङ्गधराचार्यविरचितया न्यायमुक्तावल्याख्यया टीकया सहिता	॥।)
सिद्धान्ततत्त्वं नाम वेदान्तप्रकरणम्, मीमांसाधुरन्धरश्रीमदापदेवसूनुना विद्वद्वरेण श्रीमदनन्तदेवेन विरचितम्	॥।)
तत्त्वमुक्ताकलापः–सर्वार्थसिद्धियुतः, बौधायनीयार्थसिद्धान्तानुसारी विशिष्टाद्वैतब्रह्मनिरूपणपरः प्रकरणग्रन्थः, श्रीवेदान्ताचार्यापराभिधेन कवितार्किककेसरिणा सर्वतन्त्रस्वतन्त्रधिषणेन श्रीवेङ्कटनाथदेशिकेन प्रणीतः	५॥≡)
वेदान्तसिद्धान्तमुक्तावली, आर्थर्वीनिस्‌साहबकृताङ्गलभाषानुवादयुता ..	१॥।)
काव्यप्रकाशस्य इङ्ग्लण्डीयभाषानुवादः	२॥)
अथर्ववेदसंहिताया इङ्ग्लण्डीयभाषानुवादः	१२)
आगमप्रामाण्यम्, पञ्चरात्रतन्त्रप्रामाण्यव्यवस्थापनपरम्, श्रीभाष्यकाराणां परमगुरुणा श्रीयामुनाचार्यस्वामिना प्रणीतम्	॥।)
तर्कभाषा, श्रीमत्केशवमिश्रविरचिता श्रीमद्विश्वकर्मविरचितया न्यायप्रदीपाख्यटीकया सहिता	

Digitized by Google

CONTENTS.

Page.

BHÁVABODHINÍ TÍKÁ of Jaideva's Prasannaraghava Nataka, edited by Pandit Ganga Nath Jha, M. A., Professor of Sanskrit, Muir Central College, Allahabad 567-663-695

VIDHIVIVEKA of MANDANA MIŚRA with commentary Nyayakanika by Wachaspatti Misra, edited by P. Ram Shastri Tailang, Professor, Sanskrit College, Benares 583-615

BRAHMÁMRITAVARSHIṆI, edited by S. Venkataramana Iyer, B. A., B. L., High Court, Triplicane, Madras ... ... 599-535.

PADÁRTHARATNAMÁLÁ, edited by Nageshwar Panta Dharmadhikari, Scholar, Sanskrit College, Benares 631-743

PADÁRTHA-DHARMA-SAṄGRAHA, translated by Pandit Ganganath Jha, M. A., Professor of Sanskrit, Muir Central College, Allahabad 647

PADĀRTHATATTVANIRUPAṆA of RAGHUNĀTHA SIROMANĪ, with the commentary of Raghudeva, edited by Pandit Vindhyeçvarīprasād Dvivedin, Librarian, Sanskrit College, Benares ... 679

PÁTANJALASUTRAVRITTI of Nagesh Bhutt, edited by Taraktirtha Pandit Jewa Nath Mishra, Professor, Sanskrit College, Benares 711

SHRIBHĀSHYA of RĀMĀNUJA, (Text only,) Edited by the Revd. J. J. Johnson, Benares 321

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

CANCELLED
5108415
MAR 3 1976
JAN 12 '76 H
CANCELLED
5698197
APR 1 1 '77 H
Digitized by Google

3 2044 107 353 112

Digitized by Google